श्रीमद्भगवद्बादरायणप्रणीतम्

श्रीमद्भागवतम्

अथ दशमस्कन्धः

॥ अथ प्रथमोऽध्यायः ॥

राजोवाच -

कथितो वंशविस्तारो भवता सोमसूर्ययोः ।
राज्ञां चोभयवंश्यानां चरितं परमाद्भुतम् ॥ १ ॥

॥ अथ श्रीभागवतटिप्पणी सत्यधर्मयतिकृता प्रारभ्यते ॥

दशमे दिश मेऽम्बोधौ धीतर्या तरितुर्यतः ।
पाराशर्य परं पारमसि दाशसुतासुतः ॥ १ ॥

नवमान्ते कथां शुकेन सङ्कुच्य कथितां विस्तरतः श्रोतुमुत्कमनस्कः परीक्षित्किञ्चिदनूद्य श्रोतव्यं त्रयोदशश्लोक्या पृच्छतीति वदति ॥ राजेति । हे शुक! भवता सोमसूर्ययोर्वंशविस्तारोऽन्ववायार्थ-प्रपञ्चः। विस्तारो विग्रहो व्यास इत्यमरः । उभयोः सोमसूर्ययोः । हरदत्तेनोभयशब्दस्य द्विवचनमस्तीत्युक्तम् । तथाऽपि शेखरे ननु काकचोः को विशेष इत्यारभ्यैतन्मूलकमेवोभय-शब्दस्यासर्वविभक्तिकत्वं तद्धितश्चेति सूत्रे कैय्यटेनोक्तम् । तदाह कैय्यट इति हरदत्त इति । अत्रारुचिबीजं प्रागुक्तभाष्यविरोधः । भाष्ये तूभयशब्दपाठः प्रत्याख्यात इत्यन्तग्रन्थेन नास्तीति शंसनादस्वरसम् । अत एव सम्प्रदायविदः शय्यां जहत्युभयपक्षविनीतनिद्रा इति पञ्चमसर्गरघुवंशविशदने उभाभ्यां पक्षाभ्यामिति विगृह्य कैय्यटमतमुट्टङ्कितवन्त इति दिक् । वंशे भवा वंश्यास्तेषां चरितम् । कथित इति विपरिणतं सत्कथितमित्यन्वेति । कथननिमित्तं कथयति ॥ परमाद्भुतमिति । अत्याश्चर्यकरम् । परा मा ज्ञानं सम्पद्वा येन तच्च तदद्भुतं, तयाऽद्भुतमिति वा अद्भुतं स्कन्धान्तरे गतम् । किञ्चोभयवंश्यानाम् । अभवता न विद्यते भवः संसारो येषां तेषां मुक्तानां भावो

मुक्तत्वं, भवता साऽपि कथिता । त्वयेत्यनुक्त्वोचा कारप्रश्लेषभूमिकं पदं पूर्वं वदंश्चानन्तरं भवतेति भगवानमुमर्थं विवक्षितवानिति प्रेक्षणीयम् । वंशस्तथा तद्वंश्यानां च चरितं कथितः कथितमित्यन्वेति ॥ १ ॥

सुमनोरञ्जनी

श्रीगुर्वन्तगतलक्ष्मीनरसिंहाय नमो मङ्गलम् ॥ निर्विघ्नमस्तु ॥ ॐ ॥

श्रीमौद्गरार्यचरणानुग्रहैकसहायतः ।
अब्धिस्तरीतुमारब्धः स पारयतु मामिह ॥ १ ॥

नवमस्कन्धान्ते संक्षिप्योक्तंश्रीकृष्णचरितं श्रुतवतस्तत एव विस्तरतः श्रोतुं जातजिज्ञासस्य राज्ञः पूर्ववृत्तानुवादपूर्वकप्रश्नप्रकारं प्रदर्शयति ॥ कथित इति ॥ हे मुनिसत्तम । भवता सोमसूर्ययोः वंशस्य विस्तारः प्रपञ्चः । व्यासः प्रपञ्चो विस्तार इत्यभिधानात् । स च प्रपञ्चः तत्तद्वंशभुवामुत्पत्तौ निमित्तकथनादिरूपः । च अपि च । उभयवंश्यानाम् । वंशः सन्तानः । तत्र भवाः वंश्याः । तेषां परमाद्भुतं,अनन्यसाध्यतया अत्याश्चर्यकरम् । चरितम् कथितमिति लिङ्गव्यत्ययेनानुवर्तते ॥ १ ॥

यदोश्च धर्मशीलस्य नितरां मुनिसत्तम ।
तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः ॥ २ ॥

सत्यधर्मीया — तत्र यदुवंशेंऽशेनावतीर्णस्य यदोर्विष्णोरिति सामानाधिकरण्येनाप्यन्वयः । यथोक्तम् । अग्निना तुर्वशं यदुमित्यृग्भाष्यटीकयोर्यदस्ति तत उच्चत्वाद्यदुः । यदस्ति तत उच्चत्वाद्यदुरिति मयूरव्यंसकादित्वात्साधुरिति । विद्यमानसर्वोच्चत्वाद्विष्णुर्यदुरित्यर्थः । विष्णौ व्याख्यातोऽयं शब्दो ऋगैतरेयभाष्यदिशा स्कन्धान्तरे । तथा तत्त्वसङ्ख्यानटिप्पणे चास्मत्कृतेऽनु-सन्धेयः । वीर्याणि नितरां नः शंस । एतेन वक्तैकोऽनेके श्रोतार इति सूचितं भवति । तत्रेति समस्तमंशपदेन सम्बध्यते । तान् त्रायत इति तत्रः । स चासावंशश्च तेनेति । तत्र पृथक् पृथक्पदं सद्वंश इत्यर्थकं च । तकारद्वन्द्वाद्वन्द्वशङ्कापनुत्तिश्चोक्षा सा द्यावा पृथिवीत्यृग्व्याख्याभावबोधे सदिति भवत्कार्यमिति द्वेधा व्याकृतमित्यत्र दकारद्वयश्रवणं स्यादिति दूषणाभासभासकभाष्यदीपिकामनूद्य भाष्यदीपिकायुक्तिवात्यायामस्मत्कृतायां यद्द्वैतं न पश्यति समरुद्राक्षोल्लसन्मण्टपं महत्या गदया समन्वित इत्याद्यनद्यतनोदाहरणपूर्वकं कृताऽनुसन्धेया । न मम समर्थता सविस्तरसङ्कीर्तन इति वद स्वामिंस्त्वमेष इत्यपि भाषते । भवता रुद्रता यत्ते ततः शंसेति ॥ २ ॥

सुमनोरञ्जनी — चशब्दोऽप्यर्थः । तत्रेत्यनुकृष्यते । तत्र च तत्रापि । धर्मशीलस्य धर्मे भागवतधर्मानुष्ठाने शीलं स्वभावो यस्य । अथवा धारकत्वाद्धर्मो भगवान् । तत्समाधियुक्तस्य । शील समाधाविति धातोः । यदोः ययातिपुत्रस्य । वंशविस्तारः । परमाद्भुतं च । नितरां कथितमित्यनेनान्वयः । उपदिष्टमपि तत्त्वं अधिकारिण एव हृदयेऽवतिष्ठते नान्यस्येति न्यायमनुसन्दधानः शुकं प्रति स्वस्मिन्नुपदिष्टतत्त्वावधारणख्यापनद्वारा अधिकारितां निश्चाययितुं वृत्तानुवादो युक्त इति यदर्थं वृत्तानुवादस्तत्प्रार्थयते ॥ तत्रेति ॥ तत्र यदुवंशे । अंशेन कृष्णकेशाख्येन । अवतीर्णस्य । विष्णोः वीर्याणि पराक्रमान् । नः अस्मभ्यम् । शंसेति ॥ २ ॥

अवतीर्य यदोर्वंशे भगवान् भूतभावनः ।
कृतवान् यानि विश्वात्मा तानि नो वद विस्तरात् ॥ ३ ॥

सत्यधर्मीया — भूतभावनो जगदुत्पादको विश्वात्मा जगद्धितो वा तत्स्वामी वा तदादानादिकर्ता वा । यानि वीर्याणि पराक्रमान्विस्तरात् । ॠदोरप् स्तॄञ् आच्छादन इति स्मरन्ति । स च शब्दस्य विस्तर इत्यमरः । कृतवांस्तानि नो वद ॥ ३ ॥

सुमनोरञ्जनी — भूतभावनः भूतानि भावयत्युत्पादयतीति । भूतैः योग्यप्राणिभिः भावे मनसि नीयते रूप्यते । सर्वदा ध्यायत इति यावत् । अथवा भूतानां भावम् । भवः संसारः तत्सम्बन्धी तत्र भवत्वात् भावः सुखदुःखादिः । तं नयति प्रापयतीति । भगवान् श्रीहरिः यदोर्वंशे । अवतीर्य प्रादुर्भूय । यानि कर्माणि कृतवान् । नवमस्कन्धे 'जातो गतः पितृगृहादि'त्यादिना संक्षिप्योक्तान्यपि तानि विस्तरात् । नः अस्मभ्यं अस्मान् प्रति वा वदेत्यन्वयः ॥ ३ ॥

निवृत्ततर्षैरुपगीयमानाद् भवौषधाच्छ्रोत्रमनोभिरामात् ।
क उत्तमश्लोकगुणानुवादात् पुमान् विरज्येत विनाऽपशुघ्नान् ॥४॥

सत्यधर्मीया — मया वर्णितं त्वया चाकर्णितं किं पुनरवनीश जोषमास्वेति नो वदाहमेतादृशो न तादृश इति शंसति ॥ निवृत्ततर्षैरिति । निवृत्तो गतस्तर्षो कामो येषां ते मुक्ता जीवन्मुक्ताश्च तैः । कामोऽभिलाषस्तर्ष इत्यमरः । तैरुपगीयमानाद्भवौषधान्मङ्गलोन्माहागदादेकत्र परत्र संसाररोग-वियोगौषधरूपात् । श्रोत्रमनोभिरामाच्छ्रोत्राणि च मनांसि च तान्यभिरामयति तोषयतीति स तथा । श्रोत्रमनसामभिरामो येन तस्मात् । श्रोत्राणि मनांसि च श्रोत्रमनः । प्राण्यङ्गतयैकवद्भावः । तस्याभिरामस्तत्तस्मात् । उत्तमैर्ब्रह्मादिभिः श्लोक्यत इति स तथा । उद्गतं तमः संसारमूलमज्ञानं येन स श्लोकः । पद्ये यशसि च श्लोक इत्यमराद्यशो यस्य । गुणानामनुवादो हि पुनः पुनर्वादस्तस्मात्कः

पुमान्विरज्येत न कोऽपि भवेद्विरक्त इत्यर्थः । पशुघ्नात्पशुघ्नानतिमुग्धानिति पाठत्रयम् । बलभद्रः प्रलम्बघ्नो वृत्रघ्न इति मूलविभुजादित्वात्सिद्धमिति सिद्धान्तकौमुद्युक्तेः । केत्युपधालोपे ह्रो हन्तेरिति कुत्वे रूपम् । पशुर्भगवांस्तं घ्नन्ति, स नास्तीति मतिरेव हतिस्तस्मात्तान्वा विना मिथ्याज्ञानिनो विना भवेच्चेद्विरतिस्तादृशानामेव भवेन्नान्येषामिति भावः । यथोक्तमेकादशतात्पर्ये एतत्सजातीये ।

ब्राह्मणो विष्णुरुद्दिष्टः स नास्तीत्यभिचिन्तनम् ।
ब्रह्महत्या समुद्दिष्टा तां न कुर्यात्कथञ्चन इति ।

पालनात्सुखरूपत्वात्पशुनामा जनार्दन इति छान्दोग्यभाष्योक्तेर्हरिः पशुः । साधारणपशुमारकतया सम्मतानां धर्मव्याधाद्यानां तद्विरक्त्यदर्शनादेवंविधः पशुवधो ग्राह्यः । अपशुक् अपगता शुक् शोको यस्मात्तं घ्नन्ति ते तथेत्यपि व्याकुर्वते । अपशुघ्नान्हरिः सर्वेशोऽस्तीति ज्ञानिनो विना । उत्तमश्लोकगुणानुवादात् । उत्तमः श्लोको गुणैरनु हीन इति वादात् नितरां वृत्तस्तर्षो विषयाभिलाषो येषां तैरुपगीयमानाद्भवौषधात्तत्प्राप्तिभेषजरूपात् । श्रोतॄणां सतां पाक्षिकतयाऽमनोभिरामात्को विरज्येत न कोऽप्येतादृशो विरक्तियुक्तो भूयादिति दुरात्मदौरवस्थ्यपरताऽपि गमनिकयाऽनया ज्ञेया । निवृत्ताश्च ते तर्षा अभिलाषास्तैः करणैः श्रोत्रमनोभिरामाद्भवौषधाद्भवस्य रुद्रस्य निरन्तरजपद्वारा विषभेषजरूपात् स्वेनोपगीयमानात् श्लोकगुणानुवादाद्धेतोः पुमान्पुरुषो हिरण्यगर्भ उत्तम इयदामननादित्यधिकार्यधिकः । श्लोकगुणान् श्लोक्यन्त इति श्लोकास्ते च ते गुणाश्च तान् । शुघ्नान् शुचं संसारक्लेशं घ्नन्तीति ते तथा तान् उवादात् । ल्यब्लोपनिमित्ता चेयं पञ्चमी । ओः रुद्रस्य वादोऽतथ्यवितथ्यवादस्तं परित्यज्य विना भगवताऽपि तस्मात्को विरज्येतेति वा । शं लोकः सुखं ज्ञानं च । यथोक्तम् । कीर्तिं श्लोकं च विन्दत इति बृहदारण्यकोपनिषद्भाष्ये शं, लोकः श्लोकः परमानन्दं परमज्ञानं चेत्यर्थः । लुक् प्रकाश इति धातोरिति । उत्तमानां श्लोकः यैस्ते उत्तमश्लोकास्तत्प्रापकाः प्रातिस्विकगुणास्तदनुवादादिति वा । य उवादादुक्तरुपाद्विरज्येत स कोऽपि यज्जात्यवच्छिन्नोऽपि पुमान्, विना भगवता शुघ्नान् उत्तमश्लोकगुणानाप आपैव । अतस्तद्वीर्याणि वदेत्यन्वयो वा । यथोक्तम् । त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय । अतथ्यानि वितथ्यानि दर्शयस्व महाभुजेत्यादि वाराहे । यः पुमान्विरज्येत सः के स्वप्राप्ये सांसारिके लीने सुखे मोक्षसुखे वा विरज्येतेति वा । सुखद्वयस्य नपुंसकपुल्लिङ्गशब्दवाच्यताविशेषोऽवसेयः । यथोक्तं बृहदारण्यकभाष्ये लोकशब्दव्याकृतौ । संसाराल्लुप्तानां मुक्तानां कानि सुखानि लोकाः । लीनं सुखं क इत्युक्तं कं नाम क्षीयतेऽत्र यदिति । क इत्यानन्द उद्दिष्ट इति छान्दोग्यभाष्येऽप्युक्तेः ।

ततश्चैतत्सुखद्वयं त्यक्तवानेव स मानव इति भावः । वीति विष्णुः समुद्दिष्टो विशिष्टत्वाच्च सर्वत इति छान्दोग्यभाष्योक्तेः । अकयप्रवीत्येकाक्षररत्नमालोक्तेश्च विर्हरिः । तेन कः पुमान्विरज्येत न कोऽपि । सो विरज्यमान एव विना विशिष्टः पुरुषः इत्यप्यावृत्त्याऽन्वयो ज्ञेयः ॥ ४ ॥

सुमनोरञ्जनी — एतावन्तं कालं श्रुतामेव श्रीहरिकथां पुनः पुनः किं शुश्रूषसीति तत्राह । निवृत्ततर्षैरिति ॥ निवृत्ता तर्षा विषयाकांक्षा येभ्यस्तैः । पदरत्नावल्यां तु विषयालम्बुद्धिरहितैरित्यर्थ उक्तः । तस्य विषयेषु अलंबुद्धिः भूषणमिति बुद्धिः शोभनत्वाध्यास इति यावत् तद्रहितैरित्यभिप्रायः । अलंभूषणपर्याप्तीत्यभिधानात् । भवौषधात् । भवः संसारः तदाख्यरोगस्य औषधात् तत्परिहारहेतोरित्यर्थः । प्रसिद्धमूलिकादिवत् कट्वादिनाऽमनोहरं किं,नेत्याह ॥ श्रोत्रेति ॥ श्रोत्रमनसोरभिरामात् आनन्दकरात् । उत्तमश्लोकस्य हरेर्गुणानां यो वादः प्रतिपादकः शब्दः तस्मात् । पशुघ्नात् विना पृथग्विनेत्यादिना तृतीया । विकल्पात्पंचमी । स्वर्गादिकामनया यज्ञादौ पशुहिंसाकारिणः केवलं प्रवृत्तकर्मानुष्ठातुर्विनेति यावत् । अतिमुग्धानिति पाठे अन्यथाज्ञानिन इत्यर्थः । कः पुमान् विरज्येत न कोऽपीत्यर्थः । विषयासक्ताद्विनेति वक्तव्ये यत्पशुघ्नादित्युक्तं तेनायमर्थः सूचितः । नित्यपुरुषार्थसाधनं सुगमं शुद्धं निवृत्तमार्गं परित्यज्य अस्थिराल्पतरसुखमुद्दिश्य प्रवृत्तकर्ममार्गनिरतो न प्रेक्षावानिति ॥ ४ ॥

पितामहा मे समरेऽमरञ्जयैर्देवव्रताद्यातिरथैस्तिमिङ्गिलैः ।
दुरत्ययं कौरवसैन्यसागरं कृत्वाऽतरन् वत्सपदं स्म यत्प्लवाः ॥५॥

सत्यधर्मीया — बहुबहुज्ञमुखतः श्रुतमनुभवसिद्धं माहात्म्यं न हातुमुत्सहेऽतो वक्तव्यमेवेति वक्तुं काञ्चित्सङ्गतिं विज्ञापयति ॥ पितामहा इति । समरे रणे मे मम पितामहाः पञ्च पाण्डवा अमरञ्जयैः । असंज्ञायामपि बाहुलकान्मानवमावर्तं नावर्तन्त इतिवन्मुमागमे छान्दसेऽशनायां हि मृत्युः सर्वाशनतेत्यर्थे बिन्दुः । आधिक्येऽधिकमिति सूत्रादिति बृहद्भाष्योक्तदिशा सर्वामरेत्यर्थके बिन्दौ वाऽमरञ्जयैरिति सम्भवति । अमारान्देवाञ्जयन्ति ते तथा तैः । अमराणां वरादिना मरणरहितानां जयो यैरिति वा तैः । देवव्रतो भीष्मः स एवाद्यो येषां ते तथा । देवं क्रीडां स्त्रिया सह व्रतयति, देवस्य व्रतं त्यागो येनेति सः । व्रताद्भोजनतन्निवृत्त्योरित्युक्तेः । पयो व्रतयति शूद्रान्नं व्रतयतीत्युदाहरणे । वेतूर्ध्वरेताः सततं भवानीति श्रीमदुक्तेः । ते च तेऽतिरथाः । देवव्रतो हरिव्रतवानादिर्येषां ते च ते रथा येषां तैरित्यर्थः । तिमिङ्गिलैस्तिमिं गिरति गॄ निगरणे मूलविभुजादिः कः । अतिविभाषेति लः । गिलेऽगिलस्येति मुम् । तिमिङ्गिलादयश्चाथेत्यमरभानुदीक्षितीये मत्स्यविशेषाणां नामेत्युक्तेस्तिमिङ्गिलतुलैः । दुरत्ययं दुःसाधोऽत्ययोऽतिक्रमणं यस्य तं कौरवाणां सैन्यं सेना तदेव सागरः

समुद्रस्तं वत्सपदं वत्सस्तर्णकस्तत्पदमिव । लुप्तोपमेयम् । कृत्वा, यः प्लवो येषां तेऽनायासतरण एव तात्पर्यम् । यत्प्लवा येनैव प्लवः प्लुतगतिर्यस्य, प्लवः शब्दः कृष्णेत्यादेर्येषां ते तथा तरन् । प्लवः कारण्डवे भेके कुलके फलके कृपौ । शब्दे प्लुतिगतौ प्लक्षे चण्डालजलकाकयोरिति विश्वः । यस्य स्वान्वत्सपदं सुतस्थानं कृत्वा । यत्प्लवा यः प्लवः पोतो येषां ते सन्तोऽतरन् । यं वत्सपदं वत्सापदेशं कृत्वेति वा । पुत्रदूतत्वादिना कृत्वा । प्रियः सुहृदः खलु मातुलेय आत्मार्हणीयो विधिकृदित्यादेः । अनेन वत्सपदं कृत्वेतीरणेनेरणीयं यत्प्लवा इति वत्सपदतरणस्यानपेक्षितरिकृतत्वादतो यत्प्लवो यत्प्लव इति शङ्का कल्पितेति ज्ञेयम् । स्म निन्दां धिक्कारं यन्ति प्राप्नुवन्तीति स्मयन्तस्ते प्लवाः पोता यैरिति स्मयत्प्लवाः सन्तः । स्म पादपूरणेऽतीतसामिनिन्दार्थयोर्मतमिति विश्वः । स्मयन्तः स्मयमाना अस्मदसाध्योऽयं व्यापार इतीव प्लवा येषां त इति वा । एवं तारणं नास्मत्साध्यमिति प्लवा विसिस्मिर इवाभवन्निति भाव इति वा । स्मयन्त इति चान्द्या रीत्येति ज्ञेयम् ॥ ५ ॥

सुमनोरञ्जनी — एवं सामान्यतः संक्षिप्य राज्ञा कृतं प्रश्नं प्रदर्शयित्वा विशेषतो विस्तरेण च कृतं दर्शयति श्लोकत्रयेण । तत्रादौ राजा स्वपूर्वजोपकारितया हरिं स्तौति ॥ पितामहा इति । मे पितामहाः धर्मादयः । यत्प्लवाः यः कृष्ण एव प्लवः उडुपं येषाम् । तादृशाः भूत्वा । समरे । अमरानपि जयन्तीति तादृशैः । ज्ञायामपीत्यादिवन्मुमागमः । देवव्रतो भीष्मः स एवाद्यो येषामतिरथानां, तद्रूपैस्तिमिङ्गिलैः तन्नामकमत्स्यविशेषैर्विद्यमानैः निमित्तैः । दुरत्ययं अत्येतुम-शक्यम् । कौरवाणां सैन्याख्यसमुद्रम् । वत्सपदं तज्जलमिव कृत्वा आयासं विना अतरन् स्मेत्यर्थः । तिमिर्नाम दशयोजनपरिमितो मत्स्यः । तमपि ग्रसति यो मत्स्यः स तिमिङ्गिल इति ॥ ५ ॥

द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं सन्तानबीजं कुरुपाण्डवानाम् ।
जुगोप कुक्षिङ्गत आत्तचक्रो मातुश्च मे यः शरणं गतायाः ॥ ६ ॥

सत्यधर्मीया — साक्षादधोक्षजाध्यक्षता मत्साक्षीक्षितेति न त्यक्ष्यामि तत्कथामृतमतस्तद्वदेति वदति ॥ द्रौणीति । यः कृष्णो मे मातुरातुराया उत्तरायाः स्वं शरणं गतायाः कुक्षिमुदरं गतः प्रविष्ट आत्तचक्र आत्तं चक्रं येन सः सन् कुरुपाण्डवानां कुरवश्च दुर्योधनाद्याश्च पाण्डवाश्च धर्माद्याश्चेति द्वये तेषां सन्तानबीजं वंशबीजायितमिदं मदङ्गं मत्कलेवरमपि जुगोपापीपलत् । किं घटितं सङ्कटं तवागतमित्यत आह । द्रौणेरश्वत्थाम्नो यदस्त्रं 'निर्वंशं करिष्ये पाण्डवकुलमिति' कृतसङ्कल्पेन मुक्तं ब्रह्मास्त्रं तेन विप्लुष्टम् । उष प्लुष दाह इति स्मरणाद्दग्धमिति । ममैवं ज्ञानमपि तदानीं तद्दत्तमित्यप्यवयति ॥ मेय इति । कुक्षिं गतो यो मातुर्ज्ञातुर्मम सकाशान्मेयो ज्ञेयः सन् जुगोपेत्यन्वयः। अनेन मदङ्गं मातुरित्येवोक्तौ स्वमातुरित्यर्थसम्भवे भवेदतिरिक्तं म इति शङ्का दुर्मुखीकृतेति ज्ञेयम् ।

चात्पाण्डवव्यसनं च वीक्ष्येति ग्राह्यम् । ग्राह्यं च कुन्त्यादिप्रार्थनं च ।। यथोक्तं प्रथमेऽश्वमेधपर्वणि च। तेषां तव्द्यसनं वीक्ष्येत्यादि । ततः कृष्णं समासाद्य कुन्तिभोजसुता तदा । प्रोवाचेत्यारभ्य प्रपन्नानामियं चेति दयां कर्तुमिहार्हतीत्याध्यायावसिति ।

मातुर्गर्भगतो वीरः स तदा भृगुनन्दन ।
ददर्श पुरुषं कञ्चिद्दह्यमानोऽस्त्रतेजसा ।
अङ्गुष्ठमात्रममलं स्फुरत्पुरटमौलिनम् ।
आपीच्य दर्शनं श्यामं तटिद्वाससमच्युतम् ।
क्षतजाक्षं गदापाणिमात्मनः..... ।
परिभ्रमन्तमुल्काभं भ्रामयन्तं गदां मुहुः ।
अस्त्रतेजः स्वगदया मिषतो दशमासस्य..... ।

तत्रैवान्तर्दधे हरिरिति । प्रथमे प्रथमतो गर्भगो भगवानवददित्युच्यते तथा गदेति । अत्र दशमे चात्तचक्र इति । तथाऽश्वमेधपर्वणि च । नान्तरनन्तनिवेशः शंसितः । किञ्च

गर्भस्थस्यास्य बालस्य विना प्राणेन पातनम् ।
तथा मृतः शिशुरयं जीवतामभिमन्युजः ।
इत्युक्तेर्वासुदेवेन स बालो भरतर्षभ ।

शनैः शनैर्महाराज प्रास्पन्दत सचेतन इत्युक्तिः, जुगोप कुक्षिं गत आत्तचक्र इत्येवोक्तिश्च कथमिति चेन्न । आचार्यैरेवाभिधानात्समाधानस्य । तथा हि ।

प्रविवेशपुरं कृष्णस्तदाऽसूतोत्तरा सुतम् ।
द्रौण्यस्त्रसूदितं बालं दृष्ट्वा कुन्त्यादिकाः स्त्रियः ।
शरण्यं शरणं जग्मुर्वासुदेवं जगत्पतिम् ।
प्रत्यक्षमात्मनाभेऽन्तः रक्षितं प्रसवे हतम् ।

पुनरुज्जीवयामास केशवः पार्थतन्तव इति । अन्तर्यथा न मृतः स्यात्तथा ररक्ष कुक्षिस्थः । भूतलपातकाले पुनर्मृतोऽपतत् । तत उज्जीवयामासेत्युभयैककण्ठ्यात् । परमवशिष्यते गदासुदर्शनगदने कथमिति शङ्कामात्रम् । चक्रं राष्टास्त्रयोरपीति तथाऽस्त्रं प्रहरणेऽपि चेति विश्वाच्चक्रशब्द आयुधमात्रवचनोऽत्रेति । तच्च प्रथमस्कन्धानुसन्धानेन गदेति गदनसम्भवात् । शङ्खचक्रगदापद्मधराश्चिन्त्या हरेर्भुजा इत्यादेस्तत्सहितता सहजेति द्वयोः स्थानद्वय उक्तिर्वा । याः शरणं गताः

कुन्त्याद्यास्ताभ्यो मातुश्च निमित्तं जुगोपेत्याद्युर्वैरितं पूर्ववत् । जु इति सौत्रो धातुर्गतिवेगवाची । ततो भ्रागभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विबिति क्विप्प्रत्यये जवतेर्दीर्घश्चेति काशिकोक्तेर्जू इति जाते ह्रस्वो नपुंसक इति ह्रस्वे जु इति भवन्मदङ्गविशेषणम् । जु गतं मदङ्गम् । गोपनकृदपि न गोपसुतादन्य इत्यप्याह ।। गोपकुक्षिं गत इति । गोपालपालितपुत्र इति द्योतयितुं कुक्षिज इत्यनुक्तिरुक्तिश्च कुक्षिं गत इति मन्तव्यम् । यः स एव जुगोपेत्यन्वयः । मनोजुवेत्यृग्भाष्यटीकायां मनोजु मनोवेगिनावित्युक्तेः । विस्तरस्तट्टिपणातोऽवसेयः । विप्लुष्टं भावे क्तः । विप्लोषं दाहं जु प्राप्तं मदङ्गमिति वा । पाण्डवानां सन्तानबीजं कुर्विति शरणं गताया मातुः कुक्षिं गत इदं मदङ्गं यश्च जुगोपेत्यन्वयो वा । अत एव कुरुपाण्डवेति जुगुप्सिताजुगुप्सितसन्तानबीजमित्युक्तिमस्वरसां मत्वाऽऽचार्याः केशवः पार्थतन्तव इत्येवावदन्निति मन्तव्यम् । ननु भक्तिपादीयं कुरुपाण्डववत्तेषामुपपत्तेः पृथग्वच इत्यनुव्याख्यानव्याख्यावसरे सुधायां पाण्डवानां कुरुत्वेऽपि सामान्यविशेषापेक्षया सन्तानबीजं कुरुपाण्डवानामित्यादौ कुरुभ्यः पृथग्वचनमित्युक्तिविरोधोऽत्रैव तत्र पार्थेत्येवोक्तिरोध इति चेन्न । निर्वीर्यं सामान्यविशेषप्रयोगं प्रदर्श्य त एवोपलक्षणयैतद्ग्रहोऽप्यभिमतष्टीकाकाराणामिति सर्वैककण्ठ्यसम्भवात् । अत एव कुरुभ्यः पृथग्वचनमित्येव वचनम् । न च कुरुपाण्डवानां सन्तानबीजमित्यन्वयप्रदर्शनमिति मन्तव्यम् ।। ६ ।।

सुमनोरञ्जनी — स्वस्यैवोपकर्तृतयापि तं स्तौति ।। द्रौण्यस्त्रेति । यो हरिः द्रौणेः अश्वत्थाम्नोऽस्त्रेण विप्लुष्टं दह्यमानम् । कुरूणां तद्वंश्यानां पाण्डवानां च । पाण्डवानां कुरुत्वेऽपि गोबलीवर्दन्यायेन सामान्यविशेषभावमाश्रित्य सजातीयवैशिष्ट्यकथनाय पृथग्व्यवहार इति ज्ञेयम् । इदं दृश्यमानम् । मदङ्गं मम शरीरम् । शरणं गतायाः मे मातुः कुक्षिं गतः । आत्तचक्रः स्वीकृतचक्राद्यायुधः सन् । आद्यर्थकबहुवचनांतचक्रपदेन समासः । तेन प्रथमस्कन्धोक्तगदायुधत्वमपि सङ्गृहीतं भवति । जुगोप रक्षितवानिति योजना । मदङ्गमित्यत्र बुध्या अङ्गमिति विच्छिद्य मे मातुश्चाङ्गं जुगोपेति योज्यम् । पदरत्नावल्यान्तु इदं प्रत्यक्षमिति भावेनोक्तं मेय इति । मया मेयो ज्ञेयः । मम दृग्विषय इत्यपि योजितम् ।। ६ ।।

वीर्याणि तस्याखिलदेहभाजामन्तर्बहिः पूरुषकालरूपैः ।
प्रयच्छतो मृत्युमनामयं च मायामनुष्यस्य वदस्व विद्वन् ।। ७ ।।

सत्यधर्मीया — अखिलदेहभाजां सकलदेहधारिणामन्तर्बहिश्च क्रमात्पुरुषरूपैः कालरूपैश्च मृत्युं दुःखमनन्तरं मरणं चादन्धन्तमः । अनामयं नीरोगतां सुखमिति यावत् । तथा मोक्षं च प्रयच्छतो ददतस्तस्य मायामनुष्यस्य स्वेच्छोपात्तमनुजतनुमतो वीर्याणि । नैतानि गोप्यानि गुरो इत्यप्याह ।।

वीर्याणीति । विशेषत ईर्याणि शंसनीयानि । तर्ह्येवं मानवतनुः कुतोऽभवद्भगवानित्यत आह ॥ मायेति । इच्छयैव मनुष्यो न तु तुच्छजनवज्जननं जनार्दनस्येति भावः । हे विद्वन् ज्ञानिन् शुक! वदस्व । भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वद इत्युक्तेः । शृण्वित्युपमन्त्रणपूर्वकं वदेत्यर्थः । वद सन्देशवचनं इत्यस्य वा इदं रूपम् । स्वविद्वन् भगवज्ज्ञानिन्निति वा । परः स्वो हरिरुद्दाम इति वचनात् ॥ ७ ॥

सुमनोरञ्जनी — न केवलं मम पूर्वजानां मातुर्मम चेति त्रयाणामेवोपकारस्तेन कृतः किन्तु देहधारिणां सर्वेषामपि क्रियमाण उपकारः अनुभवसिद्ध इति दर्शयन् तन्महिमानं पृच्छति ॥ वीर्याणीति ॥ हे विद्वन् । अखिलदेहभाजाम् । अन्तः पुरुषरूपैः बिम्बरूपैः । बहिः कालरूपैः कालनियामकरूपैश्च । मृत्युं संसारम् । अनामयं मोक्षं च प्रयच्छतो, मायया स्वेच्छया । वस्तुतोऽमानुषस्यापि विडम्बनाय मनुष्यवत्प्रतीयमानस्य विष्णोर्वीर्याणि वदस्वेत्यन्वयः ॥ ७ ॥

रोहिण्यास्तनयः प्रोक्तो रामः सङ्कर्षणस्त्वया ।
देवक्या गर्भसम्बन्धः कुतो देहान्तरं विना ॥ ८ ॥

सत्यधर्मीया — ननु मुने सङ्कर्षणमहीश्वरमिति हि किल बलो देवकीसुतत्वेन कीर्तितः । स एव बलं गदं सारणं चेति रोहिणीगर्भप्ररोहिणी त्वयैव कथितः । कथमन्तरा शरीरान्तरं योनिद्वयसंसर्ग एकस्यादृष्टचर इति परीक्ष्य परीक्षित्पृच्छति ॥ रोहिण्या इति । सङ्कर्षणो रामस्त्वया रोहिण्यास्तनयः प्रोक्तो नवमान्ते । तस्यैव देवक्या गर्भसम्बन्धो देहान्तरं विना कुतः किंकारणकः । अत एव मयाऽपि मन्दमुक्तमिति नेत्याह ॥ प्रेति । प्रकर्षेणोक्त इति । देवक्या गर्भसम्बन्ध इति गर्भपदसमस्तस्यैकदेशोत्कीर्तनेन सम्बन्धशब्दस्यावर्तितस्य तृतीयान्तरोहिणीपदेनान्वयः । रोहिण्या सम्बन्धः कुत इत्यर्थः । सर्वजनीने प्रमेये किं चित्रयसि चेतःपातः क्षितिमित्यत आह ॥ अस्तनय इति । अस्तो निरस्तो नयो नीतिर्यस्य स तथा निर्नीतिक इत्यर्थः ॥ ८ ॥

सुमनोरञ्जनी — विस्तरतः कथने बीजभूतां स्वमनोगताशङ्कां दर्शयति । रोहिण्या इत्यादिना ॥ त्वया संकर्षणस्तदवतारो रामः रोहिण्यास्तनय इति प्रोक्तः बलं गदं सारणं चेत्यादिना । देवक्याः गर्भसम्बन्धश्च प्रोक्तः वसुदेवस्तु देवक्यामित्यादिना इत्यन्वयः । स कुतः कथं देहान्तरं विना घटते । गर्भद्वयसम्बन्धस्य देहद्वयं विनाऽसंभवादिति भावः ॥ ८ ॥

कस्मान्मुकुन्दो भगवान् पितुर्गेहाद् व्रजं गतः ।
क्व वासं ज्ञातिभिः सार्धं कृतवान् सात्वतां पतिः ॥ ९ ॥

सत्यधर्मीया — पितुर्वसुदेवस्य ज्ञातिभिः सार्धं साकं सात्वतां पतिः क्व वासं कृतवान् ॥ ९ ॥

सुमनोरञ्जनी — मुक्तिं ददातीति मुकुंदः। पितुर्गेहाद्व्रजं गत इति यत् तत् कस्मात्कारणात् व्रजं गतोऽपि, सात्वतां पतिः । सुखार्थकसातेः क्विपि सात् सुखं तद्वन्तो मुक्ताः तेषां पतिः कृष्णः ज्ञातिभिः सार्धम् । क्व कस्य गृहे वासं कृतवान् ॥ ९ ॥

व्रजे वसन् किमकरोन्मधुपुर्यां च केशवः ।
भ्रातरं चावधीत् कंसं मातुरद्धाऽतदर्हणम् ॥ १० ॥

सत्यधर्मीया—मधुपुर्यां च वसन् किमकरोदित्यन्वयः । मातुर्भ्रातरं कंसम् । अतदर्हणं हननार्हम् । अद्धेति स्वहस्ततः सम्यगिति मातुर्भ्रातरं कंसमित्येकसरण्यानुक्तिस्तदयोग्यतायत्तेति ज्ञेयम् ॥१०॥

सुमनोरञ्जनी — व्रजे मधुपुर्यां च वसन् किमकरोदिति योज्यम् । ननु मधुपुर्यां कंसवधं कृतवानिति प्रसिद्धमेव । पुनः किं पृच्छसीत्यतः प्रश्नतात्पर्यमाह ॥ भ्रातरमिति ॥ अत्र वा मधुपुर्यामित्येतत्सम्बध्यते । मधुपुर्यां अतदर्हणं तस्य वधस्यायोग्यं मातुर्भ्रातरं मातुलमित्यर्थः । अवधीदिति अद्धा निश्चितम् । तथापि तत्, चशब्दात्कुत इत्याकृष्यते । कुतो निमित्तादिति । कंसवधे निमित्तं किमिति भावः ॥ १० ॥

देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभिः ।
यदुपुर्यां सहावात्सीत् पत्न्यः कत्यभवन् विभोः ॥ ११ ॥

सत्यधर्मीया — मानुषं देहमाश्रित्य स्थितैर्वृष्णिभिरित्यप्यन्वयः ॥ ११ ॥

सुमनोरञ्जनी — मानुषम् अमानुषमपि मन्ददृष्ट्या मानुषवत्प्रतीतम् । यदुपुर्यां मधुरायाम् ॥११॥

एतदन्यच्च सर्वं मे मुने कृष्णविचेष्टितम् ।
वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतम् ॥ १२ ॥

सत्यधर्मीया — अन्यन्मयाऽविज्ञातं सर्वं कृष्णविचेष्टितं वक्तुमर्हसि ॥ १२ ॥

सुमनोरञ्जनी — एतत् मया दृष्टम् । अन्यच्च एतदुपयुक्तपूर्वापरकथासन्दर्भम् । मे मह्यम् । श्रद्दधानाय श्रन्नामास्तिक्यबुद्धिः तां दधानाय । वक्तुमर्हसीति ॥ १२ ॥

नैषाऽतिदुस्सहा क्षुन्मां त्यक्तोदमपि बाधते ।
पिबन्तं त्वन्मुखाम्भोजसृतं हरिकथामृतम् ॥ १३ ॥

सत्यधर्मीया — बुभुक्षितं न प्रतिभाति किञ्चनेत्युक्तेरहं बोधयामि बोधस्तव कथं भवेन्नृपोपोषितस्येत्यतो भाषते ॥ नेति । एषा सर्वप्रत्यक्षसिद्धाऽतिदुःसहा क्षुत्क्षुधा त्यक्तोदमपि त्यक्तमुदं सन्ध्याद्युपयुक्तोदकमन्तरेण येन तं मां न बाधते । तर्ह्येतदन्तरा किं वा भक्तं भुक्तवानसीति नेत्याह ॥ पिबन्तमिति । सृतं बहिरुपायातं पिबन्तं कर्णाभ्यामिति शेषः । पिबन्तं श्रुतवन्तम् ॥१३॥

सुमनोरञ्जनी — नन्वस्ति ते श्रद्धादिकं तथापि प्रायोपविष्टस्य ते क्षुद्बाधेन न मनः स्थिरं भवत्यतो मदुपदिष्टं प्रमेयं कथं त्वद्बुद्धिपथमारोहेन्मम श्रमश्च विफलः स्यादिति तत्राह ॥ नैषेति ॥ दुःसहा सोढुमशक्याऽपि एषा क्षुत् त्यक्तोदमपि आचमनादिकमन्तरा पानीयोदकरहितमपि मां न बाधते । तत्र निमित्तमाह ॥ पिबन्तमिति ॥ त्वन्मुखं तव मुखं अम्भोजमिव तेन सृतं गलितं, कथैवामृतमिव कथामृतम् । उपमितसमासोऽयम् ॥ १३ ॥

सूत उवाच -

एवं निशम्य भृगुनन्दन साधुवादं वैयासकिः स भगवानथ विष्णुरातम् ।
प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः ॥१४॥

सत्यधर्मीया — एवं परीक्षित्पृष्टः किं शुकोऽकरोदिति शौनकसन्देहं परिहरति सूत इत्याह ॥ सूत उवाचेति । हे भृगुनन्दन शौनक! साधुवादं निशम्य वैय्यासकिः गतम् । व्याससूनुर्विष्णुरातं प्रत्यर्च्य ''वरीयानेष ते प्रश्नः कृतो लोकहितं नृपेति'' सत्कृत्य भागवतप्रधानस्तच्छ्रेष्ठः कलिकल्मषघ्नं कृष्णचरितं व्याहर्तुमारभत ॥ १४ ॥

सुमनोरञ्जनी — एवं पृष्टवते राज्ञे प्रीत्या प्राहेत्याह ॥ एवमिति ॥ हे भृगुनंदन शौनक । भागवतेषु भगवद्भक्तेषु प्रधानः भगवान् वैय्यासकिः व्याससूनुः,अपत्ये व्यासशब्दस्येञ् अकङ् च । स शुकः एवं साधुवादं निशम्य अथ विष्णुरातं परीक्षितं प्रत्यर्च्य संभाव्य कलिकल्मषघ्नं विष्णुचरितं व्याहर्तुं वक्तुं आरभतेति योजना । अथ प्रश्नरूपं साधुवादमिति वा । प्रश्नकार्त्स्न्येष्वथो अथेत्यभिधानात् । कृष्णचरितं अथ कार्त्स्न्येन व्याहर्तुमारभतेति वा योज्यम् । साधुवादमिति विष्णुरातमित्यस्य वा विशेषणम् ॥ १४ ॥

श्रीशुक उवाच -

सम्यग् व्यवसिता बुद्धिस्तव राजर्षिसत्तम ।
वासुदेवकथायां ते यज्जाता नैष्ठिकी रतिः ॥ १५ ॥

सत्यधर्मीया — प्रत्यर्चनमुदश्चयति ॥ सम्यगिति । हे राजर्षिसत्तम राजर्षिश्रेष्ठ! ते यद्यतो वासुदेवकथायां तच्छ्रवणे नैष्ठिकी स्थिरा चरमकालिकी रतिरासक्तिर्जाताऽतस्तव बुद्धिः कर्तव्याकर्तव्यनिश्चयात्मिका । यथोक्तं बुद्धिर्ज्ञानमिति गीताभाष्ये । कार्याकार्यविनिश्चयो बुद्धिः । ज्ञानं प्रतीतिर्बुद्धिस्तु कार्याकार्याविनिश्चय इत्यभिधानम् । सम्यग्व्यवसिता प्रान्तगन्त्री सम्यग्विगतमवसितमलमित्युपरमणं यस्याः सेति वा नैष्ठिकी रतिः यज्जाता यस्या बुद्धेः, सा ते बुद्धिस्सम्यग्व्यवसितेत्यन्वयो वास्तवः । राजर्षय इति स्तोत्रं येषां ते च ते सन्तश्च तेषु श्रेष्ठेति वा । बुद्धिरिति ज्ञानमात्रं सम्यग्व्यवसिता सर्वशाखास्वपि भगवानेक एव प्रतिपाद्य इति सर्वसन्मतैकथयपरा इति वा । यथोक्तं गीताभाष्ये । बव्ह्यो हि बुद्धयो मतभेदात् । तत्कथमेकत्र निष्ठां करोमीत्यत आह ॥ व्यवसायात्मिकेति । सम्यग्युक्तिनिर्णीतानां मतानामैक्यमेवेत्यर्थ इति । सम्यक् समीचीनं ज्ञानवत्कुलं व्यव रक्ष । सिता धवला प्रशस्तेति वा सिता मया ज्ञातेत्यावृत्त्याऽन्वयो वा । सितो धवले निबद्धज्ञातयोरपीति विश्वः । समश्चतीति, समः समिरिति सम्यादेशः । अबुद्धिर्बुध्यभावः सिता बद्धेति वा । राज्ञामृषीणां, च सन्तोऽवसादका दुरात्मानस्तांस्तमयति । तमु ग्लान इति स्मृतिः । ग्लापयतीति स तथा । यद्वा राजानश्च ऋषयश्च ते सन्तश्च तैस्तम्यते कांक्ष्यत इति स तथा सर्वथा तदपेक्षित इत्यर्थः । पुरुतमं पुरूणामित्यृग्भाष्यटीकायां पुरुभिस्तम्यते आकाङ्क्ष्यते तमु अभिकाङ्क्षायामिति व्याख्यानात् ॥ १५ ॥

वासुदेवकथाप्रश्नः पुरुषांस्त्रीन् पुनाति हि ।
वक्तारं पुच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥ १६ ॥

सत्यधर्मीया — श्रोतव्या वक्तव्या च हरिकथेति तत्कार्यनिरूपणेन निरूपयति ॥ वासुदेवकथेति । हि यतो, वक्तारं पृच्छकं श्रोतॄनिति त्रीन् पुरुषान्पुनाति पवित्रयति । निदर्शनं दर्शयति ॥ तत्पादेति । तस्य वासुदेवस्य पादसलिलं गङ्गादिजलं यथा गङ्गा गङ्गेति कीर्तयन्तं तथैव माहात्म्यपृच्छकं श्रोतॄंश्च पुनाति तथेति । तव प्रश्नो यथा समीचीन इत्यर्थः । यथाशब्दस्य सम्यगर्थकत्वं षष्ठे स्पष्टमभिहितमनुसन्धेयम् । एवमन्वयनेन कथं वक्तृसम्बन्धिनः प्रश्नस्य तत्पावकता कथन्तरां कथाया मामित्येवातीतपद्ये कथनात्प्रश्नपर्यन्तानुधावनमिति शङ्काग्रन्थिर्मन्थरित इति ज्ञेयम् । यद्वा पृच्छ्यत इति प्रश्नो हि कथारूपः प्रष्टव्योऽर्थ इत्यर्थः । प्रश्नमेतं वद प्रभो इत्यादेः ॥ १६ ॥

भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः ।
आक्रान्ता भूरिभारेण ब्रह्माणं शरणं ययौ ॥ १७ ॥

सत्यधर्मीया — अन्यच्च सर्वमिति सूचितं वक्तव्यत्वेन तदिदानीं किमर्थं भगवानवततारेत्ये-तद्रूपमित्यर्थात्सूचयंस्तदुत्तरं सङ्गमयन्नाह ।। भूमिरिति । दृप्ता अहङ्कृता नृपव्याजा राजापदेशा दैत्या दैतेया एव नृपतयोऽवतीर्णास्तेषामनीकशतायुतैरनीकानां सैन्यानां शतायुतैः । तात्पर्यं तु बाहुल्ये । तन्निमित्तको यो भूरिभारस्तेनाक्रान्ता व्याप्ता पीडितेति यावत् । ब्रह्माणं चतुर्मुखम् ।। १७ ।।

गौर्भूत्वाऽश्रुमुखी खिन्ना रुदन्ती करुणं यथा ।
उपस्थिताऽन्तिके त(स्य)स्मै व्यसनं समवोचत ।। १८ ।।

सत्यधर्मीया — गौर्भूर्गोरूपिणीति केचित् । करुणयतीति करुणं स्वव्यसनमवोचतेत्यन्वयः । करुणं यथा भवति तथा रुदन्ती । विभोरिति पाठे तस्य विभोर्ब्रह्मण इत्यर्थः । अन्तिके उपस्थिता भूत्वा व्यसनं तत्प्राप्ताशुभं विपत्तिं वा । व्यसनं त्वशुभेऽनिष्टफले पापे विपत्ताविति विश्वः ।। १८ ।।

ब्रह्मा तदुपधार्याथ सह देवैस्तया सह ।
जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः ।। १९ ।।

सत्यधर्मीया — तन्मेदिनीखेदं देवैः सह तया च सह सत्रिनयनो महादेवसहितः । सह देवैरित्यनेनैव वामदेवो ग्रहीतुं शक्योऽप्राधान्यपिशाचि तु तं न मोचयति । सत्रिनयन इत्युक्तावपि । इति किमिति पृथक् प्रमथकथनमिति चेत् । शङ्का तु निश्शङ्कमङ्कुरिताऽन्तरिति मतिमति न चित्रं त्वयि । तर्हि कर्णाविभ्यर्णं आनय विनेय वक्ष्यामः । सर्जको रजसा स्थूललोचनविलोचन इत्याद्युक्तेस्तृतीयनेत्रवीतिहोत्रमारमारकस्यापीदं मथनसमर्थता नास्तीति द्योतयितुं वा । एतत्पक्षे तृतीयं नयनं यस्य तेन सहित इति विग्रहः । त्रिशब्दस्य तृतीयवाचित्वं त्रिदशशब्दान्तर्गतत्रिशब्दवत्त्रिभाग इत्यादिवद्द्रष्टव्यम् । देवाः सर्वेऽपि सर्वं सहायामवतीर्य सेवां कृत्वा कृपामृषाकपेः सम्पादयन्ति नायं तथेति तत उत्कृत्य पृथगुक्तिरिति वा । एते देवा वासुदेवसेवां विधाय व्यवधानाव्यवधानेन धाम स्वं स्वं भेजिरेऽयं तु चिरञ्जीवः सन् भूमौ जीविष्यतीति भावमाविष्कर्तुं वेति । न केवलं मेदिनीखेदत एव धातुर्विधातुं तत्समाधानं, धावनं सिन्धुं प्रति, किन्तु सप्ततन्तुमुखाखण्डसत्कर्मविलोप-तस्तत्क्रतुकृज्जनान्निरीक्ष्येत्यप्याह ।। सत्रिनयन इति । सत्रिषु क्रतुकारिष्वाहुत्यादिद्वारा तद्वत्सु सुरेषु वा नयनं कृपादृष्टिः । उपसर्गाश्च धातुलीनार्थद्योतका इति नयनमनुनयनं वा यस्य स तथा सन्निति वा समाधिसम्भवात् । क्षीरपयोनिधेः क्षीराब्धेस्तीरं तटम् ।। १९ ।।

तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् ।
पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ।। २० ।।

सत्यधर्मीया — वृषाकपिं हरिम् । हरिर्विष्णू वृषाकपीत्यमरः । वृषं धर्ममाकम्पयति । कपि कम्पि चलन इति स्मरणात् । अहिकम्प्योर्नलोपश्चेतीः । वृषाद्धर्मादाकम्पयति तदननुष्ठातॄन्दुष्टानिति वा। वर्षति कामान् । वृष सेचने इगुपधः कः । आकम्पयति पापानि । पूर्ववदिः । वृषश्चासावकपिरिति वा । वृषेण स्वानुष्ठितधर्मेणाकं दुःखं पियति गमयतीति स तथा पि गतौ अन्तर्भावितण्यर्थो वा विच् संज्ञापूर्वकत्वान्न गुणः । किपि तु ह्रस्वस्येति तुगागमे शासनस्यानित्यतया नेति ज्ञेयम् । वृषं धर्मं कम्पयत्यनुकम्पयतीति वा । अन्येषामपि । तुराषाट् इष्टापूर्तमितिवद्दीर्घः । इन्द्रं वा कम्पयति प्रापयतीति वा । भक्ताभिलषितसेचक इति, सुखरूपत्वादा सुखरूपत्वात्क आको वा, स चासौ स च, पालयतीति पिश्चेति वृषाकपिर्वा । पातेः किः । पुरुषसूक्तेन, पुरुषं पूर्णषड्गुणं सर्वशरीरशायिनं जगन्नाथं जगदधिपं प्राणनाथं वा देवदेवं सर्वदा सर्वदेवैः स्तुत्यमुपतस्थे । उपान्मन्त्रकरण इति पुरुषसूक्तस्य करणत्वात्तिष्ठतेरात्मनेपदम् । देवपूजेत्यादिवार्तिकादपूजयदिति वा । पुरुषसूक्तेनेत्युक्तिस्तु वेदाः पुरुषसूक्तगा इत्युक्तेरेतन्मात्रस्तोत्रे सर्ववेदेन देवस्तुतिर्भवतीति भावेन वा । लोके लोकानामनुबन्धे बोधिते दयोदयमेतीति, पद्भ्यां भूमिरजायतेति तत्रोक्तेर्गोत्रापुत्रीतत्परिदेवनमेवं न देव त्वया श्राव्यं किंत्वन्येति विज्ञापयितुं वेति ज्ञेयम् । समाहितस्तदेकाग्रचेतस्कः ।। २० ।।

सुमनोरञ्जनी — तत्र क्षीराब्धेस्तीरे जगन्नाथं देवानामपि देवम् । यद्वा ज्ञानज्ञान इतिवत् देवदेवं निरतिशयक्रीडादिगुणयुक्तम् । वृषाकपिं भक्तानामभीष्टवर्षणाद्वृषः । कं सुखं पिबतीति कपिः । असाधारण्येन व्यपदेशा भवन्ति । वृषः चासौ कपिश्च तम् । वर्षणाद्वृषः आकं पूर्णानन्दं पिबत्यनुभवतीति वा । पुरुषं पूर्णषड्गुणं पुरुषनामकम् । समाहितः भयवति चित्तसमाधानयुक्तः । सकर्मकादपि धातोः पीता गाव इत्यादिवत्कर्तरि क्तः । य उत्तरपदलोपेन समाहितचित्त इत्यर्थः । पुरुषसूक्तेन इत्थंभूतलक्षणे तृतीया । पुरुषसूक्तोक्तगुणोपसंहारेण उपतस्थे ध्यानरूपामुपासनां चक्रे । यद्वा अभेदे तृतीया । धान्येन धनवानितिवत् । उपतस्थे तन्मन्त्रवचनरूपामुपासनां चक्र इति सम्बन्धः ।। २० ।।

गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह ।
गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव मा चिरम् ।। २१ ।।

सत्यधर्मीया — गगने समीरिताम् । किं सम्बन्धिनी सा गीरित्यत आह ।। पौरुषीमिति । पुरुषो भगवांस्तस्येयं पौरुषी ताम् । किमुद्दिश्य किंविषय ईरिता गीरित्यत आह । गां समाधाविति । गां पृथ्वीं प्रति गौर्भूत्वेति प्राग्वादात् समाधौ समाधानार्थं, समाधौ मनःपीडायां प्रसक्ते सति समा तस्येतरानिरास्यत्वं सूचयति । इतराश्रयणीयां श्रवणीयां चतुराननेनेत्यनेन द्योत्यते । स्वयं तां पौरुषीं

समाधावागतसर्वसमाधानार्थं वा । वेधा निशम्य श्रुत्वा त्रिदशान् देवान्प्रति गतां, मे गां वाणीं, हे अमराः! आशु श्रृणुत । श्रवणफलमपि लपति । यथा मयोच्यते तथा । पुनःशब्दश्चशब्दार्थः । मा चिरं च तथैव विधीयतां भवद्भिरिति शेषः । पुनः श्रवणानन्तरं मा चिरं निरालस्यं गगने समीरितामित्यन्वयो वा ॥ २१ ॥

सुमनोरञ्जनी — वेधाः ब्रह्मा । समाधौ ध्यानकाले । समाधानार्थमिति वा । समाधिध्यानसन्धानप्रतिज्ञासुसमर्थन इत्यभिधानात् । गगने हरिणेति वायुनेति शेषः । समीरितां स्पष्टमुक्तां गिरं निशम्य त्रिदशान् देवान् प्रति स्वयमुवाच । किमिति । मे मम सकाशात् पौरुषीं परमपुरुषश्रीहर्याज्ञारूपाम् । मे मां प्रति समीरितामित्यत्रापि सम्बध्यते । गां वाचं श्रृणुत । श्रुत्वा च पुनरनन्तरं तथैव मया यथोच्यते तथैव मा चिरं शीघ्रं यथा स्यात्तथा विधीयतामिति सम्बन्धः ॥२१॥

पुरैव पुंसाऽवधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यताम् ।
स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद् भुवि ॥ २२ ॥

सत्यधर्मीया — धराज्वरो भूम्या उपतापः । पुंसा परमपुरुषेण । अवधृतश्चिकित्सनीयत्वेन ज्ञातः । यदुष्विति बहुवचनमाद्यर्थे । यद्वादिषु । एतत्पुरस्कृतिस्तु मुरहरावतारपात्रत्वादिति ज्ञेयम् । भवद्भिरंशैरुपजन्यताम् । स ईश्वरेश्वरः सर्वेशः । स्वकालशक्त्या स्वरूपभूतदुर्भूतसंहारकशक्त्या क्षपयन्क्षपाचरादीन्भुवि चरेद्यावत्तावत्पर्यन्तं स्थीयताम् ॥ २२ ॥

सुमनोरञ्जनी — पुरैव अस्मद्विज्ञापनात्प्रागेव । धरायाः भूमेर्ज्वरः सन्तापः । ज्वर सन्ताप इति धातोः । पुंसा परमपुरुषेण अवधृतः परिहार्य इति निश्चितः । सर्वसाक्षितया रक्षकत्वादिति भावः । यतस्तदर्थं यदुकुलेऽवतरिष्यति अतस्तदनुसेवार्थं भवद्भिरपि अंशैः स्वस्वकलाभिः यदुषु उप समीपे कालतः, अतितीव्रमिति यावत् । जन्यतां अवतीर्यताम् । स ईश्वराणां ब्रह्मादीनामपीश्वरः स्वामी स्वकालशक्त्या स्वस्य कालाख्यया कालनियामकया शक्त्या स्वरूपसामर्थ्येन उर्व्या भरं भारं क्षपयन् परिहरन् यावद्भुवि चरेत् तावत्पर्यन्तं भवद्भिरपि तत्र स्थातव्यमिति वाक्यशेषः । यद्वा भवद्भिरुप जन्यताम् । जनितैर्भवद्भिरेव निमित्तैः स्वकालशक्त्या च यावदुर्व्या भरं समस्तमप्युर्व्या भारं क्षपयन् चरेदिति योजना । अस्यां योजनायां न वाक्यशेषादिकम् ॥ २२ ॥

वसुदेवगृहे साक्षाद् भगवान् पुरुषः परः ।
जनिष्यते तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः ॥ २३ ॥

सत्यधर्मीया — साक्षाद्भगवान्परमपुरुषो वसुदेवगृहे तद्भार्यायां जनिष्यते यस्तत्प्रियार्थं सुरस्त्रियोऽपि सम्भवन्तु ।। २३ ।।

सुमनोरञ्जनी — भगवान् समग्रैश्वर्यादिगुणवानत एव परः पुरुषः श्रीहरिः वसुदेवस्य गृहे भार्यायां देवक्यां साक्षात् स्वयमेव जनिष्यते प्रादुर्भविष्यति न त्वस्मदादिवदुत्पद्यते । जनि प्रादुर्भाव इति धातोः ।। २३ ।।

वासुदेवकलानन्तः सहस्रवदनः स्वराट् ।
अग्रतो भविता देवो हरेः प्रियचिकीर्षया ।। २४ ।।

सत्यधर्मीया — वासुदेवकला अनन्त इति छेदः । यः सहस्रवदनः स्वराट् स्वेन हरिणा शयानेन राजत इति स्वराट् । वासुदेवस्य कला भिन्नांशरूपः । वासुदेवस्य कलासहितश्चासावनन्तश्चेति पदमेकं वा । तत्रापि वासुदेवस्य कलाऽप्यनन्ताऽपरिच्छिन्ना यस्मिन्स इत्यर्थ इति वा । हरेः प्रियचिकीर्षया हरेरग्रतः प्राक् भविता । सौमित्रिः सन् स्वयुक्तातिरिक्तां सेवां कृतवान् । तत्सत्कृतस्य तत्कृतनमस्कारादिना तिरस्कारे स्वयोग्यतायोग्यस्य स्थितिं सम्पादयामास शेष इति भावः । अर्थादमुमेवार्थं 'सेवाखिन्नो लक्ष्मणोऽग्रे हरेर्भूदिति' वदन्त आचर्यवर्या अपि सूचयामासुः ।। २४ ।।

सुमनोरञ्जनी — वासुदेवस्य हरेः कलया शुक्लकेशांशेन युक्तोऽनन्तः शेषः, स्वेन स्वतन्त्रेण विष्णुना राजत इति स्वराट् । हरेरग्रतः हरेः प्रियचिकीर्षयेत्युभयत्रापि सम्बध्यते ।। २४ ।।

योगमाया भगवती यया सम्मोहितं जगत् ।
आदिष्टा प्रभुणांऽशेन कार्यार्थे सम्भविष्यति ।। २५ ।।

सत्यधर्मीया — यया जगत् मदादिकं सम्मोहितं भवति सा भगवती पूज्या योगमाया दुर्गाऽपि प्रभुणाऽऽदिष्टाऽऽज्ञप्तांऽशेन कार्यार्थे कर्तव्यप्रयोजनार्थं सम्भविष्यति प्रादुर्भविष्यति ।। २५ ।।

सुमनोरञ्जनी — यया जगत् संमोहितं भवति सा योगमाया दुर्गा भगवती कार्यशक्तिमतीत्यभिप्रायेण प्रभुणा आदिष्टा सती कार्यार्थे अंशेन संभविष्यतीति योजना ।। २५ ।।

श्रीशुक उवाच -

इत्यादिश्यामरगणान् प्रजापतिपतिर्विभुः ।
आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ ।। २६ ।।

सत्यधर्मीया — अमरगणान् । मरुदादिगणानामपि बाहुविध्याद्गणानित्युक्तिः । प्रजापतयो दक्षाद्यास्तेषां पतिर्धाता । गीर्भिः सान्त्वनप्रकारभेदाद्बहुवचनम् । परमं स्वधाम परमं महरादितो महासम्पद्वा ॥ २६ ॥

सुमनोरञ्जनी — प्रजापतीनां रुद्रादीनामपि पतिः विभुर्ब्रह्मा गीर्भिर्वाग्भिः च महीमाश्वास्येति । परमं महरादिलोकेभ्य उत्तमं स्वधाम सत्याख्यं ययाविति सम्बन्धः ॥ २६ ॥

शूरसेनो यदुपतिर्मधुरामावसत् पुरीम् ।
माधुरान् शूरसेनांश्च विषयान् बुभुजे स्वराट् ॥ २७ ॥

सत्यधर्मीया — अकरोदर्जुनो राज्यं, तस्य पञ्चैवोर्वरिता मृधे, जयध्वः शूरसेन इत्युक्तेः कार्तवीर्यवीर्यजो मधुरां पुरीमावसत् । उपान्वध्याङ्वस इति द्वितीया । स्वराट् स्वेन द्रव्येण राजत इति स तथा । सु अत्यन्तं न विद्यते राट् राजा यस्यासौ अखण्डभूमण्डलेश इति यावत् ॥ २७ ॥

सुमनोरञ्जनी — एवं चतुर्मुखाज्ञया सर्वेष्वपि देवेषु भुव्यवतीर्णेषु सत्सु तदुत्तरभाविनीं कथामाह ॥ शूरसेन इति । यदूनां यादवानां पतिः शूरसेनो नामतः मधुरां पुरीं द्वितीया सप्तम्यर्थे । षट्सु द्वितीयेति सूत्रात् । मधुरायां पुर्यामावसत् । माधुरान् मधुरायाः परितो वर्तमानान् शूरसेनांस्तन्नामकान् विषयान् देशान् स्वराट् स्वयमेव राजा सन् अनन्याधीनो बुभुजे ॥ २७ ॥

राजधानी ततः साऽभूत्सर्वयादवभूभुजाम् ।
मधुरा भगवान् यत्र नित्यं सन्निहितो हरिः ॥ २८ ॥

सत्यधर्मीया — यत्र यस्यां यतो भगवान्हरिर्नित्यं सन्निहितस्ततः सा मधुरा सर्वयादवभूभुजां सर्वे च ते यादवभूभुजश्च तेषां राजधानी मुख्यराजस्थानमभूत् । हरिसन्निधिश्च कृत्रिमो ज्ञेयः । यथोक्तमेकादशतात्पर्ये । आद्यन्तरः सन्निधिर्विष्णोर्बाह्यसन्निधिरेव च । द्विविधः सन्निधिः प्रोक्तः कृत्रिमो बाह्य उच्यते । स्वाभाविकस्त्वान्तरः स्यात्प्रतिमा जीवगो यथेति चेति । प्रतिमागतोऽचेतनप्रतिमादिगतः कृत्रिमः । सर्वजीवान्तर्गतः सन्निधिः स्वभाविक इत्यर्थ इति व्यासोक्तेः ॥ २८ ॥

सुमनोरञ्जनी — ततः शूरसेनावासानन्तरं यत्र यस्यां पुर्यां सोऽवसत् सा मधुरा सर्वयादव भूभुजां सर्वेषां यदुवंश्यानां राज्ञां राजधानी वासस्थानं यतः अभूत् तत एव भगवान् हरिः तत्र पुर्यां नित्यं सन्निहितो भविष्यति । वसन्ति वैष्णवा यत्रेत्युक्तत्वात् । यदुवंश्यानां देवावतारत्वाद्देवानां च वैष्णवोत्तमत्वेन तदावासेनाविनाभूतत्वान्नित्यं सन्निहित इति भावः ॥ २८ ॥

तस्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः ।
देवक्या भार्यया सार्धं प्रयाणे रथमारुहत् ॥ २९ ॥

सत्यधर्मीया — ततो वृत्तं वृत्तान्तं कथयति ॥ तस्यामिति । तस्यां मधुरायां कृत उद्वह उद्वाहो येन स कृतोद्वहः । भार्यया देवक्या सार्धम् । सूर्ययेति पाठे नवोढयेत्यर्थः । प्रयाणे स्वगृहं प्रतिगन्तुं रथमारुहत् ॥ २९ ॥

सुमनोरञ्जनी — ततः किमित्यत आह ॥ तस्यामिति ॥ तस्यां मधुरायां कर्हिचित् कदाचित् शौरिः शूरस्यापत्यं वसुदेवो नामतः, कृतः उद्वहो विवाहो येन तादृशः सन् भार्यया भया प्रभया आर्यया सर्वोत्कृष्टकान्तिमत्येति यावत् । वस्तुतो भार्यया गृहिण्या देवक्या तन्नामिकया सहितः प्रयाणे स्वगृहं प्रति प्रयाणार्थं रथमारुहदिति सम्बन्धः ॥ २९ ॥

उग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया ।
रश्मीन् हयानां जगृहे रौक्मै रथशतैर्वृतः ॥ ३० ॥

सत्यधर्मीया — स्वसुः पितृव्यसुतात्वेन स्वसुः । रौक्मैः सुवर्णमयोपस्करैः ॥ ३० ॥

सुमनोरञ्जनी — ततः किमित्यत आह ॥ उग्रसेनेति । उग्रसेनस्य तन्नामकस्य सुतः कंसः स्वसुः भगिन्याः प्रियचिकीर्षया प्रीतिं कर्तुमिच्छया रौक्मैः हिरण्मयैः रथानां शतैर्वृतोऽपि स्वयं हयानां स्वसूरथहयानां रश्मीन् हयचालनोपयोगिरज्जून्ः जगृह इति योजना । ननु कंसस्योग्रसेनात्मजत्वेन देवक्याः देवकसुतात्वेन प्रसिद्धत्वात्कथं कंसभगिनीत्वमिति चेत् उग्रसेनदेवकयोः सहोदरत्वेन देवकपुत्र्या अपि देवक्याः उग्रसेनसुतकंसभगिनीत्वादिति भावः ॥३०॥

चतुश्शतं पारिबर्हं गजानां हेममालिनाम् ।
अश्वानामयुतं सार्धं रथानां च त्रिषट्शतम् ॥ ३१ ॥

सत्यधर्मीया — पारिबर्हं प्राहुणिकैर्विवाहकाले पुंपक्षीयदेयम् । हेम्नां माला साऽस्त्येषां, हेम्ना मालन्त इति वा तेषामयुतं दशसहस्रम् । त्रिषट्शतमष्टादशशतीम् ॥ ३१ ॥

सुमनोरञ्जनी — हेममय्यो मालाः येषां सन्ति ताः । प्रशंसार्थकोऽयं मत्वर्थीयः । भूमनिन्दाप्रशंसासु भवन्ति मतुबादय इति वचनात् । तादृशानां गजानां चतुःशतम् । हेममालिनामित्येतद्देहलीदीपन्यायेनोभयत्रान्वेति । तादृशानामश्वानामयुतं सार्धं अर्धेन पञ्चसहस्रेण सहितं अयुतं पञ्चदशसहस्रमित्यर्थः । सार्धमित्यस्यापि देहलीदीपवदन्वयः । रथानां त्रिषट्शतं च

सार्धं, षट् संख्याकानां शतं षट्शतम् । त्रिगुणितं च तत् षट् शतं अष्टादशशतमित्यर्थः । तच्च सार्धं अर्धेन नवशतेन सहितम् । तथा च सप्तविंशतिशतमित्यर्थः ।। ३१ ।।

दासीनां सुकुमारीणां द्वे शते समलङ्कृते ।
दुहित्रे देवकः प्रादाद् यामे दुहितृवत्सलः ।। ३२ ।।

सत्यधर्मीया — यामे गमनसमये । निवो यामायेत्यृग्भाष्ये वो मार्गाय । तट्टीकायां च यात्यस्मिन्निति यामे मार्ग इत्युक्तेः । तत्र वावा यामाय वो यामं प्रति दार्ढ्याय । यामं गमनं प्रतीति तदुभयोक्तेश्च । किं वक्तव्यम् । याः मे इत्यवादीद्देवकी ताः सम्पदो ददौ देवक इति वा । किं तद्दाक्षिण्यमित्यत आह ।। दुहितृवत्सल इति ।। ३२ ।।

सुमनोरञ्जनी — सुकुमारीणां शोभनकौमार्योपेतानां नित्यनूतनयौवनविशिष्टानामित्यर्थः । सुन्दरीणामिति वा । दासीनां सम्यगलंकृते द्वे शते इत्येतत्सर्वं पारिबर्हं विवाहकाले दीयमानं पदार्थजातं दुहित्रे सुतायै । दुहितृवत्सल इति हेतुगर्भविशेषणं, देवकः याने प्रयाणे समुपस्थिते तत्काल इति यावत् प्रादादित्यन्वयार्थः ।। ३२ ।।

शङ्खतूर्यमृदङ्गानि नेदुर्दुन्दुभयः समम् ।
प्रयाणप्रक्रमे तात वरवध्वोः सुमङ्गलम् ।। ३३ ।।

सत्यधर्मीया — वरवध्वोर्वसुदेवदेवक्योः । सुमङ्गलं यथा तथा नेदुः । प्रयाणप्रक्रमे तदारम्भसमये ।। ३३ ।।

सुमनोरञ्जनी — वरवध्वोः वसुदेवदेवक्योः प्रयाणप्रक्रमे स्वगृहं प्रति प्रयाणोपक्रमे सु मङ्गलं यथा स्यात्तथा शंखतूर्यमृदंगानि, तूर्यं वाद्यविशेषः, दुन्दुभयश्च समं सहैव एकदैवेति यावत् । नेदुरिति ।। ३३ ।।

पथि प्रग्रहिणं कंसमाभाष्याहाशरीरवाक् ।
अस्यास्त्वामष्टमो गर्भो हन्ता यां नयसेऽबुध ।। ३४ ।।

सत्यधर्मीया — प्रग्रहिणं हयरश्मिवन्तमशरीरवाक् । वचनादेव वाग्ब्रह्मेत्यनुव्याख्यानोक्ते- र्वक्तीति वाक् अशरीरं यथा तथा वक्तीति वागशरीरदेवता । कंसमाभाष्याहतो नाहेत्यनुपपन्नम् । तां वाचं विविच्याह ।। अस्या इति । हे अबुध अज्ञ कंस! त्वं यां नयसे । नीय उभयपदित्वात् । नयसि देवक्या अष्टमो गर्भस्त्वां हन्तेति । उच्यत इति वाक् । वच परिभाषणे क्विब्वचीत्यादिना क्विप्

दीर्घोऽसम्प्रसारणं च । गीर्वाग्वाणीत्यमरः । अशरीराऽतत्प्रयोज्या वाग्यस्य स वायुरिति वा । मिथ्याशब्दोऽनिर्वचनीयं वदतीतिवत्करणे कर्तृत्वोपचाराद्वागाहेति वा ।। ३४ ।।

सुमनोरञ्जनी — पथि मार्गे प्रग्रहिणं प्रग्रहः कविका अश्वमुखप्रोतो रज्जुविशेषः तद्वन्तं कंसं समाभाष्य हे कंसेति संम्बोध्य । अशरीरवाक् अदृश्यशरीरः सन् वक्तीति अशरीरवाक् वायुः 'जगाद वायुर्गगनस्थितोऽमुमिति निर्णयोक्तेः' आह । किमिति । हे अबुध ! यां देवकीं नयसे हर्षेणेति शेषः । कथमबुधत्वं तस्येत्यत आह ।। अस्या इति ।। अस्याः देवक्याः अष्टमो गर्भः त्वां हंता भविष्यतीत्यज्ञात्वैव यतो नयसेऽतोऽबुधत्वमिति भावः ।। ३४ ।।

इत्युक्तः स खलः पापो भोजानां कुलपांसनः ।
भगिनीं हन्तुमारब्धः खड्गपाणिः कचेऽग्रहीत् ।। ३५ ।।

सत्यधर्मीया — इत्युक्तोऽशरीरदेवतया पापः स्वभावतस्तद्वान् समीपेऽपि न समीचीना जना इत्याह ।। सखल इति । सदा तत्सहवासी । स्वकुलव्याकुलतां व्यापारयति ।। भोजानां कुलपांसन इति । नित्यसापेक्षत्वात्समासः । तत्कुलधूलीधूसरताकृत् । आरब्धः संरब्धः सन् खड्गपाणिर्भगिनीं हन्तुं कचे केशपाशेऽग्रहीज्जग्राह ।। ३५ ।।

सुमनोरञ्जनी — खलो दुर्जनः स्वभावत एव दुष्टः अत एव पापः अर्शाद्यच् पापी तत एव भोजानां कुलस्य पांसनः धूलीकरणशीलः भोजकुलस्याकीर्तिसंपादक इति यावत् । स कंसः, इति अस्या अष्टमो गर्भस्त्वां हन्तेति अशरीरवाचा उक्तः सन् भगिनीं हन्तुमारब्धः । तदेव दर्शयति ।। खड्गपाणिरिति ।। खड्गः पाणौ यस्येति तथोक्तः तादृशः सन् कचे भगिन्याः केशपाशे अग्रहीदिति ।। ३५ ।।

तं जुगुप्सितकर्माणं नृशंसं निरपत्रपम् ।
वसुदेवो महाभाग उवाच परिसान्त्वयन् ।। ३६ ।।

सत्यधर्मीया — महाभागवतो भगवदवतारहेतुदैववान्वसुदेवः परिसान्त्वयन्नुवाच ।। ३६ ।।

सुमनोरञ्जनी — जुगुप्सितं निन्दितं कर्म यस्यासौ तथोक्तः तम् । नृशंसं क्रूरम् । नृशंसो घातकः क्रूर इत्यभिधानात् । परद्रोहनिरतमिति यावत् । अत एव निष्क्रान्ता अपत्रपा लज्जा यस्मात्तं कंसं, महान् सर्वोत्तमः श्रीहरिर्भागे यस्य महा यस्येति स महाभागो वसुदेवः परिसांत्वयन् सामभेदाभ्यां, ''साम पञ्चविधं भेदो दृष्टादृष्टभयं वच'' इति वचनात् पञ्चविधसाम्ना द्विविधभेदेन चेत्युभाभ्यां बोधयन् उवाचेति सम्बन्धः ।। ३६ ।।

वसुदेव उवाच -

श्लाघनीयगुणः शूरैर्भवान् भोजयशस्करः ।
स कथं भगिनीं हन्याः स्त्रियमुद्वाहपर्वणि ॥ ३७ ॥

सत्यधर्मीया — सम्बन्धलाभोपकृतिरभेदो गुणकीर्तनम् । साम सप्तविधं भेदो दृष्टादृष्टभयं वच इति स्मृतेस्तत्र प्रथमतः क्रममननुसृत्य प्राधान्याद्गुणकीर्तनं सामविशेषमाह ॥ श्लाघनीयगुण इति । श्लाघनीया गुणा यस्येत्यर्थाद् गुणकीर्तिरियं न गृहे गृहिण्यादिभिरित्यभिधत्ते ॥ शूरैरिति । भोजयशस्कर इति कीर्तिलाभोऽन्यथाऽकीर्तिलाभ इत्यलाभलाभः । भगिनीमिति सम्बन्धदर्शनम् । स्त्रियमित्युपकृतिः । उद्वाहपर्वणीति भोजानामस्माकं च परस्परं दृष्टादृष्टभीत्यभावात्परममैत्र्येणाभेदः सूचितः । स्त्रियमित्यदृष्टभयं जनापवादरूपं दृष्टभयं चानेन द्योत्यत इति भेदोऽपि सूचित इति ज्ञेयम् ॥ ३७ ॥

सुमनोरञ्जनी — सांत्वनप्रकारमाह ॥ श्लाघनीयेति ॥ सम्बन्धलाभोपकृतिरभेदो गुणकीर्तनम् इति वचनात्, भगिनीमिति सम्बन्धस्य, यशस्कर इति कीर्तिलाभस्य, उद्वाहेत्युपकृतेः, श्लाघनीयगुण इति गुणानां कीर्तनं लभ्यते । स्त्रियमिति स्त्रीवधादकीर्तिसूचनेन दृष्टभयमदृष्टभयं च सूचितमिति पदरत्नावलीरीत्या पदप्रयोजनं द्रष्टव्यम् । शूरैः श्लाघयितुं योग्याः गुणाः शौर्यादयो यस्य । भोजवंशस्य यशस्करः भवान् त्वं, स्त्रियं तत्रापि भगिनीं अन्तःकरुणाविषयामिति यावत् कथं हन्याः । उद्वाहपर्वणि विवाहसमयरूपपुण्यकाले । विवाहदिनमारभ्य षोडशदिवसपर्यन्तं उद्वाहपर्वसंज्ञा । अत एवेदानीमपि जनाः तावत्पर्यन्तं वरवध्वोर्दिवसविशेषेष्वार्तिक्यादिमहोत्सवं षोडशदिवसे मण्डपविसर्जनं च कुर्वन्ति । एतेन वरवध्वोः स्वगृहप्रयाणसमये कथमुद्वाहपर्वणीत्युक्तमिति शङ्कानवकाशः ॥ ३७ ॥

मृत्युर्जन्मवतां वीर देहेन सह जायते ।
अद्य वाऽब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ॥ ३८ ॥

सत्यधर्मीया — बुद्धिमता गच्छन्मृत्युश्रवणसमनन्तरं तत्प्रयत्नमनुष्ठाय स प्रच्यावनीयस्तदुपायमेवात्मार्थे पृथिवीमिति नीतेर्भो भामेति भो भोजवरेन्द्र! यतसि चेत्किं कदाऽप्येतदुपायेनैतदपायापायेन मृत्युपस्थितिरिति मत्वा यतसे उतैतत्समयमात्रगमनमनसेति विकल्पं मनसि कृत्वा स सर्वथेशक्तृप्तो नान्यथयितुं शक्य इति दृष्टादृष्टोभयभयवचनरूपभेदं प्रपञ्चयन्नाह ॥ मृत्युरिति । जन्मवतां जनानां देहेन सहैव मृत्युर्जायते । एवमनेन संसर्तव्यं मर्तव्यं चैवमिति जायते रणे मारणेनारिभिर्वीराणां स च नियतः क्षणे क्षणार्धे वेति तथा सम्बोधयति ॥ वीरेति । शालत्वादबलासङ्कालनयत्नवानहहेति

वीरेति वदन्नुपजहास वसुदेव इति वा । अद्य वाऽब्दशतान्ते वेति शतायुर्वै पुरुष इत्यभिप्रायेणेति ज्ञेयम् । तन्मात्रे तात्पर्यं किन्तु तदास्कन्दितत्वे ततो ध्रुवत्वान्न तत्त्यजनं सुशकमिति भावः । तर्हि सर्वेषामेवमेव किमित्युक्तौ वक्ति ।। प्राणिनामिति । प्रकर्षेणाणनवतां तरतमभावेन चेष्टकानां ब्रह्मादीनां मध्ये ध्रुवो विष्णुर्वैमृत्युर्मरणरहितस्तस्य स्थविष्ठः स्थविरो ध्रुव इति हरिनामत्वात् । न ह्यध्रुवैः प्राप्यते हि ध्रुवं तदिति काठकोपनिषद्भाष्ये ध्रुवो भगवानिति व्याख्याततत्वाच्च । एतेन ध्रुव इत्यलं पुनर्मुत्युरित्युक्तिस्तथा प्राणिनामिति च कुत इति परास्तम् । वैशब्दो जरो विमृत्युरित्यादिप्रसिद्धिं द्योतयति ।। ३८ ।।

सुमनोरञ्जनी — यदि त्वन्मृत्युभयादेनां हनिष्यसि तर्हि किं कृतं स्यात् । एतद्धननेऽपि तस्यावर्जनीयत्वादित्याह ।। मृत्युरिति ।। हे वीर! मृत्युः जन्मवता उत्पत्तिमता देहेन सह जायते सम्बद्धो भवति । व्याप्तो भवति । य उत्पत्तिमान्देहः स मृत्युमानिति हि व्याप्तिः । अस्य देहस्यास्मिन्काले मृत्युर्भवितेति भगवता क्लृप्तो भवतीति यावत् । जन्मवतामित्यपि पाठो दृश्यते । तदा प्राणिनामित्यनेनान्वयः । यद्वा देहेन सहजवदाचरति देहेन सहजो यथा देहाविनाभावी तथेति । तस्मात् प्राणिनां देहधारिणां अद्य वा अब्दशतान्ते वा मृत्युर्ध्रुवः । यस्य यत्काले भगवता क्लृप्तः तस्य तत्काले निश्चित एवेति भावः ।। ३८ ।।

देहे पञ्चत्वमापन्ने देही कर्मानुगोऽवशः ।
देहान्तरमनुप्राप्य प्राक्तनं त्यजते वपुः ।। ३९ ।।

सत्यधर्मीया — तत्प्रकारं प्रपञ्चयति ।। देह इत्यादिना । पञ्चत्वं नाशं गतम्, आपन्ने प्राप्ते सति कर्मानुगोऽवशोऽस्वाधीनप्रवृत्तिरवशो भगवदधीन इति वा । देहान्तरं स्वकर्मानुगुणमनुप्राप्य प्राक्तनं वपुस्त्यजते त्यजति ।। ३९ ।।

सुमनोरञ्जनी — ननु भवतु कालान्तरे मृत्युः । अल्पकाल एव यदि सः तदैत्तदेहनाशप्रयुक्तभोगनाशो मम स्यादेव । देहान्तराभावादतोऽपि भयादेनां हन्मीति तत्राह ।। देह इति ।। देहे पञ्चत्वं विविक्तपञ्चभूतात्मकतां आपन्ने । देही जीवः कर्मानुगः पुण्यपापे अनुसृत्य गच्छतीति तथोक्तः तदनुसारेणेति यावत् । नैतावता पुण्यपापयोः स्वातन्त्र्यं मन्तव्यमित्याह ।। अवश इति । विष्णुवशः सन् देहान्तरमनुप्राप्य तत्राभिमानवान् प्राक्तनं वपुस्त्यजते । जीवस्याणुत्वेऽपि प्रकाशरूपेण देहान्तरसम्बद्धः सन् पूर्वदेहं त्यजतीति वा भावः । तथा च देहान्तराभावप्रयुक्तं व्यसनमपि भवता त्याज्यमेवेति भावः ।। ३९ ।।

व्रजंस्तिष्ठन् पदैकेन यथैवेकेन गच्छति ।
यथा तृणजलूकैवं देही कर्मगतिं गतः ॥ ४० ॥

सत्यधर्मीया — एकस्मिन्नेवास्मिन् शरीरे देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा । तथा देहान्तरप्राप्तिरिति विशोकदा दशा देहहानौ देहान्तरस्वीकार एवेत्यत्र निदर्शनद्वयं दर्शयति ॥ व्रजन्निति । व्रजन्पुमानेकेन पदा तिष्ठन् यथैवैकेन पदा गच्छति तथा बाल्येन तिष्ठन्कौमारं व्रजत्येवं जराम् । तृणजलूका तृणग्रहणकृत्कृमिविशेषः । पुरतस्तृणान्तरं गृहीत्वा प्राग्गृहीतं तृणं त्यजत्येवं जीवः स्वकर्मार्जितमूर्जितमनूर्जितं वा कलेवरं परं गृहीत्वैतत्त्यजति । कर्मणा गतिः प्राप्तिर्यस्य तं देहं गत इति वा । दृष्टान्तद्वयमेकत्रैवेति । पूर्वत्र । परस्तु किञ्चित्सोहितीमस्मद्व्याख्यानस्य । अत्र च स्वीकारपरित्यागौ नात्यन्तभिन्नविषयाविति स्पष्टं दृष्टान्तान्तरमाहेत्यवतारयिता चकारेत्युपर्येव ज्ञायते । जलमोको यस्याः । ओक उचः क इति निपातितोदन्त ओकशब्दः । जलोकापि जलौका स्याज्जलूका जलजन्तुकेति तारपालः ॥ ४० ॥

सुमनोरञ्जनी — उक्तार्थे दृष्टान्तमाह ॥ व्रजन्निति ॥ यथा व्रजन् गच्छन्पुरुषः एकेन पदा तिष्ठन् उत्तरदेशे तिष्ठन्नेव एकेन अन्येन पदा गच्छति पूर्वदेशं परित्यजति । एके मुख्यान्यकेवला इत्यभिधानात् । यथा वा तृणजलूका तृणचारी कीटविशेषः । तृणान्तरं गृहीत्वैव पूर्वतृणं परित्यजति । एवं देही जीवः कर्मगतिं गतः कर्मप्रवाहपतितः सन् देहान्तरं प्राप्यैवेति पूर्वेणान्वयः ॥ ४० ॥

स्वप्ने यथा पश्यति देहमीदृशं मनोरथेनाभिनिविष्टचेतनः ।
दृष्टश्रुताभ्यां मनसाऽनुचिन्तयन् प्रपद्यते तत् किमपि ह्यपस्मृतिः ॥ ४१ ॥

तात्पर्यम् – स्वप्ने यथा दृष्टश्रुतस्मृत्यनुसारि देहं प्राप्नोति । अपस्मृतिर्मृतः । पूर्वदेहस्मरणा-भावात् । अनभिमानतः ॥ ४१ ॥

सत्यधर्मीया — स्वप्ने यथा पश्यति देहमीदृशमिति श्लोके यथा मनोरथेनाभिनिविष्टचेतनः स्वप्ने देही मिथ्याभूतमेव देहं पश्यति तथा दृष्टेन श्रुतेन दृष्ट्या श्रवणेनानुचिन्तनसहितेन मनसा ध्यातं देहं प्रपद्यते । तद्देहनिदर्शनेनेतरसर्वस्य मिथ्यात्वमुच्यत इति भ्रमं शमयितुं योजनाप्रदर्शनपूर्वं समग्रश्लोकतात्पर्यमाह ॥ स्वप्न इति । स्वप्ने तदवस्थायां दृष्टश्रुतस्मृत्यनुसारिदेहमनुसारी चासौ देहश्च वासनामयश्च तम् । भिन्नं पदं वा । कायो देहः क्लीबपुंसोरित्यमरादेहशब्दो नपुंसकलिङ्गोऽपीति विशेषणमनुसारीति सम्भवति । प्रेण सुखदुःखानुभवप्रकर्षसहितत्वप्राप्तेः सूचयति । अनेन चिन्तयन्निति विशेषणं चिन्तनं प्रपत्तिसम्पत्तिसाधनं हरिं पश्यन्मुच्यत इतिवदिति सूचयति ।

अपस्मृतिरित्यनूद्य व्याचष्टे ।। अपस्मृतिर्मृत इति । किं प्रयुक्तोक्ता मृततेत्यत आह ।। अभिमानतः पूर्वदेहस्मरणाभावादिति । ममायं कायो मम सुखादिकं जातमित्यभिमानपूर्वकपूर्वदेहादिस्मृतिरहित इति मृत इत्युच्यत इत्यर्थः । अनभिमानत इत्यचतुरपाठस्तथाऽपि अनभिमानतोऽभिमानाभावात् । तव्द्याख्याति पूर्वदेहस्मरणाभावादिति, व्याख्यानव्याख्येयभाव इति व्याकुर्वते । केचिद्वैपरीत्येन पूर्वदेहस्मरणं यत्तन्मृत्युरिति ।। ततश्चायं श्लोकार्थः ।। जलूकातुलतोपपादनेन तृणतद्भेदवदत्रापि देहदेहिनोर्भेद इत्युक्तं स्यात् । तदैक्यात्तदसम्भावितमिति तत्राह ।। स्वप्न इति । स्वप्नेऽवस्थाविशेषे तत्रापि स्वापं नयतीति स्वप्नो हरिरिति बृहद्भाष्यव्याख्यानानुसारेण च न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान्पथः सृजत इति श्रुतेर्हरिस्तस्मिन्वासनामुपादानमुपादाय सर्जके च सतीत्यप्यर्थः । मनोरथेन जाग्रद्दृष्टश्रुतवस्तुसंस्कारसचिवेन मनोरथेनाभिनिविष्टा चेतना संविद्यस्य । चेतना संविदि प्रोक्तेति विश्वः । तद्ग्रस्तधीरित्यर्थः । ईदृशं जाग्रद्देहसदृशं शरीरं यथा पश्यति स्वत्वेन जानाति परकीयत्वादिना वा । तत्रावलोक्यावलोकयितृकायभेदोऽनुभवसिद्धस्तथा दृष्टश्रुताभ्यां दर्शनश्रवणाभ्यां मनोऽपि यदनुचिन्तनसहितं तेन युक्तस्तदनुचिन्तनसाधनकमपस्मृतिरपगत-स्मृतिरभिमानाभावाप्रयुक्तपूर्वशरीरस्मरणरहितत्वान्मृतः किमपि स्ववासनानुसारि सुरनराद्यन्यतमं शरीरं प्रपद्यते हि यतोऽतः स्वतः सरणीयशरीरनिमित्तमुत्तम्भितासिः कथं स्वसुर्हननं तनुयास्त्यजेति भावः । निर्णयाभावात्किमपीत्युक्तिः ।। ४१ ।।

सुमनोरञ्जनी — ननु देहान्तरप्राप्तिरेवासिद्धेत्यतोऽनुभवमारोहयितुं दृष्टान्तान्तरकथनेन समर्थयते ।। स्वप्न इति ।। दृष्टश्रुताभ्यां यद् दृष्टं यच्च श्रुतं ताभ्यां निमित्ताभ्यां यो मनोरथः जागृद्दृष्टश्रुत-पदार्थस्मृतिशब्दोक्तसंस्काररूपः तेन अभिनिविष्ट आविष्टः युक्त इति यावत् चेतनः चेतनविशेषो जीवः । अभिनिविष्टा युक्ता चेतना मनो यस्य स तथाविधो जीव इति वा । स्वप्ने स्वप्नावस्थायां ईदृशं जागृद्दृष्टदेहसदृशं देहं यथा पश्यति प्राप्नोतीत्यर्थः । स्वप्ने यथा दृष्टश्रुतस्मृत्यनुसारि देहं प्राप्नोतीति आचार्यैर्व्याख्यातत्वात् । अत्र स्मृतिशब्देन तत्कारणवासनापरपर्यायः संस्कारो विवक्षितः । दृष्टश्रुताभ्यां तदुभयस्मृत्याऽभिनिविष्टचेतनो ना पुरुषः मनोरथे यथा ईदृशं देहं पश्यतीत्यपि योजयन्ति। तथा दृष्टश्रुताभ्यां निमित्ताभ्यां मनसा यद्यदनुचिन्तयन् स्मरन् । अपस्मृतिः अपगता पूर्वदेहस्मृतिर्यस्यासौ तथोक्तः मृत इति यावत् । तदुक्तमाचार्यैः । अपस्मृतिः मृतः पूर्वदेहस्मरणा-भावादभिमानत इति । अभिमानतः उत्तरदेहाभिमानेन निमित्तेन पूर्वदेहस्मरणाभावादपस्मृतिर्मृत उच्यत इति तदर्थः । तत् तेन मृतिकालेऽनुचिन्तनेन निमित्तेन किमपि देवाद्यन्यतमशरीरं प्रपद्यते प्राप्नोतीति योजना । अथवा दृष्टश्रुतस्मृत्यनुसारि देहं प्राप्नोतीति तात्पर्यपर्यालोचनया दृष्टं दर्शनं श्रुतं श्रवणं,स्मृतिरपि ग्राह्या, सर्वेन्द्रियसाध्यभोगोपलक्षणमेतत् । ताभिरीदृशं जागृद्देहसदृशम् । यथा

जागृद्देहो भोगक्षमस्तथा सर्वेन्द्रियसाध्यभोगक्षममिति यावत् । शेषं पूर्ववत् । तथा चास्य देहस्य भोगक्षमत्वमिव देहान्तरस्यापि भोगक्षमत्वादेतन्नाशप्रयुक्तभयमपि त्वया त्याज्यमिति भावः ॥ ४१ ॥

यतो यतो धावति दैवचोदितं मनो विकारात्मकमात्मपञ्चसु ।
गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते ॥ ४२ ॥

तात्पर्यम् – यतो यतः यत्र यत्र, मनो धावत्यात्मपञ्चानां मध्ये तत्र तत्र तेन दैवेन सह जायते गुणानुबद्धः सन् । 'दैवगान्धर्वपित्र्येषु मानुषेष्वासुरेषु च । यत्र यत्र मनो याति तत्र तत्रोपजायते । स्वगुणस्यानुसारेण सत्वादिविनिबन्धन' इति गारुडे । 'देवादित्वं योग्यतया तत्सकाशस्त्वनु-स्मृतेः । श्वेतद्वीपादि तत्रापि योग्यतामप्यपेक्ष्य तु । विष्णोः स्थानं विनाऽन्यत्र वायुशक्रादि-नामपि । त्रैलोक्यदेशभेदेषु योग्यता न त्वपेक्षिते' ति नारदीये ॥ ४२ ॥

सत्यधर्मीया — यतो यतो धावतीति श्लोके विवक्षितार्थाप्रतीतेरात्मपञ्चसु स्वोपभोग्य-शब्दादिविषयपञ्चक इत्याद्यन्यथाप्रतीतेश्च स्वयं यथावद्व्याकृत्य मानं चोदाहरति ॥ यतो यत इति । सार्वविभक्तिकस्तसिरत्र सप्तम्यर्थ इत्याह ॥ यत्र यत्रेति । वीप्सा च विषयाणां बाहुविध्याद्युक्ता । आत्मपञ्चस्विति सप्तमी निर्धारण इति निर्धारयितुं पञ्चानां मध्य इत्युक्तिः । आत्मानो वक्ष्यमाणजीवाश्च ते पञ्च च तेषु तत्र तत्र तेन देवेन क्रीडादिमता भगवता । तथा दिवु क्रीडाकान्तिगतिष्विति स्मृतेरसाधारण्येन नयेन सदागतिर्ग्राह्या । तेन वायुना च सह गुणानुबद्धः सत्त्वादिगुणवशः स्वस्वरूपगुणानुबद्ध इति वा सन् जायते शरीरसम्बन्धवान्भवति । इदं विशेषविवक्षया । सामान्यतश्चेत्पराधीनविशेषावाप्त्यादिमान्भवतीति व्याकुर्वते । दैवगान्धर्वपित्र्येषु मानुषेष्वसुरेष्विति पञ्चानां मध्ये यत्र यत्र मनो ध्यायद्याति तत्र तत्र तेन देवेनोक्तरूपेण सह जायते । स्वगुणस्य स्वरूपभूतगुणानामनुसारेण तथा सत्त्वादिप्राकृतगुणैश्च नितरां बन्धनं यस्य स इति । एतेनैव स्वपदस्यानुसारपदस्य च स्वारस्यं सूचितमिति ज्ञेयम् । स्वस्वगुणसत्वादि-गुणैर्देवादित्वप्राप्तिर्भवन्ती सा योग्यतामनुसृत्येति मानेनाह ॥ देवादित्वमिति । देवेत्युत्तमाधि-कार्युपलक्षणम् । गान्धर्वेत्यधमाधिकार्युपलक्षणम् । उपलक्षकं च पित्र्येति मध्यमानाम् ।

मानुषा मिश्रगतयो विमिश्रगतयोऽपि च ।
पुनः पुनर्मानुषांस्तु सृतावावर्तयत्यसौ ।

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा । एवमनेवं च मनुष्या इत्यादेर्नित्य-संसारिणः । एतन्मुक्तिसंसारस्तु नमकचमकविवरणेऽस्मत्कृते ललाललतायितानामिति पदव्याकृत्य-वसरे विस्तृत्य कथितस्तत्स्थानादिनिरूपणतस्ततोऽनुसन्धेयः । असुरास्त्वयोग्या इति विवेकः ।

स्मरणमात्रेण तत्तत्प्राप्तिरिति पातनिकार्थोऽनुपपन्नः । तत्रेतिकर्तव्यान्तरमस्तीत्याह ।। योग्यतयेति । तुरवधारणार्थे सन् योग्यतयैवेति योग्यान्वयः । योग्यतयैव देवादित्वं प्राप्नोति । अनुस्मृतेर्भगवदनुचिन्तनाद्यद्देवादित्वं तदयोग्यश्च तत्सकाशं सामीप्यं प्राप्नोति सकाशस्तत्समानदीप्तिरित्यर्थः । काशतेर्दीप्त्यर्थाद्भावे घञि समानशब्दस्य समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केष्विति सभावे सकाश इति भवतीति वा । तर्ह्यविशेषेण योग्यतापेक्षिता किमित्यत आह ।। श्वेतद्वीपेति । अपिर्योग्यतोत्तेजकसाधनान्तरसमुच्चायक एकः । तत्रापि वासाय योग्यतयैवापेक्षितेत्यवधारक एकः । यथोक्तम् । योग्यत्वं चात्र विवक्षितम् । अत्र निवास इति शेष इति गीताभाष्यप्रमेयदीपिकयोः । श्वेतद्वीपादि विष्णोः स्थानं साधनसध्रीचीनां योग्यतामपेक्ष्यैव प्राप्नोति । तथा वायुशक्रादीनां स्थानं च विना तत्रापि योग्यतापेक्षितैव । अन्यत्र त्रैलोक्यदेशभेदेष्विति सामानाधिकरण्यम् । त्रैलोक्यास्त्रिलोकीभवाश्च देशभेदास्तद्विशेषास्तेषु नैवापेक्षिता योग्यता स्थित्या इति ज्ञेयम् ।। अथ मूलार्थः ।। विकारात्मकं सङ्कल्पविकल्पादिस्वभावं मनो दैवचोदितमदृष्टोपोद्बलितं सत्, गुणाः सन्ति येषां कारणतया ते गुणाः । कारणकार्यशब्दयोर्गोभिः श्रीणीत मत्सरं यथा ब्रह्मादिकं मुखमित्यादौ साङ्कर्यं दृष्टमिति । गुणेषु तत्कार्येषु । माया तु भगवदिच्छोद्बोधिता प्रकृतिस्तद्रचितेषु आत्मपञ्चसु देवादिजीवानां पञ्चानां मध्ये यतो यतो यत्र यत्र धावति तत्र तत्रासौ देही प्रपद्यमानो योग्यतानुसारेण स्मृततद्देहवान् तेन हरिणा वायुना च सह जायते । स्वरूपतदितरगुणानुबद्धः सन् जायते । देहसम्बन्धादुत्पत्तिमान्भवतीत्यर्थः ।। ४२ ।।

सुमनोरञ्जनी — मनसाऽनुचिन्तयन् किमपि प्रपद्यत इत्येतद्विवृणोति ।। यत इति । आत्मपञ्चसु । निर्धारण सप्तमीयम् । देवगन्धर्वपितृमनुष्यासुरभेदेन पञ्चस्वात्मसु देहेषु मध्ये विकारात्मकं कामसंकल्पविकल्पादिविकारात्मकं मनो यतो यतः यत्र यत्र यस्मिन्यस्मिन् देहे सार्वविभक्तिकस्तसिरिति वचनात् यं यं देहमित्यर्थः । धावति गच्छति विषयीकरोतीति यावत् । मृतिकाल इति शेषः । असौ देही जीवः मायारचितेषु प्रकृतिनिर्मितेषु मायया भगवदिच्छया रचितेषु उद्बोधितेषु वा गुणेषु सत्त्वादिषु प्रपद्यमानः संबध्यमानः सन् तत्र तत्र देवगन्धर्वाद्यन्यतमदेहेष्वधिष्ठानेषु । तेन दैवशब्दप्रकृतेन श्रीहरिणा सह जायते उत्पद्यत इति योजना । अत्रोक्तमाचार्यैः । यत्र यत्र मनो धावत्यात्मपञ्चनां मध्ये तत्र तत्र तेन दैवेन सह जायते गुणानुबद्धः सन्निति । गुणानुबद्धः सन्नित्यनेन गुणेषु प्रपद्यमान इत्यन्वयः सूचितः । तेनेति तच्छब्दो न यछब्दोक्तदेहपरामर्शकः तेन तेनेति वीप्साभावात्, किन्तु दैवपरामर्शक इति भावेन तेनेत्यनूद्य दैवेनेति व्याख्यातम् । आत्मपञ्चस्वित्यस्य विवरणं देवगन्धर्वेत्यादि ।

देवगन्धर्वपित्र्येषु मानुषेष्वासुरेषु च ।
यत्र यत्र मनो याति तत्र तत्रोपयुज्यते ।
स्वगुणस्यानुसारेण सत्वादिविनिबन्धनः ।। इति गारुडे ।

देवादिषु मध्ये यत्र यत्र मनः याति सत्वादिविनिबन्धनो जीवः स्वगुणस्य प्राचुर्येण स्वबन्धकगुणस्यानुसारेण तत्र तत्र तस्मिन् तस्मिन् देह उपयुज्यते संबध्यते । तर्ह्ययोग्यानामपि देवादिपदस्मृतिमात्रेण तत्पदप्राप्तिः स्यादित्यत आह ।। देवादित्वमिति ।

देवादित्वं योग्यतया तत्सकाशस्त्वनुस्मृतेः ।
श्वेतद्वीपादि तत्रापि योग्यतामप्यपेक्ष्य तु ।
विष्णोः स्थानं विनाऽन्यत्र वायुशक्रादिनामपि ।

त्रैलोक्यदेशभेदेषु योग्यता न त्वपेक्षितेति । देवादित्वमित्यनेन अन्यतमदेह प्राप्तिर्योग्यतानुसारेणैव न स्मरणमात्रादित्याह । आदिपदेन गन्धर्वपित्रोर्ग्रहणम् । तद्देहप्राप्तिरित्यर्थः । यौग्यतयैव भवति न स्मरणमात्रात् । योग्यताभावे तु देवाज्जातायाः अनुस्मृतेः मृतिकालीनदैवादिदेहस्मृतेः सकाशात् । तत्सकाशः तेषां देवादीनां सकाशः सामीप्यं प्राप्नोति । तत्र सामीप्येऽपि श्वेतद्वीपादिरूपं स्थानं योग्यतामपेक्ष्य तु योग्यतामपेक्ष्यैव प्राप्यं विष्णोः स्थानं श्वेतद्वीपादिकं विना अन्यत्रापि वायुशक्रादीनां स्थानं योग्यतामपेक्ष्यैव । त्रैलोक्यदेशभेदे तु । त्रैलोक्ये ये देशभेदा उक्तेभ्योऽन्ये ये देशविशेषाः तत्र देवादिसामीप्ये योग्यता नापेक्ष्यत इत्याचार्यवाक्ययोजना द्रष्टव्या ।। ४२ ।।

ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते ।
एवं स्वमायारचितेष्वसौ पुमान् गुणेषु रागानुगतो विमुह्यति ।। ४३ ।।

तात्पर्यम् – विभाव्यते विविधं भाव्यते । स्वमायारचितेषु विष्णुमायारचितेषु । रागानुगतः पुमान् जीवो विविधं मुह्यति । 'यथैवोदशरावेषु सूर्यादिः प्रतिबिम्बितः । वायुना चलितो भाति छिन्नभिन्नादिरूपवान् । एवं विष्ण्विच्छया जातगुणेषु प्रतिबिम्बितः । छिन्नो भिन्नो मृतोऽस्मीति बहुधा प्रतिपद्यते । तदेव च दृढीभूत उदके निःशरावके । छेदभेदादि नाप्नोति निश्चलं प्रतिबिम्बितम् । एवं गुणैर्विमुक्तस्तु जीवो नाप्नोति दुःखिताम् । शरावद्गुणाः प्रोक्ता अज्ञानं तु द्रवत्ववत् । दृढीभूतोदवज्जीवस्तज्ज्ञानं प्रतिबिम्बवत् । नित्यान्तःकरणं चैव प्रतिबिम्बश्च तद्गतः । द्वयमेव विमुक्तस्य न किञ्चिज्जडमिष्यते । सूर्यकान्तादिवत्तस्य स्वरूपं द्वयमप्युत । तस्मान्न हन्तुं शक्योऽसौ केनचिज्जीव आत्मवान् । तस्मात्स्वजीवनार्थाय न परद्रोहमाचरेत् । हन्यते चाज्ञभावेन

परेषां द्रोहमाचरन्ति'ति तन्त्रभागवते ॥ 'परः स्वो हरिरुद्दामा इति नामचतुष्टयम् । विष्णोर्गुह्यं तु यो वेद सर्वपापैः प्रमुच्यत' इति प्रकाशिकायाम् ॥ 'स्वतन्त्रत्वात्सुखत्वाच्च स्वनामा विष्णुरुच्यत' इति पाद्मे ॥ ४३ ॥

सत्यधर्मीया —— ज्योतिर्यथैवोदकपार्थिवेष्वद इति श्लोके यथाऽनिलबलेन चञ्चलीभवज्जलतस्तत्प्रतिबिम्बितं ज्योतिः सूर्यादिकं चलनस्खलनभाग्भवति तथा भगवान् रागानुगतो बहु स्यामितीच्छानुगतः स्वाज्ञानरचितेषु देहादिषु प्रतिबिम्बितोऽहं सुखी दुःखी बुधोऽबुधो बद्ध इति मिथ्यामतिं प्राप्नोति । स एवात्र गात्रे जीवादिरूपी । तत्र दुःखादिकं च मायिकमेव प्रतीयत इत्यन्यथाप्रतीतिमन्यथयितुं किञ्चिदनूद्य तत्तात्पर्यार्थमाह ॥ विभाव्यत इति । विभाव्यत इति मौलं पदम् । तव्द्याख्यानं तु विविधं भाव्यत इति । मायारचितेषु तथैव विष्णुमायारचितेषु । इदमपि रागानुगतः स्फुटार्थम् । पुमान् जीवः स्त्र्यादिसङ्ग्रहोऽनेन कृतो ज्ञेयः । विविधं मुह्यति मोहं प्राप्नोति । श्लोकमेकमखण्डप्रमाणेन व्याख्याति ॥ यथैवेति । उदमुदकं तत्पूर्णाः शरावा वर्धमानकास्तदादिषु सूर्यादिः प्रतिबिम्बितः । उदकपार्थिवेष्वित्यतः परं प्रतिबिम्बितमिति शेषः कर्तव्य इत्यनेनासूचि । समीरवेगानुगतमिति व्याकरोति ॥ वायुना चलितमिति । द्वैविध्यमाह ॥ छिन्नभिन्नादिरूपवानिति । अनेन विमुह्यतीति तात्पर्यमुक्तं वेदितव्यम् । एवं विष्विच्छयेति मायापदार्थः कथितः । प्रतिबिम्बो जीवो बहुधा, तृतीयाविभक्तेर्लोपः, बहुप्रकारेण प्रतिपद्यत आत्मानं जानाति । प्रकारान्तरेणेमं श्लोकं व्याकुर्वन्मानमुपन्यस्यति ॥ तदिति । निश्शरावके शरावान्निष्कासिते दृढीभूते उदके शरावादित्वेन दृढीभूते वाऽकम्प्याणुमुखपात्रस्थितं प्रतिबिम्बितं सूर्यादिकं निश्चलं सच्छेदभेदादिकं न प्राप्नोति । एवं गुणैः सत्त्वाद्यैर्विमुक्तस्त्यक्ताभिमतिरित्यर्थः । दुःखितं नाप्नोति । बिम्बप्रतिबिम्बभावं घटयितुं दृष्टान्त इव दार्ष्टान्तिकमुपपादयन्नाह शरावत्वच्छरावेण तुल्यं वर्तन्त इति ते तथा । ब्रह्मादिगुणवैशेष्यादानन्दादिः परस्य च । प्रतिबिम्बत्वमायाति मध्योच्चादिविभेदत इत्यादेर्गुणाः शराववत्प्रोक्ताः । अज्ञानं जैवं द्रवत्वं तज्जलमिव । यद्वा द्रवत्ववज्जलं लुप्तोपमा । तद्वद्दृढीभूतं यदुदमुदकं तद्वज्जीवस्तज्ज्ञानं जीवज्ञानं स्वरूपज्ञानं, प्रतिबिम्बो जीवो, जडान्तःकरणकार्यं च सज्जीवस्य दुःखादिकमिति दर्शयितुं नित्येति व्यशिंषदन्तःकरणमिति ज्ञेयम् । ननु मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिरिति स्थितेरुपाधिनाशेऽज्ञानान्तःकरणादिनाशस्ततः प्रतिबिम्बनाश इति सर्वनाशे मोक्षाशा का महामुने स्यादित्यत आह ॥ द्वयमिति । तस्य द्वयं ज्ञानान्तःकरणादिकं जडमजडं चेति प्रकारद्वयोपेतम् । तत्र जडस्य नाशोऽनाशश्चापरस्य विमुक्तस्य किञ्चिज्जडं नेष्यते प्रामाणिकैर्नाङ्गीक्रियते । जीवोपाधिर्द्विधा प्रोक्तः स्वरूपं बाह्य एव च । बाह्योपाधिर्लयं याति मुक्तावन्यस्य संस्थितिः । नित्योपाध्या स्वरूपया । चिद्रूपया युतो जीवः केशवप्रतिबिम्बक

इत्यादिचतुर्थतात्पर्यगीताभाष्याद्युक्तेः किञ्चिदपि न जडमतो न सूर्यकान्तादिवत् एकाकारं येनातिप्रसक्तिः स्यादिति भावः । उत लिङ्गभङ्गानन्तरं तस्य जीवस्य द्वयमुपाधिप्रतिबिम्बात्मकमपि स्वरूपमिष्यत इत्यन्वेति । न किञ्चिदित्येतद्विवरणमिदमिति ज्ञेयम् । देहस्य सर्वथा नाशशिरस्कत्वा-दात्मनश्चेदनाशात्किं प्रयुक्तमेतद्धननं न युक्तमित्यतस्तस्मान्न कस्यचिदित्युत्तरश्लोकतात्पर्यं विवक्षुस्तदर्थगर्भं मानमुदाहरन्नुपसंहरति ॥ तस्मादिति । असौ जीवः केनचिदपि न हन्तुं शक्य आत्मवान्नित्यभूतस्वबिम्बपरमात्मवान् बिम्बस्यानाशाच्चेतनस्याप्यनाशा- दुपाधेश्च नित्यतयाऽस्मान् न हन्तुं शक्य इति भावः । स्वजीवनार्थाय परद्रोहं नाचरेत् । य आचरेत्परेषां द्रोहमाचरन्सोऽज्ञ-भावेनैतत्प्रकाराज्ञत्वेन परैरत्रापरत्र हन्यते नरकाद्यनर्थं चाप्नोतित्यर्थः । स्वमायेत्यत्रत्यस्वशब्दो विष्णुवाचीत्यत्र मानमाह ॥ पर इति । परः स्वो हरिरुद्दाम इति नामचतुष्टयम् । गुह्यमज्ञैरज्ञाततत्वात् । यो वेद स सर्वपापैः प्रमुच्यते मुक्तो भवति । अर्थवादेन तद्वेदनस्यावश्यकत्वेन विधीयमानतां द्योतयति । रूढिशब्दचतुष्टयसाधारणीं प्रकाशसंहितया प्रकाश्य प्रस्तुतस्वपदं महायोगेन हरिपरमिति प्रत्याययत्पाद्मं च मानमाह ॥ स्वतन्त्रत्वादिति । स्वेति नाम यस्यासौ स्वनामा ॥ ततश्चायं श्लोकार्थः ॥ आत्मन एकत्वान्नानाविधताप्रतीतिः किं निबन्धनेत्यतः सदृष्टान्तं तत्सम्भवमाचष्टे ॥ ज्योतिरिति । अदो ज्योतिः सूर्यादिलक्षणम् । समीरवेगानुगतं समीरो वायुस्तस्य यो वेगस्तेनानुगतं सचलनं तच्चलनेनेत्यर्थः । उदकपार्थिवेषु पार्थिवाश्च मृद्विकृताः शरावोदश्चनादयः । उदकयुताश्च ते ते च । तेषु प्रतिबिम्बितं विभाव्यते छिन्नभिन्नत्वादिना प्रतीयत एकमप्येवं तथा असौ पुमान् जीवः स्वमायारचितेषु स्वस्य हरेर्माययेच्छया रचितेषु गुणेषु तत्कार्येषु देहेषु रागानुगतः । शोभनाध्यासो राग इति गीताभाष्योक्तेस्तदनुगतः सन्विमुह्यति छिन्नः खिन्नो भिन्नोऽहमिति विविधं वैचित्यं प्राप्नोति । किञ्च यथा तदेव ज्योतिः समीरवेगोऽनु हीनतां गतो यस्य तद्विकलमुदकपार्थिवेषु तन्मिश्रपार्थिवादिषु विभाव्यते वि विशिष्टमखण्डमिति यावत् भाव्यते प्रतीयते । एवं सज्जीवो, गुणेषुरागान्वित इति पदमेकम् । गुणेन स्वगुणेन वा इषुरागो इषु च तन्मयो भवेदिति सकलेशनिवेशवान् रागोऽनुगतोऽयं वा सोऽनुगतो येन वा । स्वमायारचितेषु देहादिषु विमुह्यति मोहं न प्राप्नोतीति सज्जीवपरतया शरावबद्गुणाः प्रोक्ता इत्यादिना तात्पर्यानुसारेण योजनीयोऽयं श्लोकः ॥ ४३ ॥

सुमनोरञ्जनी — किञ्च स्वमरणभयान्न स्त्रीवधो युक्तः । चेतनस्य मरणासिद्धेः । ननु कथं तर्हि छिन्नो भिन्नोऽस्मीति प्रत्यय इति चेत् । तस्य भ्रान्तित्वादिति सदृष्टांतं देहात्मवादेन प्रत्यवतिष्टंतं प्रत्याह ॥ ज्योतिरिति ॥ यथा अदः प्रत्यक्षसिद्धं ज्योतिः सूर्यादिलक्षणं तेजः उदकपूर्णेषु शरावोदंचनादिपार्थिवपदार्थेषु प्रतिबिम्बितमिति शेषः । समीरवेगानुगतं समीरस्य

वायोर्वेगस्यानुगतमनुकूलं वायुचलनेन चलितमिति यावत् । समीराद्यो वेग उदकादेश्चलनं तमनुगच्छतीति वा । विभाव्यते वि विविधं यथा तथा भाव्यते ज्ञायते जनैः । छिन्नभिन्नादिरूपवत्तया ज्ञायते इति भावः । एवं स्वमायारचितेषु । स्वो विष्णुः । परः स्वो हरिरुद्दाम इति नामचतुष्टयम् । विष्णोर्गुह्यं तु यो वेद सर्वपापैः प्रमुच्यत इति रूढिज्ञापकवचनात् । स्वतन्त्रत्वात्सुरत्वाच्च स्वनामा विष्णुरुच्यत इति योगप्रदर्शकवचनाच्च । तस्य मायया इच्छया रचितेषु । तथा चाचार्यैः स्वमायारचितेष्वित्यनूद्य विष्णुमायारचितेष्विति व्याख्यातम् । गुणेषु सत्वादिगुणात्मकेषु देहेषु तत्रापि लिङ्गदेहरूपबाह्योपाधौ प्रतिबिम्बितः मिश्रितः क्षीरनीरवत्संवलितः इति यावत्,असौ पुमान् जीवः, रागेण अनुरागेण अशोभने शोभनत्वाध्यासेन वा । रागोऽनुरागो लाक्षायामिति, रसो रागस्तथा सक्तिः शोभनाध्यास उच्यत इति चाभिधानात् । अनुगतः युक्तः सन् विमुह्यति वि विविधं मुह्यति मोहवान् भवति छिन्नो भिन्नो मृतोऽस्मीत्यादि बहुधा भ्रान्तिमान् भवतीति भावः । इयं च संसारिणामवस्था प्रदर्शिता । मुक्तस्य तु नैतादृशो मोह इत्येतदप्यनेनोच्यते । तथा हि । उदकपार्थिवेषु । उदकं पार्थिवमिव पार्थिववन्निश्चलतया विद्यमान उदक इति यावत् । प्रतिबिम्बितमदो ज्योतिः समीरवेगानुगतं समीरेण वेगश्चलनं तस्य अनु पश्चात् गतम् । अतिक्रान्तसमीरवेगमित्यर्थः । विभाव्यते च्छेदादिरहितं ज्ञायते । एवं स्वमायारचित्तेषु गुणेषु रागानुगतः । अनुगतो नष्टो रागो यस्यासौ तथोक्तः । असौ पुमान् विमुह्यति विगतमोहो भवतीति । एतदेवाभिप्रेत्योक्तं तात्पर्यनिर्णये ।

यथैवोदशरावेषु सूर्यादिः प्रतिबिम्बितः ।
वायुना चलितो भाति च्छिन्नभिन्नादिरूपवान् ।
एवं विष्ण्विच्छया जातगुणेषु प्रतिबिम्बितः ।
छिन्नो भिन्नो मृतोऽस्मीति बहुधा प्रतिपद्यते ।
तदेव च दृढीभूत उदके निःशरावके ।
छेदभेदादि नाप्नोति निश्चलं प्रतिबिम्बितम् ।
एवं गुणैर्विमुक्तस्तु जीवो नाप्नोति दुःखिताम् ।
शराववद्गुणाः प्रोक्ता अज्ञानन्तु द्रवत्ववत् ।
दृढीभूतोदवज्जीवस्तदज्ञानं प्रतिबिम्बवत् ।
नित्यान्तःकरणं चैवं प्रतिबिम्बश्च तद्गतः ।
द्वयमेव विमुक्तस्य न किञ्चिज्जडमिष्यते ।
सूर्यकान्तादिवत्तस्य स्वरूपं द्वयमप्युत ॥ इति ।

मूलोक्त–उदकपार्थिवेष्वित्यस्यार्थः उदशरावेष्विति । बहुवचनमाद्यर्थे । उदपूर्णशरावादिष्विति । ज्योतिरित्यस्य विवरणं सूर्यादिरिति । प्रतिबिम्बित इति शेषोक्तिः । समीरवेगानुगत इत्यस्य तात्पर्यं वायुना चलित इति । विभाव्यत इत्यस्य तात्पर्यं च्छिन्नभिन्नादिरूपवानिव भातीति । एवमित्यारभ्य गुणेष्वित्यन्तविवरणं विष्णिवच्छया जातगुणेष्विति । प्रतिबिम्बित इति पुनः शेषोक्तिः । विमुह्यतीत्यस्यार्थः छिन्न इत्यादि । प्रतिपद्यते जानातीत्यर्थः । संसारावस्थापरतया मूलं योजयित्वा मुक्त्यवस्थापरतयापि योजयति ॥ तदेवेति । तदेव ज्योतिरेव । दृढीभूत इत्यनेन उदकपार्थिवेष्वित्युक्तार्थम् । पार्थिववदृढीभूतेषूदकेष्विति । निश्चलमित्यनेन समीरवेगानुगतमित्येतदुक्त तात्पर्यम् । अतिक्रान्तसमीरवेगमिति । एवमित्यनेनोत्तरार्धं विवृतम् । गुणैर्विमुक्त इत्यनेन गुणेषु अनुगतो विनष्टो रागो यस्यासौ तथोक्त इत्ययमर्थः सूचितः । विमुह्यतीत्यस्यार्थो नाप्नोति दुःखितामित्यादि । छिन्नो भिन्नो मृतोऽस्मीत्यादिमोहजनितदुःखकृतनीचतालक्षणविकृतिं नाप्नोतीति तस्यार्थः । दृष्टान्तदार्ष्टान्तिकसाम्यं स्पष्टयति । शरावविदिति दृष्टान्ते शरावो यथा उपाधेर्जलस्याधिष्ठानं तथा दार्ष्टान्तिके गुणाः सत्त्वादयः तत्स्थानापन्नाः ज्ञेयाः । अज्ञानन्तु । अनेन लिङ्गशरीरं विवक्षितम् । द्रवत्ववत् । भवितृप्रधानो निर्देशः । द्रवीभूतोदकवत् उपाधित्वसाम्यात् । तस्य जीवस्य स्वरूपभूतं ज्ञानं ज्ञायतेऽनेनेति ज्ञानमन्तःकरणं, दृढीभूतोदवत् निश्चलोदकवत् मोहाहेतुत्वसाम्यात् । जीवः प्रतिबिम्बवत् ज्योतिः प्रतिबिम्बमिव उपाध्यायत्तत्वसाम्यादित्यर्थः । ननु मुक्तस्यापि बाह्योपाधिसत्त्वे कथं मोहाद्यभावः । तदसत्वे कथं प्रतिबिम्बता । उपाधिं विना तदयोगात् । स्वरूपज्ञानस्योपाधित्त्वे च जीवतत्स्वरूपज्ञानयोरभेदात्कथं प्रतिबिम्बोपाधिभाव इत्याशङ्काः क्रमेण निवारयन् मुक्तस्य बाह्योपाधिं निषेधति ॥ नित्येति । नित्यान्तःकरणं चैवं उपाधिरूपम् । तद्गतो जीवः प्रतिबिम्बश्च विशेषशक्त्या भवति यतोऽतो मुक्तस्य द्वयं उपाधित्वप्रतिबिम्बत्वेत्युभयमेवेष्यते न संसारिण इव जडमपीष्यत इति सम्बन्धः । अभेदमात्रेण नोपाधित्वप्रतिबिम्बत्वयोरनुपपत्तिः शङ्क्या । लोके सर्वत्राप्युपाधिप्रतिबिम्बयोरभेदस्यैव दर्शनादित्याह ॥ सूर्यकान्तादिवदिति । आदिपदेन दर्पणादेः परिग्रहः । सूर्यकान्ताद्युपाधेः स्वप्रतिबिम्बितवस्त्वभिन्नत्वेऽपि भेदस्याङ्गीकारादुपाधिप्रतिबिम्बभावो न विरुध्यते । एवं तस्य मुक्तस्य द्वयमपि उपाधिः प्रतिबिम्बश्चेति द्वयमपि स्वरूपं उत तथापि भेदप्रतिनिधिविशेषबलाद्भिभिन्नव्यवहारभागिति तात्पर्ययोजना द्रष्टव्या ॥ ४३ ॥

तस्मान्न कस्यचिद् द्रोहमाचरेत् स तथाविधः ।
आत्मनः क्षेममन्विच्छन् द्रोग्धुर्वै परतो भयम् ॥ ४४ ॥

सत्यधर्मीया — निगमयति ॥ तस्मादिति । यस्मात्तथाविधो नित्योपाध्यादियुतः परोऽपि स्वयं च तथाविधस्तत्प्रकार इति । कस्यचित्प्राणिनो द्रोहमात्मनः क्षेममन्विच्छन्नाचरेत् । आचरतश्चानर्थमाह ॥ परतो भयमिति । परत उपद्रुतादत्र परत्र च नरकादिभयं च भवतीति शेषः ॥ ४४ ॥

सुमनोरञ्जनी — उक्तार्थमुपसंहरति ॥ तस्मादिति । यस्मादात्मा न हन्तुं शक्यः देहश्च नियतमृत्युः तस्मादात्मनः स्वस्य क्षेममन्विच्छन् सन् कस्यचित्प्राणिनो द्रोहं हिंसादिलक्षणापराधं नाचरेत् । कुत इति तत्राह ॥ स इति । यतः सोऽपि द्रोहविषयोऽपि तथाविधः आत्मनः क्षेममन्विच्छन्नेव भवति अत इत्यर्थः । क्षेमेच्छायाः साम्यादिति भावः । यदिच्छया परद्रोहाचरणं तदपि न सिध्यतीत्याह ॥ द्रोग्धुरिति । आत्मक्षेमेच्छया द्रोग्धुः द्रोहकर्तुः परतोऽन्यस्माद्भयं स्वहिंसादिलक्षणं वै निश्चितमेव । परतः परलोके दुःखलक्षणं भयं भवतीति वा । तदुक्तम् ।

तस्मान्न हन्तुं शक्योऽसौ केनचिज्जीव आत्मवान् ।
तस्मात्स्वजीवनार्थाय न परद्रोहमाचरेत् ॥ इति ॥ ४४ ॥

एष तवानुजा बाला कृपणा पुत्रिकोपमा ।
हन्तुं नार्हसि कल्याणीमिमां त्वं दीनवत्सल ॥ ४५ ॥

सत्यधर्मीया — प्रकृतमनुसरति ॥ एषेति । बहुहेतूक्तिस्तु मुक्तिर्भवेदिति मन्तव्यम् । पुत्रिकोपमा पुत्तलिका वस्त्रमयी वा तदुपमा निर्जीवप्रायेति वाऽर्थः । इतरस्तु स्फुटः ॥ ४५ ॥

सुमनोरञ्जनी — हे दीनवत्सल!दीनान् वत्समिव लाति स्वीकरोतीति तथोक्त कंस! त्वं कल्याणीं मङ्गलोपेतां नूतनविवाहितामिति यावत् । इमां देवकीं हन्तुं संहर्तुं नार्हसि । कुत इत्यतस्तत्र निमित्तान्याह ॥ एषेति । यत एषा तव,अनु पश्चाज्जाता भगिनीत्यर्थः । बाला द्वादशवार्षिकी । एकादशद्वादशयोस्तु बालेत्युक्तेः । अत एव कृपणा कृपापात्रा । पुत्रिकोपमा तव ज्येष्ठभ्रातृत्वेन पितुः समत्वादिति भावः ॥ ४५ ॥

श्रीशुक उवाच -

एवं स सामभिर्भेदैर्बोध्यमानोऽपि दारुणः ।
न न्यवर्तत कौरव्य पुरुषादाननुव्रतः ॥ ४६ ॥

सत्यधर्मीया — पुरुषादाननुव्रत इत्यनेन कामिनीकारुण्यं राक्षसानामस्तीति ध्वनितम् । वधूवधनिषेधे प्रस्तुते तदननुगुणमित्यतोऽप्याह ॥ पुरुषादाननुव्रत इति । पुरुषादा अननुव्रता येन,

पुरुषादैरननुव्रत इति वा । तैरपि जुगुप्सिते कर्मण्युद्युक्त इत्यानुगुण्यं ज्ञेयम् । एतत्सर्वनिर्वाहार्थं दारुण इत्यक्तम् । स कंसः सामभिर्भेदैश्च बोध्यमानो वसुदेवेनेति शेषः । भगिनीभङ्गभङ्ग्या न न्यवर्तत न निववृते । तत्र हेतुर्दारुण इति । स्वभावतः क्रूरश्चेदपि बोधकाः साधवो वर्तेरन्नित्यत आह ॥ पुरुषादाननुव्रत इति । पुरुषानदन्तीतिताननुव्रतो राक्षसानुसृतेर्नापससारैवैतत्कुकर्मत इति भावः॥४६॥

सुमनोरञ्जनी — एवमुक्तप्रकारेण सम्बन्धादिकीर्तनेन सामभिः दृष्टादृष्टभयोक्त्या भेदैश्च बोध्यमानोऽपि प्रकृत्यैव दारुणः स कंसः । पुरुषादान् पुरुषानदन्ति खादन्तीति राक्षसास्तान् अनुव्रतः तत्स्वभावसदृशस्वभाव इति । हे कौरव्येति परीक्षितं प्रति शुकसम्बोधनम् । न न्यवर्तत भगिनीहननोद्योगात् न निवृत्तः । राक्षसस्वभावसदृशस्वभावत्वात्तं निर्बन्धं न त्यक्तवानिति भावः ॥ ४६ ॥

निर्बन्धं तस्य तं ज्ञात्वा विचिन्त्यानकदुन्दुभिः ।
प्राप्तकालं प्रतिव्योढुमिदं तत्रान्वपद्यत ॥ ४७ ॥

सत्यधर्मीया — यदा दुर्वृत्तोऽनिवृत्तस्तदा वसुदेवः किमचरच्चरममुपशमोपायमित्यतोऽष्टभिः स्पष्टयति श्लोकैः निर्बन्धं तस्येत्यादिभिः। तस्य कंसस्य निर्बन्धं हननदुराग्रहं प्रतिव्योढुं तदपोहितुं विचिन्त्य किञ्चिदालोच्य प्राप्तकालमनु सङ्कटकाले युक्तमिदमन्वपद्यतालब्ध ॥ ४७ ॥

सुमनोरञ्जनी — तस्य कंसस्य तं निर्बन्धं स्त्रीवधे आग्रहं ज्ञात्वा आनकदुन्दुभिः वसुदेवः प्राप्तं प्रतिकूलकालं प्रतिव्योढुं अत्येतुं इदं वक्ष्यमाणं अन्वपद्यत मनसा निश्चितवान् ॥ ४७ ॥

मृत्युर्बुद्धिमताऽपोह्यो यावद्बुद्धिबलोदयम् ।
यद्यसौ न निवर्तेत नापराधोऽस्ति देहिनः ॥ ४८ ॥

सत्यधर्मीया — यावद्बुद्धिबलोदयं बुद्धेर्यद्बलं तस्योदयो यावत्पर्यन्तं वर्तते तत्पर्यन्तं यथा भवति तथा । यावदवधारण इत्यव्ययीभावः । सैव नास्ति चेन्न तद्बलं तदुदयस्तु कपोणिगुडायित इत्यत आह ॥ बुद्धिमतेति । तत्रापि मतुपा प्राशस्त्यं तस्य द्योत्यते । मृत्युरपोह्यः परिहार्योऽसौ मृत्युर्यदि न निवर्तेत देहिनः परिहृतियत्नं कुर्वतोऽपराधो वैदिकलौकिकापवादलक्षणो नास्ति । यत्ने कृते यदि न सिध्यति कोऽत्र दोषः । प्रयत्नमग्रतो निधायेत्यादेः । अपरैर्हेतुभिरवान्तरैस्तन्निमित्तकमधोऽधोगतिरपि नास्तीति वर्णयन्ति ॥ ४८ ॥

सुमनोरञ्जनी — बुद्धिमता पुरुषेण मृत्युः यावद्बुद्धिबलोदयं अव्ययीभावोऽयं, स्वबुद्धिबलोदयानुसारेणेत्यर्थः । अपोह्यः निरसनीयः । यद्यसौ मृत्युः न निवर्तेत तदा देहिनोऽपराधः मृत्युनिरसनप्रयत्नानाचरणलक्षणो नास्तीति योजना । अपराधः शास्त्रविरुद्धाचरणलक्षण इति पदरत्नावल्याम् ॥ ४८ ॥

प्रत्यर्प्य मृत्यवे पुत्रान् मोचये कृपणामिमाम् ।
सुता मे यदि जायेरन् मृत्युर्वा न म्रियेत चेत् ॥ ४९ ॥

सत्यधर्मीया — पुत्रानेतद्गात्रजान्मृत्यवे हननाय कृपणां दयापदां प्रत्यर्प्य सङ्कल्पपूर्वमर्पणं कृत्वा मोचये । एकस्य मृतिं प्रच्यावयितुमनेकतोकसमर्पणसङ्कल्पो नाल्पमतिमत्सम्मत इत्यत आन्तरङ्गिकीं काञ्चन कालयापनचिन्तामुचितामाह ॥ सुता इति । यदि मम सुता जायेरंस्तदा किल समर्पणं तन्मध्ये मृत्युरयं कंसो म्रियेत न चेत्किल दानं दानवाय ॥ ४९ ॥

सुमनोरञ्जनी — प्राप्तमृत्युपरिहाराय कमप्युपायमपश्यदिति तदाह ॥ प्रत्यर्प्येति । मृत्यवे मारकाय पुत्रान्प्रत्यर्प्य अर्पयामीति प्रतिश्रुत्य यथाश्रुते क्त्वाप्रत्ययानुपपत्तिः एनां कृपणां मोचये । ननु अपत्यार्पणेन भार्यामोचने पुनरपत्यमृत्युव्यसनं सममेवेत्यत आह ॥ सुता इति । मे सुताः यदि न जायेरन् तदा मृत्युर्मारकः कंसो वा म्रियेत सुतोत्पत्तेः प्राक् म्रियेत चेत् तदा च न व्यसनम् । यदि सुताः जायेरन् मृत्युर्न म्रियेत न मरिष्यति तदा तु विपर्ययः । मत्सुतेन कंसवधरूपः किं न स्यात् । कुत इति तत्राह ॥ धातुरीश्वरस्य गतिरिच्छा । मतिबुद्धीत्यादौ गतिशब्दपर्यायमतिशब्दस्य इच्छार्थत्वात्। गतिश्चेष्टेति पदरत्नावल्याम् । दुरत्यया अतिक्रान्तुमशक्या दुर्ज्ञेयेति यावत् । तदेवोपपादयति ॥ उपेति । यथा धातुर्गत्या उपस्थितः प्राप्तोऽपि मृत्युर्निवर्तेत यथा सांदीपिपुत्रादीनाम्। निवृत्तोऽपि निवृत्ततया निश्चितोऽपि पुनरापतेत् यथा रावणादीनां ब्रह्मादिवरादवध्यतया निश्चितानामिति ॥ ४९,५० ॥

विपर्ययो वा किं न स्याद् गतिर्धातुर्दुरत्यया ।
उपस्थितो निवर्तेत निवृत्तः पुनरापतेत् ॥ ५० ॥

सत्यधर्मीया — विपर्यय एतन्मरणं वा न स्यात्किं, न चेयतिसमये कथं कंसहिंसेत्यतः शंसति ॥ गतिरिति । विपर्ययः मम सुतादेवास्य मृत्युः किं न स्यात् । तनुजस्य तनीयसः कथं कथयैतन्मथकतेति तत्राह ॥ गतिरिति । धातुर्विधातुर्गतिर्दुरत्ययाऽत्येतुमशक्येति वा । यद्भावि तद्भवत्येवेति भव वसुदेव तूष्णीक इत्यत आह ॥ उपस्थित इति । सद्य उपस्थितो मृत्युः तया

निवर्तेत। इदानीं निवृत्तो मृत्युस्तद्रूपोऽयं पुनर्मत्तनुजजनननानन्तरं तेनैवापतेत् । अत्र गतिर्धातुर्दुरत्ययेत्यपि योज्यम् । अस्यास्त्वामष्टमो गर्भो हन्तेत्यशरीरा गीरपि न वितथा भविष्यतीत्यन्तरङ्गबलवानेवं वसुदेवोऽवादीदिति भावसूचकं पीठिकोक्तं बुद्धिमत्त्वमिति मन्तव्यम् ॥ ५० ॥

अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोऽन्यन्न निमित्तमस्ति ।
एवं हि जन्तोरपि दुर्विभाव्यः शरीरसंयोगवियोगहेतुः ॥ ५१ ॥

तात्पर्यम् – कुण्डादिस्थाग्नेर्दारुयोगादौ स्वतः प्रवृत्त्यभावात् । 'यथा कुण्डस्थितस्याग्नेर्दैवाद्दारूपसंनमेत् । देहयोगो वियोगश्च तथा दैवान्न चान्यथे'ति वामने ॥ ५१ ॥

सत्यधर्मीया — अग्नेर्यथा दारुवियोगयोगयोरिति श्लोके काष्ठसंयोगवियोगावदृष्टघटिताविति प्रतीयते । न चैतद्युक्तम् । तयोर्यथायथं दृष्टसामग्रीसिद्धेरिति परिहर्तुमभीप्सितमध्याहृत्य व्याकृत्य तदप्रामाणिकत्वप्रच्युत्यै वामनपुराणवचनमुदाहरति ॥ कुण्डादिस्थेति । कुण्डादिस्थो योऽग्निस्तस्य दारुयोगादौ योगवियोगादौ स्वतः योजकं विना प्रवृत्तेरभावान्मूलानुकूल्येन वियोगयोगादाविति वक्तव्ये वियोगस्तु योगानन्तरकालिक इति वाऽभावज्ञानं प्रतियोगिज्ञानाधीनमित्यभाव- प्रतीतिर्भावप्रतीत्यधीना नियमेनेति टीकोक्तेर्युक्तं तात्पर्ये वियोगादग्रे योगाभिधानमिति ज्ञेयम् ।-अत एव मूलकृदपि दार्ष्टान्तिकसादृश्योक्तिसमये शरीरसंयोगवियोगेति पुरस्कुर्वन्संयोगं स्ववचनं व्याचख्याविति भावमिमं व्याख्यानं आचार्या आविर्भावयामासुरिति विभावनीयम् । पूर्वं तथोक्तिस्तु तयोरदृष्टघटितत्वाविशेषादिति मन्तव्यम् । कंसनिर्बन्धानुसारेण वियोगस्य पुरस्कृतिरिति वा । यथा कुण्डस्थितस्याग्नेस्तदादिस्थिताग्नेर्दैवाद्धरेः सकाशादेव दारुकाष्ठमुपसन्नमेत्प्रह्वं भवेत्संयुक्तं भवेदिति यावत् । अन्यथेत्याकर्षणीयम् । अन्यथा च न सन्नमेद्वियुक्तं च भवेत् । तथा देहयोगः । पुनर्देहेति योगपदेन समस्तमपि विश्लेष्य वियोगपदेनाप्यन्वेतव्यम् । देहयोगो देहवियोगश्चेति । देवाद्वासुदेवादेव । अन्यथा न च । अनेनाचेतनाग्निनिकेतनश्चेतनोऽपि प्रत्युक्तः । माने वामने देवादित्येकवारोक्तौ चारितार्थ्ये पुनर्दैवादित्युक्तिर्दैवं दिष्टमित्युक्तदैवस्याप्यस्वातन्त्र्यं द्योतयितुमिति मन्तव्यम् ॥ ततश्चायं श्लोकार्थः ॥ यथाग्नेर्दारुवियोगयोगयोः काष्ठसंयोगवियोगयोरदृष्टतोऽदृष्टादन्यन्निमित्तं हेतुरितरो नास्ति । एवं तथा सर्वजन्तूनां शरीरसंयोगवियोगहेतुर्हरेरितरो दुर्विभाव्यो दुःसाध्यविभावः । अतो भगवानेवाङ्गसङ्गतद्भङ्गकृदिति नाभिमानाद्भामिनीहननमुन्नहनहेतुरिति निवर्तस्वेति भावः ॥ ५१ ॥

सुमनोरञ्जनी — इतोऽपि दुर्ज्ञेयत्वमुपपादयति ॥ अग्नेरिति । यथाऽग्नेः कुण्डादिस्थाग्नेर्दारुणा वियोगो योगाभाव,: योगः सम्बन्धः तयोरदृष्टतोऽदृष्टनियामकाद्धरेरन्यन्निमित्तं नास्तीति हि निश्चितम्। अग्नेर्दार्वादिर्वा स्वतः प्रवृत्त्यभावादिति भावः । एवं जन्तोर्जीवस्य

शरीरसंयोगवियोगयोर्हेतुरदृष्टतोऽदृष्टनियामकश्रीहरेरन्यो दुर्विभाव्यो दुर्ज्ञेय इति । तदुक्तम् । कुण्डादिस्थाग्नेर्दारुयोगादौ प्रवृत्त्यभावात् ।

यथा कुण्डस्थितस्याग्नेर्दैवाद्दारूपसंगमेत् ।

देहयोगो वियोगश्च तथा दैवान्न चान्यथेति ॥ स्वतः प्रवृत्त्यभावात् प्रवृत्त्यभावस्य निश्चितत्वादित्यर्थः । कुण्डस्थिताग्निं दारु दैवादेवोपसंगमेत् समीपं प्राप्नुयात् तथेति वचनार्थः ॥ ५१ ॥

एवं विमृश्य तं पापं यावदात्मनि दर्शनम् ।
सान्त्वयामास वै शौरिर्बहुमानपुरस्सरम् ॥ ५२ ॥

सत्यधर्मीया — तं पापं पापपुरुषं विमृश्य निश्चित्य । आत्मनि स्वस्मिन्दर्शनं शास्त्रज्ञानं यावत्तावता शौरिर्बहुमानपुरःसरं राजेति बहुमानपूर्वकं यावदात्मनिदर्शनं स्वानुभूतदृष्टान्तो यावान्यावदात्मनिदर्शनं यथा तथा । बहुमानपुरःसरं प्रमाणोपन्यसनपूर्वकं वा विमृश्यालोच्येति वा सान्त्वयामास ॥ ५२ ॥

सुमनोरञ्जनी — एवं स्वयमेव विमृश्य मनसाऽऽलोच्य तं पापं पापिनं कंसं, आत्मनि दर्शनं ज्ञानं यावत् स्वबुध्यनुसारेणेति तात्पर्यम् । बहुमानपुरःसरं बहुमानपूर्वकं सांत्वयामासेति योजना । ॥ ५२ ॥

प्रसन्नवदनाम्भोजो नृशंसं निरपत्रपम् ।
मनसा दूयमानेन प्रहसन्निदमब्रवीत् ॥ ५३ ॥

सत्यधर्मीया — प्रसन्नवदनाम्भोजः प्रत्यग्रवदनाम्भोज इति च पाठौ । प्रसन्नं वदनाम्भोजं यस्य सः । प्रत्यग्रं वदनमेवाम्भोजं यस्य सः । प्रत्यग्रमुक्तं सद्यस्कमिति हलायुधः । दूयमानेन तप्यमानेन मनसाऽन्तः, प्रहसन् बहिः ॥ ५३ ॥

सुमनोरञ्जनी — प्रत्यग्रं नूतनं वदनमंभोजमिव यस्य स तथा प्रसन्नवदन इति यावत् वसुदेवः । प्रत्यग्रोऽभिनवो नव्य इत्यमरः । नृशंसं घातकम् । निर्गता अपत्रपा लज्जा यस्मात्तथाविधं कंसं प्रति दूयमानेन दुःखितेन मनसेत्यन्तस्तापं सूचयति । प्रहसन्निति बहिःप्रसादम् । इदं च महतां लक्षणमिति पदरत्नावल्याम् । इदं वक्ष्यमाणं वचनं अब्रवीदिति योजना ॥ ५३ ॥

वसुदेव उवाच -

न ह्यस्यास्ते भयं सौम्य यद् वै त्वाऽऽहाशरीरवाक् ।
पुत्रान्समर्पयिष्येऽस्या यतस्ते भयमुत्थितम् ॥ ५४ ॥

इति श्रीमद्भागवते दशमस्कन्धे प्रथमोऽध्यायः ॥

सत्यधर्मीया — सौम्येति सुमुखीकर्तुमुक्तिः । अशरीरिणी वाग्वाणी यद्भयमाह तदस्याः सकाशात्ते न हि यतः पुत्रेभ्यो भयमुत्थितं तान्पुत्रांस्ते समर्पयिष्ये जातं जातं पोतं घातयितुं यातयामि । अष्टमत्वं प्रातिस्विकं सम्भवदेकत्र पर्याप्तमिति हन्ताऽस्या अष्टमो गर्भ इत्युक्तावपीति पुत्रानित्युक्तिः । त इत्यावर्तते । ते त्वया ते पुत्रा अस्या निरस्याः संहार्या इति यावत् । अतोऽभयं भयाभावः सिद्ध इत्यन्वयो वा । अनेनोभयस्थाने भयशब्दस्येवास्या इति शब्दस्यापि प्रयोगेऽतिरेकयितृमूकता बोधितेति बोध्यम् ॥ ५४ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे प्रथमोऽध्यायः ॥ १०-१ ॥

सुमनोरञ्जनी — अशरीरवाक् यद्भयं त्वा त्वां प्रत्याह तत् भयं अस्याः देवक्याः सकाशात् नेति हि निश्चितं खलु । अस्याः पुत्रान् ते तुभ्यं समर्पयिष्ये । कुतः । यत इति तन्त्रम् । यतः यस्मात् येषां पुत्राणां अन्यतमात् ते भयमुत्थितं अतः तस्मादिति योजना द्रष्टव्या ॥ ५४ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां प्रथमोऽध्यायः ॥ १०-१ ॥

॥ अथ द्वितीयोऽध्यायः ॥

श्रीशुक उवाच -

सुहृद्वधान्निववृते कंसस्तद्वाक्यसारवित् ।
वसुदेवोऽपि तं प्रीतः प्रशस्य प्राविशद् गृहम् ॥ १ ॥

सत्यधर्मीया — अत्र कंसकृत्यशंसनापदेशेन संसारो निस्सार इति शुकः शंसति ॥ सुहृद्वधादिति । भगिनीवधात् । सुहृदिति वदन्नदो हृदयं पद्माधवसद्मायितमिति शोभनं तद्वती सा देवकीति ध्वनयति । कंसो हिंसात इदानीं निवृत्तः किं क्षणान्तरे तनोतीत्यपि न किन्तु मनःशौध्यान्निववृत इत्यप्याह ॥ सुहृदिति । शुद्धमनस्को वधात्प्रस्तुतादिव । तत्र निमित्तमाह ॥ तद्वाक्यसारविदिति । तस्य वसुदेवस्य वाक्यं तद्वाक्ये यः सारस्तं वेत्तीति स तथा । अशरीरवाणीसारविदिति वा । वाक्यभावविन्निववृते । प्रीतः प्रस्तुतभीत्यपगमात्प्रशस्य स्तुत्वा स्वगृहं प्राविशत् ॥ १ ॥

सुमनोरञ्जनी — तद्वाक्यसारवित् तस्य वसुदेवस्य वाक्यसारं वाक्याभिप्रायं वेत्तीति स तथा कंसः। सुहृत् सहोदरी देवकी तस्याः वधात् । निववृते निवृत्तोऽभवत् । तेन वसुदेवोऽपि प्रीतः सन् । तं कंसं प्रशंस्य श्लाघयित्वा । स्वगृहं प्राविशदिति सम्बन्धः ॥ १ ॥

अथ काल उपावृत्ते देवकी सर्वदेवता ।
पुत्रान् प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरम् ॥ २ ॥

सत्यधर्मीया — सर्वदेवताः सर्वा देवता यस्यां सन्निधानवत्य इति वा भगवदवतारभूतत्वात्सर्वस्तुत्येति वा । दशमे मासि जायत इति श्रुतिश्रावितसमये उपावृत्ते प्राप्ते सति अष्टौ पुत्रानेकां कन्यां चानुवत्सरं संवत्सरस्यैकैकमिति प्रसुषुवे ॥ २ ॥

सुमनोरञ्जनी — अथ काल यौवनकाल उपावृत्ते प्राप्ते । सर्वाः देवताः यस्यां सन्निहिताः सा तथा । अनुवत्सरं वत्सरानुक्रमेण । एकैकस्मिन्वत्सरे एकैकमिति क्रमेण । अष्टौ बलभद्रसहितान् सप्त पुत्रान् एकां कन्यां च सुषुव इत्यन्वयः । पुत्रान् कन्यां चेत्यष्टावपत्यानि सुषुव इति वा । तेन बलभद्रस्य रोहिणीजातत्वे न दोषः ॥ २ ॥

कीर्तिमन्तं प्रथमजं कंसायानकदुन्दुभिः ।
अर्पयामास कृच्छ्रेण सोऽनृतादतिविह्वलः ॥ ३ ॥

सत्यधर्मीया — जन्मनाम्ना कीर्तिमन्तम् । प्रथमं जायते स तथा तं कृच्छ्रेण कष्टेन कंसायार्पयामास । विना तद्याश्चां हिंसायै कंसाय दानं नोचितमित्यत आह ।। सोऽनृतादतिविव्हल इति । अदाने प्राप्यादनृतात्तद्धादित्वप्रयुक्तपातकादति विव्हलः सन्नार्पयत् ।। ३ ।।

सुमनोरञ्जनी — अनृतादनृतवचनात् । विह्वलो भीतः । आनकदुन्दुभिर्वसुदेवः । प्रथमजम् कीर्तिमन्तम् । प्राग्जन्मनि कीर्तिमान्नामकमित्यर्थः ।। ३ ।।

किं दुस्सहं नु साधूनां विदुषां किमपेक्षितम् ।
किमकार्यं कदर्याणां दुस्त्यजं किम् ऋतात्मनाम् ।। ४ ।।

सत्यधर्मीया — पादत्रयेण सत्स्वभावमेकेन दुःस्वभावं चावेदयन्कथं वसुदेवो नृपभीतः पोतमदादित्युत्तरयति ।। किमिति । साधूनां किं दुःसहं विदुषामपेक्षितं किं न किमपीत्युपेक्षितवान्सुतमिति भावः । किञ्चेदमपि तनुजत्यजनं दुःशकमित्यत आह । ऋतात्मनां सत्यसंहितचेतसां किं दुस्त्यजं न किमपि सर्वं सुत्यजमिति भावः । वसुदेवदत्तं पुत्रं न हन्यात्कंस इत्यत आह । कदर्याणां कृपणानां कुत्सितस्वामिनां वाऽकार्यं किं सर्वं हिंसादिकार्यमेवेत्यर्थ इति । कदर्ये कृपणक्षुद्रकिंपचानेत्यमरः । पर्यायेष्वेवं बहुस्थलेष्वमरो वर्तत इति नाद्भुतमिदम् । ऋतात्मनां हरिमनसामिति वा । ऋ गताविति धातोस्तु पूर्वावगतवत्सदास्थितेर्ब्रह्मर्तमित्युक्तमित्युक्तेः । ऋतमुञ्छशिलमित्युक्तेस्तद्वृत्तिमनसां वा ।। ४ ।।

सुमनोरञ्जनी — ननु कथं परमप्रेमास्पदं ज्येष्ठापत्यं नृशंसाय कंसाय समर्पितवानित्यतस्तत्राह ।। किमिति । अत्र यथा तथेत्युपस्कर्तव्यम् ।। यथा साधूनां विहिताचरणशीलानाम् । दुःसहं सोढुमशक्यं किम् न किमपि । यथा वा विदुषां ज्ञानिनां एकान्तिनामिति यावत् । किमपेक्षितं भगवत्प्रसादमन्तरा न किमपि । कदर्याणां निन्दितानां अकार्यं किं न किमपीति च यथा, कंसस्वभावबोधनायेदं, तथा ऋतात्मनां सत्यवचनस्वभावानां किं दुस्त्यजं न किमपि । स्वशरीरमपि त्यक्त्वा सत्यमेव रक्षन्ति महान्त इति भावः ।। ४ ।।

दृष्ट्वा समत्वं तच्छौरेः सत्ये चैव व्यवस्थितिम् ।
कंसस्तुष्टमना राजन् प्रहसन्निदमब्रवीत् ।। ५ ।।

सत्यधर्मीया — समत्वं तोषकातोषकार्ययोः सत्ये यथार्थभाषणे व्यवस्थितिं च दृष्ट्वैव तुष्टमनाः कंसः प्रहसन्सन्निदमब्रवीत् ।। ५ ।।

सुमनोरञ्जनी — कंसः, शौरेः शूरपुत्रस्य । समत्वं, शत्रुमित्रोदासीनेषु । सत्ये व्यवस्थितिं निष्ठां च ॥ ५ ॥

प्रतियातु कुमारोऽयं न ह्यस्मादस्ति मे भयम् ।
अष्टमाद् युवयोः पुत्रान्मृत्युर्मे विहितः किल ॥ ६ ॥

सत्यधर्मीया — अस्मात्प्राथमिकात्कुमारान्मे भयं हि यतो नास्ति ततोऽयं कुमारः प्रतियातु । युवयोरष्टमात्पुत्रान्मे मृत्युर्विहितः । किलेत्यशरीरवाणीवार्तायाम् ॥ ६ ॥

सुमनोरञ्जनी — अयं कुमारः प्रतियातु एनं गृहीत्वा गच्छेत्यर्थः । कुत इति तत्राह ॥ न हीति । विहितः प्रतिपादितः । विधिनेति शेषः ॥ ६ ॥

तथेति सुतमादाय ययावानकदुन्दुभिः ।
नाभ्यनन्दत तद्वाक्यमसतोऽविजितात्मनः ॥ ७ ॥

सत्यधर्मीया — असतस्तत्राप्यविजितात्मनोऽनिगृहीतमानसस्य तत् प्रतियातु कुमारोऽयमिति वचनं नाभ्यनन्दत न विश्वसनीयमिति न तुतोष ॥ ७ ॥

सुमनोरञ्जनी — तद्वाक्यं श्रुत्वा नाभ्यनंदत । तत्र हेतुरसत इति । असुरस्वभावस्येत्यर्थः । अत एव अविजितात्मनः । अविजितं अस्वाधीनं आत्मा मनो यस्यासौ तथोक्तः । अस्य वचनमपि नाभ्यनन्दतेति ॥ ७ ॥

नन्दाद्या ये व्रजे गोपा याश्चामीषां च योषितः ।
वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ।
सर्वे वै देवताप्राया उभयोरपि भारत ॥ ८ ॥

सत्यधर्मीया — शुकः कंसघ्नकंसपक्षीयस्वरूपं निरूपयति ॥ नन्दाद्या इति । अमीषां गोपानां वसुदेवाद्या वृष्णयो देवक्याद्या यदुस्त्रियश्चेत्युभयोर्वसुदेवनन्दकुलयोः सर्वे देवताप्राया बाहुल्येन देवता एव ॥ ८ ॥

सुमनोरञ्जनी — तत्र उपोद्घातेन शुकः परीक्षितं प्रति देवासुरस्वभावान् कथयति ॥ नन्दाद्या इति । व्रजे गोकुले । नन्दाद्याः गोपाः । अमीषां नन्दादीनाम् । वसुदेवाद्या वृष्णयः देवताप्रायाः प्रायशो देवताः देवाः देवसदृशाश्चेत्यर्थः । उभयोः वसुदेवनन्दगोपयोः ॥ ८ ॥

ज्ञातयो बन्धुसुहृदो ये च कंसमनुव्रताः ।
असुराः सर्व एवैते लोकोपद्रवकारिणः ॥ ९ ॥

सत्यधर्मीया — ये च कंसमनुव्रतास्तज्ज्ञातयः सुहृदश्च लोकोपद्रवकारिण एते सर्व एवासुरा दैत्याः ॥ ९ ॥

सुमनोरञ्जनी — न केवलमेतावन्त एव किं तु ज्ञातयः भोजांधकादयः बन्धवः, पाण्डवाद्याः । सुहृदो मित्राणि च देवताप्राया इत्यन्वयः । ये च ये तु कंसं अनुव्रता अनुसृत्य वर्तनमेव व्रतं येषां ते तथोक्ताः । ये ते सर्वे असुरा एवेत्यन्वयः । असुरत्वे निमित्तं लोकोपद्रवेति । लोकानां उपद्रवं कुर्वंतीति तथेति हेतुगर्भविशेषणम् ॥ ९ ॥

गतेऽथ वसुदेवे तु देवकार्यार्थमुद्यतः ।
एतत् कंसाय भगवान्शंसयामास नारदः ॥ १० ॥

भूमेर्भारावतीर्णानां दैत्यानां च वधोद्यमम् ॥ ११ ॥

सत्यधर्मीया — देवकार्यार्थमुद्यतो नारदो, देवताकार्यमेवार्थः स्वप्रयोजनं तेन मुद्यस्य स, यतस्तत इति वा । भगवान्नारदः कंसाय गतम् । एतन्नन्दादिदेवादित्वं शंसयामास । णिच् स्वार्थे शशंस । शशंसाभ्येत्य नारद इति पठन्ति । तथोत्तरत्र भूमेर्भारायमाणानामिति च ॥ १०,११ ॥

सुमनोरञ्जनी — एवमुक्त्वा प्रकृतमनुसरति ॥ गत इति । देवैः कार्यं भूभारपरिहारलक्षणं तदर्थमुद्यतः किंचित्साहाय्यं कर्तुमुद्युक्तो नारदः एतत्प्रसङ्गतयोक्तं भूमेर्भाराय अवतीर्णानां दैत्यानां देवैः क्रियमाणं वधोद्यमं च शंसयामास कथयामासेति । नन्दाद्या इत्यारभ्य वधोद्यमं इत्यंतं नारदवाक्यमिति पदरत्नावल्याम् ॥ १०,११ ॥

ऋषेर्विनिर्गमे कंसो यदून् मत्वा सुरानिति ।
देवक्या गर्भसम्भूतं विष्णुं च स्ववधं प्रति ॥ १२ ॥

देवकीं वसुदेवं च निगृह्य निगडैर्गृहे ।
जातं जातमहन् पुत्रं तयोरजनशङ्कया ॥ १३ ॥

सत्यधर्मीया — ऋषेर्देवर्षेर्विनिर्गमे गमने इत्येवं प्रकारेण जाते सति स्ववधं प्रति तमुद्दिश्य विष्णुं देवक्या गर्भसम्भूतं मत्वा तथा यदून्सुरांश्च मत्वा देवकीं वसुदेवं च निगडैः शृङ्खलादिभिः । अनेन

पादयोरुभयोरपि पृथक् पृथक् स्थापनं द्योत्यते । तेन च किञ्चिच्चलनादिसुलभता च ध्वन्यते गृहे कारागारे निगृह्य । जातं जातं पोतमजनशङ्कयाऽजनो लोकविलक्षणो जनार्दन इति वा शङ्कयाऽवतीर्ण इति सन्देहेन । अजनं स्वक्षेपणं संहाररूपं स्वगमनं मरणरूपं तच्छङ्कयेति च ॥ १२,१३ ॥

सुमनोरञ्जनी — ऋषेर्नारदस्य विनिर्गमे प्रयाणे । जाते सतीति शेषः । कंसो, ऋषेः सकाशात् यदून् सुरानिति मत्वा । स्ववधं प्रति स्ववधोद्देशेन देवक्याः गर्भे संभूतं अवतरिष्यन्तं विष्णुं च मत्वेति सम्बन्धः ॥ १२ ॥

तयोर्देवकीवसुदेवयोः । अजनो विष्णुरवतरिष्यतीति शङ्कया देवकीं वसुदेवं च गृहे स्वगृहे निगडैः निगृह्य निबध्येत्यर्थः । जातं जातं पुत्रम् । अहन् अहनत् । नारदवाक्यात् क्रोधमूर्छितस्य अष्टमगर्भो मम मृत्युर्विष्णुरिति विस्मृतमिति भावः ॥ १३ ॥

मातरं पितरं भ्रातॄन् सर्वांश्च सुहृदः सखीन् ।
निघ्नन्त्यसुतृपो लुब्धा राजानः प्रायशो भुवि ॥ १४ ॥

सत्यधर्मीया — किमेककारणमनेकतोकहिंसां कंसस्तताननेत्यत एतादृशानां स्वभावोऽयमित्यावेदयति ॥ मातरमिति । पूर्वरूपत्वात्पूर्वं मात्रुक्तिः । अथवा कंसस्योत्तरत्र स्वेन वक्ष्यमाणस्वमातृजारजत्वेन मातृघातोऽपि घटितप्राय इति तत्पुरस्कृतिः । लुब्धा असुतृपा असूंस्वप्राणांस्तर्पयन्तीति ते तथा । इतरप्राणगार्ध्योपेता इति लुब्धास्तान्हत्वा स्वासुसंरक्षकाः । प्रायो बाहुल्येन ॥ १४ ॥

सुमनोरञ्जनी — परप्राणैः स्वासून् तर्पयन्तीत्यसुतृपः । अत एव लुब्धाः स्वशरीरे लोभवन्तः राजानः । मात्रादीन् । सुहृदः अमितोपकारिणः । बन्धून् मित्राणि च प्रायेण निघ्नन्तीति सम्बन्धः ॥ १४ ॥

आत्मानमिह सञ्जातं जानन् प्राग् विष्णुना हतम् ।
महासुरं कालनेमिं यदुभिः स व्यरुध्यत ॥ १५ ॥

सत्यधर्मीया — प्रागमृतोत्पत्त्यनन्तरं महासुरं कालनेमिं विष्णुना हतमिदानीमिह मेदिन्यां सञ्जातमात्मानं स्वं जानन् । यदुभिर्विष्णुना च स कंसो व्यरुध्यत विरोधं कृतवान् ॥ १५ ॥

सुमनोरञ्जनी — प्राक् पूर्वजन्मनि । विष्णुना हतं महासुरं कालनेमिं च ज्ञात्वा । अहमेव पूर्वं विष्णुना हतः कालनेमिसंज्ञको दैत्य इति ज्ञात्वेति भावः ॥ १५ ॥

उग्रसेनं च पितरं यदुभोजान्धकाधिपम् ।
स्वयं निगृह्य बुभुजे शूरसेनान् महाबलः ॥ १६ ॥

इति श्रीमद्भागवते दशमस्कन्धे द्वितीयोऽध्यायः ॥

सत्यधर्मीया — शूरसेनांस्तन्नामकदेशान् । तन्निग्रहहेतुर्महाबल इति ॥ १६ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे द्वितीयोऽध्यायः ॥ १०-२ ॥

सुमनोरञ्जनी — पितरं उग्रसेनम् । नामतः । निगृह्य च महाबलः कंसः स्वयम् । शूरसेनान् देशान् बुभुजे इति संबन्धः ॥ १६ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां द्वितीयोऽध्यायः ॥ १०-२ ॥

॥ अथ तृतीयोऽध्यायः ॥

श्रीशुक उवाच -

प्रलम्बबकचाणूरतृणावर्तमहाशनैः ।
मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥ १ ॥

सत्यधर्मीया — कृष्णस्य न रेतोविकृतत्वं साक्षाद्धर्यात्मकता चेति ब्रह्मादिस्तुत्या सिषाधयिषुर्विनाऽनुनयं न हननं युक्तमिति कंसकंसानुचरदौरात्म्यमादौ वदति ॥ प्रलम्बेति । बकोऽयं वृकोदरकबलितादन्यः । महाशनोऽपि नाम्ना दानवः । आद्यासुर इत्येके परन्तु न समाधारमुपन्यस्तम् ॥ १ ॥

सुमनोरञ्जनी — अत्र दैत्यानां स्वद्वेषफलतया तमः प्रदातुमवतितीर्षोः श्रीहरेरंशावताररूपस्य श्रीकृष्णस्य प्राच्यां काष्ठायामिन्दोरिव शुक्लशोणितसंबन्धमन्तरैव स्वेच्छया देवकीगर्भवास उच्यतेऽस्मिन्नध्याये ॥ तत्र सगणस्य कंसस्य तमःप्राप्तौ चरमसाधनविष्णुवैष्णवद्वेषप्रकारं प्रदर्शयति ॥ प्रलंबेति ॥ अन्यैरित्यस्य विवरणं बाणेति । भौमो नरकासुरः । मागधं संश्रयतीति तथोक्तः । अत एव बली । यदूनां यदुभिः । कदनं कलहम् ॥ १,२ ॥

अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः ।
यदूनां कदनं चक्रे बली मागधसंश्रयः ॥ २ ॥

सत्यधर्मीया — बाणो बलिसुतः । भौमो नरकः । यदूनां तैः कदनं कलहम् । मागधो जरासन्धः संश्रय आश्रय यस्य सः । स्वयं बली च ॥ २ ॥

ते पीडिता निविविशुः कुरुपाञ्चालकेकयान् ।
साल्वान् विदर्भान् निषधान् विदेहान् मागधानपि ॥ ३ ॥

सत्यधर्मीया — ते यादवाः । न विविशुर्न विविशिरे । कुर्वादयो देशाः ॥ ३ ॥

सुमनोरञ्जनी — ते यादवाः कंसेन पीडिताः सन्तः मधुरां त्यक्त्वा कुरुपांचालादिदेशान् निविविशुः प्रविविशुः ॥ ३ ॥

एके तमनुरुन्धाना ज्ञातयः पर्युपासते ।
मधुरायां स्थिताश्चैव येऽक्रूराद्या विशाम्पते ।
हतेषु षट्सु बालेषु देवक्या औग्रसेनिना ॥ ४ ॥

सत्यधर्मीया — एके केचन । तं कंसमनुरुन्धानोऽनुसरन्तः । षट्सु कीर्तिमदादिषु ॥ ४ ॥

सुमनोरञ्जनी — एके अन्ये ज्ञातयः तं कसं अनुरुंधानाः अनुवर्तमानाः सन्तः तमेव पर्युपासते सेवन्ते स्म । ये अक्रूराद्याः तेऽपि । चशब्दात्तमनुरुन्धाना इत्याकृष्यते । तादृशाः सन्तो मधुरायामेव स्थिता इति सम्बन्धः । विशाम्पत इति राज्ञः सम्बोधनम् । औग्रसेनिना उग्रसेनपुत्रेण । देवक्याः षट्सु बालेषु पुत्रेषु हतेषु सत्सु देवक्या सप्तमो गर्भो बभूवेति सम्बन्धः ॥ ४ ॥

सप्तमो वैष्णवं धाम यमनन्तं प्रचक्षते ।
गर्भो बभूव देवक्या हर्षशोकविवर्धनः ॥ ५ ॥

सत्यधर्मीया — शरीरान्तरं विनैकलस्य बलस्य योनिद्वयसम्बन्धः कथमिति परीक्षित्प्रश्नमुत्तरयितुं तदुपोद्धातमाह ॥ सप्तम इत्यादिना । वैष्णवं धामाविष्टभगवत्तेजस्कम् । यथोक्तं प्रथमतात्पर्ये । आवेशो बलभद्रे । शङ्खचक्रभृदीशेशः श्वेतवर्णे महाभुजः ।

आविष्टः श्वेतकेशात्मा शेषांशं रोहिणीसुतम् ॥

इति महावाराह इति । यमनन्तं शेषं प्रचक्षते सप्तमो गर्भः । तद्गतो बभूव । हर्षशोकविवर्धनो हर्षोऽङ्कुरित इति शोकस्तु स्रुत इति तौ वर्धयतीति स तथा ।। ५ ।।

सुमनोरञ्जनी — वैष्णवं धाम यत्र सन्निहितमिति शेषः । यं गर्भं अनन्तं शेषं प्रचक्षते प्रवदन्ति । गर्भं विशिनष्टि ।। हर्षेति । मातापित्रोः स्वोत्पत्त्या हर्षं, कंसभिया शोकं च विवर्धयतीति तथोक्तः ।। ५ ।।

भगवानपि विश्वात्मा विदित्वा कंसजं भयम् ।
यदूनां निजनाथानां योगमायां समादिशत् ।। ६ ।।

सत्यधर्मीया — निजः स्वयमेव नाथो येषां ते तथा तेषां, निजस्य नाथो प्रार्थना येषां तेषामिति वा । योगमायां दुर्गां समादिशदाज्ञापयामास । यदूनामिति द्वितीयान्तं च सत् योगमाया-मित्यनेनाप्यन्वेति । येनावतारेणोना हीना तामित्यर्थः । अधुनाऽनवतारेति तां प्रत्याज्ञोचिता तदर्थमिति तात्पर्यम् ।। ६ ।।

सुमनोरञ्जनी — विश्वात्मा सर्वान्तर्यामी भगवानपि, निजः स्वयमेव नाथो येषां तेषां यदूनाम् । भयं विदित्वा ज्ञात्वेत्यन्वयः । योगमायां दुर्गाम् । व्रजं गोकुलम् । वसुदेवस्य भार्या रोहिणी आस्त इत्यन्वयः ।। ६,७ ।।

गच्छ देवि व्रजं भद्रे गोपगोभिरलङ्कृतम् ।
रोहिणी वसुदेवस्य भार्याऽऽस्ते नन्दगोकुले ।। ७ ।।

सत्यधर्मीया — तदाज्ञाप्रकारं प्रज्ञापयति ।। गच्छेति । वसुदेवस्य रोहिणी नाम्ना भार्या नन्दकुले आस्ते । साङ्कुरिते गर्भे बहिर्यापिता तत्रास्ते । तस्याः प्राक्तनं गर्भं बहिष्कृत्यैतन्निवेशयेत्यस्य भावोऽवसेयः । सम्पूर्णलक्षणचणं नवराजमानद्वारान्तरं परमसुन्दरमन्दिरं तत् ।

राजेव सत्पुरवरं भुवनाधिराजो निष्कासयन्परमसौ भगवान्विवेश ।।

इतिवद्विनिश्चयार्थं

देवकीगर्भजानामन्या भार्या धृतगर्भाः स कंसः ।
स्थानान्तरे प्रसवो यावदासां संस्थापयामास सुपापबुद्धिः ।
हेतोस्तस्माद्रोहिणी नन्दगेहे प्रसूत्यर्थं स्थापिता तेन देवी ।।

इत्याचार्योक्तेः ।। ७ ।।

अन्याश्च कंससंविग्ना विवरेषु वसन्ति हि ।
देवक्या जठरे गर्भं शेषाख्यं धाम मामकम् ॥ ८ ॥

सत्यधर्मीया — एकत्र भर्तैकत्र कलत्रं कुत इत्यत आह ॥ अन्याश्चेति । कंससंविग्नाः 'खलः शृङ्खलाबन्धं तनुयादिति भीताः' विवरेष्वज्ञातप्रदेशेषु । मामकं मत्सम्बन्धि ॥ ८ ॥

सुमनोरञ्जनी — अन्याः भार्याः विवरेषु पर्वतगुहासु परैरज्ञातस्थलेष्विति वा । वसन्ति । अन्यत्र वासे निमित्तमाह ॥ कंससंविग्ना इति । देवक्याः जठरे विद्यमानं गर्भं मामकं मदीयं धाम गृहं मदंशाविष्टमिति यावत् ॥ ८ ॥

तत् सन्निकृष्य रोहिण्या उदरे सन्निवेशय ।
अथाहं स्वांशभागेन देवक्याः पुत्रतां शुभे ॥ ९ ॥

सत्यधर्मीया — तद्धाम सन्निकृष्य रोहिण्या उदरे सन्निवेशय । अथानन्तरमहं स्वांशांशभागेन साक्षात्स्वांशकृष्णकेशत्वेन विभजनेन । अने अकयेत्वोदरो विष्णुस्तेनैव स्वांशं स्वरूपभूतमंशं भजतीति स तथा सन् स्वांशभागो हि स्वांशकला तेनेति वा । एते स्वांशकला इत्येतस्य किञ्चिच्छब्दतः किञ्चिदर्थतोऽनुवादोऽयमिति वा । एते प्रोक्तावतारा मूलरूपी कृष्णः स्वयमेवेति विवरणात्प्रथमे । स्वस्यांशस्य योग्यो भागो देवकीभागोऽयं तेन । पुत्रतामिति वाऽन्वयः । भागो भागधेयैकदेशयोरिति विश्वः । शुभे दुर्गे ॥ ९ ॥

प्राप्स्यामि त्वं यशोदायां नन्दपत्न्यां भविष्यसि ।
अर्चिष्यन्ति मनुष्यास्त्वां सर्वकामवरेश्वरीम् ॥ १० ॥

सत्यधर्मीया — सर्वकामवराणामपेक्षणीयोत्तमानामीश्वरीं स्वामिनीम् ॥ १० ॥

सुमनोरञ्जनी — तत् तस्मात् देवक्या जठरात् तत् मामकं धाम तेजः सन्निकृष्य रोहिण्या उदरे सन्निवेशयेति योजना ॥ स्वांशभागेन स्वस्य मूलरूपिणो मम अंशः शिर आख्य अवयवः तस्य यो भागः कृष्णकेशलक्षणः तेनेत्यर्थः । देवक्याः पुत्रतां प्राप्स्यामि । कदेत्याशङ्कायामाह ॥ अथेति । सप्तमगर्भस्य रोहिण्युदरे सन्निवेशानन्तरमित्यर्थः ॥ त्वं नन्दपत्न्यां यशोदायां भविष्यसीति योजना । कामवराः, काम्यन्त इति कामाः काम्या इत्यर्थः । ते च ते वराश्च तेषामीश्वरीं दातुं समर्थाम् ॥ ९,१० ॥

नानोपहारबलिभिः सर्वकामवरप्रदाम् ।
नामधेयानि कुर्वन्ति स्थानानि च नरा भुवि ॥ ११ ॥

सत्यधर्मीया — नानोपहारबलिभिरुपग्राह्यमुपहारः । करो बलिरित्युभयतश्चामरः । उपाहारः पुष्पस्तबकादिः । बलति प्राणिति भक्तेन येन स बलिरित्यर्थः । सर्वकामवरप्रदां त्वामर्चिष्यन्तीत्यन्वयः । स्थानान्यालयान् नामानि च कुर्वन्ति । तत्तत्क्रियानुगुण्येन युक्तानि जानन्त इत्यर्थः॥११॥

सुमनोरञ्जनी — न केवलं सामर्थ्यमात्रमपि तु सर्वकामवरप्रदां च त्वां नानाविधैः उपहारैः भक्ष्यविशेषैः बलिभिः उपायनैश्च अर्चिष्यन्तीत्यन्वयः । स्थानानि देवालयान् कुर्वन्ति ॥ ११ ॥

दुर्गेति भद्रकालीति विजया वैष्णवीति च ।
कुमुदा चण्डिका कृष्णा माधवी कन्यकेति च ॥ १२ ॥

माया नारायणीशाना शारदेत्यम्बिकेति च ॥ १३ ॥

सत्यधर्मीया — दुर्गेति ॥

दुर्ज्ञेयत्वाद्दुःखदत्वाद्दुष्प्राप्यत्वाच्च दुर्जनैः ।
सतामभयदत्वाच्च दुर्गा त्वं हृद्गुहाश्रयात् ॥

इति दुर्गा । दुःखेन गम्या, गम्लृ गतौ, गत्यर्थानां ज्ञानार्थत्वाद्दुर्ज्ञेयेति दुर्गा । दुर्दुःखमिति सम्प्रोक्तमित्युक्तेर्दुरित्यावृत्तं दुर्जनवाचि । तथा च दुर्जनान्प्रति दुःखं गमयतीति सा तथेति । दुर्गा दुर्जनैर्दुष्प्राप्यत्वादिति स्फुटम् । वैकुण्ठादिरूपतया सतामभयरूपत्वाद्दुर्गा । दुर्गमस्या अस्तीति दुर्गा । अर्श आद्यचि हृद्गुहामततीत्यर्थः । भद्रकाली मङ्गलरूपिणी श्यामवर्णा चेति । विजयत इति विजया विशिष्टो विविधो जयो यस्याः सेति वा । विष्णोरियं वैष्णवी । कौ भूमौ मुदा हलन्तत्वादाबन्तः प्राचीनरीत्या । यया सा । चण्डिका कोपना । कृष्णा नाम्ना । माधवी प्रस्तुतमधुकुलजेति । कन्यका दीप्तिमत्त्वात् क्षिपकादित्वान्नेत्वम् । मायाः सम्पदः प्रतिपदो वा यो लाभो यस्या । नारायणी मद्भार्येति । ईशाना सर्वेशनशीला । शारदा शारं हिंसां ददाति लय इति शारदा । उपसर्गाणां द्योतकतापक्षे शारदा विशारदा कुशलेत्यर्थो वा । अम्बिका जगज्जननीति ॥ १२,१३ ॥

सुमनोरञ्जनी — दुर्गेत्यादिद्वादशनामार्थः पदरत्नावलीरीत्या बोध्यः ॥ १२-१३ ॥

गर्भात्सङ्कर्षणात् तं वै प्राहुः सङ्कर्षणं भुवि ।
रामेति लोकरमणाद् बलभद्रं बलोच्छ्रयात् ॥ १४ ॥

सत्यधर्मीया — रामनामाऽप्यनन्तनामा भगवान्भगिनीं सोपपत्तिकमाह ॥ गर्भेति । गर्भात्सङ्कर्षणात्ततस्त्वत्कर्तृकं तं भविष्यन्तं सङ्कर्षणं प्राहुः । लोकरमणात् रमयतीति राम इति । बलोच्छ्र्याद्बलेन सहित उच्छ्र्य उन्नाहस्तस्माद्बलभद्रमाहुरित्यन्वयः । बलवत्त्वाद्बल इति श्रैष्ठ्याद्भद्र इतीति बलपदस्य पृथक् तद्वाचकत्वे विवेको ज्ञेयः । भद्रो वाच्यवच्छ्रेष्ठसाधुनोरिति विश्वाद्भद्रतद्वि-वरणशब्दयोरानुरूप्यं ज्ञेयम् । अन्यथा भद्रपदमनर्थं स्यादिति । शब्दश्रेष्ठवाचीति श्रेष्ठोच्छ्र्ययोर-नतिभिन्नार्थत्वाद्बलेन भद्रशब्देन सन्तोष्टव्यम् । बलवदुच्छ्र्यादिति पाठस्तु समस्ततत्पद-निरुक्तिप्रकारज्ञानदारिद्र्यमूलकः कल्पित इति ज्ञेयम् । अनेककोशेष्वदर्शनात् ॥ १४ ॥

सुमनोरञ्जनी — गर्भात् सं सम्यक् कर्षणान्निमित्तात् संकर्षणं प्राहुः । अनेन सं सम्यक् कर्षणं यस्येति विग्रहः सूचितो भवति । बलोच्छ्र्यात् बलोन्नतेः ॥ १४ ॥

श्रीशुक उवाच -

सन्दिष्टैवं भगवता तथेत्योमिति तद्वचः ।
प्रतिगृह्य परिक्रम्य गां गता तत् तथाऽकरोत् ॥ १५ ॥

सत्यधर्मीया — भगवतैवं सन्दिष्टा माया ओमिति हे ब्रह्मन्निति सम्बोध्य ओमिति ब्रह्मेति वाक्यमन्वकृत ग्रन्थकार इति मन्तव्यम् । तथैवेति वचः प्रतिगृह्य तं भगवन्तं परिक्रम्य गां भूमिं गता सती गां गता कृतनमना च । अत एव न नमनानुक्तिः । तत्तथाऽकिञ्चिव्द्यत्यासम् । अकरोत् । व्याख्यानव्याख्येयभावस्त्वगतिका गतिरिति सुधाभिधानादगतिका गतिः ॥ १५ ॥

सुमनोरञ्जनी — भगवता । एवं पूर्वोक्तरीत्या । संदिष्टा दुर्गा भवता यथोक्तं, तथेति तथैवास्त्विति । ओमिति अङ्गीकरोमीति । तद्वचः भगवद्वचनं प्रतिगृह्य । परिक्रम्य श्रीहरिं प्रदक्षणीकृत्य गां भूमिम् गता सती तत् हरिणोक्तं यथोक्तं तथैवाकरोत् ॥ देवकीगर्भात् तेज आकृष्य रोहिण्यामावेशयदिति भावः ॥ १५ ॥

गर्भे प्रणीते देवक्या रोहिणीं योगनिद्रया ।
अहो विस्रंसितो गर्भ इति पौरा विचुक्रुशुः ॥ १६ ॥

सत्यधर्मीया — योगनिद्रयेत्यनेन गर्भगार्भसङ्कर्षणकाले न देवक्या अङ्गस्मरणं स्यात्तथा निद्रां दत्वा तत्कर्षणसमर्थतां दर्शयति । देवक्या गर्भे रोहिणीं प्रति प्रणीते नीते सति पौरा ग्रामीणा गर्भो विस्रंसितः स्रुतः । अहो आश्चर्यमिति विचुक्रुशुः ॥ १६ ॥

सुमनोरञ्जनी — योगनिद्रया दुर्गया । रोहिणीं प्रति । देवक्या गर्भे प्रणीते सति पौराः गर्भो विस्रंसितः गर्भस्रावोऽभूत् । अहो इति विचुक्रुशुर्व्यवहृतवन्त इति योजना ॥ १६ ॥

भगवानपि विश्वात्मा भक्तानामभयङ्करः ।
आविवेशांशभागेन मन आनकदुन्दुभेः ॥ १७ ॥

तात्पर्यम् – 'आविश्य पितरं विष्णुः स्वरूपेणैव मातरम् । विडम्बनार्थं लोकस्य निर्जनिश्चाप्यथाविशत् । आनन्दमात्रदेहेन जातवत्सम्प्रदृश्यत' इति च ॥ १७ ॥

सत्यधर्मीया — भगवानपि विश्वात्मा, स बिभ्रत्पौरुषं धाम, ततो जगन्मङ्गलमच्युतांशमिति श्लोकत्रिके कर्मवशाज्जनिमतो जनस्य, रेतःसिचमेवानु प्रविश्यत्यथ मातरम् । रेतःसिग्योगोऽथेति श्रुतिसूत्रादिभिर्यदा प्रथमतो जनकतनुप्रवेशोऽनन्तरं मातृगात्रप्रवेशः प्रमापितस्तथा वसुदेवप्रवेश ईशस्योच्यतेऽत्रेति भ्रमभ्रंशं प्रमाणेनैव कुर्वंस्तत्तात्पर्यार्थमाह ॥ आविश्येति । पितरमित्येवोक्त्वाऽनुक्त्वा च वसुदेवमिति, यत्र यत्र जगत्त्रातोत्पद्यते तत्र तत्र गतिरियमित्यवगमयामासेत्यवसेयम् । स्वरूपेणारेतोविकृतेन पितरं यं कञ्चन तातत्वेन व्यवह्रियमाणमाविश्याथानन्तरं मातरं च लोकस्य विडम्बनार्थमनुकरणार्थं निर्जनिर्लोकजनिरहितस्सन्नप्याविशत् । स्वरूपेणेत्येवोक्तम् । तत्किंरूपमित्यतो निरूपयति ॥ आनन्दमात्रदेहेनेति । जातेन तुल्यं वर्तत इति जातवत्सम्प्रदृश्यत इति च वामन इति शेषः । नन्वाविश्य, मातरमाविशदित्युक्तावेव तदावेशस्य प्राक्कालिकता मातृगात्रप्रवेशस्य तदनन्तरिकता स्वतोऽल्पबलादेव भवति । विदितेत्यथेति वृथा मानम् इति चेन्न । तस्य क्वचित्कैश्चिन्मुखं व्यादाय स्वपितीत्यादावुत्तरकालप्रत्यायकताऽप्यस्तीत्यङ्गीकृते निर्णायकत्वादथेति सार्थक्योपपत्तेः । पक्षान्तरे तु निर्जनिः कुत एवं तनोतीति प्रश्नार्थं क इत्यथशब्दः सार्थकः । तत्रोत्तरमाह ॥ विडम्बनार्थमिति ॥ ततश्चायं श्लोकार्थः ॥ विश्वात्मा जगदादानादिकर्ता जगद्व्यापी वा । भक्तानामभयङ्करः । मेघर्तिभयेषु कृञः । भयशब्देन तदन्तविधिरित्युक्तेरभयशब्दोपपदात्कृञः खश् । आनकदुन्दुभेर्वसुदेवस्य मनोंऽशांशभागेन गतम् । आविवेश ॥ १७ ॥

सुमनोरञ्जनी —भगवानपि । आनकदुन्दुभेः वसुदेवस्य । मनः चित्तम् मनःप्रधानकं शरीरं वा । अंशभागेन अंशस्य शिर आख्यावयवस्य भागेन कृष्णकेशलक्षणेन । आविवेशेति सम्बन्धः ॥ १७ ॥

स बिभ्रत् पौरुषं धाम राजमानो यथा रविः ।
दुरासदोऽतिदुर्धर्षो भूतानां सम्बभूव ह ॥ १८ ॥

सत्यधर्मीया — स वसुदेवः पौरुषं परमपुरुषसम्बन्धि धामांशं तेजो बिभ्रत् यथा दुरासदो रविस्तथा राजमानो भूतानामतिदुर्धर्षः सम्बभूव ॥ १८ ॥

सुमनोरञ्जनी — स वसुदेवः पौरुषं परमपुरुषसंबन्धि धाम तेजः । तेजःस्वरूपं च गृहं प्राज्ञैर्धामेति कथ्यत इति वचनात् । पुरुषाकारमिति वा । अनेन पुरुषाकारेण पितृशरीरप्रवेशोक्त्या शुक्लशोणितविकारदेहिता निरस्ता भवति । बिभ्रत्सन् । भ्राजमानो रविर्यथा तथा भूतानां दुरासदः आसादयितुमशक्यः अत एव दुर्धर्षः पराभवयितुमशक्यो बभूवेति ॥१८॥

ततो जगन्मङ्गलमच्युतांशं समाहितं शूरसुतेन देवी ।
दधार सर्वात्मकमात्मभूतं काष्ठा यथाऽऽनन्दकरं नभस्तः ॥ १९ ॥

सत्यधर्मीया — ततस्तत्प्रवेशान्तरं जगन्मङ्गलं भूर्भूभारावरोहणेन येन तमच्युतस्यांशं नीलबालात्मकं सोऽपि च्युतिरहितोऽच्युतश्चासावंशश्च तमिति वा । सर्वात्मकं सर्वे च ते आत्मानश्च तेषां कं सुखं यस्मात्तमात्मभूतम् । आत्मना वसुदेवदेवकीकृततप आदियत्नेन देवताप्रार्थनरूपेण वा भूतमाविर्भूतम् । आत्मना स्वेनैव स्वेच्छयेति यावत् । आत्मनैव भुवा ऊतस्सम्बद्धस्तं वा शूरसुतेन समाहितं तमिव विद्यमानं देवी द्योतमाना दधार । तत्र दृष्टान्तमाचष्टे । काष्ठा प्राची । आनन्दकरमिति चन्द्रपदं ग्राह्यम् । लक्षणया चन्द्रमित्यर्थः । चदि आह्लादन इति स्मरणात् । नभस्त आकाशाद्यथा धरति तथा ॥ १९ ॥

सुमनोरञ्जनी — ततः वसुदेवप्रवेशानन्तरम् । देवी देवकी । शूरसुतेन वसुदेवेन समाहितं सम्यक् स्थापितम् । अच्युतस्य च्युतिरहितस्य हरेरंशम् । दधारेति क्रियाकारकसम्बन्धः । अच्युतांशं विशिनष्टि ॥ जगदिति ॥ जगन्मङ्गलम् । जगतः योग्यजनस्य मङ्गलप्रदम् । सर्वात्मकं सर्वं आत्मकमिव शरीरं यस्यासौ तथोक्तम् । शरीररूपकेतिवत् कः प्रत्ययः कुत्सने । सर्वस्वामिनमिति वा । आत्मभूतं बिम्बभूतम् । सर्वस्येति शेषः । कमिव । काष्ठा प्राची दिक् । नभस्तः नभसो मार्गात् । आनन्दयन्तीत्यानन्दाः कराः यस्येत्यानन्दकरः चन्द्रः । लोकानामानन्दं करोतीति वा । स्वोदयेनेति शेषः । तमिति । यथा शुक्लादिसम्बन्धं विनैव चन्द्रः नभोमार्गात् काष्ठां प्रविशति तथैव श्रीहरिरपि देवकीजठरं प्रविवेशेति भावः । तदुक्तमाचार्यैः ।

आविश्य पितरं विष्णुः स्वरूपेणैव मातरम् ।
विडम्बनार्थं लोकस्य निर्जनिश्चाप्यथाऽविशत् ।

आनन्दमात्रदेहेन जातवत्संप्रदृश्यत इति । स्वरूपेणैव पितरमाविश्येत्येनेन स बिभ्रत्पौरुषमित्येतत्तात्पर्यं विवृतम् । लोकस्य विडम्बनार्थं मोहनार्थम् । जनस्य मोहाय शरीरतोऽस्याः यदाविरासीदमलस्वरूप इति श्रीभारततात्पर्यनिर्णयोक्तेः । काष्टा यथेत्यस्य तात्पर्यं आनन्दमात्रदेहेन मातरमाविशदिति । निर्जनिः निर्गतो जनेरिति निर्जनिरपि लोकविडम्बनार्थं जातवत्संप्रदृश्यत इत्याचार्यवचनार्थो ज्ञेयः । इदमुत्तरार्धम् ॥ १९ ॥

सा देवकी सर्वजगन्निवासनिवासभूता नितरां विरेजे ।
भोजेन्द्रगेहेऽग्निशिखेव रुद्धा सरस्वती द्यूतखले यथा सती ॥ २० ॥

सत्यधर्मीया — या देवकी भोजेन्द्रगेहे कंसकल्पितकारागारेऽवरुद्धार्द्रतृणादिभिस्तिरोहितप्ररोहशक्तिरग्नेः शिखा भविष्यन्ती ज्वाला यथा सत्यन्तस्सती तत्प्राया । यथा वा द्यूतखले द्यूतस्थले सरस्वती यथा सम्यगृतरूपरागमसती तस्यानृतभूयिष्ठत्वात्तत्प्राया । तथा असत्यमङ्गलाङ्गयुता । सैवेदानीं सर्वजगन्निवासनिवासभूता सर्वजगतां निवास आश्रयस्तस्य श्रीशस्य निवासभूताऽऽश्रयीभूता नितरामत्यन्तं विरेजे रराजेत्यन्वयः । अवरुद्धा तत्रापि शुद्धान्ते निरुद्धा । अवरोधस्तिरोधाने शुद्धान्ते राजवेश्मनीति, खलं भूस्थानकल्केष्विति, शिखा शिफायां चूडायां ज्वालायामग्रमात्रक इति विश्वस्मिन्विश्वः । द्यूतं च खलश्च । सर्वो द्वन्द्वो विभाषयैकवदित्येकवद्भावः । द्यूते खले नीचे सत्यपि सरस्वत्यसतीति वा । क्रूरे नीचेऽधमे खल इति सः । न रेजे इति पाठान्तरकल्पनं न स्वरसम् । प्रभयाऽजितम्भरां विरोचयन्तीं न पुरेयमीदृशीत्युत्तरोक्त्यनानुगुण्यात् ॥ २० ॥

सुमनोरञ्जनी — सेति तच्छब्दबलात् येति लभ्यते । द्यूतखले द्यूतरंगस्थले सती सरस्वती सत्यवचनरूपा वाणी यथाऽनृतादिना रुद्धा, यथा वाऽग्निशिखा तृणादिना रुद्धा निरुद्धप्रकाशा तथा पूर्वं भोजेन्द्रगेहे रुद्धा विगतप्रभा या देवकी सा सैव सर्वजगन्निवासस्य हरेर्निवासभूता सती नितरां विरेजे इति योजना द्रष्टव्या । अग्निशिखेव नितरां विरेजे इति वा ॥ न रेज इति पाठे पदरत्नावलीरीत्या योजना ज्ञेया ॥ २० ॥

तां वीक्ष्य कंसः प्रभयाऽजितम्भरां विरोचयन्तीं भवनं शुचिस्मिताम् ।
आहैष मे प्राणहरो हरिर्गुहां ध्रुवं श्रितो यन्न पुरेयमीदृशी ॥ २१ ॥

सत्यधर्मीया — कंसोऽजितम्भरामसंज्ञात्वेऽपि पूर्ववज्ज्ञेयम् । केनाप्यपराजितं हरिं बिभ्रतीति सा तथा ताम् । भवनं, स्वप्रभया विरोचयन्तीं शुचिस्मितां तां वीक्ष्यैष गुहामुदरकुहरीं श्रितो गर्भान्तर्विद्यमानोऽर्भको मे प्राणहरो हरिर्ध्रुवं निश्चयः । तत्र कारणमीरयति । यद्यतः पुरा एतदङ्कुरणात्पूर्वमियं देवकी ईदृशी नाभूत् ॥ २१ ॥

सुमनोरञ्जनी — अजितं विष्णुं जठरे बिभर्तीति अजितंभरां देवकीमित्यर्थः । प्रभया भवनं विरोचयन्तीं वीक्ष्याहेति सम्बन्धः । किमाहेति तत्राह ॥ एष इति ॥ यत् यस्मादियं देवकी पुरा पूर्वं नैदृशी नैतादृशप्रभोपेता आसीदतो मे प्राणहरो हरिरस्या गुहां कुक्षिगुहां श्रितः प्रविष्ट एष इति ध्रुवम् ॥ २१ ॥

किमद्य तस्मिन् घटनीयमाशु मे यथार्थतन्त्रो न विहन्ति विक्रमम् ।
स्त्रियः स्वसुर्गुरुमत्या वधोऽयं यशः श्रियं हन्त्यनुकूलमायुः ॥ २२ ॥

सत्यधर्मीया — तर्हि तस्या वधोपायः कर्तव्य इत्यत आह ॥ किमिति । अद्य मया तस्मिन्घटनीयं किं न किमपि । कुत इत्यत आह ॥ यथार्थतन्त्र इति । यथार्थं तन्त्रं सिद्धन्तो यस्य सोऽनन्यथाभवत्स्वाभिप्रेतो, विक्रमं स्वपराक्रमं न विहन्ति न त्यजति मां हन्यादेव । कुमाराविर्भावात्पूर्वमिमामेव मारयेत्यत आह ॥ स्त्रिय इति । आत्मनाशे समुत्पन्ने सर्वं त्यजति पण्डित इति वचनान्न गरीयसी प्राणेभ्य इत्यत आह ॥ अयमिति । स्वसुस्तत्रापि गुरुमत्या गर्भिण्या वधो यशः श्रियम्, अनुकूलं ब्रह्मणा क्लृप्तं यदायुस्तत्राशु हन्ति । एतद्धननेऽपि मद्धननं न हननेऽपि तदेवेति दुर्घटेऽस्मिन्कार्ये किं घटनीयमित्यन्वयः ॥ २२ ॥

सुमनोरञ्जनी — किमिति । अर्थतन्त्रः अर्थः देवकार्यलक्षणप्रयोजनं तत्तंत्रः तत्परायणो हरिः मे विक्रमं पराक्रमं यथा न विहंति न नाशयति तस्मिन्विषये मे मया आशु घटनीयं कर्तव्यं किमिति । तर्हि देवकीवध एव श्रेयानिति तत्राह ॥ स्त्रिय इति । स्त्रियो वधः यशो हंति । तत्रापि स्वसुर्वधः श्रियं, गुरुमत्या गर्भिण्या वधश्च अनुकूलं अपेक्षितं आयुर्हन्ति । अतो नास्याः वधो युक्त इति भावः ॥२२॥

स एष जीवन् खलु सम्परेतो वर्तेत योऽत्यन्तनृशंसितेन ।
देहे मृते तमनु ह्यर्थकामौ यशोऽमलं गौरभिमानिनो ध्रुवम् ॥ २३ ॥

सत्यधर्मीया — पापी चिरायुरित्याद्युक्तेः किमायुर्यातीति यासि चिन्तां, शंस कंसेत्यत आह ॥ स इति । यश्चात्यन्तनृशंसितेनैवमादिहननादिना वर्तेत स एव जीवन्सम्परेतो मृतः खलु निश्चयः । देहे मृते गतप्राणे सति तं देहमनु अभिमानिनोऽभिमानवतस्तत्तज्जीवस्यामलं यश, इहार्थश्च कामश्चेत्येतौ ध्रुवं निश्चयेन नश्यतः गौर्नाको नश्यति । गौर्ज्ञानं वा ध्रुवं माधवधामापि नश्यतीति वा । अतो देवकीवधः सर्वथाऽधोगतिहेतुरिति नाचरणीय इत्याशयः । गौः पशुसम इति वा । अमलं निर्दोषस्थानं मोक्ष इति वा । द्वयोस्तु रश्मिदृग्बाणस्वर्गवज्राम्बुलोमसु गौरिति नानाध्वनिपदमञ्जरी । दृक् चात्र ज्ञानम् ॥ २३ ॥

सुमनोरञ्जनी — ननु यद्य आद्यभावेऽपि केषाञ्चित् क्रूरकर्मिणां दीर्घायुष्यदर्शनात् भवतोऽपि तथैवावस्थानं किं न स्यादिति तत्राह ॥ स एष इति । यः अत्यंन्तं नृशंसितेन क्रूरेण कर्मणा वर्तेत स एष पुरुषः जीवन्नपि संपरेतो मृतः खलु । ननु इह लोके सम्पादिता कीर्तिः परत्र स्वर्गादिकं स्यादिति तत्राह ॥ देह इति । अर्थकामग्रहणं स्पष्टतार्थम् । देहे अभिमानिनो जीवस्य मृते सति यथा अर्थकामरूपौ पुरुषार्थौ तं अनुगच्छतः नश्यत इत्यर्थः । तथा अमलं धर्मेण संपादितयशोऽपि नश्यति । गौः स्वर्गादिकमपि ध्रुवं नश्यतीति हि यस्मात्तस्मान्न परत्रापि सौख्यमिति भावः ॥ २३ ॥

इति घोरतमाद् भावात् सन्निवृत्तः स्वयं प्रभुः ।
आस्ते प्रतीक्षंस्तज्जन्म हरेर्वैरानुबन्धवित् ॥ २४ ॥

सत्यधर्मीया — घोरतमादतिघोरान्मनसः सन्निवृत्तः । न परवरणेनेतीरयति ॥ स्वयमिति । दौर्बल्याद्दरिद्रमनोरथवन्नैतस्येत्याह ॥ प्रभुरिति । हरेस्तज्जन्म प्रतीक्षन्प्रतीक्षमाण आस्ते । अनुबन्धस्तु भक्तिः स्यादित्यादेः । वैरपूर्वकभक्तिप्रकारज्ञः ॥ २४ ॥

सुमनोरञ्जनी — प्रभुः समर्थोऽपि स कंसः घोरतमात् भावात् मनसः स्वयं अन्योपदेशमन्तरा निवृत्तः परावृत्तः सन् हरेर्वैरानुबन्धं वैरस्य द्वेषस्य सम्बन्धं वेत्तीति तथोक्तः । वैरम्, अनुबन्धं स्नेहं च वेत्तीति वा । कंसस्य द्विजीवित्वात् । तज्जन्म तस्य हरेर्जन्म प्रतीक्षन्नास्ते आसीदित्यन्वयः ॥ २४ ॥

आसीनः संविशंस्तिष्ठन् भुञ्जानः पर्यटन् पिबन् ।
चिन्तयानो हृषीकेशमपश्यत् तन्मयं जगत् ॥ २५ ॥

सत्यधर्मीया — तत्प्रकारमाह ॥ आसीन इति । आसीनः संविशञ्छय्यां, हृषीकेशं चिन्तयानो जगत्सर्वं तन्मयमपश्यत् भीतिशङ्कापदमभूदिति भावः ॥ २५ ॥

सुमनोरञ्जनी — आसीनः उपविशन् । संविशन् शयानः । हृषीकेशं हृषीकाणां इन्द्रियाणां ईशं नियामकं चिन्तयन् सन् । जगत्तन्मयं तदात्मकमेव कृष्णात्मकमेवेत्यर्थः । यं यं पदार्थं दृष्टवान् तं तं कृष्णतयैव ददर्शेति भावः ॥ २५ ॥

ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः ।
देवैः सानुचरैः साकं गीर्भिर्विष्णुमथास्तुवत् ॥ २६ ॥

सत्यधर्मीया — हिरण्यगर्भो गर्भगमर्भकमेतैः समेत आगत्य तुष्टाव विष्णुमित्याह ॥ ब्रह्मेति । यो भृगुर्मम तव च रीतिं परीक्ष्य यं पदोरसि ताडयित्वाऽपि येन बहुमतिं लेभेऽस्यासुरस्य तत्सहवासेन

कदाचित्सद्धीरभिव्यज्यत इति भवानुभवसिद्धं विशेषं द्योतयितुमेव देवेभ्यः पृथक् कृत्य भववचनमिति ज्ञेयम् । देवैरिन्द्राद्यैः सानुचरैर्गन्धर्वाद्यनुचरसहितैर्नारदादिभिः । सानुचरैर्गिरिशृङ्गचरै ऋषिभि-रित्यप्यन्वयः । अनेन स्तुत्यगुणानां बाहुविध्यं गिरां भूयिष्ठत्वेन द्योत्यते । यथेतरसुरा अवतारेण हरिपरिचरणयोग्या न तथा कमलभव इत्यप्याह ॥ अभव इत्युत्पत्तिरहित इति । अतस्तत्रेत्युपपन्नम् । ब्रह्मणो नावतारोऽस्ति । ब्रह्माणमप्यनवतारम् इत्यादेः ॥ २६ ॥

सुमनोरञ्जनी — भूभारहरणार्थं मत्कृतप्रार्थनां सार्थकयितुं भगवानवतीर्ण इति जातसंभ्रमो ब्रह्मा गर्भस्थं हरिमस्तौदित्याह ॥ ब्रह्मेति । ब्रह्मा चतुर्मुखः । भवो रुद्रः । गीर्भिः वेदवचनैः विष्णुं सर्वव्यापकं सर्वत्र प्रविष्टं वा विषलृ व्याप्तौ । विश् प्रवेशन इति धातोः ॥ २६ ॥

ब्रह्मभवावूचतुः -

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये ।
सत्यस्य सत्यमुत सत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः ॥ २७ ॥

तात्पर्यम् – 'सच्छब्द उत्तमं ब्रूयादानन्दं तीति वै वदेत् । येति ज्ञानं समुद्दिष्टं पूर्णानन्द-दृशिस्ततः । सत्यशब्दोदितं तादृग्रूपं नित्यं यतो हरेः । सत्यव्रतस्ततो विष्णुः सद्भूतत्रयमुच्यते । त्यं तदन्यत्समुद्दिष्टं तत्परत्वात्तु तत्परः । वेदमुख्यार्थरूपत्वात्त्रिसत्यो भगवान् हरिः । सत्यस्य चोत्त-मानन्दज्ञानदातृत्वतः सदा । सत्यस्य सत्यो भगवान्सत्यस्थो जगति स्थितः । जगन्नेतृत्वतः सत्य नेता विष्णुः प्रकीर्तितः । अत्तृत्वाच्च तदादानात्सत्यात्मा चोच्यते विभुरि'ति तन्त्रभागवते ॥२७॥

सत्यधर्मीया — सत्यव्रतं सत्यपरमिति श्लोके सत्यपदाष्टकं तस्याबाधितत्वमात्रार्थकत्वं पुनरुक्त्यादिबाधितमतोऽर्थाप्रतीतेर्मानेन तदर्थमाह ॥ सच्छब्द इति । सदितिशब्द उत्तमं तत्त्वं ब्रूयाद्ब्रूयैवेति सर्वत्र ज्ञेयम् । आनन्दन्तीतीकार उच्चारणार्थः । केचिद् ह्रस्वमेव तिं पठन्ति । तृप प्राणन इत्यस्मात्क्विप् ङिश्चेति वर्णयन्ति । वस्तुतस्तु तीति सप्तम्यन्तम् । ति, त् इति हलृतकारे आनन्दं वदेत् वाच्यं वदेदित्यर्थः । इति हेतुसमर्पकः सन्नुत्तरत्रान्वेति । तद्विवरे दर्शयिष्यामः । येति प्रतिपदिकनिर्देशः । गत्यर्थानां नयेन यो ज्ञानं समुद्दिष्टमिति यतस्ततः पूर्णानन्ददृशिरर्थः । संश्चासौ उत्तमः पूर्णः त् आनन्दं यो ज्ञानं च तत् । व्रतयति प्रवर्तयतीति व्रतम् । सत्यं पूर्णानन्दज्ञानं व्रतं यस्य स तम् । यतो नित्यं हरेस्ततो विष्णुः सत्यव्रतस्तच्छब्दवाच्य इत्यर्थः । ततश्चान्तर्णीतण्यर्थाद्वृतु वर्तन इत्यस्मात्कर्तर्यप्रत्यये धातोश्चागमे यणादेशे व्रतम् । वृणोतेर्वा । सत्यमुक्तम् रूपं वृणोति स तथा तं वा । सत्यपरमिति विवृणोति ॥ सद्भूतेति । भूतत्रयं सदित्युच्यते । सन्नामकं

यदन्यद्वायोश्चान्तरिक्षाच्चैतत्सदिति श्रुतेः पृथिव्यप्तेजोरूपं, त्यं तदन्यद्वाय्वन्तरिक्षाख्यमिति पञ्चभूतात्मा पदार्थः सत्यपदाभ्यां लभ्यते । यस्मात्परं विलक्षणमिति । त्यं तदन्यत्समुद्दिष्टं ताभ्यां परस्तत्परः सत्यपर इत्युच्यत इत्यर्थः ।

त्रिसत्यशब्दार्थमाह ॥ वेदेति । त्रिभिर्वेदैर्ऋगादिभिः सद्यते गम्यते ज्ञेयत इति त्रिसत्यः । भत्वाज्जश्त्वाभावः । अथर्ववेदविभागोऽल्पीयानिति तदनुक्तिरित्येके । त्रयश्च वेदा ऋग्यजुरथ-र्वणास्तैः । साम्नो ऋच्यध्यारूढताम्नानात्तदुक्तौ तदुक्तिरिति केचित् । त्रिभिर्ऋग्यजुरथर्वभिः सत्ता तत्त्रिकोत्तमेन साम्ना चेत्याहत्य चतुर्भिर्याज्यते ज्ञायत इति सत्य इत्यपरे । वेदानां सामवेदोऽस्मीत्यादेः । असाधारण्येन सर्वत्रापि मुख्यप्रतिपाद्यत्वं ज्ञेयमिति मुख्यार्थरूपत्वादित्युक्तिः । गुह्यदर्शनभाषे च भाषा चैव समाधिका । तिस्रस्तु मूलभाषाः स्युरित्येकादशतात्पर्योक्तेस्तिस्र भाषा सत्यो यत्र स वेदश्चतुरात्मा तेन याप्यत इति त्रिसत्य इति वा । सत्यस्य सत्यमित्यर्थापयति ॥ सत्यस्य चेति । सन्तौ उत्तमौ त्यौ यस्मात्सत्य इति विग्रहेनार्श आद्यजायास इति ज्ञेयम् । सत्ये निहितं इति पदार्थमाह ॥ सत्यस्य इति । सत्यं चोक्तरूपः प्रपञ्च इति प्रपञ्चयति ॥ जगत्स्थितेरिति । सत्ये निहित इत्यभिहित इत्यर्थः । व्युत्क्रमेण व्याकरणं तद्गुणाभेदज्ञापनार्थमिति ज्ञेयम् । विष्णुः सत्यं, नेतेति नेत्रः । सत्यं चोक्तं जगत् । नीङ् प्रापणे दाम्नीति ष्ट्रन् । नेत्रो नेतरि भेद्यवदिति विश्वः । सत्यस्यात्तृत्वात्तस्यैवादानादिकर्तृत्वाच्च सत्यस्यात्मैव सत्यात्मकस्तमित्याह ॥ अत्तृत्वाच्चेति । आङ्पूर्वाददद भक्षणे तथा तत्पूर्वादेव डुदाञ् दान इत्यस्माच्च कर्तरि ड्वुन्प्रत्यये टिलोपे चर्त्वे चात्मनि ज्ञेयम् ॥ ततश्चायं श्लोकार्थः ॥ धराज्वरज्वरणाय धरोपरि चरितुमवतारमनधरास्यन्दमीरितां गिरं तामृतीचकार कारुणिकशिरोमणिरिति तच्छब्दापुरस्करणेन तथा सत्यं ज्ञानमनन्तमिति श्रुतौ प्राथमिकतया तत्कीर्तनात्तामनुसरंश्च सरसिजः स्वस्य तत्सनामलोकप्रदत्वोपाधिनाऽपि स्तौति ॥ सत्यव्रतमिति । पूर्णज्ञानानन्दरूपं पञ्चमहाभूतभिन्नं वेदमुख्यवेदनीयम् । सत्यस्य प्रपञ्चस्य, सत्यं जगति स्थितम्, सत्यस्य योनिमबाधितप्रपञ्चस्य कारणम् । तात्पर्ये सत्यशब्दार्थो व्याख्यातो, बहुत्र योनिशब्दश्च सुमिलार्थ इति मन्तव्यम् । उत्तमानन्दज्ञानप्रदमुतापि च जगन्नियामकं लवलये जगदादकं तथा तदादानादिकर्तारं यः क्रमात्सत्यत्वादिशब्दबोध्यस्तं त्वां वयं शरणं प्रपन्नाः स्म इति । इह बहुधा विवरीतुं शक्यं श्लोके विचित्यमत्येति । विस्तरदरतो विरतं किञ्चाचार्यैरचारि नोत्कोचः ॥२७॥

सुमनोरञ्जनी — स्तुतिप्रकारमेव दर्शयति ॥ सत्येति । सच्छब्द उत्तमपर्यायः पूर्णत्ववाची वा । तिशब्द आनन्दवाची । यकारो ज्ञानवाची । तथा च ती च यं च त्ये । इकारलोपः छान्दसः । सती पूर्णे त्ये ज्ञानानन्दे स्वस्वरूपतया वृणोति स्वीकरोतीति सत्यव्रतः पूर्णानन्दज्ञानरूप इति यावत् । तम् । सत्यपरम् । अत्र सच्छब्दः पृथिव्यप्तेजोरूपभूतत्रयपरः । त्यशब्दस्तदन्यपरः । तथा च

सत्येभ्य पञ्चमहाभूतेभ्यः परं विलक्षणं उत्तमं वा । त्रिसत्यं त्रयाणां वेदानां सत्यो मुख्यार्थः । सत्यस्य योनिम् । अबाधितस्य प्रपंचस्य योनिं मूलकारणम् । अनेन जगत्स्रष्टृत्वं लक्षणमुक्तं भवति । सत्यस्य वायोर्योनिमिति वा । निहितं च सत्ये । सत्ये स्वसृष्टे जगति सत्तादिप्रदानाय निहितं प्रविष्टम् । तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतेः । अनेन स्थितिहेतुत्वमुक्तम् । सत्यस्य सत्यं, सत्यस्य निर्दुष्टानंदज्ञानरूपस्य जगतः मुक्तियोग्यजनस्येति, यावत् । सत्ये उत्तमानन्दज्ञाने यस्मात् स तथा । उत्तमानन्दज्ञानप्रदमिति यावत् । अनेन मोक्षहेतुत्वं ज्ञानप्रदत्वं च सूचितम् । सत्यनेत्रम् । सत्यस्य जगतः नेत्रं नेतारम् । अन्तर्बहिःस्थित्वा नियामकमित्यर्थः । अनेन नियमनं लभ्यते । सत्यात्मकं सत्यं जगत् अत्ति संहरतीति, आदत्ते स्वीकरोति प्राप्तानर्थपरिहारेण अनुगृण्हातीति वा सत्यात्मा स एव सत्यात्मकः तम् । अनेन संहर्तृत्वं सदनुग्राहकत्वं च लभ्यते । ननु एतादृशं जगत्स्रष्टृत्वादिकं अन्यत्रानुपलब्धं कथं भगवति संभवतीति तत्राह ॥ सत्यपरमिति । अत्र सच्छब्दः पृथिव्यप्तेजोरूपभूतत्रयपरः । त्यशब्दः तदन्यवाय्वाकाशपरः । तथा च सत्येभ्यः पञ्चमहाभूतेभ्यः तदुपलक्षितसर्वजगतः परं विलक्षणमुत्तमं वा । अनेन संभावकमुक्तं भवति । यथा इतरधेनुष्वदृश्यमानं प्रासादोद्गिरणादिकं लोकविलक्षणत्वात्कामधेनुप्रभृतीनां नासंभावितं तथा अन्यत्रानुपलब्धमपि जगत्स्रष्टृत्वादिकं जगद्विलक्षणस्य भगवतो नासंभावितमिति भावः । ननु च अशरीरस्य कथमिदं सम्भवतीत्यत उक्तम् ॥ सत्यव्रतमिति । सच्छब्द उत्तमपर्यायः पूर्णत्ववाची । तिशब्द आनन्दवाची । यकारो ज्ञानवाची । ति च यं च त्ये । ईकारलोपो निरुक्तत्वात् । यद्वा तकार एव आनन्दवाचकः । विग्रहवाक्यादौ तु निर्देशार्थमीकारानुबन्धः । सती पूर्णे त्ये आनन्दज्ञाने स्वदेहतया वृणोति स्वीकरोतीति, सत्ययोर्ज्ञानानन्दयोरेव व्रतं नियमो यस्येति वा सत्यव्रतः । पूर्णानन्दात्मकदेहवानित्यर्थः । प्राकृतदेहाभावेऽपि चिदानन्दात्मकदेहवत्वाद्युज्यते जगत्सृष्टृत्वादिकं तस्येति भावः । किमत्र प्रमाणमित्याकांक्षायामुक्तम् । त्रिसत्यमिति । त्रिभिर्वेदैः सत्या परममुख्यया वृत्या यान्ति जानन्ति यमिति, यं ज्ञानं यस्येति वा त्रयो वेदा यापयन्ति यमिति वा त्रिसत्यः । अत्रापीकारलोपः प्राग्वत् । वेदत्रयमुख्यार्थ इत्यर्थः । त्रयो वेदा एवात्र प्रमाणमिति भावः । एतदेवाभिप्रेत्योक्तमाचार्यचरणैः ।

सच्छब्द उत्तमं ब्रूयादानन्दं तीति वै वदेत् ।
येति ज्ञानं समुद्दिष्टं पूर्णानन्ददृशिस्ततः ।
सत्यशब्दोदिता तादृग्रूपं नित्यं यतो हरेः ।
सत्यव्रतस्ततो विष्णुः सद्भूतत्रयमुच्यते ।
त्यं तदन्यत्समुद्दिष्टं तत्परत्वात्तु तत्परः ।

वेदमुख्यार्थरूपत्वात्त्रिसत्यो भगवान्हरिः ।
सत्यस्य चोत्तमानन्दज्ञानदातृत्वतः सदा ।
सत्यस्य सत्यो भगवान्सत्यस्थो जगति स्थितेः ।
जगन्नेतृत्वतः सत्यं नेता विष्णुः प्रकीर्तितः ।
अत्तृत्वाच्च सदादानात्सत्यात्माऽत्रोच्यते विभुः ॥

इति तंत्रभागवत इति । तीतिशब्दः आनन्दं वै वदेदिति सम्बन्धः । तकार एवानन्दवाची इकारो निर्देशार्थः । आनन्ददृशिः आनन्दसहिता दृशिर्ज्ञानमित्यर्थः । तादृक् पूर्णानन्दात्मकं रूपं देहः नित्यं नियतं यतस्ततः सत्यव्रतो विष्णुरित्यर्थः । सत्यपरशब्दार्थमाह ॥ सद्भूतत्रयमिति । तदन्यत् भूतत्रयादन्यत् वाय्वाकाशादिरूपं भूतद्वयमित्यर्थः । तत्परत्वात् तेभ्यः पञ्चभूतेभ्यः परत्वादुत्तमत्वाद्विलक्षणत्वाद्वा तत्परः सत्यपर इति समुदिष्ट इति लिङ्गव्यत्ययेनान्वयः ॥ वेदमुख्यार्थरूपत्वादिति । अनेन त्रिभिर्वेदैः सत्येत्यादिपूर्वोक्तरीत्या त्रिसत्यशब्दस्य विग्रहः सूचितो भवति । अत्रापीकारलोप उक्तोऽवगन्तव्यः । सत्यस्य सत्यं इति मूलस्यार्थः सत्यस्य चेति । सत्ये निहितमित्यस्यार्थतोऽनुवादः सत्यस्थ इति । तस्य विवरणं जगति स्थितेरिति । अत्तृत्वात्संहर्तृत्वात् आदानात् भयादिपरिहारेण स्वीकारान्निमित्तात् । अत्र मूले । विभुर्विष्णुः सत्यात्मेत्युच्यत इति तात्पर्ययोजना दृष्टव्या ॥ २७ ॥

एकायनोऽसौ द्विफलस्त्रिमूलश्चतूरसः पञ्चशिफः षडात्मा ।
सप्तत्वगष्टविटपो नवाक्षो दशच्छदी द्विखगो ह्यादिवृक्षः ॥ २८ ॥

तात्पर्यम् – 'जगद्वृक्षाश्रया ह्येषा प्रकृतिस्तु गुणत्रयम् । मूलं मात्राः शिफास्तस्य उत्पित्सुत्वादिकास्तथा । षट्प्रकारास्तु विटपा देवगन्धर्वदानवाः । राक्षसाश्च पिशाचाश्च तिर्यङ्मानुषतस्थुषः । इन्द्रियाण्यस्य पत्राणि द्वारो द्वारो नव स्मृताः । प्रवृत्तं च निवृत्तं च फलद्वयमुदीरितम् । धर्मादयस्त्वत्र रसा मोक्ष एकफलस्य तु । प्रवृत्ताश्च निवृत्ताश्च पक्षिणो द्विविधा मताः । कारणस्य सदा सत्वात्प्रवाहेण च सन्नसौ । न कदाचिन्न भूतोऽसौ न चैव न भविष्यति । स्वतो वा परतो वापि सन्नतोऽसौ जगत्तरुः । अस्य स्वर्गादिकृद्विष्णुः सदानन्दैकरूपक' इति च ॥ २८ ॥

सत्यधर्मीया —— एकायनोऽसाविति श्लोकेऽनेकपदार्थाः सङ्केतेन कीर्तितास्ते क इत्यतस्तत्समाख्यारूपं तन्त्रभागवतवचनमुदाहृत्य तान्दर्शयति ॥ जगदिति । जगद्वृक्षेति यज्जगाद तेनादिवृक्षपदं विवृतं ज्ञेयम् । एषा प्रकृतिश्चिदचिद्रूपिण्येकाऽऽयनमाश्रयो यस्य स तथा ।

गुणत्रयमवान्तरमूलं यस्य सः । अनेन त्रिमूल इति विवृतम् । मात्राः शब्दादिपञ्चकं शिफा जटाः । शिफा जटायामिति विश्वः । तस्य जगन्नगस्योत्पत्तुमिच्छतीत्युत्पित्सुः । सनाशंसेत्युस्तस्या भाव उत्पित्सुत्वं जननं तदेवादिर्येषां ते । जन्मसत्तापरिणामवृद्ध्यपक्षयविनाशाः षट्प्रकारा विकारास्तानाप्नोतीति षडात्मा । साम्यादुभयत्र रूपकानुपन्यसनम् । अष्टौ विटपानाह ।। विटपा इति । देवा गन्धर्वा दानवा राक्षसाः पिशाचास्तिर्यञ्चो मानुषास्तस्थुट्शब्दोऽयं तस्थुषः स्थावराः सुपां सुपो भवन्तीति जसः शसा (?) दशेन्द्रियाण्येव पत्राणि द्वाशब्दोऽयम् । नवामक्षिद्विकं कर्णद्वयं नासापुटिकाद्विकं मुखं पायूपस्थे चेति । गोलकरूपद्वार एव द्वारः कोटरादयः स्मृताः । सप्त त्वक्चर्ममांसरुधिरमेदोमज्जाऽस्थीन्येकत्रापरत्र प्रसिद्धास्त्वच इति प्रसिद्धेर्मानेऽनुक्तिः । द्विफल इत्यर्थापयति ।। प्रवृत्तं च निवृत्तं चेति । चतूरस इत्यस्यार्थमाह । धर्मादय इति । ते त्रयो रसाः प्रवृत्तफलरूपाः । तुर्विशेषमेकस्मिन् रसे द्योतयति । तमेवाह ।। मोक्षेति । उर्वरितैकफलस्यैकं निवृत्तं कर्म तस्य फलं मोक्षे रस इति । द्विखग इत्यत्र द्विशब्दो द्विधार्थक इत्याह । प्रवृत्ताः प्रवृत्तकर्मिण एवं निवृत्ताश्च ते खगाः पक्षिणो मताः सम्मताः । आदिवृक्ष इत्यनेनादितो विद्यमान इत्युक्तं स्यात् । तच्च यथायथं प्रत्यक्षादिलक्षितक्षयकस्य तस्यानित्यताध्यवसायाद्बाधितमित्यतस्तदादित एवंरूपिणीति निरूपयन्मानमाह ।। कारणस्येति । प्रकृत्यादेः कारणस्य सदा सत्वात्तत्कार्यस्यानित्यप्रपञ्चस्य प्रवाहेण धाता यथा पूर्वमकल्पयदित्यादेः प्रवाहरूपेणासौ जगन्नगः कदाचिन्न न भूतो नावर्तिष्ट न न भविष्यति चातः स्वतः स्वरूपेण प्रकृतिः सूक्ष्मादिः परतः प्रवाहतो वाऽयं जगत्तरुः सदा सन् । अस्योभयविधस्यापि प्रपञ्चस्य सर्गादिकृत् कस्यचिदुपचितिमपचितिं कस्यचिद्यथायथमुत्पत्तिनिवृत्ती च करोतीति स तथा । तस्य कर्ताऽपि वर्तेत चेद्विशेषोऽयं किमवसेय इत्यत आह ।। सदानन्दैकरूपक इति ।। ततश्चायं श्लोकार्थः ।। एका प्रकृतिरयनं मुख्याश्रयो यस्य स तथा । अवान्तरमूलमालपति ।। त्रिमूल इति । गुणत्रयरूपमूलवान् । द्विफलः प्रवृत्तनिवृत्तरूपफलद्वयवान् । फलं चेद्रसेन भाव्यं स क इत्यतस्तानाह ।। चतूरस इति । रसाः प्रवृत्तकर्मफलरसा धर्माद्यास्त्रयो निवृत्तफलरसस्तु मोक्ष एवमाहत्य रसाश्चत्वारः । चतूरस इति ढ्लोपदीर्घः । पञ्चशिफः पञ्चसङ्ख्याः शब्दाद्याः शिफा जटा यस्य सः । षडात्मा षड्विकार आत्मा कायः संस्थानविशेषो यस्य स तानाप्नोतीत्यात्मा वा । सप्तत्वक् सप्त त्वक्चर्ममांसादयस्त्वचो यस्य सोऽष्टविटपोऽष्टौ विटपा देवगन्धर्वादिभेदाः शाखा यस्य सः । नवाक्षाणीन्द्रियगोलकानि द्वारभूतानि । इतरत्राक्षा आधारप्रदेशा यस्य । अक्षो रथाङ्ग आरे व्यवहारे विभीतके शकटे पाशके कर्षे द्यूतभेदेऽक्षमिन्द्रिय इति यादवः । पुरमेकादशद्वारमिति काठकोपनिषदुक्तेः कथमत्र नवद्वारमिति कथितमिति चेन्न । नाभिशिरोरूपद्वारयोरद्रवद्वारत्वेन तद्वित्वाऽविवक्षणान्नवेत्युक्तिः । अत एवैकादशस्कन्धे क्षरन्नवद्वारमगारमेतदित्युक्तिरिति ज्ञेयम् । सप्त

वै शीर्षण्याः प्राणा अर्वाग्द्वे इत्यादेर्नव द्वारे पुर इत्यादेश्च । दशेन्द्रियाण्येव छदाः पत्राण्यस्य सन्तीति दशच्छदी । द्विखगः प्रवृत्तकर्मिणो निवृत्तकर्मिणश्चेति द्विविधाः खगाः । खं सुखं सुलोपे खं दुःखमित्यर्थः । गतिस्तु पूर्वभुक्तेति वा । उपलक्षणया दुःखं च गच्छन्तीति ते तथेति चार्थः । आदिवृक्षः स्वतः परतो वा सदा सन् जगन्नगोऽस्य चोत्तरेणान्वयः । हीति मानसिद्धतामाह ॥ २८ ॥

सुमनोरञ्जनी — सत्यस्य योनिमित्यादिनोक्तं जगत्कारणत्वं जगत्स्वरूपनिरूपणेन विवृणोति ॥ एकेति । एका सूक्ष्मरूपा प्रकृतिरेव अयनं आश्रयो यस्यासौ तथोक्तः । त्रिमूलं, त्रीणि सत्वादीनि मूलानि यस्य स तथा । पञ्चशिखः पञ्च,शब्दस्पर्शरूपरसगन्धात्मका मात्राः शिखाः अवान्तरमूलानि जटा वा यस्येति तथा । षडात्मा । अस्ति, जायते, परिणमते, वर्धते, अपक्षीयते, नश्यतीति षट्प्रकारानाप्नोतीति तथा । दध्यादौ वृध्यतिरिक्तपरिणामदर्शनात् वृध्यपेक्षया परिणामस्य पार्थक्यम् । परिणामातिरिक्तस्य जने शरीरप्राप्तिलक्षणस्य दर्शनात्ततोऽपि पार्थक्यं बोध्यम् । सप्त, पञ्चभूतमहदहंकारभेदेन सप्ततत्वानि त्वक्स्थानापन्नानि यस्य स तथा । अष्टविटपः देव–गन्धर्व–दानव–राक्षस–पिशाच–तिर्यक्–मानुष–स्थावर–भेदेनाष्टौ जातय एव विटपाः शाखा यस्येत्यर्थः । नवाक्षः देहानां यानि नवद्वाराणि तान्येव अक्षाः छिद्राणि (?पक्ष्यादिनीडानि निर्यासितनष्टद्वाराणीति वा) यस्य सः । दशच्छदी दशेन्द्रियाणि च्छदाः पत्राण्यस्य सन्तीति तथा । द्विफलः द्वे प्रवृत्तनिवृत्ते फले यस्य सः । चतूरसः चत्वारः धर्मार्थकाममोक्षाः रसाः फलगता रसा यस्य । तत्र प्रवृत्ताख्यफलस्य त्रयो रसाः । निवृत्ताख्यफलस्य तु मोक्ष एक एव रस इति विवेकः । द्विखगः प्रवृत्तफलभोक्तारो निवृत्तफलभोक्तारश्चेति द्वौ द्विविधौ खगौ पक्षिणौ यस्येति तथाविधः । असौ प्रत्यक्षादिसिद्धः । आदिः कारणात्मना पुरातनः । ऐदं प्राथम्याभावादिति वा तत्प्रवाहस्य । वृक्ष इव वृक्षः यः अस्येत्युत्तरेणान्वयः । तदुक्तम् ।

जगद्वृक्षाश्रयाद्ध्येषा प्रकृतिस्तु गुणत्रयम् ।
मूलमात्राः शिफास्तस्य उत्पित्सुत्वादिकास्तथा ।
षट् प्रकारास्तु विटपा देवगन्धर्वदानवाः ।
राक्षसाश्च पिशाचाश्च तिर्यङ्मानुषतस्थुषः ।
इन्द्रियाण्यस्य पत्राणि द्वारो द्वारो नव स्मृताः ।
प्रवृत्तं च निवृत्तं च फलद्वयमुदीरितम् ।
धर्मादयस्तत्र रसा मोक्ष एकफलस्य तु ।
प्रवृत्ताश्च निवृत्ताश्च पक्षिणो द्विविधा मताः ।
कारणस्य सदा सत्वात्प्रवाहेण च सन्नसौ ।
न कदाचिन्न भूतोऽसौ न चैव स भविष्यति ।

स्वतो वा परतो वाऽपि सन्नतोऽसौ जगत्तरुः ।। इति ।। तिर्यंचः पश्वादयः । तस्थुषः स्थावरजीवाः । नवद्वारः देहस्येति शेषः । देहस्य नवद्वारः अस्य वृक्षस्य द्वारः छिद्राणीत्यर्थः । तत्र एकफलस्य प्रवृत्ताख्यस्य धर्मादयस्त्रयो रसाः पुनरन्यस्य फलस्य निवृत्ताख्यस्य मोक्षस्तु मोक्ष एक एव रस इत्यर्थः । प्रवृत्ताः प्रवृत्तकर्मरताः निवृत्ताः निवृत्तकर्मकारिणः । आदित्वमुपपादयति । कार्यकारणरूपराशिद्वये कारणस्य प्रकृत्यादेः सदा सत्वात् आदित्वम् । प्रकारान्तरेणापि तदाह । असौ प्रपंचः कार्यात्मना प्रवाहेण सदा सन् । तदुपपादयति ।। नेति । असौ प्रपंचप्रवाहः स्वतः परतो वा कदाचित् न भूत इति न किन्तु भूत एव । अतीतकाले सन्नेव । एवं न भविष्यतीति न । किं तु भविष्यति । अनेनोत्तरकाले सत्वमुक्तम् । असावित्यनेन वर्तमानता ध्वनिता । अतोऽसौ जगत्तरुः । सदा कालत्रयेऽपि सन्निति योजना द्रष्टव्या ।। २८ ।।

त्वमेक एवास्य सतः प्रसूतिः स्थानं निधानं त्वमनुग्रहश्च ।
त्वन्मायया संवृतचेतसस्त्वां पश्यन्ति नाना न विपश्चितो ये ।। २९ ।।

सत्यधर्मीया — अस्य प्रपञ्चस्य सतः सत्यभूतस्य स्वरूपतः प्रवाहतो वा । प्रसूतिः प्रसूयत इति प्रसूतिः कारणम् । स्थानं स्थितिदः । निधानमन्ततः प्रवेशाधिकरणम् । त्वमेवानुग्रहोऽनुगृह्णातीत्यनुग्रहश्च । अब्जभवभवादीनामेतत्प्रपञ्चरचनादि- कर्तृतया तत्तत्सार्वोत्तम्यवादिभिर्हिरण्यगर्भः समवर्तताग्रे ब्रह्मा देवानां प्रथमः सम्बभूव । एको रुद्रो न द्वितीयाय तस्थ इत्यादिमानतोऽङ्गीकरणात्कथं माधव एवेत्यवधार्यत इदं कर्तेत्यत आह ।। य इति । ये न विपश्चितः श्रुतिपरमार्थज्ञानहीनानाम् । कुतस्तेषां न शेमुषीत्यत आह ।। त्वन्माययेति । त्वन्मायया त्वद्बन्धकशक्त्या संवृतं चेतोऽन्तःकरणं येषां ते तथा । नानाविधां त्वन्मायां देवतां कर्तृत्वेनैतदादिश्रुत्यर्थतया जानते । ये च त्वन्मायया न संवृतचेतसो विपश्चितः पातनिकार्थभ्रमभ्रंशयुता नाना उत्पादत्वादिप्रकारेण त्वामेव पश्यन्त्यतस्त्वमेक एवेत्याद्युपपद्यत इति भावः । ते चास्त्वतन्त्रास्तच्छब्दवाच्यश्च त्वमेवेति न तदभिमतः सत्सम्मतः श्रुत्यर्थ इति भावः । अमुं श्लोकं यथावद्विवरीतुमस्य सर्गादिकृद्विष्णुः सदानन्दैकरूपक इति मानमानन्दतीर्थचरणा आदावेवोदाजह्रुरिति मन्तव्यम् । त्वन्माययाऽसंवृतचेतसो विपश्चितस्त्वामेव प्रसूतित्वादिना पश्यन्ति । नाना इतरथा न पश्यन्तीति वा ।। २९ ।।

सुमनोरञ्जनी — एवं जगत्स्वरूपं निरूप्य तत्स्रष्टृत्वादिकं पूर्वोक्तमनतिव्याप्तमित्याह ।। त्वमेक इति । अस्य जगतः प्रकृष्टा सूतिर्जन्म यस्मादिति प्रसूतिः स्रष्टेत्यर्थः । स्थानमाश्रयः धारक इति यावत् । निधीयते जगत् प्रलयेऽस्मिन्निति निधानम् । अनुगृण्हाति रक्षतीत्यनुग्रहः पालकः त्वमेक एव

नान्यः । तदुक्तम् । 'अस्य सर्गादिकृद्विष्णुः सदानन्दैकरूपकः' इति । त्वन्मायया त्वदिच्छया । त्वदधीनप्रकृत्या वा । संवृतं आवृतं चेतो येषां ते अज्ञानिन इति यावत् । त्वां सृष्ट्यादिकार्यभेदेन । नाना भिन्नं पश्यन्ति जानन्ति । ये विपश्चितो ज्ञानिनः ते न पश्यन्ति ॥ २९ ॥

बिभर्षि रूपाण्यवबोध आत्मन् क्षेमाय लोकस्य चराचरस्य ।
सत्वोपपन्नानि सुखावहानि सतामभद्राणि मुहुः खलानाम् ॥ ३० ॥

सत्यधर्मीया — त्वमनुग्रह इत्युक्तानुग्रह एतद्रूप इति निरूपयति ॥ बिभर्षीति । हे आत्मन् स्वामिन् । त्वं चराचरस्य समस्तस्य लोकस्य क्षेमाय तदर्थमवबोधे सुखक्षेमादिसाधने ज्ञाने सति तन्निमित्तीकृत्येति यावत् । सतां सत्त्वोपपन्नानि बलज्ञानसमाह्वियायुक्तानि । सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णे न चापरे । अस्वातन्त्र्यात्तदन्येषां न सत्त्वमित्याद्येकादशतातात्पर्योक्तेः स्वातन्त्र्योपपन्नानीति वा सुखावहानि । चराचरस्य लोकस्येत्युक्तापवादमाह । खलानां कंसादीनां मुहुरिह परत्र चेति वा पुनः पुनरुत्पत्ताविति वा । अभद्राणि दुःखतमआद्यमङ्गलदानि रूपाणि बिभर्षि तत्तदापदपनुत्त्यै तत्तत्समययोग्याङ्गानि धरसीति त्वमनुग्रह इत्यर्थः । यान्यभद्राणि दित्यपत्यानि तेषां खलानां मुहुः सुखस्यावहान्यप्रापकाणीति वाऽऽवृत्त्याऽन्वयः । अनेनाभद्राणि रूपाणीति शब्दतः प्राप्ताभद्रता विद्राविततेति ध्येयम् ॥ ३० ॥

सुमनोरञ्जनी — न केवलमन्तःस्थित्वा सत्तादिदातृतया रक्षकः अपि तु बहिरप्यवताररूपेण प्राप्तानर्थपरिहारद्वारा क्षेमकर इत्याह ॥ बिभर्षीति । अवबोध आत्मन् ज्ञानस्वरूप । असंधिरार्षः । त्वं चराचरस्य स्थावरजङ्गमात्मकस्य लोकस्य क्षेमाय रूपाण्यवताराणि बिभर्षि धत्से । कीदृशानीत्यतः सत्वेन सर्वगुणसमुदायेन उपपन्नानि युक्तानि । तदुक्तमाचार्यैः ।

सदा सर्वगुणाढ्यत्वात्सत्ववान् हरिरुच्यते ।
न तु सत्वगुणात्मत्वाद्यतस्त्रिगुणवर्जितः ॥ इति ।

सतां सुखावहानि प्राप्तानर्थपरिहारेण सुखकराणि । मुहुः खलानां अभद्राणि दुःखकराणि इति । ॥ ३० ॥

त्वय्यम्बुजाक्षाखिलसत्त्वधाम्नि समाधिनाऽऽवेशितचेतसो ये ।
त्वत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धिम् ॥ ३१ ॥

तात्पर्यम् – 'सदा सर्वगुणाढ्यत्वात्सत्ववान् हरिरुच्यते । न तु सत्वगुणात्मत्वाद्यत स्त्रिगुणवर्जित' इति नारदीये ॥ ३१ ॥

सत्यधर्मीया — त्वय्यम्बुजाक्षाखिलसत्त्वधाम्नीति श्लोके धाम स्वरूपमुद्दिष्टमाश्रयस्तेज एव चेत्यभिधानात्सत्त्वगुणस्वरूपता विष्णोः प्रतीयते । सा च न तस्य प्राकृता मूर्तिः निर्गुणं निर्विकारमित्यादिनाऽवमानितेति नारदीयवचनेन सत्त्वशब्दार्थमाह ॥ सदेति । सर्वगुणाढ्यत्वात्त-दात्मकत्वादित्यर्थः । सत्त्ववान्विशेषशक्त्या हरिरुच्यते न तु सत्त्वगुणात्मकत्वात् । तत्र तन्त्रं यतस्त्रिगुणवर्जित इति । विशेषाभावः सामान्याभावेन साध्यः । यद्वा त्रयो गुणा यस्य तदव्यक्तं प्रकृतिस्त्रिगुणपदवाच्यं तेन वर्जितः प्रकृतिसम्बन्धवैधुर्यात्प्राकृतगुणविधुर इति सत्त्ववर्जित इति वा । अनेनातीतपद्यगतं सत्त्वपदं व्याख्यातमिति वेदितव्यम् ॥ ततश्चायं श्लोकार्थः ॥ हे अम्बुजाक्षाम्बुजे कमले इवाक्षिणी यस्य तत्सम्बुद्धिः । अखिलं सत्त्वं सर्वे गुणास्त एव धाम स्वरूपं यस्य स तस्मिन्सकलगुणाढ्य इति वा । समाधिनोपासनया निवेशितं चेतो येषां ते तथा ये ते भवाब्धिं संसारशरधिं त्वत्पादपोतेन त्वच्चरणतर्या महद्भिः स्वस्वापेक्षयोत्तमैस्तत्त्वेन कृतेन गोवत्सपदं कुर्वन्ति । पादपोतनिरीक्षणमात्रेण वत्सपदीभवनं भवाब्धेरिति भावः ॥ ३१ ॥

सुमनोरञ्जनी — प्रागुक्तमोक्षप्रदत्वं साधनाभिधानमुखेन विशदयति ॥ त्वयीति । हे अम्बुजाक्ष!अखिलसत्वानां सर्वप्राणिनां धाम्नि आधारभूते । अखिलसत्वेषु धाम स्वरूपं यस्येति वा सर्वान्तर्यामिणीत्यर्थः । ये समाधिना ध्यानेन आवेशितं तत्रैव निक्षिप्तं चेतो येषां ते तथाविधाः भक्ताः त्वत्पादपोतेन उपासितेन त्वत्पादाख्यप्लवेन । उडुपन्तु प्लवः पोत इत्यभिधानम् । कीदृशेन,महद्भ्यः महान्तो गुर्वादयः तेभ्यः तदुपदेशेनेति यावत् । कृतेन स्वीकृतेनेत्यर्थः । महत्वेन लौकिकविलक्षणत्वेन कृतेन अङ्गीकृतेनेति वेत्यर्थः । सद्भिरिति शेषः । तदुक्तं तात्पर्ये ।

> भगवत्पादपोतोऽसौ नान्यपोतसमो भवेत् ।
> सन्निधायापि शिष्येषु तमेव प्राप्नुयुर्यतः ॥ इति वामने ।

तेन ध्यानेन महत् विस्तीर्णं यथा भवति तथा कृतेनेति पदरत्नावल्याम् । भवाब्धिं संसारसमुद्रं गोवत्सस्य पदमिव कुर्वन्ति तद्वदनायासेन तरन्तीति सम्बन्धः ॥ ३१ ॥

स्वयं समुत्तीर्य सुदुस्तरं द्युमन् भवार्णवं भीममदभ्रसौहृदाः ।
भवत्पदाम्भोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान् ॥ ३२ ॥

तात्पर्यम् – 'भगवत्पादपोतोऽसौ नान्यपोतसमो भवेत् । सन्निधायैव शिष्येषु तदेव प्राप्नुयुर्यत' इति वामने ॥ 'भगवत्पादनौकाया नेयं नौकोपमा भवेत् । तया तीर्त्वा तु तामेव प्राप्य तिष्ठन्ति तत्र यदि'ति ब्राह्मे ॥ अतस्तामेव याताः ॥ ३२ ॥

सत्यधर्मीया — पूर्वश्लोके नौकात्वं हरिचरणस्योक्तम् । न लोके नौकामधिरुह्य परम्पारमेत्य पुनर्नौकां केऽपि प्राप्नुवन्ति । किञ्च तां निधाय यानं च कथमित्यतस्तत्तात्पर्यं लोकनौकावैलक्षण्यमुपपाद्याह ॥ भगवदिति । भगवत्पादपोतो भगवत्पादनौकाऽन्यपोतसमो लौकिकनौकासदृशो न बतेत्यास्वादने । शिष्येषु सन्निधायोपदेशापदेशेन निधाय तदेव तमेव पोतं यतः प्राप्नुयुस्ततो नोक्तसमः । प्रमाणान्तरमुक्तार्थं उक्त्वा तं दृढयति ॥ भगवत्पादेति । भगवत्पादनौकाया इयं लौकिकी नौका, उपमीयत इति उपमा सदृशी नैव भवेत् । येयं भगवत्पादनौका सा नौकोपमा सादृश्यं यस्याः सा तत्सदृशी नैव भवेत् । किं कृतं वैलक्षण्यमित्यत आह ॥ यद्यतस्तयेति । तुरवधारणे । तया तीर्त्वा तामेव प्राप्य तत्रैव तिष्ठन्ति ततो न सदृशीत्यर्थः । अत एतद्धेतोस्तामेव याता इति मूले उक्तिरुपपद्यत इति शेषः ॥ ततश्चायं श्लोकार्थः ॥ पूर्वमुक्तमनुग्रहमेवमित्याह ॥ स्वयमिति । हे द्युमन्ज्ञानतनो । अदभ्रसौहृदा बहुलभक्तिमन्तः सुदुस्तरमितरैर्भीमं भीष्मं भवार्णवं संसारसमुद्रमतिशोभनं स्वदैवमनुसृत्य, स्वस्य स्वशब्दवाच्यस्य यं ज्ञानं यस्मिंस्तद्यथा भवति तथेति वा । अयः शुभावहो विधिः । येति ज्ञानमित्यादेः । समुत्तीर्य । समाऽपुनरावृत्तिं द्योत्यते । तीर्त्वा । अत्र शिष्यादिषु भगवत्पादाम्भोरुहनावं निधायोपदेशादिना स्थापयित्वा स्वयमपि तामेव याता अतो लौकिकनौकातोऽयं पोतो विलक्षण इति भावः । एवं भवांस्तत्तदौपसदतारकसदनुग्रहः । सतोऽनुगृह्णातीति स वा । सत्स्वनुग्रहो यस्येति वा । सन्नुत्तमोऽनुग्रहो यस्येति वा । अत्रत इति पदमेकं वा । अतारं भगवन्तं अते गते सच्छिष्ये अत्ताऽतो ज्ञातो येन तस्मिन्निति वा । जात्येकवचनं चेदं तदादाविति वा । तं शिष्यादिजनम् । हे द्युमन्निति सम्बोध्य बोधयित्वा समयज्ञानिन् त्वमपि अभवान् भवेऽनिति चेष्टते यः स भवान् स न भवतीत्यभवान् । सदनुग्रहश्चास्मद्वद्भवेति अदभ्रसौहृदा विनेये सन्तस्तत्र विने पूर्ववदुर्वरितम् । एवमाशिषा विशेष्य शिष्यं स्वयं तामेव याता इत्यावृत्त्याऽन्वय इति वा ॥ ३२ ॥

सुमनोरञ्जनी — दलद्वयात्मकमोक्षे पूर्वदलमुपपाद्योत्तरदलं विशदयति ॥ स्वयमिति । हे द्युमन् तेजोमूर्ते! सु अत्यन्तं दुस्तरम् । भीमं भयङ्करम् । भवार्णवं समुत्तीर्य । त्वयीत्यनुवर्तते । अदभ्रं स्वयोग्यतानुसारेण पूर्णं सौहृदं स्नेहः भक्तिर्येषान्ते तथाविधाः परमभक्तिसंपन्नाः सन्त इति भावः । भवतः पदांभोरुहनावं, अत्र शिष्येषु,निधाय उपदेशद्वारा संस्थाप्य,तामेव याताः सन्तः तत्रैव तिष्ठन्तीत्यर्थः । ननु परमप्रसादमन्तरा कथं भगवत्प्राप्तिलक्षणमोक्षः स्यादिति तत्राह । यतो भवान्, सत्सु भक्तेषु अनुग्रहः प्रसादो यस्य तथाविधोऽत इति । अपरोक्षज्ञानेन परमभक्त्या जातपरमप्रसादेन संसारसंज्ञकलिङ्गभङ्गानन्तरं यथायोग्यं भगवत्प्राप्तिलक्षणं मोक्षं प्राप्नुवन्तीत्याशयः । लोके नौकया तीर्णानां, तां तीरे विहायैव गतिदर्शनात्कथं तामेव याता इत्युच्यत इति चेदत्राहुराचार्याः भगवत्पादनौ

काया: नेयं नौकोपमा भवेत् । तया तीर्त्वा तु तामेव प्राप्य तिष्ठन्ति तत्र यत् ।। इति । तामेव प्राप्य तत्रैव तिष्ठन्ति यतोऽत: लोकोपमा नेति सम्बन्ध: ।। ३२ ।।

येऽन्येऽरविन्दाक्ष विमुक्तमानिनः त्वय्यस्तभावादविशुद्धबुद्धयः ।
आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः ।। ३३ ।।

सत्यधर्मीया — खलानामिति प्रागभिहितम् । ते च किमाकारा इत्यत ईरयति ।। हे अरविन्दाक्ष पद्माक्ष । अरविन्दे ज्ञानात्मके अक्षिणी यस्येति तत्सम्बुद्धि: । रविन्दोऽन्धकार: स नास्ति याभ्यां तौ रविशशिनौ अक्षिणी यस्य स तत्सम्बुद्धिरिति वा । अन्धकारो रविन्दान्धतिमिरं तम उच्यत इत्युत्पलमाला । अन्ये सत इतरे । कृच्छ्रेण तप आदिश्रमेण परं पदं योगादिकमारुह्य तत: पुनरध: पतन्ति । कुत इत्यत: सपरिकरमीरयति ।। त्वयीति । अस्तश्चासौ भावो भक्ति: । अनादृत-युष्मदङ्घ्रयोऽनादृतं युष्माकमङ्घ्री यैस्तैरसम्पादितयुष्मज्ज्ञाना वा । अधिर्गत्यर्थ इति ज्ञानार्थ: । अस्तभावादनन्त:करणादिति वा । आदरो भजनं भक्तिरिति गीताभाष्योक्तेरनादृतेत्यनेनैवा-भक्तिपूर्वकताप्रतीतेरिति वा । अतश्चाविशुद्धबुद्धयोऽपक्वज्ञानिन: । सर्वसम्भावकमवगमयति ।। विमुक्तमानिन इति । विमुक्तोऽत्यक्तश्चासौ मानश्चाभिमान: सोऽस्ति येषामिति ते तथा । यद्यपि बहुव्रीहिणा निर्वाहस्तथापि तेषां निन्दनीयताऽधिका वेदिता भवतीति मतुप: सार्थक्यमवधेयम् । अस्तभा अस्ता निरस्ता भा त्वद्विषयद्योतो येषां तेऽस्तभा: । तर्हि सा क्व वर्तत इत्यत आह ।। वादविशुद्धबुद्धय इति । वेदपातनिकार्थवचने विशुद्धा बुद्धिर्येषां ते तथा । यथोक्तं गीताभाष्ये । वेदवादरता वेदैर्यन्मुखत उच्यते तत्रैव रता: । वादो विषयकत्वं च मुखतो वचनं स्मृतमिति वा ।। ३३ ।।

सुमनोरञ्जनी — भक्तेर्मोक्षहेतुत्वेऽन्वयमुक्त्वा व्यतिरेकव्याप्तिमाह ।। येऽन्य इति । हे अरविन्दाक्ष!अरविन्दे इवाक्षिणी यस्यासौ । रविन्दोऽन्धकार: । अन्धकारो रविन्दान्धतिमिरं तम उच्यत इत्यभिधानात् । तद्विरोधिनौ चन्द्रसूर्यौ तावेवाक्षिणि यस्यासाविति वा । येऽन्ये सद्भ्योऽन्ये विमुक्तमानिन: वयमेव विमुक्ता इत्यभिमानिन: त्वयि (अस्तान्निरस्तान् भावात् भक्ते:) । भक्त्यभावान्निमित्तादिति यावत् । अविशुद्धा कामादिदोषदुष्टा बुद्धिर्येषान्ते तथोक्ता: ये जनास्ते कृच्छ्रेण श्रमसाध्येन काम्यकर्मणा परं अस्माल्लोकाद्विलक्षणं पदं स्वर्गादिस्थानं आरुह्यापि पतन्ति । कुत: । यतोऽनादृतयुष्मदंघ्रय:, न आदृते युष्मदङ्घ्री यैस्ते । भवत्पदारविन्दे भक्तिशून्या इत्यर्थ: । आदरो भजनं भक्तिरिति वचनात् । अनादृतयुष्मदङ्घ्रित्वात्स्वर्गादेरपि पतनं यदा तदा मोक्षे प्रत्याशा केति भाव: । परं, पदं पद्यतेऽनेनेति पदं मोक्षपरोक्षस्थानम् आरुह्य प्राप्यापि अनादृतभवदङ्घ्रित्वा-त्पतंतीति वा योजना ।। ३३ ।।

तथा न ते माधव तावकाः क्वचिद् भ्रश्यन्ति मार्गात् त्वयि बद्धसौहृदाः ।
त्वयाऽभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्धसु प्रभो ॥ ३४ ॥

सत्यधर्मीया — यदन्येषां दशाऽन्यरूपातत्प्रतियोगिनस्त्वद्द्वयायोगिन एवमित्यावेदयति ॥ तथेति । हे माधव प्रभो! तावकाः षष्ठादौ, गतम् । त्वत्सम्बन्धिन एते तथा त इव त्वयाऽभिगुप्तास्त्वयि बद्धसौहृदा मार्गात्सतः क्वचिदपि न भ्रश्यन्ति भ्रष्टा न भवन्ति । निर्भया अतीतभीतयो विनायकानीकपमूर्धसु विनायको गणेशस्तस्यानीकानि सेना विघ्नास्तानि पान्तीत्यनीकपा महाप्रत्यूहास्तेषां मूर्धानः शिरांसि तेषु विचरन्ति घनान्विघ्नानपि ते घ्नन्तीत्याशयः । आनते त्वयीत्यप्यन्वयः । सर्वजननमस्कृत इत्यर्थः ॥ ३४ ॥

सुमनोरञ्जनी — किं समं प्रकृतेऽपीति तत्राह ॥ तथेति । हे माधव! मायाः रमायाः धव स्वामिन् । मा धवो यस्येति वा । मधुकुलोद्भवत्वाद्वा माधव! ये तावकाः ते तथा-अनादृतभवदंघ्रय इव क्वचिदपि मार्गात् न भ्रश्यन्ति भ्रष्टा न भवन्ति । तत्र हेतुः त्वयि बद्धं सौहृदं भक्तिलक्षणं यैस्ते तथोक्ताः यतोऽत इति । ननु श्रेयांसि बहुविघ्नानीति वचनात् विघ्नवशाद्भ्रंशस्तेषामपि किं न स्यादिति तत्राह ॥ त्वयेति । भक्त्या प्रसन्नेन त्वयाऽभिगुप्ताः संरक्षिताः सन्तो विनायकाः विघ्नाः विनायकस्तु हेरम्बे तार्क्ष्ये विघ्ने जिने गुराविति विश्वः । तेषामनीकानि समुदायास्तानि पान्ति ये ते विनायकानीकपाः तेषां मूर्धसु निर्भयाः विचरन्ति विघ्नान् जयन्तीत्यर्थ इति पदरत्नावलीरीत्याऽर्थो द्रष्टव्यः । विनायकस्य विघ्नेशस्य अनीकानि स्तोमाः विघ्ना इत्यर्थ इति केचित् । तथा च त्वद्भक्तानां विघ्नभयमपि नास्तीति भावः ॥ ३४ ॥

सत्त्वं विशुद्धं श्रयते भवान् स्थितौ शरीरिणां श्रेयउपायनं वपुः ।
वेदक्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते ॥ ३५ ॥

तात्पर्यम् – 'विशुद्धसत्वब्रह्मादेः शरीरे संस्थितो हरिः । तेषामादेशमार्गेण वेदाद्यैरर्चयन्ति तमि'ति भागवततन्त्रे ॥ ३५ ॥

सत्यधर्मीया — सत्त्वं विशुद्धं श्रयते भवान्स्थितौ वपुरिति श्लोकेऽतीतश्लोकेऽन्यत्रापि सदा सर्वगुणाढ्यत्वादित्यादिव्याकरणप्रकारेण भगवद्वाचकत्वेऽङ्गीकृते तवार्हणं येनेति न वक्तव्यं स्यात्तथा शुद्धसत्त्वगुणात्मकं वपुराश्रयत इत्यपि ज्ञानानन्दतनुमत्त्वाद्बाधितमित्यतोऽत्र युक्तं सत्त्वशब्दार्थं मानेनाह ॥ विशुद्धेति । सुविशुद्धसत्त्वे सत्त्वसत्त्वसत्त्वप्रचुरादित्वेन ब्रह्मादेः शरीरे यो हरिः स्थितस्तेषां ब्रह्मादीनां शरीरस्थभगवदादेशेन एष आदेश एष उपदेशस्तन्मार्गेण

वेदाद्यैस्तदुपदिष्टैर्येऽर्चयन्ति । अर्चयो ज्ञानिनो तद्वदाचरन्ति तद्बाहुल्यात्तत्त्वेन व्यपदेशः । अग्नेर्भ्राजन्त्यर्चय इत्यादेरर्चिन्शब्दपर्यायोऽयमर्चिशब्दः । इनित्विदन्तोऽप्यस्तीति भानुः । ते ज्ञानिनोऽर्चयन्ति पूजयन्ति ॥ अथ श्लोकार्थः ॥ कुत्र तिष्ठति किं साधनेऽनुष्ठिते भगवांस्तुष्टः स्यादिति किमुपदेशेन जायमानमानवसभाजनीयो जनार्दन इत्यत आह ॥ सत्त्वमिति । भवान्विशुद्धं सत्त्वं ब्रह्मादेर्वपुर्देहं शरीरिणां ज्ञानादिप्राप्तियोग्यतावत्प्रशस्तशरीरवतां श्रेय उपायनं श्रेयसामधिकाश्रयम् । स्थितौ तादर्थ्ये सप्तमी । प्राप्तप्रतिपत्तिस्थिरतायै श्रयते जनो येन तत्कायनिकायेन हरिणा । अकायेत्यादेः न यच्छब्दोऽयं किन्तु यशब्दः । वेदाः, क्रिया ज्योतिष्टोमादयो, योग इति चोपायवाचि सत्काकाक्षिन्यायेन वेदक्रियायोगौ तद्रूपापायौ पुनर्योगौ, तौ च तपःसमाधी चेत्यन्वेति । ततश्च वेदः क्रिया तपः समाधियोगैरिति सिद्ध्यति । यद्वा क्रियायोगो ज्योतिष्टोमादिरितरत्पूर्ववत् । तैः करणैस्तवार्हणमर्चनं समीहते करोति । विध्याद्यधिष्ठातृत्वदुपदेशलब्धोपलब्धिः स्थैर्यं भजते स जनस्त्वामर्चतीति साधनाधिष्ठानं चोक्तं भवति ॥ ३५ ॥

सुमनोरञ्जनी — सत्यस्य सत्यमित्यादिना पूर्वोक्तं ज्ञानप्रदत्वं विवृणोति ॥ सत्वमिति । भवान् स्थितौ स्थितिकाले विशुद्धं रजस्तमोभ्याममिश्रितं सत्वं सत्वगुणात्मकं वपुः ब्रह्मादिशरीरं श्रयते आश्रयते । ततस्तद्वपुः । शरीरिणां जीवानां श्रेयसः ज्ञानादिलक्षणस्य उपायनं निमित्तं भवति । अतो जनस्तेन ब्रह्मादिशरीरस्थितभगवदुपदिष्टमार्गेण वेदाः ऋगादयः,क्रियाः अग्निहोत्रादयः, योगः श्वासधारणादिः, तपः उपोषणादिव्रतं, समाधिः हरौ मनोनिवेशनम् । तैः साधनैः तवार्हणं पूजां समीहते कुर्वन्तीति योजना । तदुक्तम् ।

विशुद्धसत्वं ब्रह्मादेः शरीरं संस्थितो हरिः ।
तेषामादेशमार्गेण वेदाद्यैरर्चयन्ति तम् ॥ इति ।

विशुद्धसत्वात्मकं ब्रह्मादेः शरीरं संस्थित आश्रितो हरिर्यतोऽतस्तेषां ब्रह्मादीनां आदेश उपदेशस्तेन मार्गेण तदुपदेशरूपमार्गेणेत्यर्थः । तं हरिं अर्चयन्ति विद्वांस इति शेषः ॥ ३५ ॥

सत्त्वं न चेद् धातरिदं निजं भवेद् विज्ञानमज्ञानभिदापमार्जनम् ।
गुणप्रकाशैरनुमीयते भवान् प्रकाशते यस्य च येन वाऽगुणः ॥ ३६ ॥

तात्पर्यम् – 'सत्वं ब्रह्मादिदेहाख्यं ज्ञानरूपं तमोनुदम् । यदि न स्यात्तदा सत्वप्रकाशानुमितो विभुः । यदि न स्यात्परो विष्णुः कथं विद्वज्जना अमुम् । अर्चयन्तीति तत्त्वस्य जिज्ञासुभिरधोक्षजः । कथं ज्ञायेत कस्यापि निर्गुणत्वात्परो विभुरि'ति तन्त्रभागवते ॥ ३६ ॥

सत्यधर्मीया — एवमनर्थापने चैवमनर्थापत्तिरित्यनिष्टोपदर्शनेन पूर्वोक्तं सत्त्वाद्यर्थं व्यवस्थापयतः सत्त्वं न चेद्धातरिति पद्यस्य, प्रपञ्चमिथ्यात्वं हरेर्नैर्गुण्यं चार्थ इत्यन्यथाप्रतीतिं विवक्षितार्थाप्रतीतिं च प्रच्यावयितुं मानमेवाह ॥ सत्त्वमिति । यदि ब्रह्मादिदेह इत्याख्या यस्य तत्सत्त्वम् । ज्ञानरूपं ज्ञानं रूपयत्युपदेशादिना प्रतिष्ठापयतीति तत्तथा न स्यात् । तमोनुदमज्ञानापनोदकं कथं स्यात्तदुपाया-भावात् । यदि न स्यादज्ञाननिवर्तकं तदा विभुर्हरिः सत्त्वप्रकाशानुमितो ब्रह्माद्युपदेशप्रादुर्भूतं प्रकाशमनु अनुसृत्य मितो विषयीकृतः कथं स्यान्न कथमपि । यदा न तदज्ञानहानं तत्सत्तानिमित्तकं तत्र तत्र सन्निहितो हरिरिति परः सर्वविलक्षणो विष्णुरिति ज्ञानं क्व च स्यात् । न स्यात्तच्चेद्विद्वज्जना अमुं माधवं कथमर्चयन्ति । नानेकेषां मनीषिणां प्रमोषो वक्तुं शक्य इति विद्वज्जना इति बहुवचनमर्चयेयुः । न हि हीनस्तज्ज्ञानेन तं सदाऽर्चयेदिति भावः । यदि ते तं नार्चयेयुस्तदा तत्त्वं जिज्ञासवस्तत्त्वजिज्ञासवस्तैः । नलोकेति षष्ठीनिषेधात् । कथं ज्ञायेत न कथमपि । नन्वर्चनचर्चनं विना न तज्ज्ञानमिति कुत इत्यत आह ॥ कस्यापि केनापीति न ज्ञायते तत्र तन्त्रं निर्गुणत्वात् । केनचिद्धर्मेण कश्चिद्धर्मी केनचिज्ज्ञेय इति लौकिकी रीतिरियम् । निर्गुण इतरज्ञानविषयताहेतु-सत्त्वादिगुणहीन इति प्रसादसौमुख्यमनासाद्य ज्ञानविषयो न भवतीत्यव्यक्तताऽनेन सूचिता । तदधिपतिर्नान्य इति नैतदसम्भावितमित्यप्याह ॥ निर्गुणत्वादप्रधानत्वादिति । अनेन हरिर्नित्यमव्यक्तः स्वातन्त्र्येण गुणत्रयातीतत्वात् । तथा हरिर्गुणत्रयातीतः सर्वप्राधान्यात् व्यतिरेकेण स्वेतरसर्ववदित्यनुमानमशुष्कं मानमुक्तं वेदितव्यम् । ननु प्रत्यक्षादिप्रमाणतोऽन्यथापि ज्ञायत इति सर्वमुक्तं गजमज्जनायितमित्यतोऽधोक्षज इति । अधःकृतः शुष्कप्रत्यक्षादिरिति न तद्बाधः । नेन्द्रियाणि नानुमानं वेदा ह्येवैनं वेदयन्तीत्यादेरर्थत उपादानम् । हरिः परः सर्वोत्कृष्टो विभुत्वादिति सूचयितुं विशेषणद्वयम् । वैपरीत्येन वेति ज्ञेयम् । विविधं भावयत्युत्पादयति सत्तावत्करोतीति विभुस्तदुत्पादकतया तत्सत्ताप्रापकतया तद्वशकत्वमुक्तम् । तच्च न तत्परत्वं विना सम्भवत्तदाक्षिपति । यथोक्तमाचार्यैरन्यत्र । यदि नाम परो न भवेत्सः हरिः कथमस्य वशे जगदेतदभूदिति । यदि न चेत्कथमित्यादीनां यथायथमावृत्त्याऽन्वयप्रदर्शनमुत्तरतात्पर्यपर्यालोचनमूलमिति मन्तव्यम् । तत् तत्त्वं जिज्ञासुभिस्तत्त्वस्य जिज्ञासुभिरिति पाठद्वयम् । द्वितीयपाठे तत्त्वसम्बन्धिजिज्ञासावद्भिरित्यर्थः । परोविभुरिति पदमेकं वा । परस्माद्ब्रह्मादेः परं परो श्रीतत्त्वम् । तदपेक्षया विभुर्गुणतो व्याप्त इति परोविभुः । परस्मादुत्तमं प्रोक्तं परो इति छान्दोग्यभाष्योक्तेः ॥ ततश्चायं श्लोकार्थः ॥ हे धातः सकलजगद्धारक हरे । इदं निजं स्वकीयं विज्ञानं विशिष्टज्ञानं यस्मात्तत्सत्त्वं ब्रह्मादिदेहाख्यमम् । अज्ञानभिदापमार्जनं भिदाऽन्यथाज्ञानं तयोरपमार्जनमपमार्जकं निवर्तकमिति यावत् । न भवेच्चेद्यदि न भवेत्तर्हि तद्भिमतज्ञानजनकेन केनचिद्भवितव्यम् । कार्यमात्रस्य सकारणकत्वात् कार्यं चेदमिति ।

गुणप्रकाशैः सत्त्वाद्युत्पन्नज्ञानैर्भवाननुसृत्य मीयते ज्ञायत इति यदि न स्यात्तर्ह्यगुणो भवान् यस्य कस्य । यतश्चोदेति सूर्य इत्यादेः । येन साधनेन प्रकाशते ज्ञायते । अत्रेदमाकूतम् । ब्रह्मादिदेहगेहनारायणानुग्रहेण ज्ञानमज्ञानमिथ्यज्ञानहानिदत्वेन श्रेयःसाधनं न स्यात्तर्हि ज्ञानाभावेनानुमापकहेतुज्ञानं न स्यात् । तद्यदि न स्यात्तज्ज्ञानं दुर्मिलं यदि तत्तथा कस्य च पूजा जायेत सा च यदि नाम न स्यात्स्याज्जगदन्धं तच्चानिष्टम् । कश्चिन्मां वेत्ति तत्त्वतः । प्रियो हि ज्ञानिनोत्यर्थमहं स च मम प्रिय इत्यादिमानदुराननतापत्तेः । अतो विज्ञानमज्ञानभिदापमार्जनं भवत्पुरुषार्थसाधनं भवतीति सिद्धमिति ॥ ३६ ॥

सुमनोरञ्जनी — विपक्षे बाधकप्रदर्शनेन पूर्वोक्तं समर्थयते ॥ सत्वमिति । हे धातः धारणपोषणकर्तः! इदं सत्वं ब्रह्मादिदेहाख्यं निजं त्वत्सन्निधानपात्रं न चेत्तर्हि विज्ञानं विशिष्टज्ञानरूपं अन्येषामज्ञानभिच्च न स्यात् । अस्त्विति चेत्तर्हि स्वस्यैव ज्ञानाभावे परोपदेशासंभवेन गुणप्रकाशैः शुद्धसत्वगुणोत्पन्नज्ञानैर्ब्रह्मादिभिरुपदेशकैर्निमित्तैर्भवान् तत्वजिज्ञासुभिरनुमीयते यथावद्ज्ञायत इति यत् तत् मार्जनमाप तन्न स्यादित्यर्थः । अनुमेति द्वयं प्राहुर्यथा ज्ञानं च लिङ्गजमिति तृतीयेऽभिधानात् । मास्तु तदुपदेशेन ज्ञानं इति चेत् तर्हि अगुणो भवान्, यतश्चोदेति सूर्य इतिवद्यच्छब्दः किंशब्दपर्यायः यस्य कस्य पुरुषस्य येन केन साधनेन भवान् प्रकाशते न केनापीति योजना । इत्थं चोपदेशकाभावेन लोके भगवद्ज्ञानमेव लुप्येत । तथा च विद्वज्जना अपि भवन्तं नार्चयेयुः । अर्चनं च प्रत्यक्षसिद्धं नापलापार्हमित्यतो भवत्सन्निधानपात्रमङ्गीकार्यमिति भावः । तदेतदाहुराचार्यचरणाः ।

सत्वं ब्रह्मादिदेहाख्यं ज्ञानरूपं तमोनुदम् ।
यदि न स्यात्तदा सत्वप्रकाशानुमितो विभुः ।
यदि न स्यात्परो विष्णुः कथं विद्वज्जना अमुम् ।
अर्चयन्तीति तत्वस्य जिज्ञासुभिरधोक्षजः ।
कथं ज्ञायेत कस्यापि निर्गुणत्वात्परो विभुः ॥ इति ।

इयमत्र तात्पर्ययोजना । ब्रह्मादिदेहाख्यं सत्वं यदि भवत्सन्निधानपात्रं न चेदिति बहिरेवोहनीयम् । तर्हि ज्ञानरूपं विशिष्टज्ञानस्वरूपं तमोनुदं च न स्यात् । ज्ञानादौ तस्यास्वातन्त्र्यादिति भावः । यदि तथा न स्यात्तर्हि गुणप्रकाशैः गुणेन शुद्धसत्वगुणेन उत्पन्नः प्रकाशो ज्ञानं येषान्तैर्ब्रह्मादिभिरुपदेष्टृभिर्निमित्तैः तदुपदेशेनेति यावत् तत्वजिज्ञासुभिः कर्तृभिः भवाननुमितः यथावद्ज्ञात इति न स्यात् । स्वस्यैव ज्ञानाभावे परेषामुपदेशासंभवादिति भावः । यदि च परो विष्णुः तथा न स्यात् तदाऽधोक्षजः तत्वजिज्ञासुभिः कथं ज्ञायेत उपदेशकाभावेन कस्यापि न ज्ञायेत । यदि च न ज्ञायेत

तदा विद्वज्जनाः अमुं विष्णुं कथमर्चयन्ति नार्चयेयुरेवेति भावः । अतो ब्रह्मादिदेहाख्यं सत्त्वं भवत्सन्निधानपात्रमङ्गीकार्यमेवेति ॥ ३६ ॥

न नामरूपे गुणजन्मकर्मभिः निरूपितव्ये तव तस्य साक्षिणः ।
मनोवचोभ्यामनुमेयवर्त्मनो देवक्रियायाः प्रतियन्त्यथापि हि ॥ ३७ ॥

तात्पर्यम् – 'लोकसिद्धार्थनाम्नः स राहित्यान्नामवर्जितः । अरूपोऽप्राकृतत्वाच्च सत्वाभावात्तथाऽगुणः । अकर्माऽक्लिष्टकारित्वान्नित्यत्वादज एव च । अलौकिकार्थसन्नाम्नामनन्तत्वाज्जनार्दनः। अनन्तनामा परमः सुसुखज्ञानरूपवान् । तानि चास्य सुदिव्यानि सुगन्धीनि सुभान्ति च । शुभलक्षणपूर्णानि सुवर्णानि महान्ति च । यदतोऽनन्तरूपोऽसौ पूर्णानन्दादिभोजनात् । बलैश्वर्यसुवीर्यादिपूर्णासङ्ख्यगुणत्वतः । अनन्तगुण एवासौ ते चाभिन्ना गुणा हरेः । परस्परमभिन्नाश्च सर्वधर्माश्च तद्गताः । अभिन्नानि च रूपाणि सर्वाणि जगदीशितुः । प्राकृतस्य तु नामादेरीक्षिता पुरुषोत्तमः । अनामादिवचोभिस्तु स एषोऽर्थोऽनुमीयते । अनामत्वादि चान्यच्च ज्ञानिनां मनसेङ्ग्यते । तेनैव चोह्य एषोऽर्थस्तस्माज्ज्ञेय इति प्रभुरि'ति ब्रह्मतर्के ॥ देवक्रियायाः प्रतियन्ति भगवत्प्रेरणादेव जानन्ति । 'नामरूपादि विष्णोस्तु न शक्यं ज्ञातुमञ्जसा । तथापि तत्प्रसादेन जानन्ति परमर्षय' इति पाद्मे ॥ ३७ ॥

सत्यधर्मीया — न नामरूपे गुणकर्मजन्मभिर्निरूपितव्य इति श्लोके नामरूपानिरूपणीयत्वेन तद्राहित्यं तत्साहित्येन गुणकर्मादिराहित्यं च भगवत उच्यत इति प्रतीयते । तच्च सर्वनामा सर्वकर्मा सर्वगुणः सर्वरूपः । नामानि सर्वाणि यमाविशन्ति । यो देवानां नामधा । ईक्षतेर्नाशब्दमित्यादिबाधितमित्यतोऽभिप्रायं प्रायोमतिर्मानिनैवाह ॥ लोकेति । स हरिर्नामवर्जित इत्युच्यते कुत इत्यत आह ॥ लोकप्रसिद्धार्थनाम्नो रहित इति । लोकप्रसिद्धोऽर्थो यस्य तच्च तन्नाम च तस्य राहित्यादभावात् । आनन्दो नेदृश आनन्द इत्यादेः साधारणाभिधेयहीननामवानित्यर्थः । अन्यत्राप्यनामाऽसौ प्रसिद्धत्वादिति । अप्राकृतत्वादप्राकृतरूपवत्त्वात् । अरूपो भूतवर्जनादित्युक्तेः । पूर्वपद्ये गदितमगुणपदमनुवर्ण्य तदर्थं वर्णयति । तथाशब्दः समुच्चायकः । सत्त्वाभावान्मुख्यस्यैव सत्त्वस्यासत्त्वस्यासत्त्वे द्वयोरमुख्ययोः प्रत्याख्यानं कैमुत्येन प्रत्येतुं शक्यमिति तन्मात्राग्रहणमिति ज्ञेयम् । तथा च गुणत्रयातीततयाऽगुण इत्युच्यत इति भावः । अक्लिष्टकारित्वादकष्टोऽकार्यकर्तृत्वादकर्मा । एतद्व्याजेनातीतैष्यदेतत्सजातीयशब्दार्थमप्याह ॥ नित्यत्वादज इति । अलौकिकार्थानि यानि सन्ति नामानि तेषाम् । अनन्तत्वाज्जनार्दनो गतम् । अनन्तनामोच्यते । प्रकृतप्राकृतरूपराहित्ये किं नीरूप उत सरूपः । अनन्तरूपोऽनन्ताक्ष इत्यादिविरोधापत्तेः । द्वितीये

तन्निरूपणीयमित्यत आह ॥ सुसुखेति । सुनामसुखज्ञानसाधारण्यं चारयति तान्येव रूपाणि सन्त्यस्येति सः । तानीत्यनेन रूपवानिति विशेषणरूपपरामर्शः । यत्तानि रूपाण्यस्य हरेः सुदिव्यानि । सु शोभनश्चासौ गन्धश्च, आ सम्यक् नि नितरां शुभं च मङ्गलं च येषु तानि । एतेन गन्धस्य इदुत्पूतिसुसुरभिभ्य इतीत्वं न कुत इति शङ्काऽऽतङ्कितेति ज्ञेयम् । यद्वा गन्धो येषामस्तीति गन्धीनि सु शोभनानि गन्धीनि च । स्वार्थशोभनताया विशेषणे गन्धे योग्यतयाऽन्वयः । प्रपञ्चः स्कन्धान्तरविवृतौ कृतोऽत्रानुसन्धेयः । सु शोभनश्चासौ गन्धश्च नितरां शुभान्यशुभमिश्राणि च शुभानि चेत्येवमेव विग्रहः । गन्धपदोत्तरं दीर्घश्च सांहितिकः । न चेदृशायासं विज्ञानं केति वाच्यम् । ईदृशायासविज्ञ इत्येकादशमूलतात्पर्ये ईदृशं वर्तमानमाय एष्यन्सोऽतीत इति त्रैविध्यं भाति । विज्ञाय वस्तुनि विज्ञाते सति, दीर्घलोपोऽत्रात इतिवत् । क्षैप्रे दीर्घलोप इति सूत्रादित्युक्तेर्विग्रहदशीयपदकाले ह्रस्व इति ज्ञेयम् । शुभानि लक्षणानीतरविलक्षणानि तैः पूर्णानि सुवर्णानि रुक्मवर्णमित्यादेर्महान्ति च । अतोऽसौ हरिरनन्तरूपः पूर्णानन्दादिभोजनाद्बलैश्वर्यसुवीर्यादयः पूर्णाः प्रत्येकमसङ्ख्याश्च गुणा यस्य स तस्य भावस्तत्त्वम् । तस्मादसावनन्तगुण एव । तर्हि तत्तेषां भेदः किमित्यत आह ॥ ते चेति । तत्तेषां परस्परमप्यनन्तरमितीरयति । तद्गताः सर्वे धर्माश्च परस्परं चाभिन्ना भेदरहिता इति । रूपाण्यपि मत्स्यादीन्यप्यभिन्ना इत्याह । अभिन्नानीति । प्राकृतस्य । अत्र द्वे दर्शने । भागवतानां नाम्नां प्राकृतत्वमेवेत्येकम् । द्वयेषां च । अलौकिकास्तस्य शब्दास्तथार्था, अलौकिको ह्येष विष्णुरिति न्यायविवरणं मूलम् । तस्य प्रथमेऽर्थोऽलौकिकत्वं वैदिकत्वमर्थानामप्राकृतत्वमिति श्रीभावबोधीये । द्वितीये सम्यक् तद्वाचकाः शब्दास्तत्स्वरूपा अलौकिका अप्युक्ता लौकिकैः शब्दैरचिन्त्यैश्वर्ययोगतः । वस्तुतः सम्यक् तत्प्रतिपादने ब्रह्मस्वरूपभूता एव शब्दा नान्य इत्याह ॥ सम्यगिति । तथाऽपि प्रसिद्धानन्दसुखादिपदवाच्यताऽप्यस्ति । तादृशैश्वर्यादित्याह ॥ अपीति । इति सटीकसत्तत्त्व-रत्नमालोक्तोऽर्थः । तथा चाद्यरीत्या प्राकृतस्य स्वनामेतरनामादेः । तुशब्दो रूपादीनां तत्त्वाभावं तत्त्वं नाम्न इति विशेषसूचकः । द्वितीयस्याप्राकृतस्य त्वप्राकृतस्य च नामादेः स्वकीयस्येति विवेकः ।

पुरुषोत्तमः क्षराक्षरपुरुषश्रेष्ठो नामादेरीक्षिता साक्षात्कर्ताऽनामादिवचोभिर्हरेर्नामरूपादि-रहितताप्रतिपादकवचोभिरनु उपक्रमाद्यनुसृत्यैष एवार्थो मीयते ज्ञायते । अनामत्वादिक-मन्यनामादिविलक्षणार्थकमित्यन्यत् । ज्ञानिनां बहूनां बहुज्ञानं मनसेङ्ग्यते ज्ञायते । अनेन बहुप्रेक्षावदनुभवो मानमस्मिन्नर्थ इति ज्ञापितमिति ज्ञेयम् । एषोऽर्थोऽनामेत्यादेस्तेनैव ज्ञानिज्ञानसिद्ध-त्वादितरैरूह्यः सम्भावितयोहनीयः । तस्मान्मानिकत्वादित्युक्तप्रकारेण । प्रभुर्हरिर्ज्ञेयस्तत्रैव देवक्रियायाः प्रतियन्तीत्यनूद्य व्याख्याति ॥ भगवत्प्रेरणादेव जानन्तीति । स्वोक्तार्थस्थेम्ने मानमाह ॥ नामरूपादीति । विष्णोर्नामरूपादिकमञ्जसा स्वसामर्थ्येन ज्ञातुं न शक्यम् । तर्हि सर्वथाऽज्ञेयं

चेच्छून्यमिति स्यादित्यत आह ॥ तथाऽपीति । तस्य विष्णोः प्रसादो, ज्ञानी भव त्वमितीच्छविशेषस्तेन परमर्षयस्तज्ज्ञानयोग्या जानन्ति । प्रसादो नामेच्छाविशेषो गुणान्तरं वा न नः काचित्क्षतिरिति सुधाभिधानात् । ततश्चायं श्लोकार्थः ॥ तस्य प्राकृतनामादेः साक्षिणः साक्षाद्द्रष्टुर्मनोवचोभ्यां मनश्च मनस्विनां वचश्च सर्वनामा यो देवानां नामधा । नामानि सर्वाणि । अलौकिकार्थसन्नाम्नामित्यादि च वचश्च । ताभ्यामनु उपक्रमादितात्पर्यलिङ्गमनुसृत्य मेयं ज्ञेयं मानोक्तप्रकारेणानुमेयं च वर्त्म यस्य स तस्य । नामरूपे गुणकर्मजन्मभिर्निरूपितव्ये ज्ञातृस्वातन्त्र्येण न निरूपयितुं शक्ये । तर्हि केचन जना जानत इति कथमित्यतः कथयति ॥ देवेति । अथाऽपि स्वयं ज्ञातुं शक्तिरिक्तत्वेऽपि हे देवैतद्रूपक्रीडाशालिन् तव क्रियायाः प्रेरणारूपिण्याः सकाशात्प्रतियन्ति जानते परमर्षय इति मानिकस्यात्र शेषः । देवक्रियया इत्यैकपद्ये देवस्य क्रियाया इति व्याख्याने तवेत्यस्य प्रागेवान्वयः । हीति मानसिद्धं नामादिकमित्यसूचि ॥ ३७ ॥

सुमनोरञ्जनी — हे विष्णो!तस्य प्राकृतनामरूपादेः नामरूपात्मकसर्वजगत इत्यर्थः । साक्षिणस्तव गुणकर्मजन्मभिः सह ये नामरूपे नामानि रूपाण्याकृतयः समुदायापेक्षया द्विवचनम्, न स्तः । गुणकर्मजन्मभिः सह ये नामरूपे स्तः ते मनोवचोभ्यां न निरूपितव्ये । साकल्येन निरूपयितुं ज्ञातुं ज्ञापयितुं च अशक्ये । यतो वाचो निवर्तन्त इत्यादिश्रुतेः । तव नामरूपगुणकर्मजन्मनामनन्तत्वादलौकिकत्वाच्च दुर्ज्ञेयतेति भावः । ननु तर्हि भगवद्ज्ञानमेव न स्याद् ज्ञानिनामिति चेत्तत्राह ॥ मनोवचोभ्यामिति । अथापि दुर्ज्ञेयत्वेऽपि मनोवचोभ्यां अनुमेयं वर्त्म यस्यासौ तथोक्तः । तस्य तव । नामरूपे देवक्रियायाः देवस्य प्रसन्नस्य हरेः क्रियायाः प्रेरणालक्षणायाः सकाशात् प्रतियन्ति जानन्ति हि यस्मादित्युत्तरश्लोकेनान्वयः । त्वत्प्रसादेनैव जानन्ति अतो न तद्ज्ञानलोपप्रसङ्ग इति भावः । अत्राहुराचार्यचरणाः ।

लोकसिद्धार्थनाम्नः स राहित्यान्नामवर्जितः ।
अरूपोऽप्राकृतत्वाच्च सत्वाभावात्तथाऽगुणः ।
अकर्माऽक्लिष्टकारित्वान्नित्यत्वादज एव च ।
अलौकिकार्थसन्नाम्नामनन्तत्वाज्जनार्दनः ।
अनन्तनामा परमः सुखज्ञानस्वरूपवान् ।
तानि चास्य सुदिव्यानि सुगन्धीनि शुभानि च ।
शुभलक्षणपूर्णानि सुवर्णानि महान्ति च ।
यदतोऽनन्तरूपोऽसौ पूर्णानन्दादिभोजनात् ।

बलैश्वर्यसुवीर्यादिपूर्णानन्तगुणत्वतः ।
अनन्तगुण एवासौ ते चाभिन्ना गुणा हरेः ।
परस्परमभिन्नाश्च सर्वे धर्माश्च तद्गताः ।
अभिन्नानि च रूपाणि सर्वाणि जगदीशितुः ।
प्राकृतस्य तु नामादेरीक्षिता पुरुषोत्तमः ।
अनामादिवचोभिस्तु स एवार्थोऽनुमीयते ।
अनामत्वादि चान्यच्च ज्ञानिनां मनसेङ्ग्यते ।
तेनैव चोद्य एषोऽर्थस्तस्माद्दुर्ज्ञेय इति प्रभुः ॥ इति ब्रह्मतर्के ।

देवक्रियायाः प्रतियन्ति भगवत्प्रेरणादेव जानन्ति ।
नामरूपादिविष्णोस्तु न शक्यं ज्ञातुमञ्जसा ।
तथापि तत्प्रसादेन जानन्ति परमर्षयः ॥ इति पाद्म इति ।

लोके इन्द्रादिलोके सिद्धः प्रसिद्धो योऽर्थः प्रवृत्तिनिमित्तं अल्पैश्वर्यादिरूपम् तत्, यस्य तस्य नाम्नः राहित्यात् । लोकप्रसिद्धाल्पैश्वर्यादिरूपनामप्रवृत्तिनिमित्ताभावादिति यावत् । नामवर्जित इत्युच्यत इति शेषः । अप्राकृतत्वात् । न विद्यते प्राकृतं प्रकृतिकृतं रूपं यस्यासौ तथोक्तः । तत्वात् प्राकृतदेहशून्यत्वादित्यर्थः । सत्वाभावात् सत्वशब्दोपलक्षितगुणत्रयाभावादित्यर्थः । अक्लिष्टकारित्वान्निमित्तादकर्मा अकर्मपदोक्तः । नित्यत्वात् स्वरूपतो देहतश्च शश्वदैकप्रकारत्वादजो जन्मरहित उच्यत इत्यर्थः । ततो नामरूपगुणकर्मजन्मभिरित्यस्य भावो वर्णितो भवति । एवं अनामत्वादिवचनस्य गतिमभिधाय दुर्ज्ञेयत्वे निमित्तमाह ॥ अलौकिकेत्यादि । अलौकिकाः लोकविलक्षणा निरवधिका वा अर्था येषां सन्नाम्नां सतामलौकिकत्वेनोत्तमानां नाम्नाम् । अलौकिकास्तस्य शब्दास्तथार्था इति श्रुतेः । अनन्तत्वान्निमित्तादनन्तनामा । सु निर्दुष्टानि सुखज्ञानात्मकरूपाणि अस्य सन्तीति तादृशो यतः अनन्तरूप इति सम्बन्धः ।

तानि रूपाणि विशिनष्टि ॥ तानि चेति । दिव्यानि क्रीडादिगुणविशिष्टानि । सु भान्ति सम्यक् भान्ति प्रकाशन्ते च । शुभानि यानि लक्षणानि तैः पूर्णानि । सुष्ठु अप्राकृताः वर्णाः शुक्लादयो येषां तथोक्तानि । महान्ति महत्परिमाणवन्ति च । शब्दादणूनि चेत्यपि ग्राह्यम् । पूर्णानन्दादिभोजनात् । बलैश्वर्यसुवीर्यादयः पूर्णाः यस्यासौ तथोक्तः । स चासावनन्तगुणश्च । तस्य भावस्तत्वं तस्मात् । बलादिपूर्णत्वादसंख्यगुणत्वाच्चानन्तगुण इत्यर्थः । अतोऽसौ दुर्ज्ञेय इति भावः । अनेनानन्तशब्दः पूर्णत्वमसंख्यत्वं च वक्तीत्युक्तं भवति । बलैश्वर्यसुवीर्यादयश्च ते पूर्णानन्तगुणाः यस्येति वा ।

प्रकारान्तरेणाप्यगुणत्वादिव्यपदेशस्य गतिमाह ॥ ते चेति । चोऽवधारणे । ते आनन्दादयो गुणाः हरेरभिन्ना एव । न भिन्नाः नापि भिन्नाभिन्नाः । न केवलं हरेः सकाशादपि तु परस्परमप्यभिन्नाः । न केवलं गुणा एव किं तु तद्गता धर्मक्रियादिरूपा अपि । अनन्तानि रूपाणि । चशब्दादभिन्नानि परस्परमिति पदद्वयमाकृष्यते । जगदीशितुः परस्परं चाभिन्नानीति । स पूर्वोक्तः लौकिकनाम-राहित्यादिः एषः भिन्नधर्मराहित्यादिश्च । अनामादिवचोभिरनुमीयते ज्ञायत इति । मूलोक्त तस्य साक्षिण इत्यस्यार्थः प्राकृतस्येत्यादि ॥ अनुमेयवर्त्मन इत्यादेस्तात्पर्यं अनामत्वादि चेत्यादि । तत्र वर्त्मपदार्थोऽनामत्वादीति । अनन्तनामत्वादिकमादिपदार्थः । इङ्ग्यते ज्ञायते । देवक्रियाया इत्यस्य तात्पर्यं तेनैव चोद्य इति । एषः ज्ञानिमनसेंगनादिरूपः । तेन हरिणा चोद्यः प्रेरणीयः । हरिप्रसादादेव ज्ञानिनो जानन्तीति भावः । ऊह्य इति पाठे तेनैव हरिप्रसादेनैवेति ऊह्यः ज्ञेय इत्यर्थः । एवं प्रमाणेन व्याख्याय स्पष्टं स्ववचनेन व्याख्याति ॥ देवेत्यादि । निगमयति ॥ नामरूपादीति । इति तात्पर्यार्थोऽवसेयः ॥ ३७ ॥

शृण्वन् गृणन् संस्मरयंश्च चिन्तयन् नामानि रूपाणि च मङ्गलानि ते ।
क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचित्तो न भवाय कल्प्यते ॥ ३८ ॥

तात्पर्यम् – यस्मान्नामरूपादयः सन्ति तस्माच्छृण्वन् गृणन् । क्रियासु क्रियमाणासु प्रेरकत्वेन पूज्यत्वेन च । 'सर्वक्रियासु कर्तृत्वपूज्यत्वेन जनार्दनम् । यो वेत्ति नैति संसारं तत्प्रसादान्न संशय' इति क्रियायोगे ॥ ३८ ॥

सत्यधर्मीया — शृण्वन्गृणन्निति श्लोके क्रियासु तदिति तच्छब्दः किमन्वयः किमर्थ इति न ज्ञायत इत्यतस्तौ प्रदर्शयन्क्रियास्वित्यत्रापेक्षितं पूरयित्वाऽन्वयं च दर्शयति ॥ यस्मादिति । नामरूपादयः सन्ति तस्मात्क्रियासु क्रियमाणासु तत्प्रेरकत्वेन पूज्यत्वेन च गृणन्स्तुवन् शृण्वंस्तच्चरितम् । मूलस्थेन न भवाय कल्प्यत इत्यनेनान्वयः । तत्र मानमाह ॥ सर्वक्रियास्विति । कर्तृत्वेन सहितं च तत्पूज्यत्वं च तेन यो वेत्ति संसारं तत्प्रसादतो नैति ॥ ततश्चायं श्लोकार्थः ॥ यस्माद्धरेर्नामरूपाण्युक्तरूपाणि सन्ति ततः क्रियमाणक्रियासु प्रेरकत्वेन पूज्यत्वेन त्वच्चरणारविन्दयोरेव समावेशितचित्तो नामानि गृणन् शृण्वन्रूपाणि संस्मरयन्नन्यान्संस्मारयन् स्वयं च चिन्तयन्मङ्गलानि तत्प्रदानि तद्रूपाणि वा जनार्दनं त्वां वेत्ति स भवाय संसृत्यै न कल्प्यते ॥३८॥

सुमनोरञ्जनी — भागवतधर्मानुष्ठानलभ्यमोक्षान्तरङ्गसाधनं भक्तियोगं निरूपयन्नाह ॥ शृण्वन्निति । यस्मात्ते नामरूपाणि सन्ति तस्मात् ते मङ्गलानि मङ्गलकराणि नामानि शृण्वन्, गृणन् उच्चरन् ते रूपाणि च संस्मरयन् सम्यक् स्मरन् । चिन्तयन् ध्यायन् सन् । न केवलमेतावत् किन्तु यः

क्रियासु अग्निहोत्रादिक्रियासु क्रियमाणासु सतीषु । त्वच्चरणारविन्दयोराविष्टं चित्तं मनो यस्य स तथा । सर्वक्रियासु कर्तृत्वेन पूज्यत्वेन त्वामेवानुसन्दधान इति यावत् । सः भवाय संसाराय न कल्पते मुक्तो भवतीति यावत् । अस्य श्लोकस्य योजनान्तराण्यस्मत्परमगुरुचरणकृतभागवतसारोद्धारादवगन्तव्यानि । तदुक्तं तात्पर्ये । यस्मान्नामरूपादयः सन्ति । तस्मात् शृण्वन् गृणन् । क्रियासु क्रियमाणासु प्रेरकत्वेन पूज्यत्वेन च ।

सर्वक्रियासु कर्तृत्वपूज्यत्वेन जनार्दनम् ।
यो वेत्ति नैति संसारं तत्प्रसादान्न संशयः ॥ इति ।

क्रियायोग इति । यस्मादिति पूर्वश्लोकादनुकृष्टहिशब्दार्थकथनं क्रियमाणास्विति शेषोक्तिः ॥३८॥

दिष्ट्या हरेऽस्या भवतः पदो भुवो भारोऽपनीतस्तव जन्मनेशितुः ।
दिष्ट्याऽङ्कितां त्वत्पदकैः सुशोभनैर्द्रक्ष्याम गां द्यां च तवानुकम्पिताम् ॥ ३९ ॥

तात्पर्यम् – 'खं नाभिश्चरणौ क्षितिरि'ति भवतः पदो भुवः । 'पदाद्याश्रयणाद्विष्णोः पृथिव्यादि पदादिकम् । तज्जत्वाद्वाथ सादृश्याद्यथानुर्भूमिगं पदमि'ति ब्रह्मतर्के ॥ ३९ ॥

सत्यधर्मीया — दिष्ट्या हरेऽस्या भवतः पदो भुव इति धरिण्या हरिचरणतोक्ता । सा च जडपृथिव्या इव तदभिमानिन्या अपि । सदेहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः । ज्ञानज्ञानः सुखसुखः स विष्णुः परम इति प्रमुखमानबाधितेत्यतो मेदिन्याः पदतां प्रतिपिपादयिषुः प्रसङ्गाद्गगनस्याप्यवयवविशेषतां प्रतिपादयन्मानमुदाहृत्य किञ्चिन्मध्ये सङ्गमनप्रकारं प्रदर्श्य विशिष्टेऽर्थे मानमुदाहरति ॥ खमिति । खं गगनं नाभिः क्षितिश्चरणौ । इति मानस्य सत्त्वाद्भवतः पदो भुव इति युक्तमिति शेषः । सामानाधिकरण्यघटना त्वेवं पदाद्याश्रयणात्पदनाभ्याद्याश्रयणात्पृथिव्यादि खाब्धिमेखलादि पदादिकं पदनाभ्यादिकं तज्जत्वाद्वा पदनाभ्यादेरुत्पन्नत्वात् । तत्त्वेनोच्यत इति शेषः । विष्णोरिति योग्यान्वयि । सादृश्याद्भूमिरप्युपरिगकतिपयपदार्थाधारभूता । तथा भगवत्पदमपि सर्वाधारमिति वा भुवः पद इति सम्भवति । तन्निदर्शनेन दर्शयति ॥ यथेति । नुर्गच्छतः पुंसः । उपलक्षणमेतत् । गच्छतः सर्वस्य जनस्य भूमिगं चेत्तन्मुद्रितां दृष्ट्वेदं तत्पदमित्याश्रयसादृश्यादेरिदमिति व्यवहारस्तथोक्तस्थलेऽपीति ॥ ततश्चायं पद्यार्थः ॥ स्वार्थितमर्थितदाता कृतवानित्याह ॥ दिष्ट्येति । हे हरे । भवतः पदो भुव आश्रितत्वतज्जत्वसादृश्यैस्तथाभूताया भुवः, ईशितुस्तव जन्मनाऽवतारेण भारोऽपनीतः । स्वस्वाम्याज्ञा नास्ति सा चेद्भारावतारः स्यादिति न च वद देव स नास्तीत्यप्याह ॥ अपेति । पालकविकलेत्यर्थः । न्यायदीपिकायामापो वा इदमग्र इति

व्याकृतावपः पालकरहित इत्युक्तेस्तत्सम्बुद्धिः । नीतोऽवितथसङ्कल्प इति सिद्धवदुक्तिः । अपनीत इत्यखण्डपक्ष ईशितुरित्यनेन कृतशङ्कापराकृतिर्ज्ञेया । इति यत्तद्दिष्ट्या सुखमभूत् । भूमेः सुशोभनैस्त्वत्पदकैः प्रतिबिम्बितपदैर्गां भूमिमङ्कितां चिन्हितां द्रक्ष्यामः । तवानुकम्पितामनुकम्पा सञ्जाताऽस्या इति तारकादीतच् । द्यां च द्रक्ष्याम इति । दिष्ट्याऽस्माकं सुखमिति द्विष्टस्य दिष्ट्येत्यस्यान्वयः । तावत्पर्यन्तमर्यपसदैरुपसर्गः कृत इति तदपनयनेन दिवोऽनुकम्पास्पदतेति ज्ञेयम् । भवतः पदं षष्ठचन्तं भुवस्तवेशितुर्जन्मना त्वत्पदकैरङ्कितां द्यां च तवानुकम्पितामिति पृथक् पृथगन्वयनान्नातिरेकः शङ्क्यः ॥ ३९ ॥

सुमनोरञ्जनी — इदानीं भवदवतारेण भुवः कृतकृत्यता । अस्मद्विज्ञापनं च सार्थकमभवदित्याह ॥ दिष्ट्येति । हे हरे! ईशितुः जगदीशस्य तव जन्मना अस्याः भवतः पदः पादाश्रितायाः पादजन्याया वा पादसदृशाया वा भुवः भारः अपनीतो निरस्त इति दिष्ट्या सर्वेषां सुखकरम् । सुशोभनैः ध्वजवज्रांकुशादिशुभचिह्नचिह्नितैः त्वत्पदकैः त्वदीयैः कोमलैः पदैः अङ्कितां चिह्निताम् । काम् । तव त्वया अनुकंपितां दयाविषयाम् । द्यां द्युलोकम् । तत्रस्थान् देवान् द्रक्ष्याम इति यत् तदपि परमानन्दकरमित्यर्थः । दिष्ट्या समुपजोषं चेत्यानन्द इत्यमरः । पदो भुव इत्यत्र भुवः पादाभिन्नत्वभ्रमं निवारयितुमुक्तमाचार्यैः ।

खं नाभिश्चरणौ क्षितिरिति । भवतः पदो भुवः । पदाद्याश्रयणाद्विष्णोः पृथिव्यादि पदादिकम् ।

तज्जत्वाद्वाथ सादृश्याद्यथानुर्भूमिगं पदमिति ब्रह्म इति । चरणौ क्षितिरिति वत् भवतः पदो भुव इति प्रकृतेऽपि सामानाधिकरण्यव्यवहार इत्यर्थः ।

इदं वाक्यं मोक्षधर्मगतम् । ननु तत्राप्यभेद एव प्रतीयत इत्यतो अभिप्रायमाविष्करोति ॥ पदाद्याश्रयणादिति । विष्णोः पदाद्याश्रयणात् । आदिशब्देन नाभ्यादिकम् । तज्जत्वात् तत्सादृश्याच्च पृथिव्यादि । आदिना आकाशादिपरिग्रहः । पदादिकमित्युच्यत इति शेषः । तत्रान्त्यनिमित्तद्वये दृष्टान्तमाह । नुः मनुष्यस्य । भूमिगं पदं भुवि विद्यमानं प्रतिमुद्रास्थानीयं पदमित्युच्यते यथा तथेति ॥ ३९ ॥

न तेऽभवस्येश भवस्य कारणं विना विनोदं बत तर्कयामहे ।
भवो निरोधः स्थितिरप्यविद्ययाऽऽकृता यतस्त्वय्यभवाश्रयात्मनि ॥ ४० ॥

तात्पर्यम् – 'अज्ञानादेव मन्यन्ते विष्णोर्जनिमृती नराः । स्थितिरूपस्य चान्यस्मात्स्थितिं मोक्षाश्रयस्य हि । स्वेच्छया हि जनिं भङ्गं स्थितिं चासौ करोत्यजः । सर्वस्य जगतो यस्मात्तज्जन्मादिः कुतो भवेदि'ति च ॥ ४० ॥

सत्यधर्मीया — न तेऽभवस्येति श्लोके वास्तविकसंसाररहितजीवात्मके भवादयोऽविद्या-कल्पिताऽतोऽप्रपञ्चो मिथ्येति प्रतीयते । तां मानेन निराकरोति ।। अज्ञानादिति । केचिन्नरा अन्यस्मात्कर्तुरिव कर्मदिश्च विष्णोरज्ञानादेव जनिमृती मन्वते । स्थितिरूपस्य स्थितिप्रतिष्ठापकस्य स्थितिं च मन्यन्त इत्यन्वयः । कुतस्तेऽज्ञा इत्यतस्तद्दौर्घट्ये हेतुमाह । हि यतो मोक्षाश्रयस्येत-रासुसाधतद्दाननिदानत्वेन तदाश्रयस्येति । न हि भवपरिभावकः स्वयं तद्वान्भवेत् । तद्वेदितारोऽतोऽज्ञा इति भावः । नैतदन्यथाऽनुपपत्तिमात्रत एव जनिमृतिदूरता हरेः स एवेतरजन्मादि तन्वान इत्यपि न जनिमृती तस्येत्याह ।। स्वेच्छयेति । स्वस्येच्छा स्वरूपभूतेच्छा तया । यस्मादसावजः स्वयं सर्वस्य जगतो जनिं करोति तस्मादिति स्वेतरसत्ता लभ्यते । यस्मादित्युक्तेः । तज्जन्मादिस्तस्य विष्णोर्जन्मादिर्यस्य सः । कुतः कस्माद्भवेत् । सर्वकर्तुः कर्ताऽन्यः कः स्यादिति भावः । समस्तस्य प्रपञ्चस्येत्यवचनेन सर्वस्य जगत इति वचनेन सर्वस्य अर्व षर्व हिंसायामिति स्मृतेः सर्वति हिनस्तीति सर्वो रुद्रस्तस्य च सर्वोऽस्त्वेष रुद्रः सर्वः कालञ्जर शिव इति नामनिधानम्। जगतः प्राणात्मकस्य सर्जकस्य ब्रह्मणश्च यस्मात्तज्जन्मादिरित्यान्तरङ्गिको भावः सूचित इति ज्ञेयम् । जगत्प्राणसमीरणा इत्यत्र जगदिति भिन्नं पदं प्राणवाचीत्यपि भानुव्याख्यानात् । अनेन भगवान्नान्यतो जन्मादिमान् स्वातन्त्र्येण तत्कर्तृत्वाव्यतिरेकेणान्यवत् । सोऽप्ययमेवमवसेयः । ब्रह्मादिर्न स्वातन्त्र्येण जननादिकर्ताऽन्यतो जन्मादिमत्त्वाद्यन्नैवं तन्नैवमिति सत्येवं हरेरितरतो जन्मादिकमिति ये मन्वते तान्मिथ्याज्ञानिन इति मन्तव्यम् ।। अथ मूलार्थः ।। अस्मदादिनाथनात एव नाथ तवावतारो नान्यत्तत्र निमित्तमित्याह ।। नेति । हे ईश । अभवस्यान्यकर्तृकोत्पत्तिर्भवः स न विद्यते यस्य तस्याभवस्यैतस्य विनोदं विविधो नोदोऽस्मत्प्रेरणा याञ्चेति यावत् । तं विना कारणमितरत्र नास्ति । अभवाश्रयात्मनि मुक्तस्वामिनि त्वयि सति जगतो भवो निरोधः स्थितिश्च भवन्ति । ते च तेऽसन्त इति ये मन्वते तेऽविद्यया मिथ्याज्ञानेनाकृता आकृष्टा इति तर्कयामहे । त्वय्यभवात्मनि भवादयोऽविद्यया कृता अङ्गीकृता । बत खेद इति वा । अ विद्यया अविद्ययेति पदद्वयं वा । हे अ ईश । विद्यया तवेच्छयैव कृता इति तेन, न सन्तीति वा । अदोषत्वाद्गुणोद्रेकाद इत्युक्तो हरिः स्वयमगम्यत्वाच्च बुध्यादेरिति बृहदारण्यकभाष्योक्तेः । ते सकाशाद्भवतीति भवस्तस्य भवस्य मम तथा भवस्य शिवस्यापि भवो निरोधः स्थितिर्यतः कृता अतस्तवादयोऽविद्ययाऽङ्गीकृता इति वा। विना भगवता त्वया विनेत्यावृत्तमन्वेतव्यम् । विना का देवताऽरणं न काऽपि रक्षयित्रीति योजयन्ति । नते सर्वनमस्कृते त्वयीत्यपि योजयन्ति । भवो निरोधः संहारोऽनिरोधः पालनं स्थितिरूर्ध्वगतिः साऽव्यक्तवाच्या यया सा च साऽविद्या तया । स्थितिरूर्ध्वगतौ भाव इति विश्वात्स भावो रथ्यो ययेति सा तयेति वा । ये भवादयस्त्वय्यकृता नाङ्गीकृता ये ते चाविद्यया । शिष्टं प्राग्वत् ।

अवि त्वयि कृता इति जानातीति शेषः । यया ते शरीर्यप्यशरीरवानित्यभवस्य मम भवस्य शिवस्य च भवादयः कृतास्तस्य । या रमाया शं यस्मात्तस्या ईशेति वा तत्सम्बुद्धिः । यं कामये तं तमुग्रं कृणोमि तमृषिं तं सुमेधामित्यादेरित्यपि वर्णयन्ति ।। ४० ।।

सुमनोरञ्जनी — अवतारोऽपि तव लीलैवेत्याह ।। न त इति । **हे ईश! न** विद्यते भव उत्पत्तिर्यस्य तादृशस्य ते भवस्य आविर्भावस्य कारणं विनोदं स्वेच्छया लीलारूपं विनाऽन्यदस्तीति न तर्कयामहे । नन्वभवत्वं कथमीशस्य । जनितोत विष्णोरित्यादौ उत्पत्त्यादेः प्रतीतेरित्यत आह ।। भव इति । त्वयि भवः उत्पत्तिः । निरोधो नाशः, स्थितिरन्यस्मादिति शेषः । एताः अविद्यया अज्ञानेन विद्याविरोधिमिथ्याज्ञानेन वा कृताः अङ्गीकृताः श्रुत्यर्थापरिज्ञानेन स्वीकृताः वादिभिः न तु वस्तुतः ताः सन्तीत्यर्थः । कुत इत्यत ।। अभवेति । अभवो मोक्षः मुक्ता वा तदाश्रयश्चासावात्मा च तस्मिन् मुक्तिप्रद इति यावत् । हेतुगर्भं विशेषणम् । एतादृशे त्वयि कथं स्युः । यतो यस्मात् सर्वजगतः अविद्यया त्वदिच्छया ।

महामायेत्यविद्येति नियतिर्मोहिनीति च ।
प्रकृतिर्वासनेत्येव तवेच्छाऽनन्त कथ्यते ।। इति वचनात् ।

भवो निरोधः स्थितिश्च कृता अत इति योजना । मोक्षप्रदस्य सर्वजगज्जन्मादिकारणस्य तवान्यस्माज्जन्मादयः कथं स्युरिति भावः । तदुक्तम् ।

अज्ञानादेव मन्यन्ते विष्णोर्जनिमृती नराः ।
स्थितिरूपस्य चान्यस्मात् स्थितिं मोक्षाश्रयस्य हि ।
स्वेच्छया हि जनिं भङ्गं स्थितिं चासौ करोत्यजः ।
सर्वस्य जगतो यस्मात्तज्जन्यादिः कुतो भवेत् ।। इति चेति ।

स्थितिरूपस्य अनन्याधीनसार्वकालिकसत्तारूपस्य । अभवाश्रयात्मनीत्यस्यार्थो मोक्षाश्रयस्य हीति । द्वितीययोजनामभिप्रेत्याह ।। स्वेच्छयेति । सर्वस्य जगत इति मूले शेषोक्तिः । कुतः कस्मान्निमित्तात् न कुतोऽपीत्यर्थः ।। ४० ।।

मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु कृतावतारः ।
त्वं पासि नस्त्रिभुवनं च तथाऽधुनेश भारं भुवो हर यदूत्तम वन्दनं ते ।।४१।।

सत्यधर्मीया — सदा देव एवमवतारान्कुर्वतस्तव न किमपि प्रयोजनं किन्त्वस्मदादिसङ्कट-विघटनमेव नैतन्मात्रं विना किञ्चित्प्रतिकर्तुं न समे वयं समर्था इति वदन्नुपसंहरति ।। मत्स्येति । अ

अश्व ईषदश्वो हयग्रीवश्च । कच्छपः । कूर्मश्च नृसिंहश्च वराहश्च हंसश्च राजन्यो राज्ञ्यां राज्ञा जातो रामादिश्च विप्रः परशुरामादिश्च विबुध उपेन्द्रो एषु तत्त्वेन कृतावतार इत्यर्थः । एतेन मत्स्यादीनामन्येषां सत्त्ववन्नृसिंहानामन्येषामभावात्कथमन्वय इति निरस्तम् । यद्वा मत्स्येत्यारभ्यावतारान्तमेकं पदम् । मत्स्य इति विबुध इतीषुरिति कृता अवतारा येन स तथा । यथोक्तं कर्णपर्वणि । विष्णुमिषुं समकल्पयन् । इषुश्चाप्यभवद्विष्णुरिति । इषु इच्छायामिति स्मरणादिषेरौणादिके कुप्रत्यये इषु इच्छा तेन मत्स्येत्येवं सर्वत्रेषुणा कृतावतार इति वा । नृसिंह इव मत्स्याश्वकच्छपाश्च वराहहंसराजन्यविप्रविबुधाश्च तेषु कृतावतार इति वा । न च द्वन्द्वनिर्दिष्टेषु कथमेकस्य दृष्टान्तत्वमदृष्टं क्वापि कल्प्यत इति वाच्यम् । दोषारच्छिद्रशब्दानां पर्यायत्वमिति व्याकृतिलवेऽत्र छिद्रशब्दोपादानं दृष्टान्तत्वेनेति सुधाभिधानात् । अनेन रेत आद्यविकृततारूपार्थ-विशेषोऽपि लभ्यत इति ज्ञेयम् । यदा नृसिंहाकृतिराविरासीदित्यादेः । त्वं नस्त्रिभुवनं च पासि । अपा इति वक्तव्ये यदूत्तमाभेदं बोधयितुं पासीत्युक्तिरिति ज्ञेयम् । व्यत्ययो वा । धातुसम्बन्धे प्रत्यया इति वा । यथा तथाऽधुनाऽपीश यदूत्तम भुवो भारं हर ते वन्दनमस्तु कुर्म इति वा शेषः ॥ ४१ ॥

सुमनोरञ्जनी — भगवति भक्तानुकंपितां स्मरन् स्वाभिप्रेतं विज्ञापयन् शिरसा ववन्दे इत्याह ॥ मत्स्येति । मत्स्येत्यादिहंसेत्यन्तं सम्बोधनम् । अश्वो हयग्रीवः । कच्छपः कूर्मः । राजन्यो रामः । विप्रो जामदग्न्यादिः विबुधेषु कृतावतारः उपेन्द्रपृश्निगर्भादिरूपेण मत्स्याश्वकच्छपेषु नृसिंहादिषु कृतावतार इति वा । नृषु कल्किः । विप्रराजन्ययोर्विवक्षा विशेषेण पृथगुक्तिः युक्ता । ननु हयग्रीवनृसिंहयोः कथमश्वसिंहत्वे इति चेत् जातिलिङ्गं मुखं स्मृतमिति वचनादवेहि । अत एव नृसिंहं प्रति सिंहविरोधिशरभरूपेण प्रत्यवस्थानं हरस्य पुराणेषु श्रूयते तथा । नः अस्मान् त्रिभुवनं च यथा पासि अपाः लकारव्यत्यय आर्षः । तथा अधुना भुवो भारं हर परिहर । तत्र किमस्माभिराप्तका-मस्यानुष्ठेयमस्ति । अतो यदूत्तम ते वन्दनमेवास्त्वित्युक्त्वा सर्वे शिरसा प्रणेमुरिति भावः ॥ ४१ ॥

दिष्ट्याऽम्ब ते कुक्षिगतः परः पुमान् अंशेन साक्षाद् भगवान् भवाय नः ।
मा भूद् भयं भोजपतेर्मुमूर्षोः गोप्ता यदूनां भविता तवात्मजः ॥ ४२ ॥

सत्यधर्मीया — देवकीर्तनवद्देवकीगुणकीर्तनमपि भगवत्तोषदमिति तामुद्दिश्य भाषते ॥ दिष्ट्याऽम्बेति । अम्बार्थनद्योरिति ह्रस्वः । हे अम्ब! दिष्ट्या मङ्गलम् । दिष्ट्या स्यान्मङ्गलादिष्विति यादवः । परः पुमान्परपुरुषो भगवानंशेन । आवेशावतार इति पराकरोति ॥ साक्षादिति । मुख्यांशेन नो भवाय मङ्गलाय भवाय नो मङ्गलाश्रय इति वा । ते कुक्षिं पिपतिषतीत्यादिवदाशङ्कायां सन् तवात्मजो यदूनां गोप्ता रक्षिता भविता भविष्यति ॥ ४२ ॥

सुमनोरञ्जनी — देवकीं समाधत्ते ॥ दिष्ट्येति । हे अम्ब । भगवानव्याहतषड्गुणैश्वर्यसंपन्नः परः पुमान् परमपुरुषः साक्षात्स्वयमंशेन ते कुक्षिं गत इति यत् तत् दिष्ट्या मङ्गलमेव । दिष्ट्या स्यान्मङ्गलादिष्विति यादवः । मुमूर्षोर्मरणाशङ्काविषयस्य । आशङ्कायामचेतनेषूपसंख्यानमिति स्मरणात् । भोजपतेर्भयं मा भूत् । कुतः । यतस्तवात्मजः यदूनां गोप्ता नः भवाय क्षेमाय मङ्गलाय भविता भविष्यति अत इति सम्बन्धः ॥ ४२ ॥

इत्यभिष्टूय पुरुषं यद्रूपमनिदं यथा ।
ब्रह्मेशानौ पुरोधाय देवाः प्रतिययुर्दिवम् ॥ ४३ ॥

इति श्रीमद्भागवते दशमस्कन्धे तृतीयोऽध्यायः ।

सत्यधर्मीया — यद्रूपमनिदं नेदमनिदं जगद्विलक्षणं तं पुरुषं पूर्णषड्गुणं यथा सम्यगिति पूर्वोक्तप्रकारेणाभिष्टूय स्तुत्वा ब्रह्मेशानौ ब्रह्मा चेशानश्च तौ ब्रह्मा चेशश्च तौ । अनित इत्यनौ च । चेष्टावन्तौ गन्तुमुद्यताविति यावदिति वा । तौ पुरोधाय पदमेकं, देवा दिवं प्रति ययुः ॥ ४३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे तृतीयोऽध्यायः ॥ १०-३ ॥

सुमनोरञ्जनी — यद्रूपं यस्य रूपम् । अनिदं इदं न भवतीति । प्रत्यक्षसिद्धं जगद्विलक्षण-मित्यर्थः । तं पुरुषं, इति पूर्वोक्तप्रकारेण । देवा अप्यभिष्टूय यथा गतास्तथा ययुरिति सम्बन्धः ।

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां तृतीयोऽध्यायः ॥ १०-३ ॥

॥ अथ चतुर्थोऽध्यायः ॥

श्रीशुक उवाच -

अथ सर्वगुणोपेतः कालः परमशोभनः ।
यर्ह्येवाजनजन्मर्क्षः शान्तर्क्षग्रहतारकः ॥ १ ॥

सत्यधर्मीया — ॥ अथेति ब्रह्मादिगमनानन्तरमित्यानन्तर्यार्थकं सच्छ्रुत्या मङ्गलप्रयोजनकम् । सर्वगुणैरुच्चस्थानस्थत्वादिसर्वग्रहगुणैरुपेतः । जनानां विद्यतेऽथमन्नं यस्मिन्सः अथः । स चासौ सर्वगुणोपेतश्चेति वा । यो भुङ्क्ते तद्दिने मोहात्पूयशोणितमत्ति स इत्यादेः । परमं शोभनं यस्मात्स तथा । परमरिजनं प्रत्यशोभनः । एकस्यैव कालस्य सदसद्विवक्षया शोभनत्वाशोभनत्वे । वियुक्तनारी परितापकरी किमिन्दुरानन्दकरो लोक इत्यादिवज्ज्ञेये । अजनस्य प्राकृतकायसंसर्गरूपजननहीनस्य जन्मनटनस्य ऋक्षं नक्षत्रं रोहिणीनामकं यस्मिन्सः । अजनेति वदन् जन्मेति जल्पन्प्रसिद्धज-न्मोपजहास शुक इति ज्ञेयम् । शान्तिप्रदानि ऋक्षाण्यस्थूलनक्षत्राणि, ग्रहा राह्वादयो, ये ऋक्षाः कृतनिवेशना हि ते, विहितस्थाननिवेशाश्च ते ग्रहाश्चेति वा । ऋक्षः कृतनिवेशने ऋक्षमुक्तं च नक्षत्र इति विश्वः । तारकाः स्थूलानि नक्षत्राणि वा यस्मिन्सः । तारका ज्योतिषीति निपातनान्नेत्वम् । तारकाणि यस्मिन्स इति वा । नक्षत्रे तारकं तारका अपि चेति विश्वः । यर्ह्यखण्डे खण्डःकाल इति यदेत्युक्तिः । अजनान्नारायणाज्जन्म यस्य स ब्रह्मा देवता यस्य तदृक्षं रोहिणीनक्षत्रं यस्मिन्स इति केचित् । प्रजापतिदेवतेति । तथा चोक्तम् । तुवदे चतुर्ब्रह्मः कं देवताप्रस्तावे । रोहिणीनक्षत्रं तथा च कालामृते । ऋक्षेशा अथ दस्रकालहुतभुग्ब्रह्मेन्द्विति ॥ १ ॥

सुमनोरञ्जनी — देवकीवसुदेवयोः अनेकजन्मस्वाराधितभगवत्प्रसादेन लब्धभक्तीनामधिकारिणां भगवान् स्वस्वरूपमाविर्भावयतीति दर्शयितुं देवक्यां भगवदवतारो निरूप्यतेऽस्मिन्नध्याये ॥ अथेति । अथ सर्वदेवगमनानन्तरम् । सर्वगुणोपेतः अत एव परमशोभनः नन्दाभद्रादिकुयोगराहित्येन मङ्गलकरः । अजनजन्मर्क्षः । अजनो विष्णुः तज्जन्मा प्रजापतिः तद्देवताको ऋक्षः रोहिणी यस्मिन्स तथा । शान्तानि सुखकराणि उच्चस्थानभूतानीति यावत् । ऋक्षशब्दो भशब्दवल्लग्नपरः । ऋक्षाणि लग्नानीति । येषां ते तथाभूता ग्रहरूपास्तारकाः यस्मिन् । अथवा शान्ताः प्रसन्नाः अनुकूला इति यावत् । ऋक्षग्रहतारकाः ऋक्षाणि नक्षत्राणि अश्विन्यादीनि, ग्रहाः चन्द्रादयः तारकाः यस्मिन् । एवंविधः कालः यर्हि यदा प्राप्तः (नभसि कृष्णाष्टम्यां यदा रोहिणीयोगः तदेति यावत्) । अथ श्रीभगवदवतारसूचकं परममंगलमभूदित्यन्वयः ॥ १ ॥

दिशः प्रसेदुर्गगनं निर्मलोडुगणोदयम् ।
मही मङ्गलभूयिष्ठा पुरग्रामव्रजाकरा ॥ २ ॥

सत्यधर्मीया — तदा दिशः प्रसेदुः प्रसन्ना अभूवन् । गगनं, भागभेदत इयमुक्तिः । निर्मलानामुडूनां गणस्योदयो यत्रेति तत् । मही । मङ्गलभूयिष्ठाः पुराणि ग्रामा बहुजनाकीर्णा व्रजनिकराश्च यस्यां सा ॥ २ ॥

सुमनोरञ्जनी — तदेव दर्शयति ॥ दिश इत्यादिना । प्रसेदुः प्रसन्नाः मनोहरा इति यावत्, अभवन् । गगनं, निर्मलानामुडुगणानां उदयो यस्मिन् तत् । मही भूमिः । मङ्गलभूयिष्ठा मङ्गलपूर्णा । पुराणि, ग्रामाश्च, व्रजाः आभीरपल्यः, तासां आकरा आश्रया । पुरग्रामाणां व्रजस्य समुदायस्य आश्रया वा ॥ २ ॥

नद्यः प्रसन्नसलिला ह्रदा जलरुहश्रियः ।
द्विजालिकुलसन्नादस्तबका वनराजयः ॥ ३ ॥

सत्यधर्मीया — जलरुहाणां कमलानां श्रियः शोभा येषां ते । वनराजयो वनपङ्क्तयः । द्विजानां पक्षिणामलीनां भ्रमराणां च कुलं तस्य सन्नादो येषु ते च स्तबका गुच्छा यासां ताः ॥ ३ ॥

सुमनोरञ्जनी — नद्यः । प्रसन्नसलिलाः प्रसन्नानि निर्मलानि सलिलानि यासु ताः । जलरुहाणां कुमुदादीनां श्रियः शोभाः येषु तादृशाः ह्रदाः । वनराजयः वनपंक्तयः । द्विजालिकुलसन्नादस्तबकाः । द्विजाः पक्षिणः, अलयो भ्रमराः तेषां कुलस्य समुदायस्य सन्नादो येषु तथाविधाः स्तबकाः गुच्छाः यासु ताः तथाविधाः अभवन्निति शेषः ॥ ३ ॥

ववौ वायुः सुखस्पर्शः पुण्यगन्धवहः शुचिः ।
अग्नयश्च द्विजातीनां शान्तास्तत्र समिन्धत ॥ ४ ॥

सत्यधर्मीया — सुखं तत्साधनं स्पर्शो यस्य सः । सुखमासनमिति यथा । वहतीति वहः पुण्यगन्धस्य । शुचिः शुद्धः वायुः । शान्ताः प्राक् । तत्र तत्समये । समिन्धत दीप्ता बभूवुः ॥ ४ ॥

सुमनोरञ्जनी — वायुः सुखस्पर्शः सुखकरस्पर्शवान् । पुण्यगन्धवहः सुगन्धिवाही । शुचिः शुभदेशादागतः सन् ववौ । द्विजातीनां त्रिवर्णानां अग्निहोत्रिणां अग्नयः गार्हपत्यादयः शान्ता अपि पूर्वं अप्रज्वलिता अपि । समिन्धत प्रज्वलिता आसन्निति योजना ॥ ४ ॥

मनांस्यासन् प्रसन्नानि साधूनामसुरद्रुहाम् ।
जायमानेऽजने तस्मिन् नेदुर्दुन्दुभयो दिवि ॥ ५ ॥

सत्यधर्मीया — असुरेभ्यो द्रुह्यन्तीत्यसुरद्रुहस्तेषां साधूनाम् । मनांसि प्रसन्नान्यासन् । तस्मिन् अजने हरौ जायमाने समीपभविष्यज्जनने सति । दिवि दुन्दुभयो नेदुः स्वयम् ॥ ५ ॥

सुमनोरञ्जनी — असुरद्रुहां साधूनां मनांसि प्रसन्नानि सन्तुष्टानि आसन् । तस्मिन् एतादृशे काले । अजने जायमाने जनिष्यमाणे । वर्तमानसामीप्याद्वर्तमानवद्व्यपदेशः। दिवि दुन्दुभयो नेदुः॥५॥

जगुः किन्नरगन्धर्वास्तुष्टुवुः सिद्धचारणाः ।
विद्याधराश्च ननृतुरप्सरोभिः समं मुदा ॥ ६ ॥

सत्यधर्मीया — अप्सरोभिः समं साकम् ॥ ६ ॥

सुमनोरञ्जनी — किन्नरगन्धर्वाः जगुः गायनं कृतवन्तः । सिद्धचारणास्तुष्टुवुः । अप्सरोभिः समं विद्याधराः मुदा ननृतुः ॥ ६ ॥

मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः ।
मन्दं मन्दं जलधरा जगर्जुरनुसागरम् ॥ ७ ॥

सत्यधर्मीया — सुमनांसि सुमनसः । स्त्रियः सुमनसः पुष्पमित्यर्थः । भूम्नि स्त्रियां सुमनस इति रत्नकोशः । सुमनाः पुष्पमालयोः, स्त्रियां ना धीरदेवयोरिति मेदिनी । यद्वा सुमनसश्च सुमनांसि च सुमनांसि । द्वन्द्वे नपुंसकं भविष्यति । एकवचनं चेति प्रासङ्गिक्युक्तिः । कृष्ण एव मनांसि स्थापितवन्त इति द्योतनार्थं सुमनांसीत्युक्तिः । अनुसागरं समुद्रसमीपे मन्दं मन्दं जलधरा जगर्जुः ॥ ७ ॥

सुमनोरञ्जनी — जनार्दने । जनान् कामिजनान् अर्दयति पीडयतीति तथाविधे । अतमे, तमो ध्वान्ते गुणे शोके क्लीबं वा ना विधुंतुदे इत्यभिधानात् तमो विरोधिनि चन्द्रे । उद्भूते निशीथे महानिशीथ इत्यर्थः । जायमाने उदिते सति देवरूपिण्यां देवक्याम् । सर्वेषां हृदयगुहासु शेत इति तथाविधो विष्णुः यथा यथावत् । चतुर्भुजशंखचक्राद्यायुधधरः सन्नेव प्रादुरासीदिति योजना इदं स्वदेहस्य शुक्लशोणित सम्बन्धाभावप्रदर्शनार्थम् ॥ यथोक्तं निर्णये ॥ न तावता शुक्लतो रक्ततश्च जातोऽस्य देहस्थितिदर्शनाय सशंख चक्राब्जगदः स दृष्टः ॥ इति । तत्र दृष्टान्तः । प्राच्यां दिशि पुष्कलः पूर्णः इन्दुः चन्द्र इवेति । महांतस्तु इवपुष्कलः इः कामः तस्य वपुषः कलेव कला यस्य

सः विष्णुः । यथा प्राच्यां इन्दुराविरासीत् तथा देवक्यां आविरासीदित्यन्वय इत्युपदिशन्ति । तदा तम उद्भूते उद्भूततमसि निशीथे जनार्दने जायमाने सति । देवाः मुदान्विताः सन्तः सुमनांसि पुष्पाणि मुमुचुः । मुनयोऽपि मुदान्विताः बभूवुः । अनुसागरं सागरमनुसृत्य सागरोपान्त इति यावत् । मन्दं मन्दं जगर्जुरित्यन्वयः ॥ ७,८,९ ॥

निशीथे तम उद्भूते जायमाने जनार्दने ।
देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाश्रयः ॥ ८ ॥

सत्यधर्मीया — तम उद्भूते प्रचुरतमस्के तमो दुर्गोद्भूतं यस्मिंस्तस्मिन् । यशोदायां दुर्गोत्पत्तौ तदानीं भाव्यायामिति यावदिति वा । तमो हि दुर्गेत्यादेः । आहिताग्न्यादिः । निशीथे निशीथः स्यादर्धरात्रे निशीथो रात्रिमात्रक इति विश्वः । गोपीथेत्यादिनिपातितः शब्दः । अजनार्दने जनो लोके महर्लोकात्परलोके च पामर इति विश्वादजना अपामरास्सज्जनास्तेषामर्दने कंसादिभिर्जायमाने सति । जनार्दने जनानां मुख्यादीनामर्दन आगमे जायमाने सतीति वा । जनार्दने पामरजनार्दने जायमाने । वर्तमानसामीप्ये वर्तमानव्यपदेश इति भविष्यति वा । आजायमानेजनार्दन इति पदमेकं वा । अजश्चासावुत्पत्तिरहितश्चासावयमोऽसदृशश्चासावनेजनो न विद्यते एजनं भयं यस्य सोऽजनश्चासावर्दनो याचितश्च तस्मिन् जायमान इति पूर्वेण नेदुर्दुन्दुभय इत्यनेनान्वयो वा । अनेनोज्ज्वलपातेनास्माकं नैल्यवर्णः कश्चन समुद्रशाय्युत्पत्स्यत इति स्वामिनोऽभिमतभङ्गभियेति ध्वन्यते । सजलजलद-नीलमित्यादेः । अनेजन्निर्भयत्वादितीशावास्योपनिषद्भाष्योक्तेः । अन्यत्राजनो लोकविलक्षण इत्यर्थः । जायमाने जने तस्मिन्नेदुरिति श्लोके जायमाने जनेऽतस्मिन्निति छेदः । अतस्मिन्न सः तस्मिन्नतस्मिन् श्रीहरिभिन्ने कीर्तिमदादिपूर्वजे जायमाने यानि मनांसि प्रसन्नानि शीर्णानि । अधुना मधुनाथोऽत्र प्रादुर्भूत इति जनार्दने जायमाने प्रसन्नान्यासन्नित्येकान्वयो वा । देवरूपिण्यां देवस्य रूपं तदस्त्यस्यामिति देवरूपिणी तस्याम् । सर्वगुहाशयः । सर्वेषां गुहा हृदयगुहास्तासु शेत इति स तथा । अधिकरणे शेतेरित्यच् । एवमेव देवो देवक्यां वर्तत इति दर्शयितुमदो विशेषणम् ॥ ८ ॥

प्रादुरासीद् यथा प्राच्यां दिशीन्दुरिव पुष्कलः ॥ ९ ॥

सत्यधर्मीया — यथा यथावत्पूर्ण एव प्राच्याम् । यथाप्राच्यामित्येकं पदं वा । योग्या या प्राची तस्याम् । तत्तद्देशवासिविवक्षया प्राचीत्वादेरव्यवस्थितत्वादिति केचित् । दिशि पुष्कलः पूर्णकल इन्दुश्चन्द्रमा इव यथा प्रादुरासीत्तथा सम्यक् देवरूपिण्यां देवक्यामिति योजना वा । इन्दुः इवपुष्कल इति वा छेदः । अस्यापत्यं इर्मन्मथस्तस्य यद्वपुस्तद्यस्य कलांशस्तस्मिन्कला यस्य सः । साक्षान्मन्मथमन्मथ इत्यादेस्ततोऽपि सुन्दर इति भावः ॥ ९ ॥

तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधम् ।
श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीताम्बरं सान्द्रपयोदसौभगम् ।। १० ।।

सत्यधर्मीया — बालकं तद्वद्विद्यमानम् । बालः को ब्रह्मा यस्य तमित्यान्तरङ्गिको भावः । बाल एव कृष्णकेश एव बालक इति भावोऽपि विभावनीयः । चिकुरः कुन्तलो बालः । बालः कचे शिशौ । कचः केशः शिरोरुह इति सोपयुक्तयुक्तामरविश्वामराः । अम्बुजेक्षणं कमललोचनं रमासमायुक्तनेत्रं वा । अम्बुजे चन्द्रमसीक्षणम्, अम्बुजश्चन्द्रमा ईक्षणे यस्येति वा । शिशिरत्वकुलगुरुत्वाभ्यां इति शीतांशुग्रहः । चत्वारो भुजास्तत्काले प्रदर्शिता येन स तम् । अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधमित्यादेश्चतुर्भिः प्रकारैर्भुङ्क्ते भक्तमित्यप्यर्थः । शङ्खगदाद्युदायुधम् शङ्खश्च गदा च शङ्खगदे ते उद्धृते आयुधे नन्दकचक्रके यस्य स तम् । श्रीवत्सलक्ष्मंगलशोभिकौस्तुभमिति पदमेकम् । श्रीवत्सो लक्ष्म चिन्हं यस्य तदसाधारण्यद्योतको बिन्दुः । शोभाऽस्यास्तीति शोभि शिखादिभिः शोभत इति शोभी वा । गलेन शोभी कौस्तुभो मणिर्यस्य तम् । चिह्नं लक्ष्म च लक्षणमित्यमरः । पीतमम्बरं वस्त्रं यस्य तम् । सान्द्रशब्देन जलपूर्णता द्योत्यते । सान्द्राः जलपूर्णाः पयोदाः मेघास्तेषां सौभगं कान्तिविशेषो यस्य तम् ।। १० ।।

सुमनोरञ्जनी — यथेत्युक्तम् स्पष्टयति ।। तमित्यादिना । तं अद्भुतं प्राकृतशिशुविलक्षणतया आश्चर्यकरं बालकम् । वसुदेव ऐक्षतेत्यन्वयः । कीदृशम् । अम्बुजेक्षणं अम्बुजे इव ईक्षणे यस्य स तथा । अथ वा अम्बुजः चन्द्रः तद्वत् ईक्षणे यस्येति शान्तदृष्टिरित्यर्थः । यद्वा अम्बुजशब्देन चन्द्रसूर्यौ ग्राह्यौ । अम्बुनि जायत इति चन्द्रः । अम्बूनि जायन्तेऽस्मादिति सूर्यः । आदित्याज्जायते वृष्टिरिति श्रुतेः । तौ ईक्षणे यस्य स तथा । शङ्खगदाद्युदायुधम् । शङ्खगदे आदी येषान्तानि । शङ्खगदादीनि तान्येव उत्कृष्टान्यायुधानि यस्य स तथा । श्रीवत्साख्यं लक्ष्म चिह्नं यस्य । गले कंठे, शोभत इति शोभि, शोभमानं कौस्तुभं यस्यासौ तथोक्तम् । सांद्रस्य जलपूर्णस्य पयोदस्य मेघस्य सौभगमिव सौभगं कान्तिर्यस्य सः ।। १० ।।

महार्हवैदूर्यकिरीटकुण्डलत्विषा परिष्वक्तसहस्रकुन्तलम् ।
उद्दामकाञ्च्यङ्गदकङ्कणादिभिर्विरोचमानं वसुदेव ऐक्षत ।। ११ ।।

सत्यधर्मीया — महानर्हो मूल्यं येषां तानि वैदूर्याणि गतम् । तेषां किरीटः कुण्डले च कर्णविष्टने च तेषां त्विट् कान्तिस्तया परिष्वक्ताः परितः सम्बद्धाः सहस्रं कुन्तला यस्य तम् । त्विषेति

टाबन्ततापक्षे पदमेकम् । त्विषाभिरिति विग्रहभूमिकं च भवतीति कश्चन लाभस्तत्रेति ज्ञेयम् । उद्दामानि काञ्च्यङ्गदकङ्कणान्यादयो येषां तैराभरणैर्विरोचमानं तं वसुदेव ऐक्षतेति श्लोकद्विकान्वयः । पुंस्यादिः पूर्वपौरस्त्येत्यमरः ॥ ११ ॥

सुमनोरञ्जनी — महार्हाणि अनर्घ्याणि वैडूर्यमयानि, किरीटं कुण्डले च किरीटकुण्डलानि । तेषां त्विषा कान्त्या । परिष्वक्ता मिलिता सहस्रसङ्ख्याः कुन्तला अलका यस्य तम् । उद्दामैः उत्कृष्टैः काञ्च्यङ्गदकङ्कणादिभिः । काञ्ची मेखला अङ्गदे बाहुभूषणे, कङ्कणानि करभूषणानि आदीनि येषां तैः । विराजमानं भ्राजमानमित्यर्थः ॥ ११ ॥

स विस्मयोत्फुल्लविलोचनो हरिं सुतं विलोक्यानकदुन्दुभिस्तदा ।
कृष्णावतारोत्सवसम्भ्रमोऽस्पृशन्मुदा द्विजेभ्योऽयुतमाप्लुतो गवाम् ॥ १२ ॥

सत्यधर्मीया — विस्मयोत्फुल्ले लोचने यस्य सः । हरिं सुतं विलोक्य । कृष्णावतारोत्सवसम्भ्रमः कृष्णस्यावतारजनितो योऽयमुत्सवस्तत्र सम्भ्रम आदरो यस्य सः । स आनकदुन्दुभिस्तदा आप्लुतः । स्नात इत्यनुक्त्वोक्त्वाऽऽप्लुत इति जलोत्प्लवनं सम्प्रदायायातमिति ध्वनयति । मुदा गवामयुतं द्विजेभ्योऽस्पृशन्मनसा ददौ । स्पर्शनो मारुते स्पर्शदानयोः स्पर्शनं मतमिति विश्वः । मुदा आप्लुत इति वा । कृष्णायां भूमौ योऽवतारस्तन्निमित्तो य उत्सवस्तत्र सम्भ्रमो यस्य स इत्यपि व्याकुर्वते । एतेनाधुनाऽजातकर्माऽपि न जातं, कथं जातस्य कृष्णेति नामेति पराकृतेति वदन्तो यत्कृष्णं तदन्नस्य रक्तोऽग्निरुदकं शुक्लं कृष्णैव पृथिवी स्वत इत्यादेर्हरिमितीरणतदवतारेत्येतावता पूर्तेः कृष्णेत्यवक्तव्यमिति युक्तिमुपन्यस्यातुतुषन्निति ज्ञेयम् । सुरभीणामसुरभीतितस्तदानीं दानासम्भवाद्गवामयुतमुद्दिश्य गवां सङ्कल्पवचसां प्रातिस्विकेनायुतमस्पृशद्ददावित्यन्वयनेन मनसेत्यध्याहार इति वदन्ति ॥ १२ ॥

सुमनोरञ्जनी — तदा विस्मयेन आश्चर्येण उत्फुल्ले विकसिते लोचने यस्यासौ तथोक्तः । स आनकदुन्दुभिः वसुदेवः । सुतं हरिं विलोक्य विज्ञाय । मुदा सन्तोषेणाप्लुतो व्याप्तः आप्लुतः स्नातश्च । द्विजेभ्य गवामयुतं अस्पृशत् दास्य इति मनसा सङ्कल्पितवान् ॥ १२ ॥

अथैनमस्तौदवधार्य पूरुषं परं नताङ्गः कृतधीः कृताञ्जलिः ।
स्वरोचिषा भारत सूतिकागृहं विरोचयन्तं गतभीः प्रभाववित् ॥ १३ ॥

सत्यधर्मीया — अथ पूः दानवभाररूपं पूरणं पुरा रुड् वा यस्य तम् । पूः पूजने समाख्याता पूरण इति विश्वः । तदवताराय कृतावतार इति भूभारभूतभूपकोपो विहित इति भावः । नताङ्गो

नतान्यङ्गान्यष्टौ येन, यस्य स वा नताङ्गः । कृतधीः शिक्षितप्रेक्षः । कृताञ्जलिः । स्वरोचिषा सूतिकागृहं विरोचयन्तं परं श्रीहरिमवधार्य परं पूरुषं परमपूरुषमवधार्य वा निश्चित्यैवं भगवन्तमवधारणकर्मीभूततयोपात्तं पुनः स्तुतिकर्मत्वेनाप्युपादानात् । इदमोऽन्वादेशे द्वितीया टौस्स्वेन इति एनादेशः । गता भीर्भीतिर्यस्य स सन्नस्तौत्तुष्टाव । ननु हिंसककंसकंसकिङ्कराणामसतां सतां कथं स्तवनावसरो गतभीतिश्चायमित्यत आह ॥ प्रभावविदिति । आगताश्चेदवगत्य हन्यादेव देवो न समयोऽयं चेत्तान्मोहयेदिति तत्सामर्थ्यं वेत्तीति स तथा । तर्हि साकल्येनास्तौत्किमित्यतोऽप्याह ॥ प्रभाविति । प्रभौ भगवद्विषयेऽविदज्ञ एव । अथाथाप्यस्तौदिति व्याचक्षते । गतभीःप्रभावविदिति पदमेकं वा । गता प्राप्ता वातादीनां भीर्यस्मात्स गतभीः । भीषाऽस्माद्वात इत्यादेः । गतभीरिति प्रभावो माहात्म्यं तं वेत्तीति स तथेति च विवृण्वन्ति । तन्निकाशे का शङ्केति भावः ॥ १३ ॥

सुमनोरञ्जनी — अथ कृतधीः शिक्षितबुद्धिः वसुदेवः एनं शिशुं परं पूरुषं अवधार्य निश्चित्य । नतं नम्रं अङ्गं यस्य । साष्टाङ्गं प्रणम्येति यावत् । कृताञ्जलिः सन् यतः प्रभावं माहात्म्यं वेत्तीति तथा । अतो गतभीरस्तौदिति योजना । १३ ॥

वसुदेव उवाच -

विदितोऽसि भवान् साक्षात् पुरुषः प्रकृतेः परः ।
केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक् ॥ १४ ॥

सत्यधर्मीया — प्रभावविदित्युक्तज्ञत्वं सर्वज्ञं प्रति सम्बोध्य किञ्चिद्दर्शयति ॥ विदित इति । प्रकृतेः परो विलक्षणः पुरुषः । नाविष्टरूपादिरित्याह ॥ साक्षादिति । मुख्यतया केवलौ जडामिश्रौ, अनुभवो ज्ञानं चानन्दस्तावेव स्वरूपं यस्य स । बुद्ध्यत इति बुद्धिः । सर्वा चासौ बुद्धिः पदार्थस्तं पश्यतीति स तथा । यद्वा बुद्धं बुद्धिर्भावे क्तस्तदस्ति यस्य तत् सर्वं च तद्बुद्धिं च ज्ञानविषयो जगत्तत्पश्यतीति । सर्वबुद्धिदृगिति सर्वजीवद्रष्टा । बुद्धिर्जीव इति प्रोक्त इति तात्पर्यान्तरादिति वा । भवान्विदितोऽसि । त्वमग्रे प्रथमो मातरिश्वन इति ऋग्भाष्ये त्वं विष्णो प्रथमो मातरिश्वन आविर्बभूवास्य सुबोधवत्त्वादिति कथमुक्तमित्यर्थादाशङ्क्य टीकायां युष्मद्युपपदेऽपि त्वं देव शक्त्यामित्यादौ प्रथमपुरुषो दृष्ट इत्युक्तेरत्र भवच्छब्दयोगेऽप्यत एव भागवतान्मध्यमपुरुषो ज्ञेयः । व्यत्ययस्तद्विवरणकृद्भिः स्वातन्त्र्यार्थ इत्युक्तोऽत्रापि मद्वेदनदानत्वमेव स्वतन्त्र इति स्वातन्त्र्यद्योतक इति भवान्विदितोऽसीत्युपपद्यते । तन्नियमप्रच्यावनं न कार्यं चेत् । (१) भा दीप्तौ (२) भा ज्ञाने (३) भा आधारभावे (४) भ औदार्ये (५) भ सन्धाने (६) भ उपादने (७) भ निकटभावे (८) भ सेव्यत्वे (९) भ ऊरीकरणे (१०) भ सन्तभावे (११) भा नानाभावे (१२) भ वैलक्षण्ये

(१३) भ आधिक्ये (१४) भ स्वातन्त्र्ये (१५) भ आनन्दे (१६) भ सन्ततवचने (१७) भ पूज्यभावे (१८) भ विस्तारे (१९) भ विनाशने (२०) भ स्वामिभावे (२१) भ विनिश्चललाभे भावे (२२) भ उग्रभावे (२३) भ उद्गाने (२४) भ सम्मोहने (२५) भ सञ्चारे (२६) भ विदारणे (२७) भ आलोचने (२८) भ सुन्दरभावे । श्रीमदुडुपी श्रीकृष्णपादपद्माराधकहृषीकेशश्रीमच्चरणैः श्रीमध्वराजमुखकमलाच्छ्रुत्वा लिखितमेतद्धातुव्याख्यानमिति तत्सम्प्रदायाभिज्ञोक्तमुखाच्छ्रुत्वा कृतेयं लेखेति एतदन्यतमो योग्यो भोऽस्यास्तीति भवानिति वा त्वं विदितोऽसीत्यन्वयः ॥ १४ ॥

सुमनोरञ्जनी — भवान् त्वम् । साक्षात् प्रत्यक्षतः विदितोऽसि । मयेति शेषः । किमिति । पुरुषः पूर्णषड्गुण इति । तदपि कथम् । प्रकृतेः जडप्रकृतेः परः विलक्षणः । प्रकृतेश्चेतनप्रकृतेर्महालक्ष्म्याः परः उत्तमो लक्ष्मीपतिरेवेति विदितोऽसीति वा । केवलो जडामिश्रः स चासौ अनुभवानंदस्वरूपः चिदानन्ददेहवान् । सर्वेषां बुद्धिदृशौ परोक्षापरोक्षज्ञाने ज्ञानविज्ञाने वा यस्मात्सः ॥ १४ ॥

स एव स्वप्रकृत्येदं सृष्ट्वाऽग्रे त्रिगुणात्मकम् ।
तदनु त्वं ह्यप्रविष्टः प्रविष्टः इव भाव्यसे ॥ १५ ॥

तात्पर्यम् – 'बहिश्च विद्यमानत्वादप्रविष्टो जगद्धरिः । प्रविष्टवच्च तत्रैव पूर्णरूपत्वतो विभुः । अप्रवेशः प्रवेशश्च·प्रविष्टोपमता तथा । बहिरन्तर्गतस्य स्यादित्याहुः शब्दवेदिन' इति च ॥ १५ ॥

सत्यधर्मीया — स एव स्वप्रकृत्येदमिति श्लोके प्रविष्ट इवेत्यनेन प्रवेशोऽवास्तविक इति प्रतीयते । सा च तत्सृष्ट्वा तदेवानुप्राविशत् । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इत्यादिमानावमानितेत्यतः प्रमाणेनैव तत्तात्पर्यमाह ॥ बहिरिति । हरिर्बहिश्च बहिरपि विद्यमानत्वाज्जगतोऽप्रविष्ट इत्युच्यते । विभुः पूर्णरूपत्वतस्तत्र जगति प्रविष्टवत्प्रविष्ट इव तत्कृतलेपाभावादिवेत्युक्तिः । अणुत्वस्यैव घनत्वस्यैवासत्त्वपरं वाऽणोरणीयान्महतो महीयानित्यादेः । इममेव विशदयति ॥ अप्रवेश इति । अप्रवेशः प्रवेशश्च प्रविष्टोपमता तथा । बहिरन्तर्गतस्यास्य हरेः स्यादिति शब्दवेदिन आहुरिति च ब्रह्मतर्क इति शेषः । एष म आत्माऽन्तर्हृदये ज्यायान् व्रीहेर्वेत्यादिना हृदयान्तर्गतस्य रूपस्य पूर्णत्वमुक्त्वा तस्यैवैष म आत्माऽन्तर्हृदये ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायानिति छान्दोग्योपनिषदाद्युक्तेः ॥ ततश्चायं श्लोकार्थः ॥ यो मया विदितः स एव सः सारत्वात्स इति प्रोक्त इत्यादेः साररूप इति वा । सः साधकतापन्न इति वा । स कोपे वारणे सस्ये

तथा शूलिनि साधक सति विश्वः । स्वप्रकृत्या स्वाधीनप्रकृतिमुपादानीकृत्याग्रे जगत्सृष्ट्वा । अवान्तरकारणमाह ॥ त्रिगुणात्मकमिति । अनु सर्जनमनुसृत्य तज्जगदेवाप्रविष्टो बहिष्ठरूपेणाप्रविष्टोऽन्तर्गतरूपेण प्रविष्टः । इवेन तत्कृतदुर्दशाशून्यतामाह । भाव्यसे विभाव्यसे । हीति ब्रह्मतर्कप्रसिद्धिद्योतकः ॥ १५ ॥

सुमनोरञ्जनी — तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुतिं मनसि निधायाह ॥ स एवेति । स्वप्रकृत्या स्वेच्छया स्वाधीनया प्रकृत्या उपादानीभूतया । त्रिगुणात्मकं गुणत्रयपरिणामम् । इदं प्रत्यक्षसिद्धं जगत् अग्रे प्रथमं सृष्ट्वा । तदनु तदनन्तरम् । प्रविष्ट इव भाव्यसे ज्ञायसे । वस्तुतोऽप्रविष्टत्वात् प्रविष्ट इवेति । कुतः । यतो अप्रविष्टः बहिरपि विद्यमानः व्याप्तत्वेनान्तरपि पूर्णत्वात् प्रविष्ट इव प्रदृश्यस इति भावः । तदुक्तं

बहिश्च विद्यमानत्वादप्रविष्टो जगद्धरिः ।
प्रविष्टवच्च तत्रैव पूर्णरूपत्वतो विभुः ।
अप्रवेशः प्रवेशश्च प्रविष्टोपमता तथा ।
बहिरंतर्गतस्य स्यादित्याहुः शब्दवेदिनः ॥ इति चेति ।

हरिः । जगत् प्रथमा सप्तम्यर्थे जगति अप्रविष्ट इत्युच्यते । कुतः । बहिश्च बहिरपि विद्यमानत्वात् । अप्रविष्टो हि बहिर्विद्यते । तत्रैव जगत्येव प्रविष्टं वस्तु यथा पूर्णरूपं तत्रैव पर्याप्तरूपं तथा पूर्णरूपत्वत एव निमित्तात् । न तु देवदत्तादिवत् बहिस्त्यागेन प्रवेशात्प्रविष्ट इत्युच्यत इति शेषः । अप्रवेशः प्रवेशश्च तथा प्रविष्टोपमता चेत्येतत्सर्वं बहिरन्तर्गतस्यान्तर्बहिर्व्याप्तस्य युज्यत एवेति शब्दवेदिनः शब्दार्थतत्वज्ञानिनः आहुरिति तात्पर्यार्थो द्रष्टव्यः ॥ १५ ॥

य एतेऽविकृता भावाः सप्त ते विकृतैः सह ।
नानावीर्याः पृथग्भूता विराजं शयनं तव ॥ १६ ॥

सन्निपत्य समुत्पाद्य दृश्यन्तेऽनुगता इव ।
प्रागेव विद्यमानत्वान्न तेषामिह सम्भवः ॥ १७ ॥

तात्पर्यम् – 'महदादिस्त्वविकृत ईषद्विकृतरूपत' इति च ॥ अनुगता इव प्रविष्टा इव । पूर्वोक्तवद्बहिरपि विद्यमानत्वात् । अन्तश्च देवतानामविभक्तशक्तित्वात्पूर्वोत्पन्नत्वात्तत्त्वानामण्डप्रवेशमात्रम् । व्यक्तिविशेषादुत्पत्तिरित्युपचर्यते । अण्डजो ब्रह्मेत्यादि । 'महद्रूपादिना ब्रह्मा देवाश्चैव प्रजज्ञिरे । अण्डे त्वेषामभिव्यक्तिर्जनिरित्यभिधीयत' इति च ॥ १६,१७ ॥

सत्यधर्मीया — य एतेऽविकृता भावा इति श्लोकेऽविकृता अपरिणताः सप्त भावा द्रव्याद्यभावावसानाः पदार्था विकृतैः स्वस्वकार्यैः समेता ब्रह्माण्डं विराजमनुगता इव दृश्यन्त इति वैशेषिककल्पनास्पदसप्तपदार्थानां ब्रह्माण्डप्रविष्टोपमताऽत्रोच्यत इत्यपरथाप्रतिपत्त्यापत्त्यै भावाः सप्तेत्यस्य यथावदर्थं प्रदर्शयन्मानमुपन्यस्य तेनैव तेषामविकृतत्वं चैवमित्यावेदयति ॥ महदादिरिति । अहङ्कारतत्त्वं शब्दादयः पञ्चतन्मात्राश्चादिपदार्थः । अविकृतो महदादीनां साक्षादुपादानस्य प्रकृतेर्नित्यत्वादेषां सूक्ष्मरूपं च नित्यकमित्यादेरीषद्विकृतरूपतोऽसंसृष्टत्वाद्रूपभेदेनाविकृतत्व-तदुपमत्वानि ज्ञेयानि । सन्निपत्य समुत्पद्येत्युत्तरश्लोकेऽनुगता इवेति विराजं ब्रह्माण्डमनुसृत्य गच्छन्तीति भाति । तन्निरासाय तदनूद्य व्याचष्टे ॥ अनुगता इवेति । तस्यार्थः प्रविष्टा इवेति । महदादिष्वपि प्रविष्टत्वाप्रविष्टत्वं भागवते पक्ष इवोपपादनीयमित्याशयवान्सङ्कुच्योक्तां स्मारयति ॥ पूर्वोक्तवदिति । ब्रह्माण्डान्तस्तद्बहिश्च विद्यमानत्वात्तत्त्रिकं ज्ञेयम् । प्रागेव विद्यमानत्वादि-त्यादिनाऽत्रत्येन वाक्येन महदादीनामुत्पत्तिराहित्यमुच्यते । तच्चानित्यं द्विविधं मतम् ।

असंसृष्टं च संसृष्टमसंसृष्टं महानहम् ।
बुद्धिर्मनः खानि दश मात्राभूतानि पञ्च च ।
संसृष्टमण्डं तद्गं च समस्तं सम्प्रकीर्तितम् ।
पूर्वं पूर्वं कारणं स्यात्प्रकृत्यंशैश्च संयुतम् ।
महदादिषु तत्त्वेषु त्वण्डाद्यं तात्त्विकं स्मृतम् ।

सूक्ष्माणि महदादीनि स्थूलान्यण्डादिकानि च । स इदं सर्वमसृजत ॥ ॐ प्रतिज्ञाहानि-रव्यतिरेकाच्छब्देभ्यः । ॐ यावद्विकारं तु विभागो लोकवत् । इत्यादिवियदधिकरणसुधा ।

ससर्ज भगवानादौ त्रीन् गुणान्प्रकृतेः परः ।
महत्तत्त्वं ततो विष्णुः सृष्टावान्ब्रह्मणस्तनुम् ।
महत्तत्त्वादहङ्कारं ससर्ज शिवविग्रहम् ।

दैवान्देहान् मनः खानि खं च सत्त्रिविधात्ततः । इत्यादिविरुद्धत्वान्नोपपद्यत इत्यतो मानमनु-मतार्थतया समीकरोति ॥ देवतानामिति । इत्यादीत्यस्येत्यादावित्यर्थः । महदादीनां तत्त्वानां प्रवेशमात्रं देवतानामभिमानः । अण्डजो ब्रह्मेत्यादौ जनिधात्वर्थीभूतोत्पत्तिरुपचर्यते । प्रवेशादि-रूपगौणार्थपरेत्यर्थः । कुतो न सा मुख्योत्पत्तिरिति तिरस्करोति ॥ पूर्वोत्पन्नत्वादिति । अण्डात्पूर्वमुत्पन्नत्वात् । तदसिद्धिं परिहरति ॥ विभक्तशक्तित्वादिति । तारतम्येन विभागो ह्यल्पशक्तिः स्यादित्यादेः शक्तिमत्त्वादित्यर्थः । तथा हि बृहदारण्यकभाष्योदाहृतहरिवंशे ।

विष्णुवायुगिरीशेन्द्रदेवविप्राः क्रमात्सदा ।
सामर्थ्यतो विहीनास्तु गुणैः सर्वैस्तथैव च ।
हीनो विष्णुर्न कस्यापि सर्वतश्चोत्तमोत्तमः ।। इति ।

नन्वस्तु वरो विभक्तिशक्तित्वे पूर्वमुत्पन्नत्वं तु कुत इति चेन्न । ॐ विपर्ययेण तु क्रमोऽत उपपद्यत इति सूत्रभाष्ये ।

पूर्वे पूर्वे यतो विष्णोः सन्निधानं क्रमाधिकम् ।
सामर्थ्याधिक्यमेतेषां पश्चादेव लयस्तथा ।। इत्यादेः ।

बाह्यसृष्टिर्मुख्या त्वमुख्याऽण्डान्तःसृष्टिः । यथोक्तम् । चराचरव्यपाश्रयस्तु स्यादिति सूत्रभाष्ये

परादव्यक्तमुत्पन्नमव्यक्तात्तु महांस्तथा ।
एवं बाह्या परा सृष्टिरन्तस्तव्यक्त्यपेक्षया ।। इति ।

को वा गुणः सम औपराक्यां वृतावित्यत आह ।। व्यक्तिविशेषादिति । घटादीनामिवोत्पत्त्यनन्तरं व्यक्तिविशेषस्तथा तद्गुणव्यक्तिकृत्सदृशव्यक्तिकृद्युक्तत्वाद्गौणी ज्ञेया । मानमप्युक्तार्थ आह ।। महद्रूपेति । महद्रूपं महत्तत्त्वरूपं तदेवादिर्यस्याहंरूपादेस्तन्महद्रूपादि तेन ब्रह्मदेवा ब्रह्मादयो देवाः । अण्डे त्वित्युक्त्येयं जनिस्तद्बहिरिति द्योत्यते । तथा च तस्यामुख्यत्वमपि ज्ञापितं ज्ञेयम् । अण्डे तदन्तर्जनिर्या श्रुता साऽभिव्यक्तिरभिधीयते गौणीवृत्या ।। ततश्चायं श्लोकद्विकार्थः ।। सृष्ट्वाऽग्र इत्यग्रे कथितसृष्टिप्रकारमीरयति ।। य इति । य एते सप्त अविकृता भावा महदहङ्कारपञ्चतन्मात्राः पदार्थास्ते विकृतैर्विकारमाप्तैः पृथिव्यादिभिः सन्निपत्यान्योन्यं मिलित्वा विराजं ब्रह्माण्डं समुत्पाद्यानुगताः प्रविष्टा दृश्यन्ते बहिरपि सत्त्वात् । तद्भावस्वरूपं निरूपयति ।। पृथग्भूता इति । विश्लिष्टाः । नानावीर्यास्तत्तत्पदार्थशक्तीनां बाहुविध्यान्नानावीर्या इत्युक्तिः । तत्तदन्तर्गतानां विभक्तशक्तित्वादिति शेषः । तव शयनीयस्थानं तस्मात्त्वमेव मेलक इति भावः । उत्पत्तिस्तूपचारत इत्याह । इह ब्रह्माण्डान्तः प्रागण्डसृष्टेः पूर्वं विद्यमानत्वात्तेषां सम्भव उत्पत्तिर्मुख्या न हि । किन्तु व्यक्तिविशेषेण प्रवेशमात्रम् । प्रकृतिविकृतत्वातिरिक्तविकृतत्वाभावादविकृततैषां ज्ञेयेति ।। १६,१७ ।।

सुमनोरञ्जनी — सृष्ट्वेत्युक्तसृष्टिप्रकारमुपप्रादयति ।। य एत इति । य एते सप्त अविकृताः ईषद्विकृताः । महदादि स्वविकृत इति तात्पर्योक्तेः । भावाः पदार्थाः ते पृथग्भूताः एतन्नियमनं त्वया कार्यमिति विभक्तशक्ति भिमन्यमानाः । (अल्पस्वे निस्व.... इति व्यवहारवदिति भावः ।) अत एव नानावीर्याः नानाकार्यप्रवर्तकाः । विकृतैः एकादशेन्द्रियपञ्च लीभूतैः पृथिव्यादिभिर्वा सह

सन्निपत्य संयोगं प्राप्य तव शयनं शयनमिव शयनं आश्रयमिति यावत् । विराजं ब्रह्माण्डं उत्पाद्य तत्र अनुगता इव प्रविष्टा इव दृश्यन्ते । बहिरपि आवरणतया विद्यमानत्वात् । तदुक्तम् । अनुगता इव प्रविष्टा इव । पूर्वोक्तवद्बहिरपि विद्यमानत्वादिति । इह ब्रह्माण्डान्तः तेषां महदाद्यभिमानिनां ब्रह्मादीनां संभव उत्पत्तिर्न । कुतः, तदभिमन्यमानतत्वानां प्रागेव विद्यमानत्वात् लब्धजन्मत्वात् । विद्द लाभे तदैवोत्पत्तिस्तेषाम् । न ह्यभिमानिनमन्तराऽभिमन्यमानावस्थानं संभवतीति भावः । तदुक्तम् । अन्तश्च देवतानां विभक्तशक्तित्वात्पूर्वोत्पन्नत्वात्तत्त्वानामण्डे प्रवेशमात्रं व्यक्तिविशेषादुत्पत्तिरित्युपचर्यते । अण्डजो ब्रह्मेत्यादि । महद्रूपादिना ब्रह्मा देवाश्चापि प्रज्ञज्ञिरे । अण्डे त्वेषामभिव्यक्तिर्जनिरित्यभिधीयत इति चेति । व्यक्तिविशेषेण अण्डे अन्तः प्रवेशमात्रमेव महदादिदेवानां न तूत्पत्तिः । कुतः । तदभिमन्यमानतत्वानां पूर्वं ब्रह्माण्डोत्पत्तेः पूर्वमेवोत्पन्नत्वात् । नन्वथाप्यभिमानविशेषोत्पत्तिरेवैषामुत्पत्तिरस्तु इत्यत उक्तम् ॥ विभक्तशक्तित्वादिति । पूर्वमेव हरिणा विभक्ता 'इदं तत्वं त्वया नियम्यमिति व्यवस्थापिता शक्तिः नियमनशक्तिर्येषान्ते तथोक्ताः ॥ श्रीहरिणा यदा व्यवस्था कृता तदैव तेषामभिमानस्योत्पन्नत्वान्नेदानीमेव स इति भावः । अविभक्तेति पाठे अन्तश्च अन्तरेव विभक्तशक्तित्वाभावादित्यर्थः । पूर्वमेव विभक्तशक्तित्वादिति तात्पर्यम् । तर्हि अण्डजो ब्रह्मेत्यादौ उत्पत्तिवचनं कथं युज्यत इत्यत उक्तम् । अण्डजो ब्रह्मेत्यादि । यदुत्पत्तिः उत्पत्तिवचनं तत् इति पूर्वोक्तव्यक्तिविशेषमात्रमभिप्रेत्योपचर्यते । तत्र प्रमाणमाह । महद्रूपादिनेति । महद्रूपेण ब्रह्मा, आदिपदोपात्ताहंकारादिरूपेण रुद्रादिदेवाः प्रजज्ञिरे अण्डाद्बहिः । अण्डे तु एषामभिव्यक्तिरेव जनिरित्यभिधीयत इत्याचार्यवचनयोजना ॥ १६,१७ ॥

एवं भवान् बुद्ध्यनुमेयलक्षणो ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः ।
अनावृतत्वाद् बहिरन्तरं न ते सर्वस्य सर्वात्मन आत्मवस्तुनः ॥ १८ ॥

तात्पर्यम् – ग्राह्यगुणविषयबुध्यनुमेयलक्षणः । ग्राह्यगुणेष्वस्वातन्त्र्यात्तज्ज्ञापकोऽ- न्योऽस्तीति ज्ञायते । 'ज्ञाताऽपि सर्वभावानां ज्ञायते ज्ञानलिङ्गतः । जिघृक्षोर्ग्रहणाभावादस्वातन्त्र्यप्रतीतितः । सर्वत्राव्यवधानेन द्रष्टृत्वात्सर्ववस्तुनः । आन्तरं बाह्यमित्येव विशेषो नास्ति कश्चने'ति तन्त्रभागवते । जीवस्य ग्रहणशक्तिरपि तस्येत्यपिशब्दः । एवं शरीरमुत्पाद्य ज्ञायसे । सर्वस्य सम्पूर्णस्य । 'सर्वः सम्पूर्णसामर्थ्यात्सर्वात्मा सर्वभक्षणात् । अनन्याश्रयतश्चात्मवस्तुत्वमभिधीयत' इति च । आत्मन्येव वासादात्मवस्तु ॥ १८ ॥

सत्यधर्मीया —— एवं भवान्बुध्यनुमेयलक्षण इति श्लोके गुणराहित्यं तथाऽनुमानमात्रामानकलक्षणकत्वमेकस्य पारमार्थिकताऽपारमार्थिकता चेतरस्येत्यसदर्थप्रतीतेश्च सतोऽर्थस्य

ग्राह्यैर्गुणैरित्यस्यान्वयनप्रकारं प्रदर्श्य बुध्यनुमेयेत्यादेस्तात्पर्यमाह ॥ ग्राह्यगुणैरिति । सुपां सुपो भवन्तीति सप्तम्या भिसादेशः । ग्राह्यगुणेष्विति तृतीया सप्तम्यर्थ इति प्रदर्श्यार्थापयति ॥ बुध्यनुमेयलक्षणग्राह्यगुणेष्विति । तद्गुणज्ञान इति यावत् । बुध्यनुमेयं लक्षणं स्वातन्त्र्यरूपं यस्य स तथा । अस्वातन्त्र्याज्जीवस्येति शेषः । तज्ज्ञापको गुणज्ञानजनकोऽन्यो जीवविलक्षणोऽस्तीति ज्ञायते । बुध्यनुमेयलक्षणग्राह्यगुणेष्विति लापनमात्रेण नार्थ उक्तप्राय इति तदभिप्रायकं प्रमाणमुपन्यस्य भागवतमप्यवगतां नयति ॥ ज्ञातेति । सर्वस्य स्वेतरस्य ज्ञाताऽपि भगवान्ज्ञानलिङ्गतो जीवजातजातज्ञानलिङ्गेन मेयते तज्ज्ञानप्रेरकतया ज्ञायत इत्युच्यते । चेतनमात्रस्य सम्भवति ज्ञानम् । तत्रास्वातन्त्र्यं कुतो जीवस्येत्यत आह ॥ जिघृक्षोरिति । ग्रहीतुमिच्छावतः । स्वभावजिज्ञासोरिति यावत् । स्वत एव ज्ञानाभावादन्योऽभ्युपेयः । कुतस्तन्नेत्यत आह ॥ अस्वातन्त्र्यप्रतीतित इति । अस्वातन्त्र्येणैव प्रतीतिमत्त्वाज्ज्ञास्यामीतीच्छति । न जायते तदित्यस्वातन्त्र्यप्रतीतेरित्यपि योजयन्ति । अनेन सन्नपि तद्गुणाग्रह इति विवृतम् । अनावृतत्वादिति विवृणोति ॥ सर्वत्रेति । सर्वत्राव्यवधानेन लिङ्गाद्यनपेक्षतया द्रष्टृत्वात् । सर्ववस्तु भगवांस्तस्य सर्वस्मिन्वसतीति वसतेस्तुन्प्रत्ययः । सर्वाच्छादकत्वात्सर्वशक्तत्वाद्वा सर्ववस्तु शक्तं वस्त्विति तात्पर्यान्तरात् । सर्ववस्तुनः सर्वपदार्थस्येति वा । तस्याव्यवधानद्रष्टृताहेतुमाह ॥ आन्तरमिति । यद्विशेषकृतं व्यवधानं स नास्तीत्यर्थः । अपेरर्थमाह ॥ जीवस्येति । इत्यपिशब्द इत्यर्थद्योतकोऽपिशब्द इत्यर्थः । प्राक् कस्याप्यर्थस्यानुक्तत्वादेवमित्यतिदेशः कथमिति तत्राह ॥ एवमिति । ब्रह्माण्डोत्पत्तिप्रकारस्योक्तत्वादेवं शरीरमुत्पाद्य ज्ञायत इत्यध्याहार्यं मूल इति सूचितम् । सर्वस्य सर्वात्मन इत्यनयोरर्थविशेषं स्वयमेकं व्याख्यायोभयार्थसङ्ग्राहकं मानमाह । सर्वस्य पूर्णस्य । सर्वात्मा सर्वभक्षणात् । आङ्पूर्वाददेः कर्तरि मन्प्रत्यये तस्य चर्त्वे आत्मेति ज्ञेयम् । आत्मवस्तुन इत्यस्यार्थमाह ॥ अनन्याश्रयतश्चेति । कथमिदमात्मवस्तुपदाल्लब्धमित्यतः स्वयमाह ॥ आत्मन्येवेति । ततश्चायं श्लोकार्थः । यथा तत्त्वानां तदभिमतानां चाचेतनत्वेन विभक्तशक्तित्वेन च तदन्यो मेलयितृत्वेन सम्प्रतिपन्नस्तथा भवाञ्छरीरमुत्पाद्य सन्सर्वदा ग्राह्यैर्गुणैस्तेषु विषयेषु बुध्यनुमेयं लक्षणं स्वातन्त्र्यादिकं यस्य स तच्छरीरादिभेदेन ज्ञायते । तद्गुणानामग्रहो ज्ञानाभावो जीवस्येति शेषः । अस्वातान्त्र्यात्तद्गुणानामाग्रहः सम्यग्ग्रहणं ते सकाशादेव । ममापि कुत इदमित्यत इव इत्याह ॥ अनावृतत्वादप्रकृत्यावृतत्वादिति । अबहिरन्तरमिति नास्ति । सर्वस्य सम्पूर्णसामर्थ्यात्पूर्णस्य व्याप्ततया पूर्णस्येति वा । सर्वं समाप्नोषि ततोऽसि सर्व इत्यादेः । सर्वात्मनः सर्वभक्षकात्सर्वस्वामिनो वा । आत्मवस्तुन आत्मन्येव वसतीति स तथा । स्वे महिम्नीत्यादेः ॥ १८ ॥

सुमनोरञ्जनी — एवं ब्रह्माण्डोत्पत्तिक्रमेण शरीरमुत्पाद्य भवान् । स्वतन्त्रत्वेन ज्ञायत इति शेषः । कथमिति तत्राह ॥ बुद्धीत्यादिना । भवान् सन् ज्ञाता सर्वज्ञोऽपि । गत्यर्थस्य सदे रूपमेतत् । ग्राह्यैः इन्द्रियग्राह्यैः गुणैः रूपादिभिर्जन्या या बुद्धिः रूपादिविषयिणी बुद्धिरित्यर्थः । विषयस्य प्रत्यक्षं प्रति हेतुत्वात् । तयाऽनुमेयं लक्षणं स्वरूपं स्वातन्त्र्यादिलक्षणं वा यस्य स तादृशोऽस्ति । चक्षुरादिभिः रूपादिज्ञानं तावज्जायते । तच्चक्षुरादिनियामकेन स्वतन्त्रपुरुषेण विना अनुपपद्यमानं तं गमयति । तादृशश्च स्वातन्त्र्येण नियन्ता त्वमेवेत्येवंप्रकारेणान्यथानुपपत्त्या ज्ञेय इति भावः । ननु जीव एव किं न स्यात्तज्ज्ञाननियामक इति तत्राह ॥ तद्गुणेति ॥ जिघृक्षुरिति शेषः । जिघृक्षुः ज्ञानेच्छावान् जीवः तद्गुणाग्रहः । तद्गुणानां रूपादीनां न विद्यते ग्रहो यस्य सः । ज्ञातुमिच्छोरपि जीवस्यास्वातन्त्र्याद्रूपादिज्ञानं तदिच्छया न जायत इत्यनुभवसिद्धमिति भावः । न केवलमेतावत् । जीवस्था या ग्रहणशक्तिः सापि त्वदीयेति समुच्चायकोऽपिशब्दः । तदुक्तमाचार्यैः । ग्राह्यगुणविषयबुध्यनुमेयलक्षणः ग्राह्यगुणेऽस्वातन्त्र्यात् ज्ञापकोऽन्योऽस्तीति ज्ञायते । 'ज्ञातापि सर्वभावानां ज्ञायते ज्ञानलिङ्गतः । जिघृक्षोर्ग्रहणाभावादस्वातन्त्र्यप्रतीतितः' इति । ग्राह्यगुण-विषयबुध्द्येत्यनेन ग्राह्यैर्गुणैर्जन्या या बुद्धिस्तदनुमेयलक्षण इति योजना प्रदर्शिता । ग्राह्यगुणेति अनुमानप्रकारप्रदर्शनम् । ग्राह्यगुणेषु रूपादिषु तद्ग्रहणादिति यावत् । जीवस्यास्वातन्त्र्यात् अन्यः जीवातिरिक्तः ज्ञानकरणचक्षुरादिः स्वातन्त्र्येण नियामकोऽस्ति स एवेश्वर इति । सन्नित्यस्यार्थो ज्ञातापीति । जिघृक्षोः ज्ञातुमिच्छावतः । जीवस्येति शेषः । ग्रहणाभावान्निमित्ता-दस्वातन्त्र्यप्रतीतेरित्यर्थः । सत्यामपि ज्ञानेच्छायां ज्ञानाभावदर्शनान्न ज्ञाने स्वातन्त्र्यं जीवस्येति भाव इति तात्पर्यार्थोऽवसेयः । त इदं बहिरिदमन्तरमिति विशेषो नास्ति । कुतः । अनावृतत्वात् । आवरणं व्यवधानं तद्रहितत्वात् । अव्यवधानेन सर्वस्य द्रष्टृत्वादिति यावत् । तत्र हेतुः सर्वस्येति । पूर्णस्येत्यर्थः । सर्वमत्तीति सर्वात्मा तस्य । आत्मन्येव वसतीत्यात्मवस्तु । अनन्याश्रय इत्यर्थः । तदुक्तम् ।

सर्वत्राव्यवधानेन द्रष्टृत्वात्सर्ववस्तुनः ।
आन्तरं बाह्यमित्येवं विशेषो नास्ति कश्चन ॥

इति तन्त्रभागवते । जीवस्य ग्रहणशक्तिरपि तस्येत्यपिशब्दः । एवं शरीरमुत्पाद्य ज्ञायते । सर्वस्य पूर्णस्य ।

सर्वः संपूर्णसामर्थ्यात्सर्वात्मा सर्वभक्षणात् ।
अनन्याश्रयतश्चात्मवस्तुत्वमभिधीयते ॥ इति चेति ।

अपिशब्दैवंशब्दयोः स्फुटमर्थाप्रतीतेर्व्याख्याति ॥ जीवेति । तस्य हरेः । एवं ब्रह्माण्डमिव । मूले शरीरमुत्पाद्य ज्ञायत इति शेषोक्तिरिति ज्ञेयम् ॥ १८ ॥

यदात्मनो दृश्यगुणेषु सन्निधेर्व्यवस्यसेऽस्वव्यतिरेकतोऽबुधैः ।
विनाऽनुवादं न च तन्मनीषितं सम्यग् वचो व्यक्तमुपादत्पुमान् ॥ १९ ॥

तात्पर्यम् – परमात्मनोऽपि शरीरे सन्निधानादेवाबुधैरस्वव्यतिरेकतो ज्ञायसे । यथानुकूलवादं वेदवचनं विना प्रवर्तमानं न तन्मनीषितम् । सम्यक् । 'अभी३दमेकमेको अस्मि निष्पाळभीद्वा किमु त्रयः करन्ति । खलेन पर्षान्प्रतिहन्मि भूरि किं मा निन्दन्ति शत्रवोऽनिन्द्रा' इति जीवेशयोर्भेदे व्यक्तं वचः परः पुमानुपाददे । 'प्रविष्टत्वाच्छरीरेषु जीव एवेति दुर्धियः । मन्यन्ते परमात्मानं न तन्मतमनुव्रजेत् । वेदवादविरोधित्वादनुयाता तमो विशेत् । यतः पर्यङ्कशयन आह विष्णुः सनातनः । इदं जगत्सर्वमथेदृशानि भूरीणि वा मामभियान्ति सङ्ख्ये । धान्यानि यद्वत्खलगानि मर्त्याः सञ्चूर्णयिष्याम्यहमेक एवे'ति ब्रह्माण्डे । चेति फलतोऽपि तमो यान्तीति । 'ऐकात्म्यज्ञानतो यान्ति तमो भेदात्परं पदम् । स्वातन्त्र्यपारतन्त्र्यादिज्ञानं भेददृशिर्भवेदि'ति ब्रह्मवैवर्ते ॥ १९ ॥

सत्यधर्मीया — यदात्मनो दृश्यगुणेष्विति श्लोके स्वव्यतिरेकतोऽबुधैर्व्यवस्यसे । द्वासुपर्णेत्यादिकमनुवादमात्रं न भेदविधायकमतो भेदमतं मनीषिमनीषितं नेत्यन्यथापत्तिमन्यथयति ॥ परमात्मनोऽपीति । परमात्मन इति व्यस्तं समस्तं च । आत्मनो जीवस्य परमात्मनो हरेरपि । आत्मनः सर्वस्वामिनः शरीरे सन्निधानात् । जीवपक्षे कर्मणा । इतरत्रेच्छया । अबुधैरन्यथाज्ञानिभिरव्यतिरेकतोऽभेदेन ज्ञायते । ज्ञायत इति स्वारस्यादात्मनोऽपि स्वस्यापि सन्निधानात् । त्वमव्यतिरेकतोऽबुधैः परं यथा स्यात्तथा ज्ञायत इत्यन्वयो वा । अव्यतिरेकतो मननमेतद्रूपमिति निरूपयति ॥ यथेति । यथानुकूलमनुकूलार्थमुपक्रमाद्यानुकूल्येनार्थं व्यवस्थापयत् यद्वेदवचनं तद्विना प्रवर्तनात्तदभेदमतं न सम्यङ्मनीषितम् । वैपरीत्यशङ्कामपाकुर्वन्मूले सम्यग्वचःशब्दसङ्ग्राह्यं वाक्यमुदाहृत्य भागवतं समीकरोति ॥ अभी इदमिति । इति जीवभेदे व्यक्तं स्पष्टार्थं परः पुमान्पर्यङ्कशायी विष्णुर्वच उपाददे भेदसाधकतयोपाददे । प्रमाणं स्वोक्तार्थदार्ढ्यायाह ॥ प्रविष्टत्वादिति । मननहेतुः प्रविष्टत्वं तन्मतं नानुव्रजेच्छुभेच्छुः । तत्कुत इत्यत आह ॥ दुर्धिय इति । बहुवचनेन च तथाकथका एवासुरा बहुला यस्मादित्यादेर्बहव इति सूचयति ।

अत्र वेदवादः परमार्थवादो धर्तव्यस्तद्विरुद्धत्वात् । यद्वा वेदवाद इति तत्पातनिकार्थवान् वेद इति विरुद्धस्तत्त्वात् । तामेवं मन्त्रूननुयाताननुगच्छन्यः स तमो विशेत् । अत एतद्धेतोः पर्यङ्कशयनो

सनातनो विष्णुराह । किमित्यत आह ॥ इदं जगदिति । इदं सर्वं जगत्सङ्ख्ये युद्धार्थमेकमायाति चेत् । मा मां प्रति भूरीणि द्वे त्रीणि वाऽथेद्दशानि वाऽभियान्ति तानि मर्त्यः खलगानि धान्यानि यद्वत्सञ्चूर्णयत्यहमेक एव चूर्णयिष्यामि । वाशब्दस्तमो विशेदित्युक्तमोरूपफलाप्तिसमुच्चायक इति व्याचष्टे ॥ वेतीति । फलतः फलं तमो यान्तीति । एतदर्थकमित्यर्थः ॥ ततश्चायमभी इदमित्यृगर्थः । यदीदं जगदेकं मा मां प्रति सङ्ख्ये युद्धार्थमायाति तर्ह्यहमेक एव निःषाट् नितरां सहमानः सन्नभियोद्धाऽस्मि द्वां द्वे जगती अभ्यायातश्चेदपि प्रतियोद्धाऽस्मि । त्रयः पञ्च किं करन्ति किं कुर्वन्ति प्रत्युताहमेव मर्त्यः खले न इव धान्यानि प्रतिहन्ति तथा पुरुषान्निष्ठुरान्प्रतिहन्ति भूरीणि जगन्ति प्रतिहन्मि संहरामि तमसि पातयामि चेत्यर्थः । अथ च दैत्यहतिस्तमसि चिरेत्यादेः । ते तर्हि त्वद्धतावशिष्टा निन्दयेयुरित्यत आह ॥ किमिति । मा किं निन्दन्ति शत्रवः । निन्दनं च विद्यमानदोषाविष्कारस्त एव न सन्ति मयीति किं निन्दन्तीत्युक्तिः । मन्निन्दने न समर्थास्त इत्याह ॥ शत्रवोऽनिन्द्रा इति । अनिन्द्रा दरिद्रा इत्यप्यर्थः । करन्तीति व्यत्ययेन करवद्धस्तवदाचरन्ति । हस्तौ यथा स्वाधीनौ तद्वद्वर्तन्त इत्यर्थविशेषद्योतनिको भवतीति भावमाविष्कुर्वन्ति । बुभूषुणा जीवेशभेदबोध एव सम्पाद्यो नाभेदबोध इति तत्फललपनानि दर्शयन्मानमुदाहरति ॥ ऐकात्म्यज्ञानत इति ।

ऐकात्म्यं नाम यदिदं केचिद्ब्रूयुरनैपुणाः ।
याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः ॥

इत्यादेः । भेदांत्तज्ज्ञानतः परं पदम् । नान्यः पन्था अयनाय विद्यत इत्यादेः । किमाकारं भेदज्ञानमित्यत आह ॥ स्वातन्त्र्येति । स्वतन्त्रो हरिरितरदस्वतन्त्रमित्यादिज्ञानं भेददृशिर्भवेत् ॥ ततश्चायं श्लोकार्थः ॥ ज्ञानलिङ्गतः स्वतन्त्रो ज्ञायस इत्युक्तम् । तत्राज्ञानिज्ञानिनां मननमेवंरूपमित्याह ॥ यदात्मन इति । आत्मनो जीवस्यात्मनस्तव च । दृश्या गुणा विषया यैस्तेषु देहेन्द्रियादिषु । सन्निधेः प्रवेशात् । अबुधैरन्यथामतिभिरस्वव्यतिरेकतः स्वेभ्यो व्यतिरेकः स्वभेदः स नेत्यस्वव्यतिरेकोऽभेदस्तेन व्यवस्यसे तथा ज्ञायस इति तत्तस्य व्यवसायस्यानुवादं वेदवचनं यथानुकूलं विनाऽतिहाय प्रवर्तनात्तन्मनीषितम् । सम्यगित्युभयान्वयि । सम्यक् न । न तत्त्वमसीत्यादेर्वेदस्य सत्त्वात्कथमिदं न सम्यङ्मनीषितमित्यत आह ॥ सम्यग्वच इति । पुमान्पुरुषः पर्यङ्कशयनो व्यक्तं स्पष्टार्थं सम्यग्वचः । स आत्मा तत्त्वमसीत्याद्यर्थकतां घटयन्निरवकाशमिति यावत् । तादृग्वाक्यमभी इदमित्यादिकमुपाददुपादत्ताहेति यावत् । न च द्वासुपर्णा सयुजेत्यजजीवभेदसाधके सति माने ते कथमतथा कथयन्तीत्यतो वाऽऽह ॥ विनानुवादमिति । अनुवादं पातनिकार्थं वेदमुखवादं विना तच्च मनीषितं समवन्न भवतीत्यव्यतिरेकतो व्यवस्यसे । अतः सम्यग्वचः

पुमान्व्यक्तमुपाददत्स्वीकृतवानित्यन्वयः । बुधैर्दृश्यगुणेषु सन्निधेर्जडाजडेषु कृत्रिमाकृत्रिमसन्निधानाद्धेतोः स्वव्यतिरेकतः स्वभेदेन व्यवस्यसे । तदभेदनिश्चयनमनुवादमुक्तरूपं विना मनीषितं न च । तर्हि किंरूपं तन्मनीषितं वच इत्यत आह ॥ पुमान् व्यक्तं सम्यग्वच उपाददादित्यपि भेदात्परं पदमिति तात्पर्यानुयाय्यन्वयो ज्ञेयः । अन्यथामतियथावन्मतीनां फलमप्याह । अबुधैरव्यक्तं सप्रकाशं नेत्यव्यक्तं तमो मनीषितमुपाददद्यद्वच ऐकात्म्यज्ञानतो यान्ति तम इत्यादिकं पुमानुपाददत्प्राप्यं तदित्यर्थः । व्यक्तं पक्ष्युपलक्षितदुर्जनं तु स बद्धुमिति विभरक्तं तम इति । पक्षिभिर्विक्षिताङ्गानित्यादेरिति वा । स्वव्यतिरेकतः स्वश्च हरिश्च स्वश्चाहं च स्वौ व्यतिरत्यधिकश्च करोद्यमश्च तौ च तौ च स्वव्यतिरेकौ । व्यतीङ्रवीविपदिति विवृतौ विशेषत्वात्तदेव ताः स्मृता इत्युक्तेर्व्यतिर्विशेषतोऽधिकः । रेको विवेके शङ्कायां रेकः स्यादधमेऽपि च । रेको नीचे चेति विश्वः । भावप्रधानं चेदम् । स्वव्यतित्वं स्वरेकत्वं बुधैर्जानद्भिर्व्यक्तम् । निरञ्जनः परमं साम्यमुपैतीत्यादेः । व्यक्तम् । भावे क्तः । विगतमक्तमञ्जनं यत्र तन्मोक्षस्थानं भेदज्ञानफलत्वेन वदद्भेदवचनं पुमानुपाददिति । स्वातन्त्र्यपारतन्त्र्यादिज्ञानं भेददृशिर्भिर्विदिति तात्पर्यमक्षरानुगुणं विवृतं ज्ञेयम् । पर्यङ्कशयन इत्युक्त्या रमया सह शयनसमये तां प्रति भगवतेदमीरितमिति न सा प्रातार्यासमयैश्चैकान्तिक इति विश्वसनीयतां ध्वनयति । तथा चोक्तं पर्यङ्कोपासनायाम् । पर्यङ्कफलपुष्पादिविविधानन्तरूपकैः । पूजयन्ती जगन्नाथमित्यादि । आह देवो रमोत्सङ्गविलसत्पादपल्लव इति विवरणे प्रसन्नता द्योत्यत इत्युक्तेरत्रापि सा ज्ञेया । श्रीर्यत्र रूपिण्युरुगाय पादयोः करोति मानं बहुधा विभूतिभिरित्यादेः पर्यङ्कपदेन रमाग्रहणं युक्तमिति ज्ञेयम् । पर्यङ्कः पल्यङ्कः शेषस्तत्र शयनं यस्य सः । तस्य च विकर्णत्वादाकर्णयितुरितरस्य प्रतार्यस्याभावात्स्वयमेव मननकृदिति तदानीन्तनं वचनं नाविश्वसनीयमिति ध्वनिमुत्प्रेक्षयन्ति ॥१९॥

सुमनोरञ्जनी — ननु जीवव्यतिरिक्तेश्वराभावात्कथं जीवस्यास्वातन्त्र्यं ईशस्य स्वातन्त्र्यं चोच्यत इत्यत आह ॥ यदेति । परमात्मनः परमात्मनोऽपि तवादृश्यगुणेषु शरीरेन्द्रियादिषु सन्निधेः प्रवेशान्निमित्तात् । अबुधैः अज्ञानिभिः । अस्वव्यतिरेकतः । स्वस्माद्व्यतिरेको भेदः तदभावोऽस्वव्यतिरेकः स्वाभेद इत्यर्थः । ततः । तृतीयार्थे तसिः । विशेषणे तृतीया । तद्विशिष्टतयेति यावत् । ज्ञायस इति यत् यन्मतं तत् । अनु अनुकूलं वादं वेदवचनं विना प्रवृत्तम् अप्रामाणिकवत् यस्मात्तस्मान्न मनीषितं नाङ्गीकारयोग्यम् । विद्वद्भिरिति शेषः । कुतः । यतः पुमान् परमपुरुषो विष्णुः । व्यक्तं स्पष्टं असंशायकमिति यावत् । सम्यक् निर्दुष्टं वेदवचः । अभीऽदमेक इत्यादिरूपम् । जीवेशभेदविषये उपाददत् स्वीचक्रे । आहेत्यर्थः । तदुक्तम् । परमात्मनोऽपि शरीरे सन्निधानादबुधैरस्वव्यतिरेकतो ज्ञायते । यथानुवादं वेदवचनं विना प्रवृत्तत्वान्न तन्मनीषितं सम्यक् ।

'अभी३दमेक मेको अस्मि निःषा(लृ)भी द्वा किमु त्रयः करन्ति । खले न पर्षान्प्रतिहन्मि भूरि किं मा निन्दन्ति शत्रवोऽनिन्द्रा' इति जीवेशभेदे व्यक्तं हि वचः परः पुमानुपादत्ते ।

प्रविष्टत्वाच्छरीरेषु जीव एवेति दुर्धियः ।
मन्यन्ते परमात्मानं न तन्मतमनुव्रजेत् ॥

वेदवादविरोधित्वादनुयाता तमो विशेत् ।
यतः पर्यंकशयन आह विष्णुः सनातनः ॥

इदं जगत्सर्वमथेदृशानि भूरीणि वा मामभियान्तु सङ्ख्ये ।
धान्यानि यद्वत् खलृगानि मर्त्यः संचूर्णयिष्याम्यहमेक एव ॥ इति ब्रह्माण्डे ।

चेतिं फलतोऽपि तमो यान्तीति ।

ऐकात्म्यज्ञानतो यान्ति तमो भेदात्परं पदम् ।
स्वातन्त्र्यपारतन्त्र्यादिज्ञानं भेददृशिर्भवेत् ॥ इति ब्रह्मतर्के ।

इति परमात्मनोऽपीत्यादिना योजना प्रदर्शिता । किं तत्सम्यग्वच इत्यतस्तामुदाहरति ॥ अभी३इति । अस्यार्थः । यदि एकं इदं जगत् । मा माम् । अभि अभिमुखम् । याति योद्धुं इत्यर्थः । तर्हि अहमेक एव निःषाट् अस्मि । नितरां सहत इति निःषाट् योद्धेत्यर्थः । यदि च द्वा द्वौ अभियातस्तदापि अहमेको निःषालृस्मि । यदि च त्रयः प्रपञ्चा अभियाताः तदा किमु करन्ति करिष्यन्ति । न किमपि । त्वां निघ्नन्तीति चेदत्राह । मर्त्यः पर्षान् धान्यानि । खले न खले इव । भूरि भूरीणि । जगन्ति । प्रतिहन्मि चूर्णयिष्यामि । एतादृङ्महिमानं मा माम् । अनिन्द्राः असमर्थाः शत्रवः । किं निन्दन्ति । निर्दोषे मयि निन्दाकारणदोषाभावादिति । अत्र अप्रतिहतापरिमित-शक्त्युक्त्या अल्पशक्तेर्जीवाद्भेद एव प्रतिपादितः । सम्यगिति वच इत्यनेनान्वेति । एवं स्ववचनेन व्याख्याय स्वोक्तार्थे संवादमाह ॥ प्रविष्टत्वादिति । न चेत्यत्र मूले चशब्दतात्पर्यमाह ॥ अनुयातेति । अनेन चोऽप्यर्थे । न केवलं तन्मतमनङ्गीकार्यम् । अनुयाता तमोऽपि यातीत्यर्थः सूचितः । पर्यङ्के शेषपर्यङ्के शयनं यस्य सः । इदं जगत्सर्वमिति स्वोदाहृतश्रुतेरर्थानुवादकम् । यद्वदित्यनेन खलेनेत्यत्र नञः सादृश्यार्थतोक्ता भवति । खले न खले इवेति । चेतिशब्दः फलतः फलरूपं तमो यान्तीत्यर्थद्योतक इत्यर्थः । तत्र प्रमाणमाह । भेदात् भेदज्ञानात् । परं पदं मोक्षम् । न हि वैशेषिकानामपि मोक्षः स्यादित्यतो विवक्षितार्थमाह ॥ स्वातन्त्र्येति । ईशजीवयोरिति शेषः ॥१९॥

त्वत्तोऽस्य जन्मस्थितिसंयमान् विभो वदन्त्यनीहादगुणादविक्रियात् ।
त्वयीश्वरे ब्रह्मणि नो विरुध्यते तदाश्रयत्वादुपचर्यसे गुणैः ॥ २० ॥

तात्पर्यम् – 'अनीहोऽक्लिष्टकारित्वात्तथाऽविकृत एव सन् । सर्वं करोति तद्युक्तमैश्वर्यात्पूर्णशक्तित' इति ब्राह्मे । अगुणश्चेत्कथं गुणैः सृष्ट्यादिकृदिति तदाश्रयत्वात् । 'अगुणोऽगुणदेहत्वात्सगुणो गुणधारणात् । ऐश्वर्यादिगुणत्वाद्वा वासुदेव इतीर्यत' इत्याग्नेये ॥ २० ॥

सत्यधर्मीया — त्वत्तोऽस्येति श्लोकेऽनीहादचेष्टादिति शिलातुलता प्रतीयते । विवक्षितोऽर्थो न च प्रतीयते इत्यतः प्रमाणेनैव तत्तात्पर्यार्थमाह ॥ अनीह इति । अक्लिष्टमक्लेशकारित्वात्तथाऽविकृत एव सन्सर्वं करोषि । तदक्लेशेन करणमविकृततया करणं चेत्येतद्युक्तम् । लोके केनापि नालोकीत्यसम्भावितमिदमिति तत्राह ॥ ऐश्वर्यात्पूर्णशक्तित इति । वैभवाद्गुणात् । गुणैरुपचर्यस इति प्रतीयते तदाह अगुणश्चेत्कथं गुणैः सृष्ट्यादिकृदितीति । तदनन्तरमत आहेति शेषः ॥ तदाश्रयत्वादिति । सत्त्वादिविकृतताशून्यस्तदाधारत्वात्सत्त्वादिगुणवानित्युपचारेणोच्यते । स्वोक्तार्थे मानमाह ॥ अगुणादेहत्वादिति । अगुणा गुणा देहहीनत्वादिहोपचर्यत इति स्मरणादतदुचितत्वाद्वाऽगुणा इत्युच्यते । गुणधारणात्सगुणाश्चर्यते ऐश्वर्यादिगुणत्वाद्वा वासुदेवः सगुण इतीर्यते । आग्नेये अग्निकलिभ्यां ठग्वक्तव्ये ठकि ईयन्नादेशः ॥ ततश्चायं श्लोकार्थः ॥ अगुणात्सत्त्वादिगुणरहितात्तथाऽविक्रियान्न विद्यते विक्रिया यस्मिन्स तस्मादनीहादीहा क्लेशपूर्विका चेष्टा सा न यस्मिंस्तस्मात्त्वत्तोऽस्य प्रपञ्चस्य जन्मस्थितिसंयमान्वदन्ति । कर्ता विगुण इति विप्रतिषिद्धमित्यत आह ॥ विभो इति । त्वयीश्वरे ईश्वरत्वाद्ब्रह्मणि पूर्णत्वादिति हेतू । ऐश्वर्यात्पूर्णशक्तित इति मानानुयानात्ततो नो विरुध्यते । गुणाधारत्वात्सृष्टिरुपपन्नेत्याह ॥ तदाश्रयत्वात् गुणाधारत्वादिति । तैर्गुणैर्निमित्तैरुपचर्यसे गुणीति गीयसे । केवलो निर्गुणश्चेति श्रुतेः । मुख्यं सागुण्यं नास्ति किमीश्वर इत्यप्युत्तरयति ॥ तदाश्रयत्वादिति । विशेषमहिम्ना तदाश्रयत्वम् । हे उप शर्वप वा । चर्यसे ज्ञायसे गुणात्पूर्णत्वेन वा । अभेदे तृतीया । गुणैस्तदभेदेन च चर्यस इति वा । ॥ २० ॥

सुमनोरञ्जनी — पूर्वोक्तं जगत्कारणत्वं नोपादानत्वरूपं किंतु कर्तृत्वरूपं तदपि लोकविलक्षणमेवेत्याह ॥ त्वत्त इति । हे विभो! अस्य पूर्वोक्तप्रपञ्चस्य त्वत्तः त्वत्सकाशात् । जन्मस्थिति,संयमः संहारः,तान् वदन्ति विद्वांसः । किं कुलालो घटस्येव कर्ता भवानिति नेत्याह ॥ अनीहादिति । श्रमजनकचेष्टारहितादित्यर्थः । तर्हि मृत्पिण्डवद्विकारित्वं स्यादित्यत उक्तम् ॥ अविक्रियात् इति । न विद्यते विक्रिया विकारो यस्य तस्मात् । तत्र हेतुः अगुणादिति । गुणत्रयकृतो

हि विकारः । गुणाभावादविकृत इति भावः । नन्विदं विरुद्धम् । कर्तृत्वं श्रमाद्यभाव अगुणत्वं चेत्यादिकम् । लोके कुलालादेस्तथा दर्शनादित्यत आह ॥ त्वयीति । हेतुगर्भं विशेषणद्वयम् । ईश्वरे अघटितघटनाशक्तियुक्ते ब्रह्मणि पूर्णशक्त्यादिमति त्वयि कर्तृत्वानीहत्वादिकं लोकवन्नो विरुध्यते । लोके हि अल्पशक्तेः कुलालादेरशक्यकार्यकरणे श्रमादिकम् । अनीश्वरत्वादस्वातन्त्र्यात्सत्वादि-गुणबद्धत्वम् । तव तु पूर्णशक्तित्वात्स्वातन्त्र्याच्च स्रष्टुरपि न श्रमादिकमिति भावः । नन्वगुणश्चेत्कथं गुणैः सृष्ट्यादिकृदिति व्यपदेश इति चेत्तत्राह ॥ तदाश्रयत्वादिति । तेषां गुणानामाश्रयत्वात् बुद्धिपूर्वमुपादानतया स्वीकारात् । गुणैः सृष्ट्यादिकृदिति उपचर्यसे व्यवह्रीयसे जनैः न तु गुणबद्धत्वादिति योजना । एतदेवोक्तम् ।

अनीहोऽक्लिष्टकारित्वात्तथाऽविकृत एव सन् ।
सर्वं करोति तद्युक्तमैश्वर्यात्पूर्णशक्तितः ॥ इति ब्राह्मे ।

अगुणश्चेत्कथं गुणैः सृष्ट्यादिकृदिति । तदाश्रयत्वादिति ।

अगुणोऽगुणदेहत्वात्सगुणो गुणधारणात् ।
ऐश्वर्यादिगुणित्वाद्वा वासुदेव इतीर्यते ॥ इत्याग्नेय इति ।

अक्लिष्टकारित्वात् । अक्लिष्टः क्लेशरहितः सन्नेव कारी कर्ता तत्त्वात् । अविकृत एव सर्वं करोतीति अविक्रियादित्यस्य तात्पर्यकथनम् । यद्वा अविकृतः श्रमादिविकारशून्यः सन्निति वा । कथमेतद्युज्यते लोके तथाऽदर्शनादित्यतः त्वयीश्वर इत्यादिकं योजयति ॥ तद्युक्तमिति । तत् सर्वकर्तृत्वमनीहत्वादिकं च युक्तं न विरुद्धं भगवति । तत्र हेतुरैश्वर्यात्पूर्णशक्तित इति । अनेनेश्वरे ब्रह्मणीत्यनयोर्हेतुगर्भता सूचिता । तदाश्रयत्वादिति मूलमवतारयति ॥ अगुणश्चेदिति । इतीत्यनन्तरं अत आहेति शेषः । अगुणदेहत्वात् सत्वादिगुणात्मकदेहरहितत्वान्निमित्तात् अगुण उच्यते । गुणधारणात् । गुणानां सत्वादिगुणानां धारणात् उपादानतया स्वेच्छयैव स्वीकारात् ॥ गुणैः सृष्ट्यादिकृदिति । व्यपदेश इति शेषः । प्रकारान्तरेण व्यपदेशस्य गतिमाह ॥ ऐश्वर्यादीति । गुणैः ऐश्वर्यादिभिर्युक्तः सृष्ट्यादिकृत् । न तु सत्त्वादिबद्ध इति गतिरुक्ता भवति । वासुदेव इति- एवं प्रकारेण ईर्यत इति आचार्यवचसो योजना द्रष्टव्या ॥२०॥

सत्त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः ।
सर्गाय रक्तं रजसोपबृहितं कृष्णं च वर्णं तमसा जनात्यये ॥ २१ ॥

तात्पर्यम् – 'जगतां वर्धयन्सत्वं यदा रक्षति केशवः । हयग्रीवादिरूपेण शुक्लवर्णस्तदा विभुः । वर्धयंस्तु रजो येन जगदुत्पादयेद्धरिः । तद्रक्तं जामदग्न्यादिरूपं येन विनाशयेत् । वर्धयंस्तु तमो

लोके तत्कृष्णं यादवादिकम् । सर्वत्र सर्वं कुरुते विशेषस्तत्र कीर्तितः । ज्ञानदानादिना रक्षा महतां सम्प्रकीर्तिता । रागदानेन महतां सृष्टिः सृष्टिरुदीर्यते । असतां तु मनोवृद्धिं कुर्वन्पातयते यदा । सतां विवर्धनार्थाय कृष्णरूपी तदा हरिः । ज्ञानाद्युत्पत्तिकृच्चापि रूपं रक्तं विभोः स्मृतम् । तमोविनाशकमपि कृष्णं विष्णोरुदाहृतम् । आचार्यादिषु रागार्थे शुद्धसत्वात्मकं रजः । यतो व्यपेक्षितं नाशे तमसोऽपि ततः परम् । तमो द्वेषात्मकं शुद्धं सत्वात्मकमुदीर्यते । एवं सृतिगतानां तु रागाद्या न गुणोद्भवाः । शुद्धज्ञानात्मकाः सर्वे मुक्तानां नात्र संशयः । सर्वत्र सर्वकृच्चापि हयग्रीवादिरूपकः । ज्ञानादिरक्षको विष्णुर्जामदग्न्यादिरूपवान् । ज्ञानाद्युत्पादको नित्यं कृष्णादि-दोषनाशकः । एकरूपोऽपि भगवान्बहुरूप इवेयते । अचिन्त्यैश्वर्यरूपत्वात्पूर्णानन्दैकरूपक' इति ब्रह्मतर्के । 'स्वेच्छया तु गुणान्विष्णुर्नामरूपान्करोत्यजः । गुणानामाश्रयत्वात्तु भवेत्स गुणबृंहित' इति तन्त्रभागवते ॥ २१ ॥

सत्यधर्मीया — सत्त्वं त्रिलोकेति श्लोके स्वमायया लोकस्थितये सत्त्वं प्राकृतगुण-माश्रित्यात्मनस्तत्कार्यं शुक्लवर्णं बिभर्षीति । एवमुत्तरत्रापि प्राकृतगुणजन्यं रक्तिमानं कृष्णं च बिभर्षीति प्रतीयते । तच्च पूर्वपद्योक्तगुणाविक्रियत्वादिबाधितमित्यतः प्रमाणेन तदर्थमाह ॥ जगतामिति । विभुः सत्त्वं विवर्धयन् जगतां जगन्ति रक्षति यदा हयग्रीवादिरूपेण साक्षाद्धय-ग्रीवविष्ण्वादिरूपेण । विष्णुं शशिवर्णं चतुर्भुजं प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तय इत्यादेः । शुक्लवर्णो भवति । तथा येन रूपेण रजो वर्धयन् हरिर्जगदुत्पादयेत्तज्जामदग्न्यादि रक्तम् । आदिपदेन सर्वजनकचतुर्मुखान्तर्गतं च ग्राह्यम् । एवं यादवादिकमित्यत्रादिपदेन रुद्रान्तर्गतं च रूपं ग्राह्यम् । येन रूपेण तमो वर्धयन् जगद्विनाशयेत्तद्यादवादिकं प्रस्तुतं कृष्णं तद्वर्णम् । तर्हि भगवद्रूपेषु निरूपितो विशेष इति भेद आपन्न इत्यत आह ॥ सर्वत्रेति । सर्वत्र देशे काले । तथा सर्वरूपेषु सर्वं कार्यं रक्षणक्षपणसर्जनादिकं कुरुते । तथाऽपि विशेषस्तत्र कीर्तितो लोकमवलोक्य । ननु विष्ण्वादिः पालकतया सम्प्रतिपन्नो न सम्प्रति सम्प्रतिपन्न उक्तहयग्रीवादिरित्यत एवंरूपं पालकत्वादिकं तत्रास्तीत्याह ॥ ज्ञानदानादिनेति । महतामधिकारिणां ज्ञानदानादिना रक्षा तद्रूपिणी रक्षेत्यर्थः । रागदानेन सृष्टिर्या सा सृष्टिरित्युदीर्यते । कृष्णादिरूपी सद्विवर्धनायासतां तमोवृद्धिं कुर्वन् असतां तान् यदा पातयेदन्धन्तमः प्रापयेत्तदाऽवृद्धिं नाशं कुर्वन् वृद्धिं छेदनं कुर्वन्नाशक उच्यते ।

सर्वत्र सर्वमित्युक्तं तत्सङ्क्रामणप्रकारं निरूपयति ॥ ज्ञानाद्युत्पत्तिकृदिति । ज्ञानाद्युत्पत्तिकृद्धयग्रीवादिरूपं यच्छुक्लं तद्रक्तमपि स्मृतम् । तथा कृष्णं कृष्णादिकं शुक्लं रक्तं चोदाहृतम् । हयग्रीवादिकं ग्लानिदं चोदाहृतम् । रज आदिशब्दानां प्रसिद्धरजआद्यर्थकत्वभ्रमं

वारयति ॥ आचार्यादिष्विति । तमसोऽपीत्यत्रत्योऽपिः सृतिगानामपीत्यप्यन्वेति । तेन कैमुत्यं द्योत्यते। आदिपदेन सच्छिष्यो ग्राह्यः । आचार्ये रागो व्याख्यास्यामीत्यादिः । शास्त्रश्रवणं करिष्यामीति शिष्ये राग इच्छा स एवार्थस्तन्निमित्तं यद्रजः शुद्धसत्त्वात्मकमेव व्यपेक्षितम् । एवं यतस्तमसो विष्णुद्वेषादितमसो नाशे तन्निमित्तं नाशे परमन्यतमो व्यपेक्षितं तद्द्वेषात्मकं तच्छुद्धसत्त्वात्मकमुदीर्यते । प्रतिद्वेषादिकं विना द्वेषादिनाशासम्भवात्तमोनाशे परं तमोऽपेक्षितं तच्च शुद्धसत्त्वात्मकमिति भावः । तम आदिशब्दप्रयोगेण तद्भक्तादिद्वेषस्य तमोगुणकार्यत्वेन तमःसाधनत्वमपि स्फोरयतीति ज्ञेयम् । यः सृतिगतानां महतामाचार्यादीनां सच्छास्त्रविषये रागो वैष्णवद्वेषश्च शुद्धसत्त्वात्मक इत्येते रागाद्या गुणोद्भवा नो मुक्तानां किन्तु ज्ञानानन्दात्मकाः । अत्र संशयो नास्ति । तुरिति किं वक्तव्यमिति विशेषार्थः । सर्वत्र सर्वकरणमुपपाद्यैकस्मिन्ननेकवर्णादिघटकं वर्णयित्वा तद्दौर्घट्यं पराकरोति ग्रन्थकारः ॥ सर्वत्रेति । जामदग्न्यादिरूपवांश्च ज्ञानादिरक्षको हयग्रीवादिकार्यकारी । एवं सोऽपि दोषनाशककृष्णादिर्ज्ञानाद्युत्पादकः स दोषनाशकश्चैकरूपोऽप्येवं बहुरूप ईयते । अचिन्त्यैश्वर्यपूर्णत्वात्पूर्णानन्दैकरूपक इति । अचिन्त्यैश्वर्येणैकरूप्यं बाहुरुप्यं च घटत इति भावः । मायारजआदिपदार्थान् मानेनाह ॥ स्वेच्छयेति । अजो विष्णुः स्वेच्छया गुणान्नानारूपान्नाना विलक्षणानि रूपाणि येषां ते तान्गुणान्करोति । गुणानां सत्त्वादीनामाश्रयत्वादा- धारत्वादेवागुणबृंहित आनन्दादिगुणस्तच्छुक्लादिकमप्यप्राकृतमिति गुणबृंहित इत्यनेनाहेति व्याकुर्वते । भक्तैर्भगवदभक्तेषु क्रियामाणः कोपादिः शुद्धसत्त्वाद्यात्मादि भगवतस्तु तदा विशुद्धज्ञानाद्यात्मा । तथा च मुक्तानां च कोपोऽपि देवस्य वरेण तुल्यः । न साधुवादो मुनिकोपभर्जिता नृपेन्द्रपुत्रा इति, सत्त्वधामनि कथं तमो रोषमयं विभाव्यत इत्यादेर्विवेको ज्ञेयः ॥ ततश्चायं श्लोकार्थः ॥ स त्वं यदा मायया स्वेच्छया त्रिलोकस्थितये तद्रक्षायै सत्त्वं वर्धयन् शुक्लवर्णं तद्वृद्धये हयग्रीवादिरूपं चात्मनो बिभर्षि । एवं सर्गाय सृष्टये रजसोपबृंहितं रक्तं जामदग्न्यब्रह्मान्तर्गतं च रक्तवर्णं बिभर्षि । जनात्यये तन्नाश आसन्ने कृष्णं वर्णं कृष्णं रुद्रान्तर्गतं च रूपं बिभर्षि खलु । सर्वमलङ्कारभूतं न तु दोषात्मकमित्यर्थः । त्रिलोकस्थितये सत्त्वं बिभर्षि तथा शुक्लमित्येव खलु नापि तु रक्तम् । सर्गाय रक्तमेव खलु न किन्तु सत्त्वं, तदेव खलु न किन्तु कृष्णं तमश्चेति सर्वत्र शक्तिसर्वस्वं ज्ञेयम् । भक्तैरभक्तेषु यत्तमः कोपादिकं तत्सत्त्वं शुद्धसत्त्वात्मकम् । भगवति तु व्युत्पादितप्रकारेण ज्ञानानन्दाद्यात्मकं मुक्तेष्वपि तथेति यथामानं ज्ञेयम् ॥ २१ ॥

सुमनोरञ्जनी — तदाश्रयत्वादित्युक्तं प्रपञ्चयति ॥ सत्वमिति । सत्वमित्यावर्तते । एकत्र स त्वमिति विभागः । सः पूर्वोक्तो ब्रह्माण्डादिस्रष्टा त्वं, त्रिलोकस्थितये त्रैलोक्यस्य ज्ञानादिदानेन रक्षणाय । स्वमायया स्वेच्छया सत्वं विवर्धयन् आत्मनः शुक्लं वर्णं रूपं बिभर्षि । हयग्रीवादिरूपेण

चन्द्रबिम्बवद्धवलवर्णोपेतेन सत्त्वगुणमुपबृंहयन् ज्ञानादिप्रदो भविष्यसीति भावः । सर्गाय सज्जनानां ज्ञानादौ रागादिजननाय आचार्यादौ भक्तिजननाय वा । रजसा रागजनकत्त्वसाम्येन रजःशब्दोऽपि सत्वगुणवाचकः । तेन उपबृंहितं तत्प्रवर्तकमिति यावत् । रक्तं रक्तवर्णोपेतं जामदग्न्यादिरूपं बिभर्षीति सम्बन्धः । जनाप्यये । जनानामसज्जनानां अप्यये नाशाय । तमसा नाशजनकत्त्वसाम्यात् तमःशब्दवाच्येन उपबृंहितं युक्तं तत्प्रवर्तकमिति यावत् । कृष्णवर्णं इन्द्रनीलवर्णं यादवादिरूपं बिभर्षीत्यर्थः ॥ तदेतदभिप्रेत्य व्याख्यातं तात्पर्यम् ।

जगतां वर्धयन् सत्वं यदा रक्षति केशवः ।
हयग्रीवादिरूपेण शुक्लवर्णस्तदा विभुः ॥
वर्धयंस्तु रजो येन जगदुत्पादयेद्धरिः ।
तद्रक्तं जामदग्यादिरूपं येन विनाशयेत् ॥
वर्धयंस्तु तमो लोके तत्कृष्णं यादवादिकम् ।
सर्वत्र सर्वं कुरुते विशेषस्तत्र कीर्तितः ॥
ज्ञानदानादिना रक्षा महतां संप्रकीर्तिता ।
रागदानेन महता सृष्टिः सृष्टिरुदीर्यते ॥
असतां तु तमोवृद्धिं कुर्वन् पातयते यदा ।
सतां विवर्धनार्थाय कृष्णरूपी तदा हरिः ॥
ज्ञानाद्युत्पत्तिकृच्चापि रूपं रक्तं विभोः स्मृतम् ।
तमोविनाशकमपि कृष्णं विष्णोरुदाहृतम् ॥
आचार्यादिषु रागार्थे शुद्धसत्वात्मकं रजः ।
यतो व्यपेक्षितं नाशे तमसोऽपि तमः परम् ॥
तमो द्वेषात्मकं शुद्धसत्वात्मकमुदीर्यते ।
एवं सृतिगतानां तु रागाद्या न गुणोद्भवाः ॥
शुद्धज्ञानात्मकाः सर्वे मुक्तानां नात्र संशयः ।
सर्वत्र सर्वकृच्चापि हयग्रीवादिरूपकः ॥
ज्ञानादिरक्षको विष्णुर्जामदग्न्यादिरूपवान् ।
ज्ञानाद्युत्पादको नित्यं कृष्णादिर्दोषनाशकः ॥
एकरूपोऽपि भगवान्बहुरूप इवेयते ।
अचिन्त्यैश्वर्यरूपत्वात् पूर्णानन्दैकरूपकः ॥ इति ब्रह्मतर्के ॥

स्वेच्छया तु गुणान् विष्णुः नानारूपान् करोत्यजः ।
गुणानामाश्रयत्वात्तु भवेत्सगुणबृंहितः ।। इति तन्त्रभागवते ।।

तस्यार्थः । सत्वं सत्वगुणं वर्धयन् । जगतां, षष्ठी द्वितीयार्थे जगन्ति । केशवो यदा रक्षति तदा विभुः हयग्रीवादिरूपेण शुक्लवर्णो भवति । अनेन वर्धयन् हयग्रीवादिरूपेणेति पदद्वयाध्याहारपूर्वकं पूर्वार्धयोजना सूचिता । रजो वर्धयन् येन रूपेण हरिर्जगदुत्पादयेत् तज्जामदग्न्यादिरूपं रक्तं रक्तवर्णोपेतम् । अत्र वर्धयन्नित्यनेन मूलोक्तोपबृंहितपदतात्पर्यार्थो वर्णितो भवति । उपबृंहितं प्रवर्तकमिति । तमोगुणं वर्धयन् येन रूपेण, जगदित्यनुवर्तते, विनाशयेत् तत्कृष्णं कृष्णवर्णोपेतं यादवादिकं विज्ञेयमिति संबन्धः । अत्र वर्धयन्नित्यनेन मूले चतुर्थपादे उपबृंहितपदस्यानुवृत्तिः सूचिता। यादवादिकमिति शेषोक्तिः । ननु सत्वं वर्धयन्नित्यादिना स्थित्यादिकर्तृत्वरूपकार्यस्य रूपविशेषेष्वेवोक्त्या रूपांतरे तदभावे अपूर्णता स्यादित्यत आह ।। सर्वत्रेति । सर्वत्र सर्वै रूपैरपि सर्वं स्थित्यादिरूपं कार्यं कुरुते भगवान् अतो नापूर्णता स्यादिति भावः । तर्हि विशिष्योक्तौ किं निमित्तमित्यत उक्तम् । विशेषस्तत्रेति । यद्यपि सर्वं सर्वत्र करोति भगवान् तथापि तत्र कार्यविशेषं रूपविशेषेणैव करोतीत्याद्युक्तौ निमित्तत्वेन विशेषः शक्तिव्यक्त्यादिरूपो विशेषः कीर्तितः ।

अभेदमपि तद्ब्रह्म बहुरूपं विशेषतः ।
करोति न करोतीति व्यवहार्यं स्वशक्तितः ।। इत्यादि शास्त्रे ।

एवं योजनां प्रदर्श्य तत्र स्थित्यादिपदतात्पर्यविषयान् तथा सत्वरजस्तमःपदतात्पर्यविषयीभूतानर्थांश्च प्रदर्शयति ।। ज्ञानेत्यादिना । महतां योग्यानां ज्ञानदानम् । आदिना तत्साधनभक्त्यादिदानं च गृह्यते । तेन या रक्षा रक्षणं सा स्थितिपदेन कीर्तिता । आचार्यादिषु ज्ञानादौ रागदानेन सृष्टिः रागादिसृष्टिः । सृष्टिः सर्गपदोक्ता । सतां विवर्धनार्थाय यदा यत्, असतां तमो तमःकार्यं मिथ्याज्ञानं वर्धयन् पातयते अन्धन्तमसीति शेषः । तदा तत् । अप्ययपदेनोच्यत इति वाक्यशेषः । इदमपि सर्वरूपेषु समानमिति प्रागुक्तमेव प्रपञ्चयति । ज्ञानाद्युत्पत्तीति । न केवलं हयग्रीवादिरूपं किन्तु रक्तं रक्तवर्णोपेतं जामदग्न्यादिरूपं च । न केवलं रागादिजनकं ज्ञानाद्युत्पत्तिकृदपि बु च विष्णोः कृष्णरूपमपि । अत्रापिशब्द आवर्तते । न केवलमसतां वर्धकमपि तु तमोविनाशकमपीति । एतावता स्थित्यादिपदार्थानभिधाय सत्वादिपदार्थानाह ।। आचार्यादिष्विति । अत्र शुद्धसत्तात्मकमेव रजः रजःपदतात्पर्यषियः । कुतः । यत आचार्यादिषु रागार्थे भक्त्यर्थं व्यपेक्षितम् । अतः भक्ते रजःकार्यत्वाभावेन रजोगुणस्यानपेक्षितत्वादिति भावः । अनेन सत्वशब्देनापि शुद्धसत्त्वं विवक्षितमिति सूचितम् । एवं तमसो नाशेऽपि अपरं नाश्यतमसो भिन्नं, तमसि यो द्वेषः तदात्मकं

तमः तमःपदप्रतिपाद्यं यत् तदपि शुद्धसत्त्वात्मकमेव ॥ तमोविनाशस्य तमःकार्यत्वाभावादिति भावः । तथा च रजस्तमःपदाभ्यामपि शुद्धसत्त्वमेव ग्राह्यमिति भावः । एवं ज्ञानरागादीनां गुणोद्भवत्वं सृष्टिगतानां तु संसारिणामेव । मुक्तानां तु रागाद्याः न गुणोद्भवाः किन्तु शुद्धज्ञानात्मकाः चित्स्वरूपज्ञानात्मकाः । पूर्वोक्तमर्थं बुध्यारोहाय निगमयति ॥ सर्वत्रेति । सर्वत्र सर्वरूपेषु सर्वकृत् सर्वकार्यकृदपि हरिः । अपिः पदार्थे । स्वेच्छयैव हयग्रीवादिरूपकः सन् ज्ञानादिना रक्षको न तु तत्र निमित्तान्तरमस्ति । कार्ये भेदः? न भगवद्रूपेषु भेदः शङ्कनीयः । कुतः । यत एकरूपोऽपि बहुरूप इव ईयते ज्ञायते । नन्वेकस्य कथं बहुरूपत्वं, अचिन्त्यैश्वर्ययोगात् । बहुरूपग्रहणे किमस्य प्रयोजनम् । पूर्णानन्दैकरूपकः सुखोद्रेकमन्तरा न प्रयोजनान्तरमस्तीति भावः । ननु स्थित्यादिकर्ता हयग्रीवादिः कुतो नानारूप इत्यतस्तत्राह ॥ स्वेच्छयेति । गुणान् अंशान् हयग्रीवादीन् नानारूपान् । शुक्लरक्तादिनानारूपवतः स्वेच्छयैव करोति न सत्त्वाद्यपेक्षयेति भावः । रजसोपबृंहितमित्येतत्प्रकारान्तरेण व्याख्याति ॥ गुणानामिति ॥ २१ ॥

त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेऽवतीर्णोऽसि ममाखिलेश्वर ।
राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमानां निहनिष्यसे चमूम् ॥ २२ ॥

तात्पर्यम् – 'सतां सुखविवृद्ध्यर्थमसतां पीडनं हरेः । यावच्चासुरदुःखं स्यात्तावद्देवसुखं भवेत् । तत्रापि तारतम्येन ब्रह्मणोऽभ्यधिकं सुखम् । यावत्क्षीणं तमस्तावत्प्रकाशस्य तु वर्धनम् । सर्वस्माच्च कलेः पीडा ब्रह्मणोऽभ्यधिकं सुखम् । तस्मात्सतां रक्षणाय सर्वकर्म हरेः स्मृतमि'ति ब्रह्मतर्के ॥ २२ ॥

सत्यधर्मीया — त्वमस्य लोकस्येति श्लोके लोकस्य रिरक्षिषुस्त्वं राजन्यसंज्ञासुरकोटि-यूथपैर्निर्व्यूह्यमानां चमूं हनिष्यस इति परस्परमसङ्गतमवनहननयोर्वैय्यधिकरण्यादित्यवतारयन्ति । अस्य लोकस्य सकाशात् । विभुर्विविधभवनवानिति विभो मम मन्मात्ररक्षणार्थं चमूं हनिष्यस इत्यन्यथाप्रतीतिं वारयितुं प्रमाणेन तं श्लोकं व्याकरोति ॥ सत्तामात्रमिति । केचित् लोकस्य सदसत्सङ्घस्य रिरक्षिषुरित्युक्त्वा पुनाराजन्यसंज्ञेत्यादिवचनं च व्याहतमित्यतः प्रमाणेन तद्विवेकं लोकपदार्थसङ्कोचनमुखेन दर्शयति ॥ सतामिति । असतां हरेर्यत्पीडनं तत्सतां सुखविवृध्यर्थम् । तत्सम्बन्धि यत्पीडनमिति हरेः सकाशात्पीडनमिति वाऽन्वयः । यावदसुरदुःखं च स्यात्तावदेव सुखं ज्ञानिनां भवेत् । तत्रापि तत्समुदायेऽपि । तावदेव सुखमिति पाठोऽसुरप्रतियोगिसमर्पक इति सुललितः । तारतम्येन ब्रह्मणः सुखमधिकं भवेत् । असदवधिकलिपीडामभिधाय सदधिकार्यवधिविधिसुखमभिधत्ते । सर्वस्मात्पीडायोग्यात्कलेः पीडाऽभ्यधिकमिति विपरिणतमन्वेति

अभ्यधिकेति । ब्रह्मणः सुखयोग्यात्सर्वस्मात्सुखमधिकम् । उपसंहरति ॥ तस्मादिति । लोकस्य सतां रक्षणाय सर्वं हरेः कर्म स्मृतम् ॥ ततश्चायं श्लोकार्थः ॥ हे विभो अखिलेश्वर । अस्य लोकस्य सज्जनस्य लुक् प्रकाशन इति धातोर्ज्ञानवतामिति वा । रिरक्षयिषुः रक्षितुमिच्छुर्मम गृहे भार्यायामवतीर्णोऽसि । किञ्च तरतमभावेन सदसत्सुखास्यै राजन्येति संज्ञा येषां ते च तेऽसुरकोटियूथपाः सेनानायकास्तैर्निर्व्यूह्यमानां समूहीकृत्यानीतां चमूं सेनां हनिष्यसे संहरिष्यसि । निर्व्यूह्य ऊहोऽगोचरो मानोऽहङ्कारो यस्याः सा तां वा । चमू भक्षणे चम्यत्यरिनिकरमिति चमूस्ताम् ॥ २२ ॥

सुमनोरञ्जनी — तमसा जनाप्यय इत्युक्तं विवृणोति ॥ त्वमिति । हे अखिलेश्वर विभो! विविधं यथा स्यात्तथा भवतीति विभुः । अस्य लोकस्य, कर्मणि षष्टी, इमं लोकं सज्जनसमुदायं रिरक्षिषुः रक्षितुमिच्छुः । मम गृहे गेहे भार्यायां वा । अवतीर्णोऽसि । अवतीर्णश्च । राजन्यसंज्ञा एव न तु वस्तुतो राजानः । तल्लक्षणाभावात् । ते च ते असुराश्च तेषां कोटियूथपैः । निर्व्यूह्यमानां नितरां व्यूह्यमानां चक्रादिव्यूहेन व्यूह्यमानामिति यावत् । नितरां रक्ष्यमाणां वा । पाण्डित्यं निर्विद्येत्यादिवदत्रापि निरो नितरामित्यर्थकत्वं संभवति ॥ चमूं सेनां हनिष्यसि । ननु सज्जनान् रिरक्षुणा कुतोऽसुरचमूहननं कृतम् । न ह्यन्यहननेनान्यस्य रक्षा लब्धेति चेदत्राहुराचार्याः ।

सतां सुखविवृध्द्यर्थमसतां पीडनं हरेः ।
यावच्चासुरदुःखं स्यात्तावद्देवसुखं भवेत् ॥
तत्रापि तारतम्येन ब्रह्मणोऽभ्यधिकं सुखम् ।
यावत्क्षीणं तमस्तावत्प्रकाशस्य तु वर्धनम् ॥
सर्वस्माच्च कलेः पीडा ब्रह्मणोऽभ्यधिकं सुखम् ।
तस्मात्सतां रक्षणाय सर्वं कर्म हरेः स्मृतम् ॥ इति ।

देवेष्वपि सुखं तारतम्येनेत्याह ॥ तत्रापीति । तारतम्यस्यावधिमाह । ब्रह्मण इति । नातः परमसुरहननजन्यं सुखमस्तीति भावः । असुरहनने देवानां सुखमित्यत्र दृष्टान्तमाह ॥ यावदिति । विरुद्धस्वभावयोस्तमःप्रकाशयोर्मध्ये तमसः क्षये प्रकाशवृद्धिवत् देवासुरयोरपि विरुद्धस्वभावयोरसुरहननेन तदीयानां दुःखे देवानां सुखाधिक्यमिति भावः । यद्वाऽसुरहननेन देवानां सुखवृद्धिवत् ज्ञानस्यापि वृद्धिरित्याह ॥ यावत्क्षीणमिति । असुराणां तमःप्रचुरत्वेन तन्नाशे तमसोऽपि क्षीणता । तमोगुणस्य क्षये सत्वगुणकार्यज्ञानस्य वृद्धिरिति भावः । अधिकं सुखं अधिकसुखसंपादिका । तस्मादुक्तनिमित्तात् । सर्वमसुरहननादिकं कर्म सतां रक्षणाय । अतः सज्जनरक्षणायासुरहननं युक्तमिति भावः ॥ २२ ॥

अयं तमस्यस्तव जन्म मे गृहे श्रुत्वाऽग्रजांस्ते न्यहनत् सुरेश्वर ।
स तेऽवतारं पुरुषैः समर्पितं श्रुत्वाऽधुनैवाभिसरत्युदायुधः ॥ २३ ॥

सत्यधर्मीया — यः प्राक् मम गृहे भार्यायां तेषां जन्मोत्पत्तिं श्रुत्वा तेऽग्रजान्कीर्तिमदादीन् न्यहनदहन्स तमस्यस्तमोगुणकार्यत्वद्भक्तद्वेषवान् । तेऽवतारं पुरुषैस्तद्भटैः समर्पितं निवेदितं श्रुत्वा । उदायुध उद्धृतायुधवानधुनैव रात्रावेवाभिसरत्यभि भयरहितं यथा भवति तथा सरतीति वा । अयं त्वसभ्य इति पाठे खल इत्यर्थः । नावित्यपि पठन्ति । आवयोर्गृहे गेह इत्यर्थः ॥ २३ ॥

सुमनोरञ्जनी — एवं स्तुत्वा कंसकृतापकृतिविज्ञापनेन तस्यापि हिंस्यतां व्यंजयन्नाह ॥ अयमिति । हे सुरेश्वर ! तमस्यः तमोगुणप्रचुरः अयं यः अस्माकं बन्धकः असौ, तव जन्म मे गृहे भार्यायां श्रुत्वा नारदमुखेन श्रुत्वा तेऽग्रजान् त्वच्छंकया अहनत् हिंसितवान् । स इदानीं पुरुषैः तद्भृत्यैः अस्मन्निग्रहाय निहितैः समर्पितं विज्ञापितं तेऽवतारं आविर्भावं श्रुत्वाऽधुनैवोदायुधः उद्यतायुधः सन् अभिसरतीति योजना ॥ २३ ॥

श्रीशुक उवाच -

अथैनमात्मजं वीक्ष्य महापुरुषलक्षणम् ।
देवकी तमुपाधावत् कंसाद् भीता शुचिस्मिता ॥ २४ ॥

सत्यधर्मीया — महापुरुषस्य भगवतो लक्षणानि यस्य तम् । देवकी मातैनमात्मजं वीक्ष्य कंसाद्भीता शुचिस्मिता प्राक् शुचि अन्तः सत्यामपि बहिः स्मिता स्मयमाना तमुपधावदस्तौत् । ॥२४॥

सुमनोरञ्जनी — कंसाद्भीताऽपि देवकी, महापुरुषस्य हरेर्लक्षणानि यस्यासौ तथोक्तम् । तं आत्मजं वीक्ष्य शुचिस्मिता सती तं कृष्णमुपाधावत् तद्गुणस्मरणपूर्वकमस्तौदिति सम्बन्धः ॥ २४ ॥

देवक्युवाच -

रूपं यत् तत् प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारम् ।
सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद् विष्णुरध्यात्मदीपम् ॥ २५ ॥

तात्पर्यम् – **'सर्वाशुभविनिर्मुक्तगुणमात्रो यतो हरिः । सत्तामात्रमतः प्राहुर्निर्विशेषोऽखिलोत्तमः । अनादरान्निरीहश्च सेहः सर्वकृती यत' इति तन्त्रभागवते ॥ यस्य तद्रूपं सत्वम् । 'सप्तसु प्रथमे'ति सूत्रात् ॥ २५ ॥**

सत्यधर्मीया — रूपं यत्तत्प्राहुरव्यक्तमाद्यमिति श्लोकेऽखण्डब्रह्मस्वरूपपरं सत्तामात्रमित्यादीनीति प्रतीतिनिरासाय निरीहादिशब्दार्थान्मानेनाह ॥ सर्वाशुभेति । यतो हरिः सर्वाणि च तान्यशुभानि च तेभ्यो विनिर्मुक्तश्चासौ गुणं नामात्रं कार्त्स्न्यं यत्र स तथा मात्रक वा तदात्मकमिति यावत् । अतः सत्तामात्रं ज्ञानिनः प्राहुः । सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते । प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यत इत्यादेस्तस्य तद्गुणानां च साधुत्वात्सच्छब्दवाच्यतेति ज्ञेयम् । अखिलोत्तमत्वान्निर्विशेष इत्युच्यते । विशिष्यत इति विशेषोऽतिशायी स नास्ति यस्मात्तम् इति व्युत्पत्तिः सूचिताऽनेनेति ज्ञेयम् । न नादरात्फलस्नेहराहित्यान्निरीह इति निरुक्त्यन्तरमिदमिति मन्तव्यम् । सर्वं कृतं कर्म चेष्टा सृष्ट्यादावस्तीति स इति सेहा चेष्टावान् । ननु यदव्यक्तं ज्योतिर्ब्रह्म स त्वमिति यच्छब्दस्य तच्छब्देनान्वयनेन न तच्छब्दो व्यर्थः । व्यर्थश्चान्वयाभावाद्रूपशब्दश्चेति द्वयोरन्वयपरमाह ॥ यस्य तद्रूपं सत्त्वमिति । यद्यस्येति व्याख्याने बीजमानमाह ॥ सप्तसु विभक्त्यर्थेषु । ततश्चात्र यदिति षष्ठ्यर्थ इत्युक्तं भवति ॥ अथ श्लोकार्थः ॥ साक्षाददिति रित्युत्तमत्वादुपनिषदुक्तगुणत्वेन देवं देवकी स्तौति ॥ रूपमिति । यद्यस्य तद्रूपमव्यक्तमित्यादिप्रकारेण प्राहुर्वेदान्ताः । प्रेण च न च पातनिकोऽर्थ एतदुक्त इति द्योतयति । बहुवचनेन च बहुसम्पत्तिरिति नाविश्वसनीयमिदमिति ध्वनयति । अव्यक्तं प्रसादमन्तरा । अव्यक्तमचलम् । तदव्यक्तमाह हीत्यादेः । आद्यमादौ भवम् । अनेनेदानीं दानवहान्यै मय्ययमवतार इति ध्वनयति । ब्रह्म बृहन्तोऽस्मिन्गुणा इत्यादेर्गुणपूर्णं ज्योतिः परं ज्योतिः । वीदं ज्योतिर्हृदय आहितं यत् । ज्योतिश्चरणाभिधानादित्यादेः । जातमोतमित्याद्यपि ज्ञेयम् । ज्योतिर्ज्ञानस्वरूपम् । गुणाः किं ब्रह्मपदोक्ताः सत्त्वादय इति नेत्याह ॥ निर्गुणमिति । केवलो निर्गुणश्चेत्यादेः । सत्त्वाद्यैर्वा स्वाभिन्नैर्वा रहितम् । निर्विकारं निर्विकारोऽक्षरः शुद्ध इत्यादेः । सत्तामात्रम् । सत्ता सद्भावः । ग्रामजनेति योगविभागात्समूहार्थे तल् । मात्रं च सर्वाशुभव्युदासकः । ततश्च सर्वाशुभविनिर्मुक्तगुणगणात्मकं गुणात्मकमिति वा सत्तामात्रम् । निर्विशेषं निर्गतो विशेषो विशिष्यतेऽतिशायी यस्मात्तदखिलोत्तमम् । न त्वत्समश्चाभ्यधिकः । एकमेवाद्वितीयमित्यादेः । निरीहमफलादरान्निरीहं नितरामीहा चेष्टा यस्य तदिति वृत्त्यन्तरं च । सेहेः सर्वकृती यत इत्यादेरनुसन्धेयम् । स इमांल्लोकानसृजत इत्यादेः । स्वयमेव ज्योतिरूपमिति नेत्याह ॥ अध्यात्मदीपमिति । आत्मानमधिकृत्य विद्यमानस्वस्वेन्द्रियादिकं दीपयति प्रकाशयतीति तत्तथा । सत्त्वं विष्णुर्णकारो बलं षकारः प्राण आत्मा स यो ह्वै तौ णकारषकारावनुसंहितमृचो वेदेत्याध्यायावसित्यैतरेयगीताभाष्याद्युक्तप्रकारेणार्थोऽवसेयः । साक्षादित्याविष्टत्वादिव्युदासः । अत्र नानाश्रुत्यादिवाक्यसङ्ग्राहकाणि विशेषणान्यव्यक्तमित्यादीनि निमित्तीकृत्य वितत्य विचारो व्योमरोमन्थायित इति बहुविस्तारहेतुरिति वा तत्र न मनः श्रमणीयमित्युपरतमिति

मन्तव्यम् । न च बृहदारण्यकभाष्य इदमिति द्वितीया षष्ठ्यर्थ इति प्रतिपत्तिलघुतामादाय दृष्टिं व्याकरणान्महाव्याकरणसूत्रं चेदं षट्सु द्वितीयेति चेति किं, न च तथोचुरिति वाच्यम् । तत्रेदमग्र इत्येव श्रुतेर्द्वितीयाकर्तुं रूपाव्यक्तादिपदानां सामानाधिकरण्य आवश्यके किल पुनः स इति तच्छब्दनैरर्थ्यप्रतीतिस्तस्यां च षष्ठ्यन्ततया विवरणं तत्र सूत्रमानीकरणं चेतीदमर्थविशेषेणैवमेव वक्तव्यत्वादिति दिक् ॥ २५ ॥

सुमनोरञ्जनी — स्तुतिप्रकारमाह ॥ रूपमिति । यत् यस्य । सप्तसु प्रथमेति सूत्रात् । तद्रूपं प्राहुः वेदान्ताः स त्वमित्यन्वयः । किं तद्रूपमिति तत्राहुरव्यक्तमित्यादि । अव्यक्तं स्वप्रसादमन्तरेणाव्यक्तस्वभावम् । यदाह सूत्रकृत् 'तदव्यक्तमाह हीति' । आद्यं आदिकालीनं आदिकारणमित्यर्थः । एतादृक् किमित्यतो नाम निर्दिशति ॥ ब्रह्मेति । देशकालाभ्यां परिच्छिन्नम् । ज्योतिः ज्ञानरूपम् । जीवः किं नेत्याह ॥ निर्गुणं सत्वादिगुणाबद्धम् । किं कारणत्वं परिणामितया? न । निर्विकारम् । कुतः । सत्तामात्रम् । सर्वाशुभविनिर्मुक्तगुणस्वरूपमत एव निर्विशेषम् । विशिष्यत इति विशेषः विशिष्ट इत्यर्थः । उत्तम इति यावत् । निर्गतो विशेषः उत्तमो यस्मात्तम् । तदुक्तम् ।

सर्वाशुभविनिर्मुक्तगुणमात्रो यतो हरिः ।
सत्तामात्रमिति प्राहुर्निर्विशेषोऽखिलोत्तमः ॥ इति ।

निरीहं सर्वत्रोदासीनम् । स्वप्रयोजनाभावात् । तदुक्तम् । अनादरान्निरीहश्च सेहः सर्वकृती यत इति । सेहः ईहया चेष्टया सहित इत्यर्थः । एतादृशं ब्रह्म किं चतुर्मुखः प्रकृतिर्वेति तत्राह ॥ विष्णुरिति । इदमेव सर्वेषां बिम्बरूपमित्याह ॥ अध्यात्मदीपम् । आत्मानं जीवमधिकृत्य वर्तमानं स्वरूपानन्दादिकं दीपयति प्रकाशयतीति अध्यात्मदीपम् । मुक्तिप्रदमिति यावत् ॥ २५ ॥

नष्टे लोके द्विपरार्धावसाने महाभूतेष्वादिभूतं गतेषु ।
व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यतेऽशेषसंज्ञः ॥ २६ ॥

तात्पर्यम् – अशेषसंज्ञः सर्वनामा ॥ २६ ॥

सत्यधर्मीया — नष्टे लोक इति श्लोके शेषसंज्ञ इति शेषतादात्म्यमुच्यत इति प्रतीयत इति स्वयमकारप्रश्लेषं कृत्वा विवृणोति ॥ अशेषसंज्ञः सर्वनामेति । केचिदेवमपि प्रदर्शितान्यथाप्रतीतेर्विना विवरणमनिवारणात् । वस्तुतस्तु शिष्यत इति शेषपदनिर्वचननैर्भर्यभ्रमेण शेषनामैकलमेव भगवत इति प्रतीयते । सा च न माहात्म्यापादिकेत्यत अकारप्रश्लेषेण व्याख्याति ॥ अशेषेति । अशेषाः संज्ञा नामानि । नामानि सर्वाणि यमाविशन्तीत्यादेर्यस्य सः ॥ ततश्चायं श्लोकार्थः ॥ द्विपरार्धावसाने

शतानन्दशतायुर्लक्षणो द्विपरार्धः कालस्तस्यावसाने लोके नष्टे । प्रतिज्ञातां नष्टिमेव विशिनष्टि ॥ भूतेष्विति । कालवेगेन कालजवेन महाभूतेषु पृथिव्यादिष्वादिभूतं महत्तत्त्वं गतेषु । व्यक्ते प्रकृतितो व्यक्ते महत्तत्त्वेऽव्यक्तं प्रकृतिं याते सति । सर्वेषां नाशेन वाच्यार्थहीनता वेदादेरित्यत आह ॥ अशेषसंज्ञोऽशेषनामा सन् भवान् शिष्यत इति । अत्यन्तसमीपवर्तिनीरमेये क इति वा ईशकोटिनिवेशाद्धोक्तिरिति व्याकुर्वते ॥ २६ ॥

सुमनोरञ्जनी — लोके नष्टे । द्विपरार्धावसाने । चतुर्मुखस्य शतवत्सराणि द्विपरार्धमुच्यते । तस्यावसाने समाप्तौ सत्याम् । कालवेगेन कालस्य संहर्तुर्भगवतो वेगेन प्रेरणाख्येन । लोके कार्यप्रपञ्चे नष्टे सति महाभूतेषु आकाशादिषु अहंकारद्वारा आदिभूतं महत्तत्वं गतेषु तत्र लीनेष्वित्यर्थः । व्यक्ते महत्तत्वे । अव्यक्तं प्रकृतिं गते सति । अशेषाः संज्ञाः यस्यासौ सर्वनामेत्यर्थः । अशेषसंज्ञः सर्वनामेत्याचार्योक्तेः । भवानेक एव शिष्यते वटपत्रशायी सन्नेक एव भवान् स्थास्यतीत्यर्थः ॥२६॥

योऽयं कालस्तस्य तेऽव्यक्तबन्धो चेष्टामाहुश्चेष्टते येन विश्वम् ।
निमेषादिर्वत्सरान्तो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये ॥ २७ ॥

तात्पर्यम् – चेष्टते अनेनेति चेष्टाः ॥ २७ ॥

सत्यधर्मीया — योऽयं काल इति श्लोके कालस्य भगवच्चेष्टारूपत्वमद्रव्यत्वात्कालस्य कथं चेष्टारूपत्वमित्यत आह ॥ चेष्टत इति । एतच्चार्थकथनपरमिति नानेन लिङ्गविपर्यासदोषः ॥ ततश्चायं श्लोकार्थः ॥ तर्हि कालस्य सकलकलनसमर्थता किमित्यत उक्तापवादमाह ॥ योऽयमिति । येन त्वया विश्वं चेष्टते तस्य ते सम्बन्धी कालो योऽयं निमेषादिर्वत्सरान्तो महीयानुक्तद्विपरार्धरूपस्तं कालं चेष्टामाहुः । हे अव्यक्तबन्धो रमापते । अव्यक्तं श्रीरुदाहृता । अव्यक्तात्पुरुषः पर इत्यादेः । तं क्षेमधाम क्षेमस्थानं नित्यक्षेममोक्षाश्रयं वा ईशानमीशनादेव चेशान इति स्मृतेः सर्वप्रेरकं प्रपद्ये ॥२७॥

सुमनोरञ्जनी — अव्यक्तं प्रधानम् । तदभिमानितया रमायाः अव्यक्तसंज्ञा तस्य बन्धो । हे लक्ष्मीपते! अव्यक्तस्य मुख्यप्राणस्य बन्धो इति पदरत्नावल्याम् । योऽयं निमेषादिः वत्सरान्तः ब्रह्मसंवत्सरपर्यन्तः महीयान् प्रवाहतोऽपरिमितः कालः सः । तस्य पूर्वोक्तमहिमोपेतस्य ते चेष्टामाहुर्ज्ञानिनः । कुतः । येन कालेन विश्वं चेष्टते प्रवर्तते । तदुक्तम् । चेष्टते अनेनेति चेष्टेति । अतः । तं कालचेष्टकम् । न केवलं कालचेष्टकम् किन्तु ईशाः ब्रह्मादिका अपि अनन्ति चेष्टंते येनासौ तथोक्तम् । एतादृशं क्षेमधाम क्षेमकरं स्थानं प्रपद्य इत्यन्वयः ॥ २७ ॥

मर्त्यो मृत्युव्यालभीतः पलायन् लोकान् सर्वान् निर्भयं नाध्यगच्छत् ।
त्वत्पादाब्जं प्राप्य यदृच्छयाऽऽद्य स्वस्थः शेते मृत्युरस्मादपैति ॥ २८ ॥

सत्यधर्मीया — तत् क्षेमधामत्वं दर्शयति ॥ मर्त्य इति । हे आद्य! यो मर्त्यो मृत्युरेव व्यालः सर्पो वा दुर्दन्ती वा तस्माद्भीतः । व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनीति विश्वः । सर्वान् लोकान्पलायन्निर्भयस्थानं नाध्यगच्छन्नालब्धः सो यदृच्छया यदृच्छा तु तदिच्छा स्यादिति त्वदिच्छया त्वत्पादाब्जं प्राप्य शेते । सति मृत्यौ कथं स्वास्थ्येनावस्थानमित्यत आह ॥ मृत्युरिति । अस्मात्त्वत्प्राप्तिमतो मृत्युरपैति । स्वस्मिन् अस्मज्ज्ञातिनाथो तिष्ठतीति स्वस्थः स सन् शेते । य इति मृत्युसर्पोपासर्पदहं पद्मोऽस्मीदं च पादाब्जमिति मृत्युं दुर्दन्त्यपागादस्मादिति प्रेक्षावन्त उत्प्रेक्षयन्ति । एकनाम्नोः सदा प्रीतिरित्याम्नानात् ॥ २८ ॥

सुमनोरञ्जनी — क्षेमधामत्वं दर्शयति ॥ मर्त्य इति । मर्त्यः, मृत्युरेव संसार एव व्यालः सर्पः तस्माद्भीतः । सर्वान् लोकान् प्रति पलायन् कर्मणा प्राप्तस्वर्गादिलोकोऽपि तत्स्वर्गादिकं निर्भयं भयरहितं स्थानं नाध्यगच्छत् न प्राप । न मेने । यदृच्छया अदृष्टनियामकेन त्वया प्रेरितः त्वत्पदाब्जं प्राप्य स्वस्थः निर्भयो भवति । कुतः । मृत्युः अस्मात् भीतमर्त्यात् अपैति यतोऽत इति ॥ २८ ॥

स त्वं घोरादुग्रसेनात्मजान्नस्त्राहि त्रस्तान् भृत्यवित्रासहाऽसि ।
रूपं चेदं पौरुषं ध्यानधिष्ण्यमप्रत्यक्षं मादृशां त्वं कृषीष्ठाः ॥ २९ ॥

सत्यधर्मीया — यस्त्वमुक्तरीत्या भृत्यवित्रासहा भृत्यानां वित्रासं हन्तीति स तथाऽसि । अतो घोरादुग्रसेनात्मजात्त्रस्तान्नस्त्राहि । ऋग्भाष्याद्युदाहरणपूर्वकं प्रकृत्यन्तररूपत्वेनातीतस्कन्धोक्तः समाधिरवधेयः त्रायस्व । भृत्यानां वित्रासं यथा भवति तथा हासयति सन्तोषातिशयेन तद्वित्रासह यद्रूपमित्यप्यन्वयो ज्ञेयः । ध्यानधिष्ण्यं ध्यानस्थानं तद्विषयमिति यावत् । पौरुषं रूपं चतुर्भुजत्वादिमत् । मादृशां जनानामप्रत्यक्षं कृषीष्ठाः कुरु । त्वमन्यद्रूपं लोकपालवद्दृशां पिशितलोचनानामप्रत्यक्षं मा कृषीष्ठाः साधारणाकारधारणेनास्माकं दृग्विषयो भव भगवन्नित्यावृत्त्याऽन्वयो वा । त्वत्वावन्यपर्यायावित्युक्तेः ॥ २९ ॥

सुमनोरञ्जनी — सः संसारभयपरिहारकः त्वं, उग्रसेनात्मजः कंसः तस्माद्भीतान्नः अस्मान् त्राहि पालय । त्वं भृत्यानां विविधं त्रासं भयं हंतीति तथोक्तः यतोऽसि अत इत्यर्थः । इदं परिदृश्यमानम् । पौरुषं परमपुरुषसंबन्धि । चतुर्भुजत्वाद्युपेतमिति यावत् । मादृशां मत्सदृशानाम् । मा नास्ति दृक् ज्ञानं येषामज्ञानिनामिति वा ॥ अप्रत्यक्षं कृषीष्टाः कुर्वित्यर्थः । कुतः । यतो ध्यानधिष्ण्यं ध्यानविषयं अत इति योजना ॥ २९ ॥

जन्म ते मय्यसौ पापो मा विद्यान्मधुसूदन ।
समुद्विजे भवद्धेतोः कंसादहमधीरधीः ॥ ३० ॥

सत्यधर्मीया — तत्स्वे देवकी देवं प्रति विविच्य वक्ति ॥ जन्मेति । हे मधुसूदन! मयि ते जन्मासौ पापो मा विद्यान्न जानातु । अधीरधीरहं भवद्धेतोस्त्वत्कारणं कंसात्समुद्विजे बिभेमि । अहं रोहिणी चेति द्वाभ्यां जायत इति द्विजो बलस्तद्विषये समुद्वर्तते स्थानान्तरमिति ससन्तोषे-त्यावृत्त्याऽर्थः । अनेन स्थानान्तरगमनागमनौ भवत इति ध्वन्यते ॥ ३० ॥

सुमनोरञ्जनी — अप्रत्यक्षकरणे निमित्तमाह । हे मधुसूदन । असौ पापः कंसः मयि मदधिकरणकं ते जन्म प्रादुर्भावं मा विद्यात् न जानातु । भवन्निमित्तात् समुद्विजे बिभेमि । नन्वेतादृशं भगवदवतारं मां ज्ञात्वापि कुतो बिभेषीत्यत आह ॥ अहमधीरधीरिति । यतोऽहमधीः अधीः द्विर्वचनं स्वात्मगर्हणार्थम् । अधीरा चंचला धीः त्वयीश्वरत्वज्ञानं यस्याः सेति वा ॥ ३० ॥

उपसंहर विश्वात्मन्नदो रूपमलौकिकम् ।
शङ्खचक्रगदापद्मश्रिया जुष्टं चतुर्भुजम् ॥ ३१ ॥

सत्यधर्मीया — मां प्रति किं वदसि मातरितः परमित्यत ईरयति ॥ उपसंहरेति । हे विश्वात्मन् विश्वे नानाप्रकारा आत्मानो देहा यस्य स तथेति । अनेनानेनैव रूपेण यथा मनीषितं तथा भवनसामर्थ्यं द्योत्यते । अलौकिकम् । तदलौकिकत्वमुपपादयति । शङ्खचक्रैः गदापद्मैः सहिता या श्रीस्तया वा तेषां श्रिया शोभया वा जुष्टं चतुर्भुजं भुजचतुष्टयसहितमिति । हे रूपम! रूपाणां मा सम्पद्यस्य । इदानीं ग्राह्यरूपज्ञानम् । रूपेषु प्रतिरूपं मा रमाऽस्येति तत्सम्बुद्धिः । लौकिकमदः कृषीष्ठाः कुर्विति ॥ ३१ ॥

सुमनोरञ्जनी — हे विश्वात्मन् विश्वस्यादानादिकर्तः! अदः अस्मन्मात्रप्रत्यक्षविषयं रूपं उपसंहर । क्व । विश्वात्मन् पूर्णे स्वस्मिन्नेव । श्रिया शोभया ॥ ३१ ॥

विश्वं यदेतत् स्वतनौ निशान्ते यथावकाशं पुरुषः परो भवान् ।
बिभर्ति सोऽयं मम गर्भगोऽभूदहो नृलोकस्य विडम्बनं महत् ॥ ३२ ॥

सत्यधर्मीया — एतादृशोऽपि त्वमीश मे गर्भकोशजात इति जातमद्भुतमिदमित्याह ॥ विश्वमिति । यदेतद्विश्वं जगत्परः पुरुषो भवान्यथावकाशं पदमेकम् । अवकाशमनतिक्रम्य । यथा सादृश्य इति समासः । निशान्ते प्रलयावसाने स्वतनौ बिभर्ति सोऽयं मम गर्भगोऽभूदिति यन्नृलोकस्य महद्विडम्बनमाश्चर्यम् ॥ ३२ ॥

सुमनोरञ्जनी — निशान्ते प्रलये । यथावकाशमवकाशमनतिक्रम्य । अनन्तानन्तविश्वावस्थानावकाशं रक्षित्वेति यावत् । यदेतद्विश्वं स्वतनौ बिभर्ति सोऽयं परमपुरुषो भवान् मद्गर्भगोऽभूत् । अहो आश्चर्यम् । नृलोकस्य विडम्बनं वंचनमेव नान्यत् ।। ३२ ।।

श्रीभगवानुवाच -

त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायम्भुवे सति ।
तदाऽयं सुतपा नाम प्रजापतिरकल्मषः ।। ३३ ।।

सत्यधर्मीया — न मम कर्मनिर्मितमेतद्वर्ष्म किन्तु भवत्प्रार्थनयेति तौ स्मारयंस्तत्पूर्वरङ्गमाह ।। त्वमेवेति । पूर्वसर्गेऽतीतजन्मनि । हे सति! स्वायम्भुवमन्वन्तरे सतीति वा । त्वं पृश्निस्तन्नाम्न्यभूरयं वसुदेवस्तदाऽकल्मषा सुतपा नाम प्रजापतिरभूत् ।। ३३ ।।

सुमनोरञ्जनी — भवत्कृततपःप्रभावप्रसन्नेन युवयोरलौकिकरूपप्रदर्शनं, पुत्रभावेन ब्रह्मभावेन च स्नेहमाहात्म्याभ्यां सन्ततमनुचिन्तयतोः परगतिप्रदानार्थमेव नान्यार्थमिति दर्शयन् पूर्ववृत्तं कथयति श्रीकृष्ण इत्याह ।। श्रीभगवानिति । स्वायंभुवे स्वायंभुवमन्वन्तरे सति प्राप्ते सति त्वमेव । पूर्वसर्गे पूर्वजन्मनि । पृश्निः नामतः । अभूः आसीरिति सम्बन्धः । तदा अयं वासुदेवः सुतपाः नामतः, प्रजापतिरासीत् । न विद्यते कल्मषं मनोदोषः कामादिरूपं यस्यासौ तथोक्तः ।। ३३ ।।

युवां वै ब्रह्मणाऽऽदिष्टौ प्रजासर्गे यदा ततः ।
सन्नियम्येन्द्रियग्रामं तेपाथे परमं तपः ।। ३४ ।।

सत्यधर्मीया — ब्रह्मणा विधिना प्रजासर्गे तदर्थमिन्द्रियग्राममिन्द्रियसमूहं सन्नियम्य । परममुत्कटं तपस्तेपाते । तेपाथे इति पाङ्कः पाठः । प्राथमिके पाठे गतिर्वक्तव्या ।। ३४ ।।

सुमनोरञ्जनी — युवां प्रजासर्गे । तादर्थ्ये सप्तमीयम् । चर्मणि द्वीपिनं हंतीतिवत् । प्रजासर्गार्थं यदा ब्रह्मणा आदिष्टौ आज्ञप्तौ । ततः तदनन्तरम् । इन्द्रियाणां ग्रामं स्तोमं सन्नियम्य निगृह्य । परमं तपः भगवध्द्यानरूपं तपः तेपाथे अकुरुतामिति योजना ।। ३४ ।।

वर्षवातातपहिमघर्मकालगुणाननु ।
सहमानौ श्वासरोधविनिर्धूतमनोमलौ ।। ३५ ।।

सत्यधर्मीया — वर्षवातातपहिमघर्मादयः कालगुणास्ताननु क्रमतः सहमानौ । श्वासस्य निरोधेन विनिर्धूतं मनोमलं याभ्यां तौ ।। ३५ ।।

सुमनोरञ्जनी — तत्रेतिकर्तव्यतामाह । वर्षेति । वर्षं वृष्टिः । वातो वायुः । आतपः सूर्यतेजः । हिमम् । घर्म ऊष्मा । तद्रूपाः ये कालगुणाःताननुसृत्य सहमानौ । श्वासरोधः प्राणायामसमाध्यादिः तेन विनिर्धूतं परिहृतं मनोमलं याभ्याम् ॥ ३५ ॥

शीर्णपर्णानिलाहारावुपशान्तेन चेतसा ।
मत्तः कामानभीप्सन्तौ मदाराधनमीहतुः ॥ ३६ ॥

सत्यधर्मीया — शीर्णपर्णानि चानिलो वायुश्चाहारो ययोस्तौ । उपाशान्तेनैव समाहितेन चेतसा । मत्तः कामान्विषयानभीप्सन्तौ । मदाराधनकृतवन्तौ गतम् ॥ ३६ ॥

सुमनोरञ्जनी — शीर्णानि भूमौ पतितानि पर्णानि, अनिलो वायुरेवाहारो ययोस्तौ । मत्तः कामान् वरान् अभीप्सन्तौ । उपशान्तेन भगवन्निष्ठेन चेतसा । मदाराधनमीहतुः चक्राते । भवन्ताविति शेषः ॥ ३६ ॥

एवं वां तप्यतोर्भद्रे तपः परमदुष्करम् ।
दिव्यवर्षसहस्राणि द्वादशेयुर्मदात्मनोः ॥ ३७ ॥

सत्यधर्मीया — तप्यतोस्तपः कुर्वतोः । मदात्मनोर्मय्यात्मा मनो ययोरहमात्मा स्वामी ययोरिति वा । दिव्यानि देहसम्बन्धीनि द्वादशवर्षसहस्राणीयुर्गतानि ॥ ३७ ॥

सुमनोरञ्जनी — हे भद्रे । मदात्मनोः मय्येव आत्मा मनो ययोः । परमदुष्करं तपः कायक्लेशात्मकं भगवध्यानात्मकं च । वां युवां द्वादशसंख्याकानि दिव्यवर्षाणि देवतावर्षाणां सहस्राणि ईयुः अतीतानीत्यर्थः ॥ ३७ ॥

तदा वां परितुष्टोऽहममुना वपुषाऽनघे ।
तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः ॥ ३८ ॥

प्रादुरासं वरदराड् युवयोः कामदित्सया ।
व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ॥ ३९ ॥

सत्यधर्मीया — तदा वां परिश्रद्धया तपसा तत्पूर्वकतपसा भक्त्याऽमुना वपुषा हृदि भावितोऽनघे सम्बुध्यन्तं चेद्भवती च भवांश्चेति विग्रहदशापन्नैकदेशोत्कीर्तनेनान्वयो ज्ञेयः । वरदरोऽट्यतेऽनेनेति वा दरेण स अटतीति वा । उपलक्षणया चक्रादिग्रहः । शङ्खचक्रगदापद्मश्रिया

जुष्टमित्युक्तेः। अनेन भद्र इत्यपि व्याख्यातम्। अनघे हृदीति तु हृद्योऽन्वयः। वरदराट् वरदश्रेष्ठः। युवयोरिति पाठेऽप्येवमेवान्वयो ज्ञेयः। कामदित्सयाऽमुना वपुषेत्यत्राप्यन्वेति। प्रादुरासम्। प्रादुर्भूतेन मया वरं व्रीयतामित्युक्ते मादृशः सुतो वां युवाभ्यां वृतः ॥ ३८,३९ ॥

सुमनोरञ्जनी — तपसा पूर्वोक्तया श्रद्धया आस्तिक्यबुध्या। भक्त्या माहात्म्यज्ञानपूर्वकस्नेहेन हृदि भावितो ध्यातः अहं वां युवाभ्यां परितुष्टः। वरदराट् वरदानां राजा। युवयोः कामस्य अभीष्टस्य दित्सया दानेच्छया अहं, अमुना, इदानीं यादृशं चतुर्भुजत्वादिरूपं वपुर्दृष्टमेतादृशेनैव वपुषा प्रादुरासमिति सम्बन्धः। इत्युक्ते मयेति शेषः। वां युवाभ्यां मादृशः मत्सदृशः सुतो वृतः ॥ ३८,३९ ॥

अजुष्टग्राम्यविषयावनपत्यौ च दम्पती ।
न वव्राथेऽपवर्गं मे मोहितौ मम मायया ॥ ४० ॥

सत्यधर्मीया — अजुष्टग्राम्यविषयौ असेवितव्यवायादिविषयौ। मम मायया मोहिताविति मे मत्तोऽपवर्गं मोक्षं न वव्राथे ॥ ४० ॥

सुमनोरञ्जनी — भगवति प्रसन्ने मोक्षं विहाय किमित्यैहिक एव वरो वृत इति तत्राह ॥ अजुष्टेति। अजुष्टोऽसेवितः ग्राम्यः इन्द्रियग्रामसम्बन्धी विषयः मैथुनादिर्याभ्यां तौ। अनपत्यौ यतोऽतः अपवर्गं न वव्राथे न वृतवन्तौ। अपत्यापेक्षया अपवर्गस्याधिक्यविषये मम मायया मोहितौ मोहविशिष्टावित्यर्थः ॥ ४० ॥

गते मयि युवां लब्ध्वा वरं मत्सदृशं सुतम् ।
ग्राम्यान् भोगानभुञ्जाथां युवां प्राप्तमनोरथौ ॥ ४१ ॥

सत्यधर्मीया — मत्सदृशं मामेव। प्राप्तमनोरथाविति ग्राम्यान्भोगानभुञ्जाथाम्। युवां युवामिति पृथक् पृथगन्वयान्नातिरेकः। स्मरणार्थं, भवान्भवान्गच्छतु अहमहमायात इतिवदुक्तिर्वा ॥ ४१ ॥

सुमनोरञ्जनी — युवां मत्सदृशं सुतं तद्रूपं वरं लब्ध्वा। अन्तर्णीतणिजन्तमिदम्। लाभयित्वा प्रापयित्वेति यावत्। मयि गते सति युवां प्राप्तमनोरथौ ग्राम्यान् भोगान् अभुञ्जाथामित्यन्वयः ॥४१॥

अदृष्ट्वाऽन्यतमं लोके शीलौदार्यगुणैः समम् ।
अहं सुतो वामभवं पृश्निगर्भ इति स्मृतः ॥ ४२ ॥

सत्यधर्मीया — सदृशशब्दार्थं स्वयमेवाह ॥ अदृष्ट्वेति । शीलं सौन्दर्यमौदार्यं च गुणा इतर आनन्दादयस्तैः समम् । अन्यतमं स्वार्थेयं तमप् । अन्यम् । यथोक्तम् । पुरुतमं पुरूणां छान्दसस्तमप् स्वार्थ इति ऋग्भाष्यटीकाटिप्पणेषु । तथा श्रेष्ठतमाय कर्मणे । अन्यतमो मुकुन्दादित्यत्र टीकायां तम् अभिकाङ्क्षायामित्यस्य कर्मणि रूपम् । पुरुभिस्तम्यत इत्युक्तेः । अन्यस्तमोऽभिकाङ्क्ष्यश्च तमिति वा । अदृष्ट्वा । पृश्निगर्भ इति स्मृतोऽहं पृश्निसुतपसोः सुतोऽभवम् ॥ ४२ ॥

तयोर्वां पुनरेवाहमदित्यामास कश्यपात् ।
उपेन्द्र इति विख्यातो वामनत्वाच्च वामनः ॥ ४३ ॥

सत्यधर्मीया — तयोरेव वां युवयोरुपेन्द्र इति विख्यातो वामनत्वात्सुन्दरत्वाद्ध्रस्वत्वाद्वा । स वामनः स भामनः शब्दादेव प्रमित इत्यादेः आस आसम् । तौ कौ तदानीमित्यत आह ॥ अदित्यां कश्यपादिति । पृश्निरेवादितिः सुतपाश्च कश्यप इति तयोरासमित्यन्वयः ॥ ४३ ॥

सुमनोरञ्जनी — वामनत्वात् ह्रस्वरूपत्वात् । वामानि सुन्दरवस्तूनि नयतीति वा वामनः । अतिसुन्दरत्वादित्यर्थः । वामनसंज्ञकः कश्यपात् अदित्यामासेति यत् तदपि तयोः तद्रूपयोः वां अहमेव पुनरासमिति सम्बन्धः ॥ ४३ ॥

तृतीयेऽस्मिन् भवेऽहं वै तेनैव वपुषाऽनघे ।
ज़ातो भूयस्तयोरेवं सत्यं मे व्याहृतं सति ॥ ४४ ॥

सत्यधर्मीया — अस्मिंस्तृतीये भवे जन्मनि तेनैव तदा प्रसन्नेन वपुषा तयोः पृश्नितपसोरदितिकश्यपयोर्देवकीवसुदेवयोर्भूयः पुनर्जातः । एतेन त्रिवारं जन्मार्थनमित्यर्थाद्ध्वनितमिति वदन्ति । मे व्याहृतं भाषणं सत्यम् ॥ ४४ ॥

सुमनोरञ्जनी — अस्मिन् तृतीये भवे जन्मनि । भूयः पुनरपि तयोरेव युवयोः सकाशात् अद्य अहं तेनैव वरदानसमये प्राक् दृष्टेनैव वपुषा जातः । निर्दिष्टे सति मे व्याहृतं वचनं सत्यमेवेति योजना ॥ ४४ ॥

एतद् वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे ।
नान्यथा मद्भवज्ञानं मर्त्यलिङ्गेन जन्यते ॥ ४५ ॥

सत्यधर्मीया — एतच्चतुर्भुजत्वादियुतं रूपं वां युवयोः स्मरणाय अस्मद्रूपान्तरे दृष्टरूपाद्रूपान्तरे तादृशमिति स्मरणार्थं मे मया दर्शितम् । मर्त्यलिङ्गेन भुजद्वयादिचिह्नेन । अन्यथामद्भवज्ञानमिति

पदमेकम् । मद्भवो मदुत्पत्तिः स चान्यथा लोकभवविलक्षण इत्यन्यथामद्भवस्तस्य ज्ञानं वा स इत्यस्माकं भवस्तस्मादन्यथेत्यन्यथामद्भवः स इति ज्ञानं वा । अन्यथा एवमप्रदर्शने मर्त्यलिङ्गेन मद्भवज्ञानं न जन्यत इति, वां सन्दर्शित इति योज्यम् ॥ ४५ ॥

सुमनोरञ्जनी — एवं वृत्तमनूद्य अलौकिकरूपप्रदर्शने निमित्तमाह ॥ एतदित्यादिना । प्राक् प्रथमतः । कुतः । मे जन्मनः स्मरणाय विष्णुरेवावतीर्ण इति ज्ञानाय । अन्यथा एतद्रूपाप्रदर्शने । मद्भवज्ञानं मज्जन्मविषयकं ज्ञानम् । मर्त्यलिङ्गेन चतुर्भुजशङ्खचक्रादिरहितमनुष्य-देहसदृशदेहेनेत्यर्थः ॥ ४५ ॥

युवां मां पुत्रभावेन ब्रह्मभावेन चासकृत् ।
चिन्तयन्तौ कृतस्नेहौ यास्येथे मद्गतिं पराम् ॥ ४६ ॥

सत्यधर्मीया — पुत्रभावेन पुत्रत्वेन ब्रह्मभावेन नारायणत्वेन च । असकृच्चिन्तयन्तौ कृतस्नेहौ कृतभक्ती परां मद्भक्तिं यास्येथे ॥ ४६ ॥

सुमनोरञ्जनी — त्वमेवावतीर्ण इति ज्ञानेनापि किं सिध्यतीति तत्राह ॥ युवामिति । पुत्रभावेनेति स्नेहोपपादकम् । ब्रह्मभावेनेति माहात्म्योपपादकम् । कृतः स्नेहो माहात्म्यज्ञानपूर्वः भक्तिरिति यावत् याभ्यां तौ । तथा सन्तौ पुत्रभावेन ब्रह्मभावेन च चिन्तयन्तौ यास्येथे गमिष्यथः ॥ ४६ ॥

शुक उवाच -

इत्युक्त्वाऽऽसीद् हरिस्तूष्णीं भगवानात्ममायया ।
पित्रोः सम्पश्यतोः सद्यो बभूव प्राकृतः शिशुः ॥ ४७ ॥

सत्यधर्मीया — हरिरित्युक्त्वा देवकीवसुदेवौ प्रति तूष्णीमासीद्भगवान् । तथाऽसीनश्चात्ममायया स्वेच्छया पित्रोः । पिता मातेत्येकशेषः । मातापित्रोः सम्पश्यतोः सम्पश्यती च सम्पश्यंश्च । पुमांस्त्रियेत्येकशेषः । सद्यः प्राकृतः शिशुस्तद्वद्बभूव ॥ ४७ ॥

सुमनोरञ्जनी — संपश्यतोः सतोः । आत्ममायया स्वेच्छया । प्राकृतः प्राकृतवत् न तु प्राकृतः सद्यःशिशुर्बभूवेति सम्बन्धः ॥ ४७ ॥

ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् ।
यदा बहिर्गन्तुमियेष तर्ह्यजा या योगमायाऽजनि नन्दजायया ॥ ४८ ॥

सत्यधर्मीया — ततः सुतशिशुभवनानन्तरम् । भगवत्प्रचोदितो, यदि कंसाद्बिभेषि त्वं तर्हि मां गोकुलं नय । मन्मायामानयाशु त्वं यशोदागर्भसम्भवामिति क्वचित् श्लोको दृश्यते । तथाऽपि न सार्वत्रिकः । अन्तः प्रेरितः स शौरिः सूतिकागृहात्प्रसवनिवासात्सुतं समादाय यदा बहिर्गन्तुमियेषैच्छत्तर्हि तदा नन्दजायया निमित्तभूतयेति वा । तृतीया सप्तम्यर्थे । नन्दजायायां या योगमायाऽजा चित्प्रकृती रमाऽजनि जाता ॥ ४८ ॥

सुमनोरञ्जनी — स शौरिः भगवत्प्रचोदितः भगवता 'मां गोकुलं नय । तत्रत्यां कन्यामानय'इत्यादिरूपेण बोधितः सन् सुतं समादाय यदा गन्तुं इयेष ऐच्छत् तर्हि तदा अजापि या योगमाया दुर्गा, नन्दजायया नन्दजायायाः अजनि जाता । तयेत्युत्तरेणान्वयः ॥ ४८ ॥

तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेषु च यापितेष्वथ ।
द्वारस्तु सर्वाः पिहिता दुरत्ययाः बृहत्कपाटायसकीलशृङ्खलैः ॥ ४९ ॥

सत्यधर्मीया — ननु स्वस्य खलशृङ्खलाबन्धोऽन्धकारश्च बहिर्न हि न तद्धटकूटघटिततेति न हि । न च कीलाः किल द्वारः किं द्वारा सत्येवं वसुदेवो देवमन्यत्र नेतुमैच्छदित्यतः सर्वानुपपत्तिविच्छित्तकं हेतुमाह ॥ तयेत्यादिना । तयाऽपहृताः प्रत्ययो ज्ञानं च सर्वा वृत्तयश्चेष्टा येषाम् ते सर्वेन्द्रियवृत्तयो वा येषां तयाऽऽहृतः प्रापितः प्रत्ययो विश्वासो येषु सर्वेन्द्रियेषु तेषां वृत्तिर्व्यापारो येषु तेष्विति वा । पश्यत्स्वप्यनिवारयत्स्विति तात्पर्यम् । द्वाःस्थेषु द्वारपालेषु पौरेषु च यापितेषु । एतद्गतिमिति वा निद्रामिति वा शेषः । पौरयापनमुपनयनसमयप्रश्नार्थम् । सर्वद्वारः पिहिताः । बृहत्त्वं कपाटादित्रिके ज्ञेयम् । बृहन्ति च तानि कपाटान्यरराणि बृहन्त्यायसान्ययोविकृतानि कीलानि । शङ्कौ ज्वाले तु कीलवदिति विश्वः । शङ्कुविशेषाः बृहन्ति शृङ्खलान्यन्दुकानि च तैर्दुरत्यया अत्येतुमशक्याः । तुस्तु मन्त्रौषधादिभिरत्येतुमशक्यत्वविशेषसूचकः ॥ ४९ ॥

ताः कृष्णवाहे वसुदेव आगते स्वयं व्यशीर्यन्त यथा तमो रवेः ।
ववर्ष पर्जन्य उपांशुगर्जितः शेषोऽन्वगाद् वारि निवारयन् फणैः ॥ ५० ॥

सत्यधर्मीया — कृष्णं वहतीति । कृष्णं बिभ्राणे वसुदेवे आगते ताः पतिताः कपाटघटिताः स्वयं व्यशीर्यन्त शीर्णा विवृता इति यावत् । रवेः सकाशाद्रवेरुदये वा यथा तमस्तथा उपांशु मन्दं यथा गर्जितम् । भावे क्तः । गर्जनं यस्य स पर्जन्यो मेघो ववर्ष मन्दगर्जनान्मन्दं ववर्षेति ध्वन्यते । अन्यथा रसाभासेन देवकोपास्पदता स्यादिति ज्ञेयम् । इदमपि तस्य तदङ्गच्छविसदृशतायातसन्तोषेणेति ज्ञेयम् । शेषः फणैः फणा द्वयोरित्यमरात्स्वशिरोभिर्वारि मन्दं पतदुदकं

निवारयन्भूस्पर्शतः प्रागस्पृश्यत्वात् । मदनन्तरमयमनन्तो जातो न सेवा ममैतर्हीदमपदेशेनेयती सा घटतामित्येवमाटीकत शेष इति ध्वनिः । अन्वगाद्वसुदेवमनुसृत्यागात् ॥ ५० ॥

सुमनोरञ्जनी — जागृत्स्वपि द्वाःस्थेषु द्वारपेषु । तया दुर्गया । हृताः अपहृताः, प्रत्येति अर्थान् एभिरिति प्रत्ययाः इन्द्रियाः तेषां सर्ववृत्तयो येषां तथाभूतेषु सत्सु । पौरेषु,निद्रामिति शेषः यापितेषु प्रापितेषु सत्सु तदानीं पिहिताः याः द्वारः बृहद्भिः कपाटैः, आयसैः अयोमयैः कीलकैः अर्गलैः शृंखलैश्च । तुरप्यर्थे । दुरत्यया अपि कृष्णं वहतीति कृष्णवाहः तथाभूते वसुदेवे आगते सति । ताः द्वारः व्यशीर्यन्त विवृताः । यथा रवेरुदये तमो व्यशीर्यते तथेति सार्धश्लोकद्वयस्यैक एवान्वयः । नन्दगोपमन्दिरं प्रति जिगमिषोर्वसुदेवस्य देवा अपि साहाय्यमाचरन्नित्याह ॥ ववर्षेति । उपांशु मन्दं गर्जितं यस्यासौ तथाभूतः सन् पर्जन्यो ववर्ष । दृढगर्जने लोकाः प्रबुद्धा भवेयुरिति बुध्द्येति भावः । वर्षणमपि तदानीं दैवात्प्रबुद्धानां बहिरागमनिवारणायैवेति ज्ञेयम् । तर्हि श्रीकृष्णोपरि वर्षणेऽपराध एव स्यादिति तत्राह ॥ शेषः फणैः वारि वृष्ट्युदकं निवारयन् । वसुदेवमिति शेषः । अनु अनुसृत्य अगात् ययौ ॥ ४९, ५० ॥

मघोनि वर्षत्यसकृद् यमानुजा गम्भीरतोयौघजवोर्मिफेनिला ।
भयानकावर्तशताकुला नदी मार्गं ददौ सिन्धुरिव श्रियः पतेः ॥ ५१ ॥

सत्यधर्मीया — मघोनीन्द्रेऽसकृद्देववसुदेवोपरि मन्दं तदितरत्रासकृद्बहुलं वर्षति सति । गम्भीरतोयौघजवोर्मिफेनिला गम्भीरतोयौघस्य प्रवाहस्य वेगस्तज्जाता ऊर्मयस्तरङ्गास्तैः फेनिला फेनवती । अनेन मम यमसंयमनीपुर्यसुरैः पूरिता भवतीति सन्तोषेणेति ध्वन्यते । भयानका भयप्रापका आवर्ता अम्भोभ्रमास्तेषां शतैराकुला व्याप्ता नदी यमुना । श्रियः पतिस्तस्य । षष्ठ्या अलुकि समासे श्रियः पतेरिति सम्भवतीत्येके । पतिरित्याख्यातः पतिः । पदमेयं पदशब्दो भिन्न इत्यन्ये । सखिना वानरेन्द्रेण पतिते पतौ, सीतायाः पतये नम इत्यादिकं निदर्शयन्तो वदन् श्रियः पतेः रघुपतेः सिन्धुः समुद्र इव श्रियः पतेः कृष्णस्य मार्गं ददौ जानुदघ्नजलाऽभवदिति भावः । रामस्येव कृष्णस्येति विशेषनामाभाषमाणः साधारण्येन श्रीपतेरितीरयंस्तयोर्न तिलतुलविशेष इति ध्वनयामासेति ज्ञेयम् ॥ ५१ ॥

सुमनोरञ्जनी — मघोनि इन्द्रे वर्षति । यमानुजा नदी यमुना । कीदृशी । गम्भीरतोयौघजवा । गम्भीरो यस्तोयौघः तस्य जवो यस्याः सा । अत एवोर्मिभिस्तरंगैः फेनिला फेनव्याप्ता । अत एव भयानका भयंकराः आवर्ताः भ्रमाः तेषां शतैः आकुला व्याप्ता । भयानकैः आवर्तशतैराकुलेति वा । मार्गं ददौ । वसुदेवस्येति शेषः । श्रियः पतेः दाशरथिरामस्य ॥ ५१ ॥

नन्दव्रजं शौरिरुपेत्य तत्र तान् गोपान् सुषुप्तानुपलभ्य निद्रया ।
शिशुं यशोदाशयने निधाय तत्सुतामुपादाय पुनर्गृहानगात् ॥ ५२ ॥

सत्यधर्मीया — नन्दव्रजं नन्दगोकुलमुपेत्य प्राप्य निद्रया श्रीहरिमायारूपिण्या तान्गोपान्प्रसुप्तान्प्रस्वापितानुपलभ्य दृष्ट्वा शिशुं स्वदारकं यशोदाशयने निधाय तत्सुतामुपादाय पुनर्गृहान् । गृहाः पुंसि च भूम्न्येवेत्यमरः । स्वगृहमगात् । यथोक्तं हरिवंशे ।

स यत्र गर्भवसतिं वसत्यात्मेच्छया हरिः ।
यशोदाऽपि समाधत्त गर्भं तदहरेवतु ।
विष्णोः शरीरजां निद्रां विष्णुनिर्देशकारिणीम् ।
यामेव रजनीं कृष्णो जज्ञे विष्णुकुले प्रभुः ।
तामेव रजनीं कन्यां यशोदाऽपि व्यजायत ।
अनुज्ञाप्य पितृत्वेन नन्दगोपगृहं नय ।
वसुदेवस्तु सङ्गृह्य दारकं क्षिप्रमेव तु ।
प्रगृह्य दारिकां चैव देवकीशयने न्यसेत् ।
यशोदाया गृहं रात्रौ विवेश सुतवत्सलः ।
यशोदया त्वविज्ञातस्तत्र निक्षिप्य दारकम् ।
परिवर्ते कृते ताभ्यां गर्भाभ्यां भयविह्वलः ।
वसुदेवः कृतार्थो वै निर्जगाम निवेशनात् ।
उग्रसेनसुतस्याथ कंसस्यानकदुन्दुभिः ।
निवेदयामास तदा तां कन्यां वरवर्णिनीमिति ॥ ५२ ॥

सुमनोरञ्जनी — शौरिः नन्दस्य व्रजं उपेत्य । निद्रया तदभिमानिन्या दुर्गया । तान्व्रजे स्थितान् गोपान् प्रसुप्तान् उपलभ्य विज्ञाय । तत्सुतां तस्याः यशोदायाः सुतां उपादाय गृहीत्वा गृहान् गेहम् । बहुवचनं तु शब्दस्वभावः । गृहाः पुंसि च भूम्न्येवेत्यमरोक्तेः ॥ ५२ ॥

देवक्याः शयने न्यस्य वसुदेवोऽथ दारिकाम् ।
प्रतिमुच्य पदोर्लोहमास्ते पूर्ववदावृतः ॥ ५३ ॥

सत्यधर्मीया — अथ तत्र पुत्रं प्रस्थाप्य गमनानन्तरं दारिकामानीतां देवक्याः स्वभार्यायाः शयने न्यस्य निधाय पदोर्लोहं तन्मयशृङ्खलां प्रतिमुच्य स्थापयित्वा पूर्ववदावृतोऽप्रकाशितार्थो गुप्तो वाऽऽस्ते । स्मे क्रियाप्रबन्धे लट् ॥ ५३ ॥

सुमनोरञ्जनी — अथ गृहं प्रत्यागमनानन्तरम् । वसुदेवः दारिकां कन्यकां देवक्याः शयने न्यस्य। पूर्ववत् पदोः लोहं तन्मयं निगडं प्रतिमुच्य संस्थाप्य आवृतः अज्ञ इव स्थितः सन् आस्ते स्म ॥ ५३ ॥

यशोदा नन्दपत्नी च जातं परमबुध्यत ।
न तल्लिङ्गं परिश्रान्ता निद्रयाऽपगतस्मृतिः ॥ ५४ ॥

इति श्रीमद्भागवते दशमस्कन्धे चतुर्थोऽध्यायः ।

सत्यधर्मीया — नन्दपत्नी यशोदा परं केवलं जातमबुध्यताज्ञासीत् । तल्लिङ्गं स्त्रीपुरुषभेदकं चिह्नं नावबुध्यत । तत्र तन्त्रं परिश्रान्तेति । प्रसववेदनातो निद्रया भगवदङ्गजदुर्गयाऽपगतस्मृतिस्तद्विवेकहेतुस्मृतिरहिता ॥ ५४ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां भागवतटिप्पण्यां
दशमपूर्वार्धे चतुर्थोऽध्यायः ॥ १०-४ ॥

सुमनोरञ्जनी — ननु प्रसवसमये दृष्टस्त्र्यपत्यायाः प्रातः पुमपत्यं पश्यन्त्याः कथं संशयो नाभूदिति परीक्षिन्मनोगताशङ्कापरिहारप्रकारं दर्शयति ॥ यशोदेति । नन्दपत्नी यशोदा नामतः । सा तु परं केवलं जातमपत्यमबुध्यत । तस्य शिशोर्लिङ्गं स्त्रीपुरुषविवेचकं नाबुध्यत । तत्र हेतुः परिश्रान्ता । प्रसववेदनयेति शेषः । निद्रया अपगता स्मृतिर्यस्याः सा अतो न तल्लिङ्गं वेदेति ॥ ५४ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां चतुर्थोऽध्यायः ॥ १०-१ ॥

॥ अथ पञ्चमोऽध्यायः ॥

श्रीशुक उवाच -

बहिरन्तः पुरद्वारः सर्वाः पूर्ववदावृताः ।
ततो बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः ॥ १ ॥

सत्यधर्मीया — वसुदेवस्यैवं निवासवासानन्तरं का कथा प्रवृत्तेत्यतस्तद्वृत्तान्तमाह ॥ बहिरन्तरिति । बहिर्द्वारोऽन्तःपुरद्वारश्चेत्यन्वयः । सर्वाः पूर्ववत् आवृता आच्छादिताः । ततो

बालध्वनिं श्रुत्वा गृहपालाः कंसस्थापिता उत्थिताः । ध्वनितः सारांशस्तु न किञ्चिदप्येतत्कृत्यमत्ययहेतुमिति सारमेयोपमा एत्विति गृहपालेत्यालपतेति ज्ञेयम् ॥ १ ॥

सुमनोरञ्जनी — बहिर्द्वारः अन्तःपुरद्वारश्चेति सर्वा द्वारः । पूर्ववत् यथापूर्वम् । आवृताः पिहिताः । ततः तदनन्तरं बालध्वनिं बालस्य रोदनलक्षणं श्रुत्वा गृहपालाः गृहरक्षणार्थं कंसेन नियुक्ताः समुत्थिताः इति सम्बन्धः ॥ १ ॥

ते तु तूर्णमुपव्रज्य देवक्या गर्भजन्म तत् ।
आचख्युर्भोजराजाय यदुद्विग्नः प्रतीक्षते ॥ २ ॥

सत्यधर्मीया — गर्भजन्म तज्जननं यदुद्विग्नः यद्गर्भाद्भीतः प्रतीक्षते कदोत्पत्तिर्भवेदिति तदाचख्युः ॥ २ ॥

सुमनोरञ्जनी — ते द्वारपालाः उपव्रज्य समीपं गत्वा । कंसस्येति शेषः । स कंसः । यदुद्विग्नः यस्मात् देवक्याः अष्टमगर्भात् उद्विग्नः भीतः । प्रतीक्षते 'कदा अष्टमगर्भं प्रसूते देवकी' इत्येवं चिन्तयन्नास्ते । तत् देवक्याः गर्भस्य जन्म उत्पत्तिम् । भोजानां राज्ञे कंसाय । आचख्युरिति सम्बन्धः ॥ २ ॥

स तल्पात् तूर्णमुत्थाय कालोऽयमिति विह्वलः ।
सूतीगृहमगाच्छीघ्रं प्रस्खलन् मुक्तमूर्धजः ॥ ३ ॥

सत्यधर्मीया — तल्पाच्छय्यातः । तल्पात् ल्यब्लोपनिमित्तेयं पञ्चमी । तल्पं कलत्रं परित्यज्य शय्येति पदशय्यां विहायैवं वचनवृत्त्याऽमुमर्थं सूचयामासेति ज्ञेयम् । तल्पमट्टकलत्रयोरिति विश्वः । कालोऽयमयमेव समयो मम संहारकोऽयमिति वा सूतीगृहं सूतिकागारम् । सूतिः संवीतसन्तत्योरिति विश्वः । सूतेव सूतकेति भानुः । ततश्च सूतागृहमिति सुपठम् । प्रस्खलन् निद्रया भीत्या वा । मुक्तमूर्धजो मुक्ता मूर्धजा यस्य येन स वा । केशवोत्पत्तिरिति मिमतो नावकाशोऽभूत्केशबन्धन इति तावती त्वरा ज्ञेया । पद्मनाभमुक्तो मूर्धजः कृष्णः केशाकाल इति विव्हल इति कवयितुर्हृदयं मन्तव्यमित्येके ॥ ३ ॥

सुमनोरञ्जनी — स कंसः । तल्पात् शयनात् ल्यब्लोपनिमित्तेयं पञ्चमी तल्पं परित्यज्य । 'अयं उत्पन्नो गर्भः मम कालः मृत्युरेव । अष्टमत्वादिति भावः । विह्वलः भीतः । मुक्ताः अग्रथिताः मूर्धजाः शिखा यस्य सः । प्रस्खलन्नेव शीघ्रं सूतीगृहं सूतिकागृहं प्रति । अत्र दीर्घश्छान्दसः ॥ ३ ॥

तमाह भ्रातरं देवी करुणं कृपणा सती ।
स्नुषेयं तव कल्याण स्त्रियं मा हन्तुमर्हसि ॥ ४ ॥

सत्यधर्मीया — देवी कृपणा सती करुणं यथा भवेत्तथा तं स्वभ्रातरमाह प्राह । हे कल्याण मङ्गलपुरुष । आन्तरङ्गिको भावस्तु कालनेमिविवक्षया कलिना आ सम्यक् अणते प्रेर्यत इति कल्याणेति सम्बोधितवतीति ज्ञेयम् । स्नुषा भगिनीपुत्रीति स्त्रियं हन्तुं माऽर्हसि । मायं, तव स्पष्टमप्रतिभानमत इत्याह ॥ तमेति । तमा तत्स्वपि गीयत इति रात्रेर्नाम । ह शोके ॥ ४ ॥

सुमनोरञ्जनी — तमागतम् । कृपणेषु न विद्यते करुणा यस्य तम् । दुष्टस्वभावत्वात् । यद्वा कृपणा सती । अन्यस्माद्दयामपेक्षन्ती सती निर्दुष्टा देवकी । अकरुणं करुणाशून्यं भ्रातरं आह । करुणा यथा स्यात्तथा आहेति वा । किमित्याहेति तदाह ॥ स्नुषेति । हे कल्याण । स्त्रियं हन्तुं माऽर्हसि । न केवलं स्त्रीत्वमात्रमसंहारे निमित्तं किञ्च इयं कन्या तव स्नुषा स्नुषात्वयोग्या अत इति शेषः । यदि स्त्रियमपि हन्तुमिच्छसि तर्हि मा मां हन्तुमर्हसीति च । माशब्दोऽयं न माङ् ॥ ४ ॥

बहवो हिंसिता भ्रातः शिशवः पावकोपमाः ।
त्वया दैवनिसृष्टेन पुत्रिकैका प्रदीयताम् ॥ ५ ॥

सत्यधर्मीया — हे भ्रातः! पावकोपमाः शिशवो बहवो हिंसिताः । त्वयेत्युक्त्वा पुनः क्षमापयन्त्याह ॥ दैवनिसृष्टेनेति । अनेन न त्वदुपरि शब्द इत्युक्तवतीति ध्वन्यते । एकेयं पुत्रिका प्रदीयताम् ॥ ५ ॥

सुमनोरञ्जनी — दैवनिसृष्टेन दैवप्रेरितेन त्वया पावकोपमाः अग्नितुल्याः । अतीवतेजस्विन इति यावत् । मे शिशवः बहवो हिंसिताः । तथापि गतम् । न शोचामि । अधुना एका पुत्रिका मे मह्यं प्रदीयताम् । एनां मा हिंसीरिति भावः ॥ ५ ॥

नन्वहं ते ह्यवरजा दीना हतसुता प्रभो ।
दातुमर्हसि मन्दाया अङ्गेमां चरमा प्रजाम् ॥ ६ ॥

सत्यधर्मीया — अङ्ग भ्रातः! अहं तेऽवरजा भगिनी । ननु हतसुतेति, मन्दायै मह्यमिमां चरमाम् । उभयोर्वृद्धतया भविष्यत्तोकाशा केति तात्कालिकतत्कोपोपशमनाय चरमामित्युक्तिः । प्रजां दातुमर्हसि । दीनेति च मन्दाया इति चान्वये रमां प्रजामिति कटाक्षित आन्तरङ्गिको भावोऽवसेयः । चर गृहं प्रतीति शेषः । मां रमारूपिणीप्रजामिति वा चरमामवरसन्ततिमिति व्याकुर्वते ॥ ६ ॥

सुमनोरञ्जनी — नन्वस्या हननेऽपि तव पुत्रान्तरोत्पत्त्या त्वच्छोकोऽपगच्छतीत्यत उक्तम् ॥ इमां चरमां प्रजामिति । नातः परं मम प्रजोत्पत्तिः संभावितेति भावः ॥ ६ ॥

श्रीशुक उवाच --

उपगूह्यात्मजामेवं रुदन्त्या दीनदीनवत् ।
याचितस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे खलः ॥ ७ ॥

सत्यधर्मीया — किं कंसोऽसौ भगिन्या गिरं श्रुत्वा निववृत उत स्वजीवनाशतोपकृपः प्रववृते तद्विनाश इत्यत आह ॥ उपगूह्येति । दीनदीनवत् । तत्र तस्येवेति षष्ठ्यन्ताद्वतिः । तस्या इव । आत्मजामुपगूह्यालिङ्ग्यैवं याचितोऽपि रुदन्त्या देवक्या हस्तात्तां देवकीं निर्भर्त्सयित्वाऽऽचिच्छिदे आचकर्ष । सर्वसम्भावकमाह ॥ खल इति ॥ ७ ॥

सुमनोरञ्जनी — आत्मजाम् जातामेव न तु पीतस्तन्याम् । उपगुह्य उदरे गोपयित्वा । आलिङ्ग्येति यावत् । दीनदीनवत् दीनादपि दीनवत् । न तु स्वभावतो दीना । स्वपुत्रस्य गोकुले नीतत्वात् । अस्याश्च दुर्गारूपत्वेन संहर्तुमशक्यतया निश्चितत्वाच्च । एवं पूर्वोक्तरीत्या रुदन्त्या याचितोऽपि प्रार्थितोऽपि खलः । तां विनिर्भर्त्स्य तिरस्कृत्य । हस्तात् देवकीहस्तात् । तां दुर्गाम् । आचिच्छिदे आचकर्ष ॥ ७ ॥

तां गृहीत्वा चरणयोर्जातमात्रां स्वसुः सुताम् ।
अपोथयच्छिलापृष्ठे स्वार्थोन्मूलितसौहृदः ॥ ८ ॥

सत्यधर्मीया — तां स्वसुः सुतां जातमात्रां सद्यो जाताम् । चरणयोः पादयोः । अनेन तदन्तर्गतभृगोश्चरणस्पर्शयोग्यतावत्त्वात्तदनुयानं ध्वन्यते । मुख्यकर्मत्वं तच्छब्दार्थस्य ग्रहणाधिकरणताबोधकतयोपपद्यते चरणयोरिति । महाभाष्येऽगोज्ञायशां सक्थिनि कर्णे वा गृहीत्वाऽऽन्तर्दयतीवत् तत्त्वनिर्णयटीकायां च शृङ्गे कर्णे वा गृहीत्वा गामिव नागमो नारायणं गमयतीत्युक्तेः । गृहीत्वा शिलापृष्ठेऽपोथयत्तताड । स्वजीवनार्थमेवोन्मूलितं सौहृदं स्नेहो यस्य । स्वार्थात्स्वनाशादेष्यतः, उन्मूलितं सौहृदं येनेति वा । अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वित्यमरः ॥ ८ ॥

सुमनोरञ्जनी — जातमात्रां स्वसुः सुतां शिशुरूपां दुर्गाम् । चरणयोर्गृहीत्वा । शिलापृष्ठे अपोथयत् बलाच्चिक्षेप । ननु कथं स्वसुः सुतायां स्नेहो नासीदित्यत उक्तम् ॥ स्वार्थेति । स्वस्य योऽर्थः प्रयोजनं तदर्थम् उन्मूलितं उत्पाटितं त्यक्तमिति यावत् । सौहृदं स्नेहो येन स तथा । स्वप्रयोजनार्थं स्नेहत्यागो दुर्जनस्वभाव इति भावः ॥ ८ ॥

सा तद्धस्तात् समुत्प्लुत्य सद्यो देव्यम्बरेरं गता ।
अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा ।। ९ ।।

सत्यधर्मीया — सा विष्णोरनुजा देवी । तद्धस्तात्कंसहस्तात्समुत्प्लुत्याम्बरे आकाशे गता सती सायुधाष्टभुजाऽदृश्यत ।। ९ ।।

सुमनोरञ्जनी — सा कन्यका सद्य एव क्षेपणकाल एव तस्य कंसस्य हस्तात् सुमुत्प्लुत्य ऊर्ध्वङ्गता अम्बरङ्गता आकाशं प्राप्ता सती देवी देवतारूपधारिणी भूत्वा । विष्णोरनुजा दुर्गा अदृश्यत । जनैरिति शेषः । देवीत्वमेव विवृणोति ।। सायुधेति । सायुधाः आयुधैः सहिताः अष्टौ महाभुजाः यस्या सा ।। ९ ।।

दिव्यस्रगम्बरालेपरत्नाभरणभूषिता ।
धनुःशूलेषुचर्मासिशङ्खचक्रगदाधरा ।। १० ।।

सत्यधर्मीया — दिवि भवानि दिव्यानि मनोहराणि । अष्टौ तदायुधाभिधानान्यभिधत्ते ।। धनुरित्यादिना । ननु काली पीताम्बरधरा गजकुम्भोपमस्तनी । चक्रविस्तीर्णजघना चन्द्रवक्त्रा चतुर्भुजेति हरिवंशे शंसनाद्भुजाष्टकोक्तिरेतद्विरुद्धेति चेन्न । भागवतस्य तदुत्तरत्वेन भुजाष्टकतद्गतायुधाष्टकप्रतिपादकतया निरवकाशत्वेन चतुर्भुजेति तदुक्तेरेकभागवतभुजमात्रकथकतया सावकाशताप्रकाशनसम्भवात् । आवृत्त्याऽन्वयनेनाष्टकलाभो वा ज्ञेयः । पञ्चमतात्पर्ये ।

यथा भागवते तूक्तं भौवनं कोशलक्षणम् ।
तस्याविरोधतो योज्यं सर्वग्रन्थान्तरे स्थितम् ।
मण्डोदे पूरणं चैव व्यत्यासं क्षीरसागरे ।

राहुसोमरवीणां च मण्डलाद्द्विगुणोक्तिताम् । विनैतत्सर्वमुन्नेयमित्याद्युक्तेराचार्याभ्यनुज्ञानमेतदादौ ज्ञायते । प्रथमे च स्वप्नोऽयमतो नैषीकविरोध इत्याद्युक्तेरेवं व्याकरणं सम्भवि । चित्रैकौर्लिख्यते भित्तौ मन्त्रशास्त्रेषु वर्ण्यत इति निरवकाशं भागवतम् ।। १० ।।

सुमनोरञ्जनी — दिव्याः दिवि भवाः । मन्दारादिकुसुममयाः स्रजो मालाः । अम्बराणि । आलेपश्चन्दनादिः । रत्नमयाभरणानि तैः भूषिताः । अष्टभुजेषु धृतान्यायुधान्याह ।। धनुरिति । शूलं त्रिशूलम् । इषवो बाणाः । चर्म च । असिः खड्गः । शङ्खचक्रगदाश्च तासां धरा ।। १० ।।

सिद्धचारणगन्धर्वैरप्सरःकिन्नरोरगैः ।
उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत् ॥ ११ ॥

सत्यधर्मीया — उपाहृता उरवो बलयो यैस्ते । तैः स्तूयमाना ॥ ११ ॥

सुमनोरञ्जनी — उपाहृताः समर्पिताः उरवः उत्कृष्टाः बलयः पूजासाधनानि यैस्ते तथाविधाः तैः स्तूयमाना । इदं वक्ष्यमाणवचनम् ॥ ११ ॥

किं मया हतया मन्द जातः खलु तवान्तकः ।
यत्र क्वचित् पूर्वशत्रुर्मा हिंसीः कृपणान् वृथा ॥ १२ ॥

तात्पर्यम् – 'पूतनाकंसनरकशिशुपालादिषु द्विधा । जीवाः सन्तस्त्वसन्तश्च तत्र बन्ध्वादिरूपिणः । विष्णोः सन्त इति ज्ञेया असन्तः शत्रुरूपिणः । शुभजीवप्रकाशेन कदाचिच्छुभबुद्धयः । विपर्ययेऽन्यथा च स्युः शुभास्तत्र हरिं ययुः । असुराश्च तमो घोरं यदि तत्रैव मध्यमाः । मध्यमां गतिमेवापुरेकदेहगता अपी'ति गारुडे ॥ १२ ॥

सत्यधर्मीया — किं मया हतया मन्देत्यारभ्य भुवि भौमानीति पर्यन्तश्लोकैः कथ्यमानानि बन्धुत्वं तथा शत्रुत्वं दैवाधीनाः सहासत इति सर्वस्य भगवदधीनत्ववेदनं च कंसस्यासुरस्य कथमित्यतः प्रमाणेन तत्तात्पर्यमाह ॥ पूतनेति । यद्यपि पुराणे पूतनादिमूलं कंस इति स एवादौ ग्राह्यस्तथाऽपि सर्वापेक्षया पूर्वं पूतनाव्रजव्रजनादीति कंससंसारपीठिकारूपिणीति तन्निरूपणमादाविति ज्ञेयम् । द्विधा प्रकारप्रकारिणोरभेदादेवमुक्तिरिति वा । द्विधा व्यया तृतीयाया लोपे प्रकारद्वयेन जीवा ज्ञेयाः । एकस्मिंस्तदुभयघटनप्रकारमाह ॥ शुभेति । शुभजीवानामूर्वश्यादीनां प्रकाशेन तदावेशविशेषेण कदाचिदेव शुभबुद्धयः । असुरप्रवेशे विपर्यये अन्यथा चाशुभबुद्धयस्तत्र शुभा इतो गता हरिं ययुरसुराश्च घोरं तमो ययुः । यदि तत्र शरीरे मध्यमा अभिमानिनः स्युस्ते मध्यमां गतिमेवापुः । एकदेहगता अपीत्यधिकारिसामान्यान्वयीति ज्ञेयः ॥ ततश्चायं श्लोकसप्तकार्थः ॥ हे मन्द अज्ञ! मया हतया तव किं किं प्रयोजनम् । अष्टमो गर्भो योषित्पुरुषो वेत्यनिर्धार्याभिधानात्त्वमेव मम मृत्युरिति त्वदजीवनं मज्जीवनकारणमिति तव नाशो भवत्वित्याह । तवान्तको मृत्युर्यत्र क्वचिज्जात इति खलु । देवादिनिवेदितासृगाद्यास्वादनं कुर्वन्ती ।

नृत्यन्ती च हसन्ती च विपरीतेन भास्वती ।
विहायसा गता रौद्रा पिबन्ती पानमुत्तमम् ।
जहास च महाहासं कंसं च रुषिताऽब्रवीत् ।

इति हरिवंशशंसनात् । खलु स्याद्वाक्यभूषायां जिह्वास्वादे च सान्त्वन इति विश्वः । कृपणानुत्तरत्र भविष्यतस्तोकान्मा हिंसीर्न हिंसय । कृपणामिति पाठे मा मां कृपणां वृथा त्वमहिंसीर्हतवान् । मत्सामर्थ्येनाहं विहायैनं देहं विहायसा गता । तव तु स्त्रीहत्यादोष आयात एवेत्यायताक्ष्यास्तात्पर्यम् । कृपणां मन्मातरं देवकीं वृथा मा हिंसीर्नोपद्रुतां कुर्वित्यपि व्याकुर्वते । कृपणान्पूर्वजान्मां च वृथा हिंसीरिति वाऽन्वयो ज्ञेयः । स जातः पोतः प्राक् त्वद्घातक इत्याह ॥ पूर्वशत्रुरिति । पूर्वं त्वामशातयदिति शत्रुः ॥ १२ ॥

सुमनोरञ्जनी — हे मन्द । मया हतया । मद्धननेनेति यावत् । तव किं किं प्रयोजनम् । न किमपि । कुतः । यतस्तव पूर्वशत्रुः विष्णुः इदानीमपि तवान्तकः । यत्र क्वचन कुत्रापि स्थलविशेषे जातोऽस्ति । अतः कृपणां मां वृथा मा हिंसीः मा संहर । यद्वा कृपणां मा मां किं हिंसीः किमर्थं हनिष्यसीति ॥ १२ ॥

इति प्रभाष्य तं देवी माया भगवती भुवि ।
बहुनामनिकेतेषु बहुनामा बभूव ह ॥ १३ ॥

सत्यधर्मीया — बहुनामवत्सु निकेतेषु काश्यादिसदनेषु । बहुनामा बहूनि नामानि यस्याः सा । डाबुभाभ्यामिति डाबन्तो नान्तो वाऽयं शब्दः । स्थानानि च नरा भुवि, दुर्गेति भद्रकालीत्यारभ्याम्बिके चेत्यन्तसार्धश्लोकेन भगवदुक्तप्रकारबहुनामा बभूव । हेति प्रसिद्धिसूचकम् । वसुदेवदेवकीदृश्या त्वन्येषां तल्पे बालरूपिण्यवात्सीदित्यर्थसूचको वा हशब्दः । यथोक्तमाचार्यैः । पुनर्न देवकीतल्पे शयद्बालरूपैव दुर्गा नाज्ञासिषुस्तामथ केचन । ऋते हि मातापितरौ गुणाढ्यामिति ॥ १३ ॥

सुमनोरञ्जनी — भगवती पूज्या । माया दुर्गा । इति एवं प्रकारेण । प्रभाष्य । बहुनामानि वाराणसीत्यादिबहुनामानि निकेतनानि तेषु । बहुनामवती 'दुर्गा, काली, कराली, शाकम्भरीत्यादिनामवती बभूव वेति योजना ॥ १३ ॥

तयाऽभिहितमाकर्ण्य कंसः परमविस्मितः ।
देवकीं वसुदेवं च विमुच्य प्रश्रितोऽब्रवीत् ॥ १४ ॥

सत्यधर्मीया — आकर्ण्य श्रुत्वा । प्रश्रितः प्रह्वः ॥ १४ ॥

सुमनोरञ्जनी — तत्र कंसाविष्टभृगोः पश्चात्तापप्रकारमाह ॥ तयेति ॥ विमुच्य निगडात् । प्रश्रितो विनीतः सन् ॥ १४ ॥

अहो भगिन्यहो भाम मया वां बत पाप्मना ।
पुरुषादैरिवाभ्येत्य बहवो हिंसिताः सुताः ॥ १५ ॥

सत्यधर्मीया — भाम भगिनीभर्तः! वां युवयोः पाप्मना तद्वता मया । पुरुषादैरिव बहुराक्षसकार्यं कृतमेकलेन किल मयेति बहुवचनम् । स्वापत्यमित्यनवेक्षणं च तद्धर्म इति तन्निदर्शनमिति मन्तव्ये । सुता हिंसिताः । शात्रवं चेत्पुत्रादिहिंसा कंसविहितेत्यत आह ॥ सुहृदोरिति ॥ १५ ॥

सुमनोरञ्जनी — किमब्रवीदिति तदाह ॥ अहो इति ॥ हे भगिनि । हे भाम भगिनीभर्तः । बतेति खेदे । पुरुषादैरिव राक्षसैरिव । अभ्येत्य । पाप्मना पापस्वभावेन मया बहवः सुताः । युवयोरिति शेषः । हताः । राक्षसाः संभूय यत्क्रूरकर्म कुर्वन्ति तन्मयैकेनैव कृतमिति सूचनाय पुरुषादैरिति बहुवचनमिति पदरत्नावली ॥ १५ ॥

स त्वहं त्यक्तकारुण्यस्त्यक्तज्ञातिसुहृत् खलः ।
हा कान् लोकान् गमिष्यामि ब्रह्महेव मृतः श्वसन् ॥ १६ ॥

सत्यधर्मीया — स्वभावाङ्कुरणमित्यूह्यम् । स्वं निन्दति ॥ श्वसन्मृत इति । सोऽहं तु ब्रह्महेव । कान् लोकान् गमिष्यामीत्यन्वयः । त्यक्तकारुण्य इत्यादिकं सुलोकदौर्लभ्यहेतुः ॥ १६ ॥

सुमनोरञ्जनी — त्यक्तं कारुण्यं येन । बालघ्नत्वात् । त्यक्ता ज्ञातयः सुहृदश्च येन सः । अत एव खलः दुर्जनः । एतादृशोऽहं मृतः सन् । कान् लोकान् गमिष्यामि ॥ क इव । ब्रह्महेव ब्रह्महत्याकारीव । हां अतीव कष्टं प्राप्तं मम । इदानीं तु श्वसन्नपि जीवन्नपि मृत एव मृततुल्य एवेति ॥ यद्वा ब्रह्महेव अहमपि मृतः श्वसन् दीर्घश्वासमुत्सृजन् कान् कुत्सितानेव लोकान् गमिष्यामि । हा कष्टमेतदिति सम्बन्धः ॥ १६ ॥

दैवमप्यनृतं वक्ति न मर्त्या एव केवलम् ।
यद्विस्रम्भादहं पापः स्वसुर्निहतवान् सुतान् ॥ १७ ॥

सत्यधर्मीया — देव्या मोहनायोक्तं विश्वस्य, अस्यास्त्वामष्टमो गर्भो हन्ता यां नयसेऽबुधेति दैवी वागप्यन्यथा जातेति मत्वा स्वं कुत्सयति ॥ दैवमिति । अहं स्वसुः शोभना असवो यस्याः सा भगिनीति मत्वेति च ॥ १७ ॥

सुमनोरञ्जनी — केवलं मर्त्या एव अनृतं वदन्तीति न किन्तु दैवमपि विधिरप्यनृतं वक्ति । यद्विस्रंभात् यस्मिन् दैववचने विस्रंभात् विश्वासात् । पापः अहं स्वसुः सुतान् निहतवानिति योजना ॥ १७ ॥

मा शोचेथां महाभागावात्मजान् स्वकृतम्भुजः ।
जन्तवो न सदैकत्र दैवाधीनाः सहासते ॥ १८ ॥

सत्यधर्मीया — स्वकृतं स्वकर्मफलं भुञ्जत इति भुजस्तान् जन्तवः प्राणिनः सदैकत्र सह नासते । तत्र तन्त्रं दैवाधीना इति ॥ १८ ॥

सुमनोरञ्जनी — हे महाभागौ! युवाम् । स्वकृतं स्वैः स्वैः कृतकर्मफलभुजः आत्मजान् उद्दिश्य मा शोचेथाम् । भवदात्मजमरणं मन्निमित्तशोकं मा कुरुतम् । कुतः । यतो जन्तवः जन्यशरीरिणः सदा सह मिलित्वा नैवासते । तदपि कुतः । यतो दैवाधीनाः अदृष्टनियामकभगवदधीनाः । नन्वसुरस्वभावस्य कंसस्य कथमीदृशी शुभबुद्धिः । यदि च बन्धुत्वस्मरणात् तर्हि कुतो वा पूर्वं बालहननादौ प्रवृत्त इत्यधिकारिमनोगतामाशङ्कामाचार्यचरणाः परिहरन्ति ॥ पूतनेत्यादिना ।

पूतनाकंसनरकशिशुपालादिषु द्विधा ।
जीवाः सन्तस्त्वसन्तश्च तत्र बन्ध्वादिरूपिणः ।
विष्णोः सन्त इति ज्ञेया असन्तः शत्रुरूपिणः ।
शुभजीवप्रकाशेन कदाचिच्छुभबुद्धयः ।
विपर्यये तथा च स्युः शुभास्तत्र हरिं ययुः ।
असुराश्च तमो घोरं यदि तत्रैव मध्यमाः ।
मध्यमां गतिमेवापुरेकदेहंगता अपि ॥ इति गारुडे ।

अयमर्थः । पूतनादिशरीरेषु सन्तो मोक्षयोग्याः असन्तस्तदयोग्याश्चेति द्विविधाः जीवाः सन्ति । तेन मध्यमानामपि सङ्ग्रहः । एतत्कथं ज्ञायत इत्यतः स्नेहविशेषादेवावगन्तव्यमित्याह ॥ तत्रेति । तत्र तेषां मध्ये विष्णोर्ये बन्ध्वादिरूपिणः विष्णौ अतिशयस्नेहयुक्ताः ते सन्त इति ज्ञेयाः । ये तु शत्रुरूपिणः द्वेषयुतास्तेऽसन्त इति ज्ञेया इत्यर्थः । एवंस्थिते, शुभजीवस्य प्रकाशः उन्मेषणं तेन । कदाचित् शुभबुद्धयः स्युः । विपर्यये अशुभजीवस्य प्रकाशेन । अन्यथा च अशुभबुद्धयश्च स्युः । शुभजीवप्रकाशेन तन्मनोनियामकाः देवाः असुरान्प्रतिबध्य स्वनियम्यतत्त्वे शुभामेव बुद्धिं जनयन्ति । अशुभजीवप्रकाशे च तन्मनोनियामकदैत्या एव अशुभबुद्धिमुत्पादयन्ति । तदा तु देवाः असुराणां साधनपूर्तये स्वव्यापारं न कुर्वन्तीति भावः । ननु शुभाशुभजीवयोरेकदेहगतत्वात्किमेकविधैव गतिः । नेत्याह ॥ तत्रेति । तत्र तेषु द्विविधजीवेषु मध्ये शुभाः कंसादिषु स्थिताः अन्ते श्रीहरिमेव ययुः । यदि तत्रैव द्विविधजीवेष्वेव मध्यमाः नित्यसंसारिणः सन्ति तर्हि ते मध्यमाः सुखदुःखमिश्रामेव गतिं आपुरिति । अतः कंसाविष्टस्य भृगोः शुभजीवत्वात्तस्यैवेयं बुद्धिः । पूर्वा तु कालनेमिसंज्ञकासुरस्येति भावः ॥ १८ ॥

भुवि भौमानि भूतानि यथाऽऽयान्त्यपयान्ति च ।
नायमात्मा तथैतेषु विपर्येति यथैव भूः ॥ १९ ॥

तात्पर्यम् – अयमात्मा परमात्मा ॥ यतः परमात्मनो नैकविधमैक्यं विपरीतज्ञानेन यतश्च संसृतिर्न निवर्तते । स एव न विपर्येति । पुत्रादिकं तु विपर्येति ॥ १९,२० ॥

सत्यधर्मीया — भुवि भौमानीत्यादिश्लोकद्विके भूतान्यायान्त्यपयान्ति तथैव तच्छरीरस्थो ना पुमानात्मा जीवो विपर्येति चैतन्यात्मा दुःखादिमान्भवति । केनेत्यत आह ॥ यतोऽनेकविधो भेद इति । भेदस्तद्भ्रमस्तद्विपर्ययेण च देहयोगवियोगाद्यात्मा संसारो न निवर्तत इति भेदज्ञानं संसारसाधनमुच्यत इत्यन्यथाप्रतीतिप्रतीकारं तत्तात्पर्यवर्णनेन करोति ॥ अयमात्मेति । नात्मशब्दो जीवपरः किन्तु परमात्मपरः । भुवि यथा भौमानि भूतानि यान्त्यपयान्ति यथाऽयमात्मेषु भूतेष्वागतेषु न विपर्येति । भूरि वाव तिष्ठत इत्यात्मा च जीव इत्यन्यथाप्रतीतिनिरासायात्मपदार्थमाहेत्यवतारयन्ति । यतो द्वयवाच्यः परमात्मेव । यतः परमात्मनः सकाशादेवानेकविधम्, 'अहं भोगी, सिद्धोऽहं बलवान्सुखी । आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मयेत्याद्यनेकविधमैक्यं यतश्च तस्मादेवं विपर्ययो विपरि विपरीतोऽयोऽयतेर्गत्यर्थत्वेन ज्ञानमर्थः । ततश्च विपर्ययो विपरीतज्ञानमिति लभ्यते । तृतीयान्तविवरणेन विपर्यये इत्यस्य तृतीयान्ततया विपरिणामो यत इत्यस्यावृत्त्या विपर्ययो भवति यतश्चेति सार्वविभक्तिकस्तसिरिति तृतीयान्तत्वेनेति विपरिणतस्य विपरीतज्ञानेन करणेन यतश्च परमात्मानं संसृतिर्देहयोगवियोगरूपिणी न विपर्येति । स एव भगवान्न निवर्तते । तर्हि को निवर्तत इत्यत आह ॥ पुत्रादिकं त्विति । आत्मशब्दः पुत्रादिपरोऽपीति दर्शयति । विपर्येतीत्यावृत्त्याऽन्वेतव्यमित्याह ॥ विपर्येतीति ॥ अथ मूलार्थः ॥ देहस्यागमापगमयोः सतोरन्तःस्थस्य भगवतोऽपि तौ स्यातामित्यतस्तात्कालिकापायविधुरां धरां स्थूलदृष्टिविवक्षया दृष्टान्तीकृत्य भगवतस्तावित्याह ॥ भुवीति । यथा भौमानि भूतानि पार्थिवान्युत्पत्तिकाले आयान्ति लयकालेऽपयान्ति च । न च भूरागमापायवती यथा तथाऽयमात्मा परमात्मा भूतेषु विपर्ययवत्सु सत्स्वपि न विपर्येति । यतः परमात्मनः सकाशादनेकविधोऽभेदो मानेन वक्ष्यति । तदनेकविधा ताम् । अभेदो यतः परात्मन एव । आत्मविपर्ययो मिथ्याज्ञानेन । प्रथमा तृतीयार्थे । यतो येन विपरीतज्ञानेन प्राप्तो देहयोगवियोगश्चेति संसृतिर्न निवर्तते । आत्मविपर्यय आत्मनः पुत्रादेर्विपर्ययोऽपि यतो भवतीत्यावृत्त्याऽन्वयः । आत्मविपर्यय आत्मनः स्वदेहस्य विपर्ययः पुत्रीभवनं तदात्मविपर्ययः पितृत्वादिकं च भवतीत्यन्वेतव्यम् ॥ १९,२० ॥

सुमनोरञ्जनी — देवशब्दोदितपरमात्मनोऽपि यदा जनिमृती तदा कथं तस्य प्रेरकतेत्यत आह ॥ भुवीति । भौमानि पार्थिवानि वृक्षादीनि यथा आयान्ति उत्पद्यन्ते अपयान्ति नश्यन्ति तथा भूतानि प्राणिनोऽपि आयान्त्यपयान्ति च । एतेषु भौमेषु विपर्यत्सु अपि भूः भूमिः यथा न विपर्येति नागमापायौ प्राप्नोति तथाऽयमात्मा दैवशब्देन प्रकृतः परमात्मा नैव विपर्येति । नैवागमापायौ प्राप्नोतीति योजना । तात्पर्ये अयमात्मेति मूलस्थं पदमनूद्य परमात्मेति व्याख्यानादेषोऽर्थोऽवगम्यते ॥ १९ ॥

यतोऽनेकविधोऽभेदो यत आत्मविपर्ययः ।
देहयोगवियोगश्च संसृतिर्न निवर्तते ॥ २० ॥

तस्माद् भद्रे स्वतनयान् मया व्यापादितानपि ।
माऽनुशोच यतः सर्वः स्वकृतं विन्दतेऽवशः ॥ २१ ॥

तात्पर्यम् – तस्मात्तस्मिन्नेव स्थितिं कृत्वा माऽनुशोच ॥ २१ ॥

सत्यधर्मीया — तस्माद्भद्रे स्वतनयानिति श्लोकेऽवशः स्वकृतं विन्दते सर्वो जन इति कर्मस्वातन्त्र्यं प्रतीयते । तनयानां कर्माधीनमृतिज्ञानेन देवक्या शोकोऽकर्तव्यश्च कथमित्यतस्तस्यापि यः प्रेरकस्तस्मिन्स्थिरमतिश्चेत्सर्वं सुघटमित्याह ॥ तस्मादिति । तस्मात्परमात्मनो विपर्यासात्तस्मिन्नविपर्यस्ते भगवति स्थितिं, स एव तत्तत्कर्मानुसारेण हननादिकर्तेति निष्ठां कृत्वा माऽनुशोच न शोकं कुरु ॥ ततश्चायं श्लोकार्थः ॥ हे भद्रे! सप्तमी तादर्थ्ये वा । मङ्गलार्थम् । मया स्थूलदृष्ट्या व्यापादितान्संहृतान्स्वतनयानपि ततो माऽनुशोच नानुशोच । अवशो विष्णुवशः सर्वो जनो यतः स्वकृतं विन्दते । भद्रे नित्यमङ्गलमूर्तौ । अपिना स्थितिं कृत्वा माऽनुशोचेति वा । भद्रे भगवत्यनेकविधो लोकदृष्ट्या रामोऽहं सुख्यहं स्वतन्त्रोऽहमित्यादिभेदोऽने प्राणे तदुपलक्षितऋजुगणे कविधोऽभेदो ब्रह्माहं स्यामित्यादिरूपः । एवं सर्वः शर्वः । एवं सर्वस्तत्तत्पदयोग्यस्तत्तत्पदमाकाङ्क्षन्स्वकृतं सु अकृतं क्लृप्तमित्यकृतं तत्परं विन्दत इत्यतस्तात्पर्यानुसारेणार्थोऽवधेयः । तस्मादपरिहार्यार्थे न त्वं शोचितुमर्हसीति तात्पर्यं ज्ञेयम् । मया व्यापादिताः स्वतनया मत्पुत्रा एवेति माऽनुशोच इत्ययं ग्रन्थकृदान्तरङ्गिक उत्तरार्धे वक्ष्यमाणरीत्या भावोऽवसेयः ॥ २१ ॥

सुमनोरञ्जनी — कुतो न विपर्येतीत्यत आह ॥ यतोऽनेकविध इति । अयोग्यानामिति शेषः । आत्मविपर्ययः आत्माधिष्ठानकभ्रमविषयः । भ्रमश्च अहं ब्रह्मास्मि, अहं देवोऽस्मि, अहं जातः । अहं वर्धे । धनवान् । अहं म्रिये इत्यादिरूपः । एतादृशभ्रमविषयोऽनेकविधोऽभेदः । आत्मनः स्वस्य विपर्ययो नरकादिर्यस्मात्तादृगनेकविधोऽभेदः ऐक्यज्ञानमिति वा । नरकाद्यनर्थसाधनमैक्यज्ञानमिति

यावत् । यद्वाऽनेकविधोऽभेदः । ब्रह्मैक्यम् । देवैक्यम् । देहैक्यमित्यादिरूपेण नानाप्रकारः । तथा साधनानेकविधाभेदप्रकारमिथ्याज्ञानमिति यावत् । यतः यस्मात्परमात्मन एव भवति । अत्रापि मध्यमानामिति शेषः । मध्यमानां च यतो यस्मात्परमात्मन एव । देहयोगवियोगरूपा वास्तवी संसृतिर्न विपर्येति न निवर्तत इति पूर्वेणान्वयः । नित्यसंसार एव तेषामिति भावः । न निवर्तत इत्यपि क्वचित्पाठः । इदमुपलक्षणम् । सुरा अपि ज्ञानात्परं पदं यस्मात्प्राप्नुवन्तीत्यपि ग्राह्यम् । एवमुत्तमाधममध्यमभेदेन निखिलजीवानां स्वस्वयोग्यगतिदायकस्य हरेः कथमागमापायौ स्यातामिति भावः । यतः सर्वोऽपि जनः अवशो विष्णुवशः सन् स्वकृतं स्वीयकर्मफलमेव विन्दते अनुभवति । तस्मात् मया व्यापादितान् निहतानपि पुत्रान्प्रति मा शोच । किं तु यद्वशादिदं भवति तस्मिन्परमात्मनि निष्ठां कुर्विति । तदेतदभिप्रेत्य व्याख्यातमाचार्यचरणैः । यतः परमात्मनोऽनेकविधमैक्यं विपरीतज्ञानेन । यतश्च संसृतिर्न निवर्तते । तस्मात्तस्मिन्नेव स्थितिं कृत्वा माऽनुशोच ।

अहं ब्रह्मास्मि देवोऽस्मि नास्मि केवलमानुषः ।
जातोऽस्मि वर्धे धनवान् म्रिय इत्यादिकाः सदा ॥
देहादिषु च देवेषु परे ब्रह्मणि चाभिधाः ।
मोहाद्यन्मायया नित्यं दृश्यन्तेऽधममध्यमे ॥
स ईशो न विपर्येति सर्वेशत्वात्कदाचन ।
पुत्रादिकं विपर्येति पुत्रादिश्च यतो भवेत् ॥ इति ब्राह्मे ।

तल्लक्षणैर्विहीनः सन् ब्रह्मदेवोऽस्मि चेति तु ।
असुराः प्रतिपद्यन्ते जन्यादिं मानुषा जनाः ॥ इति च ।
परब्रह्मण एकस्य ब्रह्मास्मीति विचिन्तनम् ।
परं ब्रह्मेति रामादि लक्षणैरवधारयेत् ।
देवोऽस्मीति च देवानां तच्च ज्ञेयं स्वलक्षणैः ॥
मर्त्यानां मानुषोऽस्मीति प्रतिपत्तिर्विधीयते ।
अन्यथाप्रतिपत्या तु तमो यान्ति विनिश्चयात् ॥
अन्यथा प्रतिपद्यन्ते असुरा नियतं जनाः ।
घोरं तमश्च ते यांति यथाज्ञानात्परं सुराः ॥ इति च ।

अयमर्थः । विपरीतज्ञानेन विषयीकृतमनेकविधमैक्यम् । यतो यस्मात्परमात्मन इत्यनेनात्मविपर्ययोऽनेकविधोऽभेद इति सामानाधिकरण्यम् । आत्माधिष्ठानकः विपर्ययो यस्य यद्विषयक इति

विग्रहश्च सूचितो भवति । यतश्च परमात्मनः सकाशात् संसृतिर्न निवर्तते किन्तु पुनः पुनः संसार एवावर्तत इति भावः । अनेनोत्तरार्धं विवृतम् । यस्मात् कर्मफलदाता हरिरेव तस्मात् तस्मिन्नेव निष्ठां तद्विषयिणीं बुद्धिं कृत्वा माऽनुशोच । जीवकृतं स्वाधीनं कर्म निमित्तीकृत्य श्रीहरिरेव तत्फलं सुखदुःखादिकं प्रापयतीति बुध्या शोकं जहीति भाव इति भावः । अनेकविधोऽभेद इति यदस्यानेकविधत्वमुक्तं तद्विवृण्वन् पूर्वेणान्वयं च प्रमाणेन प्रदर्शयति ॥ अहं ब्रह्मेति । अहं ब्रह्मेति भ्रमविषयत्वमेका विधा । देवोऽस्मीत्यपरा । नास्मीत्यन्या । जातोऽस्मीत्यादिना पुनश्चतुर्थीति विधाः ज्ञेयाः । इत्यादिका इत्यादिविपर्ययविषयाः । यद्वा इत्यादिका इत्यादिरूपा ॥ देहादिष्विति । अत्र देहादिष्विति सप्तमी पञ्चम्यर्थे । द्वितीयार्थे तृतीयार्थे पञ्चम्यर्थे च सप्तमी । चतुर्थ्यर्थे चेत्यत्रैवाचार्यैरुदाहरिष्यमाणवचनात् । पूर्वोक्तविपर्ययगोचरा । देहादिषु देहादिभ्यः । आदिना ऋष्यादिभ्यः । देवेषु देवेभ्यः । ब्रह्मणि ब्रह्मणश्च याः पञ्चभिदाः ऐक्यानि । अत्र देहैक्यभ्रमो नाम देहात्स्पुटतरविवेकाभावो बोध्यः न तु देहात्मभ्रमः । मम देह इति ह्येव न देहोऽहमिति प्रमा । इत्यादिनाऽऽचार्यैरेवान्यत्र देहात्मभ्रमस्य निरस्तत्वात् । अधममध्यमे अधमसहितमध्यमे । अत्र सप्तमी तृतीयार्थे । तत्राधमेन ब्रह्माद्यैक्यं मध्यमेन देहैक्यं दृश्यत इति विवेकः । स ईश इत्यनेनास्य श्लोकस्य नायमात्मा विपर्येतीति पूर्वेणान्वयः प्रदर्शितः । मया व्यापादितान्स्वतनयान्मा शोचेति गूढाभिसंध्या वदतः कंसस्याभिप्रायं व्यञ्जयितुमाह ॥ कदाचनेति । कदाचन, अद्य वा कालान्तरे वा पुत्रादिकं पित्रादिश्च विपर्येति नश्यति । कुतः । यतो भवेत् उत्पद्यते । उत्पत्तिमतो नाशनियमात् । पुत्रादिकं यतो भवेत् स पित्रादिरिति वा । इत्थं च त्वत्पुत्राणां पित्रादिस्थानापन्नानामस्मदादीनां च कालविशेषे विपर्यासस्य नियतत्वात् मृतपुत्रान् प्रति शोको न कार्य इति अभिसन्धिरिति भावः । अनेन स एव न विपर्येतीति स्वोक्तावधारणव्यावर्त्यं प्रदर्शितं भवति । ननु अहं ब्रह्मास्मीत्यादिप्रतीतीनां भ्रमत्वमेव कुतः प्रमात्वं किं न स्यादित्यतो भ्रमत्वमुपपादयति ॥ तल्लक्षणैरिति । तल्लक्षणैः तेषां ब्रह्मादीनां लक्षणैः स्वातन्त्र्यादिभिः विहीनः सन् । एकवचनं बहुवचनार्थे । तुरवधारणे । विहीनाः सन्त एव । ब्रह्मास्मि देवोऽस्मीति वा असुराः प्रतिपद्यन्ते । मानुषाः मध्यमजीवाः देहलक्षणैर्विहीनाः सन्तो देहगतं जन्यादिस्वात्मसु प्रतिपद्यन्ते । अतो भ्रान्ता इति भावः । नन्वहं ब्रह्मास्मि देवोऽस्मीत्यादिप्रतीतेर्भ्रान्तित्वे रामकृष्णादीनामहं ब्रह्मास्मीत्याद्यनुचिन्तनं शास्त्रे प्रतिपाद्यते तन्न स्यात् । न हि रामकृष्णादयो भ्रान्ताः भवन्तीत्यत आह ॥ परब्रह्मण इति । रामकृष्णादेर्ब्रह्मास्मीति विचिन्तनं विधीयते प्रतिपाद्यते शास्त्रे कुत इत्यतः उक्तं परब्रह्मण इति । हेतुगर्भमिदम् । परब्रह्मरूपत्वाद्रामादेरिति । कथं ज्ञेयं रामादेः परब्रह्मत्वमित्यत आह ॥ परब्रह्मेति । रामादि रामकृष्णादिकं रूपम् । लक्षणैः अप्रतिहतशक्तिमत्वादिरूपलक्षणैः परं ब्रह्मेत्यवधारयेत् निश्चिनुयात् ।

देवानां ब्रह्मादीनां देवोऽस्मीति चिन्तनं विधीयते । तदपि युक्तमेव । तेषां देवत्वेन प्रतीतेर्भ्रमत्वासंभवात् । तच्च तेषां देवत्वम् । स्वलक्षणैः स्वाभाविकलक्षणैर्ज्ञेयम् । एवं मर्त्यानां मानुषाणां स्वरूपतो मानुषोऽस्मीति चिन्तनमपि न भ्रान्तिरिति आत्मविपर्यय इति मूलस्य प्रकारान्तरेणाभिप्रायं व्यनक्ति ॥ अन्यथेति । असुराः जनाः नियतं नियमेन अन्यथा प्रतिपद्यन्ते । अतस्ते घोरं तमो यान्तीत्यनेन यतोऽसुराणामनेकविधोऽभेदः अभेदभ्रमः तत्फलतया । आत्मविपर्ययः आत्मनः असुरजीवस्य विपर्ययः तम आद्यनर्थप्राप्तिरूपः यस्मादेव भवतीत्यर्थ उक्तो भवति । इममेवाभिप्रायं मनसि निधाय पदरत्नावली प्रवृत्ता । मूलमुपलक्षणमिति भावेनाह । यथा ज्ञानात्परं सुरा इति ॥ यथाज्ञानात् यथार्थज्ञानात् । सुराः परं परब्रह्मैव यान्तीति ॥ २०,२१ ॥

यावद् हतोऽस्मि हन्ताऽस्मीत्यात्मानं मन्यतेऽस्वदृक् ।
तावत् तदभिमान्यज्ञो बाध्यबाधकतामियात् ॥ २२ ॥

तात्पर्यम् – 'अहं ब्रह्मास्मि देवोऽस्मि नास्मि केवलमानुषः । जातोऽस्मि वर्धे धनवान्म्रिय इत्यादिका सदा । देहादिषु च देवेषु परे ब्रह्मणि चाभिदा । मोहाद्यन्मायया नित्यं दृश्यतेऽधमध्यमे । स ईशो न विपर्येति सर्वेशत्वात्कदाचन । पुत्रादिकं विपर्येति पित्रादिश्च यतो भवेदि'ति ब्राह्मे ॥ 'तल्लक्षणैर्विहीनः सन्ब्रह्मदेवोऽस्मि चेति तु । असुराः प्रतिपद्यन्ते जन्मादीन्मानुषा जना' इति च ॥ 'परं ब्रह्मण एकस्य ब्रह्मास्मीति विचिन्तनम् । परब्रह्मेति रामादिलक्षणैरवधारयेत् । देवोऽस्मीति च देवानां तच्च ज्ञेयं स्वलक्षणैः । मर्त्यानां मानुषोऽस्मीति प्रतिपत्तिर्विधीयते । अन्यथाप्रतिपत्त्या तु तमो यान्ति विनिश्चयात् । अन्यथा प्रतिपद्यन्ते आसुरा नियतं जनाः । घोरं तमश्च ते यान्ति तथा ज्ञानात्परं सुरा' इति च ॥ २२ ॥

सत्यधर्मीया –– स्वयं श्लोकत्रिकं व्याकृत्यानेकविधतामभेदस्य दर्शयन्मानेन तेनैव स्वोक्तार्थं द्रढयति ॥ अहं ब्रह्मास्मीत्यादिना । अहं ब्रह्मास्मीत्येकविधमैक्यं केवलमानुषो यादृशतादृशमानुषो नास्म्यपि तु मनुष्योत्तम इत्येकविधं, जातो वर्धे धनवान्म्रिये इत्येकविधम् । आदिपदाद-हङ्कारादेर्ग्रहणम् । यद्यप्यहं ब्रह्मास्मीत्याद्यनुरोधेन परब्रह्मणि देवेषु देहादिष्विति वक्तव्यम् । तथा देहे जातोऽस्मीत्याद्यभेदाकारबाहुविध्योपपादनात्तदनुपदमेव देहादिष्विति निरूपणं युक्तमिति व्युत्क्रमोक्तिर्यथायोग्यमन्वयः । अहं ब्रह्मास्मि देवोऽस्मीति परब्रह्मणि । देवेषु तद्विषयेऽभिदाऽभेद-धीर्देहादिषु च साऽनुमानागमाभासजन्या । देहे तद्धर्मेषु न प्रात्यक्षिकी सा । यथोक्तं भक्तिपादीयानुव्याख्यानसुधयोः ।

कचित्प्रत्यक्षतः प्राप्तमनुमागमबाधितम् ।
देहात्मत्वं यदि न तत्प्राप्तं प्रत्यक्षतः कचित् ।
मम देह इति ह्येव न देहोऽहमिति प्रमा ।
उपचारतश्च कृष्णोऽहमिति कर्दमलेपने ।

वस्त्रस्य यद्वदेवं स्यादित्यादीकृत्य क्षमा इत्यन्तेन ग्रन्थेन । देहात्मत्वं प्रत्यक्षप्राप्तमेव न भवति । अतः प्रत्यक्षतः प्राप्तस्यानुमानाबाध इत्यत्र नेदमुदाहरणम् । अयमभिसन्धिः । नास्त्येव देहात्मत्वप्रतीतिर्याऽनुमानादिना बाध्येत । येषां चास्ति नास्तिकादीनां तेषामपि नेन्द्रियजा किन्त्वनुमानागमाभासजन्यैवेति । मा भूत्पण्डितरूपाणां देहात्मत्वप्रतीतिः पामराणामस्त्येव । सैवास्माकमुदाहरणं भविष्यतीत्यतः कचिदित्युक्तम् । तदुपपादयति ।। ममेति । सर्वस्यापि जन्तोर्मम देह इत्येव हि प्रमाप्रतीतिर्न तु कस्यापि देहोऽहमिति । यद्वा यस्मात्सर्वेषां मम देह इत्येव प्रमा सम्यक्प्रतीतिः सदाऽनुवर्तते तस्माद्देहोऽहमिति प्रतीतिर्नावकाशमासादयतीति । देहात्मप्रतीत्यभावेऽपि देहधर्माणां कार्ष्ण्यादीनामात्मनिष्ठत्वप्रतीतिस्तावदस्त्येव । कृष्णोऽहमित्यादिव्यवहारदर्शनात् । सा च लिङ्गाद्यनपेक्ष्यैव जायमाना प्रत्यक्षजन्यैव । बाध्यते चानुमानादिनेति सैवोदाहरणं भविष्यतीत्यत आह ।। उपचारतश्चेति । कृष्णोऽहमिति प्रतीतिर्नास्तीत्यनुवर्तते । कथं तर्हि व्यवहारः कृष्णोऽहमिति । व्यवहारस्तूपचार एवेति योजनेत्यादिना तदेवं स्वभावतः प्रबलेन प्रत्यक्षेण विरुद्धावनुमानागमाभासावेवेत्यन्तेन ग्रन्थेन । अधमश्च मध्यमश्च । सर्वो द्वन्द्व इत्येकवद्भावः । अधमेन सहितो मध्यमस्तस्मिन्निति वा । यन्मायया यस्य भगवत इच्छया तत्कृतो यो मोहस्तस्मादधममध्यमे दृश्येते । अनुमानागमाभासैः सः स्वेच्छानिमित्तकमोहादभिदामतिदाता कदाचन स्वयं न विपर्येति । ईश इत्यतिप्रसक्तम् । जीवादेरपि प्रभुर्हि जीवो जडमपेक्ष्य सोऽपि स्वतनुभवनादेरीष्ट इत्यादेरित्यतो मानं स्वगतमीशपदं वक्त्येतादृशेशस्त्वमिति स्वयमेव व्याकरोति ।। सर्वेशत्वादिति । यद्यपि मध्यमाधम इति वक्तव्यं तथाऽपि ते च बहवः, असुरा बहुला यस्मादित्यादेर्मध्यमा न्यूना इति च द्योतयितुमेवमुक्तिरिति मन्तव्यम् । आत्मविपर्ययपदस्यार्थान्तरमाह ।। पुत्रादिकं विपर्येतीति । तद्विवृणोति ।। पुत्रादिश्च यतो भवेदिति । पुत्रस्य पुत्रे जाते पिता भवति तस्य च पुनरपत्योत्पत्तौ पितामह इत्यादिप्रकारेण पुत्रादिकं विपर्येति व्यवस्थां न भजत इति । अहं ब्रह्माऽहं देव इत्यादिनाऽभेदधियो यन्मोहजत्वमुक्तं तदयुक्तम् । ब्रह्मणो ब्रह्माऽहं देवस्य देवोऽहमिति मतिरपि मोहजा जायेत । इदं च मानावमानितम् । किञ्चाधमेन सह द्वन्द्वनिर्दिष्टमध्यमस्याधमसमता स्यात्सा चानुपपन्नेत्यतः प्रमाणेन तदर्थमाह ।। तल्लक्षणैरिति । तुरधमासुरादेर्मध्यमस्याहं ब्रह्मास्मीत्याद्यभिदामतिफलतमोयोग्यत्वाभावविशेषद्योतकः । तल्लक्षणैर्ब्रह्मदेवादिलक्षणैर्विहीनः सन्नपि

ब्रह्मा देवो वाऽस्मीत्यसुराः प्रतिपद्यन्ते । प्रातिस्विकं पृथक् प्रतिपत्तिरित्येकवचनं विहीनः सन्निति । ते सर्वेऽप्येकफलका इति द्योतयितुमसुरा इति बहुवचनमिति ज्ञेयम् । एवमुत्तरत्रापि । मानुषा जना जन्मादिं जातोऽस्मि वर्धे धनवानित्यादिं प्रतिपद्यन्ते । अनेनातल्लक्षणः स्वयं सन् तत्त्वेन प्रतिपत्ता मोहवांस्तल्लक्षणयुतास्तत्त्वेनात्मानं प्रतिपत्तारस्तु तत्त्वज्ञा इति तच्छङ्कापरास आसेति ज्ञेयम् । एतमर्थं स्पष्टं दर्शयन्मानमाह ॥ परब्रह्मण इति । एकमेवाद्वितीयमित्यादेरेकस्य परब्रह्मणो ब्रह्माऽस्मीति विचिन्तनं न मोहजम् । लक्षणलक्षितत्वात् । तानि चैवं ज्ञेयानीत्याह ॥ परं ब्रह्मेति । रामादिं भगवदवतारम् । लक्षणैस्तदसाधारणैश्चिह्नैस्तृणास्त्रीकरणविश्वरूपप्रदर्शनादिभिः । परब्रह्मेति आगमिकजन्मादिलक्षणैर्वा । अवधारयेत् । आदिपदेन वासुदेवादयो ग्राह्याः । स्वलक्षणैः शास्त्रशंसिततल्लक्षणैर्युतानां देवानां देवोऽस्मीति विचिन्तनं न दोषावहम् । स्वलक्षणैर्ब्रह्मादि-पदयोग्यलक्षणैर्युतानामृज्वादीनां ब्रह्मादिरस्मीति विचिन्तनमिति वा । एवं मर्त्यानां मानुषोऽस्मीति प्रतिपत्तिर्विधीयते ।

आद्यकक्ष्यायाः फलमाह ॥ अन्यथेति । अब्रह्मलक्षणकेषु स्वेषु तत्त्वप्रतिपत्त्या विनिश्चयात्तमो यान्ति । तानपि निर्धारयितुं पुनराह ॥ अन्यथेति । असुरजना इत्यन्वयः । ज्ञानात्सम्यग्ज्ञानात्परं परमात्मानं सुरा यथा तथा नियतं प्रतिपद्यन्ते नियतं तमश्च घोरं यान्ति । अत्र केचित्प्रमाणान्तरेण स्पष्टयन्नैक्यबुद्धीनां च फलं दर्शयति । परब्रह्मण एकस्येत्यवतारयन्नुपसंहरत्यन्यथेतीति केचित् । पृथगभिधानानभिधानाद्ब्रह्मपुराणभागविशेषगतमिति चेत्यन्तवाक्यद्वन्द्वमित्यद्वन्द्वोऽध्वा ॥ अथ मूलार्थः ॥ कंसः संसारानुवृत्तिः कियत्पर्यन्तमित्यतः शंसति ॥ यावदिति । अस्वदृक्, अस्वं वस्तुतो देहादिकं स्वं पश्यतीति । तदभिमानी निन्दिताभिमानवान् । यावदहं हन्ताऽस्मि अहं हतोऽस्मीत्यात्मानं मन्यते तावदज्ञोऽयं बाध्यबाधकतां बाध्यत्वं बाधकत्वं चेयात्प्राप्नुयात् । परमार्थस्तु नाहं हन्ता ते तनयाश्च न मया व्यापादिताः । अतस्त्वया न शोकः कार्य इति कंसवचसो ज्ञेयः । सु अत्यन्ताज्ञ इति वा ॥ २२ ॥

सुमनोरञ्जनी — तस्मिन्नेव स्थितिं कृत्वा माऽनुशोचेत्युक्तम् । कीदृशी स्थितिरित्यतः स्वकर्तृत्वानुसन्धानत्यागेन श्रीहरिकर्तृत्वानुसंधानमेवेत्याह ॥ यावदिति । यावत् यावत्कालं हतोऽस्मीति मन्यते । देहधर्मं हतत्वं स्वात्मन्यारोपयति । स्फुटभेदाग्रहात् । यद्वा तेन हतोऽस्मीति अन्यस्मिन् जीवे स्वातन्त्र्यं मन्यत इति । यावच्च हन्ताऽस्मीति स्वस्मिन् स्वातन्त्र्यं मन्यते । कुतः । अस्वदृक् । स्वः परमात्मा तद्विषयिणी या दृष्टिः तद्रहित इत्यर्थः । सर्वत्र स्थित्वा श्रीहरिरेव स्वातन्त्र्येण कर्तेति ज्ञानशून्य इति यावत् । तदभिमानी हरेरन्यत्र स्वातन्त्र्याभिमानी । अत एवाज्ञो जीवः । तावत् तावत्कालपर्यन्तम् । बाध्यताम् अन्यकृतबाधाजन्यदुःखकृता सूचिताम् । बाधकतां तत्कृतप्रत्यवायं च

इयात् प्राप्नुयात् । स्वस्मिन् कर्तृत्वाभिमानपरित्यागेन श्रीहरिकर्तृत्वानुसन्धाने मम त्वत्सुतहनन-प्रत्यवायः तव मय्यसूयिता च नास्तीति भावः ॥ २२ ॥

क्षमध्वं मम दौरात्म्यं साधवो बन्धुवत्सलाः ।
इत्युक्त्वाऽश्रुमुखः पादौ श्यालस्वस्रोरथाग्रहीत् ॥ २३ ॥

सत्यधर्मीया — साधवो बन्धुवत्सला इति निकटनिविष्टजनानभिलक्ष्य मम दौरात्म्यमियता समयेनानुष्ठितं क्षमध्वमित्युक्तिर्वा । तयोरेव संमाननार्थं बहुत्वारोपेणोक्तिर्वा । शालस्वस्रोरिति पाङ्कः पाठोऽनेकेषु कोशेषु दर्शनात् । श्यालश्च स्वसा चेति तयोः । ननु श्यालाः स्युर्भ्रातरः पत्न्या इत्यमरात्कथमयं शालो वसुदेव इति चेत्तर्हि भिन्नपदतायां भिन्नोदरजः कंसोऽपि कथं भगिनीभ्रातेति त्वयाऽपि वाच्यम् । न च वाच्यं पितृव्यतनयाऽपि नयतो भगिनीति । भगिनीभ्राता कंसो भवतीति शङ्कितं नातङ्कितमिति तु भाक्तम् । कंसस्य भगिनीभ्रातृत्वं स्वीकुर्वतां युष्माभिः कंसभार्याऽपि वसुदेवभगिनी जातेति तद्भ्रातृत्वं वसुदेवस्योररीकृतप्रायमिति भारोऽवतारितोऽस्मच्छिरस इत्यवेहि । भिन्नं पदमेकत्र दृष्ट्वा स्वस्रोरिति घटयितुं बहुगहननिविष्टा नाद्यापि पारङ्गताः । पादाविति श्यालस्य स्वसुश्चेति पृथगन्वयनाद्युज्यते । ग्रन्थकृत्कंसोऽङ्गस्मरणविकल इति चरणौ जग्राह ॥ देवकीतो ज्यैष्ठ्यात्तद्ग्रहणं न मया कण्ठतो वाच्यमिति पदानीत्यनुदाजहारेति ध्वनिः ॥ २३ ॥

सुमनोरञ्जनी — दौरात्म्यं दुष्ट आत्मा मनो यस्य स दुरात्मा । तस्य भावो दौरात्म्यम् । दुर्मनस्कतामित्यर्थः । क्षमध्वम् । कुतो दौरात्म्यं त्वयीति चेत् । ये बन्धुवत्सलाः ते साधवः । अहं च न बन्धुवत्सलः । बन्धुहंतृत्वादतो दुरात्मेति भावः । यद्वा । कुतः । यतो यूयं साधवः । बन्धून् वत्सानिव लान्ति ये तथोक्ताः । वत्सकृतं दौरात्म्यं माता यथा क्षमते तथा यूयमपि क्षमध्वमित्याशयः। शालः शालको वसुदेवः, स्वसा देवकी तयोः ॥ २३ ॥

मोक्षयामास निगडाद् विस्रब्धः कन्यकागिरा ।
देवकीं वसुदेवं च दर्शयन्नात्मसौहृदम् ॥ २४ ॥

सत्यधर्मीया — कन्यकागिरा मायावाण्या विस्रब्धो विश्वासमाप्तो देवकीं वसुदेवं च निगडान्मोक्षयामास । मुच्धातुर्मोचयामासेत्यपि पठन्ति । आत्मसौहृदं स्वसुहृद्भावं दर्शयन्मोचयामासेत्यन्वयः ॥ २४ ॥

सुमनोरञ्जनी — कन्यकायाः दुर्गायाः गिरा वचनेन । विस्रब्धो विश्वासवान् ॥ २४ ॥

भ्रातुर्वचनमाश्रुत्य क्षान्त्वा रोषं च देवकी ।
व्यसृजद् वसुदेवश्च प्रहस्य तमुवाच ह ॥ २५ ॥

सत्यधर्मीया — भ्रातुः कंसस्य वचनं, भुवि भौमानीत्यादिवचनमाश्रित्य क्षान्त्वा समाधानं प्राप्य देवकी वसुदेवश्च तद्वचनमाश्रित्य रोषं व्यसृजत् । अनन्तरं प्रहस्य तं प्रत्युवाच । अविश्वसनीयोऽयमिति ह शोके ॥ २५ ॥

सुमनोरञ्जनी — क्षांत्वा क्षमावती भूत्वा देवकी रोषं कोपं व्यसृजत् तत्त्याज । वसुदेवस्तु प्रहस्य । रोषपरित्यागसूचकमिदम् ॥ २५ ॥

एवमेतन्महाराज यथा वदसि देहिनाम् ।
अज्ञानप्रभवा हन्ति स्वपरेति भिदा यतः ॥ २६ ॥

तात्पर्यम् – देहिनामज्ञानप्रभवा यातनाः स्वपरेति भिदा हन्ति । 'देवोऽहं मानुषो वेति विशेषं तत्र चापि तु । तथैव परमात्मानं विशेषं ब्रह्मजीवयोः । सम्यग्भेदेन यः पश्येत्स हन्त्यज्ञानसम्भवाः । यातनाः परमात्मानं तत्प्रसादाच्च गच्छती'ति ब्रह्माण्डे ॥ २६ ॥

सत्यधर्मीया — एवमेतन्महाराजेति श्लोके यतोऽज्ञानप्रभवाऽज्ञानजाता पर इति इति स्व च भिदा भेदज्ञानं देहिनां हन्ति देहिनोऽनर्थं दत्वा नाशयतीति यद्वदसि तत्तथैवेति कंसशंसितमनुमेने वसुदेव इत्यपार्थं ब्रह्माण्डवचनोक्तप्रकारेण किञ्चिदध्याहृत्य ते तदज्ञानप्रभवा इति द्वितीयाबहुवचनं सदन्वेतीति वदंस्तं पराकरोति ॥ देहिनामिति । स्वपरेति भिदा कर्त्री तज्ज्ञानमिति यावत् । देहाभिमानवतामज्ञानप्रभवा यातनाः प्राप्य तीव्रवेदना हन्ति । देवो देवोऽहं मानुषोऽयं मानुष इति विशेषं वैपरीत्येन वा । तत्रापि विशेषं तरतमभावरूपम् । तथैवात्मानं सर्वस्वामिनम् । परं सर्वोत्तमम् । ब्रह्मजीवयोश्चतुर्मुखतदितरजीवयोः । परमात्मानं पश्येत् । ब्रह्मजीवयोः परमात्मजीवयोरिति वा । सम्यग्भेदेन । विशेषमित्येवोक्तौ भेदाभावेऽपि विशेषस्तत्प्रतिनिधिरङ्गीकृतो भगवद्रूपगुणादाविति तमादाय पुनरुक्तशङ्कोत्तेजनं स्यादिति सम्यग्भेदेनेत्युक्तिः । यः पश्येत्सोऽज्ञानसम्भवा यातना हन्ति तत्प्रसादादेवं ज्ञातभगवत्प्रसादात् । न केवलं यातनाघातोऽपि तु परमात्मानं गच्छति प्राप्नोति ॥ ततश्चायं श्लोकार्थः ॥ परमात्मा न विपर्येति पुत्रादिकं विपर्येति मा शुच इत्यादि देहिनामज्ञानप्रभवा यातनाः स्वपरेति भिदा भेदमतिर्यतो हन्ति ततो, यथा वदसि त्वमेवमेतदिति योजना ॥ २६ ॥

सुमनोरञ्जनी — हे महाराज! त्वं, 'जीवोऽस्वतन्त्रः ईश एव स्वतन्त्रः । स एव सर्वकर्तेत्यादि यथा वदसि एतत् एवमेव सत्यमेव । कुतः । यतः स्वपरेतिभिदा स्वपरेतिशब्दबोध्ययोर्जीव-ब्रह्मणोर्भिदा । अत्र भिदाशब्दः भिद्यते वस्त्वेभिरिति व्युत्पत्त्या भेदकधर्मपरः ।। भेदनं भिदेति व्युत्पत्या अन्योन्याभावपरश्च । अथवा स्वशब्दबोध्ये या भिदा देवत्वमानुषत्वादिप्रभेदः ब्राह्मणत्वाद्यवान्तरप्रभेदश्च । तथा स्वपरयोर्भिदा व्यावर्तकः स्वातन्त्र्यपारतन्त्र्यादिभेदश्च । तथा च स्वपरेति भिदा ज्ञाता सती कर्तरि । अज्ञानप्रभवाः अज्ञानेन जीवेश्वरभिदाऽज्ञानेन प्रभवन्ति उत्पद्यन्त यास्ताः यातना इति शेषः । यातनाः नित्यनरकप्राप्तिरूपाः कर्म । हन्ति परिहरतीति योजना । तदेतदभिप्रेत्योक्तमाचार्यचरणैः । देहिनामज्ञानप्रभवा यातना स्वपरेतिभिदा हन्ति ।

देवोऽहं मानुषो वेति विशेषं तत्र चापि तु ।
तथैव परमात्मानं विशेषं ब्रह्मजीवयोः ।
सम्यग्भेदेन यः पश्येत्स हंत्यज्ञानसंभवाः ।
यातनाः परमात्मानं तत्प्रसादाच्च गच्छति ।। इति ब्रह्माण्ड इति ।

यातना इत्यध्याहृत्य मूलं योजयति ।। देहिनामिति । अनेन स्वपरेति भिदा अज्ञानप्रभवाः यातनाः हन्तीति योजना सूचिता । स्वपरेति भिदेतिशब्दो जीवेश्वरगतभेदकधर्मान् भेदं च वक्तीति भावेन तदर्थप्रतिपादकं प्रमाणमुदाहरति ।। देवोऽहमिति । देवोऽहं मानुषोऽहमिति प्रतीतिगोचरं विशेषं जीवानां मिथो व्यावर्तकं मानुषत्वादिधर्मं देवादिजातिविशेषं वा । तत्रापि देवमानुषेष्वपि विशेषं व्यावर्तकं ब्राह्मणादिजातिविशेषं वा यः पश्येदित्युत्तरेणान्वयः । तथैव आत्मानं परमात्मानम् । परं सर्वोत्तमं यः पश्येत् । तथा ब्रह्मजीवयोः विशेषम् - विशिष्यते वस्त्वनेनेति विशेषः तं,मिथो व्यावर्तकं स्वातन्त्र्यपारतन्त्र्यादिकम् । न केवलमेतावत् किं तु सम्यक् भेदेन जीवेशयोर्जीवानां परस्परं च पारमार्थिकभेदेन सहैव यः पश्येत् जानाति स पुरुषः अज्ञानसंभवाः यातनाः हन्तीति सम्बन्धः । न केवलं यातनाः हन्ति अपि तु तत्प्रसात् भगवत्प्रसादात् परमात्मानं च गच्छतीति तात्पर्ययोजना द्रष्टव्या ।। २६ ।।

शोकहर्षभयद्वेषलोभमोहमदान्विताः ।
मिथो घ्नन्तो न पश्यन्ति भावैर्भावान् पृथग्दृशः ।। २७ ।।

तात्पर्यम् – 'भगवद्दर्शनाद्यस्य विरोधाद्दर्शनं पृथक् । पृथग्दृष्टिः स विज्ञेयो न तु सद्भेददर्शन' इति च भविष्यत्पुराणे ।। 'स्वरूपभेदो हि परजीवयोर्जीवगो मिथः । परस्परेण वस्तूनां विशेषः शास्त्रदर्शितः । सद्भेदोऽयं समुद्दिष्टस्त्वसद्भेदं च मे शृणु । स्वरूपाणां गुणानां च विष्णोर्भेदः

परस्परात् । सर्वस्याविष्णुतन्त्रत्वं शत्रुमित्रादिभेदिता । यच्चान्यच्छास्त्रविद्विष्टमसद्भेदः स ईरितः । सद्भेददर्शनान्मोक्षस्त्वसद्भेदात्तमो व्रजेत् । सद्भेदादर्शनाच्चैव तमो मोक्षस्तथेतरादि' ति च ॥ २७ ॥

सत्यधर्मीया — शोकेति श्लोके पृथग्दृश इति भेददृशो निन्दनात्कथं तदभिनन्दनमित्यतः प्रमाणेनैव पृथक् पदं व्याचष्टे ॥ भगवद्दर्शनादिति । यस्य भगवद्दर्शनाद्विरोधाद्वैपरीत्याद्दर्शनं तदेव पृथग्दर्शनं तद्वान्पृथग्दृष्टिरिति विज्ञेयः । संश्चासौ भेदश्च तं पश्यतीति स वा । सद्भेददर्शनं यस्य स वा । न पृथग्दृष्टिर्विज्ञेय इत्यर्थः । स च सन्भेदः किमन्तर्भेदोऽसंश्च भेदः कतिविधः । तयोः फलं च किमित्यतः प्रसङ्गप्राप्तमिदं सर्वं मानेनाह ॥ स्वरूपभेद इति । परजीवयोः परमात्मनो जीवसर्गस्य च तथा मिथो जीवगः परस्परेण वस्तूनां विशेषः । मानमपि स्वं जीवेश्वरभिदा चैवेत्यादिमूलसहितमाह । शास्त्रदर्शितो विशेष इति । अयं सद्भेदः समुद्दिष्टो मे मत्तः श्रुणु स्वरूपाणां मत्स्यादीनां गुणानां ज्ञानादीनां विष्णोश्च भेदस्तथा परस्पराद्रूपस्यावताररूपस्यावतारान्तरेति परस्पराद्भेदो सन्विष्णुतन्त्रत्वं अ विष्ण्वधीनत्वं विष्णोः शत्रुमित्रादिभेदता शत्रुरयमिदं मित्रमिति भेदवता । भेदितेति प्रचुरपाठ उभयत्राप्यर्थः समः । शास्त्रविद्विष्टं शास्त्रं भेदादिकं तेन वि उपक्रमाद्यानुकूल्यविशेषादुद्विष्टं द्वेषवन्निषिद्धं यच्चान्यत्सोऽसद्भेद ईरित इत्यन्वयः । सद्भेददर्शनान्मोक्षो भविष्यति । न केवलमसद्भेदाज्ज्ञाता तमो व्रजेत् किन्तु सद्भेदादर्शनाच्च तमो व्रजेत् । इतरात्स्वरूपाणामित्यादिना निरूपितासद्भेददर्शनं तेन गम्यत इति कर्मणि क्विपि वा । तेन अतनं यस्येति भावे सम्पदादिक्विपि वा रूपं मोक्षविशेषणम् । इतरस्मादिति वक्तव्यमिति शङ्काऽनेन निरस्तेति ज्ञेयम् । कर्मव्यतिहारे सर्वनाम्नो द्विर्भावः समासवच्च बहुलमिति द्वित्वे परेण परेणेत्यादित्वेन स्थितौ पूर्वपदस्थटादेः सुस्वेऽस्य विसर्जनीये कुप्वोः कः पौ चेति अपवादेन कस्कादिसत्वे परस्परेणेत्यादिसिद्धिर्ज्ञेया । दलद्वये टाबभावः क्लीबादङ्विरहः स्वमोः समासे सोरलुक् चेति सिद्धं बाहुलकात्त्रयम् । अदृष्टपरस्परैरित्यादौ सोर्लुक् च प्राप्तः, सर्वं बाहुलकबलेन समाधेयम् । स्त्रियामिति सूत्रेऽन्योन्यसंश्रयत्वे तदिति भाष्यं च तत्र प्रमाणमिति कौमुद्युक्तेः । परस्परादर्पितहस्ततालं तात्कालमालीभिरहस्य तालम् । परस्परेण छुरितामलच्छवीति तृतीयसर्गेनैषध-प्रथमसर्गमाघाद्युक्तेः परस्परात्परस्परेणेत्युपपन्नेति ज्ञेयम् । शोकदिभिर्युता मिथः परस्परं घ्नतः संहरन्तः पृथग्दृशो भगवद्दर्शनविरोधिदर्शनवन्तो भावैर्ब्रह्मत्वदेवत्वप्रकारैर्भावांस्तद्युक्तान्धर्मिणस्तथा न पश्यन्ति न जानते । ये न पश्यन्ति तेऽपृथग्दृश इत्यन्वयो वा ॥ २७ ॥

सुमनोरञ्जनी — एतादृशं भेददर्शनं योग्यानामेव भवेत् नायोग्यानामित्याह ॥ शोकेति । ये शोकादियुताः मिथः परस्परं घ्नन्तः ते पृथगृदृशः पृथक् भगवद्दर्शनाद्विरुद्धा दृक् येषां ते तथोक्ताः । विपरीतज्ञानिन इति यावत् ते, भावैः पूर्वोक्तधर्मविशेषैः भावान् पदार्थान् न पश्यन्ति न जानन्तीति । पृथगृदृश इत्यस्य भेदज्ञानिन इत्यन्यथाप्रतीतिनिवारणायाहुराचार्यचरणाः ।

भगवद्दर्शनाद्यस्य विरोधाद्दर्शनं पृथक् ।
पृथग्दृष्टिः स विज्ञेयो न तु सद्भेददर्शनः ।। इति भविष्यत्पुराणे ।
स्वरूपभेदो हि परजीवयोर्जीवगो मिथः ।
परस्परेण वस्तूनां विशेषः शास्त्रदर्शितः ।।
सद्भेदोऽयं समुद्दिष्टस्त्वसद्भेदं च मे शृणु ।
स्वरूपाणां गुणानां च विष्णोर्भेदः परस्परम् ।।
सर्वस्याविष्णुतन्त्रत्वं शत्रुमित्रादिभेदिता ।
यच्चान्यच्छास्त्रविद्विष्टमसद्भेदः स ईरितः ।।
सद्भेददर्शनान्मोक्षस्त्वसद्भेदात्तमो व्रजेत् ।
सद्भेदादर्शनाच्चैव तमो मोक्षस्तथेतरात् ।। इति चेति ।।

यस्य पुंसः दर्शनं ज्ञानं भगवद्दर्शनात्पृथक् । कुतः । विरोधान्निमित्तात् । स पुमान् पृथग्दृष्टिरिति विज्ञेयः । सद्भेदस्य दर्शनं यस्यासौ तथोक्तः । न पृथग्दृष्टिरित्युच्यते । सद्भेदशब्दार्थमाह ।। स्वरूपेति । परजीवयोः स्वरूपभेदः स्वाभाविकभेदः । अनेन जीवेश्वरभेदः सङ्गृहीतः । मिथः अन्योन्यम् । जीवेषु गच्छतीति जीवगः । अनेन जीवानां परस्परं भेदः सङ्गृहीतः । परजीवयोः सकाशात् भेदः । अनेन जडेश्वरभेदो जडजीवभेदश्च लभ्येते । वस्तूनां परस्परं भेद इत्यनेन जडजडभेदो गृहीतः । अयं पञ्चविधो भेदः । असद्भेदं मे मत्सकाशात् शृणु । विष्णोः स्वरूपाणां अवताररूपाणां विष्णोर्भेदः परस्परं च भेद एव । गुणानां विष्णोः परस्परं च भेदः । सर्वस्य जगतः अविष्णुतन्त्रत्वं विष्ण्वधीनत्वाभावः । विष्णोः शत्रुमित्रादिभेदिता । अयं शत्रुरयं मित्रं इत्यादिज्ञानमित्यर्थः । इदमुपलक्षणम् । पूर्वोक्तादन्यत् यत् शास्त्रे निषिद्धं स असद्भेद ईरितः । विधेयापेक्षया पुल्लिङ्गोपपत्तिः । न केवलमसद्भेददर्शनात् किन्तु सद्भेदादर्शनाच्च तमो व्रजेत् । इतरात् असद्भेदादर्शनात् ।। २७ ।।

कंस एवं प्रसन्नाभ्यां विस्रब्धः प्रतिभाषितः ।
देवकीवसुदेवाभ्यामनुज्ञातोऽविशद् गृहम् ।। २८ ।।

सत्यधर्मीया — प्रतिभाषित एवमेतन्महाराजेत्यारभ्य पृथग्दृशेत्यन्तेनोत्तरितार्थः । कंस एवं प्रसन्नाभ्यां वसुदेवदेवकीभ्यामनुज्ञात आज्ञप्तो विस्रब्धो गृहमविशत् ।। २८ ।।

सुमनोरञ्जनी — एवं प्रतिभाषितः । वसुदेवेनेति शेषः । देवकीप्रतिभाषणानुक्तेः । तेन विस्रब्धः विश्वासं प्रापितः । प्रसन्नाभ्यां देवकीवसुदेवाभ्यां अनुज्ञात इति योजना ।। २८ ।।

तस्यां रात्र्यां व्यतीतायां कंस आहूय मन्त्रिणः ।
तेभ्य आचष्ट तत् सर्वं यदुक्तं योगनिद्रया ॥ २९ ॥

सत्यधर्मीया — इतो गत उत्तरत्र चकार किं कंस इत्यतः शंसति ॥ तस्यामित्यादिना । योगनिद्रया भगवद्भगिन्या यदुक्तं तत्सर्वं मन्त्रिभ्योऽमात्येभ्य आचष्ट ॥ २९ ॥

सुमनोरञ्जनी — मन्त्रिणः आलोचनकुशलंमन्यान् अमात्यान् । योगनिद्रया दुर्गया यदुक्तं तत्सर्वं आचष्ट कथयामास ॥ २९ ॥

आकर्ण्य भर्तुर्गदितं तमूचुर्देवशत्रवः ।
देवान् प्रति कृतामर्षा दैतेया नातिकोविदाः ॥ ३० ॥

सत्यधर्मीया — भर्तुर्गदितं वचनं देवशत्रवः प्रागारभ्य देवान्प्रति कृतामर्षाः । नातिकोविदा इति नसमासोऽत्यकोविदा इति तदर्थः । तं कंसं प्रत्यूचुः ॥ ३० ॥

सुमनोरञ्जनी — भर्तुः स्वप्रभोः कंसस्य गदितं, भावे क्तः,व्यक्तं वचनं आकर्ण्य । देवशत्रवः। देवाः शत्रवो येषां ते तथोक्ताः । अत एव देवान् प्रति, कृतः अमर्षः क्रोधो यैस्ते । अत एव न अतिकोविदाः प्रत्युत्पन्नमतयः ॥ ३० ॥

एवं चेत् तर्हि भोजेन्द्र पुरग्रामव्रजादिषु ।
अनिर्दशान् निर्दशांश्च हनिष्यामोऽद्य बालकान् ॥ ३१ ॥

सत्यधर्मीया — अनिर्दशान्निर्गता दशभ्योऽहोभ्य इति निर्दशास्ते नेत्यनिर्दशाः । सङ्ख्यायास्त-त्पुरुषस्य वाच्यत इति वार्तिकाड्डच् । तानेवं निर्दशाननतिक्रान्तदशाहानतिक्रान्तदशाहांश्चेत्यर्थः । मृत्युरन्यत्र जात इति मायोक्तेः स्त्र्यादिसन्देहावस्कन्दनाद्बालकानित्युक्तिरिति ज्ञेयम् ॥ ३१ ॥

सुमनोरञ्जनी — अनिर्दशान् न निर्गतानि दश दशसङ्ख्याकानि दिनानि येषां तान् । निर्दशान् निर्गतदशदिनान् ॥ ३१ ॥

किमुद्यमैः करिष्यन्ति देवाः समरभीरवः ।
नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ॥ ३२ ॥

सत्यधर्मीया — सर्वान्सुपर्वाण आशङ्क्य तदसामर्थ्यं स्फोरयित्वा सर्वं सहाधिपं स्वस्वामिनं प्रोत्साहयन्ति ॥ किमिति । समरभीरवोऽमरा उद्यमैः स्वकृतैः किं करिष्यन्ति । धनुषो ज्याघोषैर्मौ-र्वीरवैरुद्विग्नं मनो येषां ते तथा । येषां समरे भीरवो भयध्वनिस्ते किं करिष्यन्तीति वा ॥ ३२ ॥

सुमनोरञ्जनी — उद्यमैः रणोद्यमैः । तव धनुषः ज्याघोषैः ज्या मौर्वी रज्जुः तद्घोषैः । उद्विग्नमनसः उद्विग्नं भयभ्रान्तं मनो येषां ते ॥ ३२ ॥

अस्यतस्ते शरव्रातैर्हन्यमानाः समन्ततः ।
जिजीविषव उत्सृज्य पलायनपरा ययुः ॥ ३३ ॥

सत्यधर्मीया — अस्यतः क्षिपतः ॥ ३३ ॥

सुमनोरञ्जनी — अस्यतः शरान् क्षिपतः । जिजीविषवः जीवितुमिच्छवः । उत्सृज्य रणमिति शेषः ॥ ३३ ॥

केचित् प्राञ्जलयो भीता न्यस्तशस्त्रा दिवौकसः ।
मुक्तकक्ष्यशिखाः केचिद् भीताः स्म इति वादिनः ॥ ३४ ॥

सत्यधर्मीया — मुक्ताः कक्ष्याः काञ्च्यः शिखाश्च यैस्ते । कक्ष्या करिवरत्रायां काञ्च्यां गेहे प्रकोष्टक इति यादवः । भीताः स्म इति वादिनः ॥ ३४ ॥

सुमनोरञ्जनी — पलायनेऽप्यशक्ताः केचिद्दिवौकसो देवाः भीताः । न्यस्तानि भुवि विसृष्टानि शस्त्राणि यैस्ते । प्राञ्जलयोऽभवन् । मुक्ताः कक्ष्याः कांच्यः शिखाश्च येषान्ते ॥ ३४ ॥

न त्वं विस्मृतशस्त्रास्त्रान् विरथान् भयसन्नतान् ।
हंस्यन्यासक्तमनसो भग्नचापानयुध्यतः ॥ ३५ ॥

सत्यधर्मीया — स्वस्वामिधर्मानाहुः ॥ नेति ॥ ३५ ॥

सुमनोरञ्जनी — त्वं तु, विस्मृतानि शस्त्राणि अस्त्राणि च यैस्तान् । विरथान् । भयेन सन्नतान् नम्रान् । अन्यस्मिन्विषये आसक्तमनसः । भग्नचापान् न हंसि न संहरसि ॥ ३५ ॥

किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः ।
रहोजुषा किं हरिणा शम्भुना वा वनौकसा ॥ ३६ ॥

सत्यधर्मीया — क्षेमशूरैर्निर्भयस्थानगमने शूरैः । क्षेमाणां स्वपरिचारकाणां पुरस्तेषु वा शूरैः । क्षेमं स्यान्मङ्गले प्राप्तरक्षणे चारकेऽपि चेति विश्वः । असंयुगविकत्थनैः संयुगादन्यत्र तरुण्यादिपुरो विकत्थनानि वृथा भाषणानि येषां ते तथा तैः । रहोजुषा रह एकान्तं जुषत इति रहोजुट् तेन । हरिणा

विष्णुना किम्? अन्तः समुद्रं शेते भीत इति तेन रुष्टेन तुष्टेन न किञ्चन भविष्यतीति भावः । वनौकसा कैलासवासिना शम्भुना रुद्रेण । इलावर्ते पुंमात्रगमनशून्यवनौकसा ॥ ३६ ॥

सुमनोरञ्जनी — क्षेमशूरैः क्षेमे सत्येव शूरैः न तु भये प्राप्ते । असंयुगविकत्थनैः । असंयुगे रणादन्यत्र विकत्थनं प्रौढिवादो येषां तैः । ननु देवानामीदृशत्वेऽपि तत्सहायाः हरिहरहिरण्यगर्भादयः सन्ति । तेभ्यो बिभेमीति चेत्तत्राहुः ॥ रहोजुषेति । एकान्तसेविना सर्वहृदयगुहाविष्टेनाप्रत्यक्षेणेति यावत् । वनौकसा वनं कैलासस्थितकान्तारमेव ओको निवासस्थानं यस्य तेन शम्भुना रुद्रेण किम् ॥ ॥ ३६ ॥

किमिन्द्रेणाल्पवीर्येण ब्रह्मणा वा तपस्यता ।
तथापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे ।
ततस्तन्मूलखनने नियुङ्क्ष्वास्माननुव्रतान् ॥ ३७ ॥

सत्यधर्मीया — किमिन्द्रेणाल्पवीर्येण । तपस्यता तपः कुर्वता ब्रह्मणा वा चतुराननेन किम् । तथाऽप्येवं सर्वदौर्बल्येऽनुभूतेऽपि सापत्न्याज्ज्ञातित्वाद्वैरित्वाद्वा ते नोपेक्ष्या इति वयं मन्महे जानीमस्तन्मूलखनने तेषां मूलोत्पाटनेऽनुव्रतानस्मान्नियुङ्क्ष्वाज्ञापय ॥ ३७ ॥

सुमनोरञ्जनी — तपस्यता तपः कुर्वता ब्रह्मणा चतुर्मुखेन । यद्यपि देवेभ्यो न भीरस्माकं तथापि रिपवो नोपेक्ष्या इत्याह ॥ तथापीति । सापत्न्यान्निमित्तात् उपेक्ष्याः उपेक्षार्हा न भवन्तीति मन्महे जानीमः । ततस्तेषां देवानां मूलखननार्थं तवानुव्रतान् अनुकूलान् अस्मान् नियुंक्ष्व नियोजय । ॥३७॥

यथाऽऽमयोऽङ्गे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुम् ।
यथेन्द्रियग्राम उपेक्षितस्तथा रिपुर्महान् लब्धबलो न चाल्यते ॥ ३८ ॥

सत्यधर्मीया — ननु सद्यो जातः पोतो भविष्यति तेन किं, बलवान्भवतु तदा पश्याम इति न वद स्वामिन्निति सनिदर्शनं वदन्ति ॥ यथेति । अङ्गे शरीरे । आमयो रोगः । रूढपदो रूढं पदं स्थानं यस्य स सन्निरूढपदो रोगश्चिकित्सितुं नृभिरुपेक्षितो नृभिर्भिषग्भिर्न शक्यते । रोगस्य पारक्यस्योपेक्षणं न विहितम् । विहितं च रक्षणं शरीरस्येतीरितं सत्यम् । परन्तु देवाः स्वीकीयाः कथं कर्तव्यमित्यतो न च स्वकोऽप्युपेक्षणीयो विहित इत्यत्र निदर्शनान्तरमाह ॥ यथेन्द्रियग्राम इति । इन्द्रियसमूह उपेक्षितश्चेद्दुर्विषयेषु गच्छन्नच्छमपि तुच्छं करोति जनमित्युपेक्ष्यो यथा न तथा रिपुर्लब्धबलो महांश्चाल्यते न चलयितुमशक्य इतीदानीमेव तन्मूलविलयनं कर्तव्यमिति भावः । महालब्धबल इति पाठेऽपि नार्थभेदः ॥ ३८ ॥

सुमनोरञ्जनी — स्वोक्तार्थं दृष्टान्तेन दृढयन्ति ।। यथेति । आमयो रोगः समुपेक्षितः औषधादिना अचिकित्सितः । रूढपदश्चेत् रूढं पदं स्थानं येन सः । लब्धस्थान इति यावत् । चिकित्सितुं परिहर्तुं न शक्यते । यथा वा इन्द्रियग्रामः उपेक्षितः पुनर्निगृहीतुं न शक्यते । तथा उपक्षितो रिपुः महान् वयोधिकश्चेत् न चाल्यते चालयितुमप्यशक्यो भवति । कुतः । लब्धं प्राप्तं बलं येन सः । वय आधिक्येन प्राप्तबलत्वादिति । अतो बाल्य एव वैरिवधः कार्य इति भावः ।। ३८ ।।

मूलं विष्णुर्हि देवानां यत्र धर्मः सनातनः ।
तस्य च ब्रह्मगोविप्रास्तपो यज्ञाः सदक्षिणाः ।। ३९ ।।

सत्यधर्मीया — मूलं किं, कथं तन्मथनमित्यतः कथयन्ति ।। मूलमिति । हि यतो विष्णुर्देवानां मूलं मुख्यम् । स केत्यत आहुः ।। यत्रेति । सनातनो धर्मो यत्र तत्र स आस्ते । तस्य च धर्मस्यापि । ब्रह्म च वेदो, गावश्च । विप्रास्तपः सदक्षिणा यज्ञाश्च मूलमित्यन्वयः ।। ३९ ।।

सुमनोरञ्जनी — तन्मूलखनने नियुंक्ष्वेत्युक्तम् । किं तेषां मूलम् । यत्खननं युष्माभिः क्रियत इति तत्राहुः ।। मूलमिति । विष्णुर्देवानां मूलम् । मूलमिव आश्रय इत्यर्थः । स च विष्णुः यत्र सनातनो धर्मस्तत्र । तस्य धर्मस्य । तस्य विष्णोरिति पदरत्नावल्याम् । मूलम् । ब्रह्मगोविप्राः । ब्रह्म वेदः,गावो विप्राश्च, तपः, सदक्षिणाः यज्ञाः ।। ३९ ।।

तस्मात् सर्वात्मना राजन् ब्राह्मणान् ब्रह्मवादिनः ।
तपस्विनो यज्ञशीलान् गाश्च हन्मो हविर्दुघाः ।। ४० ।।

सत्यधर्मीया — ब्रह्मवादिनस्तपस्विनो यज्ञशीलान्ब्राह्मणांस्तस्मात्सर्वात्मना प्रकाशवर्त्मनोपायेन हन्मो हनिष्यामः । हविः क्षीरं दुहन्तीति हविर्दुघा गाश्च हनिष्यामः । एवं चेन्मूलसङ्कालनं भविष्यतीति भावः । दुहः प्रपूरणेऽस्माद्दुहः कप् घश्चेति कप्रत्ययो घश्चान्तादेशः । कित्त्वान्न गुणः ।। ४० ।।

सुमनोरञ्जनी — तस्मात् वेदगोविप्रतपोयज्ञानां विष्णुमूलत्वात् । ब्रह्मवादिनः वेदवादिनो ब्राह्मणान् । हविर्दुघाः हविः यज्ञयोग्यं क्षीरादिद्रव्यं दुहन्तीर्गाश्च हन्म इति ।। ४०,४१ ।।

विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः ।
श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः ।। ४१ ।।

सत्यधर्मीया — स्वोक्तकर्मकर्तव्यतां द्रढयितुमुक्तानुक्तैर्धर्मैः सह वदन्ति ।। विप्रा इति । सत्यं भूतहिताभिहतिः । हरेस्तनूस्तन्वस्तनूर्विद्धीति शेषो वा । तनूः शरीरमिति प्रथमैकवचनं वा । ऊकारान्तः । स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः ।। ४१ ।।

स हि सर्वसुराध्यक्षो ह्यसुरद्विड् गुहाचरः ।
तन्मूला देवताः सर्वाः सेश्वराः सचतुर्मुखाः ॥ ४२ ॥

सत्यधर्मीया — स विष्णुः सर्वसुपर्ववर्योऽसुरद्विट् गुहाचरः । सेश्वराः सेन्द्राः सचतुर्मुखाः सविधयः सर्वा देवतास्तन्मूलाः स मूलं येषां ते तथा ॥ ४२ ॥

सुमनोरञ्जनी — किं धर्मविप्रादीनां भगवत्तनुत्वात्तद्धननमभीप्स्यसे तर्हि ते हन्तव्या एवेत्याहुः ॥ स हीति । तर्हि साक्षादेव स हन्यतां किं तन्मूलान्वेषणेनेत्यत उक्तम् ॥ गुहाचर इति । हृदयगुहाचर इत्यर्थः । तस्याप्रत्यक्षत्वान्न साक्षाद्धन्तुं शक्य इति भावः । तितिक्षा द्वन्द्वसहिष्णुता । एते विप्रादयो हरेस्तनूर्यतः अतोऽयमेवोपायः ॥ ४२ ॥

एवं दुर्मन्त्रिभिः कंसः सह सम्मन्त्र्य दुर्मतिः ।
ब्रह्महिंसां हितं मेने कालपाशावृतोऽसुरः ॥ ४३ ॥

सत्यधर्मीया — फलितं लपन्ति ॥ अयमिति । यद्दषीणां हिंसनम्, अयं तद्वधोपाय इत्यन्वयः । दुष्टाश्च ते मन्त्रा आलोचनानि च, येषां सन्तीति ते तथा । दुष्टाश्च ते मन्त्रिणश्चेति वा । दौष्टयं तु मन्त्रेषु यथायोग्यतयाऽऽन्वेति । ते वदन्तु स्वयं विवेकी कथमिदमशृणोदित्यत आह ॥ दुर्मतिरिति । सोऽपि तादृश इत्यर्थः ॥ ४३ ॥

सुमनोरञ्जनी — संमन्त्र्य आलोच्य । ब्रह्महिंसां ब्राह्मणहिंसाम् । हितं हितकरं कर्म मेने । हितं यथा भवति तथेति वा । कुत इत्यतो निमित्तद्वयमाह ॥ असुरः कालपाशावृतः इति ॥ कालस्य मृत्योः पाशेन आ सम्यक् वृतो युक्तः बद्ध इति यावत् । कदने कलहार्थम् । कामेन इच्छया रूपधरान् अपेक्षितरूपधारणसमर्थान् दानवान् सभायां सन्दिश्य गृहमाविशत् ॥ ४३,४४ ॥

सन्दिश्य साधुलोकस्य कदने कदनप्रियान् ।
कामरूपधरान् दिक्षु दानवान् गृहमाविशत् ॥ ४४ ॥

सत्यधर्मीया — ब्रह्महिंसां तदादिध्वंसं कंसः स्वस्मै हितं क्षेमङ्करं मेने । तन्मननसाधनमाह ॥ कालपाशावृत इति । तदावृतता कुत इत्यत आह ॥ असुर इति । साधुलोकस्य कदने, कदनमेव प्रियं येषां ते तथा तान् सन्दिश्याज्ञाप्य । कामरूपधरान्दानवान् दिक्षु , स्वयं गृहमाविशन्निविविशे ॥४४॥

ते वै रजःप्रकृतयस्तमसा मूढचेतसः ।
सतां विद्वेषमाचेरुरारादागतमृत्यवः ॥ ४५ ॥

सत्यधर्मीया — ते कंससन्दिष्टा रजःप्रकृतयो रजोगुणसर्जनमितमिति रजःप्रकृतयोऽसुरजातित्वात्तमसा मूढचेतसः सतां देवभूदेवादीनां विद्वेषमाचेरुरकुर्वन् । आरादागतो मृत्युर्येषां ते तथा ॥ ४५ ॥

सुमनोरञ्जनी — रजःप्रकृतयोऽपि । तमसा तमोगुणेन । मूढं मोहयुक्तं चेतो येषां ते तथोक्ताः । आरात्समीपे ॥ ४५ ॥

आयुः श्रियं यशो धर्मं लोकानाशिष एव च ।
हन्ति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ॥ ४६ ॥

इति श्रीमद्भागवते दशमस्कन्धे पञ्चमोऽध्यायः ॥

सत्यधर्मीया — सामान्यत एवं कुर्वतामवमान्यतैवमित्याह ॥ आयुरिति । लोकान्प्राप्यान् । आशिषोऽभिलाषविशेषान् । किमुत सर्वाणि श्रेयांसि । महदतिक्रमो महदुल्लङ्घनं हन्ति नाशयति ॥४६॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे पञ्चमोऽध्यायः ॥ १०-५ ॥

सुमनोरञ्जनी — विष्ण्वादिमहदतिक्रमफलमाह ॥ आयुरिति । महदतिक्रमः महतां अपराधाचरणम् । आशिषः आशास्यमानान् ॥ ४६ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां पञ्चमोऽध्यायः ॥ १०-५ ॥

॥ अथ षष्ठोऽध्यायः ॥

श्रीशुक उवाच -

नन्दस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः ।
आहूय विप्रान् वेदज्ञान् स्नातः शुचिरलङ्कृतः ॥ १ ॥

सत्यधर्मीया — ॥ कन्यामादाय विन्यस्य दायादं यथापूर्वमागत्य वसुदेव उदवसिते वसति सति व्रजे गोपव्रजे कथा का प्रवृत्तेत्यतस्तां कथयत्यस्मिन्नध्याये । तत्रादौ नन्दस्यानन्दतुन्दिलतया

जातपोतजातकर्मादिप्रवर्तनं कथयति श्रीशुकः । तुशब्द आन्तरङ्गिकसर्वविशेषसूचकः । जात आल्हादो यस्य सः । महामना महन्मनो यस्य स मनस्वी । वेदज्ञान्वेदज्ञानिनो न प्रथामात्रेण तदाकरणं किन्तु यान्स्वयं ज्ञान् जानातीति ज्ञास्तान्वेद तान्विप्रानाहूयेति वा । अलङ्कृतस्तथा च याज्ञिकाः स्वयमलङ्कृत्येति वदन्ति ॥ १ ॥

सुमनोरञ्जनी — नन्दो नन्दगोपः । आत्मजे आत्मनि स्वस्मिन् जायते प्रादुर्भवति इति आत्मजे श्रीहरौ । उत्पन्ने उत्पन्न इति ज्ञाते सति । जाताह्लादो जातसन्तोषः । स्वस्त्ययनं माङ्गल्यवचनं वाचयित्वा विप्रैरिति विभक्तिव्यत्ययेनानुवर्तते । तथा पितृदेवार्चनं वृद्धिश्राद्धादिना कारयामास । पुरोधसेति शेषः ॥ १,२ ॥

वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य वै ।
कारयामास विधिना पितृदेवार्चनं तथा ॥ २ ॥

सत्यधर्मीया — स्वस्त्ययनं पुण्याहवाचनं ॐ पुण्याहं ॐ पुण्याहमिति वदन्ति तद्वाचयित्वा । तथा पितृदेवार्चनं पित्रोर्मातृदेवो भव पितृदेवो भवेत्यादिनाऽर्यमादिवृद्धपितृपितामहादीनां देवाद्यर्चनं विधिना कारयामास जातकर्म च कारयामास । वैशब्दोऽनन्तनामाऽप्यनन्तोऽनुनयेन स्वीचकार कारुणिक इति द्योतकः । वै अनुनयेऽपि चेति विश्वः ॥ २ ॥

धेनूनां नियुते प्रादाद् विप्रेभ्यः समलङ्कृते ।
तिलाद्रीन् सप्त रत्नौघान् शातकुम्भान्तरावृतान् ॥ ३ ॥

सत्यधर्मीया — नियुते द्वे लक्षे । समलङ्कृते सुन्दरपादसुवर्णशृङ्गरूप्यखुरेत्याद्युक्तालङ्कारसहिते । समलङ्कृत इति पाठस्तु न सरलः । अनुपदं शुचिरलङ्कृत इत्युक्तेः । तथाऽपि वित्तवितरणे तस्य शक्ततां सम्यगलं पूर्णत्वेन कृत इति वा सम्यगलं फलपर्यवसायि कृतं कर्म यस्य स इति वा बोधयति तदिति ज्ञेयम् । अन्तरा मध्ये शातकुम्भानां सुवर्णराशीनां स्थापितानामावृतमावरणं स्वैर्येषां तान्सप्त तिलाद्रींस्तिलपर्वतान् पर्वताकारेण स्थापितांस्तिलानित्यर्थः । रत्नौघांस्तत्सङ्घान्विप्रेभ्यः प्रादात् ॥३॥

सुमनोरञ्जनी — धेनूनां गवां नियुते द्वे लक्षे । पङ्क्तेः शतसहस्रादिक्रमाद्दशगुणोत्तरमित्यमरः । नियुतशब्दो विंशत्सहस्रपर इत्यपि वदन्ति । सप्त तिलाद्रीन् । कथंभूतान् । रत्नौघान् रत्नानां ओघः समूहो येषु तान् । शातकुंम्भान्तरावृतान् अन्तर्गर्भितसुवर्णान् । शातकुम्भं सुवर्णे स्यादिति विश्वः ॥ ॥३ ॥

कालेन स्नानशौचाभ्यां संस्कारैस्तपसेज्यया ।
शुद्ध्यन्ति दानैः सन्तुष्ट्या द्रव्याण्यात्माऽऽत्मविद्यया ॥ ४ ॥

सत्यधर्मीया — स्नातः शुचिरित्यादिप्रसङ्गसङ्गत्येयतां वस्तूनामियता साधनेन शुद्धिरित्याह ॥ कालेनेति । कालेन भूम्यादिकं, देहादि स्नानेनास्पृश्याङ्गस्पर्शादिशौचेन । गर्भादिकं संस्कारैस्तपसेन्द्रियादि, इज्यया यागेन ब्राह्मणादि, दानैर्द्रव्याणि । बहुवचनेन शुध्द्यर्था अत्रोक्ता द्रव्यपदेनापि ग्राह्या इति सूचयति । सन्तुष्ट्या प्रतिग्रहीतृविप्रादिसन्तोषेणापि द्रव्यस्य शुद्धिर्ज्ञेयेति ज्ञेयम् । दातुरपि सन्तुष्ट्यर्थः । विना तोषं वितरणे न फलमिति भावः । आत्मा मन आत्मविद्यया भगवदवगमेनेति द्रव्याणि शुध्यन्तीत्यकृत विवरणं नन्द इति भावः । आत्मविद्ययेत्युपसंहारेण तन्मुख्यतायां सत्यां तस्यां मुक्ता साधने सत्यसति च शुद्धिकाऽभिप्रैतीति च ज्ञेयम् ॥ ४ ॥

सुमनोरञ्जनी — कानिचित् द्रव्याणि कालेन शुध्यन्ति । यथा तुलस्यादीनि । कानिचित् स्नानशौचाभ्याम् । यथा शरीरादिकम् । कानिचित्संस्कारैः । यथा कांस्यादि । अथवा जातकर्मादिसंस्कारैः गर्भः । कानिचित् तपसा । इज्यया पूजया । यथा अर्च्यादि । दानैर्वित्तम् । सन्तुष्ट्या मनः । आत्मा जीवः । आत्मविद्यया । अतो दानादिकं युक्तमेवेति भावः । अयं श्लोकः क्वचित् पुस्तकेषु न दृश्यते ॥ ४ ॥

सौमङ्गल्यगिरो विप्राः सूतमागधबन्दिनः ।
गायकाश्च जगुर्नेदुर्भेर्यो दुन्दुभयो मुहुः ॥ ५ ॥

सत्यधर्मीया —सौमङ्गल्याः सुमङ्गलताविषयिण्यो गिरो येषां ते तथा । शुभमस्त्वित्यादिवादिनः। सूताः स्वयं प्रबन्धं बद्ध्वा वक्तारः । मागधा अन्यकृतपाठकाः । बन्दिनः कृतकर्मनिरूपकाः । गायकाः गतम् । भेर्यो वादयितृसङ्केततो मन्द्रं ध्वनन्त्यीदुन्दुभयः पुंभेर्यः पृथुध्वनिमन्तोऽत एव नेदुरित्येकक्रियान्वयः । दुन्दुभिर्दितिजे भेर्यामक्षबिन्दुत्रिकद्वय इति विश्वः । दुन्दुभिः पुमानित्यमरः । दुन्दुभिरक्षेष्विति लिङ्गानुशासनम् । अक्षेषु किम् । अयं दुन्दुभिर्वाद्यविशेष इति तट्टीकोक्तेश्च । भेर्यो मानुष्यो दुन्दुभयो नाभसा इति वा । मुहुः पुनः पुनः ॥ ५ ॥

सुमनोरञ्जनी — चन्द्रोदयेन समुद्र इव भगवदवतारेण जातसंभ्रमाणां सज्जनानां प्रवृत्तिमाह ॥ सौमाङ्गल्येति । सूताः स्वकृतस्तुतिपाठकाः । परकृतस्तुतिजीविनो मागधाः । प्रबन्धस्तुतिपाठकाः बन्दिनः । एते सौमाङ्गल्याः सुमङ्गलकराः गिरो येषां ते तथाविधा अभवन् ॥ ५ ॥

प्रजाः सम्मृष्टसंसिक्तद्वाराजिरगृहान्तराः ।
चित्रध्वजपताकास्रक्चैलपल्लवतोरणाः ॥ ६ ॥

सत्यधर्मीया — सम्मृष्टानि शोधितानि, प्राक् , संसिक्तानि मलयजजलादिना प्रोक्षितानि द्वाराण्यजिराण्यङ्गणानि गृहान्तराणि याभिस्ताः प्रजाः । चित्रा ध्वजा एकजिह्वाः पताका द्विजिह्वा विपर्ययो वा, ताः स्रजस्तत्र तत्र याभिस्ताश्च ताश्चैलपल्लवैर्युतानि तोरणानि बहिर्द्वाराणि याभिस्ताश्च, ताश्च वासःखण्डकिसलयमण्डिततोरणा इत्यर्थः । व्रजः सम्मृष्टसंसिक्तद्वाराजिरगृहान्तरः, चैलपल्लवतोरण इति पठन्ति । अजिरशिशिरेति निपातितः शब्दः ॥ ६ ॥

सुमनोरञ्जनी — प्रजाश्च संमृष्टानि शोधितानि संसिक्तानि चन्दनोदकादिना प्रोक्षितानि द्वाराणि, अजिराणि अङ्गणानि गृहान्तराणि गृहमध्यानि यासां ताः । चित्राः नानावर्णाः ध्वजपताकाः यासां ताः स्रजः, चैलपल्लवाः येषु ते तादृशाः तोरणाः बहिर्द्वारो यासां ताः ॥ ६ ॥

गावो वृषाश्च वत्साश्च हरिद्रातैलरूषिताः ।
विचित्रधातुबर्हस्रग्वस्त्रकाञ्चनमालिनः ॥ ७ ॥

सत्यधर्मीया — हरिद्रामिश्रतैलरूषिताः । विचित्रधातवो गैरिकाद्यास्तैश्चर्चिता बर्हाणां पिच्छानां स्रजो येषां ते च वस्त्राणि च काञ्चनमाला येषां सन्तीति पुंशेषः ॥ ७ ॥

सुमनोरञ्जनी — हरिद्रातैलाभ्यां रूषिताः लिप्ताः । विचित्रधातवो गैरिकाद्याः बर्हस्रजश्च मयूरपिच्छमालाः,वस्त्राणि,काञ्चनमालाश्च येषां सन्तीति तथाविधाः आसन्नित्यर्थः ॥ ७ ॥

महार्हवस्त्राभरणकञ्चुकोष्णीषभूषणाः ।
गोपाः समाययू राजन् नानोपायनपाणयः ॥ ८ ॥

सत्यधर्मीया — महदर्हं मूल्यं येषां तानि च तानि वस्त्राण्याभरणानि कञ्चुकाः कवचानि च । कञ्चुको वारबाणे स्यान्निर्मोके कवचेऽपि चेति विश्वः । उष्णीषाणि शिरोवेष्टनानि किरीटानि वा । उष्णीषं तु शिरोवेष्टे किरीटे लक्षणान्तर इति विश्वः । तैर्भूषिता गोपाः । नानोपायनानि मङ्गलसमये राजपुरतः स्थापनीयानि पाणिषु येषां ते सन्तः समाययुः । राजन् हे परीक्षित्! राजन्ति प्रकाशमानानि नानोपायनानि पाणिषु येषामिति वा ॥ ८ ॥

सुमनोरञ्जनी — महतां अर्हैः योग्यैः वस्त्राभरणकंचुकैः उष्णीषैः शिरोवेष्टनवस्त्रैश्च भूषिताः । नानोपायनानि राज्ञे निवेदनद्रव्याणि पाणिषु येषां ते तथाविधाः सन्तः गोपाः समाययुः ॥ ८ ॥

गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोद्भवम् ।
आत्मानं भूषयाञ्चक्रुर्वस्त्राकल्पाञ्जनादिभिः ॥ ९ ॥

सत्यधर्मीया — यशोदायाः सुतोद्भवं पुत्रोत्पत्तिमाकर्ण्य श्रुत्वा मुदिता गोप्य आत्मानं वस्त्राण्याकल्पा भूषणान्यञ्जनानि कज्जलानि चादयो येषां तैर्हारादिभिश्च भूषयाञ्चक्रुरिति द्वे पदे । अभूषयन् । आकल्पो भूषण इति विश्वः ॥ ९ ॥

सुमनोरञ्जनी — आत्मानं स्वदेहम् । आकल्पानि आभरणानि, अञ्जनानि नेत्रांजनानि तैः ॥९॥

नवकुङ्कुमकिञ्जल्कमुखपङ्कजभूतयः ।
बलिभिस्त्वरितं जग्मुः पृथुश्रोण्यश्चलत्कुचाः ॥ १० ॥

सत्यधर्मीया — नवानि कुङ्कुमान्येव । कुक आदानेऽस्मात्कुक्यते कामिनीभिरिति कुमः आच्छीनद्योरिति योगविभागान्नुमि रूपम् । अथ कुङ्कुममित्यमरः । काश्मीरजन्मेत्यादिः । स एव किञ्जल्काः केसराणि येषु तानि च तानि मुखपङ्कजानि तेषां भूतयः शोभा यासां ताः । पृथवः श्रोण्यो नितम्बबिम्बा यासां ताश्च । चलन्तः कुचा यासां ताः ॥ १० ॥

सुमनोरञ्जनी — नवानि नूतनानि यानि कुङ्कुमकिञ्जल्कानीव कुङ्कुमकुसुमकेसराणीव मुखपंकजेषु भूतिः श्रीर्यासां ताः । बलिभिः सूतिकागृहं प्रति नीयमानवायनैः युताः । पृथुश्रोण्यः विशालकटिपश्चाद्भागवत्यः । चलत्कुचाः सत्यः त्वरितं जग्मुः ॥ १० ॥

गोप्यः सुमृष्टमणिकुण्डलनिष्ककण्ठ्यः चित्राम्बराः पथि शिखाच्युतमाल्यवर्षाः ।
नन्दालयं सवलया व्रजतीर्विरेजुः व्यालोलकुण्डलपयोधरहारशोभाः ॥ ११ ॥

सत्यधर्मीया — सुमृष्टत्वं कुण्डलेषु निष्केष्वपि ज्ञेयमिव मण्यात्मकता च द्वयोर्ज्ञेया । सुमृष्टानि मणिमयानि कुण्डलानि मणिमयानि निष्काणि कण्ठाभरणानि च कण्ठेषु यासां ताः । कुण्डलं वलये पाशे कुण्डलं कर्णभूषणे । निष्कं दीनारकर्षयोर्वक्षोऽलङ्करण इति विश्वौ । चित्राण्यम्बराणि यासां ताः । पथि तीव्रव्रजनसमये मार्गे । शिखाभ्यश्च्युतानि माल्यानि माल्या वा । माल्यं मालाप्रसूनयोरिति विश्वः । तेषां वर्षं यासां ताः । यूषकरीषविषमिश्रवर्षाणि नपुंसके चेति लिङ्गानुशासनात् । वृष्टिर्वर्षमित्यमरः । सवलयाः कङ्कणहस्ताः । व्रजतीर्व्रजन्त्यः । कुण्डलवत्कनकगिरिवद्विद्यमानौ च तौ पयोधरौ स्तनौ च तयोर्हारास्तदुपरि परिपतन्मुक्तामालाः । व्यालोलाश्च ते कुण्डलपयोधरहाराश्च तैः शोभा यासां ताः । कुण्डलं कर्णभूषणे गुडूच्यां काञ्चनाद्रौ चेति विश्वः । पूर्वं मणिः कुण्डलेति तद्ग्रहणेऽपि लोलतया पृथगुक्तिरिति केचित् । वर्तुलतया कुण्डलौपम्यमिति चापरे ॥ ११ ॥

सुमनोरञ्जनी — सु सम्यक् मृष्टानि उज्ज्वलानि मणिकुण्डलानि यासां ताः । निष्कं सुवर्णं कण्ठे यासां ताश्च । निष्कं हेम्नि च तत्पल इति विश्वः । चित्राण्यंबराणि यासां ताः । पथि मार्गे । शिखाभ्यः च्युतानां माल्यानां मालागतपुष्पाणां मालानां वा वर्षाणि यासां तादृश्यो गोप्यः । नन्दालयं व्रजतीः व्रजन्त्य विरेजुः । व्यालोलकुण्डलपयोधरहारैः शोभा यासां ताः ॥ ११ ॥

ता आशिषः प्रयुञ्जानाश्चिरं पाहीति बालके ।
हरिद्राचूर्णतैलाद्भिः सिञ्चन्त्योऽजनमुज्जगुः ॥ १२ ॥

सत्यधर्मीया — ता वनिता बालके आशिषः प्रयुञ्जानाः स्वाभिलाषान्विज्ञापयन्त्य इत्यर्थः । चिरं पाहीत्याशिषः प्रयुञ्जाना इति पातनिकम् । तद्बुध्द्यै युयुजुरित्यर्थं स्वयमेव चिरं पाहीत्यनेन ग्रन्थकृत्पराचकारेति ज्ञेयम् । हरिद्राचूर्णतैलसहितोदकैः । ऋक्पूरबिति समासान्तविधेरनित्यत्वान्न-प्रत्ययः । जनं सिञ्चन्त्य उज्जगुर्गानं चक्रुः । अजनं लोकजनिरहितं बालमुज्जगुरिति वा । अजनमुदिति स्वरूपसुखमदेति जगुरिति ॥ १२ ॥

सुमनोरञ्जनी — ताः स्त्रियः । हरे! चिरं एनं पाहीति । हे बालक । चिरं अस्मान्पाहीति वा । दीर्घायुर्भवेति यावत् । एवमाशिषः आशीर्वचनानि प्रयुंजानाः । जनम् हरिद्राचूर्णतैलाद्भिः सिंचन्त्यः उज्जगुः । अजनं श्रीकृष्णं उज्जगुरिति वा ॥ १२ ॥

अवाद्यन्त विचित्राणि वादित्राणि महोत्सवे ।
कृष्णे विश्वेश्वरेऽनन्ते नन्दव्रजमुपेयुषि ॥ १३ ॥

सत्यधर्मीया — विश्वेश्वरे जगदधिपे । नन्दव्रजमुपेयुषि प्राप्तवति ॥ १३ ॥

सुमनोरञ्जनी — विश्वेश्वरे । अनन्ते देशकालगुणैः अपरिच्छिन्ने । नन्दव्रजं उपेयुषि प्राप्तवति सति । वाद्यानि अवाद्यन्त ॥ १३ ॥

गोपाः परस्परं हृष्टा दधिक्षीरघृताम्बुभिः ।
आसिञ्चन्तो विलिम्पन्तो नवनीतैश्च चिक्षिपुः ॥ १४ ॥

सत्यधर्मीया — नवनीतैर्विलिम्पन्तश्च तानि परस्परं चिक्षिपुः ॥ १४ ॥

सुमनोरञ्जनी — गोपाश्च हृष्टाः सन्तो दधिक्षीरघृतांबुभिः परस्परं आसिञ्चन्तो नवनीतैः करणैः चिक्षिपुः ॥ १४ ॥

नन्दो महामनास्तेभ्यो वासोलङ्कारगोधनैः ।
सूतमागधबन्दिभ्यो येऽन्ये विद्योपजीविनः ॥ १५ ॥

तैस्तैः कामैरदीनात्मा यथोचितमपूजयत् ।
विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च ॥ १६ ॥

सुमनोरञ्जनी — महामनाः औदार्यशाली नन्दः । तेभ्यो गोपेभ्यः यथोचितं दत्वा वासोलङ्कारादिभिरपूजयत् । येऽन्ये विद्योपजीविनः तेभ्यश्च यथोचितं दत्वा तैस्तैः कामैः अपेक्षितवस्तुभिः तांश्चापूजयदित्यन्वयः ॥ १५,१६ ॥

सत्यधर्मीया — महामनाः स्तवनीयमनस्क उदारचेताः । तेभ्यो गोपेभ्यो यथोचितं दत्वा सूतमागधबन्दिभ्यश्च दत्वा वासोलङ्कारगोधनैर्येऽन्ये विद्योपजीविनो विद्यावन्तस्तान्सर्वांस्तैस्तैः कामैः काम्यैर्विषयैरपूजयत् । तेभ्यः सूतमागधबन्दिभ्य इति पञ्चम्यौ । गोपेभ्यः सकाशात् वासोऽलङ्कारगोधनैरुपायनत्वेनोपनीतैः । सूतमागधबन्दिभ्यो या विद्या तया च महामनाः सन् येऽन्ये च स्वोपजीविन इत्यादिजनमुचितं तत्तत्सत्कारयोग्यं तैस्तैः कामैर्यथा सम्यगपूजयत् । यथाऽदीनात्मा भवेत्तथापूजयदित्यपि योजयन्ति । शसस्तृतीयादेशः । तानि दत्वेत्यपि वर्णयन्ति । कुतोऽयमेवमपूजयज्जनं नन्द इत्यत आह ॥ विष्णोरिति । आराधनरूपप्रयोजनमुद्दिश्य स्वपुत्रस्य मङ्गलाय चापूजयदित्यन्वयः । ग्रन्थकृद्धृदयं तु षष्ठ्योः सामानाधिकरण्यमाराधनाभ्युदयसमुच्चये च इति । हृदयेऽपि हृदयं सु अपुत्रस्येति मन्तव्यम् ॥ १६ ॥

रोहिणी च महाभागा नन्दगोपाभिनन्दिता ।
व्यचरद् दिव्यवासःस्रक्कण्ठाभरणभूषिता ॥ १७ ॥

सत्यधर्मीया — रोहिणी च नन्दगोपाभिनन्दिता भ्रातृवसुदेवपत्नीत्वाव्द्यचरत्सुवासिनी-सत्कारादौ ॥ १७ ॥

सुमनोरञ्जनी — महाभागा महासौभाग्या रोहिणी । नन्दगोपेन अभिनन्दिता तोषिता ॥१७॥

तत आरभ्य नन्दस्य व्रजः सर्वसमृद्धिमान् ।
हरेर्निवासानुगुणै रमाक्रीडमभून्नृप ॥ १८ ॥

सत्यधर्मीया — निवासमनुसृत्याप्ता ये गुणास्तैः । रमाक्रीडं लक्ष्मीविहारं यथा भवति तथा । तत आरभ्य नन्दस्य व्रजः सर्वसमृद्धिमानभूदित्यन्वयः । रमाक्रीडं स्थानमित्यप्याहुः । कचिद्रमाक्रीड अभून्नृपेति पाठस्तत्र शक्य अहमेवंविध इत्यादिवद्विवक्षाभावादभावः सन्धेरिति भावोऽवसेयः ॥१८॥

सुमनोरञ्जनी — ततः श्रीकृष्णागमनमारभ्य व्रजः सर्वसमृद्धिमानभूत् । हरेर्निवासस्य अनुगुणैः अनुकूलैर्गुणैः निमित्तैः । रमायाः आक्रीडं क्रीडास्थानं चाभूत् ॥ १८ ॥

गोपान् गोकुलरक्षायां निरूप्य मधुरां गतः ।
नन्दः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह ॥ १९ ॥

सत्यधर्मीया — वार्षिक्यं ष्यञ् स्वार्थे । प्रतिवर्षं देयं वार्षिक्यम् ॥ १९ ॥

सुमनोरञ्जनी — निरूप्य आज्ञाप्य । कंसस्य कंसाय । वार्षिक्यं प्रतिवर्षे देयं करम् ॥ १९ ॥

वसुदेव उपश्रुत्य भ्रातरं नन्दमागतम् ।
ज्ञात्वा दत्तकरं राज्ञे ययौ तदवलोकनः ॥ २० ॥

सत्यधर्मीया — तदवलोकनस्तस्यावलोकनेच्छुः । नयतीति नः । नो नेतेति विश्वः । तस्यावलोकं नयत्यात्मानमिति स वा । तदवमोचनमिति पठित्वाऽवमोचनमावासस्थानमिति वदन्ति । दत्तकरं च ज्ञात्वेत्यनेन वा स्थानकृत्यं गच्छेत्स इति त्वरा द्योत्यते ॥ २० ॥

सुमनोरञ्जनी — भ्रातरं स्वपितृजन्यत्वात् । तदवलोकनः तस्य नन्दस्यावलोकनेच्छुः ॥ २० ॥

तं दृष्ट्वा सहसोत्थाय देहः प्राणमिवागतम् ।
प्रीतः प्रियतमं दोर्भ्यां सस्वजे प्रेमविह्वलः ॥ २१ ॥

सत्यधर्मीया — तं वसुदेवं दृष्ट्वा प्रीतः प्रेम्णा चञ्चलश्च नन्दः सहसोत्थाय । देहः, आगतं स्वं प्राप्तप्राणं यथा स्वजते तथा सस्वजे आलिलिङ्गे । देहस्य प्राणं स्वं जनं च सर्वेन्द्रियचेष्टात्मकं ज्ञेयम् । देहस्य प्राणदर्शनासम्भवाद्दृष्ट्वेत्यन्वयनमनुपपन्नमिति निरस्तमनेनेति ज्ञेयम् ॥ २१ ॥

सुमनोरञ्जनी — तं आगतं वसुदेवम् । देहः आगतं प्राणं अनु यथोत्तिष्ठति तथा तं आगतं वसुदेवं दृष्ट्वा नन्दः सहसोत्थाय प्रीतः । प्रेम्णा विह्वलो विवशीकृतः । सस्वजे आलिलिङ्गे ॥ २१ ॥

पूजितः सुखमासीनः पृष्ट्वाऽनामयमादितः ।
प्रसक्तधीः स्वात्मजयोरिदमाह विशाम्पते ॥ २२ ॥

सत्यधर्मीया — अनामयं नीरोगं क्षेममिति यावत् । स्वात्मजयो रामकृष्णयोर्विषये प्रसक्तधीस्तत्कुशलप्रश्नविषयिणीति प्रसक्ता धीर्यस्य स तथा ॥ २२ ॥

सुमनोरञ्जनी — वसुदेवः । अनामयं क्षेमम् । स्वस्य आत्मजयोः श्रीकृष्णरामयोः । प्रसक्ता संलग्ना धीर्यस्यासौ तथोक्तः । तथाभूतः सन् श्रीकृष्णरामौ स्मृत्वेति यावत् ॥ २२ ॥

दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते ।
प्रजाशाया निवृत्तस्य प्रजा यत् समजायत ॥ २३ ॥

सत्यधर्मीया — हे भ्रातर्नन्द! प्रवयसः प्रगतं वयो यौवनं यस्य तस्य । प्रजाशाया निवृत्तस्य प्राक् चाप्रजस्य प्रजावर्जितस्य गतम् । यत्प्रजा समजायत तद्दिष्ट्या सुखम् । प्रजेति वदता स्त्र्यपत्यमिति हृदयं विभावनीयम् ॥ २३ ॥

सुमनोरञ्जनी — हे भ्रातः । अप्रजस्य प्रजारहितस्य । कुतः । प्रवयसः वृद्धस्य । अत एव प्रजाशायाः निवृत्तस्य । इदानीं प्रजा समजायतेति यत् तत् दिष्ट्या परमानन्दकरमभूत् ॥ २३ ॥

दिष्ट्या संसारचक्रेऽस्मिन् वर्तमानः पुनर्भवे ।
उपलब्धो भवानद्य दुर्लभं प्रियदर्शनम् ॥ २४ ॥

सत्यधर्मीया — पुनर्भवे पुनः पुनर्भव उपत्तिर्यस्मिंस्तत्तस्मिन्संसारचक्रे तत्समूहे तदाख्ये चक्रे भ्रमद्रथाङ्गे वा । चक्रो गणे चक्रवाके चक्रं सैन्यरथाङ्गयोरिति विश्वः । चक्रवज्रान्धकारसारवार-क्षीरतोमरभृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके चेति लिङ्गानुशासनोक्तेश्चक्रश्चक्रं वा । वर्तमानो भवानद्योपलब्ध इति दिष्ट्या सुखम् । किं कारणमिदमद्भुतमित्यत आह ॥ दुर्लभं प्रियदर्शनमिति । दिष्ट्या शमित्यादिरव्ययमिति विश्वः । दिष्टचं दिष्टिस्तया दैवेनेति वा ॥ २४ ॥

सुमनोरञ्जनी — पुनः वारं वारं भवः उत्पत्तिर्यस्मिन् । अनेन नश्वरदेहवत्वं व्यज्यते । अस्मिन्संसाराख्ये चक्रे वर्तमानः भवान् उपलब्धः दृष्ट इति यत् तदपि दिष्ट्या परममङ्गलमेव । कुतः । यतः प्रियदर्शनं दुर्लभं अत इति ॥ २४ ॥

नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणाम् ।
ओघेन व्यूह्यमानानां प्लवानां स्रोतसो यथा ॥ २५ ॥

सत्यधर्मीया — तद्दुर्लभता चैतन्निमित्तेति तदाह ॥ नैकत्रेति । सुहृदां सन्मनसां सतां सम्बन्धिनां च । प्रियश्चासौ संवासश्च स एकत्र न न भवति । तत्र तन्त्रं चित्रकर्मणामिति । तत्र दृष्टान्तमाचष्टे । स्रोतसो ओघेन वेगेन वेति व्यूह्यमानानाम् । वहतेः सम्प्रसारणे रूपम् । दीर्घपाठस्तु लेखककरकृतः । ऊहतेरुपसर्गात् ह्रस्व ऊहतेरिति ह्रस्वतायामपि तस्य वितर्कणार्थत्वात् । प्रकृते च तदसङ्गतेः । प्लवानां दारूणां नौकानां वा संवासो यथा तथेति । प्लवः कारण्डवे भेके कुलके फलके कपौ । प्लवङ्गमे कैवर्ते मुस्तकेऽपि च । काष्ठे नावि प्लव इति विश्वमेदिन्यौ ॥ २५ ॥

सुमनोरञ्जनी — दुर्लभत्वमुपपादयति ॥ नैकत्रेति । हे प्रिय! सुहृदां एकत्र संवासो न न संभवति । कुतः । चित्रकर्मणां चित्रं विलक्षणं कर्म येषां तेषाम् । यथा स्रोतसो नद्याः ओघेन प्रवाहेण व्यूह्यमानानां नीयमानानां प्लवानां काष्टादीनां पोतानां वेति पदरत्नावल्याम् ॥ २५ ॥

कच्चित् पशव्यं निरुजं भूर्यम्बुतृणवीरुधम् ।
बृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः ॥ २६ ॥

सत्यधर्मीया — पशव्यं पशुभ्यो हितम् । नि न रुजो रोगो यस्मिंस्तत् । निखिलसाक्षिको निरयमतो न दीर्घः । नीरोगमिति यावत् । बृहद्वनं, भूर्यम्बुतृणवीरुधं भूरीति त्रिकान्वयि । अयमपि वीरुधाशब्दः । भूरीण्यम्बूनि तृणानि भूरिण्यो वीरुधाश्च यस्मिंस्तत् । कच्चिदिति कुशलप्रश्ने । आत्मदावासो न तत्रेत्येतदादेः सत्त्वेऽसत्त्वे वा किं तवेत्यत आह ॥ त्वम् । सुहृद्वृतो यत्रास्स इति उपविशसि वससीति यावत् । आस्त इति पाठे पुरुषव्यत्ययेन वा, रेतस्त्वजायां कविरादधेऽज इत्यादिवन्न तन्नियम इति ऋग्भाष्यटीकाद्युक्तेस्तन्मध्यमतानियमाभावेन वा समाधिरवधेयः । विस्तृतं प्रागनुसन्धेयम् ॥ २६ ॥

सुमनोरञ्जनी — कच्चिदितीष्टप्रश्ने । कच्चित्कामप्रवेदन इत्यमरः । बृहद्वनं पशव्यं कच्चित् पशुहितं किम् । निरुजं रोगरहितम् । भूर्यंबुतृणवीरुधं भूरीणि अम्बुतृणानि वीरुधश्च यस्मिन् तत् । तस्मात् अधुना त्वं भवान् सुहृद्वृतः सन् यत्रास्से वर्तस इत्यर्थः ॥ २६ ॥

भ्रातर्मम सुतः कच्चिन्मात्रा सह भवद्व्रजे ।
तातं भवन्तं मन्वानो भवद्भ्यामुपलालितः ॥ २७ ॥

सत्यधर्मीया — कंसस्य देवक्यर्भकभ्रमभ्रंशाय गर्भप्ररोहिणीति रोहिणी पुरा मधुरापुरात्प्रेषिता किल । तया सह नन्दनो मम सुख्यास्ते किमिति वसुदेव पृच्छति ॥ भ्रातरिति । मात्रा रोहिण्या सह भवद् व्रजे त्वद्गोष्ठे भवन्तं तातं मन्वानो मत्त्वेन, तत्रैवोत्पत्तेस्त्वामेव जानन् भवद्भ्यामुपलालितो मम

सुतो बल आस्ते कच्चित् सुखेन वर्तते किमित्यर्थः । न कृष्णप्रश्नविषयोऽयं श्लोकः । तथा व्याकरणे नन्दगोपमनोरसा भासतेव मात्रा सहेत्युक्तेरयुक्तत्वेनेव अहो ते देवकी पुत्राः कंसेन बहवो हताः । एकावशिष्टाऽवरजा कन्या साऽपि दिवं गतेत्युत्तरत्रत्यनन्दगोपानुयोग इव न शक्यं च परिहर्तुं हरिवंशविरोधापत्तिरिति च न विद्म तदभिप्रायम् । तथा हि सः ।

तत्रेमौ दारकौ गत्वा जातकर्मादिभिर्गुणैः ।
योजयित्वा व्रजे तात संवर्धय यथासुखम् ।
रोहिणेयं च मे पुत्रं परिरक्ष शिशुं व्रजे ।
अहं वाच्यो भविष्यामि पितृपक्षेषु पुत्रिणाम् ।
योऽहमेकस्य पुत्रस्य न पश्यामि शिशोर्मुखम् ।
ह्रियते हि बला प्राज्ञस्यापि यतो मम ।
अस्माद्धि मे भयात्कंसान्निर्घृणाच्च शिशोर्वधे ।
तद्यथा रोहिणेयं त्वं नन्दगोप ममात्मजम् ।
गोपायसि तथा .... तथा कुरु ।
विघ्ना हि बहवो लोके बालानुत्रासयन्ति हि ।
स च पुत्रो मम ज्येष्ठः कनीयांस्तव चात्मजः ।
उभावपि समं साम्ना निरीक्षस्व यथातथमिति ॥ २७ ॥

सुमनोरञ्जनी — हे भ्रातः! मम सुतो बलरामः मात्रा रोहिण्या सह भवन्तं तातं पितरं मन्वानः भवद्भ्यां उपलालितः सन् आस्ते कच्चिदित्यन्वयः । पदरत्नावली तु भ्रात्रा सहेति पाठाभिप्रायेण प्रवृत्ता । यद्वा कृष्णपक्षे तातं स्वतातं मात्रा सह स्वमात्रा सह भवद्व्रजे भवन्तं स्थितं मन्वानः मातापितरौ व्रज एव स्त इति मन्वानः इति यावत् । मम सुतः कृष्ण इति पदरत्नावलीकृदभिप्रायः ॥ ॥ २७ ॥

पुंसस्त्रिवर्गो विहितः सुहृदां ह्यनुभावतः ।
न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय कल्पते ॥ २८ ॥

सत्यधर्मीया — कुत एतर्हीयान्कुशलानुनय इत्यत आह ॥ पुंस इति । त्रिवर्गो धर्मादिः पुंसो विहितो यः स सुहृदामनिमित्तबन्धूनां त्वदादिसुमनसां वाऽनुभावतः प्रभावादर्थाय प्राप्तप्रयोजनाय तत्सम्पत्तये कल्पते समर्थो भवति । हि यतस्तेषु सुहृत्सु क्लिश्यमानेषु क्लेशिषु सत्सु स त्रिवर्गोऽर्थाय न कल्पतेऽतस्तव मम सुहृत्त्वात्तवाक्लेशे च त्रिवर्गसम्पत्तिः सैव मत्सम्पत्तिरिति ममैतावाननुयोग इति भावः ॥ २८ ॥

सुमनोरञ्जनी — कुत एतत्पृच्छसीति तत्राह ॥ पुंस इति । पुंसः त्रिवर्गः धर्मार्थकामाख्यः । अर्थाय प्रयोजनाय विहितः शास्त्रे प्रतिपादितः । स च त्रिवर्गः सुहृदां अनिमित्तोपकारिणाम् । अनुभावतः प्रभावात् भवति । तेषु सुहृत्सु क्लिश्यमानेषु क्लेशयुक्तेषु त्रिवर्गोऽर्थाय प्रयोजनाय न कल्पते न समर्थो भवति । प्रयोजनरूपं न भवतीति भावः ॥ २८ ॥

नन्द उवाच -

अहो ते देवकीपुत्राः कंसेन बहवो हताः ।
एकाऽवशिष्टाऽवरजा कन्या सापि दिवं गता ॥ २९ ॥

सत्यधर्मीया — एवं वसुदेवाभिनन्दितो नन्दः किमाहेत्यत आह ॥ नन्द इति । देवकीपुत्रास्तज्जातपोताः कंसेन बहवो हताः । एका कन्याऽवरजा सापि दिवं गतेति । अवशिष्टा उर्वरिताः । देवकीपुत्रा इत्यनेनार्थादन्यासां पुत्राः सन्तीत्यायातम् । ते सुताः सुखिनः कच्चिदिति शेष इति व्यातन्वते ॥ २९ ॥

सुमनोरञ्जनी — ते त्वदीयाः देवकीपुत्राः । अनेन रोहिण्यादिपुत्रव्यावृत्तिः सूचिता ॥ २९ ॥

नूनं हि दृष्टनिष्ठोऽयं नादृष्टपरमो जनः ।
अदृष्टमात्मनस्तत्त्वं यो वेद न स मुह्यति ॥ ३० ॥

सत्यधर्मीया — वसुदेवोपदिष्टतत्त्वो नन्दः स्वस्यापि तत्त्वसंविद्वर्तत इति दर्शयति ॥ नूनमिति । अयं जनो दृष्टनिष्ठो दृष्टे प्रात्यक्षिकेऽर्थे निष्ठा स्थितिर्यस्य स नूनं प्रायः । हि यतस्ततोऽदृष्टं परमो दैवं वा वासुदेवो वा, यथा कारयति तथा भविष्यतीत्यदृष्टं हर्यादिकं परमं यस्य स तथा स न । अतो मुह्यति संसारादौ मोहयुक्तो भवति । आत्मनस्तत्त्वं फलोपलम्भकं वेद स जनो न मुह्यति । त्वं चादृष्टपरमेष्वेक इति मया किं वक्तव्यमिति तात्पर्यम् । तत् त्वमिति वा पदे । तददृष्टत्वं जगदन्यद्धर्याख्यं वस्तु स भवान्वेदेति न मुह्यतीति योजना वा ॥ ३० ॥

सुमनोरञ्जनी — अयं जनः । दृष्टफले निष्ठा आसक्तिर्यस्य स तथा । नूनम् । नादृष्टपरमः अदृष्टं परं उत्कृष्टमिति मा ज्ञानं यस्यासौ तथोक्तः न भवति । अदृष्टं अप्रत्यक्षम् । आत्मनः परमात्मनः । तत्वम् । आत्मरूपं तत्वमित्यर्थः । घटस्य स्वरूपमितिवत् । यो वेद स न मुह्यति मोहवान्न भवतीत्यर्थः ॥ ३० ॥

वसुदेव उवाच -

करो वै वार्षिको दत्तो राज्ञे दृष्टा वयं च वः ।
नेह स्थेयं बहुदिनं सन्त्युत्पाताश्च गोकुले ॥ ३१ ॥

सत्यधर्मीया — वयं वो युष्माभिर्दृष्टा वो युष्मांश्च वयं दृष्टवन्त इत्यन्वेतव्यमिति सूचयति । स्वस्यैष्यज्ज्ञतां दर्शयति ॥ नेह स्थेयमित्यादिना ॥ ३१ ॥

सुमनोरञ्जनी — वयं युष्माभिर्दृष्टाः । एवं कृतकार्यैर्भवद्भिः इह बहुदिनं न स्थेयम् । कुतः । वः गोकुले । यतः उत्पाताः अनर्थस्य सूचकाः सन्ति अत इति ॥ ३१ ॥

श्रीशुक उवाच -

इति नन्दादयो गोपाः प्रोक्तास्ते शौरिणा ययुः ।
अनोभिरनडुद्युक्तैस्तमनुज्ञाप्य गोकुलम् ॥ ३२ ॥

इति श्रीमद्भागवते दशमस्कन्धे षष्ठोऽध्यायः ।

सत्यधर्मीया — अनडुद्भिर्वृषभैर्युक्तैरनोभिः शकटैः । वृषोऽनड्वान् क्लीबे नः शकटोऽस्त्रीत्युभयतश्चामरः । तं वसुदेवमनुज्ञाप्य गोकुलं ययुः ॥ ३२ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे षष्ठोऽध्यायः ॥ १०-६ ॥

सुमनोरञ्जनी — अनडुद्युक्तैः अनडुद्भिः वृषभैः युक्तैः । अनोभिः शकटैः ॥ ३२ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां षष्ठोऽध्यायः ॥ १०-६ ॥

॥ अथ सप्तमोऽध्यायः ॥

श्रीशुक उवाच -

नन्दः पथि वचः शौरेर्न मृषेति विचिन्तयन् ।
हरिं जगाम शरणमुत्पातागमशङ्कितः ॥ १ ॥

सत्यधर्मीया — ॥ यदर्थमत्यर्थमर्थितः प्रादुरभूद्भगवान्भुवि तं पराक्रममङ्कुरयामास कुमारः पूतनामारणेनेतीरयंस्तत्रोत्पातपातो न नारायणशरणयानं विना भविष्यति वसुदेवश्च न वितथकथन इति तं मनसा स्मरन् परमपुरुषं, जगाम व्रजमित्यादौ वदति ॥ नन्द इति । उत्पातानामागम एष्यंस्तेन शङ्कितो हरिं सर्वारिष्टहरं शरणं जगाम । शरणं यातः सञ्छरणं स्वगोकुलगृहं च जगामेत्यावृत्त्याऽन्वयः ॥ १ ॥

सुमनोरञ्जनी — भगवद्भक्त्यङ्गमाहात्म्यज्ञानाय श्रीकृष्णस्य पूतनावधेन तन्निष्ठजीवद्वयस्य स्वस्वयोग्यगतिप्रदत्वलक्षणमाहात्म्यं निरूप्यतेऽस्मिन्नध्याये ॥ नन्द इति ॥ शौरेः वसुदेवस्य वचो न मृषा न मिथ्येति विचिन्तयन् ॥ उत्पातागमस्य शङ्का अस्मिन्संजातेति तादृशः । हरिमेव शरणं रक्षितारं जगाम । मनसेति शेषः । श्रीहरिरेव रक्षको भूयादहं तदीय इति चिन्तितवानिति भावः ॥१॥

कंसेन प्रहिता घोरा पूतना बालघातिनी ।
शिशूंश्चचार निघ्नन्ती पुरग्रामव्रजादिषु ॥ २ ॥

सत्यधर्मीया — प्रहिता प्रेषिता । पुराणि राजावासस्थानानि ग्रामो बहुजनाकीर्णो व्रजो गोकुलमेतदादिषु । बालघातिनीति नोपलक्षणमित्याचष्टे ॥ शिशून्निघ्नन्ती चचारेति ॥ २ ॥

सुमनोरञ्जनी — प्रहिता प्रेषिता । शिशून्निघ्नंती । पुराणि नगराणि । ग्रामाः खेटाः । व्रजो गोकुलम् । पुरं राजमन्दिरमिति पदरत्नावल्याम् ॥ आगारे नगरे पुरमित्यमरः ॥ २ ॥

न यत्र श्रवणादीनि रक्षोघ्नानि स्वकर्मसु ।
कुर्वन्ति सात्वतां भर्तुर्यातुधान्यश्च तत्र हि ॥ ३ ॥

सत्यधर्मीया — शङ्का तत्रासम्भाविता किमुतेति भावेनाह ॥ नेति । सात्त्वतां भागवतानां यादवानां वा भर्तुः स्वामिनः कृष्णस्य तत्कथाया रक्षोघ्नानि रक्षांसि घ्नन्तीति तानि स्वकर्मसु श्रवणादीनि न कुर्वन्ति । तत्र यातुधान्यः स्वकर्मस्वित्यावर्तते प्रवर्तन्त इति शेषः । कुर्वन्ति

स्वकार्यमिति वा शेषः । यच्चरितचरितश्रवणास्तत्र तत्पीडा यदा तदा साक्षाच्छ्रीवासावासे प्रादुर्भूतानि कथं भवेयुरायातानि । तन्मारकतया स्वख्यात्यै तेनैवानीतानीति कर्तुं किं शक्तानि नक्तंचर्यादीनीति तात्पर्यम् ।। ३ ।।

सुमनोरञ्जनी — ननु पूतना किं पुरग्रामव्रजस्थान् सर्वानपि बालकान् जघान । नेत्याह ।। नेति । स्वकर्मसु स्वविहितकर्मसु क्रियमाणेषु यत्र जनाः । रक्षोघ्नानि, सात्वतां भर्तुः श्रीहरेः श्रवणादीनि माहात्म्यश्रवणतदर्चनादीनि न कुर्वन्ति तत्र यातुधान्यः शिशून्निघ्नन्त्यः चरन्तीति सम्बन्धः । तथा च भगवत्कथाश्रवणादिरहितदेशेष्वेव पूतना शिशून्निघ्नन्ती चचारेति भावः ।। ३ ।।

सा खेचर्येकदोपेत्य पूतना नन्दगोकुलम् ।
गोपित्वा माययाऽऽत्मानं प्राविशत् कामचारिणी ।। ४ ।।

सत्यधर्मीया — खेचरी राक्षस्यात्मानं मायया गोपित्वाऽऽच्छाद्य । कामचारिणी कामं चरतीति सा तथा । नन्दगोकुलं प्राविशत् । आनन्द गोकुलमिति पदद्वयम् । मायया करणेन गवां तत्रत्यजन-नेत्राणां कुलं समूहं याऽऽनन्दं बबन्ध सा प्राविशदित्यप्यन्वयः । अत एव सेति सुलग्नम् ।। ४ ।।

सुमनोरञ्जनी — खेचरी राक्षसी सा पूतना । नंद[illegible] गोकुलं गवां कुलं यस्मिन् तादृशे । बृहद्वनप्रान्ते रचितवस्त्रगृहात्मके शिबिर इति यावत् । तदुक्तं [illegible]ये -

विवेश नन्दस्य गृहं बृहद्वनप्रान्ते हि मार्गे रचिते प्रयाणे ।
तीरे भगिन्यास्तु यमस्य वस्त्रगृहे शयानं पुरुषोत्तमं तम् ।।

इति । तमुपेत्य माययाऽविद्यया आत्मानं स्वस्वरूपं करालदंष्ट्रत्वादिकं गोपित्वा आच्छाद्य । कामचारिणी स्वेच्छानुसारिरूपग्रहणेन चरन्ती गोकुलं प्राविशदिति सम्बन्धः ।। ४ ।।

तां केशपाशव्यतिषक्तमल्लिकां बृहन्नितम्बस्तनकृच्छ्रमध्यमाम् ।
सुवाससं कम्पितकर्णभूषणत्विषोल्लसत्कुन्तलमण्डिताननाम् ।। ५ ।।

सत्यधर्मीया — गोपादिविस्मापकं गोपनमङ्गस्यैवमित्याह ।। तामिति । केशबन्धे केशपाशे व्यतिषक्ता सम्बद्धा मल्लिकास्तृणशून्यानि यस्यां सा ताम् । बृहन्तौ नितम्बौ कटितटौ बृहन्तौ स्तनौ च तैः कृच्छ्रमाभीलं कष्टं यस्य स मध्यमो मध्यदेशो यस्याः सा ताम् । सु वासो वस्त्रं यस्याः सा ताम् । उल्लसन्तः कुन्तलास्तैर्मण्डितमलङ्कृतमाननं यस्याः सा ताम् । तत्र तन्त्रं कर्णभूषणयोः कर्णधृतकुण्डलयोस्त्विषा कान्त्या । त्विषेत्याकारान्ततापक्षे त्विषयोल्लसत्कुन्तलमण्डिताननामिति पदमेकं वा ।। ५ ।।

सुमनोरञ्जनी — किं तत्स्वेच्छानुसारिरूपं जग्राहेति तत्राह ॥ तामिति । केशबन्धे केशपाशे व्यतिषक्ताः संबद्धाः मल्लिकाः यस्याः सा तथा ताम् । बृहन्तो नितम्बस्तनाः कृच्छ्रं सूक्ष्मं मध्यमं यस्याः सा तथा ताम् । कंपितानि चलितानि यानि कर्णभूषणानि ताटङ्कादीनि तेषां त्विषा कांत्या उल्लसत् कुन्तलैर्मण्डितं आननं यस्याः सा ताम् ॥ ५ ॥

वल्गुस्मितापाङ्गविसर्गवीक्षितैर्मनो हरन्तीं वनितां व्रजौकसः ।
अमंसताम्भोजकरेण रूपिणीं गोप्यः श्रियं द्रष्टुमिहागतां पतिम् ॥ ६ ॥

सत्यधर्मीया — अपाङ्गविसर्गः कटाक्षमोक्षः । वल्गुस्मितं चापाङ्गविसर्गसहितानि वीक्षितानि च तैः । अपाङ्गस्यानङ्गस्योद्रेको यैस्तानि च तानि तैरिति वा । व्रजौकसां मनो हरन्तीं वनितां वन सम्भक्तौ बाहुलकादितच् । सम्भजनीयाम् । रूपिणीमेतदाकारवतीमम्भोजकरेण तद्युक्तहस्तेन तन्मुखचिह्नत्वात् पतिं द्रष्टुमिहागतां श्रियं गोपाश्च बहिरन्तश्च गोप्योऽमंसत व्यजानन् । व्रजौकस इति पाठे गोपा इत्यर्थो गतम् ॥ ६ ॥

सुमनोरञ्जनी — वल्गु मनोहरं स्मितम् । अपांगो नेत्रांतः तस्य विसर्गो मोक्षः । कटाक्षमोक्ष इति यावत् । तद्युतैः वीक्षणैः अवलोकनैः । अपांगस्य अनंगस्य विशेषेण सर्गः सृष्टिर्यैस्तैः वीक्षणैरिति वा । मन्मथोद्रेककरैरित्यर्थः । व्रजौकसां गोपानां मनो हरन्तीम् । व्रजौकस इति पाठे व्रजौकसो गोपाः वनितां सम्भजनीयां अमंसत मेनिरे इत्यर्थः । वन षण संभक्ताविति धातोः । गोप्यस्तु पतिं श्रीकृष्णं द्रष्टुमागतां रूपिणीं मूर्तिमतीं श्रियं मेनिरे । केन लिङ्गेन । अम्भोजकरेण अम्भोजयुक्तकरेणेत्यर्थः ॥ ६ ॥

बालग्रही तत्र विचिन्वती शिशून् यदृच्छया नन्दगृहेऽसदन्तकम् ।
बालं प्रतिच्छन्ननिजोरुतेजसं ददर्श तल्पेऽग्निमिवाहितं भसि ॥ ७ ॥

सत्यधर्मीया — बालग्रही कुमारमारिका । शिशूंस्तत्र विचिन्वती । यदृच्छया स्वमारकहरीच्छया । नन्दगृहेऽसदन्तकं दुर्जनभर्जनकरम् । स सहिंसकश्चेन्न तस्यास्माद्भीतिस्तदरणगमने मरणगमनं स्यादित्यतो वाऽऽह ॥ असदन्तकमिति । असन्न विद्यमानोऽन्तको यस्य स इति । स तनुतनुमानिति वाऽऽह ॥ असदन्तकमिति ॥ दन्तैः सहितः पोतो हि सदन्तकः । न सदन्तकोऽसदन्तक इति । भसि भस्मनि । आहितं गूहितमग्निमिव । प्रतिच्छन्नं निजं स्वाभाविकमुरूत्कृष्टं तेजः सामर्थ्यं विलक्षणप्रकाशश्च यस्य तम् । तल्पे शय्यायाम् । बालं ददर्श ॥ ७ ॥

सुमनोरञ्जनी — बालग्रहा बालमारिका । पूतना शिशून् विचिन्वती मृगयन्ती । यदृच्छया दैवेच्छया । असदन्तकम् असतां अन्तकम् । असन् अन्तको यस्येति वा तम् । भसि भस्मनि आहितं निहितं अग्निमिव प्रतिच्छन्नं निजं स्वकीयं उरु उत्कृष्टं तेजो यस्य स तथा तं बालम् । तल्पे आहितं स्वापितं ददर्शेत्यन्वयः ॥ ७ ॥

विबुध्य तां बालकमारिकाग्रहं चराचरात्मा स निमीलितेक्षणः ।
मही सुरत्वेऽपि च बालभावं विभावयन् किञ्चिदुवाच न प्रभुः ॥ ८ ॥

सत्यधर्मीया — त्रैलोक्येशो विलोक्य किं चकारेत्यत इमां धाटीमाटीकतेत्याह ॥ विबुध्येति । चराचरात्मा जगत्स्वामी सर्वव्यापी वा स कृष्णस्तां बालकमारिकाग्रहं विबुध्य ज्ञात्वाऽपि मही उत्सवं दर्शयितुकाम इत्युत्सववान् सुरत्वेऽपि देवत्वेऽपि बालभावं बालत्वं विभावयन्निमीलितेक्षणः सन् प्रभुर्न किञ्चिदुवाच । सुरत्वे सुरवर्गे प्रभुः । उतामृतत्वस्येशान इत्यादिवत् । स्वसूदनार्थमायातां मधुसूदनः कुत उपेक्षितवानित्यतो वाऽऽह ॥ चराचरात्मेति । यच्चात्ति विषयानिहेत्यादेः । गृहान्भक्षयतः पुंसः कवाटं पर्पटायत इतिवत् । सर्वभक्षकस्य का क्षपाचरीभीरिति भावः । मही किञ्चित्स्वभारावतारणादिरूपमुवाचेति न प्रभुरसमर्थ इव निमीलितेक्षण आसेत्यपि योजना । मह्या रमया सह सु सम्यग्रमत इति महीसुरो रमारमणस्तत्त्वेऽपीति वा ॥ अन्तर उपपत्तेः । अन्तःस्थित्वा रमणकृदित्यादेः । रमेर्र्मन्ताड्डु इति डः । चुटू इतीत्संज्ञायां तस्य लोपे डित्वसामर्थ्यादभस्यापि टेर्लोपे र इति रूपम् । विस्तरस्त्वन्तराधिकरणसुधावाक्यार्थचन्द्रिकादितोऽवसेयः । यथोक्तम् । मह्या अदितय इत्यृग्भाष्यटीकयोः । स चादितिर्महती तन्मही च । मह्या अदितय इत्यादित्वराविषयमुक्तं तत्केन निर्वचनेनेत्यत आह ॥ श्रीर्वेति । वाशब्दश्चशब्दार्थे । श्रीश्चानेनैव निर्वचनेन महीत्युक्तेत्यादि । मही चासौ सुरश्च तस्य भावस्तत्त्वं तस्मिन्नपीति वा ॥ ८ ॥

सुमनोरञ्जनी — चराचरयोरात्मा अन्तर्यामी श्रीकृष्णः । तां बालकानां मारिकां मृत्युरूपं गृहं विबुध्य ज्ञात्वाऽपि निमीलिते ईक्षणे यस्यासौ तथोक्तः । मह्यां सुरत्वेऽपि । यद्वा मही भूः ईर्लक्ष्मीस्तयोः सुष्ठु रमतीति तथोक्तः । अथवा मही 'पूतना किं किं करोति तत्परीक्षणीयम्' इत्युत्सववान्सुरत्वेऽपि बालभावं विभावयन् ज्ञापयन् किंचिन्नोवाचेति योजना ॥ ८ ॥

अजानमानाऽथ निशाचरी हरिं निसर्गविज्ञातजगद्विचेष्टितम् ।
अनन्तमारोपयदङ्कमन्तकं यथोरगं सुप्तमबुद्धिरज्जुधीः ॥ ९ ॥

सत्यधर्मीया — अथ बालभावविभावनानन्तरम् । निसर्गविज्ञातजगद्विचेष्टितं निसर्गेण स्वभावतोऽनन्याधीनालोचनत इति यावत् । विज्ञातं जगद्विचेष्टितं येन तम् । निसर्ग उत्पत्तिरहितश्चासौ जगद्विचेष्टितश्चेति वा । निसर्ग इति विज्ञातश्चासौ जगतो विचेष्टितं चेष्टा तदभावो वा येन स चासौ स च तम् । अनन्तं न विद्यतेऽन्तो नाशो यस्य तम् । अन्तकं स्वनाशकं च हरिं चाजानमाना निशाचरी । अङ्कमुत्सङ्गमारोपयदारोपयामास । तत्र निदर्शनमाह ॥ यथेति । सुप्तमुरगमबुद्धिरज्जुधीर्न विद्यते बुद्धिस्तज्ज्ञानं यस्य स चासौ रज्जुरिति धीर्यस्य स च । यश्चानन्तमारः सौन्दर्ये तदुपम इति भावः । अपयदङ्कोऽपयन्नपगतोऽङ्कः कलङ्को यस्य तं वा । अनन्ता बद्धा च सा मा च तस्या आरोपमारोहम्, एतीति यन्सोऽङ्क उत्सङ्गो यस्य तम् । उपयदङ्कमुपयंश्चाङ्कः स्वोत्सङ्गो यस्य तम् । अनन्तम् आरेति वा । अबुद्धि सर्वथा मतिरहितं बालापत्यं यथा च रज्जुधीर्भ्रान्तः पुमानिति वा । अनन्ता मा मायाऽऽरोप उरसि यस्य तच्च तद्यच्च तत् । अन्तर्बहिर्व्याप्तब्रह्मरूपमिति वा । यदित्यङ्कं चिह्नमसाधारणं यस्य तमिति वा । यथोक्तं बृहद्भाष्ये । यथा बाह्यो तथैवान्तस्ततो यदिति चोच्यत इति । नायं मृत्युः परिहार्य इत्यप्याह ॥ अजानमानेति । अजेन ब्रह्मणाऽनानां प्राणानां मानं परिमाणमवसानमिति यावत् तद्यस्या इति । मानं ज्ञानं लयश्चैव मर्यादा चेत्यादेः ॥ ९ ॥

सुमनोरञ्जनी — यतो निशाचरी ताटकाविष्टत्वान्निशाचरीत्युक्तम् अथ तस्मात् । निसर्गतः स्वभावतः विज्ञातं जगद्विचेष्टितं येन तम् । हरिं अजानमाना पूतना । अनन्तं,न विद्यते अन्तो नाशो यस्य तम् । प्रत्युत स्वस्यैव अन्तकं कृष्णं अङ्कमारोपयत् । कमिव । अबुद्धिरज्जुधीः । अबुध्या अज्ञानेन रज्जुधीः रज्जुरियमिति भ्रमवान् सुप्तमुरगमिवेति पदरत्नावलीरीत्याऽर्थो द्रष्टव्यः ॥ ९ ॥

तां तीक्ष्णचित्तामतिवामचेष्टितां वीक्ष्यान्तराकोशपरिच्छदासिवत् ।
वरस्त्रियं तत्प्रभया च धर्षिते निरीक्षमाणे जननी अतिष्ठताम् ॥ १० ॥

सत्यधर्मीया — ननु यशोदारोहिण्यौ किं चक्रतुर्न चक्रपाणिपाणिग्रहनिग्रहमित्यत आह ॥ तामिति । तीक्ष्णं चित्तं यस्याः सा ताम् । बहिः, वामं चेष्टितं यस्याः सा ताम् । अन्तरागारमध्ये । कोशपरिच्छदासिवत्तमिव चित्रमृदुचर्मनिर्मितकोशः परिच्छद आवरणं यस्य स चासावसिः खड्गश्च तमिव बहिर्वामचेष्टितामन्तस्तीक्ष्णचित्तां वरस्त्रियं वीक्ष्य दृष्ट्वाऽपि । तस्याः प्रभया मायिक्या धर्षिते वशीकृते निरीक्षमाणे केवलमवलोकयन्त्यौ जननी जनन्यौ । सुपां सुलुगिति पूर्वसवर्ण ईदूदेदिति प्रगृह्यसंज्ञायां रूपम् । अतिष्ठताम् । प्रथमैकवचनपाठे जननी यशोदा तत्प्रभया च धर्षिता निरीक्षमाणाऽतिष्ठत् । मातुरसन्धिः पोतस्येति सूचयितुमसन्धिनिर्देश इति ज्ञेयम् ॥ १० ॥

सुमनोरञ्जनी — ननु यशोदा स्वापत्यमङ्कमारोपयन्तीं स्वस्यापरिचितां स्त्रियं वीक्ष्य का त्वं? कुतोऽस्मद्बालकमङ्कमारोपयसीति कस्मान्न निराचक्र इति तत्राह ॥ तामिति । अन्तः आ पूर्णः कोशे परिच्छदे कोशाख्ये आच्छादके यः सः । स चासावसिश्च तद्वत् कोशाच्छादितखड्गवदित्यर्थः । तीक्ष्णचित्तां क्रूरचित्ताम् । बहिश्चातिवामचेष्टितामत्यन्तहृद्यचेष्टितामित्यर्थः । एतादृशीं वरस्त्रियम् । अन्तरेति भिन्नं वा पदम् । अन्तरा मध्ये । गृहस्येति शेषः । गृहमध्ये वीक्ष्यापि जननी यशोदा । तत्प्रभया तस्याः पूतनायाः प्रभया धर्षिता परीभूता कर्तव्ये मूढेति यावत् । तां निरीक्ष्यमाणैवातिष्ठत् । न तु निराचक्र इति भावः ॥ १० ॥

तस्मिन् स्तनं दुर्जरवीर्यमुल्बणं घोराऽङ्कमादाय शिशोर्ददावथ ।
गाढं कराभ्यां भगवान् प्रपीड्य तत्प्राणैः समं रोषसमन्वितोऽपिबत् ॥११॥

सत्यधर्मीया — तस्मिन्काले । दुर्जरस्य जरयितुमशक्यस्य विषस्य वीर्यं सामर्थ्यं यस्मिंस्तत् । उल्बणमितरेषाम् घोरा राक्षस्यङ्कं प्रत्यादाय स्तनं शिशोः ददौ । अथ तद्दानानन्तरम् । भगवान्कराभ्यां गाढं प्रपीड्य मर्दयित्वा तत्प्राणैस्तस्याः प्राणाः पञ्च तैः समं साकम् । रोषसमन्वित एकस्या राक्षस्याः रोषः स्वमारणकारणं तेन समन्वितः सफलीकर्तव्यत्वेन तत्समन्वितः । एकस्या ऊर्वश्या उपरि दुःसहवासविघटकक्षमापर्यायस्तेन रोषेण समन्वित इत्यर्थः । यथोक्तं बृहद्भाष्ये । क्रोधः क्षमात्मको यस्य चिदानन्दात्मकः सदेति । यत्र यत्र कोपः श्रूयते तत्र तत्रेयं गतिर्ज्ञेया । अपिबत्पपौ । ॥ ११ ॥

सुमनोरञ्जनी — घोरा पूतना तस्मिन्समये । दुर्जरं जीर्णयितुमशक्यम् । अन्यैरिति शेषः । वीर्यं यस्य तत् । अत एवोल्बणं क्रूरं स्तनं शिशोर्ददौ । अथ अनन्तरं भगवान् तत् स्तनं गाढं कराभ्यां प्रपीड्य । तस्याः पूतनायाः प्राणैः समं तत् स्तनं अपिबदिति ॥ ११ ॥

सा मुञ्च मुञ्चेति गिरा प्रभाषिणी निष्पीड्यमानाऽखिलजीवमर्मणि ।
विवृत्य नेत्रे चरणौ भुजौ मुहुर्विक्लिन्नगात्रा क्षिपती रुराव ह ॥ १२ ॥

सत्यधर्मीया — सा पूतना मुञ्च मुञ्च त्यज त्यजेति गिरा प्रभाषिणीति गिरा यस्याः सा । इति गिरा टाबन्तता च । मेरुर्गिरायां गुरुरित्यादेः । मुञ्चालमिति पाठेऽलमितोऽलं पर्याप्तं मुञ्चेत्यन्वयः । अखिलजीवमर्मणीति पाठः समर्मकः । जीवस्य मर्मापायस्थानम् । अखिलं च तज्जीवमर्म च तस्मिन् । निष्पीड्यमाना । अखिलजीवमर्षिणीति पाठेऽपि सुमर्षणीयः । अखिलाञ्जीवान्मर्षयति हिनस्तीति धात्वनैकार्थ्यात् । सा नेत्रे विवृत्य चरणौ भुजौ च मुहुर्विक्षिपती विक्लिन्नगात्रा

स्वेदोदकक्लिन्नं गात्रं यस्याः सा सती रुराव रोदनमकरोत् । रु खेदे । नेत्रे नियन्त्रे मुञ्च मुञ्चेति प्रभाषमाणेति वा । अमुं च श्रीकृष्णं प्रति मुहुर्मुञ्चेति प्रभाषिणीति वा योजना ॥ १२ ॥

सुमनोरञ्जनी — सा पूतना । मुंच मुंचेति गिरा वाचा । अभेदे तृतीया । प्रभाषिणी उच्चैः भाषमाणा । अखिलानां जीवमर्षिणी प्राणापहारिणी । नेत्रे विवृत्य विस्तार्य भुजौ चरणौ क्षिपती । स्वेदेन विक्लिन्नगात्रा सती रुरावेति सम्बन्धः ॥ १२ ॥

तस्याः स्वनेनातिगभीररंहसा साद्रिर्मही द्यौश्च चचाल सग्रहा ।
रसा दिशः खं प्रतिनेदिरे जनाः पेतुः क्षितौ वज्रनिपातशङ्कया ॥ १३ ॥

सत्यधर्मीया — अतिगभीरं रंहो यस्य स तेन । रंहो वेगः । स्वनेन । साद्रिः सर्वतः पर्वतावृता मही भूर्द्यौरन्तरिक्षम् । सा च सग्रहा नवग्रहसहिता रसा रसातलादिसप्तकं चचाल । दिशः खं चेत्येतानि प्रतिनेदिरे प्रतिध्वनिं चक्रुः । वज्रनिपातशङ्कयाऽऽकस्मिक्या क्षितौ जनाः पेतुः ॥ १३ ॥

सुमनोरञ्जनी — अति अत्यन्तम् गभीररंहसा गम्भीरवेगेन । साद्रिर्मही । सग्रहा आदित्यादिग्रहैः सहिता द्यौश्च चचाल । रसा पातालमिति पदरत्नावली । स्वः स्वर्गः दिशश्च प्रतिनेदिरे प्रतिशब्दमकुर्वन् । वज्रनिपातशङ्कया अशनिपातशङ्कया ॥ १३ ॥

निशाचरीत्थं व्यथिता व्यसुः क्षितौ विकीर्य केशांश्चरणौ भुजावपि ।
प्रसार्य गोष्ठे निजरूपमास्थिता वज्राहतो वृत्र इवापतन्नृप ॥ १४ ॥

सत्यधर्मीया — इत्थं प्राग्व्यथिता निशाचरी क्षितौ चरणौ भुजावपि प्रसार्य केशान्विकीर्य । व्यसुर्विगता असवो यस्याः सा । निजरूपं पुरातनपूतनाकारमास्थिता सती वज्राहतो वृत्रासुर इवापतत् ॥ १४ ॥

सुमनोरञ्जनी — सा निशाचरी । इत्थं व्यथिता । व्यसुः विगतप्राणा । निजरूपं राक्षसीरूपमास्थिता आश्रिता । वज्रेणाहतः ताडितो वृत्र इव अपतत् पतिताऽभवत् ॥ १४ ॥

पतमानोऽपि तद्देहस्त्रिगव्यूत्यन्तरे द्रुमान् ।
चूर्णयामास राजेन्द्र महदासीत् तदद्भुतम् ॥ १५ ॥

सत्यधर्मीया — तद्देहस्तस्याः पूतनाया देहः पतमानः पतंस्त्रिगव्यूत्यन्तरे द्रुमान् । गव्यूति स्त्रीः क्रोशयुगमित्यमरः । त्रिगव्यूत्यन्तरे मध्ये विद्यमानाश्च ते द्रुमाश्च तांश्चूर्णयामासेति यत्तन्महदद्भुतमासीत् ॥ १५ ॥

सुमनोरञ्जनी — त्रिगव्यूत्यन्तरे तिस्रो गव्यूतयः क्रोशयुगानि तदन्तरे तन्मध्ये ये द्रुमास्तानपि । पतमानस्तद्देहः पूतनादेहः चूर्णयामास । तत् चूर्णनं महदद्भुतमत्याश्चर्यमासीदित्यन्वयः ॥ १५ ॥

ईषामात्रोग्रदंष्ट्रास्यं गिरिकन्दरनासिकम् ।
गण्डशैलस्तनं रौद्रं प्रकीर्णारुणमूर्धजम् ॥ १६ ॥

सत्यधर्मीया — ईषामात्रे लाङ्गलदण्डप्रमाणे । ईषा लाङ्गलदण्डः स्यादित्यमरः । उग्रे दंष्ट्रे यस्य तच्च तदास्यं वक्त्रं यस्य तत् । गिरिकन्दरवन्नासिका यस्य तत् । गण्डशैलाविव स्तनौ यस्य तत् । शैलो भूभृतीत्यमरः । रौद्रं भीषणम् । प्रकीर्णा अरुणमूर्धजा यस्य तत् ॥ १६ ॥

सुमनोरञ्जनी — ईषा लाङ्गलदण्डः । ईषा लांगलदण्डः स्यादित्यमरोक्तेः । तन्मात्राः तत्प्रमाणा अत एवोग्राः दंष्ट्राः तद्युक्तं आस्यं यस्य तत् । गिरेः कन्दरे इव नासिके नासाच्छिद्रे यस्य तत् । दरी तु कन्दरो वाऽस्त्रीत्यमरः । गण्डशैलाः स्थूलपाषाणाः । गण्डशैलास्तु च्युताः स्थूलोपला गिरेरित्यभिधानात् । प्रकीर्णाः प्रसारिता अरुणाः रक्ताः मूर्धजाः यस्य तत् ॥ १६ ॥

अन्धकूपगभीराक्षं पुलिनारोहभीषणम् ।
बद्धसेतुभुजोर्वङ्घ्रि शून्यतोयह्रदोदरम् ॥ १७ ॥

सत्यधर्मीया — अन्धकूपवद्गभीरे अक्षिणी यस्य तत् । पुलिने इव विद्यमानौ च तावारोहौ नितम्बौ च ताभ्यां भीषणम् । रोहो दैर्घ्यमानयोः । आरोहणे नितम्बे चेति विश्वः । बद्धा ये सेतवस्तद्वद्विद्यमाना भुजौ चोरू चाङ्घ्री यस्य तत् । शून्यं तोयं यस्मिन्स चासौ ह्रदश्च तद्वद्विद्यमानमुदरं यस्य तत् ॥ १७ ॥

सुमनोरञ्जनी — अन्धकूपे इव अनीरकूपे इव गभीरे अक्षिणी यस्य तत् । पुलिनमिव आरोहः कटिपुरोभागः तेन भयंकरम् । बद्धसेतुवद्भुजौ ऊरू अङ्घ्री यस्य । शून्यतोयह्रदवत् उदरं यस्य ॥१७॥

सन्तत्रसुः स्म तद् वीक्ष्य गोपा गोप्यः कलेवरम् ।
पूर्वं तु तन्निःस्वनितभिन्नहृत्कर्णमस्तकाः ॥ १८ ॥

सत्यधर्मीया — गोपा गोप्यश्च तत्कलेवरं वीक्ष्य सन्तत्रसुः । स्म अनिन्दंश्च मनसा । स्म पादपूरणेऽतीते सामिनिन्दार्थयोर्मतमिति विश्वः । स्मातीतं गतप्राणमिति वा । पूर्वं तु पूर्वमेव तस्याः निःश्वसितेन शब्देन भिन्नं हृत्कर्णमस्तकं याश्च ये चेति येषां ते तथा ॥ १८ ॥

सुमनोरञ्जनी — पूर्वं पूर्वमेव । तस्याः पूतनायाः निःस्वनितेन शब्देन भिन्नानि विशीर्णानि हृत्कर्णमस्तकानि येषां यासां वा तथाविधाः । तत्कलेवरं वीक्ष्य सन्तत्रसुः अत्यन्तं भीता अभवन् ॥ ॥ १८ ॥

बालं च तस्या उरसि क्रीडन्तमकुतोभयम् ।
गोप्यस्तूर्णं समभ्येत्य जगृहुर्जातसम्भ्रमाः ॥ १९ ॥

सत्यधर्मीया — बलवतामियं दशा चेत्का बालकाशेत्यत आह ॥ बालं चेति । तस्या उरसि क्रीडन्तमकुतोभयं न विद्यते कुतोऽपि भयं यस्य सोऽकुतोभयः । मयूरव्यंसकादिः समासः । जात-सम्भ्रमा मुहुः उः उत्कृष्टोऽसीति जातसम्भ्रमा जगृहुर्जातादरास्तूर्णं समभ्येत्य बालं जगृहुः ॥१९॥

सुमनोरञ्जनी — उरसि वक्षसि । अकुतोभयं निर्भयम् । जातः संभ्रमः सन्तोषो यासां ताः ॥ ॥ १९ ॥

यशोदारोहिणीभ्यां ताः समं बालस्य सर्वशः ।
रक्षां विदधिरे सम्यग् गोपुच्छभ्रमणादिभिः ॥ २० ॥

सत्यधर्मीया — गोपुच्छभ्रमणं भ्रामणमादिर्येषां तैः क्रियाविशेषैः ॥ २० ॥

सुमनोरञ्जनी — ताः गोप्यः सर्वशः सर्वस्मात् । रक्षां रक्षासाधनं कर्म ॥ २० ॥

गोमूत्रेण स्नापयित्वा पुनर्गोरजसाऽर्भकम् ।
रक्षां चक्रुर्गोशकृता द्वादशाङ्गेषु नामभिः ॥ २१ ॥

सत्यधर्मीया — ॥ गोमूत्रेण स्नापयित्वा । मित्वस्य ग्लास्नेति वैकल्पिकत्वाद्दीर्घः । गोरजसा तत्पदधूल्या पुनः स्नापयित्वा । गोशकृता द्वादशाङ्गेषु ललाटादिषु नामभिः केशवाद्यभिधानै रक्षां दिग्बन्धादिपूर्वं चक्रुः । मत्सङ्गो रमाया एवेतीश्वरः किञ्चित्तं योषितामेवं प्रेरणया तत्सङ्गमङ्गलमेव सम्पादयामासेति तात्पर्यं ज्ञेयम् । यथोक्तं शान्तिपर्वणि गोलक्ष्मीसंवादे । चञ्चलेत्यादिप्रकारेण ताभिर्निषिद्धा रमा वक्ति ।

माननामहमिच्छामि भवत्यः सततं शिवाः ।
अप्येकाङ्ग अथो वस्तुमिच्छामि च सुकुत्सिते ।
अवश्यं मानना कार्या यद्यस्माभिर्यशस्विनि ।
शकृन्मूत्रे वस त्वं च पुण्यमेतद्धि नः शुभे ।

श्रीः ।

दृष्ट्या प्रसादो युष्माभिः कृतो मेऽनुग्रहात्मकः ।
एवं भवतु भद्रं वः पूजितोऽस्मि सुखप्रदाः ।
एवं कृत्वा तु समयं श्रीर्गोभिः सह भारत ।
पश्यन्तीनां ततस्तासां तत्रैवान्तरधीयत ।
एवं गोशकृतः पुत्र माहात्म्यं तेऽनुवर्णितमिति ॥ २१ ॥

सुमनोरञ्जनी — गोरजसा गोशकृता गोमयेन च । बालस्य द्वादशाङ्गेषु ललाटादिद्वादशावयवेषु । नामभिः केशवादिद्वादशभगवन्नामभिः ॥ २१ ॥

गोप्यः संस्पृष्टसलिला अङ्गेषु करयोः पृथक् ।
न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्वत ॥ २२ ॥

सत्यधर्मीया — गोप्यः संस्पृष्टसलिलाः पादधावनाचमनाद्युपयुक्तोदकाः सत्यः । आत्मनि स्वस्मिन्नादावङ्गेषु विशिष्टावयवेषु करयोरिति पृथक् पृथक् न्यस्य बीजाक्षराणि । अथानन्तरं बालस्याङ्गेषु करयोरिति पृथक् पृथक् च बीजन्यासमष्टाक्षरादिन्यासमकुर्वत ॥ २२ ॥

सुमनोरञ्जनी — गोप्यः संस्पृष्टसलिलाः । अङ्गेषु हृदयादिपञ्चाङ्गेषु, करयोः, आत्मनि मध्यदेहे । एवं अष्टस्ववयवेषु । न्यस्य अष्टाक्षरबीजानि न्यस्य । अथ बालस्य । द्वादशाङ्गेष्वि-त्यनुवर्तते । बीजन्यासं द्वादशाक्षरविद्यायाः बीजाक्षराणां न्यासमकुर्वतेति सम्बन्धः ॥ २२ ॥

अव्यादजोऽङ्घ्रिमणिमांस्तव जान्वथोरू यज्ञोऽच्युतः कटितटं जठरं हयास्यः ।
हृत् केशवस्त्वदुर ईश इनस्तु कण्ठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कम् ॥२३॥

सत्यधर्मीया — अजादयश्च भगवन्मूर्तिविशेषाः क्वचिदेवार्थानुगमः । अजो न जायत इति । अज गतिक्षेपणयोरिति स्मरणात् एरजित्यच् प्रत्यये बहुलं तणीति वीभावाभावः । अजा विष्णुहरच्छागा इत्यमराद्विष्णुः । अङ्घ्रिम्, अवयवादीनां परस्परमभेदादेकवचननिर्देशो निर्देशः । क्वचिदूरू इति च विशेषतो व्यवहारविशेष इति सूचक इति ज्ञेयम् । अधिरपि गत्यर्थो गतिमानिति गतिसाधनं पादमव्यादित्यर्थः । अणिमानणिरस्यास्तीति स स चास्थिविशेषो दृढतत्कः । अणिराणिवदक्षाग्रकीले स्यादस्थिसीमयोरिति विश्वः । जान्वथोरू यज्ञोऽच्युतः कटितटं, हयास्यो जठरं, केशवो हृत्त्वदुर ईश इनः कण्ठं विष्णुर्भुजमुरुक्रमस्त्रिविक्रमो मुखमीश्वरः कं शिरोऽव्यादित्यन्वयः । अणिर्गतिरस्यास्तीत्यणिमान्वा । गतेश्चाङ्घ्रिजानुसाध्यत्वाद्द्विवारमुक्तिरिति केऽपि ॥ २३ ॥

सुमनोरञ्जनी — अजादयो मूर्तिविशेषाः । अजोऽङ्घ्रिं,अङ्घ्री । अणिमान् जानु जानुनी । अव्यादिति सर्वत्रान्वेति । हृत् हृदयम् । भुजं भुजौ । कं शिरः ॥ २३ ॥

चक्र्यग्रतः सहगदो हरिरस्तु पश्चात् त्वत्पार्श्वयोर्धनुरसी मधुहाऽजनश्च ।
काणेषु शङ्ख उरुगाय उपर्युपेन्द्रस्तार्क्ष्यः क्षितौ हलधरः पुरुषः समन्तात् ॥२४॥

सत्यधर्मीया — अग्रतोऽग्रे चक्री चक्रधरो हरिरेवं सहगदो गदया सहितो सगदः । वोपसर्जनस्येत्युक्तेः सहगद इति सम्भवति । हरिः पश्चात्पृष्ठभागेऽस्त्विति विपरिणतं यथायथमन्वेति । त्वत्पार्श्वयोर्धनुरसी तद्धरौ रूपविशेषौ धरणीयौ । एवमुत्तरत्रापि । मधुहा मधुसूदनोऽजनो जनार्दनः शङ्ख उरुगायश्चेत्येते चत्वारश्चतुर्षु कोणेषु एकदेशेषु । याम्यादिः कोणेऽप्येकदेश इति विश्वः । उपर्युपेन्द्रस्तार्क्ष्यो गरुडध्वजः सोऽप्युपरि । क्षितौ तदधो हलधरः शेषान्तर्गतसङ्कर्षणः । तस्य पातालतलालयत्वात् । गरुडशेषौ वा । तार्क्ष्यहलधरपदयोरसाक्षादधोक्षजप्रतीतिजनकत्वेन संविधान-सापेक्षार्थकत्वेऽपि प्रस्तुतस्तनपीतविषविषमताभ्रान्त्युपशान्त्यै तदुक्तिरिति मन्तव्यम् । एकस्य तु तत्परिहारकतयैकस्य विषस्वामित्वेन विघ्नेशवत्तत्स्मरणेन तन्नाश इति द्वयोर्ग्रहो युक्तियुक्त इति सन्तोष्टव्यम् । पुरुषः परमपुरुषः समन्तात्सर्वत्र ॥ २४ ॥

सुमनोरञ्जनी — चक्री चक्रधरः अग्रतः पातु । सहगदः गदाधरः पश्चात् पालयन्नस्तु । धनुरसी धनुर्धारी खड्गधारी च । चक्र्यादिपदसाहचर्यात्, पार्श्वयोः रक्षकोऽस्तु । मधुहा मधुसूदनः । अजितः । शङ्खः शङ्खधरः । उरुगाय इति चत्वारः कोणेषु रक्षकाः सन्तु । तार्क्ष्यः गरुडारूढः । हलधरः बलदेवव्यावर्तय पुरुष इति । पूर्णषड्गुण इत्यर्थः ॥ २४ ॥

इन्द्रियाणि हृषीकेशः प्राणान् नारायणोऽवतु ।
श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु ॥ २५ ॥

सत्यधर्मीया — बही रक्षामेवं विधायान्तर्लक्ष्मीकान्तकायरक्षां तन्वङ्गचस्तन्वत इत्याह ॥ इन्द्रियाणीति । हृषीकाणीन्द्रियाण्याहुरित्यादेरिन्द्रियस्वामी हृषीकेश इन्द्रियाण्यवतु । नारायणः प्राणान् । श्वेतद्वीपपतिस्तत्पतिः । एकैकदिगवस्थितरूपविवक्षयैकवचनम् । वासुदेवादिः । यथोक्तं वराहपुराणे ।

श्वेतद्वीपे चतुर्दिक्षु चतस्रो मम मूर्तयः ।
पूज्यन्ते दैवतैः सर्वैर्वासुदेवादिकाः सदा ॥

इति । चित्तम् । योगेश्वरः कपिलादिः । वृत्तिभेदाच्चित्तं मन इत्याद्युक्तिः ॥ २५ ॥

सुमनोरञ्जनी — श्वेतद्वीपपतिः वासुदेवः । चित्तं तदुपलक्षितमनोवृत्तिसमूहम् ॥ २५ ॥

पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान् परः ।
क्रीडन्तं पातु गोविन्दः शयानं पातु माधवः ॥ २६ ॥

सत्यधर्मीया — पृश्निगर्भस्त्वत्पूर्वरूपी । आत्मानमेवं स्वाभिन्नं भगवान्परः । ॐ पञ्चवृत्तिर्मनोवव्यपदिश्यते ॐ । यया ह वै मनः पञ्चधो व्यपदिश्यते । मनो बुद्धिरहङ्कारश्चित्तं चेतनेत्यादेरात्मानमहङ्कारं वा पातु । क्रीडन्तं गोविन्दः ॥ २६ ॥

सुमनोरञ्जनी — पृश्निगर्भः तन्नामकः । आत्मानं चेतनम् ॥ २६ ॥

व्रजन्तमव्याद् वैकुण्ठ आसीनं त्वां श्रियः पतिः ।
भुञ्जानं यज्ञभुक् पातु सर्वग्रहभयङ्करः ॥ २७ ॥

सत्यधर्मीया — सर्वग्रहभयङ्कर इति वैकुण्ठाद्यन्वयि ॥ २७ ॥

सुमनोरञ्जनी — अव्यात् रक्षतु । आसीनमुपविष्टम् । अत्र क्रीडादौ रक्षणं नाम तत्कालोत्पन्नग्रहकृतभयपरिहार एव । अत एवोक्तं सर्वग्रहभयंकर इति ॥ २७ ॥

डाकिन्यो यातुधान्यश्च कूष्माण्डा येऽर्भकग्रहाः ।
भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः ॥ २८ ॥

सत्यधर्मीया — डाकिन्याद्या गणा अर्भकाग्रहा विनायकस्तेऽपि विघ्नप्रदा गणाः ॥ २८ ॥

सुमनोरञ्जनी — डाकिन्यादयो गणविशेषाः ॥ २८ ॥

कोटरारेवतीज्येष्ठापूतनामातृकादयः ।
उन्मादा ये ह्यपस्मारा देहप्राणेन्द्रियद्रुहः ॥ २९ ॥

सत्यधर्मीया — मातृकादय इति पृथग्वा कोटरादिमातृकादय इति समस्तं वा । उन्मादा उन्मादका अपस्मारास्तत्कराः । देहप्राणेन्द्रियद्रुहो देहश्च प्राणाश्चेन्द्रियाणि च तेभ्यो द्रुह्यन्तीति ते ॥ ॥ २९ ॥

सुमनोरञ्जनी — कोटरेत्यादयश्च उन्मादापस्मारादिरोगदाः । अत एव देहप्राणेन्द्रियादीनां द्रुह्यन्ति अपकुर्वन्तीति तथोक्ताः ॥ २९ ॥

स्वप्नदृष्टा महोत्पाता बृहद्बालग्रहाश्च ये ।
सर्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः ॥ ३० ॥

सत्यधर्मीया — ये स्वप्नदृष्टा दुष्फलसूचकमहोत्पातास्ते सर्वे, विष्णोर्नामग्रहणं तदुच्चारस्तस्माद्भीरवो नश्यन्तु । ते विष्णोरिति सामानाधिकरण्येनाप्यन्वयः ॥ ३० ॥

सुमनोरञ्जनी — स्वप्ने दृष्टाः महोत्पाताः अनर्थसूचकाः । विष्णोः व्यापकस्य ते नामग्रहणात् भीरवो भययुक्ताः ॥ ३० ॥

इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणम् ।
पाययित्वा स्तनं माता सन्न्यवीविशदात्मजम् ॥ ३१ ॥

सत्यधर्मीया — प्रणयेन स्वतनयप्रेमविशेषेण बद्धा गृहादिगमनमनिच्छन्त्य इति बद्धवद्विद्यमानास्ताभिर्गोपीभिर्वृद्धसुवासिनीभिः कृतरक्षणमात्मजं माता स्तनं पाययित्वा । उभयोरेकदा पेयत्वादेकवचनम् । सन्न्यवीविशदुपवेशयामास शाययामास वा ॥ ३१ ॥

सुमनोरञ्जनी — प्रणयबद्धाभिः स्नेहपाशयन्त्रिताभिः । कृतं रक्षणं यस्य स तथा । माता यशोदा । आत्मजं कृष्णम् । संन्यवीविशत् स्वापयामास ॥ ३१ ॥

तावन्नन्दादयो गोपा मधुराया व्रजं गताः ।
विलोक्य पूतनादेहं बभूवुरतिविस्मिताः ॥ ३२ ॥

सत्यधर्मीया — तावत् । यावत्तावत्परिच्छेदे कार्त्स्न्येचै मानेऽवधारण इति विश्वः । तावति समये नन्दादयो गोपा मधुरायाः सकाशात्पतितं पूतनादेहं विलोक्यातिविस्मिता बह्वाश्चर्ययुक्ता बभूवुः । ॥३२॥

सुमनोरञ्जनी — मधुरायाः सकाशात् व्रजं गताः प्राप्ताः ॥ ३२ ॥

नूनं बतर्षिः सञ्जातो योगेशो वा समासतः ।
स एव दृष्टो ह्युत्पातो यथाऽऽहानकदुन्दुभिः ॥ ३३ ॥

सत्यधर्मीया — ऋषिस्त्रिकालदर्शी कश्चित्सञ्जातः कश्चिद्योगेशो वा समासतः स्वस्वरूपमप्रकटयन्निति सङ्कोचतः सञ्जातः । बत हर्षे नूनं निश्चयः । तद्विनिगमकमाह ॥ यथेति । आनकदुन्दुभिर्यथाऽऽह स एव तादृशोत्पातो दृष्टो हीति ॥ ३३ ॥

सुमनोरञ्जनी — सः वसुदेवः । ऋषिः त्रिकालज्ञानी । ऋष् ज्ञान इति धातोः । योगेशः कपिलाद्यन्यतमो वा । ज्ञातः । बत हर्षे इति रत्नावली । समासतः संक्षेपतः । सामान्येनेति यावत् । यं उत्पातं प्राह स एवोत्पातो दृष्टः । हि यस्मादित्यर्थः ॥ ३३ ॥

कलेवरं परशुभिश्छित्त्वा तत् ते व्रजौकसः ।
दूरे क्षिप्त्वाऽवयवशो दहुः काष्ठवेष्टितम् ॥ ३४ ॥

सत्यधर्मीया — व्रजौकसो दूरे तत्कलेवरं क्षिप्त्वा तत्रैवावयवशः परशुभिश्छित्वा काष्ठवेष्टितं देहुः ॥ ३४ ॥

सुमनोरञ्जनी — परं शृणन्तीति परशवः तैः कुठारैरित्यर्थः ॥ ३४ ॥

दह्यमानस्य देहस्य धूमश्चागरुसौरभः ।
उत्थितः कृष्णनिर्भुक्तसपद्याहतपाप्मनः ॥ ३५ ॥

सत्यधर्मीया — अगरोः शिंशुपायाः । पिच्छिलागरुशिंशुपेत्यमरः । सौरभमिव सौरभं यस्य । कृष्णस्य निर्भुक्तं स्तनपानरूपं भोजनम् । भावे क्तः । तेन सपदि झडित्याहतः पाप्मा पापं यस्य तस्य देहस्य धूम उत्थितस्तदङ्गसङ्गमाहात्म्येनेयान् गन्ध उद्गत इति भावः । पुमान्पाप्मा पापमित्यमरः ॥ ३५ ॥

सुमनोरञ्जनी — अगरुवृक्षस्य सौरभमिव सौरभं यस्य सः । कृष्णस्य निर्भुक्तं भुक्तिः । तया या संपत् सुकृतलक्षणा तया अपहृतं पाप्म यस्य तत् तस्येत्यर्थः ॥ ३५ ॥

पूतना लोकबालघ्नी राक्षसी रुधिराशना ।
जिघांसयाऽपि हरये स्तनं दत्वाऽऽप सद्गतिम् ॥ ३६ ॥

सत्यधर्मीया — पूतना राक्षसी लोकबालघ्नी । जिघासंया हरये स्तनं दत्वाऽपि सद्गतिमापेति बाह्यार्थविवक्षया । कैमुत्यमुत्तरत्रत्यम् । तथा याऽलोकबालघ्नी पूतना तदन्तर्गतोर्वशी हरये स्तनं दत्वा । अपिना सत्सहवासेऽपि सद्गतिमाप किमुतेति कैमुत्यं च ज्ञेयम् । सद्गतिमवसादनसाधननरक-गतिम् । इतरत्र समीचीनां गतिमित्यर्थः ॥ ३६ ॥

सुमनोरञ्जनी — जिघांसया हन्तुमिच्छयाऽपि स्तनं दत्वा सद्गतिमाप । इदं च पूतनाविष्टोर्वशीविषयम् ॥ ३६ ॥

किं पुनः श्रद्धया भक्त्या कृष्णाय परमात्मने ।
यच्छन् प्रियतमं किञ्चिद् रक्तास्तन्मातरो यथा ॥ ३७ ॥

सत्यधर्मीया — श्रद्धा अस्तीश्वर इति मतिः । भक्तिः प्रेमप्रवाहः । श्रद्धा सा कीदृशीत्यत आह ॥ आभक्त्येति । आ स्वस्वरूपानुरूप्येण भक्तिर्यस्याः सा तया । किञ्चित्प्रियतमं कृष्णाय परमात्मने यच्छन् रक्ता अनुरक्तास्तन्मातरो यथा सद्गतिं गच्छन्ति तथा सद्गतिं गच्छेदिति किं वक्तव्यम् । पूर्वं पूतनेति स्त्रीप्रसक्तौ चोत्तरस्मिन्नपि तस्या अन्तरा यच्छन्निति पुंनिर्देशो न तत्रापि पयोधरपानादिति नाशयः किन्तु लोकानुकरणमित्युभयत्राप्यविशेष इति ज्ञापयितुमिति ज्ञेयम् ॥ ३७ ॥

सुमनोरञ्जनी — श्रद्धया आस्तिक्यबुध्या । यत्किंचित् पत्रपुष्पादिकम् । भक्त्युपहृतत्वात्प्रियतमं यच्छन् पुरुषः सद्गतिमवाप्स्यतीति किमु वक्तव्यमित्यर्थः । रक्ताः अनुरक्ताः । तन्मातरः यशोदाप्रभृतयः ॥ ३७ ॥

पद्भ्यां भक्तहृदिस्थाभ्यां वन्द्याभ्यां लोकवन्दितः ।
अङ्गं यस्याः समाक्रम्य भगवानपिबत् स्तनम् ॥ ३८ ॥

सत्यधर्मीया — भक्तानां हृदि तिष्ठत इति ताभ्याम् । सप्तम्या हृद्युभ्यामित्यलुक् । भक्तानां हृत्तस्मिन् । इना कामेन तिष्ठत इति भक्तहृदिस्थाभ्यां वा । इष्टदानात्तथेन्दव इत्यृग्भाष्य-टीकोदाहरणपूर्वकं प्राक् स्कन्धान्तरविवरणे विस्तृत्योक्तमनुसन्धेयम् । इतरत्प्रागुक्तद्विजीवपरतया योजनीयम् ॥ ३८ ॥

सुमनोरञ्जनी — ननु जिघांसन्त्याः पूतनायाः सद्गतिः कथमभूत् । तथा सति तदितरायोग्यनां भगवद्द्वेषिणामपि सल्लोकप्राप्तिः स्यादित्यतो न पूतना द्वेषफलतया सद्गतिं प्राप अपि तु तदाविष्टोर्वश्याः प्राक्तनभक्त्या प्रसन्न एव भगवान्सद्गतिं ददावित्याह ॥ पद्भ्यामिति । भक्तानां हृदि मनसि विद्यमानाभ्यां तध्यानविषयाभ्यामित्यर्थः । वन्द्याभ्यां स्तुत्याभ्याम् । रमादिभिरिति शेषः । यस्याः पूतनायाः अङ्गं समाक्रम्य सम्यक् प्रसादपूर्वं आक्रम्य आश्लिष्य । यस्याः स्तनं स्तन्यं अपिबत् । अतः शापवशाद्यातुधान्यपि । अत्र यातुधानीत्वं यातुधानीशरीरप्रवेशमात्रं न तु तत्स्व-रूपत्वम् । 'सा तुम्बुरोः सङ्गत आविवेश रक्षस्तनुं शापतो वित्तपस्य' इति निर्णयोक्तेः । जनन्या गम्यत इति जननीगतिस्तां अवापेति सम्बन्धः । जिघांसयेत्युक्तिस्तु भगवते भक्तप्रियत्वस्तुत्यर्थमेवेति ज्ञेयम् । तथा चोक्तं गीताभाष्ये । 'द्वेषाच्चैद्यादयो नृपाः'इत्यादिकं तु भगवतो भक्तप्रियत्वज्ञापनार्थं नित्यध्यानस्तुत्यर्थं चेति । यदा इदानीमसुरशरीरप्रवेशवशाद्द्विषन्त्या अपि उर्वश्याः भक्तवत्सलो

भगवान् तद्द्वेषमगणय्य पूर्वतनभक्तिमेवोपाददानः सद्गतिं ददौ तदा किमु वक्तव्यं स्नेहेन पयांसि पाययन्तीनां दास्यतीत्याह ।। कृष्णेति । कृष्णेन भुक्तं स्तनक्षीरं यासां ताः गावः जननीगतिमापुरिति किमु वक्तव्यम् । तथा अनुमातरोऽपि मातृसपत्न्योऽपि सद्गतिमापुरिति किं वक्तव्यम् ।। ३८,३९ ।।

यातुधान्यपि सा स्वर्गमवाप जननीगतिम् ।
कृष्णभुक्तस्तनक्षीराः किमु गावो नु मातरः ।। ३९ ।।

सत्यधर्मीया — यातुधान्यप्यस्वर्गं नरकमवाप । हे अप पालकान्तरशून्य मामवेति या स्तनमदात्साऽपि जननीनां या गतिस्तां स्वयोग्यतानुसारिसुगतिमवाप सा स्वर्गं तद्रूपां गतिमवाप । यः कृष्णोऽपजनन्यपजनना जननरहिता मुक्तास्ते सन्ति सेवकतयाऽस्य सोऽपजननी भगवानिति पूर्वत्रान्वयः । अप(जननेन)जनिना युक्ता च सा इ अद्भुता च सा गतिस्तामिति वा । इ विचित्रे पुमानिति यादवः । नु एवमधिकारिवैकल्यानुसारे गतिवैकल्यद्योतने । अनु स्वयोग्यतामनुसृत्येति वा । नु पृच्छायां विकल्पे च पश्चात्सादृश्ययोरनु इत्यमरः । नु प्रश्ने च विकल्पार्थे । अनु हीने सहार्थे च पश्चात्सादृश्ययोरन्विति विश्वः । हीनां गतिमिति वा । कृष्णभुक्तस्तनक्षीरा इत्युभयत्रान्वयि । गावो मातरश्च वसुदेवयुवतीनां बहुत्वाद्बहुवचनम् । राजगेहे उपमातॄणां स्तनदानां सतीनां बहुत्वं सम्प्रदायसिद्धमिति बहुवचनं वा । सद्गतिमाप्स्यन्तीति किमु ।। ३९ ।।

पयांसि यासामपिबत् पुत्रस्नेहस्नुतान्यलम् ।
भगवान् देवकीपुत्रः कैवल्याद्यखिलार्थदः ।। ४० ।।

सत्यधर्मीया — यासां पयांसि । पुत्रस्नेहो नरकादित्रातेति प्रेम । तेन स्नुतानि । भगवान्देवकीपुत्रः । उक्तार्थं सुततौपचारिकीति द्योतयितुम् ।। ४० ।।

सुमनोरञ्जनी — कुतः । कैवल्याद्यखिलार्थदो भगवान् । पुत्र इति स्नेहेन । स्नेह इव स्नेहेन वा स्नुतानि यासां ताः । अनुमातॄणां गवां च पयांसि । अलं प्रीतिपूर्वकम् । तदीयस्नेहेन प्रसन्नः सन्निति यावत् । अपिबत् । अत इत्यर्थः ।। ४० ।।

तासामविरतं कृष्णे कुर्वन्तीनां सुते क्षणम् ।
न पुनः कल्पते राजन् संसारोऽज्ञानसम्भवः ।। ४१ ।।

सत्यधर्मीया — सुते कृष्णे तद्रूपे साक्षाद्धरौ । अविरतं क्षणं तद्विषयं नित्योत्सवं कुर्वन्तीनामज्ञानसम्भवस्तद्धेतुकः संसारः पुनर्न कल्पते । स्फुट इतरोऽर्थ इतरस्मात् ।। ४१ ।।

सुमनोरञ्जनी — सद्गतिं,जननीगतिमित्यादिना किं स्वर्गो विवक्षितः उतापवर्ग इत्याशङ्कामपाकुर्वन्नाह ॥ तासामिति । सुत इतीक्षणं सुतेक्षणम् । अनेन श्रीकृष्णे स्नेहो लक्ष्यते । पुनः पुनर्जननमरणादिलक्षणः । स चाज्ञानसंभवः अज्ञानेऽज्ञानदशायामेव संभवो यस्य सः न कल्पते न क्लृप्तो भवति ॥ ४१ ॥

कटधूमस्य सौरभ्यमवघ्राय व्रजौकसः ।
किमिदं कुत एवेति वदन्तो व्रजमाययुः ॥ ४२ ॥

सत्यधर्मीया — कटधूमस्य शवधूमस्य । व्रजौकसो मधुरां गताः ॥ ४२ ॥

सुमनोरञ्जनी — व्रजौकसो गोपाः । कटधूमस्य शवधूमस्य । सौरभ्यं कृष्णस्पर्शनिमित्तं ऊर्वशीसम्बन्धजं वा ॥ ४२ ॥

ते तत्र वर्णितं गोपैः पूतनागमनादिकम् ।
श्रुत्वा तन्निधनं स्वस्ति शिशोरासन् सुविस्मिताः ॥ ४३ ॥

सत्यधर्मीया — तन्निधनं पूतनावधं स्वस्ति च श्रुत्वा ॥ ४३ ॥

सुमनोरञ्जनी — आदिपदेन तस्यास्तेजसा सर्वेषां मौढ्यं स्तन्यदानादिकं बोध्यम् । तस्याः पूतनायाः निधनं शिशोः स्वस्ति च श्रुत्वेति सम्बन्धः ॥ ४३ ॥

नन्दः स्वपुत्रमादाय प्रोष्यागत उदारधीः ।
मूर्ध्न्युपाघ्राय परमां मुदं लेभे कुरूद्वह ॥ ४४ ॥

सत्यधर्मीया — प्रोष्य प्रवासं कृत्वा ॥ ४४ ॥

सुमनोरञ्जनी — प्रोष्य प्रवासं कृत्वा । आगतो नन्दः । श्रीकृष्णे उदारः उत्कृष्टः धीर्यस्यासौ तथोक्तः सन् परमां मुदं सन्तोषम् ॥ ४४ ॥

य एतत् पूतनामोक्षं कृष्णस्यार्भकचेष्टितम् ।
निशम्य श्रद्धया मर्त्यो गोविन्दे लभते रतिम् ॥ ४५ ॥

इति श्रीमद्भागवते दशमस्कन्धे सप्तमोऽध्यायः ।

सत्यधर्मीया — पूतनाया एकत्र मोक्षो नाशो यस्मिन्नन्यस्मिंश्च मोक्षः सुगतिश्च येन तदेतत्कृष्णस्यार्भकचेष्टितं जयाङ्कुररूपं प्राथमिकं चेष्टितमिति यावत् । गोदातरङ्गालिमरुत्कुमारा इति विद्याधीशविजयोक्तेरिवार्भकेति चेष्टितविशेषणतामेति । श्रद्धया निशम्य स्थितो मर्त्यो गोविन्दे रतिं लभते ॥ ४५ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे सप्तमोऽध्यायः ॥ १०-७ ॥

सुमनोरञ्जनी — फलमाह ॥ य इति । कृष्णस्य । अर्भकचेष्टितं बालक्रीडां निशम्य श्रुत्वा आस्त इति शेषः । सः गोविन्दे रतिं भक्तिम् ॥ ४५ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां सप्तमोऽध्यायः ॥ १०-७ ॥

॥ अथ अष्टमोऽध्यायः ॥

श्रीशुक उवाच -

एवं स ववृधे विष्णुर्नन्दगेहे जनार्दनः ।
कुर्वन्ननिशमानन्दं गोपालानां सयोषिताम् ॥ १ ॥

सत्यधर्मीया — ॥ अधुना मधुनाथकथाकथनमानसः शुको, नापृष्टः कस्यचिद्ब्रूयादित्यादेः परीक्षिच्चेतसि शङ्कामङ्कुरयन्निव किञ्चित्सङ्कुचेवात्मानमेतद्विषय इति दर्शयन्नुपसंहरन्निवेदतीति समीरयति ॥ श्रीशुक इति । सयोषितां गोपालानामानन्दं तोषमानन्दनमारभ्येति च । अनिशं निरन्तरम् । अनिशं निशं शमभावस्तन्न भवतीत्यनिशं सुसुखमिति द्वितीयपक्षेऽर्थः । कुर्वन्नन्दगेहे जनार्दनो विष्णुः सः साररूपी गुणाभावः साक्षाद्वृद्धिमन्तृगुणाभावसूचकः । अविभक्तिको वा निर्देशो यः कुर्वन्स इति वाऽन्वयः । ववृधेऽवर्धत तां वृद्धिं जनार्दन इतीरयन्नुपजहास । ततश्चापेक्ष्य लोकस्य हि मन्ददृष्टिमिति सिध्यतीति मन्तव्यम् ॥ १ ॥

सुमनोरञ्जनी — भूभारपरिहारार्थमवतीर्णस्य हरेरवतारप्रयोजनशकटासुरतृणावर्तयोर्भङ्गभङ्गीं प्रदर्शयत्यनेनाध्यायेन । तत्रादौ शुकः परीक्षिन्महाराजस्य प्रश्नबीजमुत्थापयन्नाह ॥ एवमिति ॥ यथा पूतनां संहृत्य स्वीयानामानन्दमातेने । एवं दिने दिनेऽद्भुतलीलां कुर्वन्स्वीयानामानन्दं वितन्वन्नेव ववृधे । एतदेव विवृणोति ॥ जनार्दन इति । जनान् दुष्टजनानर्दयतीति तथोक्तः ॥ १ ॥

राजोवाच -

येन येनावतारेण भगवान् हरिरीश्वरः ।
करोति कर्णरम्याणि मनोज्ञानि च नः प्रभो ॥ २ ॥

सत्यधर्मीया — येनयेनेति पदमेकम् । येनेत्येकपदस्य स्थाने समुदितादेशः । विस्तृतं चैतत् 'सर्वस्य द्वेसूत्रशेखरतत्त्वसुबोधिन्योर्बोध्यम् । कर्णरम्याणि श्रोतृश्रोत्रसुखकराणि । नीतिगाथादीनि तथा भवन्तीत्यत आह ॥ मनोज्ञानीति । मनःप्रीतिसम्पादकान्यपि न सर्वाधिकारिसाधारण्येन तत्रादर इति कर्णरम्याणीति । यानि यानि भगवान्हरिरीश्वरः कर्माणि सत्यव्रतादिरक्षणादीनि तानि तान्यपि नः श्रोतॄणामुक्तरूपाणि भवन्ति ॥ २ ॥

सुमनोरञ्जनी — एवमित्यनेन सूचितमाहात्म्यान्तरे जातजिज्ञासू राजा पृच्छति ॥ येन येनेति ॥ कर्णरम्याणि श्रोत्रसुखकराणि, शब्दतः । अर्थतस्तु मनोज्ञानि मनःप्रीतिकराणि चरितानि । भगवान् येन येनावतारेण करोति तानि नः अस्मानुद्दिश्यैव अस्मत्प्रयोजनार्थमेव करोति नान्यथा । नः कर्णरम्याणीति वा ॥ २ ॥

यच्छृण्वतोऽपैत्यरतिर्वितृष्णा सत्वं विशुध्यत्यचिरेण पुंसः ।
भक्तिर्हरौ तत्पुरुषे च सख्यं तदेव सारं वद मन्यसे चेत् ॥ ३ ॥

सत्यधर्मीया — यद्भगवत्कर्म शृण्वतः पुंसोऽरतिः खेदोऽपैति (न) गच्छति वितृष्णाऽन्य-विषयस्पृहाभाववति अरतिः । वितृष्णा विविधा तृष्णाऽऽकाङ्क्षा यस्याः सा मानसग्लानिरपैतीति वा । सत्त्वं मनः, हरौ च भक्तिर्भवति । तत्पुरुषे च सख्यं तद्दासेषु मैत्री । एकैकं निमित्तीकृत्य तं, लोके ख्यातिं विधातुं प्रायोऽवतरति हरिरिति तत्पुरुष इत्युक्तिरिति वा । अलमेक एव स्वसहवासेनोद्धर्तुं किं बहुना बहव इति सूचयितुमिति वा ज्ञेयम् । तत्राप्यान्तरङ्गिको राज्ञो भावस्तु तत्पुरुषे शिवात्मके त्वयीतीत्यानुपूर्व्योदाहर्तुरिति । तत्पुरुषाय विद्महे महादेवाय धीमहि । महेश महितोऽसि तत्पुरुषपूरुषाग्र्यो भवानित्यादेः । तदेव कर्म सारं घनं श्रेष्ठम् । घने सारं वरेण्यवत्सारमुदाहरन्तीति विश्वः । वद, मन्यसे चेन्मां दयनीयमिति शेषः । तत्पुरुषे त्वयि सख्यं मम मन्यसे चेदित्यन्वयने नाध्यहारायास इति मन्तव्यम् । यत्सत्त्वं साधुत्वं वचनप्रयोजकं तत्पुरुषे मयि मन्यसे चेदिति वा । एतेन मन्यसे चेदिति वचनत आविर्भविष्यच्छुकदुश्चित्तता च्यावितेति सन्तोष्टव्यम् ॥ २, ३ ॥

सुमनोरञ्जनी — तदेवाह ॥ यदिति । यत् भगवच्चरितं शृण्वतः अरतिः क्षुधादिनिमित्तं दुःखं सांसारिकं वा । वितृष्णा विविधतृष्णा च अपैति नश्यति । सत्वं अन्तःकरणम् । तत्पुरुषेषु तस्य हरेः पुरुषेषु भक्तेष्वित्यर्थः। सख्यं च जायत इति शेषः। चोऽवधारणे । तदेव वद । वक्तुं मन्यसे चेत् ॥३॥

अथान्यदपि कृष्णस्य तोकाचरितमद्भुतम् ।
मानुषं देहमासाद्य तज्जातिमनुरुन्धतः ॥ ४ ॥

सत्यधर्मीया — फलितमभिलपति । मानुषं तद्वदविद्भिदितमासाद्य प्राप्य तज्जातिं गोपालजातिमनुरुन्धतोऽनुकुर्वतः । कारुण्याद्भक्तकृपापारवश्येन । कृष्णस्य तोकाचरितं गतम् । अन्यदपि यत्सर्वपापप्रणाशनं विस्तरेण वक्तुमर्हसि योग्यो भवसि । तत्र तत्र प्रभो त्वं दयालुरसीति । स्याद्दयालुः कारुणिक इत्यमरः । स्पृहिगृहिपतिदयीत्यालुच् ॥ ४ ॥ ५ ॥

सुमनोरञ्जनी — प्रकृतमनुसरति ॥ अथेति । अथ तोकाचरितं बाललीलाम् । मानुषं मानुषवत्प्रतीतम् । तज्जातिं मानुषजातिम् । अनुरुन्धतः अनुकुर्वतः ॥ ४ ॥

विस्तरेणेह कारुण्यात् सर्वपापप्रणाशनम् ।
वक्तुमर्हसि धर्मज्ञ दयालुस्त्वमिति प्रभो ॥ ५ ॥

सुमनोरञ्जनी — उक्तस्य पुनर्वचनं किमर्थमित्यत उक्तं ॥ विस्तरेणेति ॥ विस्तरेण कथने किं प्रयोजनमित्यत उक्तम् ॥ कारुण्यात्करुणयैवेति । करुणापि निर्निमित्तं कथं स्यादित्यत उक्तम् ॥ दयालुस्त्वमिति । स्वत एव कृपालुत्वान्न निमित्तापेक्षेति भावः ॥ ५ ॥

श्रीशुक उवाच -

कदाचिदौत्थानिककौतुकाप्लवे जन्मर्क्षयोगे समवेतयोषिताम् ।
वादित्रगीतद्विजमन्त्रवाचकैश्चकार सूनोरभिषेचनं सती ॥ ६ ॥

सत्यधर्मीया — औत्थानिककौतुकाप्लवे उत्थानं शिशोरङ्गपरिवर्तनं तत्कालिकं कौतुकं कुलपरम्परागतमङ्गलं तन्निमित्तको य आप्लवः स्नपनं तस्मिन्कर्तव्ये । ''कौतुकं चाभिलाषे स्यादुत्सवे नर्महर्षयोः । परम्परासमायातमङ्गले च कुतूहले । विवाहसूत्रगीतादिभोगकामेषु च स्मृतम्'' । इति विश्वाद्योग्यार्थोऽपि ज्ञेयः । तत्रापि जन्मर्क्ष्यं रोहिणीनक्षत्रं तद्योगेऽपि जाते सति । समवेतयोषितां मिलितललनानां मध्ये सती स्वयं विद्यमाना नन्दस्य पत्नी । वादित्रगीतैः सहिताश्च ते द्विजेषु ये मन्त्रवाचकास्तैर्द्विजाश्च ते मन्त्रवाचकाश्चेति वा तैः सह सूनोरभिषेचनं चकार तैः कारयामासेति वा । समवेतयोषितामुत्थापनकौतुकाप्लव इति च पाठः । कदाचिद्दिन आप्लवः इतस्ततः प्लुतिस्तस्मिन्निति वा । क्रमनिम्नमहीभागकविप्लुतिखगाः प्लव इति यादवः । इति व्याकर्तारः ॥ ६ ॥

सुमनोरञ्जनी — जन्मर्क्षस्य योगो यस्मिन् तस्मिन् । कदाचित् कालविशेषे । समवेतानां योषिताम् । उत्थापनकौतुकाप्लवे । उत्थापनकौतुकस्य बहिर्निष्क्रामणोत्सवस्य आप्लवे व्याप्तौ सत्याम् । यद्वा उत्थापनं उत्थितिः शिशोः अङ्गपरिवर्तनम् । तस्य यत्कौतुकं उत्सवः तत्र करणीये आप्लवे अभिषेके अभ्यङ्ग इति यावत् तदर्थं समवेतयोषितां मध्ये । सती यशोदा । वादित्राणि वाद्यानि । गीतानि स्त्रीभिः कृतानि तैः मन्त्रवाचकैर्द्विजैश्च सह सूनोः कृष्णस्य अभिषेचनं चकारेति सम्बन्धः ॥ ॥ ६ ॥

नन्दस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं सुपूजितैः ।
अन्नाद्यवासःस्रगभीष्टधेनुभिः सञ्जातनिद्राक्षमशीशयच्छनैः ॥ ७ ॥

सत्यधर्मीया — कृतमज्जनादिकमन्नाद्यवासःस्रगभीष्टधेनुभिः । अभीष्टेति काकाक्षिन्यायेन स्रग्धेनुपदाभ्याम्, अभीष्टाः स्रजश्चाभीष्टा धेनवश्चेत्यन्वेति । अन्नमाद्यं येषां तैश्च वासो वस्त्रं च तेन स्रगभीष्टधेनुभिश्च सुपूजितैर्विप्रैः । आद्यं भक्षयितुं योग्यं समीचीनमिति यावत् तच्च तदन्नम् । विशेषणस्य परनिपातः । ऋहलोर्ण्यदिति ण्यत् । तच्च स्रगभीष्टधेनवश्च ताभिरिति वा । कृतस्वस्त्ययनं, सञ्जातनिद्राक्षं सञ्जाता प्रादुर्भूता निद्रा ययोस्ते अक्षिणी लोचने यस्य तम् । शनैर्निद्राभङ्गभीत्या मन्दमशीशयत् शाययामास । शनैःस्वैरं स्वेच्छमिति यावत् । शनैः शनैश्चरे स्वैर इति विश्वः । अनोऽधस्तनभाग इति शेषः ॥ ७ ॥

सुमनोरञ्जनी — कृतं मज्जनम् । आदिना गात्रसुरभीकरणादिकं यस्य स तथोक्तस्तम् । अन्नाद्यैर्भोज्यैः वासोभिः स्रग्भिः अभीष्टाभिर्धेनुभिश्च । अभीष्टैः अन्नादिभिन्नैः अभिलषितपदार्थैरिति वा । सुष्ठु पूजितैः विप्रैः कृतस्वस्त्ययनम् । संजाता निद्रा ययोस्ते तथाविधेऽक्षिणी यस्यासौ तथोक्तस्तं कृष्णम् । शनैः निद्राभङ्गभीत्या शब्दमकुर्वन्ती । अशीशयत् स्वापयामास ॥ ७ ॥

औत्थानिकौत्सुक्यमना मनस्विनी समागतान् पूजयती व्रजौकसः ।
नैवाशृणोद् वै रुदितं सुतस्य सा रुदन् स्तनार्थी चरणावुदक्षिपत् ॥ ८ ॥

सत्यधर्मीया — औत्थानिकौत्सुक्यमना औत्थानिके प्रारब्धाङ्गपरिवर्तनव्यापारे औत्सुक्यमुत्सुकता यस्य तत्तन्मनो यस्याः सा शान्ता । मनस्विनी प्रशस्तचित्ता । समागतान्व्रजौकसः स्त्रीपुंसान्पूजयती पूजयन्ती सभाजयन्ती सा सुतस्य रुदितं रोदनं नैवाशृणोन्नैव शुश्राव यदा तदा स्तनार्थी रुदंश्चरणावुदक्षिपदुद्धृत्याक्षिपत् । अनुनये कर्तव्ये सतीत्यपि सूचयति वैकारः । यस्य सुतस्य वैरुदितम् । विगतं रुदितं रोदनं यस्य स विरुदितस्तस्य भावो वैरुदितं कदाऽप्यरोदमानो तातस्य रुदितं न वै अशृणोदित्यपि योजयन्ति ॥ ८ ॥

सुमनोरञ्जनी — औत्थानकर्मणि औत्सुक्यं यस्य तादृशं मनो यस्याः सा । मनस्विनी प्रशंसनीयमनाः । भूमनिन्दा प्रशंसासु भवन्ति मतुबादय इति वचनात् । समागतान् व्रजौकसः गोपान् गोपयोषितश्च पूजयंती सा यशोदा । सुतस्य रुदितं रोदनशब्दं नैवाशृणोत् । उदक्षिपत् ऊर्ध्वमक्षिपत् ॥ ८ ॥

अनः शयानस्य शिशोरथाल्पकप्रवालमृद्वङ्घ्रिहतं व्यवर्तत ।
विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्षविभिन्नकूबरम् ॥ ९ ॥

सत्यधर्मीया — शयानस्य स्वाधस्ताच्छिशोः । अल्पकावत्यणू । प्रवालो वल्लकी दण्डे विद्रुमे वनपल्लव इति विश्वान्नवपल्लववन्मृदू वा । प्रवालवद्विद्रुमवद्रक्तौ च तौ मृदू चेति वा । तौ च तावङ्घ्री ताभ्यां हतं ताडितम् । अनो विध्वस्तानि नाना नानाविधरसा येषु कुप्येषु तदितरभाजनेष्विति । विध्वस्तानि नानारसकुप्यभाजनानि यस्मिंस्तत् । व्यत्यस्तौ चक्रं चाक्षश्च शकटसम्बन्धी दारुविशेषः स यस्य तत् । विभिन्नः कूबरो युगन्धरो यस्य तत् । व्यत्यस्तचक्राक्षं च तद्विभिन्नकूबरं च तत्सत् । व्यवर्तत विपर्यस्तमभूत् । राजसूयादिनिपातितः कुप्यशब्दः । ताभ्यां यदन्यत्कुप्यम् । कूबरस्तु इत्युभयतश्चामरः । अनः समाविश्य दितेः सुतोऽसौ स्थितः प्रतीपाय हरेः सुपापः । क्षित्यो नसिस्थः शकटाक्षनामा विष्णुं स नीत्वा सहितः पपात । ममार चाश्वित्यादि श्रीमदुक्तेर्विशेषोऽवसेयः ॥ ९ ॥

सुमनोरञ्जनी — अथ पादोत्क्षेपणानन्तरम् । शयानस्य शिशोः । अल्पकौ प्रवालवत् नवकिसलयवत् मृदू यौ अङ्घ्री चरणौ ताभ्यां हतं ताडितम् । अनः शकटम् । व्यवर्तत वि विपरीतं यथा तथा अवर्तत । अधोमुखमभूदित्यर्थः । कीदृशं सत् । विध्वस्तानि इतस्ततो विक्षेपेण नष्टानि नानारसपूर्णानि कुप्यानि कांश्यादिनिर्मितानि भाजनानि यस्य तत् । व्यत्यस्ताः चक्राक्षाः चक्रे अक्षश्च चक्रयोः प्रोतो दारुविशेषः । ते यस्य । तच्च तत् विभिन्नो भग्नः कूबरो युगन्धरो यस्य तादृशं सदित्यर्थः ॥ ९ ॥

दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रिय औत्थानिके कर्मणि याः समागताः ।
नन्दादयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै शकटं विपर्यगात् ।
इति ब्रुवन्तोऽतिविषादमोहिता जनाः समन्तात् परिवव्रुरार्तवत् ॥ १० ॥

सत्यधर्मीया — यशोदा प्रमुखं मुख्या यासां ता अस्वाङ्गत्वान्न ङीष् । व्रजस्त्रिय औत्थानिके कर्मणि याः समागता एतदन्या एता वा । नन्दादयः पुमांसश्च दृष्ट्वा शकटमनः कथं स्वयं पातयित्रभावेऽपि विपर्यगाद्विपरीतं पपातेति । अद्भुतदर्शनेनाश्चर्यावलोकनेनाकुलाश्चञ्चलचित्ताः सन्तोऽब्रुवन् । इति ब्रुवन्त आर्तवदार्ता विषादमोहिता जनाः परिवव्रुः ॥ १० ॥

सुमनोरञ्जनी — यशोदा प्रमुखा यासां ताः व्रजस्त्रियो नन्दादयश्च अद्भुतदर्शनेन आकुलाः व्याकुलमनसः । विपर्यगात् व्यत्यासमगमत् ।

इति एवं प्रकारेण विषादेन मनःखेदेन मोहेन च युक्ताः । आर्तवत् आर्ता इव समंतात् अभितः परिवव्रुरित्यन्वयः ॥ १० ॥

ऊचुस्तदव्यक्तमतीन् गोपान् गोपीश्च बालकाः ।
रुदताऽनेन पादेन क्षिप्तमेतन्न संशयः ॥ ११ ॥

सत्यधर्मीया — तदव्यक्तमतींस्तस्मिन्ननो व्यत्यस्तीभवनकर्मण्यव्यक्ता निश्चयमनाप्नुवाना मतिर्यासामेषां च तान् गोपीर्गोपांश्च । बालकास्तत्रत्याः । रुदताऽनेन बालेन कर्त्रा, पादेन करणेनैतदनः क्षिप्तं संशयो न नास्तीत्यूचुः । अनेन पादेनेत्यनेन प्राक् चरणावुदक्षेपादिर्बालभावे स्वभावोऽयमित्यावेदयितुम् । वस्तुतस्तु तद्विपर्यास एकेनैवासेति द्योतयन्तीति मन्तव्यम् । हस्तोऽपि क्षिप्तः किमिति कश्चिदविपश्चिच्छङ्केत । तदवकाशपदान्तरं यत्र नास्ति तत्र करावकारः कथमित्यपि कथयन्तीति कथयति ॥ नेति । संशयः कोमलशयः पाणिर्न विनिक्षिप्त इत्यूचुः । पञ्चशाखः शयः पाणिरित्यमरः । सन्देहादिपदमसन्दानिता संशयपदं निबन्धान इदं योजनमसूचयत् ॥ ११ ॥

सुमनोरञ्जनी — तत् तदा । अव्यक्ता, स्पष्टं कमपि कारणविशेषमनवहमाना मतिर्येषां तान् । अनेन कृष्णेन कर्त्रा । पादेन करणेन । एतत् शकटम् ॥ ११ ॥

न ते श्रद्दधिरे गोपा बालभाषितमित्युत ।
अनन्तस्याप्रमेयस्य बलं तस्य न वै विदुः ॥ १२ ॥

सत्यधर्मीया — अनन्तस्य नाशरहितस्याप्रमेयस्य साकल्येन प्रमातुमशक्यस्य ते बलं न विदुर्वै यतस्तत इदं बालभाषितमित्युत तदन्तरं ते न श्रद्दधिरे न विश्वासं चक्रुः । उत भवेदथवा नेति विकल्पं कृत्वेति वा । उताप्यर्थविकल्पयोरित्यमरविश्वौ ॥ १२ ॥

सुमनोरञ्जनी — ते गोपाः । बालभाषितम् । न श्रद्दधिरे । बालभाषितमिति हेतोः । उत किं च । अनन्तस्य अपरिच्छिन्नस्य । अप्रमेयस्य साकल्येन तदनुग्रहमन्तरा प्रमातुमशक्यस्य कृष्णस्य बलं न विदुः ॥ १२ ॥

रुदन्तं सुतमादाय यशोदा ग्रहशङ्किता ।
कृतस्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत् ॥ १३ ॥

सत्यधर्मीया — ग्रहो मारिकाग्रहः। विप्रैः सूक्तैः कृतस्वस्त्ययनं स्तनमपाययत् ॥ १३ ॥

सुमनोरञ्जनी — ग्रहशङ्किता ग्रहबाधां शङ्कमाना सती। विप्रैः। सूक्तैः ग्रहबाधापरिहारकैः। स्तनं अपाययत् पाययामास ॥ १३ ॥

पूर्ववत् स्थापितं गोपैर्बलिभिः सपरिच्छदम्।
विप्रा हुत्वाऽर्चयाञ्चक्रुर्दध्यक्षतकुशाम्बुभिः ॥ १४ ॥

सत्यधर्मीया — पूर्ववत्स्थापितमनः। बलिभिर्गृहशान्त्यर्थं प्रक्षिप्तान्नादिभिः सपरिच्छदं सपरिकरं विप्रा हुत्वा दध्यक्षतकुशाम्बुभिरर्चयाञ्चक्रुः ॥ १४ ॥

सुमनोरञ्जनी — स्थापितं शकटमिति शेषः। सपरिच्छदं सपरिकरम्। विप्राः अग्नौ हुत्वा। दध्यक्षतादिभिः अर्चयाञ्चक्रुः ॥ १४ ॥

येऽसूयानृतदम्भेर्ष्याहिंसामानविवर्जिताः।
न तेषां सत्यशीलानामाशिषो विफलाः क्वचित् ॥ १५ ॥

सत्यधर्मीया — असूया सत्सु गुणेषु दोषाविष्कृतिर्न मद्वशोऽसाविति चित्ततोदमात्सर्यमार्य इत्याद्युक्तमात्सर्यं वा ईर्ष्याऽक्षमा वा। दम्भोऽविद्यमानगुणप्रदर्शनम्। हिंसा परद्रोहादिः। मानो गर्व एतदादिविकला ये तेषां सत्यशीलानाम्। सत्यशब्दोऽनसूयादिसर्वोपलक्षकः। सत्यं ब्रह्म तन्निष्ठानामिति वा। आशिषः क्वचिदपि विफला न भविष्यन्ति ॥ १५ ॥

सुमनोरञ्जनी — ये, स्तेयं चौर्यं भगवद्गुणानामात्मन्यारोपो वा। अनृतं असत्यवचनम्। दम्भः स्वयोग्यतातिक्रमेण स्वमाहात्म्यज्ञापनम्। ज्ञात्वापि स्वात्मनोऽल्पत्वं दम्भो माहात्म्यभावनमिति गीताभाष्ये। ईर्ष्या परोत्कर्षासहनम्। हिंसा अवैदिकी, वृथा प्राणिहिंसा। मानः कुलीनत्वाद्यभिमानः। एतैर्विवर्जिताः। तेषां, सत्ये साधुगुणस्वरूपे भगवति शीलं स्वभावः, समाधिर्मनोनिवेशनं वा येषां तेषाम्। आशिषः आशीर्वचनानि ॥ १५ ॥

इति बालकमानीय सामर्ग्यजुरुपाकृतैः।
जलैः पवित्रौषधिभिरभिषिच्य द्विजोत्तमैः ॥ १६ ॥

सत्यधर्मीया — इति हेतोः साम च ऋचश्च यजुश्च तैरुपाकृतैः संस्कृतैर्जलैः पवित्रौषधिभिः पृथग्वा जलमिलितैः सितसर्षपादिभिर्वा। द्विजोत्तमैरभिषिच्य ॥ १६ ॥

सुमनोरञ्जनी — इति अस्मादेव हेतोः । इति हेतुप्रकरणप्रकारादिसमाप्तिष्वित्यमरः । सामर्ग्यजुर्भिः उपाकृतैः अभिमन्त्रितैः जलैः पवित्राः ये औषधयः चूताश्वत्थादयः येषु जलेषु तैश्च । द्विजोत्तमैः ब्राह्मणश्रेष्ठैः अभिषिच्य अभिषेचयित्वा ॥ १६ ॥

वाचयित्वा स्वस्त्ययनं नन्दगोपः समाहितः ।
हुत्वा चाग्निं द्विजातिभ्यः प्रादादन्नं महागुणम् ॥ १७ ॥

सत्यधर्मीया — स्वस्त्ययनं च वाचयित्वाऽग्निं हुत्वा हावयित्वा महागुणं षड्रसोपेतमन्नं प्रादात् ॥ ॥ १७ ॥

सुमनोरञ्जनी — समाहितः एकाग्रचित्तः सन् ॥ १७ ॥

गावः सर्वगुणोपेता वासःस्रग्रुक्ममालिनीः ।
पुत्रस्याभ्युदयार्थाय प्राग्जातेश्चान्वयुञ्जत ॥ १८ ॥

सत्यधर्मीया — गावः सर्वगुणोपेता इत्येव पाङ्क्तः पाठः । गावो गा इति केचिव्द्याकुर्वन् । वस्तुतस्तु गाः व इति पदद्वन्द्वम् । इयं वो न ममेति सङ्कल्पपूर्वकं प्रादादित्यर्थः । एवमेव तदभिप्रायः प्राय इति । जित्वा वयं नेष्यति चाद्य गाव इति विराटपर्वोक्तेर्ज्ञायत इत्युत्तरत्रेत्थमनुसन्धेयम् । पुत्रस्याभ्युदयार्थाय जातेः प्रागुत्पत्तेः पूर्वं सङ्कल्पिताः । प्राग्जातेः प्रथमवर्णेभ्य इति वा ब्राह्मणसङ्घस्येति वा । सर्वगुणोपेता अनसूयादिसर्वगुणसहितास्ते विप्रा आशिषोऽन्वयुञ्जत युयुजुरित्यन्वयः ॥ १८ ॥

सुमनोरञ्जनी — वासांसि, स्रजः पुष्पमालाः, रुक्ममालाः सौवर्णमालाः । ता आसां सन्तीति तथोक्ताः । पुत्रस्य श्रीकृष्णस्य । प्राग्जातेः अग्रजस्य बलदेवस्य । अभ्युदयलक्षणप्रयोजनाय । द्विजातिभ्यो गाः अन्वयुंजतेत्यन्वयः ॥ १८ ॥

विप्रा मन्त्रविदो युक्तास्तैर्याः प्रोक्तास्तथाऽऽशिषः ।
ता निष्फला भविष्यन्ति न कदाचिदपि स्फुटम् ॥ १९ ॥

सत्यधर्मीया — ननु तैर्दत्ता नान्यथा भवन्तीति कुत इत्यत आह ॥ विप्रा इति । युक्ता एकैकेनोक्ता न निष्फलाः किमुत मिलितैरिति युक्ता इत्यनेन ध्वनयति । तैर्याः सुताशिष इति कचित्पाठः प्रस्तुतमात्रसङ्गतः । तथाऽऽशिष इति सर्वसरलः । ताः कदाचिदपि निष्फला न भविष्यन्ति । स्फुटं कदाचिदपीति शपथपूर्वकं तदवैपरीत्यं द्योतयति । श्लोकद्विकस्याखण्डान्वयो वा ।

प्राग्जातेः पुत्रस्येत्यन्वयः । प्राग्जो ह्याद्यो ब्रह्मा तस्यातिः सम्यगानन्दो यस्मात्स तस्य पुत्रस्य येभ्योऽसर्वगुणोपेता वासःस्रग्रुक्ममालिनीर्गाश्च व इति प्रादात् ते च विप्रा युक्ता आशिषोऽन्वयुञ्जत यास्ता विफलाः कदाचिदपि न भविष्यन्तीति ये मन्त्रविदो वेदज्ञास्तैः प्रोक्तास्तेऽपि नोपर्येवोक्तवन्त इत्याह ।। स्फुटमिति । अतो नाविश्वसनीयतेति भावः । प्रागेव जो जेता चातिः पूर्णानन्दश्च तस्य पुत्रस्येति वा । जो जेता चेति विश्वः । प्राग्जातेर्बलभद्रस्यापीत्यर्थः ।। १९ ।।

सुमनोरञ्जनी — ये विप्राः मन्त्रविदस्तथा युक्ताः हरौ मनोयोगयुक्ताः तैरित्यन्वयः ।। १९ ।।

एकदाऽऽरोहमारूढं लालयन्ती सुतं सती ।
गरिमाणं शिशोर्वोढुं न सेहे गिरिकूटवत् ।। २० ।।

सत्यधर्मीया — आरोहमङ्कम् । गिरिकूटस्येव तत्समूहस्येव । कूटं राशाविति विश्वः । गुरोर्भावो गरिमा तम् । इमनिजन्तः ।। २० ।।

सुमनोरञ्जनी — श्रीकृष्णस्य विक्रमान्तरं वक्तुमुपक्रमते ।। एकदेति । आरोहं कटिपुरोभागम् । गिरिकूटवत् गिरिशृङ्गस्येव शिशोर्भारं न सेहे सोढुमशक्ताऽभूत् ।। २० ।।

भूमौ निधाय तं गोपी विस्मिता भारपीडिता ।
महापुरुषमादध्यौ जगामाशु च कर्मसु ।। २१ ।।

सत्यधर्मीया — भारपीडिता दुर्भरदितिसुतादिभिस्तस्यां भूमौ तं निधाय गोपी विस्मिताऽऽपीनोऽप्येवं कुत इत्याश्चर्ययुता महापुरुषमादध्यौ । एतन्न जाने श्रीजाने पालय बालमिममिति माधवं दध्यौ ध्यातवती । इममेव बालं महापुरुषं तदात्मकमादध्याविति वा । कर्मसु स्वगृहकृत्येषु तानि कर्तुमिति यावत् । जगाम ।। २१ ।।

सुमनोरञ्जनी — गोपी विस्मिता । तं श्रीकृष्णं महापुरुषम् । आदध्यौ ध्यातवती । मृत्पुत्रोऽयं परमपुरुष एवेति मनसा चिन्तितवतीति भावः । कर्मसु गृहकर्मसु ।। २१ ।।

दैत्यो नाम्ना तृणावर्तः कंसभृत्यः प्रचोदितः ।
चक्रवातस्वरूपेण जहारासीनमर्भकम् ।। २२ ।।

सत्यधर्मीया — कंसभृत्यो नाम्ना तृणावर्तो दैत्यः । प्रचोदितो मृत्युना प्रेरितश्चक्रवातो मण्डवायुस्तत्स्वरूपेणासीनमुपविष्टमर्भकं जहार ।। २२ ।।

सुमनोरञ्जनी — प्रचोदितः कंसेनेति शेषः । चक्रवातः चक्राकारवत् भ्रममाणो वातः तत्स्वरूपेण । आसीनं उपविष्टम् ॥ २२ ॥

गोकुलं सर्वमावृण्वन् मुष्णंश्चक्षूंषि रेणुभिः ।
ईरयन् सुमहाघोरशब्देन प्रदिशो दिशः ॥ २३ ॥

सत्यधर्मीया — रेणुभिः शर्कराभिरावृण्वन्नाच्छादयन्मुष्णन्नपहरन्दिशः प्रदिशश्च महाघोरशब्देनेरयन् शब्दापयञ्जहारेत्यन्वयः ॥ २३ ॥

सुमनोरञ्जनी — रेणुभिः पांसुभिः । चक्षूंषि चाक्षुषवृत्तीः । मुष्णन् अपहरन् । दिशः प्रदिशश्च । शब्देन ईरयन् शब्दयुक्ताः कुर्वन् ॥ २३ ॥

मुहूर्तमभवद् गोष्ठं रजसा तमसाऽऽवृतम् ।
सुतं यशोदा नापश्यत् तस्मिन् न्यस्तवती यतः ॥ २४ ॥

सत्यधर्मीया — गोष्ठम् । गोष्ठं गोस्थानके मतमिति विश्वः । रजसा तन्निमित्तकतमसा चावृतं मुहूर्तमभवत् । यशोदा यतो यत्र स्थले सुतं न्यस्तवती तस्मिन्नापश्यत् ॥ २४ ॥

सुमनोरञ्जनी — मुहूर्तं मुहूर्तपर्यन्तम् । यतः यत्र न्यस्तवती तस्मिन् स्थले ॥ २४ ॥

नापश्यत् कश्चनात्मनं परं चापि विमोहितः ।
तृणावर्तनिसृष्टाभिः शर्कराभिरुपद्रुतः ॥ २५ ॥

सत्यधर्मीया — शर्कराभिः क्षुद्रपाषाणैः ॥ २५ ॥

सुमनोरञ्जनी — न केवलं यशोदा किन्तु कश्चन कोऽपि पुरुषः नापश्यत् । निसृष्टाभिः क्षिप्ताभिः सूक्ष्मवालुकाभिः ॥ २५ ॥

इति खरपवनचक्रपांसुवर्षे सुतपदवीमबलाऽविचक्षमाणा ।
अतिकरुणमनुस्मरन्त्यशोचद् भुवि पतिता मृतवत्सका यथा गौः ॥ २६ ॥

सत्यधर्मीया — इत्येवं प्रकारेण खरश्चण्डः पवनोऽनिलस्तत्सम्बन्धिनः पांसवो धूल्यस्तेषां वर्षे । कचित्तालव्यपाठः । तत्र तालव्याश्चैव दन्त्याश्च शम्बसूकरपांसव इत्यादिमूलम् । सुतपदवीं तस्य सृतिम् । मार्गः पन्थानः पदवी सृतिरित्यमरः । अविचक्षमाणापश्यन्ती अबला मृतवत्सका । सुपः

परत्वान्न प्रत्ययत्वं स्यादिति । गौर्यथा तथाऽनुस्मरन्ती भुवि पतिता सत्यतिकरुणं यथा स्यात्तथाऽशोचच्छुशोच । भुवि पतितेत्यनेन त्वदधीनः सूनुः कृतः । तं हे धरे श्रीधरं क्व यापितवतीति तदुपरि पात उचितो रचितोऽनयेति ध्वन्यत इति, त्वद्भारापहाराय प्रादुर्भूतं दुर्भूतमुखे स्थापितवत्यसीति अहं तं मम पातेनापि करोमीति पपातेति ध्वन्यत इति वोत्प्रेक्षयन्ति । मृतवत्सकेति निदर्शनदर्शनेन न पुनस्तनयदर्शनं भविष्यतीत्याशा लोकदृशा यशोदाया इति सूचयति ॥ २६ ॥

सुमनोरञ्जनी — इति एवं प्रकारेण । खरेण चण्डेन पवनचक्रेण चक्राकारपवनेन कृते पांसुवर्षे । सुतस्य पदवीं स्थितिम् । अविचक्षमाणा । यद्वा सुतस्य पदवीं माहात्म्यम् । अजानमाना सती । तमेवानुस्मरन्ती अतिकरुणं अशोचदित्यन्वयः । अतिकरुणं परं आत्मानं स्मरन्तीति वा ॥ २६ ॥

रुदितमनुनिशम्य तत्र गोप्यो भृशमनुतप्तधियोऽश्रुपूर्णमुख्यः ।
रुरुदुरनुपलभ्य नन्दसूनुं पवन उपारतपांसुवर्षवेगे ॥ २७ ॥

सत्यधर्मीया — तत्र तदानीं गोप्यो रुदितं यशोदाया इति शेषः । निशम्य श्रुत्वा अनुतप्तानां धीरिव धीर्यासां ताः । तथाऽश्रुभिः स्रवदुदकैः पूर्णं व्याप्तं मुखं यासां ताः स्वाङ्गङीष् । उपारतपांसुवर्षवेगे उपारतः पांसुवर्षस्य वेगो यस्मिंस्तस्मिन्पवने सत्यपि नन्दसूनुमनुपलभ्यादृष्ट्वा स्वयमपि रुरुदुः ॥ २७ ॥

सुमनोरञ्जनी — पवने, उपारतः शान्तः पांसुवर्षवेगो यस्य तस्मिन् सति । रुदितं यशोदायाः । भृशं अनुतप्तधियः । अनु तामनुसृत्य तप्ताः सन्तप्ताः धियो मनांसि यासां ताः । अश्रुपूर्णं मुखं यासां ताः ॥ २७ ॥

तृणावर्तः शान्तरयो वात्यारूपधरो हरन् ।
कृष्णं नभोगतो गन्तुं नाशक्नोद् भूरिभारभृत् ॥ २८ ॥

सत्यधर्मीया — मृत्या वाऽदर्शनं नीत्या केनचिदनीत्या वा मूर्तमूर्तेरत्र तु कथमिति शङ्कामुत्तमां वरोरूणामङ्गानामपनेतुं यतते तृणावर्त इति वात्याया वातसमूहस्य पाशादिभ्यो य इति यो, यद्रूपं तस्य धरः । कृष्णं हरन् भूरि भारं बिभर्तीति सः शान्तरयः सन्नभोगतो गन्तुं पुरतो नाशक्नोत् ॥ २८ ॥

सुमनोरञ्जनी — वात्यारूपधरः चक्रवातरूपधरः तृणावर्तः । नभोगतः शान्तरयः कृष्णं हरन् गन्तुं नाशक्नोत् ॥ २८ ॥

तमश्मानं मन्यमान आत्मनो गुरुमत्तया ।
गले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकम् ॥ २९ ॥

सत्यधर्मीया — आत्मनः स्वस्य गुरुमत्तया गुरुत्वेनाश्मानं शिलातुलं मन्यमानो गले तेन गृहीतोऽद्भुतार्भकमुत्स्रष्टुं नाशक्नोन्न शशाक ॥ २९ ॥

सुमनोरञ्जनी — आत्मनः स्वस्य । गुरुमत्तया गुरुपदार्थाश्रयतया । तं स्वापहृतं कृष्णम् । अश्मानं पाषाणं मन्यमानः । गले गृहीतत्वात् उत्स्रष्टुं परित्यक्तुं नाशक्नोत् ॥ २९ ॥

गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः ।
अव्यक्तवाक्यो न्यपतत् सहबालो व्यसुर्व्रजे ॥ ३० ॥

सत्यधर्मीया — गलग्रहणेन निश्चेष्टः । निर्गतलोचनो निर्गते व्यत्यस्ते लोचने यस्य सः । अव्यक्तवाक्योऽव्यक्तं मन्दं वाक्यं यस्य सः । व्यसुर्विगता असवो यस्य सः । व्रजे सहबालो न्यपतत् ॥ ३० ॥

सुमनोरञ्जनी — गलग्रहणेन निश्चेष्टः । निर्गतलोचनः निष्क्रान्तनेत्रगोलकः । अव्यक्तवाक्यः उत्सृजोत्सृजेति वक्तुमप्यशक्तः स व्यसुः निर्गतप्राणः न्यपतत् ॥ ३० ॥

तमन्तरिक्षात् पतितं शिलायां विशीर्णसर्वावयवं करालम् ।
पुरं यथा रुद्रशरेण विद्धं स्त्रियो रुदन्त्यो ददृशुः समेताः ॥ ३१ ॥

सत्यधर्मीया — शिलायामन्तरिक्षात्पतितं विशीर्णाः शिथिलाः सर्वेऽवयवा यस्य तं करालं स्वराक्षसरूपतः पातात् । यथा रुद्रशरेण भगवद्रूपेण बाणेन विद्धं पुरं त्रिपुरं तथा समेता रुदन्त्यः स्त्रियो ददृशुः ॥ ३१ ॥

सुमनोरञ्जनी — तं तृणावर्तम् । विशीर्णाः शिलायां पतनेन इतस्ततो विक्षिप्ताः सर्वेऽवयवाः यस्यासौ तथोक्तः । तम् । पुरं त्रिपुरम् ॥ ३१ ॥

आदाय मात्रे प्रतिहृत्य विस्मिताः कृष्णं च तस्योपरि लम्बमानम् ।
तं स्वस्तिमन्तं पुरुषादनीतं विहायसा मृत्युमुखात् प्रमुक्तम् ॥ ३२ ॥

सत्यधर्मीया — तस्य मृतस्य तृणावर्तस्योपरि लम्बमानं स्वस्तिमन्तं क्षेमवन्तम् । विहायसाऽऽकाशेन । पुरुषादेन नीतं रक्षसा नीतं मृत्युमुखात्प्रमुक्तं कृष्णमादाय मात्रे प्रतिहृत्य दत्वा

विस्मिता अहो क्षेमो जात इत्याश्चर्यवत्योऽभूवन् । पुरुषादात्तृणावर्तादानीतं स्वेच्छयागतमिति यावत् । पुरुषाच्चामावानीव प्राणी च तेनेतस्तमिति वा ॥ ३२ ॥

सुमनोरञ्जनी — तस्य तृणावर्तदेहस्य । उपरि लम्बमानं कृष्णम् । आदाय मात्रे यशोदायै प्रतिहृत्य प्रदाय । विस्मिताः अभवन् । विहायसा आकाशमार्गेण पुरुषादेन राक्षसेन नीतं, मृत्योः मुखात्, मारकात् प्रमुक्तं तं कृष्णं लब्ध्वा मोदं सन्तोषं प्रापुरिति । एष बालः रक्षसा निवृत्तिं गमितोऽपि गमितवत्प्रतीतोऽपिं यत्पुनरभ्यगात् तदद्भुतं अहो । यो हिंस्रः हिंसाशीलः । स्वपापेन विहिंसितो भवति । साधुः समत्वेन गुणेन । नः अस्माभिः चीर्णं तपः किं जातीयं स्यात् । अधोक्षजार्चनम् । अधः कृताः अक्षजाः इन्द्रियवृत्तयो येन सः तस्य । मनआदीन्द्रियागोचरस्येत्यर्थः हरेरर्चनं वा । किमु । पूर्तं अन्नदानादि । इष्टं यजनम् । भूतसौहृदं भूतेष्वनिमित्तोपकारकरणं वा । किमु किं जातीयं स्यात् । कुतः । यतो यो बालकः स्वबन्धून् प्रणयन् हर्षयन् दिष्ट्या आनन्देन उपस्थितो अत इत्यर्थः ॥ ३२-३४ ॥

गोप्यः स गोपाः किल नन्दमुख्याः लब्ध्वा पुनः प्रापुरतीव मोदम् ।
अहो बतात्यद्भुतमेष रक्षसा बालो निवृत्तिं गमितोऽभ्यगात् पुनः ॥ ३३ ॥

सत्यधर्मीया — गोप्यो गोपा नन्दमुख्याः पुनः कृष्णं लब्ध्वाऽतीव मोदं प्रापुः । किल वार्ता । स एष बालो रक्षसा निवृत्तिं गमितः पुनरभ्यगादहोऽद्भुतं बत ॥ ३३ ॥

हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद् विमुच्यते ।
किं नस्तपश्चीर्णमधोक्षजार्चनं पूर्तेष्टदत्तं किमु भूतसौहृदम् ।
यः सम्परेतः पुनरेव बालको दिष्ट्या स्वबन्धून् प्रणयन्नुपस्थितः ॥ ३४ ॥

सत्यधर्मीया — हिंस्रो हिंसाशीलः खलः स्वपापेन विहिंसितो भवति । साधुर्यः समत्वेन भयाद्विमुच्यत इति साधुरयं माधवो मुक्तो हिंस्रस्तृणावर्तो विहिंसित इत्यर्थः । एवमेतज्जीवने नोऽस्माभिस्तपश्चीर्णं किमधोक्षजार्चनं चीर्णम् । अधो न क्षीयते जातु यस्मात्तस्मादधोक्षज इति भारते । अधःकृताक्षजज्ञान इति वा । पूर्तेष्टाभ्यां सहितं दत्तम् । पूर्तं वापीकूपतटाकादि ।

अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम् ।
आतिथ्ये वैश्वदेवं च इष्टमित्यभिधीयते ।
शरणागतसन्त्राणं भूतानां चाप्यहिंसनम् ।
बहिर्वेदि च यद्दानं तद्दत्तमभिधीयते ॥

इतीष्टदत्ते । भूतसौहृदं प्राणिमात्रसुहृद्भावः । यः सम्परेत इव विद्यमानः पुनर्बालकः स्वबन्धून्प्राणयंस्तोषयन्नुपस्थितः । दिष्ट्या सुखम् ॥ ३४ ॥

दृष्ट्वाऽद्भुतानि बहुशो नन्दगोपो बृहद्वने ।
वसुदेववचो भूयो मानयामास विस्मितः ॥ ३५ ॥

सत्यधर्मीया — बहुशो बहुवारम् । नन्दगोपोऽद्भुतानि दृष्ट्वा विस्मितः सन्वसुदेववचो भूयो मानयामास ॥ ३५ ॥

सुमनोरञ्जनी — मानयामास श्लाघयामास ॥ ३५ ॥

एकदाऽर्भकमादाय स्वाङ्कमारोप्य भामिनी ।
प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता ॥ ३६ ॥

सत्यधर्मीया — भामिनी योषिदेकदाऽभर्कमादाय स्वाङ्कमारोप्य प्रस्नुतं स्तनं स्नेहपरिप्लुता सती पाययामास ॥ ३६ ॥

सुमनोरञ्जनी — स्नेहेन परिप्लुता व्याप्ता आर्द्रा वा । भामिनी तेजस्विनी ॥ ३६ ॥

पीतप्रायस्य जननी सुतस्य रुचिरस्मितम् ।
मुंखं लालयती राजन् जृम्भतो ददृशे इदम् ॥ ३७ ॥

सत्यधर्मीया — पीतप्रायस्य सुतस्य जननी रुचिरस्मितं मुखं लालयन्ती जृम्भतो मुख इति शेषः । इदं ददृशे विवक्षाभावात् ॥ ३७ ॥

सुमनोरञ्जनी — पीतः प्रायः स्तनो येन तस्य । रुचिरं स्मितं मन्दहासो यस्मिंस्तन्मुखं लालयती । जृंभतः सुतस्य मुखे इदं वक्ष्यमाणम् । ददृशे ददर्श ॥ ३७ ॥

खं रोदसी ज्योतिरनीकमाशाः सूर्येन्दुवह्निश्वसनाम्बुधींश्च ।
द्वीपान् नगांस्तद्दुहितॄर्वनानि भूतानि यानि स्थिरजङ्गमानि ॥ ३८ ॥

सत्यधर्मीया — इदमित्युक्तं वदति ॥ खमिति । खमाकाशम् । रोदसी द्यावापृथिव्यौ ज्योतिरनीकं ज्योतिर्मण्डलमाशाश्च । सूर्यश्चेन्दुश्च वह्निश्च श्वसनो वायुश्चाम्बुधयश्च तान् । द्वीपान् ।

व्यन्तरित्यपूशब्दाकारेकारः । नगांस्तद्दुहितॄः पर्वतप्रसूता नदीः । शतशः सहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसङ्ख्याता इति पञ्चमोक्तेः । वनानि स्थिरजङ्गमानि चेतनाचेतनानि भूतानि यानि तानि ॥ ३८ ॥

सुमनोरञ्जनी — खं आकाशम् । रोदसी द्यावापृथिव्यौ । ज्योतिरनीकं ज्योतिर्गणम् । आशाः दिशः । श्वसनो वायुः । द्वीपान् समुद्रमध्यवर्तिभूप्रदेशान् । नगान् पर्वतान् । तद्दुहितॄः नदीः । स्थिरजंगमानि स्थावरजङ्गमानि ॥ ३८ ॥

संवीक्ष्य विश्वं सहसा राजन् सञ्जातवेपथुः ।
सम्मील्य मृगशावाक्षी नेत्रे आसीत् सुविस्मिता ॥ ३९ ॥

इति श्रीमद्भागवते दशमस्कन्धे अष्टमोऽध्यायः ।

सत्यधर्मीया — सहसा विश्वं वीक्ष्य सञ्जातवेपथुः । गतम् । मृगशावाक्षी नेत्रे सम्मील्य सुविस्मिताऽऽसीत् ॥ ३९ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे अष्टमोऽध्यायः ॥ १०-८ ॥

सुमनोरञ्जनी — सा यशोदा । संजातो वेपथुः गात्रकंपो यस्याः सा । मृगशावो हरिणकुणकः । तदक्षिवदक्षिणी यस्याः सा । नेत्रे संमील्य । सु अत्यन्तं विस्मिता आसीत् ॥ ३९ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां अष्टमोऽध्यायः ॥ १०-८ ॥

॥ अथ नवमोऽध्यायः ॥

श्रीशुक उवाच -

गर्गः पुरोहितो राजन् यदूनां सुमहायशाः ।
व्रजं जगाम नन्दस्य वसुदेवप्रचोदितः ॥ १ ॥

सत्यधर्मीया — तत्तदवतारे तत्तत्कुलानुकूलकर्म कर्तव्यं दिविजमनुजशिक्षार्थमिति मतिर्गर्गादिरचितसूचितं तत्समयेऽच्युतो न मेन इति शंसति ॥ गर्ग इत्यादीति । वसुदेवप्रचोदितो गर्गो नन्दस्य व्रजं जगाम ॥ १ ॥

सुमनोरञ्जनी — भक्तवत्सलो भगवान् यस्यानन्तनामत्वेऽपि गर्गकृतनामकरणः स्वस्मिन्निरन्तरस्नेहार्द्रहृदययोर्नन्दयशोदयोः स्वविषयपरब्रह्मभावस्याविस्मरणाय यन्माहात्म्यान्तरमाविश्चकार तदेव मन्दानुजिघृक्षया राजव्याजेन शुकोक्तमनुवदत्यस्मिन्नध्याये । वसुदेवेन नामकरणादिसंस्कारार्थं प्रचोदितः प्रेरितः ॥ १ ॥

तं दृष्ट्वा परमप्रीतः प्रत्युत्थाय कृताञ्जलिः ।
आनर्चाधोक्षजधिया प्रणिपातपुरस्सरम् ॥ २ ॥

सत्यधर्मीया — आनर्चापूजयत् । अधोक्षजधिया सर्वसभाजनभाजनं जनार्दन इति मत्या प्रणिपातो दण्डवदवनौ पातो नमनमिति यावत् । तत्पूर्वकम् ॥ २ ॥

सुमनोरञ्जनी — तं गर्गम् । नन्द इति शेषः । अधोक्षजधिया अधोक्षजस्य हरेरधिष्ठानत्वबुध्या । प्रणिपातः साष्टाङ्गप्रणामः तत्पुरःसरम् । आनर्च पूजयामास ॥ २ ॥

सूपविष्टं कृतातिथ्यं गिरा सूनृतया मुनिम् ।
नन्दयित्वाऽब्रवीद् ब्रह्मन् पूर्णस्य करवाम किम् ॥ ३ ॥

सत्यधर्मीया — नन्दयित्वा सन्तोष्य । पूर्णस्यास्मत्कर्तव्यकर्मरहितस्याथापि किं करवामेति सूनृतया गिराऽब्रवीत् ॥ ३ ॥

सुमनोरञ्जनी — सुखेन उपवष्टम् । कृतं आतिथ्यं अतिथिपूजनं यस्मै सः कृतातिथ्यः । कृतं स्वीकृतं आतिथ्यं येनेति वा । सूनृतया यथार्थत्वे सति मधुरया । पूर्णस्य कृतकृत्यस्य । वयं किं करवाम न किमपि । अतो भवदागमनं नात्मार्थमिति भावः ॥ ३ ॥

महद्विचलनं नृणां गृहिणां दीनचेतसाम् ।
निःश्रेयसाय भगवान् कल्पते नान्यथा क्वचित् ।। ४ ।।

सत्यधर्मीया — महतां विचलनं सञ्चारः । निःश्रेयसाय अचतुरनिपातः क्षेमायेह मोक्षाय च ।।
।। ४ ।।

सुमनोरञ्जनी — किन्तु महतां पुंसां विचलनं संचरणम् । दीनचेतसां गृहिणाम् । निःश्रेयसाय कल्पते भवति ।। ४ ।।

ज्योतिषामयनं साक्षाद् यत्तज्ज्ञानमतीन्द्रियम् ।
प्रणीतं भवता येन पुमान् वेद परावरम् ।। ५ ।।

सत्यधर्मीया — पुत्रस्योत्तरत्र बलाबले कथं कथय वर्तेतेतीप्सया तस्य तत्समयप्रणायकतां पुरस्कृत्य तं स्तौति ।। ज्योतिषामिति । येन त्वन्निर्मितेन पुमांस्तदधीती परावरं भूतभविष्यद्वेद तज्ज्योतिषां नक्षत्रादीनामयनमाश्रयीभूतमतीन्द्रियमतीन्द्रियार्थयुक्तं साक्षाज्ज्ञानं तत्साधनं शास्त्रं भवता प्रणीतं निर्मितम् ।। ५ ।।

सुमनोरञ्जनी — यत्, ज्योतिषां गृहराश्यादिज्योतिर्गणस्य अयनं आश्रयः ज्योतिश्चक्रमिति यावत् । यद्वा अयनं वर्त्म, गतिरिति यावत् । तस्य ज्ञानं ज्ञायन्तेऽनेनेति ज्ञानसाधनं शास्त्रमित्यर्थः । कीदृशम् । अतीन्द्रियं अतीन्द्रियार्थगोचरम् । येन भवता प्रणीतं स पुमान् त्वं भवान् परावरं वेद । सर्वज्ञोऽसीति भावः । येन भवत्प्रणीतशास्त्रेण परावरम् कालविप्रकृष्टमप्रकृष्टं च वेद जानातीति तद्भवता प्रणीतमिति वा ।। ५ ।।

त्वं हि ब्रह्मविदां श्रेष्ठः संस्कारान् कर्तुमर्हसि ।
बालयोरनयोर्नृणां जन्मना ब्राह्मणो गुरुः ।। ६ ।।

सत्यधर्मीया — स त्वं ब्रह्मविदां श्रेष्ठोऽनयोर्बालयोः रामकृष्णयोः संस्काराञ्जातकर्मादीन् कर्तुमर्हसि । अहं कुत इत्यत आह । हि यतो नृणां ब्राह्मणस्तज्जातिजो गुरुरुपदेष्टाऽतः कुर्विति ।।६।।

सुमनोरञ्जनी — हि यस्मात् त्वम् । ब्रह्मविदां वेदविदाम् । संस्कारान् जातकर्मादीन् । त्वं त्वमेव कर्तुमर्हसि । कुतः । नृणां मध्ये ब्राह्मणः । जन्मना उत्पत्त्यैव । गुरुः श्रेष्ठः । गुरुत्वमौत्पत्तिकमेव नागन्तुकमिति भावः । यद्वा नृणाम् अस्मदादीनाम् । जन्मना जन्मारभ्य । ब्राह्मण एव गुरुः संस्कारादिकर्ता अत इत्यर्थः ।। ६ ।।

गर्ग उवाच -

यदूनामहमाचार्यः ख्यातश्च भुवि सर्वतः ।
सुतं मया संस्कृतं ते मन्यते देवकीसुतम् ॥ ७ ॥

कंसः पापमतिः सख्यं तव चानकदुन्दुभेः ।
देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति ॥ ८ ॥

इति सञ्चिन्तयन् श्रुत्वा देवकीदारिकावचः ।
अपि हन्ता गताशङ्कस्तर्हि तन्नोऽनयो महान् ॥ ९ ॥

सत्यधर्मीया — तत्र गर्गो नायमनर्गलमार्ग इति काञ्चिदनुपपत्तिं सर्वजनीनां प्रदर्श्य तदुदितवर्त्मना तच्चक्र इव तत्स्वरूपं च न्यरूरुपन्नन्दं प्रतीत्याह कैश्चित् श्लोकैः ॥ गर्ग इति । अहं यदूनामाचार्यः । नाप्रसिद्ध इति द्योतयति ख्यातश्च । सर्वतः सर्वस्यां भुवीति सर्वप्रकारेणेति वा सर्वैरिति वेति । मया संस्कृतं सुतं पापमतिः कंसो मन्यते चेज्ज्ञातवांश्चेद्देवकीसुतमेव मन्यते । कुत इत्यत आह । सख्यं तव चानकदुन्दुभेश्च यत्स मन्यते जानाति तत इति । देवकीदारिकायास्तत्कुमारिकाया वचः श्रुत्वा देवक्या गर्भोऽष्टमः स्त्री भवितुं नार्हति पुमानेव भवेदिति सञ्चिन्तयन्गताशङ्को गतसंशयोऽत्रागत्य हन्ता भवेद्यर्हि तर्हि तन्नो महाननयोऽन्यायो भवेत् । बालयोरनयोरित्युक्तत्वेऽपि सुतमित्याद्युक्तिस्तस्याशङ्कास्पदत्वेनेति ज्ञेयम् । इदमदो वेति ज्योतिःसमयप्राज्यसाम्राज्यस्य गर्गस्यापि लोकरीतित इति ज्ञेयम् ॥ ७-९ ॥

सुमनोरञ्जनी — एवमुक्तो गर्गः स्वाभिलभिषतमतिगौप्येन नामकरणकरणादि नन्दमुखेन वाचयितुमाह ॥ यदूनामिति । चो यस्मादित्यर्थे । देवक्याः अष्टमो गर्भो न स्त्री भवितुमर्हति अपि तु प्रायः पुमानेव स्यात् । स च क्वास्ते इति संचिन्तयन् अहोरात्रमालोचयानः कंसः, ते सुतं मया संस्कृतं मन्यते चेत् आनकदुन्दुभेस्तव च सख्यं सञ्चिन्तयन् स्मरन् ते सुतं देवकीसुतं देवक्याः प्रसूतं मन्यते । कुत एतत्सर्वम् । यतोऽहं यदूनां च यदूनामेवाचार्यः कुलपुरोहित इति भुवि सर्वतः सर्वजनेषु ख्यातः अत इत्यर्थः । जानातु कंसः किं तत इत्यत आह ॥ हन्तेति । एवं जानन् पापमतिः कंसः गताशङ्कः संशयरहित एव सन् त्वां वसुदेवं च हन्ता । तर्हि तदा । तत् संस्कारकरणम् । महान् अनयः अन्यायो भवेत् । आगता प्राप्ता शङ्काऽयमेव प्रायो मे मृत्युरिति संभावना यस्येति वा । तत्र निमित्तान्तरमप्यस्तीत्याह ॥ श्रुत्वेति । देवक्याः या दारिका कन्यका दुर्गा तस्या वचः ''तव हन्ता क्वचिज्जात'' इत्यादिरूपं वचनमपि श्रुत्वेति सम्बन्धः ॥ ७-९ ॥

नन्द उवाच-

अलक्षितेऽस्मिन् रहसि मामकैरपि गोव्रजे ।
कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्वकम् ॥ १० ॥

सत्यधर्मीया — उपायमपायापाये नन्दो वदति ॥ अलक्षित इति । मामकैर्गोपैरप्यलक्षितेऽज्ञाते । रहस्येकान्तेऽत्रैव गोव्रजे गवाशब्देन व्रजे तत्पदवाच्ये । व्रज इत्यनेनैव व्रजो गोष्ठाध्वेति विश्वाद्युक्तेरतिरिक्तं गोपदमिति निरस्तम् । गवां मार्गे तत्सद्म इति वा । व्रजो गोष्ठाध्ववृन्देष्विति विश्वः । अपि सम्भावनाविषयकगमनवानित्यपि गो व्रज इति वा । अपि मध्यं गृहमध्यङ्गं मतीति स वा सन् । अपि प्रश्नानुनययोः समयेऽन्तिकमध्ययोरिति विश्वः । अपिः पदार्थसम्भावनेत्यादि-पाणिनीयस्मृतेः । द्विजातिसंस्कारान्क्षत्रियजातियोग्यान् । यथोक्तमाचार्यैः । चक्रे क्षत्रिय-योग्यान्संस्कारानिति । द्वितीया जातिर्द्विजातिः क्षत्रिया जातिः । द्विशब्दस्य द्वितीयार्थकत्वं तु त्रिभागशेषामिति माघव्याख्यावसरे सङ्ख्याया वृत्तिविषये पूर्णार्थत्वमिति वार्तिकोक्तेरिति पेद्दंभट्टव्याख्यानाज्ज्ञेयम् । त्रिदशास्तु विराजते ॥ १० ॥

सुमनोरञ्जनी — अस्मिन् गोव्रजे मामकैरप्यलक्षिते अज्ञाते । रहसि स्थलविशेषे । द्विजातेः क्षत्रियस्य विहितं संस्कारं कुर्वित्यन्वयः ॥ १० ॥

श्रीशुक उवाच -

एवं सम्प्रार्थितो विप्रः स्वचिकीर्षितमेव तत् ।
चकार नामकरणं गूढो रहसि बालयोः ॥ ११ ॥

सत्यधर्मीया — स्वचिकीर्षितं स्वेनैव कर्तव्यमित्यालोचितमेव तन्नन्दबोधितमिति स विप्रो गूढः स्वयं रहसि बालयोर्नामकरणं नामस्थापनोपयुक्तं कर्म चक्रे ॥ ११ ॥

सुमनोरञ्जनी — वसुदेवचोदनया तदर्थमेवागतस्य स्वस्य तत् जातकर्मादिकरणं चिकीर्षितमेव कर्तुमिष्टमेव ॥ ११ ॥

अयं हि रोहिणीपुत्रो रमयन् सुहृदो गुणैः ।
आख्यास्यते राम इति बलाधिक्याद् बलं विदुः ।
यदूनामपृथग्भावात् सङ्कर्षणमुशन्त्युत ॥ १२ ॥

सत्यधर्मीया — अन्तर्निकेतं सङ्केतमात्रत इदं न नाम किन्तु समनुकृतार्थमिति निरूप्य विविच्य वक्ति ॥ अयमित्यादिना । गुणैः सुहृदः शोभनमनस्कान्सतो रमयन्नित्ययं रोहिणीपुत्रो राम इत्याख्यास्यते जनैः । योऽयं रमयन्वर्ततेऽस्य राम इत्याख्येति योजना वा । त एव लोका बलाधिक्यादमुं बलं च विदुः । यदूनां मध्येऽमुं सङ्कर्षणमुशन्तीच्छन्ति । वश कान्तौ कान्तिरिच्छा । ग्रहिज्येति सम्प्रसारणम् । सङ्कर्षणशब्दं निर्वक्ति ॥ अपृथग्भावादिति । सङ्कर्षयित्वैकत्र मेलयतीति भावः ॥ १२ ॥

सुमनोरञ्जनी — नामकरणप्रकारमेवाह ॥ अयमिति । अयं रोहिणीपुत्रो राम इति आख्यास्यते । आ सम्यक् व्यवह्रीयते । लोकैः । कुतः । यतोऽसौ सुहृदः सुमनस्कान् । गुणैः रमयन् सुखयन् । अनेन रमयतीति राम इत्यन्तर्णीतणिजन्तमिदमित्युक्तं भवति । बलाधिक्यान्निमित्तात् । बलं बलशब्दवाच्यं विदुः । अनेन अर्शाद्यजन्तो बलशब्दः । असाधारण्येन व्यपदेशा भवन्तीति न्यायात् बलाधिक्यं वक्तीत्युक्तं भवति । यदूनाम् । अपृथग्भावात् पृथक् बलदेवादन्यत्र विद्यमानो भावो मनः पृथग्भावः । तदभावः अपृथग्भावः । तस्मात् । यदूनां बलदेवादन्यत्र मनसोऽभावान्निमित्तादित्यर्थः। यदूनामत्यन्तं प्रियत्वादिति यावत् । संकर्षणमुत संकर्षणमपि । उशन्ति इच्छन्ति । अनेन सर्वेषां मनांसि, सं सम्यक् कर्षतीति संकर्षण इति व्युत्पत्तिः सूचिता भवति । यद्वा यदूनां मध्ये । आत् अकारवाच्यात् विष्णोः तदाज्ञयेति यावत् । पृथक् पूर्वगर्भादन्यत्र भावान्निमित्तात्संकर्षणमुशन्तीत्यर्थः। पूर्वं कंसोपद्रवात् पृथग्भूतानां देशान्तरे तत्र तत्र स्थितानां यदूनां अपृथग्भावात् एकीकरणान्निमित्तादित्यर्थ इत्यप्याहुः ॥ १२ ॥

आसन् वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः ।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ १३ ॥

सत्यधर्मीया — इति नामत्रयं बलस्योक्त्वाऽनन्तनाम्नो वर्णादिवर्णनपूर्वकं नामनिरुक्तिपूर्वकं वक्ति ॥ आसन्नित्यादिना । अनुयुगं युगानुसारेण तनूः शरीराणि गृह्णतः स्वीकुर्वतोऽस्य त्रयोऽस्य वर्णा आसन् । शुक्लो रक्तस्तथा पीत इति त्रयः । गुणे शुक्लादयः पुंसीत्यमरः । इदानीं कृष्णतां श्यामतां गतोऽर्थात्कृष्णवर्ण इति कृष्णनामेति सूचितमनेनेति ज्ञेयम् ॥ १३ ॥

सुमनोरञ्जनी — अनुयुगं प्रतियुगम् । तनूः गृह्णतः अस्य कृष्णस्य शुक्लो रक्तः पीतश्चेति त्रयो वर्णाः पूर्वं गृहीता आसन् । हयग्रीवादिरूपेण शुक्लः । जामदग्न्यादिना रक्तः । नृसिंहादिना पीतवर्णो गृहीत इति विवेकः । इदानीं तु कृष्णतां नीलनीरदश्यामतां गतः । अतः कृष्ण इति एनं प्रचक्षते । क्वचित् मधुरायाम् । वसुदेवस्य सकाशात् । अतः श्रीमानयं वासुदेव इति संप्रचक्षते । अभिज्ञाः वसुदेवजातत्वाभिज्ञाः ॥ १३,१४ ॥

प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ।
वासुदेव इति श्रीमानभिज्ञाः सम्प्रचक्षते ॥ १४ ॥

सत्यधर्मीया — अयं वसुदेवसुत इति प्रकाश्योक्तौ दुश्चित्तो भवेन्नन्द इति किञ्चिदाच्छाद्य वक्ति ॥ प्रागिति । वसुदेवस्य प्राक् क्वचित्तवात्मजो जातः । ततो वसुदेवस्यापत्यमिति व्युत्पत्त्या वासुदेव इत्यभिज्ञा वैयाकरणाः सम्प्रचक्षते । अभिज्ञा महामतयस्तु गीताभाष्याद्युदाहृतबाभ्रव्यशाखा-द्यभिहितकारणेन वासुदेव इति सम्प्रचक्षत इत्यान्तरङ्गिकोऽर्थो ज्ञेयः । विस्तृतं स्कन्धान्तरविवरणेऽस्माभिरनुसन्धेयम् ॥ १४ ॥

बहूनि सन्ति नामानि रूपाणि च सुतस्य ते ।
गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥ १५ ॥

सत्यधर्मीया — तर्हि मम सुतनामानि पञ्चषाणि वद वर्तन्ते चेदित्यत आह ॥ बहूनीति । गुणकर्मानुरूपाणि तान्यहं वेद जनाः पामरा न विदुः । मध्ये नो इति वदन् स्वस्यापि साकल्यतो वैकल्यं ज्ञानस्य सूचयति । तानि च नामानि गुणानुगुणानि कृष्णादीनि मधुसूदनादीनि क्रियानुगुणानि । इदमपि स्थूलदृश्वविवक्षयाऽपि सङ्कीर्णानीति मन्तव्यम् । अधास्यदकरिष्यदधास्यति वा । भाविभावं कथयति ॥ एष इति । अञ्जः सम्यक् पुरा पृथ्ववतारे दस्युपीडिताः साधवोऽराजके तत्पितृमरणानन्तरमरक्षमाणाः समेधिता अभिवृद्धा सन्तो दस्यून् जिग्युः । नरनारायणरूपेणेति वा । यथोक्तमुद्योगपर्वाणि । ब्रह्मोवाच । यावेतौ पृथिवीं द्यां च भासतौ । तपस्विनौ । नरनारायणावेतावित्यारभ्य नारायणस्तथैवात्र भूयः सोऽन्याञ्जघान ह । वासुदेवार्जुनौ वीरौ समवेतौ महारथौ । नरनारायणौ देवौ पूर्वदेवाविति श्रुतिः । अजेयौ मानुषे लोके सेन्द्रैरपि सुरासुरैः । एष नारायणः कृष्ण इत्यन्तेन । एतस्मिन्कृष्णे ये महाभागाः प्रीतिं कुर्वन्त्येतानरयो नाभिभवन्ति । प्रकारान्तरेण निदर्शनमाचक्षाण आह ॥ असुरा विष्णुपक्षान्देवानिवेति ॥ १५-१८ ॥

सुमनोरञ्जनी — न केवलं नामद्वयं किं तु अनन्तान्यस्य नामानि रूपाणि च । अतो भगवान्हरिरवतीर्ण इति जानीहीत्याशयवानाह ॥ बहूनीति । बहूनि अनन्तानि । कीदृशानि नामानि । गुणकर्मानुरूपाणि । गुणकर्माण्यनुरूपयन्ति ज्ञापयन्तीति तथोक्तानि । तथा च महायोगवृत्या गुणकर्माभिधायिन्येव । न देवदत्तादिपदवत्सांकेतिकानीति भावः । तान्यहमपि नो वेद किम्वन्ये जना इति ॥ १५ ॥

एष वः श्रेय आधास्यद् गोपगोकुलनन्दनः ।
अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ ॥ १६ ॥

सुमनोरञ्जनी — श्रेयः आधास्यत् कुर्वन् स चासौ गोपगोकुलयोर्नन्दन आनन्दनः । आधास्यत् आधास्यतीति वा । उत्तरत्राप्ययमेव भवच्छ्रेयो विधास्यतीत्याह ।। अनेनेति ।। १६ ।।

पुराऽनेन व्रजपते साधवो दस्युपीडिताः ।
अराजकेऽरक्ष्यमाणा जिग्युर्दस्यून् समेधिताः ।। १७ ।।

सुमनोरञ्जनी — कुतोऽस्मान् रक्षेदित्यतो भक्तानुकंपिता भगवतस्तस्य स्वभाव इत्याह ।। पुरेति । हे व्रजपते! अत्र रक्ष्यमाणा अरक्ष्यमाणा इति द्वेधापि पदविभागोऽभिप्रेतः । पुरा पृथ्ववतारे । अराजके राष्ट्रे । अरक्ष्यमाणाः दस्युपीडिताः साधवोऽनेन पृथुनाम्नाऽवतीर्णेन रक्ष्यमाणाः सन्तः समेधिताः अभिवृद्धाः दस्यून् जिग्युरिति ।। १७ ।।

य एतस्मिन् महाभागाः प्रीतिं कुर्वन्ति मानवाः ।
नारयोऽभिभवन्त्येतान् विष्णुपक्षानिवासुराः ।। १८ ।।

सुमनोरञ्जनी — ये प्रीतिं भक्तिं कुर्वन्ति । एतान् अरयो नाभिभवन्ति । विष्णुपक्षान् विष्णुः पक्षः सहायो येषां तान् ।। १८ ।।

तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः ।। १९ ।।

सत्यधर्मीया — निगमयन्नवगमयति ।। तस्मादिति । नारायणसम इति नारायण एवेत्यर्थः ।। ।। १९ ।।

सुमनोरञ्जनी — हे नन्द! गुणैः, अनुभावेन सामर्थ्येन । नारायणसमः । गगनं गगनाकारमिति वादभेदेऽपि सदृशव्यवहारः । अन्यस्य सदृशस्याभावात् आत्मानं स्वम् । आशिषाम् । षष्ठी तृतीयार्थे । आशीर्भिः पूर्णं मेने ।। १९,२० ।।

श्रिया कीर्त्याऽनुभावेन गोपायस्व समाहितः ।
इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते ।
नन्दः प्रमुदितो मेने आत्मानं पूर्णमाशिषाम् ।। २० ।।

सत्यधर्मीया — गुणैरित्युक्तं विशदयति ।। श्रियेति । कीर्त्या श्रियाऽनुभावेनेत्यादि गुणैर्नारायणसम इत्यन्वयः । समाहितस्त्वं, समे सर्वे कंसादयोऽहिता यस्य स तं गोपायस्व । समाहित इति छेदः । स्वैः सह समाहितो रक्षय समाहितेन साकं वर्तत इति स त्वम् । आत्मानं

स्वमित्यादिश्याज्ञाप्य गर्गे स्वगृहं स्वाश्रमं गते सति नन्दः प्रमुदितः सन् आत्मानं स्वमाशिषां पूर्णं मेने व्यजानत् । एवं मेने माया इनो मेन स्वस्मिन्स्वगृहं गते सत्यात्मानमाशिषां पूर्णं पूर्णमनोरथं मेन इत्यावृत्त्याऽन्वयो वा ।। २० ।।

कालेन व्रजताऽल्पेन गोकुले रामकेशवौ ।
जानुभ्यां सह पाणिभ्यां रङ्गमाणौ विचेरतुः ।। २१ ।।

सत्यधर्मीया — व्रजतैवं गच्छताऽल्पेन कालेन रामकेशवौ जानुभ्यां पाणिभ्यां सहेति यथायथमन्वयि । रङ्गमाणौ गच्छन्तौ विचेरतुः । रिङ्गमाणौ रङ्गमाणौ रिङ्खमाणावित्यपि पठन्ति । अर्थः सर्वत्र समः ।। २१ ।।

सुमनोरञ्जनी — व्रजता गच्छता अल्पेन कालेन । अल्पे काले गते सतीत्यर्थः । रङ्गमाणौ रिङ्खणं कुर्वन्तौ ।। २१ ।।

तावङ्घ्रियुग्ममनुकृष्य सरीसृपन्तौ घोषप्रघोषरुचिरव्रजकर्दमेषु ।
तन्नादहृष्टमनसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरन्ति मात्रोः ।। २२ ।।

सत्यधर्मीया — तौ रामकृष्णावङ्घ्रियुग्मं पादद्वन्द्वमनुकृष्य सरीसृपन्तावतिशयेन पुनः पुनः प्रसर्पन्तौ । घोषाणां किङ्किणीनां प्रघोषः शब्दविशेषस्तेन रुचिरो यो व्रजस्तस्य कर्दमाः पङ्कास्तेषु । तेषां नादस्तेन हृष्टं तुष्टं मनो ययोस्तौ । लोकं जनमनुसृत्य मुग्धौ मनोहरौ मूर्खौ वा प्रभीतावतिभीतौ ताविव प्रभीतवत्ताविव मात्रोः रोहिणीयशोदयोरन्ति अन्तिकमुपेयतुः । आभीरपल्लीकिङ्किण्योर्घोषो गोपालशब्दयोरिति वचनात् ।। २२ ।।

सुमनोरञ्जनी — तद्रिंखणं स्वभावोक्त्या वर्णयति ।। तौ रामकृष्णौ । अङ्घ्रियुग्मं अनुकृष्य कर्षयित्वा । सरीसृपन्तौ संचरन्तौ । घोषाणां किंकिणीनां प्रकृष्टेन घोषेण शब्देन रुचिरो यो व्रजः तस्य कर्दमेषु । आभीरपल्ली किंकिण्योर्घोषो गोपालशब्दयोरिति वचनात् । तन्नादेन किंकिणीनादेन हृष्टमनसौ । लोके बालानां किञ्चिद्दूरं गत्वा तत्र कमपि दृष्ट्वा भयेन पुनर्मातुः समीपं आगमनं दृष्टं तथा लोकं अनुसृत्य विडम्ब्य । यद्वा कमपि गच्छन्तं लोकं अनुसृत्य गत्वा । मुग्धप्रभीतवत् मोहाद्भीतवत् । मात्रोः यशोदारोहिण्योः अन्ति अन्तिके उपेयतुः उपजग्मतुः इति पदरत्नावल्याम् ।। ।। २२ ।।

तन्मातरौ निजसुतौ घृणया स्रवन्त्यौ पङ्काङ्गरागरुचिरावुपगुह्य दोर्भ्याम् ।
दत्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य मुग्धस्मिताल्पदशनं ययतुः प्रमोदम् ।।२३।।

सत्यधर्मीया — तन्मातरौ रोहिणीयशोदे । घृणया स्रवन्त्यौ करुणात्मकस्रवणीयरसोपेते श्वोतत्करुणारससमेते इति यावत् । पङ्क एवाङ्गरागो मलयजस्तेन रुचिरौ मनोहरौ । निजसुतौ स्वतनयौ । एकैकस्य विवक्षया दोर्भ्यामित्युक्तिः । प्रायकद्विभुजत्वाभिप्रायेण वा । स्तनौ दधानाः परिवव्रुरङ्गना इत्यादिवत् । उपगुह्यालिङ्ग्य स्तनं दत्वा । तदपि शब्दपूर्वकं चेद्धीतौ तौ जायेतामित्यतः कुचमित्यवचनाद्दत्वा स्तनमित्येकसरण्योदाहरणादस्तनमशब्दं यथा भवति तथेत्यपि योजना ज्ञेयेत्यसूचयदिति ज्ञेयम् । प्रपिबतोः । मुग्धस्मितं मनोहरेषद्धसितं यस्य तच्चाल्पा दशना अङ्कुरणोपेता इत्यणवो दशना यस्य तच्च तन्मुखं निरीक्ष्य स्म पूर्वकृतं स्मरन्त्यौ च । स्म पादपूरणेऽतीते स्मरणे चेति यादवः । प्रमोदं ययतुः उपगृह्येति सङ्ग्राह्यः पाठः । उपगुह्येति पाठे पङ्कसङ्कलितकलेवरोपगूहने केवलप्रेमपारवश्यं द्योत्यत इत्यर्थविशेषलाभो ज्ञेयः ॥ २३ ॥

सुमनोरञ्जनी — तन्मातरौ यशोदारोहिण्यौ । घृणया दयया स्रवन्त्यौ स्तन्यं स्रवन्त्यौ । निजसुतौ अनुस्रवंत्यौ अनुसृत्य गच्छन्त्याविति वा । पङ्केन अङ्गरागेण रुचिरौ निजसुतौ । दौर्भ्यां उपगुह्य आलिङ्ग्य स्तनं दत्वा । प्रपिबतोः सुतयोः प्रत्येकं मुखं निरीक्ष्य । प्रमोदं ययतुः । कीदृशं मुखम् । मुग्धं मन्दं स्मितं यस्मिन् । तत् च तत्, अल्पादशनाः अणुतरदन्ताः यस्मिन् तथाविधम् ॥ ॥ २३ ॥

यर्ह्यागतातिरमणीयकुमारलीला-
वन्तर्व्रजे तदबलाः प्रगृहीतपुच्छैः ।
वत्सैरितस्तत उभावनुकृष्यमाणौ
प्रेक्ष्यन्त्य उत्स्मृतगृहा जगृहुर्हसन्त्यः ॥ २४ ॥

सत्यधर्मीया — यर्हि यदाऽऽगताः सद्यः प्राप्ता अतिरमणीयाः कुमारलीला बालक्रीडा ययोस्तौ । आगतानां जनानामतिरमणीयाः कुमारलीला ययोरिति वा । व्रजे गोष्ठे । तदबला व्रजयोषितः । प्रगृहीतं पुच्छं येषां तैर्वत्सैर्गोवत्सैरितस्तत उभावनुकृष्यमाणौ प्रेक्षन्त्यः प्रेक्षमाणा उत्स्मृतमुद्गतस्मरणं गृहं यासां ता विस्मृतस्वगृहाः सत्यः अन्तर्हसन्त्यश्च जगृहुर्गृहीतवत्यः । कुलललनानामन्तर्हासः परमधर्म इति तथा चक्रुः ॥ २४ ॥

सुमनोरञ्जनी — यर्हि यदा । अन्तर्व्रजे व्रजस्यान्तः । आगतौ च तौ अत्यन्तं रमणीया कुमारलीला बालक्रीडा ययोस्तौ तथाभूतौ जातौ । आगता आगतौ द्वासुपर्णेतिवदिति पदरत्नावल्याम् । तत् तदा । प्रगृहीतानि पुच्छानि येषां तैः वत्सैः इतस्ततो विकृष्यमाणौ तौ ।

प्रेक्षन्त्योऽबलाः स्त्रियः । उत्स्मृतगृहाः विस्मृतगृहव्यापाराः सत्यो हसन्त्यो जहृषुः हृष्टा बभूवुः ॥
॥ २४ ॥

शृङ्ग्यग्निदंष्ट्र्यहिजलद्विजकण्टकेभ्यः
क्रीडापरावतिबलौ स्वसुतौ निषेद्धुम् ।
गृह्याणि कर्तुमपि यत्र न तज्जनन्यौ
शेकात आपतुरलं मनसोऽनवस्थाम् ॥ २५ ॥

सत्यधर्मीया — शृङ्गिणो गोमहिष्यादयोऽग्निर्दंष्ट्रिणः सारमेयादयोऽहयो द्विजाः पक्षिणो जालकं च कण्टकाश्च तेभ्यः क्रीडापरौ स्वसुतावतिबलौ निषेद्धुम् । गृह्याणि गृहकर्माण्यपि कर्तुं यत्र यदा तज्जनन्यौ न शेकाते तदा मनसोऽनवस्थां चाञ्चल्यमलमवापतुः । धार्यौ कुमारौ वा कार्यं गृहकर्मेति भ्रान्ते इति भावः । शेकात आपतुरित्यत्र मणीवादिकार्यं ज्ञेयम् । अनेन च बालयोरेव प्रगृह्यता नात्रेति ध्वनयति । अतिबालाविति पाठेऽपि बल परिवर्तन इति स्मरणादतिचलावित्येवार्थः । शृङ्गी वत्सासुरोऽग्निर्दवानलो दंष्ट्री केशी अहिः कालियो जलं यामुनमिन्द्रवृष्टं वा । द्विजो बककण्टकाश्च क्षुद्रशात्रवश्च तैरिति । भाविनं व्यर्थीभवन्तमनर्थं ग्रन्थकृत्कटाक्षयतीति मन्तव्यम् । कण्टकः क्षुद्रशात्रौ चेति विश्वः ॥ २५ ॥

सुमनोरञ्जनी — शृङ्गिणो गवादयः । दंष्ट्रिणः सारमेयादयः । द्विजाः गृध्रादयः । तेभ्यः भयशङ्किते तज्जनन्यौ । अतिचलौ अत्यन्तं चपलौ । स्वसुतौ । क्रीडायाः सकाशात् निषेद्धुम् । गृह्याणि गृहकर्माण्यपि कर्तुं तज्जनन्यौ यदा न शेकाते तदा अलं मनसोऽनवस्थां व्याकुलतां आपतुः।
॥ २५ ॥

कालेनाल्पेन राजर्षे रामः कृष्णश्च गोकुले ।
अघृष्टजानुभिः पद्भिर्विचक्रमतुरञ्जसा ॥ २६ ॥

सत्यधर्मीया — अघृष्टजानुभिर्न घृष्टानि जानूनि चत्वारि येषां तैः पद्भिरञ्जसा विचक्रमतुः । अघृष्टजानुभिः कैश्चिद्वयस्यैरिति वा ॥ २६ ॥

सुमनोरञ्जनी — न घृष्टानि जानूनि येषां तैः पद्भिः पादैः अंजसा विचक्रमतुः पादविक्षेपं चक्रतुरित्यर्थः ॥ २६ ॥

ततस्तु भगवान् कृष्णो वयस्यैर्व्रजबालकैः ।
सहरामो व्रजस्त्रीणां चिक्रीडे जनयन् मुदम् ॥ २७ ॥

सत्यधर्मीया — व्रजस्त्रीणां मुदं जनयंश्चिक्रीडे चिक्रीड । कचित्तथैव पाठः । वृतानतिवृतेः स सुन्दरः ॥ २७ ॥

सुमनोरञ्जनी — वयस्यैः सवयस्कैः । व्रजस्त्रीणाम् । मुदं सन्तोषम् । चिक्रीडे क्रीडां चक्रे ॥ ॥ २७ ॥

कृष्णस्य रुचिरं गोप्योऽदीनकौमारचापलम् ।
शृण्वन्त्याः किल तन्मातुरिति होचुः समागताः ॥ २८ ॥

सत्यधर्मीया — कृष्णस्य गोप्यो रुचिरं वीक्ष्य । कौमारचापलमिति पाङ्कः पाठः । रुचिरादीनकौमारचापला इति पाठे रुचिरमदीनकौमारचापलं यासु ता इति ज्ञाततत्करा इति गोपीविशेषणम् । समागता मिलिताः इति वक्ष्यमाणप्रकारेण । मातुः शृण्वन्त्याः । जनन्या इत्यनुक्त्वोक्त्वा मातुरिति ज्ञातुः कृष्णस्य शृण्वतः । उपसर्गाणां धातुलीनद्योतकतापक्षे मातुर्निर्मातुरिति वाऽर्थमसूचयदिति मन्तव्यम् ॥ २८ ॥

सुमनोरञ्जनी — गोप्यः कृष्णस्य रुचिराः अदीनाः उत्कृष्टाः याः कौमाराः बालक्रीडाः ताभिः चापलं मनोव्याकुलत्वं यासां ताः तथाविधाः सत्यः । यद्वा रुचिरं, अदीनं, कुमारभावोचितं चापलं चपलत्वं यासु ताः । क्रीडा इति शेषः । शृण्वंत्यास्तस्य कृष्णस्य मातुः पुरतः समागताः । इति वक्ष्यमाणप्रकारेण ऊचुः इति सम्बन्धः ॥ २८ ॥

वत्सान् मुञ्चन् कचिदसमयान् क्रोशसञ्जातहासः
स्तेयं स्वाद्वत्त्यथ दधि पयः कल्पितैः स्तेययोगैः ।
मर्कं भोक्ष्यन् विभजति स चेन्नास्ति भाण्डं भिनत्ति
द्रव्यालाभे सुभृशकुपितो यात्युपक्रोश्य तोकान् ॥ २९ ॥

सत्यधर्मीया — असमये असमयानिति सरलौ पाठौ । असमयान्न विद्यते समयो दोहनभ्रामणादियोग्यो येषां तान् । उक्तैतद्विकले लवे । वत्सांस्तर्णकान्मुञ्चन् । कचित् क्रोशादस्माभिः कृतादाक्रोशात्सञ्जातो हासो यस्य सः । अथ कचित्कल्पितैः स्तेययोगैश्चौर्योपायैरागतं स्तेयं दधि च पयः स्वादु यथा तथाऽत्ति । स्तैन्यं चौर्ये स्तेयं तद्धनमित्यमरः । मर्कं मर्कटं मार्जारं बालकं वा । मर्को मनसि वायौ च तोके मार्जारकीशयोरिति यादवः । भोक्ष्यन्भोजयिष्यन्विभजति विभज्य ददाति । स मर्कटादिर्नास्ति चेद्भाण्डं लोकावलोकनतः स्वतृप्त्यनन्तरं पात्रं भिनत्ति । द्रव्यालाभे नवनीताद्यलाभे सुभृशंः कुपितः सन् तोकान्बालकाननुक्रोश्य रोदयित्वा याति । नास्ति चेन्नवनीतादीति व्याख्याने

द्रव्यालाभ इति न वक्तव्यमिति, स इति मर्कपरामर्शकमिति सरलपन्थाः । मर्कमित्येकवचनान्तपाठः स चेदित्यानुकूल्येन चेतोहरः । बहुवचनान्तपाठे स इति जात्येकवचनमिति मन्तव्यम् । हे असम कृष्ण ते त्वयैव कल्पितैरययोगैः शुभावहोऽवधिरयो योगा यज्ञादिस्तदितरोपायास्तस्य सम्बन्धा इति तद्वैचित्र्याद्बहुवचनम् । अथ दधिपयोऽन्यो निरन्नोऽपि बलेन भूयानित्यादेश्च । न विद्यते थमन्नम् । अन्नं थमिति श्रुतिः । टीका च 'अतिथिं जनानामित्यृग्व्याख्यावसरेऽतिथिं बह्वन्नमिति । अनश्नन्नन्य इति श्रुतेः । न केवलं त्वमेवमपि तु गुहां प्रविष्टो शुभं पिबतीत्यादेरिति सूचयत्याचारार्थकक्विपेति मन्तव्यम् । निरन्नवदाचरन्तोऽथंतस्तदधिप । स चासावधिपश्चेति वा । अयं तदितरो जीवस्ते सकाशादेव स्वाद्वत्ति अस्वाद्वेव स्वादुत्वेनात्ति कर्मफलं, पिप्पलं स्वाद्वत्तीत्यनुकृतिः । स साररूपो वत्सान्वत्सो वायुस्तेन सह आनिति स्वात्मानं प्रतीति स जीवसङ्घः । स एनान्ब्रह्म गमयति सोऽहं वायुं दिशां वत्सं वेदेत्यादेः । तर्हि तेषां स्वतो मतिरस्ति किमित्यत आह ॥ चिज्ज्ञानं केति । यो यान् तं जनं यदाक्रोशेन तत्कालप्रदर्शितेन सञ्जातांस्तत्कल्पोत्पन्नान्हन्तीति स तथा तदा मुञ्चन् । अन्तर्णीतण्यर्थो मुचिः । लिङ्गभङ्गं कारयन् यो भवान्कथं मर्कं मनः स्वमनोऽनुसारं तज्ज्ञानमनुसृत्य वा भोक्ष्यन्भोजयिष्यन्विभजति । आनन्दादिकं विभजति यस्तु विभजति विभजते । न च स च चेदिति भजनाभजनस्वभावो नित्यसंसारान्तमस्ति । भाण्डं सुखमिति ज्ञेयम् । भाण्डं भूषणमात्रेऽपि भाण्डं मूलवणिग्धने । नदीपात्रे तुरङ्गाणां भूषणे भाजनेऽपि चेति विश्वः । यो न विभजति स्वं न सेवते स चेन्नातमोयोग्योधिकार्यस्ति । द्रव्यालाभे तत्समर्पिताप्राप्तौ तस्य भाण्डं विवक्षातो विरजापात्रं दूरे यस्येति नास्ति तदेव यस्येति तं तथैव तं मुञ्चन् अस्ति क्षीरागोरितिवन्नास्ति भाण्डं सुखदुःखभाजनरूपं लिङ्गाङ्गं भिनत्ति । सुभृशकुपितोऽतः स दुर्जनः । अकान्न विद्यते कं सुखमात्रं येषु तान् लोकान् तामिस्रादीनुपक्रोशी रुदन् याति । इति महिमा भवानित्यान्तरङ्गिको भावो भामिनीनां विभावनीयः । एवमुत्तरत्रापि शक्यो वर्णयितुमर्थस्तथाऽपि विस्तरो नो भीषयतीत्युपरतम् । तत् । असुषु भृशकुपित इति वा । वत्सांस्तर्णकानिव विद्यमानांस्तोकानात्मजान् यांस्तत्कल्पे संहार्यतया ज्ञातान् । क्रोशेनाक्रोशेन सहितश्चासौ सञ्जातो हासश्च यस्य सः । संहारस्य कोपप्रदर्शनं विनाऽदर्शनात्क्रोशोऽदुःखाद्धास इति ज्ञेयम् । सुभृशकुपित इवोपक्रोश्य रोदयित्वाऽत्ति भक्षयति ॥ अत्ता चराचरग्रहणात् । सर्वं वा अत्तीत्यादेः । तन्मध्ये यदथदन्नभिन्नवदाचरच्चर्मास्थिपूर्वकं शक्यं भक्षयितुं तथाऽपि न लोके तथेत्याचारक्विपा सूचयति । भाण्डमलङ्कारात्मना मुञ्चन्स्थापयन् । ब्रह्मचर्मशिरः पट्टी दिवपालोर्ध्वाङ्गभूषण इति तात्पर्यान्तरवचनात् । तर्हि सुवर्णाद्यलाभो भगवतः किमित्यत आह ॥ न द्रव्यलाभ इति । उद्गीत एवोद्गीथ इत्यादौ तथकारवदत्र यत्तकारेऽस्ति अस्थीति वा तदादि भाण्डमिति वा । अथदस्तीत्यन्वयः । अथानन्तरमधिपयः पयसि क्षीराब्धाविति

यावद्याति। पूर्ववदुर्वरितम् । अथतोऽभीतवदाचरन्तस्त्वदनुग्रहतस्तदधिप । अरक्षकवद्विद्यमानाधि-पेदानीमिति वा। थं भये रक्षणे शुभ इति विश्वः ॥ २९ ॥

सुमनोरञ्जनी — वत्सान् । असमयान् अप्राप्तदोहनसमयान् । क्रोशे अस्माभिः कृते सति । संजातहासः । स्वेन कल्पितैः रचितैः स्तेयोपायैः स्तेयं चौर्येण संपादितं दधि पयश्च स्वादु चेदत्ति पिबति । स्वादु नास्ति चेत् । मर्कान् मार्जारान् मर्कटान्वा बालान्वा भोक्ष्यन् भोजयिष्यन् । विभजति। द्रव्यस्य स्वाशक्यशिक्याद्यधिष्ठितनवनीतादेरलाभे । दण्डादिना भाण्डं भिनत्ति । तेनास्माभिर्भर्त्सनादिना कुपितः कोपं प्रापितश्चेत्तोकान् ताडनादिना उपक्रोश्य रोदयित्वा यातीति । मर्के मनसि वायौ च तोके मार्जारकीशयोरित्यभिधानात् ॥ २९ ॥

हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यै
श्छिद्रं ह्यन्तर्निहितवयुने शिक्यभाण्डेषु तद्वत् ।
ध्वान्तागारे धृतमणिगणं स्वाङ्गमर्थप्रदीपं
काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः ॥ ३० ॥

सत्यधर्मीया — स्तेययोगैरित्युक्तं दर्शयति ॥ हस्ताग्राह्य इति । स्वस्य ह्रस्वतया प्रदर्शनाद्धस्ताग्राह्ये विधिं तदुपायं पीठिकोलूखलाद्यैः पीठिकं चोलूखलं च । उलूखलं गुग्गुले स्यात्कण्डनार्थेऽप्युलूखल इति विश्वः । तदाद्यै रचयति । शिक्यभाण्डेषु शिक्यानि यष्टिलम्बीनि जालविशेषाः । भारयष्टिस्तदालम्बि शिक्यं काच इत्यमरः । तेषु स्थापितानि भाण्डानि पात्राणि तेषु निहितस्य स्थापितस्य हय्यङ्गवीनादेर्वयुने ज्ञाने जाते । तद्वद्यथा तदाप्तिः स्यात्तद्वच्छिद्रं रचयति लकुटादिना । अन्तर्निहितवयुनः इति पाठे तन्मतिमानित्यर्थः । सान्धकारागारे हे अङ्गनाः! स्थापयतेत्यतो वदन्ति ॥ ध्वान्तेति । स्वाङ्गमर्थप्रदीपमर्थान्प्रदीपयति प्रकाशयतीति तत्तथा । न च मणिधारणात्तथा भवेदिति भ्रमस्तु स्यादित्याहुः ॥ अधृतमणिगणमिति । सहजकान्तिरेव तादृशीति भावः । धृतमणिगणमित्यनकारप्रश्लेषपदेन कायकान्त्यतिशयलाभ इत्युपर्येव ज्ञायते । परस्परा-लङ्घियतेति मिथ्या स भूषणं सर्वविभूषणानामित्यादेः । भास्वत्कौस्तुभभासकमित्यादेश्च । कालेऽपहारकाले भवति यर्हि यदाऽन्तर्गृहान्तर्गोप्यो वयं गृहकृत्येषु सुव्यग्रचित्तास्तदाऽयमेव रचयतीति। वयुनं ज्ञानमितीशावास्यभाष्योक्तेः ॥ ३० ॥

सुमनोरञ्जनी — स्तेययोगं प्रपञ्चयति ॥ हस्तेति । गोप्यो यर्हि काले यस्मिन्काले । गृहकृत्येषु सु अत्यन्तं व्यग्रचित्ताः तदा हस्ताग्राह्ये शिक्यादिगते वस्तुनि । तद्ग्रहणार्थम् । पीठकोलूखलाद्यैः ।

विधिं उपायं रचयति । शिक्यस्थितभाण्डेषु । अन्तर्निहितवयुने अन्तर्निक्षिप्तनवनीतभाण्डे । तद्वत् यथा लब्धुं शक्यते तथा च्छिद्रं दण्डादिना विवरं रचयतीत्यन्वयः । ध्वान्तयुक्तागारे तु । धृतमणिगणम् । धृताः मणिगणाः यस्मिन् तत् स्वांगम् । अर्थप्रदीपं पदार्थप्रकाशकम् । रचयति ॥ ३० ॥

एवं धाष्ट्र्याद् विशति कुरुते मेहनादीनि वास्तौ
स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथाऽऽस्ते ।
इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिः
व्याख्यातार्थप्रहसितमुखी न ह्युपालब्धुमैच्छत् ॥ ३१ ॥

सत्यधर्मीया — एवं धाष्ट्र्यात्प्रागल्भ्याद्विशति गृहम् । वास्तौ देहल्याम् । मेहनादीनि पुरीषमूत्रादीनि कुरुते । स्तेयोपायैर्विरचितकृतिः स्तेय उपाया येषां तैर्विरचिताऽरचिता कृतिर्यस्य सः । ये चौर्यसमर्थास्तैरप्यसाध्यचौर्यकर्तेत्यर्थः । यथा सुप्रतीकः सु शोभावन्तः प्रतीका अवयवा यस्य । अङ्गं प्रतीकोऽवयव इत्यमरः । सुप्रतीकः शोभनाङ्गे भवेदीशान्यदिग्गज इति विश्वः । तथा आस्त साधुवदास्त इति तात्पर्यम् । सभयनयनश्रीमुखालोकिनीभिः सभये नयने यस्य तच्छ्रीमद्यन्मुखं सभयनयनं च तच्छ्रीमुखं तस्य श्रीकृष्णस्य मुखस्यावलोको यासामस्ति ताः सभयनयनश्रीमुखा-लोकिन्यस्ताभिः । इत्थं व्याख्यातार्थप्रहसितमुखी व्याख्यातोऽर्थस्तेन प्रहसितं मुखं यस्याः सा व्याख्यातार्था प्रहसितमुखीति पाठेऽप्यर्थादर्थः प्रहासनिमित्तमिति ज्ञेयम् । तमुपालब्धुं बद्धुं नैच्छत् ॥ ॥ ३१ ॥

सुमनोरञ्जनी — एवं धाष्ट्र्यात् प्रागल्भ्यात् । गेहं विशति । वास्तौ गृहे । मेहनादीनि पुरीषोत्सर्जनादीनि । कुरुते । एवं स्तेयोपायैः विरचितकृतिः सन् । सुप्रतीको यथा साधुरिव मार्जारवत् आस्ते । इत्थं स्त्रीभिः व्याख्यातार्था, व्याख्यातः प्रख्यापितः अर्थः सुतव्यापारो यस्याः सा । उपालब्धुं आक्षेप्तुं भर्त्सयितुमिति यावत् । नैच्छत् । कथंभूताभिः स्त्रीभिः । सभये नयने यस्य तच्च तत् श्रिया युक्तं मुखं श्रीकृष्णमुखं तस्यावलोकनं यासामस्ति ताभिरित्यर्थः ॥ ३१ ॥

एकदा क्रीडमानास्ते रामाद्या गोपबालकाः ।
कृष्णो मृदं भक्षितवानितिमात्रे न्यवेदयन् ॥ ३२ ॥

सत्यधर्मीया — क्रीडमानाः क्रीडन्त इत्येव । इतिमात्रे एतावति लघीयसि कार्येऽनिवेदनीये न्यवेदयन्निति वा ॥ ३२ ॥

सुमनोरञ्जनी — मात्रे श्रीकृष्णमात्रे यशोदायै । एकदा एकस्मिन्दिने । क्रीडमानाः रामाद्याः गोपबालकाः । कृष्णो मृदं मृत्तिकां भक्षितवान् इति न्यवेदयन्, इत्यन्वयः ॥ ३२ ॥

सा गृहीत्वा करे कृष्णमुपालभ्य हितैषिणी ।
यशोदा भयसम्भ्रान्तप्रेक्षणाक्षमभाषत ॥ ३३ ॥

सत्यधर्मीया — उपालभ्य निर्भर्त्स्य । गोपीभिः पूर्वमुक्तावनुपलम्भ उपालम्भ इदानीं कुतो यशोदाया इत्यत आह ॥ हितैषिणीति । मृद्भक्षणे उदरशूलादिकं स्यादिति सुतहितैषिणी हितं काङ्क्षन्ती । अनेन दध्यादिचौर्य इव मेहनादौ च न पुत्रगात्ररोग इत्युपालम्भोपेक्षणं प्रागिति मन्तव्यम् । भयेन भ्रान्तानि प्रेक्षणानि ययोस्ते अक्षिणी यस्य तमभाषत ॥ ३३ ॥

सुमनोरञ्जनी — हितैषिणी हितमिच्छन्ती सा यशोदा । कृष्णं करे गृहीत्वा । उपालभ्य निन्दावचनमुक्त्वा । स निन्द उपालम्भ इत्यमरः । भयेन संभ्रान्तानि चञ्चलानि प्रेक्षणानि अवलोकनानि ययोस्ते च ते अक्षिणी यस्य स तथोक्तः तं श्रीकृष्णं अभाषतेति सम्बन्धः । उपालम्भरूपं भाषणं चकारेति यावत् ॥ ३३ ॥

कस्मान्मृदमदीनात्मन् भवान् भक्षितवान् रहः ।
वदन्ति तावका ह्येते कुमारास्तेऽग्रजोऽप्ययम् ॥ ३४ ॥

सत्यधर्मीया — अदीनात्मन् उदारचित्त! भवान् रहो मृदं कस्माद्भक्षितवान् । न नेति वदेति साक्षिण आह ॥ वदन्तीति । एते कुमाराः । ते च नास्मदीया इति न वदेत्याह ॥ तावका इति । तत्राप्यनाश्वासः कृतमत्कलहास्त इत्यत आह ॥ तेऽग्रजो रामोऽयमपि वदतीति । अप्ययं नाशं गच्छेरिति शेषः । कस्मान्मृदं भक्षितवानसीति वा ॥ ३४ ॥

सुमनोरञ्जनी — तत्र उपालम्भो द्वेधा । गुणाविष्करणपूर्वको दोषाविष्करणपूर्वकश्चेति । तत्रादौ महाकुलीनस्य तवनेदमुचितमिति तत्र यशोदाकृतगुणाविष्करणपूर्वकमुपालम्भप्रकारमाह ॥ कस्मादिति ॥ हे अदीनात्मन् । अदरिद्रस्वभाव ! अनेन गुणाविष्करणं कृतम् । कस्मान्मृदं भक्षितवान् । इदं तव न योग्यमिति भावः । रहः विजनस्थले । तावकाः त्वयि स्निग्धाः । अग्रजः बलभद्रोऽपि ॥ ३४ ॥

श्रीकृष्ण उवाच -

नाहं भक्षितवानम्ब सर्वे मिथ्याभिशंसिनः ।
यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखम् ॥ ३५ ॥

सत्यधर्मीया — अम्ब । अम्बार्थेति ह्रस्वः । सर्वेऽग्रजादयो मिथ्याऽभिशंसन्तीति ते तथा । तन्मिथ्यात्वनियोगो यदि तवापेक्षितः सत्यगिर इत्यभिमानो मानिनि तर्हि समक्षं मे मुखं पश्य । न

निरुपादाना सृष्टिः सम्भवेति सा तदानीमेतस्यास्ये दर्शनीयेति धिया । किञ्च तद्भारावतारायायमवतार इति तया च धरया किञ्चिदुपयोगिन्या भवामीति मतितो मृदद्नमुचितमच्युतस्य तर्हीश्वरो नानृतात्पातकं परमिति जानन्कथं जननीं प्रति जननीतिशासकः सोऽनृतमवादीदित्यत आन्तरङ्गिको भगवतो विरलच्छ्लोकस्य, ना परमपुरुषोऽहं मृदं भक्षितवान्सर्वे एते मिथ्याभिशंसिनः । हे सति मातः! सर्वेऽगिरस्तूष्णीका यदि तर्ह्यगिरो मम मुखं समक्षं पश्य । कार्येण कारणभवगतं भवतीति शिष्टं श्लिष्टम् । पञ्चीकरणपक्षे सर्वभूतमेलनादेकस्यां मृदि भक्षितायामन्तरिक्षाद्युपादेयप्रदर्शनं नासम्भवीति वर्णयन्ति ॥ ३५ ॥

सुमनोरञ्जनी — सत्या यथार्था गीर्येषां ते तथाविधाः ते कुमारा इति । त्वं यदि अगिरः ब्रवीषि तर्हि समक्षं प्रत्यक्षम् ॥ ३५ ॥

यद्येवं तर्हि व्यादेहीत्युक्तः स भगवान् हरिः ।
व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ॥ ३६ ॥

सत्यधर्मीया — यदि मृदं न भक्षितवान् बलादिबालाश्च मिथ्याभिशंसिनः पश्य समक्षं मे मुखमिति च वदसि तर्हीत्थं कुर्वितीरयति ॥ यद्येवमिति । तर्हि व्यादेहीति व्ये परतो हिर्लघुः सन् व्यादानमप्यल्पमल्पकार्यानुगुणमिति ध्वनयति । अन्यथा सर्वजगद्ग्रासः स्यादिति ज्ञेयम् । क्रीडयैव मनुतनुज इति क्रीडामनुजबालको मुखं व्यादेहि । तद्व्यादत्तेति मुखतदध्याहारोऽनियतस्थलो ज्ञेयः ॥ ॥ ३६ ॥

सुमनोरञ्जनी — यदि एवं मृदं न भक्षितवानसि तर्हि मुखं व्यादेहि विस्तारय । क्रीडार्थं मनुजबालक इव मनुजबालकः । व्यादत्त विस्तारितवान् ॥ ३६ ॥

सा तत्र ददृशे विश्वं जगत् स्थास्नु च खं दिशः ।
साद्रिद्वीपाब्धि भूगोलं सवाय्वग्नीन्दुतारकम् ॥ ३७ ॥

सत्यधर्मीया — तत्र मुखे विश्वं ददृशे । तदेव विशदमाह ॥ जगदिति । जङ्गमं, स्थास्नु स्थावरं खं विवरं, दिशस्तद्भेदान् । अद्रयः कुलाचला द्वीपाः सप्ताब्धय एतत्सहितं भूगोलं भूमण्डलम् । तारकं सवाय्वग्नीन्दु वायुः प्रवहोऽग्निर्दार्वाद्युद्भूतः । वाय्वग्निचन्द्रसहितं तारकं नक्षत्रगणम् । कनीनिकायां नक्षत्रे तारकं तारकाऽपि चेति विश्वः ॥ ३७ ॥

सुमनोरञ्जनी — सा यशोदा । तत्र श्रीकृष्णास्ये । विश्वं ददृशे । कीदृशं विश्वं,जगत् जंगमं स्थास्नु स्थावरं च । तदेव प्रपञ्चेनाह ॥ खमिति । अव्याकृताकाशम् । दिशः प्राच्यादयः ।

साद्रिद्वीपाब्धि अद्रिद्वीपाब्धिभिः सहितम् । भूगोलं भूमण्डलम् । वायुः भूतवायुः । अग्निर्भौमो दिव्यश्च । इन्दुश्चन्द्रः । तारकाः अनाख्यातनक्षत्राणि तैः सहितम् ॥ ३७ ॥

ज्योतिश्चक्रं जलं तेजो नभः स्वर्वियदेव च ।
वैकारिकाणीन्द्रियाणि मनो मात्रा गुणास्त्रयः ॥ ३८ ॥

सत्यधर्मीया — ज्योतिश्चक्रं जलं तेजो विद्युदादिसम्बन्धि स्वः स्वर्गं वियन्महाकाशं नभोऽन्धकारं वैकारिकाणि दैवापि तैजासानीन्द्रियाण्याहुरित्युक्तेस्तैजसानीन्द्रियाणि । मनसो मुख्यतयेन्द्रियत्वेऽपि पृथगुक्तिः । दैवान्देहान्मनः खानीत्यादेः । गुणास्त्रयस्त्रीन्गुणान् ॥ ३८ ॥

सुमनोरञ्जनी — ज्योतिश्चक्रं अश्विन्यादिनक्षत्रमण्डलम् । जलतेजसी बाह्याभ्यन्तरे । नभोऽन्तरिक्षम् । स्वः स्वर्गः । वियत् ब्रह्माण्डाद्बाह्यं परमव्योम । वैकारिकाणि वैकारिकाहंकारकार्याणि देवताशरीराणि । इन्द्रियाणि तैजसानि मनश्च । मात्राः भूतसूक्ष्माणि शब्दाद्या वा । त्रयो गुणा सत्त्वाद्याः ॥ ३८ ॥

एतद् विचित्रं सह जीवकालस्वभावकर्माशयलङ्गिभेदम् ।
सूनोस्तनौ वीक्ष्य विदारितास्ये व्रजं सहात्मानमवाप शङ्काम् ॥ ३९ ॥

सत्यधर्मीया — जीवाश्च कालश्च स्वभावः सात्त्विकत्वादिः कर्मादृष्टमाशयः संस्कारो लिङ्गं लक्षणं षोडशकलकलेवरं लिङ्गशरीरं वा, एतदादिभेदोपेतं सूनोस्तनौ तत्रापि विदारितास्ये अवयवविशेषे । सहात्मानमिति पदमेकं व्रजविशेषणम् । एतद्विचित्रं वीक्ष्य शङ्कां सन्देहमवाप ॥३९॥

सुमनोरञ्जनी — जीवो देहमानी । कालस्वभावः प्रकृत्यादीनां परिणामादिः । कर्म धर्माधर्मौ । आशयः संस्कारः । एभिः, एतेषां लिङ्गभेदेन लक्षणभेदेन च सहितम् । सहात्मानं स्वसहितं व्रजं, सूनोः कृष्णस्य तनौ अल्पपरिमाणे विदारितास्ये प्रसारितमुखे वीक्ष्य शङ्कां संशयं आप । एतत्सर्वं तत्काल एव भगवदनुग्रहलब्धदिव्यदृष्ट्यैवेति ज्ञेयम् । अन्यथा धर्माधर्माद्यतीन्द्रियदर्शनस्यानेनैव चक्षुषाऽयोगात् ॥ ३९ ॥

किं स्वप्न एतदुत देवमाया किं वा मदीयो बत बुद्धिभेदः ।
अथो अमुष्यापि ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ॥ ४० ॥

सत्यधर्मीया — तामेव वितत्य वक्ति ॥ किमिति । एतद्भातं वस्तु स्वप्ने तदवस्थायां किं किं स्वप्नो न । कुत इत्यत उतैतत्स्वाप्नावस्थां विना जाग्रद्दशायामपि सत्त्वादित्यप्यन्वयमुशन्ति । उताथवा

देवस्य श्रीहरेर्माया सैवेशेच्छा सृष्टवती । नायमपि कल्पोऽनल्पः । तथा सति पार्श्वस्थोपालम्भ-प्रसङ्गः । मदीय एव बुद्धिभेदो बुद्धिभ्रंशः । मोह इति पाठोऽपि पाङ्कः । न च स च मदकृत् । कुमारस्यापि ममान्तरुदरं दर्शनात् । देवमायेति प्राक् कल्पितं स्वयमेवेत्थमिति मत्वाऽऽह ॥ अथो इति । अत एवामुष्येत्युक्तिः । ममामुष्यार्भकस्य । यः कश्चन यः कोऽप्यात्मयोग आत्मनि सन् योगोऽणिमाद्यैश्वर्यम् । कोऽपि न क्षिक्षयददक्षश्च कोमलो बालः कथमयं तव विकल्पः कल्प्यत इत्यत आह ॥ औत्पत्तिक आजनीनः स्वाभाविक इति यावदिति । अमुष्येत्यत्र ओदिति प्रगृह्यसंज्ञायां प्लुतेति प्रकृतिभावः । बत सन्तोषे । अर्भोऽर्भकः कश्चतुर्मुखो यस्येत्यन्तरर्थः ॥ ४० ॥

सुमनोरञ्जनी — संशयप्रकारं प्रदर्शयति ॥ किमिति । किं स्वप्नः उत देवस्य हरेर्माया । माया चेदन्येषां किं न प्रतीयत इत्यत उक्तम् ॥ हरेरिति । श्रीहरेर्मायात्वादिदं लोकविलक्षणमेवेति भावः । किं वा मदीयो बुद्धिभेदः बुद्धिविपर्यासः । अथवा ममामुष्यार्भकस्यापि औत्पत्तिकः स्वाभाविकः आत्मयोगः स्वीयैश्वर्यातिशयः ॥ ४० ॥

अदो यथा तन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरञ्जसा ।
यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणताऽस्मि तत्पदम् ॥ ४१ ॥

सत्यधर्मीया — स्वपुत्रं हे नन्दभार्ये कथं न त्वं व्यज्ञासीरित्यतो न त्रिनेत्रादय एनं सम्यग्विदुरहं कियन्मात्रमिति मर्म न प्रकाश्यमित्यपदेशेन तान्यप्यज्ञान्कथयित्वाऽन्ततः किं त्वं करोषीत्यत इयत्येव सीमा सेवाया इति तदावेदयति ॥ अद इति । कञ्जजस्त्वर्भकपदेनैव निरस्त इति न तदुक्तिरत्र । अदो रूपं यथा तथा । चेतो रुद्रः पुष्करश्च । वाचो वाणीवह्निबृहस्पतयः । वितर्कगोचरं लिङ्गमशिष्यमित्युक्तेर्गोचरसञ्चरेत्यादिना नित्यपुल्लिङ्गतयोक्तोऽपि गोचरशब्दो नपुंसकः । तर्कस्यानुमितेर्गोचरो विषयो, विरुद्धं पृथग्भूतं तर्कगोचरादिति तत्तथेति । गोर्ज्ञानस्य चरश्चरणं यस्य तत्तर्कस्य गोचरं तन्नेति वितर्कगोचरम् । एवं चेन्न गोचरतद्धितेति टच् । सप्तघटिकाभोजनत्रिलोकनाथ इत्यादिवद्योग्यतया तर्कपदार्थस्य गोपदार्थेनान्वयः । विस्तरस्तु निर्गतं मनसो वाचो यदि तत्स्यादिति गोचरमित्यनुव्याख्याव्याख्यासुधातोऽनुसन्धेयः । पार्थसारथिरपि शास्त्रदीपिकायामवादीत् । अवगतसाधनमपि कर्मागोचरं सदिति । विशिष्टा अशुष्कास्तर्कास्तेषां गोचरं न साकल्येन वितर्कास्तद्भिन्ना वेदाद्यास्तेषां गोचरं साकल्येनेति च ज्ञेयम् । नेन्द्रियाणि नानुमानमित्यादेः । न शून्यसङ्कल्पं तदित्याह ॥ यदाश्रयमिति । अद इत्यत्राप्यन्वेति । अदो जगत्, यदाश्रयं यदाश्रयो यस्य तत् । येन जीवति यतः प्रतीयते उत्पत्तिमत्त्वेन ज्ञायते । यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीत्यादेः । यतो येनेति वदन्निमां प्रतीकतया जग्राहेति ज्ञेयम् । एतादृशं

सुविभाव्यं दयायां दुर्विभाव्यं साकल्येन वा करुणायां वा । तत्पद्यत इति पदं मुख्यप्राप्यं ब्रह्म प्रणताऽस्मि । तत् तत्त्वाद्वा चेतो वा धाता वृत्तिभेदाच्चेतोमनःकर्मवचोभिः । अञ्जसा वितर्कगोचरं नेत्यपि बाह्यार्थो ज्ञेयः । अदो यथा प्राक् न तथा चेतोमनःकर्मवचोभिरञ्जसा दुर्विभाव्यमित्यन्वयः । वितर्कगोचरं वेदैकसमधिगम्यपदं प्रणताऽस्मीत्यन्वयने द्वितीयैकवचनं गोचरमितीति न क्लेश इत्यपि वदन्ति ॥ ४१ ॥

सुमनोरञ्जनी — अन्तिमं पक्षमवलंब्यैव स्वपुत्रस्य ब्रह्मत्वं निश्चित्य ब्रह्मादिभिरपि दुर्विभाव्यमिदं किमु मादृशैरिति चिन्तयामासेत्याह ॥ अद इति । अदः मत्पुत्राख्यं वस्तु । यथा यादृशं तत् तादृशस्वरूपेण । चेतोमनःकर्मवचोभिः । चेतः चेतनो जीवः तदभिमानी ब्रह्मा । मनो रुद्रः स्कन्देन्द्रादयः । कर्म पुष्करः । वचः उमादयः । तैः देवैः कृतवितर्कगोचरं न भवति यदा तदाऽस्मदादिभिः सुदुर्विभाव्यमिति किमु । तर्हि किं निःस्वरूपमेव । नेत्याह ॥ यदिति । अद इत्यनुवर्तते । अदो जगत् । यतो जायते । येन जीवति । प्रलये मुक्तौ च यदाश्रयमिति प्रतीयते वेदादिभिः तत्पदं तादृशब्रह्मस्वरूपं प्रणताऽस्मीत्यन्वयः । चेत आदिभिर्देवैः यथा यथावत् न वितर्कगोचरं 'इदं मया स्रष्टुं योग्यम्' इत्यादिवितर्कागोचरम् । अदो जगत् । यदाश्रयम् । येन यतः प्रतीयते तद्दुर्विभाव्यं पदं प्रणताऽस्मीति वा, चेत इत्यादेः पदरत्नावल्यामाविष्कृतोऽयमेवार्थः श्लिष्टः न यथाश्रुतः श्रीधराविष्कृतः । चेतोमनःपदयोः पौनरुक्त्यापत्तेः । कर्मपदार्थस्य वितर्के करणानुपपत्तेश्च ॥ ॥ ४१ ॥

अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती ।
गोप्यश्च गोपाः सहगोधनाश्च ये यन्माययेत्थं कुमतिः स मे गतिः ॥ ४२ ॥

सत्यधर्मीया — यन्मायया यस्य हरेरिच्छयैवास्मत्कर्मानुसृत्योद्बुद्धयाऽहङ्कर्तृत्वाभिमान आत्मन्यसौ मम पतिर्भर्तैष मे सुतः । व्रजेश्वरस्य नन्दस्याखिलानि वित्तानि पाति रक्षयतीति सा सती पतिव्रता साध्वी भार्या वा । गोप्यः सहगोधना गोपाश्च ये समे सर्वे मदीया इत्थं कुमतिर्ममाभवत् । श्रीहरिरेव मम गतिः । एतन्मतिमतिगमय्य सद्गतिदातेति तात्पर्यम् ॥ ४२ ॥

सुमनोरञ्जनी — एवं परब्रह्मैवावतीर्णं मद्गृहे सर्वमपि सत्ताप्रतीत्यादौ तदधीनमेवेति निष्टंकितेऽपि श्रीकृष्णादिषु यत्सुतत्वाद्यभिमतिर्मम सा कुमतिरेवेत्यचिन्दयदित्याह ॥ अहमिति । असौ नन्दगोपः मत्पतिः । एषः श्रीकृष्णः मे सुतः । अहं व्रजेश्वरस्य नन्दस्याखिलवित्ताधिष्ठात्री । सती निर्दुष्टा । सहगोधनाः गोप्यो गोपाश्च मे मदधीनाः इत्थं या मतिः सा कुमतिरेव । एतादृश्या अपि मे सः श्रीहरिरेव गतिः गतिप्रदो भूयात् ॥ ४२ ॥

इत्थं विदिततत्त्वायां गोपिकायां स ईश्वरः ।
वैष्णवीं व्यतनोन्मायां प्रजास्नेहमयीं विभुः ॥ ४३ ॥

सत्यधर्मीया — इत्थं विदिततत्त्वायां गोपिकायां मातरीश्वरः स प्रजास्नेहमयीं पुत्रस्नेहरूपिणीं वैष्णवीं मायां व्यतनोत् । स्वकीयामित्युक्तौ भागवतीति स्फुटं नावगता भवतीति वैष्णवीमित्युक्तिः । अनेन च विष्णुत्वं स्पष्टयामासेति ध्वनिः ॥ ४३ ॥

सुमनोरञ्जनी — प्रजास्नेहरूपां मायाम् । व्यतनोत् विस्तारयामास ॥ ४३ ॥

सद्यो नष्टस्मृतिर्गोपी स्वारोप्यारोहमात्मजम् ।
प्रवृद्धस्नेहकलिलहृदया सा यथा पुरा ॥ ४४ ॥

सत्यधर्मीया — सद्यो नष्टा स्मृतिः कुमतिः स मे गतिरित्याद्या दर्शनोपयोगस्मृतिः यस्याः सा । तत्कथमित्यतः कथयति ॥ स्वारोप्येति । प्रवृद्धो यः स्नेहस्तेन कलिलं व्याप्तं हृदयं यस्याः सा । सा पुरा यथा तथाऽभूदिति शेषः ॥ ४४ ॥

सुमनोरञ्जनी — सद्यः तत्काले । नष्टा स्मृतिः श्रीकृष्णे परब्रह्मत्वानुस्मरणं यस्याः सा । आत्मजं कृष्णम् । आरोहं कटिम् । सु सम्यक् आरोप्य । प्रवृद्धस्नेहेन कलिलं व्याप्तं हृदयं यस्याः सा । बभूवेति शेषः ॥ ४४ ॥

त्रय्या चोपदिषद्भिश्च साङ्ख्ययोगैश्च सात्त्वतैः ।
उपगीयमानमाहात्म्यं हरिं साऽमन्यतात्मजम् ॥ ४५ ॥

सत्यधर्मीया — तन्मायावैभवं भृङ्गिग्राहकतया दर्शयति ॥ त्रय्येति । वेदेन । उपनिषद्भिरग्निमीळेत्यादिना । उपनिषदां वेदत्वेऽपि वेदान्तत्वेन पृथगुक्तिः । एष पन्था इत्यादिकाभिः । साङ्ख्यं कापिलं योगैर्योगशास्त्रैः सात्वतैः पञ्चरात्रादिभिः । सात्वान्भगवांस्तद्विषयैः सात्वतैः साङ्ख्ययोगैः पञ्चरात्रादिशास्त्रैरित्यपि व्यातन्वते । वृद्धाच्छाभावश्छान्दसः । उपगीयमानं माहात्म्यं यस्य तं हरिं साऽऽत्मजं स्वसुतममन्यतेति ॥ ४५ ॥

सुमनोरञ्जनी — अहो भगवन्मायामाहात्म्यं किं वर्णनीयम् । या क्षणार्धे आत्मजं हरिं अमन्यत सा सैव क्षणार्धे, त्रय्या अग्निमीळ इत्यादिकया । उपनिषद्भिः एष पन्थेत्यादिभिः । सांख्यं ज्ञानम् । तस्य योगैः उपायभूतैः पञ्चरात्रादिभिश्च करणैः, सात्वतैः– सत्ववान् हरिः तत्सम्बन्धिनः सात्वताः तैः कर्तृभिः । उपगीयमानं माहात्म्यं यस्यासौ तथोक्तः तं हरिं आत्मजं स्वपुत्रम् । अमन्यतेति ।
॥४५॥

राजोवाच -

नन्दः किमकरोद् ब्रह्मन् श्रेय एवं महोदयम् ।
यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ॥ ४६ ॥

सत्यधर्मीया — श्रुतनन्दतत्सुन्दरीसौभगो राजा चित्ते चित्रं मन्वानो मुनिं तन्निदानं पृच्छतीति वदति ॥ राजेति । ज्ञानपूर्ण एवं महानुदयः फलं येन तच्छ्रेयः सुकृतम् । स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृष इत्यमरः । एवंमहोदयमिति समस्तं वा । एवमुक्तरीत्या महानुदयो येन तदिति विग्रहः । महाभागा महान्भागो भाग्यं यस्याः सा । भागो भाग्यंशतुर्यांश इति यादवः । महाभागधेयवतीति वा । भागो रूपार्धकः प्रोक्तो भागधेयैकदेशयोरिति विश्वः । किं तत्कार्यं त्वया श्रुतं क्षितिपत इत्यत आह ॥ हरिर्यस्याः स्तनं पपौ पीतवानिति । एवं महोदयं श्रेयो यशोदा नन्दश्च किमकरोदिति पृथक् पृथगन्वयः ॥ ४६ ॥

सुमनोरञ्जनी — राजा सानन्दं पृच्छतीत्याह ॥ राजेति । एवं प्रकारेण महान् उदयः अभ्युदयो यस्मात् । तत् श्रेयः सुकृतम् । किं किं जातीयमकरोत् । प्राग्जन्मनीति शेषः । यशोदा च किं श्रेय अकरोदिति सम्बन्धः । कुतः । यतः महान् भागो भाग्यं यस्याः सा । अतः । किं तद्भाग्यम् । यस्याः स्तनं हरिः पपौ तदेव भाग्यम् । किं ततोऽन्यद्भाग्यमस्तीति भावः ॥ ४६ ॥

पितरौ नान्वविन्देतां कृष्णरामार्भकेहितम् ।
गायन्त्यद्यापि कवयो यल्लोकशमलापहम् ॥ ४७ ॥

सत्यधर्मीया — पितरौ साक्षात्प्रसूजनयितारौ देवकीवसुदेवौ कृष्णरामार्भके हितं कृष्णस्य रामाभिः सह क्रियमाणमङ्गरक्षाद्यारभ्येतरतरुण्यङ्गसङ्गादिरूपमर्भकचेष्टाम् । रामा सुन्दरीत्वेनादौ दृष्टा पूतना तदादिविषयेऽर्भके हितमिति वा । नान्वविन्देतां न प्राप्नुवतः । एतौ च प्राप्नुवन्तौ । किं तन्माहात्म्यमित्यत आह ॥ गायन्तीति । अद्यापि कवयो ब्रह्माद्या लोकशमलापहं लोकानां शमलं पापं तदपहन्तीति तत्तथा गायन्ति । लोकानां शं येन तल्लोकशं लोकशं च तन्मलापहं चेति वाऽनेकार्थविशेषो ज्ञेयः । तत् त्रय्या चेत्यादिना हरिं सामान्येनात्मजमित्यसाधारणधर्मैरेकप्रसक्तेः । पूर्वत्रेव पपौ यस्याः स्तनं हरिरित्यत्र गायन्त्यद्यापि कवयो यल्लोकशमलापहमित्युक्तेश्च रामग्रहणं मनोरममिति शङ्कासङ्कोचोऽन्वयन एवं ज्ञेयः । यद्वा प्रान्ते सहरामो वसंश्चक्रे इत्युदीरणेन सहभूतमात्रेण योग्यक्रीडादिकर्तृत्वेन छात्रेण सह गुरुः पूजित इत्यादौ यथा तरतमभावस्तथाऽत्रेति कृष्णरामयोरर्भके हितमित्यपि सम्भवतीति ज्ञेयम् । याभ्यां तप आदिकं कृत्वा पुत्रत्वेन सम्पादितः

कृष्णस्तौ नैतद्दृष्टवन्तावेतौ तु यशोदानन्दौ दृष्टवन्तावितीदं चित्रमिति भावः । अपे क्लेशतमसोरिति योगविभागाद्धन्तेर्डः । अनाशीरर्थे । आशिषि हन इत्युक्तेः । सत्तायां विद्यते ज्ञाने वेत्तिविन्तो विचारणे । विन्दते विन्दति प्राप्ताविन्युक्तेर्लाभार्थो विदधातुरिति ज्ञेयम् ।। ४७ ।।

सुमनोरञ्जनी — अन्यच्च । पितरौ देवकीवसुदेवावपि । कृष्णरामयोः अर्भकेहितं बालक्रीडाम् । नानुविन्देतां नाजानीताम् । यत् लोकानां श्रवणमात्रेण शमलापहं पापहरम् । अद्यापि कवयो गायन्ति तत् इमौ यशोदानन्दौ अनुविन्देताम् । अतः । नन्दो यशोदा च श्रेयः किमकरोदिति ।। ४७ ।।

श्रीशुक उवाच -

द्रोणो वसूनां प्रवरो धरया सह भार्यया ।
करिष्यमाण आदेशं ब्रह्मणस्तमुवाच ह ।। ४८ ।।

सत्यधर्मीया — उत्तरासुतपृष्टो ऋषिश्रेष्ठ उत्तरं वक्तुमारभत इत्यर्थको हशब्दः । प्रत्यारम्भे प्रसिद्धे हेति यादवः । वसूनां प्रवरो नाम्ना द्रोणो धरया तन्नाम्न्या भार्यया सह ब्रह्मण आदेशं करिष्यमाणस्तं ब्रह्माणमुवाच ।। ४८ ।।

सुमनोरञ्जनी — ब्रह्मणः चतुर्मुखस्य । आदेशं आदिष्टं कार्यं करिष्यमाणः । तं ब्रह्माणम् ।।
।।४८ ।।

जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ ।
भक्तिः स्यात् परमा लोके ययाऽञ्जो दुस्तरं तरेत् ।। ४९ ।।

सत्यधर्मीया — भुवि जातयोर्नौ महादेवे विश्वेश्वरे हरौ यया दुस्तरं संसारसागरं तरेन्नरो लोके परमा सा भक्तिः स्यात् । लोक इति प्रथमान्तः पाठोऽपि दृश्यते । स दृश्यः ।। ४९ ।।

सुमनोरञ्जनी — महादेवे देवेषूत्तमे । नौ आवयोः । परमा भक्तिः स्यात् । लोके जनमध्ये । अलोके लोकविलक्षणे हराविति वा । यद्वा लोके तद्भक्तलोके । भक्तिः स्यात् । योग्येति शेषः । यया भगवद्भक्त्या । दुस्तरं तर्तुमशक्यं संसारम् ।। ४९ ।।

अस्त्वित्युक्तः स एतेन व्रजे द्रोणो महायशाः ।
जज्ञे नन्द इति ख्यातो यशोदा सा धराऽभवत् ।। ५० ।।

सत्यधर्मीया — एतेन ब्रह्मणाऽस्त्वित्युक्तो महायशा द्रोणो नन्द इति ख्यातो व्रजे जज्ञे । सा धरा च यशोदाऽभवदित्यन्वयः ।। ५० ।।

सुमनोरञ्जनी — एतेन ब्रह्मणा । द्रोणो नन्द इति ख्यातो जज्ञे । धरा च यशोदाऽभवत् ॥५०॥

ततो भक्तिर्भगवति पुत्रभूते जनार्दने ।
दम्पत्योर्नितरामासीद् गोपगोपीषु भारत ॥ ५१ ॥

सत्यधर्मीया — गोपगोपीषु तन्मध्ये । ततश्चतुराननवरतः पुत्रभूते जनार्दने भगवति नितरां भक्तिः दम्पत्योरासीत् । दम्पत्योरिति गतम् । जाया च पतिश्च दम्पती इत्यत्र पुरत एव तरुण्याः स्फुरणादुत्तरत्र गोपीगोपेष्विति वक्तव्यमिति चेत् । साक्षादधोक्षजजनियोनित्वाज्जायापुरस्कृतिरितरत्र त्वितरासामप्राधान्यं च पुंसामिति द्योतयितुमर्थविशेषं चिव्यत्यस्योक्तिरिति तात्पर्यमवधेयम् ॥ ५१ ॥

सुमनोरञ्जनी — यद्यपि तयोः स्वभावसिद्धा भक्तिः । ततो ब्रह्मवरात् । दंपत्योः नितरां अधिकम् । आसीत् । गोपगोपीषु मध्ये ॥ ५१ ॥

कृष्णो ब्रह्मण आदेशं सत्यं कर्तुं व्रजे विभुः ।
सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ॥ ५२ ॥

इति श्रीमद्भागवते दशमस्कन्धे नवमोऽध्यायः ।

सत्यधर्मीया — ब्रह्मण आदेशं भक्तिरस्त्वित्यादिरूपं सत्यं यथार्थं कर्तुं विभुः श्रीकृष्णः सहरामो व्रजे वसंस्तेषां नन्दयशोदागोपानां स्वलीलया प्रीतिं चक्रे । अनया भक्तिरुदेतीति भावः ॥ ॥ ५२ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे नवमोऽध्यायः ॥ १०-९ ॥

सुमनोरञ्जनी — भक्तानुकंपी कृष्णोऽपि ब्रह्मण आदेशं वरदानरूपम् । सत्यं कर्तुम् । प्रीतिं सन्तोषम् ॥ ५२ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां नवमोऽध्यायः ॥ १०-९ ॥

॥ अथ दशमोऽध्यायः ॥

श्रीशुक उवाच -

एकदा गृहदासीषु यशोदा नन्दगेहिनी ।
कर्मान्तरनियुक्तासु निर्ममन्थ स्वयं दधि ॥ १ ॥

सत्यधर्मीया — स्वलीलया तेषां प्रीतिं चक्र इत्युक्तम् । सा च कीदृशीत्यतस्तां दर्शयितुं यशोदा काञ्चित्तदाटीकितधाटीं तदुपयोगिनीमादावाह ॥ एकदेति । स्वयं साक्षादेव नन्दगेहिनी नन्दगृहिणी तद्भार्या यशोदा दधि निर्ममन्थ । कुत इत्यत आह । एकदा कदाचिद्गृहदासीषु मथनकर्त्रीषु । कर्मान्तरनियुक्तास्वेतत्कर्मतोऽन्यत्कर्मान्तरं तत्र नियुक्तासु सतीष्विति ॥ १ ॥

सुमनोरञ्जनी — श्रीभगवतो भक्तवश्यता प्रदर्श्यतेऽस्मिन्नध्याये । नन्दगेहिनी नंदभार्या । स्वयं दधि निर्ममन्थ । दासीशतमहिता स्वयमेव कुतो निर्ममंथेत्यत उक्तम् । गृहदासीषु कर्मान्तरनियुक्तास्विति ॥ १ ॥

यानि यानीह गीतानि तद्बालचरितानि च ।
दधिनिर्मथने काले स्मरन्ती तान्यगायत ॥ २ ॥

सत्यधर्मीया — तात्कालिकं स्त्रीस्वभावमाह । स्मरन्ती यशोदा तानि तान्यगायतागायदिति । ते ते पिबन्तु जिह्वयेत्यृग्भाष्यटीकादिकमुदाहृत्य प्रागुपपादितप्रकारोऽत्रानुसन्धेयः । तद्बालचरितानि स चासौ बालश्च तद्बालस्तस्य यानि यानि पूतनाघातादीनि । इदं स्वगोकुल एव । एतेन स्वदृष्टानीति ध्वन्यते । चरितानि येषु तानि गीतानि प्रबन्धात्मना रचितानि । दधिनिर्मथने दध्नो निर्मथनं यस्मिंस्तस्मिन्काले इ अद्भुता ईहा । यद्वा प्रकृतिभाव आर्षः । ई इच्छाविषय ईहा चेष्टा येषामिति ते । इष्टदानात्तथेन्दव इति ऋग्भाष्योक्तेः । इच्छा एतज्ज्ञानविषयिणी येषां तैरीहैर्देवतादिभिर्गीतानि तद्बालचरितानि यानि यानि तानि तानीति वा ॥ २ ॥

सुमनोरञ्जनी — इह मया । यानि यानि तस्य श्रीकृष्णस्य । बालचरितानि पूतनासंहरणादीनि । गीतानि त्वां प्रति प्रतिपादितानि तानि, दध्नः निर्मन्थनं यस्मिन् तस्मिन्काले । अगायत चेति ॥ २ ॥

क्षौमं वासः पृथुकटितटे बिभ्रती सूत्रनद्धं
पुत्रस्नेहस्नुतकुचयुगं जातकम्पं च सुभ्रूः ।
रज्ज्वाकर्षश्रमभुजचलत्कङ्कणौ कुण्डले च
स्विन्नं वक्त्रं कबरविगलन्मालती निर्ममन्थ ॥ ३ ॥

सत्यधर्मीया — कबरेति पर्यन्तं बिभ्रतीत्यनेनान्वयः । पृथुकटितटे क्षौमं क्षुमकृमितन्तुनिर्मितं पीताम्बरं वासश्च तदन्तरेकम् । क्षौममट्टे दुकूले स्यादिति विश्वः । वास इति पृथक् सत्त्वात्क्षौमशब्दः क्षुमतन्तुनिर्मितत्वमात्रवाचक इति वा । प्राग्यत्र वासो वासुदेवस्य तस्मिन्कटितट इत्यन्वयो वा । सूत्रं काञ्ची तन्नद्धं बद्धम् । णह बन्धन इति स्मरन्ति । जातकम्पं जातः कम्पो यस्य तत् । पुत्रस्नेहेन स्नुतं स्रवत्क्षीरं कुचयोर्युगम् । रज्वाकर्षश्रमभुजचलत्कङ्कणौ । कङ्कणं करभूषणमित्यमरः । कङ्कणं शेखरे हस्तसूत्रमण्डनयोरपीति विश्वः । कङ्कणे इति सुपठम् । रज्जोराकर्ष आकर्षणं तज्जातः श्रमो ययोस्तौ च तौ भुजौ च । चलती कङ्कणे करभूषणे ययोस्तौ । रज्वाकर्षश्रमभुजौ च तौ चलत्कङ्कणौ चेति विग्रहे न लिङ्गभङ्ग इति ज्ञेयम् । विशेषणस्य परनिपातमात्रं सामयिकमिति न जघन्यम् । कुण्डले कर्णभूषणे । स्विन्नं वक्त्रं च । कबरं केशशाकविशेषयोः कबरमिति विश्वः । केशपाशाद्विगलन्त्यो मालत्यो जातीकुसुमानि । मालती जातिभेदे स्यादिति विश्वः । यस्याः सा सुभ्रूर्दधि ममन्थ ॥ ३ ॥

सुमनोरञ्जनी — तदानीन्तनावस्थां वर्णयति ॥ क्षौममिति । शोभने भ्रुवौ यस्याः सा यशोदा । क्षौमम् । क्षुमः क्रिमिः । तत्तन्तुनिर्मितं वासः । कथंभूतम् । सूत्रनद्धं सूत्रैः पुनर्नद्धं चित्रितम् । सूत्रेण कांचीदाम्ना नद्धं बद्धमिति वा । पुत्रस्नेहेन स्नुतकुचयुगम् स्रवत्पयः पयोधरयुग्मं च बिभ्रती । कीदृशं, जातकंपं जातचलनम् । रज्जोः मन्थनरज्जोः आकर्षेण यः श्रमः स ययोस्तौ च तौ भुजौ च । तयोः चलन्तौ कंकणौ । कुण्डले च कर्णभूषणे अपि । तथा स्विन्नं स्वेदयुक्तं वक्त्रं च बिभ्रती । कबरात्केशपाशाद्विगलंत्यो मालत्यो यस्याः सा तथाविधा भूत्वा निर्ममंथेति ॥ ३ ॥

तां स्तन्यकाम आसाद्य मथ्नन्तीं जननीं हरिः ।
गृहीत्वा दधिमन्थानं न्यषेधत् प्रीतिमावहन् ॥ ४ ॥

सत्यधर्मीया — स्तन्यकामो हरिर्मथ्नन्तीं तां जननीमासाद्य दधिमन्थानं गृहीत्वा प्रीतिमावहन्सन् न्यषेधन्निषिषेधे ॥ ४ ॥

सुमनोरञ्जनी — स्तन्यकामो हरिः दधिमन्थानं दधिमथनदण्डम् । मन्थानो मन्थदण्डक इत्यमरः । मथ्नन्तीं जननीम् । न्यषेधत् । कलवाण्या प्रीतिं आवहन् उत्पादयन् ॥ ४ ॥

तमङ्कमारूढमपाययत् स्तनं स्नेहस्नुतं सस्मितमीक्षती मुखम् ।
अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि त्वधिश्रिते ॥ ५ ॥

सत्यधर्मीया — सस्मितं सहासं मुखमीक्षती ईक्षमाणा स्वयमपि सस्मितमीक्षतीत्यप्यन्वयः । अधिश्रितेऽधिकपाकं प्राप्ते । श्रा पाक इति स्मृतिः । पयसि क्षीरे उत्सिच्यमाने पात्रादुद्रिच्यमाने सत्यतृप्तं क्षीरेण, स्वमुत्सृज्य त्यक्त्वा सा जवेन ययौ । अवरोपयितुं वा जलं स्थापयितुं वा यदा ॥५॥

सुमनोरञ्जनी — सस्मितं मन्दहाससहितं मुखं ईक्षती सती । अङ्कमारूढं सुतं प्रति । स्नेहेन स्नुतं स्तनं अपाययत् । अतृप्तं अलंबुद्धिमप्राप्तम् । अधिश्रिते चुल्लीमारोपिते । पयसि उत्सिच्यमाने उद्रिच्यमाने सति तदवरोपयितुं ययावित्यन्वयः ॥ ५ ॥

सञ्जातकोपः स्फुरितारुणाधरं सन्दश्य दद्भिर्दधिमण्डभाजनम् ।
भित्त्वा मृषाश्रुर्दृषदश्मना रहो जघास हैयङ्गवमन्तरं गतः ॥ ६ ॥

सत्यधर्मीया — तदा सञ्जातकोपः सञ्जातः कोपो यस्य स तथा तत्प्रदर्शकः । स्फुरितारुणाधरं स्फुरितः कम्पमानः प्रकाशमानोऽरुणोऽधरो दन्तवसनं दद्भिः सन्दश्य । मृषाश्रुः त्रिसर्गो मृषेत्येतत्तात्पर्ये । न चातृप्तः प्रवर्तते किन्तु वृथैव । भित्वा मृषाश्रुरितिवदित्युक्तेरहेतुप्रयोजनान्यश्रूणि यस्य स तथा । दुःखमेव कारणं कुतो नेत्यत आह ॥ दृषदिति । लुप्तोपमेयम् । आखणाश्मसम इति शोकः सम्भवी नेति भावः । हरिरपि समयार्हां हानिमस्यै प्रदातुं दृषत्खण्डेनाखण्डयन्मण्डभाण्डमित्याह ॥ अश्मनेति । पाषाणशकलेन दधिमण्डभाजनं मस्तुपूर्णं पात्रम् । दधिमण्डो भवेन्मस्त्विति हलः । भित्वा । मातरि कार्यान्तरव्यापृतायामन्तरमवकाशं गतः प्राप्तो रह एकान्ते हैय्यङ्गवं हैय्यङ्गवीनं नवनीतं जघास । लिट्यन्यतरस्यामित्यादेर्वा घस्लादेशः । जघास जक्षतुर्जक्षुरिति रूपाणि । यद्यपि हियङ्गुरादेशः खञ्सन्नियोगशिष्टस्तथाऽप्यञि परतोऽप्यार्षो ज्ञेयः । यथोक्तं महाभाष्ये कैय्यटादिषु । हैय्यङ्गवीनं संज्ञायां हैयङ्गवीनमिति किं निपात्यते । ह्योगोदोहस्य हियङ्गवादेशसंज्ञायां तस्य विकारो ह्योगोदोहस्य हियङ्ग्वादेशो निपात्यते संज्ञायां विषये तस्य विकार इत्यस्मिन्नर्थे ह्योगोदोहस्य विकारो हैय्यङ्गवीनं घृतम् । संज्ञायामिति किमर्थम् । ह्योगोदोहस्य विकार उदस्विदत्र मा भूदिति । किं निपात्यत इति प्रकृतिसन्देहात्प्रश्नः । ह्योगोदोहस्येति । ह्यःशब्दस्य गोदोहशब्दस्य सुप्सुपेति समासः । दुह्यत इति दोहः क्षीरमुच्यते । ह्यःशब्दः कालप्रत्यासत्तिः प्रतिपाद्यते । तेन विकृतरूपगन्धमेव घृतं हैय्यङ्गवीनमुच्यत इत्याहुरिति कौमुदीकाशिकावृत्त्योर्नवनीतमित्युक्तेर्नवनीतम् । अन्तरङ्गत एकान्ते जघास । अरहो बहिरङ्गे मृषाश्रुरिति वा ॥ ६ ॥

सुमनोरञ्जनी — स्फुरितं प्रचलितं अरुणाधरम् । दद्भिः दन्तैः । संदश्य । दृषदश्मना शिलापुत्रकेण । दधिमण्डो दधिसारः । मण्डः स्यात्सारपिच्छयोरिति विश्वः । तेन पूर्णं भाजनं भित्वा । मृषा वृथा दुःखमन्तरा अश्रु नेत्रजलं यस्य सः । अन्तरं बाह्यदेशं गतः । अंतरं परिधानीये बाह्ये स्वीयेऽन्तरात्मनीति यादवः । हैयङ्गवं ह्यस्तनगोदोहविकारः । ह्योदोहशब्दस्य हियंगुरादेशः । नवनीतमिति यावत् । रहः एकान्ते ॥ ६ ॥

उत्तार्य गोपी सुशृतं पयः पुनः प्रविश्य सन्दृश्य च दध्यमत्रकम् ।
भग्नं विलोक्य स्वसुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती ॥ ७ ॥

सत्यधर्मीया — गोपी सुश्रुतं पयस्तत्पूर्णपात्रमिति यावत् उत्तार्य चुल्लीतोऽवतार्य प्रविश्य मथनस्थानं दध्यमत्रं दधिपात्रं तदेवामत्रकं भग्नं सन्दृश्य दृष्ट्वा । स्वस्य क्षीरोदधिमथकतया पूर्वं दधिमथनमिति तद्भाण्डखण्डनं ततान देव इति ध्वनिः । स्वसुतस्य कर्म तदिति विलोक्य तं च तत्र तत्स्थं न पश्यतीत्यनवलोकयन्ती जहासाहसत् । सन्दृश्य, कर्म च सन्दृश्येत्यन्वये विलोक्यो दर्शनीयो यः स्वसुतस्तस्येति पदमेकमिति मन्तव्यम् । न तत्र न मज्जनरक्षकेति चेत्पश्यती न तथेति न तत्र पश्यतीत्युक्तिरिति वा ॥ ७ ॥

सुमनोरञ्जनी — गोपी यशोदा । सुशृतं सुतप्तम् । पयः उत्तार्य चुल्याः अवरोप्य । मन्थनगृहं प्रविश्य । भग्नं दध्यमत्रकं दधिभाण्डम् । संदृश्य दृष्ट्वा । तत् स्वसुतस्य कर्म इति विलोक्य निश्चित्य । जहास न कुपिता बभूव ॥ ७ ॥

उलूखलाङ्घ्रेरुपरि व्यविस्थितं मर्काय कामं ददतं यथेप्सितम् ।
हैयङ्गवं चौर्यविशङ्कितेक्षणं निरीक्ष्य पश्चात् सुतमागमच्छनैः ॥ ८ ॥

सत्यधर्मीया — उलूखलोत्तानतायामङ्घ्रिस्तदधस्तनप्रदेश उपरि भवति तस्योपरि व्यवस्थितं चौर्येण कृतेन, आर्याऽविचार्य कां चर्यां कुर्याद्वेति विशङ्किते ईक्षणे यस्य तम् । ददौ बिडालाय जनन्यदृष्टस्तदा स्वनीतं नवनीतजातम् । क्षिणोति नूनं धनलोभभाजां धनान्यनर्हत्स्वतिदिश्य देव इति ध्वनयन्नाह । कामं यथास्वेष्टं, यथेप्सितं कर्मादीनामीप्सितमनुसृत्य मर्काय बिडालाय तेभ्यो हैय्यङ्गवं ददन्तं सुतं निरीक्ष्य दूरादालक्ष्य पश्चादिति पृष्ठतः शनैर्मन्दमागमत् आ अगमदगच्छदिति । सिचि स्थितमिति पाठे सिचि सिक्ये स्थितं हैय्यङ्गवमित्यन्वयः ॥ ८ ॥

सुमनोरञ्जनी — उलूखलाङ्घ्रेः परिवर्तितोलूखलस्य । उपरि । मर्काय मार्जाराय कामं अपेक्षितं हैय्यङ्गवं, यथेप्सितं स्वमनोनुसारेण ददतम् । चौर्येण विशंकिते चंचले ईक्षणे यस्यासौ तं सुतम् । निरीक्ष्य । पश्चात् पृष्ठतः । शनैः कङ्कणादिशब्दमकुर्वन्ती ॥ ८ ॥

तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोऽवरुह्याभिससार भीतवत् ।
गोप्यन्वधावन्न यमाप योगिनां क्षमं प्रवेष्टुं तपसेरितं मनः ॥ ९ ॥

सत्यधर्मीया — सत्वरस्त्वरासहितः कृष्णः । आत्ता यष्टिर्यया सा तां प्रसमीक्ष्य । तत उलूखलादवरुह्य भीतवत्सर्वभीषकस्य भीतिर्मातुर्नेति सूचयति वतिः । अभिससार दुद्राव । यं योगिनामजादीनां तपसेरितं प्रेरितं तदासक्ततानीतं मनः प्रवेष्टुं न क्षमं न समर्थमास तमन्वधावत् । अत एव गोपी लोकालोके किमप्यविदुषी वा वीक्ष्यायं पशुपाल इयं पशुपालिकेत्यालपति । गोप एव मूर्खस्तत्पत्नी तु ततोऽपीति वा गोपीति ॥ ९ ॥

सुमनोरञ्जनी — सत्वरः त्वरया सहितः । ततः उलूखलात् । अवरुह्य । अभिससार गतवान् । गोपी तं अनु अनुसृत्य अधावत् । तं गृहीतुमिति शेषः । इदमतीव चित्रमित्याह ॥ यमिति । योगिनां मनोऽपि । तपसा तपः प्रभावेन । ईरितं उपबृंहितं सदपि । यं परमात्मानम् । प्रवेष्टुं विषयीकर्तुम् क्षमं न समर्थं आस तं कराभ्यां ग्रहीतुमन्वधावदिति ॥ ९ ॥

अन्वञ्चमाना जननी बृहच्चलच्छ्रोणीभराक्रान्तगतिः सुमध्यमा ।
जवेन विस्रंसितकेशबन्धनच्युतप्रसूनानुगतिः परामृशत् ॥ १० ॥

सत्यधर्मीया — अन्वञ्चमानान्वञ्चती अनुव्रजन्ती । बृहत्योश्चलत्योः श्रोण्योर्नितम्बयोर्भरेणाक्रान्ता मन्दीभवन्ती गतिर्गमनं यस्याः सा सुमध्यमा । जवेन, केशानां बन्धनं, विस्रंसितं च तत्केशबन्धनं च तस्मात्प्रच्युतानि प्रसूनानि पुष्पाणि धम्मिल्लमुल्लङ्घ्य पुरश्च्युतानि तेषामनुगतिर्यस्याः सा । कृष्णचरणयोः कुसुमार्पणेन प्राप्तिः सत्वरं भविष्यतीतीदमपदेशेन सभाजितवत्यजितचरणद्वन्द्वमिति तं परामृशदिति ध्वनिः । न च चमदकतैवम्भावाविष्करणम् । स्वनिर्माल्यमालानामसमार्पणीयत्वादिति चेत् । कुरुशबरीवरिवश्यां विस्रंसितकेशबन्धनवः । तानि पश्चात्प्रसूनानि यस्याः सा । अनु अनुसृत्य गतिर्यस्याः सा चेति वा । तदनु यात्राऽपि तत्परामर्शहेतुरिति तं परामृशदिति वा । परानुयात्रार्जितपुण्यपात्रेति रुक्मिणीशविजयोक्तेः ॥ १० ॥

सुमनोरञ्जनी — अनु पश्चात् अंचमाना गच्छन्ती । श्रोण्योः कटिपश्चाद्भागयोः भरेण भारेण आक्रान्ता पीडिता मन्दीभूतेति यावत् गतिर्यस्याः सा । सु सूक्ष्मं मध्यमं कटिर्यस्या असौ तथोक्ता ।

जवेन वेगेन विभ्रंशितात् शिथिलात् केशबन्धनात् केशपाशात् च्युतानि यानि प्रसूनानि तेषामनुगतिः तत्कर्तृकानुगमनं यस्याः सा । परामृशत् पस्पर्श ॥ १० ॥

कृतागसं तं प्ररुदन्तमक्षिणी कषन्तमञ्जन्मषिणी स्वपाणिना ।
उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयन्त्यवागुरत् ॥ ११ ॥

सत्यधर्मीया — जननी कृतागसं कृतापराधं प्ररुदन्तम् । अञ्जन्मषिणी अञ्जती सर्वतःप्रसरन्ती मषी कज्जलमनयोरित्यञ्जन्मषिणी । अक्षिणी नयने स्वपाणिना कषन्तं मृजन्तमुद्वीक्षमाणम् । भयेन विह्वलं चञ्चलमीक्षणमवलोकनं यस्य तम् । हस्ते गृहीत्वा । सक्थिनि कर्णे वा महाभाष्यप्रयोगात्प्रयोगाच्च शृङ्गे कर्णे वा गृहीत्वा गामिव नागम इति तत्त्वनिर्णये । हस्ते गृहीत्वेति सम्भवति । विस्तरस्तु भाष्यदीपिकायुक्तिवात्यायामस्मत्कृतायामनुसन्धेयः । भीषयन्ती, सङ्कोचनेन भीत्यस्य, न सर्वभीषकस्य भीषणं सम्भवतीति सूचयति । अपिमाषं मषं नीत्या छन्दश्छेदार्थं लघुर्भिः पाठ्यः । अवागुरत् गूरी उद्यमने दिवादिः पुषादिभ्यः पूर्वतनश्चेति नाङ् विकरणव्यत्ययेन शः । उद्यमवत्यभवत् लङ् ॥ ११ ॥

सुमनोरञ्जनी — कृतागसं कृतापराधम् । अंजन्मषिणी अंजिता मषिः अंजनं ययोस्ते । अक्षिणी नेत्रे । कषन्तं संमर्दयन्तम् । उत् ऊर्ध्वमेव ईक्षमाणम् । भिषयन्ती भीषयन्ती । ह्रस्वश्छान्दसः । अवागुरत् अभर्त्सयत् ॥ ११ ॥

त्यक्त्वा यष्टिं सुतं भीतं विज्ञायार्भकवत्सला ।
इयेष किल तं बन्धुं दाम्नाऽतद्वीर्यकोविदा ॥ १२ ॥

सत्यधर्मीया — अतद्वीर्यकोविदा तद्वीर्याज्ञा तं बन्धुम् । बन्ध बन्धने बन्धिर्युधीत्यनिट्कः । बन्ध बन्धन इति सेट्कः । बद्धुमिति प्रामादिको व्यवहारः ॥ १२ ॥

सुमनोरञ्जनी — सुतवत्सला यशोदा सुतं भीतं विज्ञाय । यष्टिं त्यक्त्वा । दाम्ना पाशेन । अतद्वीर्यकोविदा श्रीकृष्णमहिमानमजानन्ती । तं बद्धुं इयेष इच्छितवती ॥ १२ ॥

न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम् ।
पूर्वापरं बहिश्चान्तर्जगतो यो जगन्मयः ॥ १३ ॥

सत्यधर्मीया — किं तद्वीर्यं यदज्ञेयं राज्ञि! इत्यत आह ॥ न चेति । यस्यान्तरे कोऽपि नियामको न चास्ति बहिरपि महीपत्यादिवन्नास्ति यस्मात्पूर्वमादिभूतं वस्तु नास्ति अपरं च नास्ति । सर्वदैतस्य

सत्त्वादेतदभावदशाभावादपराभाव इति भावः । यः पूर्वमपरं बहिरन्तश्च वर्तत इति जगन्मयो जगत्प्रधान इति कथं व्यापकः पाशमध्येऽयं भवेत्पाशो वा कथं व्यापकः सन्नेनमन्तरा तनुयात्पूर्वापरभागविकलत्वादिति भावः । मयः प्रधान उद्दिष्ट इति तृतीयतात्पर्योक्तेरयं मयशब्दः ॥ ॥ १३ ॥

सुमनोरञ्जनी — तद्वीर्याकोविदत्वमेव प्रपंचयति ॥ न चेति । यस्य श्रीकृष्णाख्यस्य वस्तुनः सकाशात् । इदमन्तः इदं बाह्यमिति विभागो नास्ति । न केवलं देशतः अपि च कालतोऽपि । यस्य यदपेक्षया पूर्वं पूर्वकालीनम् । अपरं अपरकालीनमिति विशेषोऽपि नास्ति । कुतः । यः स्वयमेव जगतो विश्वस्य बहिः बहिर्विद्यमानः अन्तः अन्तर्विद्यमानश्च । व्याप्त इत्यर्थः । तथा पूर्वः पूर्वकालीनः । अपरः अपरकालीनश्च । अनादिनित्य इत्यर्थः । ततश्च व्याप्तत्वात्तदपेक्षया अन्तर्बाह्यमिति, अनादिनित्यत्वात्तदपेक्षया पूर्वमपरं च नास्तीति भावः । इदमपि कुतः । यतो जगन्मयः जगतः स्थावरजंगमात्मकस्य मयः श्रेष्ठः अत इति ॥ १३ ॥

तं मत्वाऽर्भकमव्यक्तं मर्त्यलिङ्गमधोक्षजम् ।
गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा ॥ १४ ॥

सत्यधर्मीया — अव्यक्तं सूक्ष्मतः सूक्ष्मम् । विविधसांसारिकदुःखस्पृष्टं व्यक्तं तन्नेत्यव्यक्तम् । तदव्यक्तमाह हि । अव्यक्तमचलम् । नक्तोषा सेत्यृग्भाष्यादेः । अधोक्षजमधःकृतेन्द्रियज-ज्ञानमिन्द्रियागोचरं प्रसादमन्तरेत्यर्थः । मर्त्यानां लिङ्गं लक्षणमिव लक्षणं यस्य तमर्भकं शिशुं मत्वा प्राकृतं बालं यथा तथा दाम्ना उलूखले गोपिका बबन्ध तं बन्धुमारेभे इत्यर्थः । उलूखल इत्यनेन चोरस्येव तत्सहकारिणोऽपि लोके लोकैः शिक्षणमीक्षितमित्यसाध्य- भागगमस्त्वादिवस्तुग्रहणानु-कूलोलूखलमपि खलं मत्वा गोपी तेन सहैनमपि बबन्धेति प्रेक्षावन्त उत्प्रेक्षयन्ति ॥ १४ ॥

सुमनोरञ्जनी — अव्यक्तं अव्यक्तस्वभावमपि मर्त्यलिङ्गमिव लिङ्गं शरीरं यस्य सः । तं अर्भकं मत्वा बबन्ध ॥ १४ ॥

तद्दाम बध्यमानस्य स्वार्भकस्य कृतागसः ।
द्व्यङ्गुलोनमभूत् तेन सन्दधेऽन्यच्च गोपिका ॥ १५ ॥

सत्यधर्मीया — माधव इदमपदेशेन स्वस्याबध्यतां स्फोरयामासेत्याह ॥ तद्दामेति । यदा कृतागसो बध्यमानस्य स्वार्भकस्य स्वबालकस्य । स्वस्मिन्नर्भका अतीतकल्पे मुक्ता ब्रह्मादिमबालका यस्य स तस्यापीति वा कृतागसं तं किल नैव माता शशाक बद्धुं मम तु प्रतर्कः ।

तदीयरम्योदरमध्यसंस्थविमुक्तशक्त्यैव न बन्ध आसीदित्युत्प्रेक्षाक्षितिरेवं चेदासीदिदं यदमिति मन्तव्यम् । तद्दाम व्यङ्गुलं द्वे अङ्गुली प्रमाणमस्य । मात्रचो द्विगोर्नित्यमिति लुक् । व्यङ्गुलं च तदूनम् । ''तत्पुरुषस्य सङ्ख्याव्ययादेः'' सङ्ख्याव्ययादेरङ्गुल्यं तस्य तत्पुरुषस्य समासान्तोऽच् स्यादिति कौमुद्युक्तेः समासान्तोऽच्प्रत्ययः । तेनोनमिति वा । ऊनं न्यूनमभूत्तदा गोपिका तेन पूर्वदाम्नाऽन्यच्च दाम सन्दधे । व्यङ्गुलन्यूनीकरणं तत्स्वबन्धनाशाशान्त्यर्थम् । बहुन्यूनताप्रदर्शने मत्वा बन्धनमशक्यं माता विरमेदिति रमानाथः एवमचीचरच्चरितमिति ज्ञेयम् ।। १५ ।।

सुमनोरञ्जनी — येन दाम्ना बबन्ध तद्दाम । व्यङ्गुलोनं द्वाभ्यां अङ्गुलिभ्यां ऊनं अपूर्णम् । तेन ऊनेन दाम्ना । अन्यत् दाम सन्दधे ।। १५ ।।

यदाऽऽसीत् तदपि न्यूनं तेनान्यदपि सन्दधे ।
तदपि द्व्यङ्गुलं न्यूनं यद्यदादत्त बन्धनम् ।। १६ ।।

सत्यधर्मीया — व्यङ्गुलमिति अत्राप्यन्वेति । बन्धनं तत्साधनं दाम बन्धनमुद्दिश्य यद्यदादत्त तत्तव्यङ्गुलं न्यूनमभूत् ।। १६ ।।

सुमनोरञ्जनी — तदपि यदा व्यङ्गुलोनमासीत्तदा अन्यत्तदपीत्यादि । बन्धनं बध्यतेऽनेनेति बन्धनं दाम ।। १६ ।।

एवं स्वगेहदामानि यशोदा सन्दधत्यपि ।
गोपीनां सुस्मयन्तीनां स्मयन्ती विस्मिताऽभवत् ।। १७ ।।

सत्यधर्मीया — एवं स्वगेहदामानि । निजेत्याद्यजल्पनेन स्वगेहत्वादिजल्पनेन च सु अगेहदामानि परगृहगतानि दामानीत्यपि सूचयामासेत्यवसेयम् । गोपीनां पार्श्वस्थानां स्मयन्तीनां सतीनां हसन्तीनां स्मयमानानां स्वयमपि स्मयन्ती स्मयमाना । स्म यन्तीति वा एतीति यन्ती पुनः पुनर्गच्छन्त्यागच्छन्तीति वा विस्मिताऽभवत् ।। १७ ।।

सुमनोरञ्जनी — गोपीनां स्मयन्तीनां सतीनाम् । स्वयमपि स्मयन्ती मन्दं हसन्ती । विस्मिता अभवत् ।। १७ ।।

स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रजः ।
दृष्ट्वा परिश्रमं कृष्णः कृपयाऽऽसीत् स्वबन्धने ।। १८ ।।

सत्यधर्मीया — स्विन्नं गात्रं यस्याः सा तस्याः । विस्रस्तकबरस्रजः परिश्रमं श्रान्तिं दृष्ट्वा कृपया स्वबन्धने तद्विषये आसीदनुकूलोऽभूदिति भावः ।। १८ ।।

सुमनोरञ्जनी — विस्रस्ताः गलिताः कबरे बद्धस्रजो यस्याः सा तस्याः । स्वमातुः परिश्रमं दृष्ट्वा । स्वबन्धने आसीत् । अनुकूल इति शेषः । स्वयमेव बद्धोऽभूदिति यावत् ॥ १८ ॥

एवं सन्दर्शिता ह्यङ्ग हरिणा भक्तवश्यता ।
स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥ १९ ॥

सत्यधर्मीया — यस्येदं सेश्वरमीश्वरै रमाब्रह्मादिभिः सहितं विश्वं वशे वर्तते तेन स्ववशेनापि कृष्णेन हरिणा अङ्ग हे राजन् भक्तवश्यतैव दर्शिता ॥ १९ ॥

सुमनोरञ्जनी — इदं भक्तवश्यतालक्षणगुणख्यापनार्थमेवेत्याह ॥ सेश्वरमिदं विश्वं यस्य वशे । तेन स्ववशेनेत्यन्वयः ॥ १९ ॥

नेमं विरिञ्चिर्न भवो न श्रीरप्यङ्गसंश्रया ।
प्रसादं लेभिरे गोप्यो यत् तत् प्राप विमुक्तिदात् ॥ २० ॥

सत्यधर्मीया — गोप्यो यं प्रसादं विमुक्तिदाल्लेभिरे तं प्रसादं तादृशमेवेमं विरिञ्चः पुत्रो नाप भवः पौत्रो नाप । अङ्गसंश्रयाऽङ्गमुरः संश्रय आश्रयो यस्याः साऽपि नाप । तात्पर्यं तु सप्तमनवमोक्तप्रकारेणानुसन्धेयम् । गोपी यत्तदिति पठन्ति । यत्तत् यं तम् । यत्तत्प्रापुर्विमुक्तिदादिति पाठे विरिञ्चो नाप भवो नापाङ्गसंश्रया श्रीरपि नापेत्याहत्य नापुरित्यन्वय इति वदन्ति । केचित्तु लेभिरं स्यादुलूखलमित्यभिधानादुलूखे सतिले नापुरिति च ॥ २० ॥

सुमनोरञ्जनी — विरिञ्चिः ब्रह्मा । भवो रुद्रः । अङ्गे भगवदङ्गे उरसि उत्संगे वा, सम्यक् श्रयत इति तथोक्ता । श्रीरपि इमं प्रसादम् । अत्र लेभिर इति बहुवचनेन एकवचनान्तं पदत्रयं लक्ष्यते । न क्रोधो न च मात्सर्यमितिवत् । तेन नञ् त्रयस्यान्वयः । कोऽयं प्रसादः । विमुक्तिदात् गोप्यो यत् यम् प्रसादं प्रापुः तत् तम् । अथवा विरिंच्यादयो देवाः इमं भगवत्प्रसादं न लेभिर इति न किं तु लेभिरे । परं तु गोपी यं प्रसादं लेभिरे तं न लेभिर इति नञामन्वयो बोध्यः । गोपी प्रापेत्यपि पाठो दृश्यते । तत्पाठे लेभिरं स्यादुलूखलमित्यभिधानात् । लेभिरे उलूखले विषये । गोपी यत् यं प्रसादं प्राप तं इमं विरिञ्चिर्न प्रापेत्यादियोज्यमित्यप्युपदिशन्ति । गोप्यो यत्तत्प्रापेति पाठे न कापि शङ्का । गोप्यो यं प्रसादं लेभिरे प्रापुः तमिमं प्रसादं विरिञ्चिर्न प्राप । भवो न प्रापेत्यादियोजनोपपत्तेः ॥ २० ॥

नायं सुखाप्यो भगवान् देहिनां गोपिकासुतः ।
ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥ २१ ॥

सत्यधर्मीया — भक्तिरेवैनं गमयति भक्तिवशः पुरुष इति श्रुत्यर्थं वदन्नाह ।। नेति । आत्मपोतानां देहाभिमानिनां भगवान् गोपिकासुतः सुखाप्यो न ।। २१ ।।

सुमनोरञ्जनी — भक्तिरेवान्तरङ्गसाधनं भगवत्प्राप्तौ नान्यदित्याह ।। नायमिति । देहिनां संसारिणां षष्ठी कर्तरि । अयं, सुखेन अनायासेन वैराग्यादिभक्त्यंतरसाधनमन्तरा आप्यः प्राप्यो न भवति । किन्तु आत्मैव पोतो येषां तेषाम् । विष्णुपादैकसंश्रयाणामिति यावत् । तेन भक्तिमतां तथा च ज्ञानिनामेवेति । यथा भक्त्यादिमतां आप्यो न तथा साधनांतरेण सुखाप्य इति योजना ।। २१ ।।

कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः ।
अद्राक्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ ।। २२ ।।

सत्यधर्मीया — बद्ध इति तुः सूचयति । मातरि गृहकृत्येषु व्यग्रायां सत्यां पूर्वं धनदात्मजौ गुह्यकौ । इदानीमर्जुनौ अर्जुनः ककुभे पार्श्वे इति विश्वः । ककुभवृक्षौ मत्तीत्यपभ्रष्टभाषा । अद्राक्षीत् । ।। २२ ।।

सुमनोरञ्जनी — मातरि यशोदायां गृहकर्मसु व्यग्रायां आसक्तायाम् । पूर्वं पूर्वजन्मनि गुह्यकौ इदानीं अर्जुनौ अर्जुनवृक्षरूपौ ।। २२ ।।

पुरा नारदशापात् तौ वृक्षतां प्रापितौ मदात् ।
नलकूबरमणिग्रीवाविति ख्यातौ श्रियाऽन्वितौ ।। २३ ।।

इति श्रीमद्भागवते दशमस्कन्धे दशमोऽध्यायः।

सत्यधर्मीया — तौ जातौ वृक्षौ कुत इत्यत आह ।। पुरेति । नलकूबरमणिग्रीवावित्याख्यातौ श्रियाऽन्वितौ मदात्पुरा नारदशापाद्वृक्षतामर्जुनवृक्षतां प्रापितौ । एकेनाक्षरेणेत्यादेरेकवर्णाधिक्यं न दोषाय ।। २३ ।।

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे दशमोऽध्यायः ।। १०-१० ।।

सुमनोरञ्जनी — कस्माद्वृक्षतां प्राप्तौ किं नामकौ पूर्वमित्यत आह ।। पुरेति । श्रियान्विताविति मदोपपादकम् ।। २३ ।।

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां दशमोऽध्यायः ।। १०-१० ।।

॥ अथ एकादशोऽध्यायः ॥

राजोवाच -

कथ्यतां भगवन्नेतत्तयोः शापस्य कारणम् ।
यत् तद् विगर्हितं कर्म येन देवऋषेस्तमः ॥ १ ॥

सत्यधर्मीया — ॥ किं मदादिमौ चक्रतुः कुपितश्च शापमदान्नारदो येन तदादितो वदेति परीक्षित्पृच्छतीत्याह ॥ राजेति । एतत्तयोरिति पदमेकम् । एतौ वृक्षात्मकौ तौ चेत्येतत्तौ । तयोः शापस्य कारणं यद्विगर्हितं कर्म तत्कथ्यतामित्यन्वयः । तत्कर्मज्ञानेन देवऋषेः । ऋत्यक इति प्रकृतिभावः । तमस्तत्कार्यं कोपोऽभूत् । यद्विगर्हितं न गर्हितं च श्रीकृष्णकृतमोचनकारणं किं च कथ्यतामित्यप्यन्वयः । एतीति यत्तमो येन देवऋषेः प्राप्तं तम इति येन तदित्यन्वयः । येनेति वा यदिति वाऽतिरिक्तमिति मन्तव्यम् ॥ १ ॥

सुमनोरञ्जनी — हे भगवन् ! एतत् कथ्यताम् । किं तत् । तयोः नलकूबरमणिग्रीवयोः शापस्य कारणम् । नारदस्य स्वाभाविकः कोप एवेति चेत् । देवऋषेः । अनेन सत्त्वैकस्वभावता प्रकटिता । तथाविधस्य नारदस्य । तमः तमोगुणकार्यक्रोधोऽपि येन केन निमित्तेन कोपकारणं ताभ्यां कृतम् । विगर्हितं कर्मैव चेत्तत् तदपि यत् यज्जातीयं स्यात् । येन कर्मणा देवऋषेर्निमित्तात् । तच्छापादिति यावत् । तमः तमःकार्यस्थावरजन्म अभूत् ॥ १ ॥

श्रीशुक उवाच -

रुद्रस्यानुचरौ भूत्वा सुदृप्तौ धनदात्मजौ ।
कैलासोपवने रम्ये मन्दाकिन्यां मदोत्कटौ ॥ २ ॥

सत्यधर्मीया — औत्तरेयप्रश्नमुत्तरयति ॥ श्रीशुक इति । अनुचरौ भृत्यौ पूर्वमसुदृप्तौ अनन्तरं मदोत्कटौ उत्कटमदावित्यर्थः । कैलासोपवने मन्दाकिन्यां वियद्गङ्गायाम् ॥ २ ॥

सुमनोरञ्जनी — सुदृप्तौ अतीव मत्तौ । धनदस्य कुबेरस्यात्मजौ । मन्दाकिन्यां मन्दाकिनीतीरस्थे । सामीपकाधिकरणे सप्तमी । वटे गाव इतिवत् । मदेन उत्कटौ उत्कृष्टौ उत्कटमदोपेतौ ॥२॥

वारुणीं मदिरां पीत्वा मदाघूर्णितलोचनौ ।
स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने ॥ ३ ॥

सत्यधर्मीया — वारुर्णी वरुणजां मदिरां पीत्वा मदेन स्वाभाविकेने वा स्वाभाविकेनापि घूर्णिते लोचने ययोस्तौ । अनुगायद्भिः स्त्रीजनैः सह । पुष्पिते तारकादिः ।। ३ ।।

सुमनोरञ्जनी — तत्र निमित्तान्तरमाह । वारुर्णी वरुणाज्जाताम् । मदाघूर्णितलौचनौ मदेन आघूर्णिते भ्रामिते लोचने यस्य स च स च तौ । घूर्णितः प्रचलायितः इत्यमरः । पुष्पिते, पुष्पाण्यस्य संजातानीति पुष्पितम् । तादृशे वने भजनीये शुकपिकादिना युक्ते वा । वन षण संभक्तौ । ष्टन वनशब्द इति च धातुव्याख्यानात् । कैलासस्य उपवने चेरतुरित्यन्वयः ।। ३ ।।

अन्तः प्रविश्य गङ्गायामम्भोजवनराजिनि ।
चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः ।। ४ ।।

सत्यधर्मीया — गङ्गायां तत्राप्यन्तः । कथंभूतेऽन्तः । अम्भोजवनराजिनि अम्भोजानां वनानि तेषां राजिरस्मिन्निति । अम्भोजानां वनानामुदकानां वा राजिरस्मिन्निति वा । अम्भोजवनै राजत इति राजि णिनिः । तस्मिन्निति वा । कथम्भूतायां गङ्गायाम् । अम्भोजवनराजि अम्भोजैर्वनै राजत इति राट् तस्याम् । नीत्युपसर्गस्य चिक्रीडतुर्निचिक्रीडतुरित्यन्वयः । नियेन मुक्तिहत्ययैन्द्रसानसिं रयमित्यादिवत् । करेणुभिर्बह्वीभिर्गजाविव ।। ४ ।।

सुमनोरञ्जनी — गङ्गायां अन्तः मध्यदेशे । कथंभूते । अम्भोजवनानि राजन्तेऽस्मिन्निति तथोक्ते । अम्भोजवनराजयो विद्यन्तेऽस्मिन्निति वा तथोक्ते ।। ४ ।।

यदृच्छया च देवर्षिर्भगवांस्तत्र कौरव ।
अपश्यन्नारदो देवौ क्षीबाणौ समबुध्यत ।। ५ ।।

सत्यधर्मीया — क्षीबाणौ मत्तौ । यद्यपि मत्ते शौण्डोत्कटक्षीबा इत्यमरेऽकारान्तः क्षीबशब्दः श्रूयते । क्षीबृ मदे अकर्मकत्वात्कर्तरि क्तः अनुपसर्गात्फुल्लक्षीबकृशोल्लाघा इति निपातितः शब्दः । तथाप्युणादयो बहुलमित्युक्तेः कनिप्रत्यये अट्कुप्वाङिति णत्वे क्षीबाणाविति ज्ञेयम् । यद्वाऽण-तोऽभिमुखमागच्छत इत्याणौ क्षीबौ च तावाणौ च ताविति शब्दापयन्ताविति वा । समबुध्यत व्यज्ञासीत् ।। ५ ।।

सुमनोरञ्जनी — तत्र आगतः सन् । अपश्यत् । दृष्ट्वा च, क्षीबाणौ मत्तौ । समबुध्यत ज्ञातवान् ।। ५ ।।

तं दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशङ्किताः ।
वासांसि पर्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ ॥ ६ ॥

सत्यधर्मीया — तं नारदम् । विवस्त्रा इति शापशङ्किता देव्यो वासांसि स्वानि स्वानि पर्यधुरधारयन् । विवस्त्रौ गुह्यकौ न पर्यधत्तां मत्तत्वात् ॥ ६ ॥

सुमनोरञ्जनी — तं नारदम् । देव्यः देवस्त्रियः व्रीडिताः शापशङ्किताश्च । वासांसि पर्यधुः परिवेष्टितवत्यः । तौ गुह्यकौ तु न परिवेष्टितवन्तौ बभूवतुरिति सम्बन्धः ॥ ६ ॥

तौ दृष्ट्वा मदिरामत्तौ श्रीमदान्धौ सुरात्मजौ ।
तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ॥ ७ ॥

सत्यधर्मीया — सुरात्मजावित्यनुग्रहार्थाय शापं दास्यन्नारद इदं वक्ष्यमाणं जगौ ॥ ७ ॥

सुमनोरञ्जनी — सुरात्मजाविति कुलीनताप्रयुक्तमदो दर्शितः । तत एव श्रीमदान्धौ । तत्रापि मदिरामत्तौ मदिरया मद्येन मत्तौ । अनुग्रहः मदनाशेन श्रीकृष्णे भक्त्यभिव्यक्तिप्रयोजकप्रसादरूपः । इदं वक्ष्यमाणम् ॥ ७ ॥

नारद उवाच -
न ह्यन्यो जुषतो जोष्याद् बुद्धिभ्रंशो रजोगुणः ।
श्रीमदादभिजात्यादेर्यत्र स्त्रीद्यूतमासवः ॥ ८ ॥

सत्यधर्मीया — नारदः किं जगावित्यत आह ॥ न हीति । विषयं जुषतः सेवसानस्य जोष्याद्विषयजातात् । श्रीमदात्तथाऽभिजात्या जातात् । आदिपदेन विद्यादिमदाच्च । अन्यो रजोगुणो रजसो गुणो रागे विकारस्तत्स्पृहारूपः । अगुण इत्यगुणापरपर्यायो दोष इति यावत् न ह्यस्ति । तत्कार्यमाह ॥ बुद्धिभ्रंश इति । बुद्धेः सन्मतेर्भ्रंशो येन सः । विषयादिकाङ्क्षणमेव ज्ञानहानिदमिति भावः । बुद्धिभ्रंशेनैतदादिसक्तिरिति तत्राप्येतयोः स्वदृष्टा यत्कृता नष्टिस्तामादितो गृहीत्वाऽऽह ॥ यत्रेति । यत्र बुद्धिभ्रंशे जाते स्त्री एवं तरुणीपरवशता द्यूतासक्तिरासवो मद्यं चेति तदासक्तिरपि भवति। हिरवधारणे । नास्त्येवेति वा । स्त्र्याद्यासक्तिर्भवत्येवेति वाऽन्वयः । आसवमिति पाठेऽसूनामिदमासवं प्राणतर्पकं मद्यपानादिकमित्यर्थः । आसवो यज्ञ इत्यप्यान्तरङ्गिकोऽपि भावो देवर्षेः । अन्यथा हन्यन्ते पशव इति तत्पुरस्करणं न स्यादिति वर्णयाञ्चक्रुः ॥ ८ ॥

सुमनोरञ्जनी — वस्तुतोऽजोष्यान् असेव्यान् विषयान् जुषतः सेवमानस्य पुंसः । श्रीमदात्, अभिजात्यादेः सत्कुलविद्यादेः मदादिबुध्या विविच्यान्वेतव्यम् । तथा च श्रीमदादेस्तमोगुणकार्यादन्यः रजोगुणः बुद्धिभ्रंशः बुद्धिं भ्रंशयतीति तथोक्तः । बुद्धिभ्रंशकारणमित्यर्थः । न भवति । इत्थं च तद्गुण एव श्रीमदादिद्वारा बुद्धिभ्रंशकारणमिति भावः । कुतस्तमोगुणकार्यत्वं श्रीमदादेरित्यत उक्तम् ॥ यत्रेति । यत्र श्रीमदादिषु सत्सु स्त्री, द्यूतम्, आसवः मद्यं चेत्येतत्त्रयं अजोष्यमपि जोष्यमासीदित्यर्थः । न ह्येतत्सेवनमतामसानां संभवतीति भावः । अजोष्यादिति पञ्चम्यंतपाठो बहुपुस्तकेषु दृश्यते । तत्रैवं योजना । जुषतः विषयान् सेवमानस्य पुंसः यो बुद्धिभ्रंशः बुद्धिभ्रंशकारणम् । अतः अजोष्यात् प्रेक्षावद्भिः असेव्यात् विषयात् । जोष्यात् ग्राम्यैः सेव्यादिति वा । श्रीमदादभिजात्यादेर्मदाच्चान्यः रजोगुणः । अन्यत् रजोगुणकार्यं न भवति । रजोगुणकार्यं श्रीमदादिकमेव बुद्धिभ्रंशकारणमिति भावः । कुतो विषयस्य बुद्धिभ्रंशकारणत्वमित्यत उक्तम् ॥ यत्रेति । यत्र येषु विषयेषु स्त्रीद्यूतमासवं चेत्येतत्त्रयं यतोऽन्तर्भवति अत इति ॥ ८ ॥

हन्यन्ते पशवो यत्र निर्दयैरजितात्मभिः ।
मन्यमानैरिमं देहमजरामृत्यु नश्वरम् ॥ ९ ॥

सत्यधर्मीया — यत्र बुद्धावनध्वनीनायाम् । अजितात्मभिरजितोऽवशीकृत आत्मा मनो येषां तैर्निर्दयैः पशवो हन्यन्ते । कुत इत्यतो मांसलताया इत्याह ॥ मन्यमानैरिति । इमं नश्वरं देहमजरामृत्यु जरामरणरहितं यथा तथा मन्यमानैरिति केचित् । नश्वरमिति भावप्रधानः । जरामृत्युनश्वरताशून्यं मन्यमानैरिति वा । नश्वरम् इमम् इः काम्यो विषयादीष्टं तस्य मा निषेधोऽभाव इति यावत् । यस्य तद्देहमजरामृत्यु तद्रहितं मन्यमानैरिति वा । कायो देहः क्लिबपुंसोरित्यमरः । अतो न नञर्थभेदानुपपत्तिरिति मन्तव्यम् । इष्टदानात्तथेन्दव इत्यृग्भाष्यटीकादिभ्यो विशेषोऽवसेयः । नायमिदंशब्दः किन्त्विमशब्दोऽकारान्तः ॥ ९ ॥

सुमनोरञ्जनी — प्रकारान्तरेणापि बुद्धिभ्रंशकत्वं श्रीमदादेरुपपादयति ॥ हन्यन्त इति ॥ यत्रेति । यत्र येषु श्रीमदादिषु सत्सु । इदानीं देवसंज्ञितम् । नृदेवभूदेवादिसंज्ञया व्यवऱ्हीयमाणमपि अन्ते कृमिसंज्ञितम् । श्वसूकरादिभक्षणे विट् संज्ञितम् । दग्धे तु भस्मसंज्ञितम् । एतादृशं नश्वरमपीमं देहम् । अजरामृत्यु यथा भवति तथा मन्यमानैः स्वसौख्याय पशवो हन्यन्त इति योजना । एवं भूतध्रुक् भूतानां प्राणिनां द्रोग्धा । स्वार्थं स्वस्य सुखावस्त्यादिप्रयोजनार्थम् । कुरुते परस्वापहरणादिकं कुरुते । परंतु सः स्वार्थं किं वेद किं जानाति,किमनुभवतीत्यर्थः । कुतः । यत इत्यावर्तते । यतो यस्मात् यतो भूतद्रोहात् निरय एव भवति । अत इत्यर्थः ॥ ९,१० ॥

देवसंज्ञितमप्यन्ते कृमिविड्भस्मसंज्ञितम् ।
भूतध्रुक् कुरुते स्वार्थं किं वेद निरयो यतः ॥ १० ॥

सत्यधर्मीया — नश्वरस्यास्यैवं दुःखस्येत्यप्याह ॥ देवेति । आदौ देव नृदेव भूदेवसंज्ञितमन्ते अदाहे श्वश्वापदाद्यदने विट्संज्ञितम् । तथैव यत्र क्वचन पाते कृमिसंज्ञितम् । दग्धं चेद्भस्मसंज्ञोपेतम् । याज्ञियपशुवदिदं पशुविशसनं नेति शंसति ॥ भूतध्रुगिति । यः कुरुते तद्धननमिति शेषः । य एवं भूतध्रुग्भूतेभ्यः स्वहिंस्योभ्यो द्रुह्यति स तथा स स्वार्थं वेद किं, न वेद । वेद चेदेवं न कुर्यात् । किं तेन भवदनिष्टमित्यत आह ॥ निरयो यत इति । यतो भूतघातान्निरयो नरकाद्यनर्थप्राप्तिरिति न स वेदेति भावः । न चाप्रामाणिकोऽयं कार्यकारणभाव इत्यप्यावेदयति ॥ वेदनिरय इति । वेद वेदितश्चासौ निरयो नरकादिः । यतो यस्मात् । वेदनिरयो नितरां वेदैरयो ज्ञापनम् । अयतेर्गत्यर्थत्वाज्ज्ञानार्थताऽन्तर्णीतण्यर्थता चेति ज्ञेयम् । यतोऽस्मि तत इति वा । स केन कथं वृथा भूतघातरूपं कर्म करोतीत्यतोऽप्याह ॥ कुरुत इति । कुत्सिते रुते नानादुःसमयरूपे शब्दे सति स तदनुरोधेन करोति । निर्गतो गमनमयोऽपि प्रत्यावृत्तिर्यस्मात्स तमोलोको यतो भवति तद्भूतध्रुक् । एको विष्णुर्महद्भूतमित्यादेरीश्वरोऽहमहं भोगीत्यादेरेवम्भूतभगवद्द्रोही न वेदेत्यपि विवृण्वन्ति ॥१०॥

देहः किमन्नदातुः स्यान्निषेक्तुर्मातुरेव वा ।
मातुः पितुर्वा विक्रेतुर्बलिनोऽग्नेः शुनोऽपि वा ॥ ११ ॥

सत्यधर्मीया — अनिर्णीतैतदादित्वके काये कियानयमहो मोह इति द्वाभ्यामाह ॥ देह इति । देहः किमन्नदातुः स्यात् । किंशब्दो विकल्पार्थः । सर्वापेक्षया विनाऽन्नं सद्यस्तनस्यापि न जीवनमिति तद्दातुरुक्तिरादाविति ज्ञेयम् । पितुर्मातुरित्युक्तौ मातृपूर्वभाषणं माता पूर्वरूपमित्यादेर्माता गरीयसीति कौसल्योक्तेश्च कर्तव्यं पितुः कुतः प्रागुक्तिरिति शङ्का नोत्तरितान्तरङ्गतः स्यादिति निषेक्तुरित्युक्तिः । एतेन निषेकात्पूर्वं मासत्रितयं वासः प्राथमिकस्तत्रेति प्रथमं तदुक्तिरिति युक्तिः सूचितेति ज्ञेयम् । मातृगरीयस्त्ववाद एकोपाधिकपित्रपेक्षया । यदि विद्याद्यनुबन्धोऽपि तस्मिन्वर्तेत तर्हि स मातुरपि गरीयानित्येवमुक्तिर्वा । उक्तं च मोक्षधर्मे पाराशरगीतायाम् । पिता परं दैवतं मानवानां मातुर्विशिष्टं पितरं वदन्ति । ज्ञानस्य लाभमित्यादि । मातुःपितुर्मातामहस्य । मातामहस्येति शक्य एवं निर्देशेनासङ्गृहीतसङ्ग्राह्यता, मातुर्भ्रातुराचार्यस्य पितुः पालकजनकस्य पुत्रिकापुत्रत्वेन स्वीकुर्वतो मातामहस्येत्यपि पराकृतेति ज्ञेयम् । ननु पूर्वं जनन्या इत्यनुक्तेरुक्तेश्च मातुरिति तेनैव विवक्षिताक्षतेर्मातामहस्येति भाषणं भूषणमिति चेत् । प्रौढोऽसि । कृतं परिखोड्डीनं परन्तु व्यत्यस्तवितस्तिजातं पालकपितुरलाभात्तत्र तदतन्त्रतापत्तेश्चेत्थमुक्तिरित्यवेहि । विक्रेतुर्वेतनादि-वितरणेन विक्रयकर्तुर्बलिनो बलिष्ठस्य निग्रहीतुरग्नेर्दाहेऽदाहे शुनस्तदादेः ॥ ११ ॥

सुमनोरञ्जनी — किं च यं देहमात्मीयत्वेन ज्ञात्वा प्राणिहिंसां करोति तज्ज्ञानमपि बुद्धिभ्रंशमूलकमेव । तस्यात्मीयत्वाभावादित्याह ।। देह इति । अन्नदातुः अन्नदानादिना पोषयितुः । स्थितौ स्वाधीनत्वाभिमानात् । निषेक्तुः गर्भाधानकर्तुः उत्पत्तौ तथाभिमानात् । मातुः गर्भधारणादिना तदुत्पत्तौ सहकारित्वाभिमानात् । उपलक्षणमेतत् । पितुः पितुरित्यपि ग्राह्यम् । मातुःपितुः मातामहस्य । उभयोरप्यदृष्टजन्यत्वाद्वा । तयोरपि परंपरया तथात्वात् । बलिनः बलात्कारेण विष्टिगृहीतुः तस्य यथेष्टविनियोज्यत्वाभिमानात् । क्रेतुः क्रयेण गृहीतुः । तस्यापि तथाभिमानात् । इदं जीवनदशायाम् । अन्यदा तु । अग्नेः भस्मीकरणादौ अधीनत्वाभिमानात् । शुनः सारमेयस्य । स्वोपभोग्यत्वेन स्वादृष्टजन्यत्वाभिमतेः ।। ११ ।।

एवं साधारणं देहमव्यक्तप्रभवाप्ययम् ।
को विद्वानात्मसात् कृत्वा हन्ति जन्तून् ऋतेऽसतः ।। १२ ।।

सत्यधर्मीया — एवमुक्तप्रकारेणान्नदात्रादिस्वातन्त्र्योपेतमिति साधारणं देहमव्यक्तप्रभवाप्ययमव्यक्तात्प्रकृतेः प्रभव उत्पत्तिरप्ययोऽपि तदन्तर्निवेशश्च यस्य स तम् ।

'अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत । अव्यक्तनिधनान्येव तत्र का परिवेदना' इत्यादेः । यद्वाऽव्यक्तोऽस्पष्टमधश्चेत्यज्ञातौ प्रभवोऽप्ययश्च यस्य स तम् । को विद्वानात्मसात्कृत्वा स्वाधीनं कृत्वाऽसतो ऋते विना जन्तूननागस्कारिणो जनान्हन्ति घातयति । अन्यारादितरर्त इत्यसत इति पञ्चमी द्वितीयाबहुवचनं वा । ज्ञानसूर्यमृते, विना वातं, विना वर्षमित्याद्युदाहृत्य प्रोक्तं स्कन्धान्तरेऽनुसन्धेयम् । सातिस्तु तदधीनवचन इत्यनेन वा विभाषा सातिकात्स्न्र्ये इत्यनेन वा स्वाधीनं कृत्वाऽऽत्मानं कृत्वेत्यर्थक इति मन्तव्यम् ।। १२ ।।

सुमनोरञ्जनी — एवंप्रकारेण साधारणम् अन्नादात्रादिभिः स्वीयत्वेन अभिमन्तुं योग्यम् । वस्तुगत्या तु अव्यक्तात्प्रकृतेरुपादानात् तदधिष्ठितहरेर्निमित्तात् प्रभवः उत्पत्तिः अव्यक्तेऽप्ययः प्रलयो यस्य तं भगवदेकाधीनम् । आत्मसात् आत्मीयत्वेन कृत्वा । अविद्वानपि । असतः तामसात् ऋते कः जन्तून् हन्ति । विद्वांस्तु न कोऽपीत्यर्थः । सतः निरपराधिनः जन्तून् को हन्तीति वा ।। १२ ।।

मन्यमानैरिमं देहमजरामृत्यु नश्वरम् ।
देवसंज्ञितमप्यन्ते कृमिविट्भस्मसंज्ञितम् ।। १३ ।।

सत्यधर्मीया — इतःपरं श्रूयमाणो मन्यमानैरिमं देहमित्यादिः श्लोकः पुनर्लेखकप्रमादतो लिखित इति मन्तव्यम् । व्याकृतचरश्च ।। १३ ।।

सुमनोरञ्जनी — प्रागुक्तं स्मारयति ।। मन्यमानैरिति । यद्वा इमं देहम् अजरामृत्युनश्वरं मन्यमानैः ऋते । सतो निरपराधिनः जन्तून् को हंति । देहं तथाविधं मन्यमाना एव घ्नन्ति नान्य इत्यर्थ इति पूर्वश्लोकेनान्वयः ।। १३ ।।

असतः श्रीमदान्धस्य दारिद्र्यं परमञ्जनम् ।
आत्मौपम्येन भूतानि दरिद्रः परमीक्षते ।। १४ ।।

सत्यधर्मीया — असतो ऋत इति प्रागभिहितं तदुद्धृतिरपि कथमित्यत आह ।। असत इति । श्रीमदान्धस्यासतो हननकर्तुर्जनस्य परमञ्जनं महौषधम् । तत्किं रूपमित्यत आह ।। दारिद्र्यमिति । कुतस्तदान्ध्यौषधमित्यतस्तद्भद्भाविभावमावेदयति ।। आत्मौपम्येनेति । दरिद्रो भूतान्यात्मौपम्येनोपमाया भाव औपम्यमात्मनाऽऽत्मनो वौपम्यं साम्यं तेन भूतानि परं केवलं समीक्षते तद्धननं न करोतीत्यर्थः । अतो दारिद्र्यं परमञ्जनम् । परमाञ्जनमित्यपि निरञ्जनः पाठः ।। १४ ।।

सुमनोरञ्जनी — एवं श्रीमदकार्यमुक्त्वा तत्प्रतीकारं वदति ।। असत इति । परं श्रेष्ठम् । कथमंजनसाम्यं दारिद्र्यस्येति तत्राह ।। आत्मेति । आत्मौपम्येन आत्मसाम्येन । भूतानि प्राणिनः । तेन न द्रुह्यतीति भावः ।। १४ ।।

यथा कण्टकविद्धाङ्गो जन्तोर्नेच्छति तां व्यथाम् ।
जीवसाम्यं गतो लिङ्गैर्न तथाऽविद्धकण्टकः ।। १५ ।।

सत्यधर्मीया — अत्र दृष्टान्तमाचष्टे ।। यथेति । कण्टकैर्विद्धमङ्गं यस्य सः । जीवसाम्यं गतः स्वेतरेषामप्येतदादिना न मद्वत्स्वेदो भवेदिति स्वसाम्यज्ञानवान् जन्तोः स्वेतरस्य तल्लिङ्गैर्मुखम्लानादिरूपैस्तां व्यथां कण्टकवेधजनितां यथा नेच्छति न भवत्वस्यापि सा व्यथेतीच्छति तथाऽविद्धकण्टकोऽतद्वेधबोधोऽविद्धः कण्टकेनाविद्धः कण्टकोऽयं स इति वा न नेच्छति ।।१५ ।।

सुमनोरञ्जनी — तत्र दृष्टान्तमाह ।। यथेति । तां कण्टकवेधजनिताम् । व्यथां व्यसनम् । जन्तोः स्वव्यतिरिक्तस्य । लिङ्गैः व्यसनचिह्नैः मुखग्लान्यादिभिः । जीवानां साम्यं दुःखादिना स्वसाम्यं गतो ज्ञाता सन् । अविद्धकण्टकस्तु तथा सर्वत्र स्वसाम्यज्ञोऽन्येषां व्यसनानिच्छुश्च न भवति ।।१५।।

दरिद्रो निरहंस्तम्भो मुक्तः सर्वमदैरिह ।
कृच्छ्रं यदृच्छयाऽप्नोति तद्धि तस्य परं तपः ।। १६ ।।

सत्यधर्मीया — ननु दरिद्राणामपि गाधेतरखेददर्शनात्कथं दारिद्र्यं परमं सुखमित्युच्यत इत्यत आह ।। दरिद्र इति । अहङ्कारकारणकस्तम्भो न विद्यते यस्य । निर्गतस्तस्मादिति वा । सर्वमदैः पुरोदीरितधनाभिजनविद्याद्युपजनैर्मुक्तो विमुक्तो यदृच्छया भगवदिच्छया कृच्छ्रं कष्टं कर्तृ व्याध्यादिजं वाऽऽप्नोति तदेतदस्य दरिद्रस्य परं तपस्तद्रूपमेव खेदरूपं नेत्यर्थः । हिश्च सर्वमदैर्मुक्तताप्राप्तित्ये कृच्छ्रतपस्त्वप्राप्तिप्रामित्ये चेति ज्ञेयम् । एतद्वै परमं तपो यद्व्याधितस्तप्यत इति श्रुतिर्हिशब्दगृहीता । यदृच्छया यो दरिद्रः कष्टमाप्नोति तदस्य परं तप इत्यन्वयो वा ।। १६ ।।

सुमनोरञ्जनी — ननु दुःखानुभवरूपदारिद्र्यं कथमन्येषामिच्छसि । 'ऋषयः करुणाः सदा । सुखमिच्छन्ति भूतानां प्रायो दुःखासहा नृणाम्' इत्युक्तर्षिलक्षणहान्यापत्तेरित्यतो न दारिद्र्यदुःख-मनिष्टं किंतु परमानन्दरूपमोक्षसाधनत्वान्न तदिच्छा मम विरुध्यत इत्याह ।। दरिद्र इति । निर्गतः अहंस्तंभः अहंकारेण स्तब्धता यस्यासौ तथोक्तः । सर्वमदैर्मुक्तो भवति । तत्कारणाहंकाराभावात् । परन्तु यदृच्छया दैवेच्छया । यत्कृच्छ्रं कष्टं आप्नोति तत्परं तप एवेत्यनुसंहितं सत् तप एव भवतीति भावः ।

व्याधींश्छवहर्तींश्चैव शवदाहादिकं तथा ।

विष्णवे तप इत्येव चिन्तयन्याति तत्पदम् ।। इति प्रसिद्धिं सूचयति हिशब्देन ।। १६ ।।

नित्यं क्षुत्क्षामदेहस्य दरिद्रस्यान्नकाङ्क्षिणः ।
इन्द्रियाण्यनु शुष्यन्ति हिंसाऽपि विनिवर्तते ।। १७ ।।

सत्यधर्मीया — कथं तत्तपोरूपं भवतीत्यतस्त्रिभिराह ।। नित्यमिति । क्षुधा क्षामः कृशः देहः कायो यस्य स तस्य । अन्नं काङ्क्षतीत्यन्नकाङ्क्षी तस्य । दरिद्रस्यानु क्षामतामनु इन्द्रियाणि शुष्यन्ति असत्सु विषयेषु न प्रसरन्ति । तल्लौल्यमूला हिंसाऽपि विनिवर्तते ।। १७ ।।

सुमनोरञ्जनी — दुःखानुभवमात्रं कथं तपो भवेदित्यत इन्द्रियनिग्रहरूपमोक्षोपयोगि गुणान्तरमप्यनेनैव सिध्यतीत्याह ।। नित्यमिति । क्षुधा क्षामः कृशो देहो यस्य तस्य । तत्र हेतुरन्नकांक्षिण इत्यादि । अनुशुष्यन्ति देहशोषमनुसृत्य शुष्यन्ति । हिंसापि विनिवर्तते । अदृढदेहेंद्रियत्वात् ।। १७ ।।

दरिद्रस्यैव युज्यन्ते साधवः समदर्शिनः ।
सद्भिः क्षिणोति तत्तर्षं तत आराद्धि सिध्यति ।। १८ ।।

सत्यधर्मीया — समदर्शिनो निर्दोषब्रह्मदर्शिनः । निर्दोषं हि समं ब्रह्मेत्यादेः । सर्वत्र भगवानस्तीति समदर्शिनः साधवो युज्यन्ते तत्सहवासो भवति तस्येति भावः । समदर्शिन इत्येतत् षष्ठ्यन्तं सत् दरिद्रविशेषणं वा । सद्भिः सङ्गैस्तत्तर्षं विषयकामं क्षिणोति नाशयति । ततस्तर्षापकर्षादारात्क्षिप्रं सिध्यति संसिद्धो भवति । आराद्दूरसमीपयोरित्यमरः ॥ १८ ॥

सुमनोरञ्जनी — समदर्शिनः साधवः युज्यन्ते । सत्समागमो भवतीत्यर्थः । सद्भिः सद्गुरूपदेशैरिति यावत् । तत्तर्षं तेषु विषयेषु तृष्णाम् । क्षिणोति । ततः विषयवितृष्णतालक्षण-वैराग्यानन्तरम् । आरात् शीघ्रमेव । भक्त्युपासनाजनितापरोक्षज्ञानेन सिध्यति मुक्तो भवतीति भावः ॥ ॥ १८ ॥

साधूनां समचित्तानां मुकुन्दचरणैषिणाम् ।
उपेक्ष्यैः किं धनस्तम्भैरसद्भिरसदाश्रयैः ॥ १९ ॥

सत्यधर्मीया — साधवोऽपि धनिकैः एव प्रायेण प्रीयन्त इति तत्राह ॥ साधूनामिति । मुकुन्दचरणैषिणां मुकुन्दचरणाविच्छन्ति अपेक्षन्त इति ते तथा । तेषामिषेच्छा येषामस्ति तेषामिति वा तेषामुपेक्ष्यैः । कृत्यानां कर्तरि वेति स्मरणात् षष्ठी । असदाश्रयैरसन्त एवाश्रयो येषां ते तैः । स्वतोऽसद्भिरमङ्गलैः । असन्तोऽसमर्था आश्रयो येषां त इति वा । समर्थं सदिति प्रोक्तमसमर्थ-मसन्मतमित्येकादशतात्पर्योक्तेः । धनस्तम्भैस्तदादीनां मदैस्तज्जातमदैरिति यावत् । किं, न किमपि स्यादतस्ते त्याज्या इति भावः ॥ १९ ॥

सुमनोरञ्जनी — ननु धनिका अपि धनादिना साधून् प्रसाद्य तदनुग्रहेण मुक्ताः भवेयुरेव । किं दुःखाकरदारिद्र्येणेत्यत आह ॥ साधूनामिति । मुकुन्दस्य चरणमात्रं प्राप्तुमिच्छावतां लोष्टाश्मकांचनेषु समबुद्धीनाम् । धनेन स्तम्भः स्तब्धता येषां तैः । असतां आश्रयभूतैः अत एवोपेक्ष्यैः असद्भिः किं प्रयोजनम् । न किमपि । समलोष्टाश्मकांचनानां साधूनां धनिकाः उपेक्ष्या एव । अतो न तैर्वशीकर्तुं योग्या इति भावः ॥ १९ ॥

तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदान्धयोः ।
तमोमदं हरिष्यामि स्त्रैणयोरजितात्मनोः ॥ २० ॥

सत्यधर्मीया — यदर्थमत्यर्थमुपन्यसनं तत्तात्पर्यमवसाययति ॥ तदिति । वारुण्या वरुणोत्पन्नया माध्व्या मद्येन मत्तयोः श्रीमदेन चान्धयोस्तत्प्राययोरजितात्मनोस्तत एव स्त्रैणयोः कामिनीकामुकयोः । स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादिति स्मरणात् । ञित्वादादिवृद्धौ णत्वे स्त्रैण इति भवति । तमोमदमज्ञाननिदानिकामहन्तामहं हरिष्यामीति मतिं तेने मुनिरिति भावः ॥ २० ॥

सुमनोरञ्जनी — वारुण्या वारुणीसंज्ञया । माध्व्या मद्येन । मत्तयोः अत एव स्त्रैणयोः स्त्रीलोलुपयोः । तमोमदं तमोगुणकार्यं मदम् । हरिष्यामि परिहरिष्यामि । शापदानेनेत्यर्थः ॥ २० ॥

यदिमौ लोकपालस्य पुत्रौ भूत्वा तमःप्लुतौ ।
न विवाससमात्मानं विजानीतः सुदुर्मदौ ॥ २१ ॥

सत्यधर्मीया — पथिकस्येयती व्यथा कुतो भवतो भवतान्तौ किं वेत्यतो वक्ति ॥ यदिति । यद्यस्मादिमौ लोकपालस्य कुबेरस्य पुत्रौ भूत्वाऽपीदानीं तमःप्लुतावज्ञाननिमग्नौ विवाससं विगतं वासो यस्मात्स तमात्मानं स्वं वा स्वदेहं वा । सुदुर्मदौ मद्येनापि । न विजानीतो न ज्ञातवन्तावत इत्युत्तरेणान्वयः ॥ २१ ॥

सुमनोरञ्जनी — शापप्रकारमाह ॥ यदिति । यत् यस्मात् । लोकपालस्य कुबेरस्य । पुत्रौ भूत्वापि । तमसा अज्ञानेन प्लुतौ व्याप्तौ सन्तौ । आत्मानं स्वशरीरम् । विवाससं वस्त्रहीनम् । न विजानीतः ॥ २१ ॥

अतोऽर्हथः स्थावरतां स्यातां नैवं यथा पुनः ।
स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् ॥ २२ ॥

सत्यधर्मीया — स्थावरतां वृक्षतामर्हथः पुनर्यथा नैवं मदान्धौ स्यातां तथा । तत्रापि स्थावरकलेवरतायामपि मत्प्रसादेन स्मृतिः ॥ २२ ॥

सुमनोरञ्जनी — अतः कारणात् सर्वदा वस्त्रानर्हं अज्ञानाप्लुतमेव देहं प्राप्तुमर्हावित्याह ॥ अत इति । स्थावरतां वृक्षत्वम् । प्राप्तुमर्हथ इति । पुनरेव मत्तौ यथा न स्यातां तथेति । एवं तर्हि निग्रह एव कृतः स्यान्नानुग्रह इत्यत आह ॥ स्मृतिरिति । मत्प्रभावेन महिम्ना । तत्रापि स्थावरजन्मन्यपि । स्मृतिः पूर्वजन्मस्मृतिः ॥ २२ ॥

वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते ।
वृत्ते स्वर्लोकतां भूयो लब्ध्वा भक्तौ भविष्यतः ॥ २३ ॥

सत्यधर्मीया — वासुदेवस्य सान्निध्यं लब्ध्वा । दिव्यशरच्छते शरदां समानां शतम् । दिव्यं देवतासम्बन्धि तच्च तस्मिन्वृत्ते गते सति स्वर्लोकतां स्वर्लोक ओको येषां ते स्वर्लोका देवा तेषां भावस्तत्ता तां देवत्वं भूयो लब्ध्वा । वासुदेवस्येत्यत्राप्यन्वेति । भक्तौ मदनुग्रहाद्भविष्यत इत्यन्वयः ॥ ॥ २३ ॥

सुमनोरञ्जनी — एवं दिव्यानां शरदां वत्सराणाम् शते वृत्ते प्रवृत्ते सति । मदनुग्रहात् वासुदेवस्य सान्निध्यं लब्ध्वा । स्वर्लोकतां स्वः स्वर्ग एव लोको निवासस्थानं ययोस्तौ । तयोर्भावः स्वर्लोकता ताम् । स्वर्गलोकमित्यर्थः । पुनः यथापूर्वं भक्तौ । भगवति भागवतेषु च ॥ २३ ॥

श्रीशुक उवाच -

स एवमुक्त्वा देवर्षिर्गतो नारायणाश्रमम् ।
नलकूबरमणिग्रीवावासतुर्यमलार्जुनौ ॥ २४ ॥

सत्यधर्मीया — स देवर्षिरेवमेतौ प्रत्युक्त्वा नारायणाश्रमं बदरिकाश्रमं गतः । नलकूबर-मणिग्रीवौ चैवं शप्तौ यमलार्जुनौ यमलौ च तौ सहोत्पन्नावर्जुनौ च तावासतुः । भूरुहमात्रगात्र-ताशापेऽपि स्मृतिर्भवत्वित्युक्तत्वादर्जुनः प्रीतिपात्रं वासुदेवस्येति श्रुततत्कथौ तन्नामकानौकहीभवने भगवान्प्रीतो नौ मोचयेदथवा तमद्वितीयार्जुनं विधातुं वेति मतिमन्तौ तावर्जुननगतां गताविति तात्पर्यमवधेयम् ॥ २४ ॥

सुमनोरञ्जनी — नारायणाश्रमं बदरिकाश्रमम् । यमलौ सहोत्पन्नौ । अर्जुनौ अर्जुनद्रुमौ ॥२४॥

ऋषेर्भागवतमुख्यस्य सत्यं कर्तुं वचो हरिः ।
जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ ॥ २५ ॥

सत्यधर्मीया — भागवतस्य मुख्यर्षेर्वचः सत्यं कर्तुं हरिः शनकैर्मन्दं यत्रास्तां तत्र तत्स्थलं जगाम । शुकोक्तिरियम् ॥ २५ ॥

सुमनोरञ्जनी — हरिः श्रीकृष्णः ॥ २५ ॥

देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ ।
तत् तथा साधयिष्यामि यद् गीतं तन्महात्मना ॥ २६ ॥

सत्यधर्मीया — भगवांस्तूचितैवमालोचनस्तत्र जगामेत्याह ॥ देवर्षिरिति । मे प्रियतमः । इमौ धनदस्यात्मजौ च । यन्नारदेन महात्मना गीतमुक्तं तथा यथार्थं साधयिष्यामीति ॥ २६ ॥

सुमनोरञ्जनी — किं तत्सत्यकरणमिति तत्राह ॥ देवर्षिरिति । यत् यस्मात् देवर्षिः नारदः । मेऽत्यंतं प्रियः । इमौ च धनदात्मजौ । धनदोऽपि मद्भक्त इति भावः । तत् तस्मात् महात्मना नारदेन । यद्गीतम् वासुदेवस्य सान्निध्यमित्यादिना । तत् तथैव साधयिष्यामीति ॥ २६ ॥

इत्यन्तरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ ।
आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलम् ॥ २७ ॥

सत्यधर्मीया — यमयोरर्जुनयोरन्तरेण मध्येन ययौ । आत्मनः स्वस्य निर्वेशोऽत्र प्रवेशस्तन्मात्रेण केवलं तेनोलूखलं तिर्यग्गतं तिरश्चीनमभूत् ॥ २७ ॥

सुमनोरञ्जनी — इति इत्यभिप्रायेण । यमयोर्यमलयोः अर्जुनयोः । अन्तरेण मध्येन । आत्मनः श्रीकृष्णस्य । निर्वेशमात्रेण मध्ये प्रवेशमात्रेण कृष्यमाणम् । उलूखलं तिरश्चीनमिति रत्नावली ॥२७॥

बालेन निष्कृष्टमुलूखलं तद् दामोदरेण तरसोत्कलिताङ्घ्रिबन्धौ ।
निष्पेततुः पवनविक्रमितातिवेलस्कन्धप्रवालविटपौ कृतचण्डशब्दौ ॥ २८ ॥

सत्यधर्मीया — यदा दामोदरेण बालेन तदुलूखलं निष्कृष्टमाकृष्टम् । उत्कलिताङ्घ्रिबन्धाविति द्वन्द्वान्वयी । उत्कलित उन्मूलितोऽङ्घ्रिबन्धो बेरं ययोस्तौ । पवनस्य तदोदितस्य वायोर्विक्रमितेन पराक्रमेणातिवेलमतिक्रान्तमर्यादं स्कन्धप्रवालविटपाः स्कन्धाः शाखाः प्रवालाः किसलयास्तेषां विटपो विस्तारो ययोस्तौ । विटपैरित्यपि पाठः । विटपे पल्लवे रिङ्गे विस्तारे स्तम्बशाखयोरिति विश्वः । कृतश्चण्डः प्रचण्डः शब्दो याभ्यां तौ । परमविक्रमितेति पाठः परमः । परमस्य परमात्मनो विक्रमितं चरणक्षेपस्तेन । अतिवेप इति पाठे वेपः कम्पो येषां ते स्कन्धादयश्च ययोस्तावित्यर्थः । निष्पेततुरिति सरसः पाठः ॥ २८ ॥

सुमनोरञ्जनी — यदा दामोदरेण दाम उदरे बद्धं यस्य तेन बालेन श्रीकृष्णेन । तत् उलूखलं तरसा निष्कृष्टमाकृष्टम् । तदा तौ अर्जुनौ । उत्कलितः उत्पाटितः अङ्घ्रिबन्धः मूलबन्धो ययौस्तौ । कृतः चण्डः क्रूरः शब्दो ययोस्तौ । पवनस्य तदानीमुत्पन्नवायोः विक्रमितेन पराक्रमेण अतिवेलैः सीमामतिक्रान्तैः स्कन्धैः स्थूलशाखाभिः प्रवालविटपैः किसलयोपेताल्पशाखाभिश्च सहैव निपेततुः । ततो तत्तरुसमाश्रितौ धुनिचमुनामकौ दैत्यावपि निषूदिताविति ज्ञेयम् । तदुक्तं 'धुनिश्चमुश्च तौ तरू समाश्रितौ निषूदितौ' इति ॥ २८ ॥

तत्र श्रिया परमया ककुभः स्फुरन्तौ सिद्धावुपेत्य कुजयोरिव जातवेदौ ।
कृष्णं प्रणम्य शिरसाऽखिललोकनाथं बद्धाञ्जली विरजसाविदमूचतुः स्म ॥२९॥

सत्यधर्मीया — तत्र तदवस्थायां तद्वृक्षे क्षितौ वा परमया श्रियाऽङ्गकान्त्या ककुभो दिशः स्फुरन्तौ स्फोरयन्तौ स्वयं ककुभवृक्षत्वेन ककुभस्फोरणं रचितुमुचितमिति ध्वन्यते । कुजयोः कौ

जायत इति कुजौ भूरुहौ तयोः सकाशाज्जातवेदाविव जातवेदसावग्नी इव । आकारान्तः सान्तत्वावच्छेदेनेति मतेनादन्तः । जातवेदा इति पठित्वा कुजयोर्वृक्षयोः स्थितो जातवेदा अग्निर्मूर्तिमानुपैति तथोपेत्येति व्याकरणे कुजयोरिति न वक्तव्यं स्यात्स्याच्च कुजस्येति तथा स्फुरन्तौ सिद्धावित्यनानुरूप्यमुपर्येव ज्ञायत इति न सरसः पाठः । प्राग्विस्तृतं सान्तादन्तत्वविषयेऽनुसन्धेयम् । अखिललोकनाथं कृष्णं शिरसा प्रणम्य विरजसौ विगतशापोपयुक्तपापौ बद्धाञ्जली । स्म नारदोक्तस्मृतिमन्तौ । इदं वक्ष्यमाणमूचतुः । स्मृतौ वृतनिषेधे स्मेति यादवः ।। २९ ।।

सुमनोरञ्जनी — तत्र तस्मिन्देशे तदानीं वा । जातवेदाविव जातवेदसाविव अग्नी इव । परमया श्रिया । ककुभः दिशः । स्फुरंतौ प्रकाशयन्तौ । सिद्धौ नलकूबरमणिग्रीवौ । कुजयोः द्रुमयोः सकाशात् उपेत्य । कुजयोः सिद्धौ अभिव्यक्तौ जातवेदाविवेति वा । विरजसौ विगतमलौ । इदं वक्ष्यमाणम् ।। २९ ।।

यक्षावूचतुः -

कृष्ण कृष्ण महायोगिन् त्वमाद्यः पुरुषः परः ।
व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः ।। ३० ।।

तात्पर्यम् – 'रूप्यत्वात्तु जगद्रूपं विष्णोः साक्षात्सुखात्मकम् । नित्यपूर्णं समुद्दिष्टं स्वरूपं परमात्मन' इति वामने ।। ३० ।।

सत्यधर्मीया — कृष्ण कृष्ण महायोगिन्निति श्लोके लोकेशस्य ब्राह्मणा इदं व्यक्ताव्यक्तं विश्वं ते स्वरूपं विदुरिति जगदैक्यमुच्यत इत्यन्यथाप्रतीत्यापदपनुत्तये प्रमाणेन रूपादिपदार्थनिरूपणपरेण तत्तात्पर्यमाह ।। रूप्यत्वादिति । रूप्यत्वान्निरूप्यत्वादुत्पाद्यत्वादिति यावत् । रूप प्रतिष्ठायामिति स्मरणात्प्रतिष्ठाप्यत्वादिति वा । जगद्रूप्यत्वाद्विष्णो रूपमित्युच्यते । गौणोऽत्र रूपपदार्थश्चेत्क्वासौ मुख्यार्थ इत्यत आह ।। सुखात्मकमिति । नित्यपूर्णसुखात्मकं परमात्मनः स्वरूपं साक्षान्मुख्यं समुद्दिष्टमिति वामनोक्ते रूपं निरूप्यमित्यर्थः । ननु बहुस्थले जगदैक्यपराकृतये पराक्रान्तं प्रागाचार्यैस्तत्प्रणाड्यार्थो ज्ञातुं प्राज्ञैः शक्यत इति पुनः पुनः कुतः प्रमाणोपन्यसनं क्रियत इति चेत् । प्रथमद्वितीयस्कन्ध एवैवमनुयोज्यं किङ्करनियोज्यभवता भवतु किं जातं वदामः । एकस्मिन्नर्थे मानानि नानाप्रणाड्या व्यवस्थापकानि सन्ति तानि चैकत्रैवोदाहृतानि चेन्मन्दविन्दविन्दुसन्दोहरूढाणि भवेयुः । ते ते प्रकाराश्च बोध्या बोध्यान्प्रतीति कृपणकरुणावरुणशरणमाचार्या उदाजहुरुदाहरिष्यन्ति च इति चेतः परं वा चेतः परं कुरु ।। ततश्चायं श्लोकार्थः ।। यतः कर्षसि देवेश नियम्य सकलं

जगदित्यादेर्जगत्कर्षकत्वात् हे कृष्ण! प्रस्तुतमुलूखलकर्षकतया चेति पुनर्हे कृष्णेत्युक्तिः । महायोगिन्महोपाय महाणिमादियोग! त्वमाद्यः परः सर्वोत्कृष्टः पुरुषः । व्यक्ताव्यक्तं कार्यकारणात्मकमिदं विश्वं जगत्ते. तव रूप्यत्वाद्रूपमिति ब्राह्मणा अपरोक्षज्ञानिनः । ब्रह्माणतीति ब्राह्मणोऽपरोक्षज्ञानीति गीताभाष्योक्तेः । वर्णविपर्ययो निरुक्तत्वादित्युक्तत्वात्तट्टीकायाम् । आद्यत्वपरत्वपुरुषत्वमहायोगित्वादियुतं त्वमन्यद्रूपं विदुरित्यपि मानानुयानयोजना ज्ञेया । त्वत्वावन्यपर्यायौ ऋचां त्वः पोषमास्त इत्यादेस्त्वशब्दोऽन्यार्थकः ॥ ३० ॥

सुमनोरञ्जनी — हे कृष्ण कृष्ण! महायोगिन् महान् योगः ऐश्वर्यं यस्य । आद्यः कारणीभूतः । आदीनां जगत्कारणब्रह्मादीनां यो नियामकः । पुरुषः पूर्षु शेत इति पुरुषः । परः उत्कृष्टः । आद्यत्वं विवृणोति ॥ व्यक्तेति । व्यक्ताव्यक्तं कार्यकारणात्मकम् । विश्वं ते त्वया रूपं रूप्यते निर्मीयते इति रूपम् । निर्मितमित्यर्थः । यद्वा प्रतिमास्थानीयम् । न तु रूपमभिन्नमित्यर्थः । ब्राह्मणाः, ब्रह्म वेदः तं अणन्ति अर्थज्ञानपूर्वमुच्चरन्ति अध्यापयंति वा तथोक्ताः वेदार्थज्ञानिनः विदुरिति । इदं विश्वं ते रूपमित्यनेन आपातप्राप्तविश्वाभेदशङ्कां प्रमाणेनैव परिहरन्त्याचार्याः । रूप्यत्वादिति ॥

रूप्यत्वात्तु जगद्रूपं विष्णोः साक्षात्सुखात्मकम् ।
नित्यपूर्णं समुद्दिष्टं स्वरूपं परमात्मनः ॥ इति ।

रूप्यत्वात् निर्मितत्वात् । अथवा रूप्यत्वात्प्रतिमात्वेन सन्निधानपात्रत्वात् जगत् विष्णोः रूपमुच्यत इत्यर्थः । विष्णोर्यत्साक्षात्सुखात्मकं निरतिशयसुखात्मकम् । नित्यं पूर्णं देशतो गुणतश्च व्याप्तम् । स्वरूपं मत्स्यादिकं तत्स्वरूपम् । सत् रूपं समुद्दिष्टं स्वरूपत्वान्निमित्तात् रूपशब्दवाच्यमित्यर्थः ॥ ३० ॥

त्वमेकः सर्वभूतानां देह आत्मेन्द्रियेश्वरः ।
त्वमेव कालो भगवान् विष्णुरव्यय ईश्वरः ॥ ३१ ॥

तात्पर्यम् – देहे शरीरे । 'विष्णुः सर्वगुणोद्रेकात्काल इत्यभिधीयत' इति च ॥ ३१ ॥

सत्यधर्मीया — त्वमेकः सर्वभूतानां देह आत्मेति श्लोके देह इति प्रथमान्तेन जडदेहैक्यतोच्यत इत्यन्यथाप्रतीतिनिरासाय स्वयं पदं विवक्षितं दर्शयति ॥ देहे शरीर इति । तत्रैव त्वमेव काल इति क्षणलवाद्यात्मजडकालात्मकता विष्णोस्तथैवोत्तरस्मिन्महदादिरूपतोच्यत इत्यापत्प्रच्युत्यै प्रमाणे आह ॥ विष्णुरिति । सर्वगुणोद्रेकादुद्रिक्तगुणयुक्तत्वाद्विष्णुः काल इत्यभिधीयते न तु कालात्मकत्वादित्यर्थः । कल छेदने कल बन्धने कल ज्ञाने कल कामधेनुरिति च पठन्ति । यथा कामधेनुः

सर्वार्थान्ददाति तथाऽयमपि धातुः सर्वार्थवाचीत्यर्थ इति गीताभाष्यप्रमेयदीपिकाभ्यामुक्तेः सकल-गुणोद्रिक्तता कालशब्दार्थ इत्यर्थः । प्रथमान्तः कामधेनुरिति पाठे ललितार्थ इतरस्तु टीकाकृदटीकत इत्युपेक्ष्यः । क्लिष्टार्थताऽपि स्पष्टमाभातीति वामन इति शेषः ।। ततश्चायं श्लोकार्थः ।। सर्वभूतानां देहे आततत्वादात्मा इन्द्रियाणां चेश्वरः स्वविषयशक्तिप्रदस्त्वमेव कालः सर्वगुणोदीर्णः ईश्वर ईशेभ्यो वरः । अव्ययो नाशशून्यो भगवान्विष्णुस्त्वमेकोऽन्तर्भेदहीनस्तत्तदन्तर्गतरूपः ।। ३१ ।।

सुमनोरञ्जनी — पुरुषत्वं प्रपञ्चयति ।। त्वमिति । त्वं सर्वभूतानां देहे स्थूले सूक्ष्मे च स्थितः । केवलं पिशाचादिवन्न किं तु आत्मेन्द्रियेश्वरः । आत्मा मनः जीवो वा । इन्द्रियाणि दश मनसा सहैकादश वा । तेषां ईश्वरो नियामकः । कालः सर्वगुणोद्रिक्तः । कल कामधेनुरित्युक्तेः । तदुक्तं तात्पर्ये । विष्णुः सर्वगुणोद्रेकात्काल इत्यभिधीयत इति । ईश्वरः ईशेभ्यो ब्रह्मादिभ्यो वरः । तदुक्तं गीताभाष्ये । इशेभ्यो ब्रह्मरुद्रश्रीशेषादिभ्यो यतो भवानिति ।। ३१ ।।

त्वं महान् प्रकृतिः सूक्ष्मा रजस्सत्त्वतमोमयी ।
त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ।। ३२ ।।

तात्पर्यम् – 'प्रकृत्यादेस्तद्वशत्वात्प्रकृत्यादिरुदीर्यते । यथा राजा भृत्यकृतात्स्वयं कर्तेत्युदीर्यते । तथा देहं स्वतन्त्रत्वात्स्वयमित्याहुरञ्जसे'ति पाद्मे ।। ३२ ।।

सत्यधर्मीया — प्रकृत्यादेस्तद्वशत्वात्तदधीनत्वाद्विष्णवधीनत्वात्स्वाधीनप्रकृत्यादिकत्वाद्विष्णुः प्रकृत्यादिरित्युदीर्यते । तत्र दृष्टान्तमाचष्टे ।। यथेति । भृत्यकृताद्भृत्यप्राप्तफलात्स्वयं राजा कर्ता जयादिकर्ता तत्फलवानितीर्यते । यथा देहं स्वतन्त्रत्वात्स्वाधीनत्वात्स्वयमित्याहुः । अञ्जसेत्यत्रेव प्रागप्यन्वेति । स्वातन्त्र्यं तद्गतत्वं च शब्दवृत्तेर्हि कारणम् । स्वातन्त्र्यं तत्र मुख्यं स्यात्कुतो राज्ञि जयोऽन्यथेत्युक्त्यनुरोधतो यथा राजेत्येकं यथा देहमित्यपरं निदर्शनमिति ज्ञेयम् । ततश्चायं श्लोकार्थः ।। मूले महान्प्रकृतिरित्युक्तिर्मानि च प्रकृत्यादेरिति च कथमिति चेत् । केचिन्महानित्यप्युदीर्यत इति योजनमुशन्ति । प्रकृतिग्रहणेनैव महतः प्राकृतस्य ग्रहणं भवत्येवेति तात्पर्ये तदग्रहः । मूले तु व्यक्तमव्यक्तमित्युक्त्यनुरोधेन महतः पूर्वं प्रकृतेश्चानन्तरमुक्तिरिति समादधुः । वस्तुतस्तु प्रकृतिरादिर्यस्य तस्य महतस्तथैव प्रकृत्यादिर्महानित्यन्वयने सोऽपि महानुक्तो भवतीति समाधिरवधेयः । त्वं महान्महत्तत्त्वम् । रजःसत्त्वतमोमयी सूक्ष्मा प्रकृतिस्त्वं तत्तत्स्वामि-कत्वान्महान्प्रकृतिश्चेत्युदीर्यते । अध्यक्षः पुरुषो जीवस्त्वमध्यक्षः साक्षितया पुरुषः पूर्णगुणतया शरीरशायित्वेन वा । साक्षिता साक्षितैतस्मिंस्त्वयीत्याह ।। सर्वक्षेत्रविकारविदिति । सर्वेषां क्षेत्राणां ये विकारा आरम्भकाः पृथिव्यप्तेजोवाय्वाद्याः खं वायुः पृथ्वीत्यादेः, तान्वेत्तीति स तथा ।। ३२ ।।

सुमनोरञ्जनी — त्वं महान् महत्तत्वनियामकः । महत्तत्वं त्वदधीनमेवेति द्वेधापि योज्यम् । एवमुत्तरत्रापि । रजःसत्वतमोमयी । तदात्मिका सूक्ष्मा प्रकृतिरपि त्वमेव त्वदधीनैव । पुरुषः क्षराक्षरभेदेन द्विविधोऽपि त्वदधीन एव । अत एव सर्वस्याध्यक्षः । सर्वाणि स्वेदजादिभेदेन चतुर्विधान्यपि क्षेत्राणि शरीराणि विक्रीयन्ते यैरिति सर्वक्षेत्रविकाराः सर्वशरीरकारणानि आकाशादीनि वेत्ति जानातीति तथोक्तः । यद्वा सर्वक्षेत्रेषु ये विकाराः इन्द्रियवृत्तयो ज्ञानादयः तान् वेत्तीति तथोक्तः। सर्वेन्द्रियगुणद्रष्टेत्यर्थः । अत्र महानित्यादिना भगवतो महदाद्यभेदः इत्यन्यथाप्रतीतिं प्रमाणेनैव परिहरन्त्याचार्याः ।

> प्रकृत्यादेस्तद्वशत्वात्प्रकृत्यादिरुदीर्यते ।
> यथा देहं स्वतन्त्रत्वात्स्वयमित्याहुरञ्जसा ॥

इति पाद्म इति । प्रकृत्यादेः इत्यत्र आदिशब्देन महदादिपरिग्रहः । तद्वशत्वात् विष्णुवशत्वात् विष्णोस्तन्नियामकत्वादिति यावत् । सः प्रकृत्यादिरुदीर्यते । त्वं महान् प्रकृतिरित्यादौ न तु तदात्मकत्वात् । ननु तत्पदप्रवृत्तिनिमित्तानधिकरणस्य कथं तच्छब्दवाच्यत्वम् । अतिप्रसंगादित्यतः केवलं प्रवृत्तिनिमित्ताधिकरणत्वमेव तच्छब्दवाच्यतायां न तन्त्रमपि तु तत्पदवाच्यत्वमपि । तत्र द्वितीयमेव मुख्यमिति भावेन तत्र दृष्टान्तमाह ॥ यथेति । भृत्येन कृतात् शत्रुजयात् राजा जयकर्तेत्युच्यते जयाश्रयभृत्यस्वामित्वात्तथा भगवतः प्रकृत्यादिस्वामित्वाद्भगवान् प्रकृत्यादिरुच्यत इति भावः । स्वामित्वेन निमित्तेन भगवान् प्रकृतिरिति व्यवहारे दृष्टान्तमुक्त्वा स्वाधीनत्वं निमित्तीकृत्य प्रकृत्यादिर्भगवानिति व्यवहारेऽपि दृष्टान्तमाह ॥ यथेति । यथा स्वस्य तन्त्रत्वादधीनत्वात् देहं स्वयमित्याहुः स्वाभेदेन व्यपदिशन्ति तथा प्रकृत्यादिर्भगवानिति व्यपदेशो युज्यत इति भावः ॥३२॥

> **गृह्यमाणस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः ।**
> **को न्विहार्हति विज्ञातुं प्राक् सिद्धं गुणसंस्थितेः ॥ ३३ ॥**

तात्पर्यम् – स्वात्मना गृह्यमाणः ॥ ३३ ॥

सत्यधर्मीया — गृह्यमाणस्त्वमग्राह्य इति श्लोक एकेन गृह्यमाणत्वागृह्यमाणत्वे भगवत इति प्रतीयते । तच्च विरुद्धमित्यतः प्रमाणानुसारेणाध्याहारेण स्वयं व्याकृत्य तथोत्तरश्लोके छन्नमहिमत्व-मुक्त्वा ते नम इत्युक्तिरप्ययुक्तेत्यतो व्यवस्थापकं तन्मानमुदाहरति ॥ स्वात्मनेति । स्वात्मना गृह्यमाणः स्वैः स्वकीयैः कृपापदैरात्मना च गृह्यमाण इत्यर्थः । अगृह्यमाणः स्वस्वेतरैरपि । अनन्तमिति वेतीशस्त्वनन्तत्वं, तथा अनन्तस्य तु सङ्ख्याने न तु सर्वज्ञता

भवेदित्येकादशतात्पर्योक्तेः । ज्ञेय एतैः सदा युक्तैर्भक्तिमद्भिः सुनिष्ठितैः । ज्ञानगम्यमित्यादेश्च । आचार्यचरणोऽपि स्वेनात्मनेत्येतावता पूर्तौ यत्स्वात्मनेत्यूचे तेनासूचयदमुमर्थमिति ज्ञेयम् । अन्येषां स्वाननुगृहीतानामनुगृहीतानामपि साकल्येन छन्नः स्वस्य न तु छन्न इत्यन्वयः ॥ ततश्चायं श्लोकद्विकार्थः ॥ व्यक्ताव्यक्तत्वे एवं भगवत इत्यवगमयति ॥ गृह्यमाण इति । स्वैरात्मना च गृह्यमाणः स्वैः साकल्येन तथाऽऽत्मना चेतरैः सर्वथाऽग्राह्यः । ते च क इत्यत आह । प्राकृतैर्विकारैर्महदाद्यभिमानिभिर्ब्रह्मादिभिर्गुणैः सत्त्वाद्यभिमानिनीभिरग्राह्य उक्तरीत्या । गुण-संस्थितेर्गुणानां कार्योन्मुखीभवनात्, उत्पत्तेरिति यावत् प्रागेव सिद्धं त्वां विज्ञातुमिहाधिकारिवर्गे कोऽर्हति न कोऽपि । मूले विज्ञातुमित्यत्र विपदार्थः साकल्यादिरूप इति ज्ञेयम् । इह जीवराशौ कोऽपि पुमानर्हति चेत्स इयदामननादित्यादेः कश्चतुर्मुख एवेत्यावृत्त्याऽन्वयः । कश्छन्दसां योगमावेद धीरः । वेदाहमेतं पुरुषं महान्तम् । ब्रह्मैनं पश्यति स्फुटमित्यादेः । वासुदेवाय, वेधसे ज्ञानस्वरूपाय। तस्मै दयोदयाभावदशायां परोक्षाय । तुभ्यं दयोदयेऽपरोक्षभूताय । तस्मै शापापनोदकतया नारदेरिताय तुभ्यमिदानीमस्मादृशां दृशां विषयायेति वा । आत्मद्योतैरात्मना द्योतः प्रकाशः कार्योन्मुखता येषां तैर्गुणैः सत्त्वादिभिः प्रकृत्येति यावत् । छन्नः महिमा माहात्म्यं यस्य तत्तस्मै ब्रह्मणे गुणपूर्णाय । तुच्छेनाभ्वपिहितं यदासीत्तपसस्तन्महिना जायतैकमिति श्रुतेः । पिहितत्वमपीतरापेक्षयेति प्राग्विवृतरीत्या ज्ञेयम् । नमोऽस्त्विति शेषः ॥ ३३,३४ ॥

सुमनोरञ्जनी — स्वात्मना स्वेनैव गृह्यमाणः ज्ञायमानः । तदुक्तम् । स्वात्मना गृह्यमाण इति । प्राकृतैः प्रकृतिकार्यैः विक्रीयमाणैः गुणैः इन्द्रियवृत्तिभिः । अग्राह्यः विषयीकर्तुमशक्यः प्राकृतेन्द्रि-याग्राह्य इत्यर्थः । कुत इत्यत आह ॥ क इति । इह जीवसमुदाये । कः पुरुषः । गुणसंस्थितेः गुणस्य अप्रधानस्य गुणकार्यस्य वा जगतः संस्थितेः सत्तालाभरूपोत्पत्तेः प्राक् सिद्धं त्वां विज्ञातुमर्हति न कोऽपीत्यर्थः ॥ ३३ ॥

तस्मै तुभ्यं भगवते वासुदेवाय वेधसे ।
आत्मद्योतैर्गुणैश्छन्नमहिम्ने ब्रह्मणे नमः ॥ ३४ ॥

सुमनोरञ्जनी — वेधसे जगत्कर्त्रे । आत्मना स्वेन त्वया द्योतः प्रकाशो येषां तैः गुणैः सत्वादिभिः । छन्नमहिम्ने अगृहीतमाहात्म्याय । आत्मद्योतैः स्वप्रकाशैः गुणैः आनन्दादिभिः । ब्रह्मणे पूर्णाय । अन्येषां छन्नमहिम्न इति वा । तदुक्तम् । ''छन्नोऽन्येषां न तु स्वस्य भगवान्पुरुषोत्तमः । इति । इदं पूर्वश्लोकेऽप्युपयुज्यते'' ॥ ३४ ॥

यस्यावतारा ज्ञायन्ते शरीरेष्वशरीरिणः ।
तैस्तैरतुल्यातिशयैस्तिर्यग्योनिष्वसङ्गतैः ॥ ३५ ॥

तात्पर्यम् – 'छन्नोऽन्येषां न तु स्वस्य भगवान्पुरुषोत्तमः ।

तस्यावतारा देहस्था अदेहस्था इति द्विधा । अन्तर्याम्यादिरूपाणि देहस्थानि विदो विदुः । मत्स्यकूर्मादिरूपाणि न देहस्थानि हृत्पतेः । अन्यातुल्यैरतिशयैर्मनसो नियमादिभिः । ज्ञायन्ते तानि रूपाणि नित्यपूर्णानि सर्वश' इति महाकौर्मे ॥ ३५ ॥

सत्यधर्मीया — यस्यावतारा इति श्लोके वस्तुतो येषां नैराकार्यं व्यवहारस्तस्मात्कार्यमतुल्यातिशयैरधिकारिभिस्ते चावतारा ज्ञायन्त इत्यन्यथाप्रतीतिनिरासाय छन्न इत्यादित उदितमहाकौर्मप्रमाणशेषेण तात्पर्यमाह ॥ यः पुरुषोत्तमस्तस्यावतारा इति । देहस्था अदेहस्था इति द्विधा । अव्ययात्तृतीयाया लुक् । वैशिष्ट्यं तदर्थः । प्रकारद्वयविशिष्टा इत्यर्थ इति न सामानाधिकरण्यं विरुणद्धीति ज्ञेयम् । अवतारपदं स्वयमेव व्याकरोति ॥ अन्तर्याम्यादिरूपाणि देहस्थानीति । विदो ज्ञानिनो विदुरिति मत्स्यकूर्मादिरूपाणि देहस्थानि जीवदेहस्थानि न । हृत्पतेर्विध्यधिकस्य । यथोक्तं बृहद्भाष्ये । हरणाद्यज्ञभागादेर्ज्ञानादेर्दानतस्तथा । ब्रह्मा हृदय इत्युक्तस्तस्यैव विदपि ध्रुवमिति । यद्यपि हरणाद्यज्ञभागादेर्हृदित्यंश एव प्रकृतसङ्गतस्तथाऽप्युत्तरत्रोपयोक्ष्यत इत्यधिकांशोदाहरणम् । तनोति ब्रह्माणं यं कर्तुं कामयते तमिति रमा च । हृतोः पतिरिति हृत्पतिस्तस्य । अन्यातुल्यैरतिशयैरिति व्याख्याति ॥ मनसो नियमादिभिरिति । करणैर्भक्तैः कर्तृभिः सर्वशोऽन्तरनन्तर्विद्यमानानि सर्वाणि नित्यपूर्णान्येव ज्ञायन्ते । अन्यैस्तुल्या नेति वा । न तुल्या अतुल्या अन्येऽतुल्या येषामिति वा तैः । शरीरेषु देहेषु केचन यस्यावतारा अन्तर्यामिका अशरीरिणो न विद्यते शरीरमधिष्ठानतयैषामिति तेऽशरीरिणो मत्स्याद्याः । अन्यातुल्यैरतिशयैरदृश्यमनसोनियमादिभिरसङ्गतैः अं त्वामेव सङ्गतास्तैरधिकारिभिस्तिर्यगादियोनिष्वपि ज्ञायन्ते । तिर्यग्योनिष्वप्यसङ्गतैरन्यत्रासम्बद्धवेदहर्तृहयग्रीवसंहरणधरण्युद्धरणादिभिः । सममितरत् । तज्जात्यवच्छिन्नेषु कर्मपारवश्येनासम्भावितैरित्यसङ्गतैर्वा तैस्तैरतुल्यातिशयैः समाधिकविकलैस्तिर्यग्योनिषु तिर्यगादियोनिष्वप्याविर्भूतैरप्यसङ्गतैस्तत्तज्जातिप्रापककर्मसम्बन्धविधुरैः शरीरैरशरिण इत्यशरीरिण इति रणविषया मत्स्याद्या इत्यपि योजना ॥ ३५ ॥

सुमनोरञ्जनी — शरीरेषु अन्तर्यामितया स्थिताः बिम्बसंज्ञकाः । अशरीरिणः अदेहस्थाः मत्स्यादयोऽपि यस्यावताराः तदन्तर्यामितया स्थितास्तवावताराः । अतुल्यातिशयैः

अनन्यसाध्यमनोनियमनादिभिर्ज्ञेयाः । मत्स्याद्यास्तु तिर्यग्योनिषु असंगतैः असंभावितैः तैस्तैः तत्र तत्र रूपविशेषेष्वभिव्यज्यमानैः असदृशमहिमाविशेषैर्लिङ्गैर्ज्ञेया इति योज्यम् । तदुक्तम् ।

तस्यावतारा देहस्था अदेहस्था इति द्विधा ।
अन्तर्याम्यादिरूपाणि देहस्थानि विदो विदुः ।
मस्त्यकूर्मादिरूपाणि न देहस्थानि हृत्पतेः ।
अन्यातुल्यैरतिशयैर्मनसो नियमादिभिः ।
ज्ञायन्ते तानि रूपाणि नित्यपूर्णानि सर्वशः ॥

इति महा कौर्मे इति । शरीरेष्वित्यस्यार्थो देहस्था इति । तत्र कानि रूपाणि देहस्थानीत्यत उक्तम् । अन्तर्याम्यादीति । अन्तर्यामी बिम्बः । आदिपदेन मनआदिनियामकानिरुद्धादयो गृह्यन्ते । मत्स्यकूर्मादीनि न देहस्थानि अदेहस्थपदबोध्यानि । अतुल्यातिशयैरित्यस्य विवरणम् ॥ अन्येति । अन्येषामतुल्यैरसाध्यैः । अतिशयैरित्यस्यार्थो मनसो नियमादिभिरिति ॥ ३५ ॥

स भवान् सर्वलोकस्य भवाय विभवाय च ।
अवतीर्णोऽसि भागेन साम्प्रतं पतिराशिषाम् ॥ ३६ ॥

सत्यधर्मीया — स उक्तगुणयुक्तः सर्वलोकस्य समस्तज्ञानिजनस्य भवाय मङ्गलाय विभवायैश्वर्याय मुक्तये वा । प्रभवेति पाठपक्षे प्रभवाय पराक्रमाय । प्रभवो जलमूले स्याज्जन्मभूमौ पराक्रम इति विश्वः । भवानाशिषां पतिः पशुपतिर्दाता वा साम्प्रतं भागेनांशानामंशेन पद्मनाभकृष्णकेशरूपेणावतीर्णोऽसि गतम् । अतद्वान्भवांस्त्वमसीति वा । अंशभागेनेति पाठेंऽशांशेनेत्यर्थः । तदाऽस्तीति शेषः ॥ ३६ ॥

सुमनोरञ्जनी — स तादृशो भवान् । सर्वलोकस्य भवाय क्षेमाय । विशेषतो अस्मदादेः प्रकृष्टभवाय मङ्गलाय च । अवतीर्णोऽसि । अंशभागेन अंशांशेन । आशिषां पतिर्दाता ॥ ३६ ॥

नमः परमकल्याण नमस्ते विश्वमङ्गल ।
वासुदेवाय शान्ताय यदूनां पतये नमः ॥ ३७ ॥

सत्यधर्मीया — विश्वमङ्गल जगन्मङ्गल! स्वयं परमकल्याण मङ्गलाङ्ग । शान्ताय सुखावधेयशान्तमूर्तये वा । यदूनां पतये । पदमेकं द्वयोरुक्तिरित्युक्तिर्नमःसम्पुटिकेति मन्तव्यम् ॥३७॥

सुमनोरञ्जनी — यदूनां पतये पत्ये । विश्वमङ्गल ! अस्माकं तु परमकल्याण ! ॥ ३७ ॥

अनुजानीहि नौ भूमन् सदाऽनुचरकिङ्करौ ।
दर्शनं नौ भगवत ऋषेरासीदनुग्रहात् ॥ ३८ ॥

सत्यधर्मीया — हे भूमन् गुणपूर्ण । अनुचरकिङ्करौ दासदासौ । नोदस्वित्पूर्तिरामायणमितिवदस्मदासत्तेत्याहतुः ॥ सदेति । भगवतो दर्शनमृषेर्नारदस्यानुग्रहान्नावासीदतो नावनुजानीह्याज्ञापय । भगवत इति ऋषिपदेनाप्यन्वेति । नावित्यपि नमः पदवद्द्विवारमुक्तमुक्तकृत्यं ज्ञेयम् ॥ ३८ ॥

सुमनोरञ्जनी — हे भूमन् । अनुजानीहि अनुज्ञां देहि । अनुचरस्य त्वदनुचरस्य रुद्रस्य किंकरौ प्रोक्तकारिणौ भृत्यावित्यर्थः । अनन्यसाध्यं त्वद्दर्शनं ऋषेरनुग्रहादेव लब्धमित्याहतुः ॥ दर्शनमिति ॥ ॥ ३८ ॥

वाणी गुणानुकथने श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव पादयोर्नौ ।
स्मृत्यां शिरस्तव सुरप्रवर प्रणामे दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ॥ ३९ ॥

सत्यधर्मीया — इत उत्तरं न मदान्धता भवतु, भवतु चेन्द्रियविनियोगो योगीश! एवमावयोरिति प्रार्थयते ॥ वाणीति । हे सुरप्रवरामरस्वामिन्! तव गुणानुकथने तद्वर्णने वाणी, अस्त्विति सर्वत्र यथातथं विपरिणतमन्वेति । कथायां तदाकर्णने श्रवणौ श्रवणे कर्णौ । श्रवणं श्रव इत्यमरः । ल्युडन्तो वा । कर्मसु हस्तौ, नौ मनः पादयोः स्मृत्यां स्मरणे । न इति पाठेऽस्मदो द्वयोश्चेति द्विवचनस्थाने बहुवचनम् । आद्यर्थे वा । शिरः प्रणामे भवत्तनूनां भवतस्तनवोऽन्तर्येषां स तां दर्शने दृष्टिर्दृक् भवत्तनूनां भवन्मूर्तीनां सतां वा । अयमेवार्थः सन्ततमस्मदभिमतो नान्य इति तत्तवभवत्पदैर्ध्वनयतः। ॥ ३९ ॥

सुमनोरञ्जनी — भवद्दर्शनानन्तरमावयोः सर्वेन्द्रियव्यापारस्त्वद्विषय एव भूयान्न पूर्ववदन्यविषय इति प्रार्थयतः ॥ वाणीति । गुणानां अनुकथने अनुवादे । कथायां कथाश्रवणे । कर्मसु तव मन्दिरमार्जनादिरूपेषु । नौ आवयोः मनः तव पादयोः स्मृत्यां अनुचिन्तने । हे सुरप्रवर । शिरः प्राणामे विषये । दृष्टिः, सतां निर्दुष्टानां भवत्तनूनां त्वन्मूर्तीनाम् । भवत्तनूनां त्वत्प्रतिमारूपाणां सतां सज्जनानां, दर्शन इति वा ॥ ३९ ॥

श्रीशुक उवाच-

इत्थं सङ्कीर्तितस्ताभ्यां भगवान् गोकुलेश्वरः ।
दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ ॥ ४० ॥

सत्यधर्मीया — वासुदेवो किमवादीत्तौ प्रति शुक वदेति तदनुयोगस्यावसरमददानः शुकः करुणापरवशः परीक्षितं प्रति वक्तीति वक्ति । श्री शुक इति । ताभ्यामित्थं सङ्कीर्तितो भगवान् गोकुलेश्वरः सर्वेश्वरोऽपि यथा बदरिकानाथो द्वारकानाथ इत्यप्यर्वाङ्नाथः पराङ्नाथ इति तद्वदिहोच्यते । सर्वनाथोऽपि भगवान्सन्निधानविशेषत इति छान्दोग्यभाष्योक्तेर्गोकुलेश्वरत्वं सर्वेश्वरस्य नानुपपन्नम् । दाम्नोलूखले बद्धो मात्रा, गुह्यकौ प्रति हसन्नाह न जनसमाज इत्याह ।। गुह्यकाविति । गुह्या च सा कुश्च गुह्यकुस्तस्यामेकान्तभूमावित्यर्थः । मन्दाः स्वयमनवतीर्णनयेन स्वयं बद्ध इतरबन्धध्वंसं कथं कुर्यादिति वदेयुरिति हासो देवस्येति वा । युष्मन्मदेनेयत्यवस्थेति वा ज्ञेयम् ।।४०।।

सुमनोरञ्जनी — ताभ्यां धनदात्मजाभ्याम् । सङ्कीर्तितः संस्तुतः । गुह्यकौ प्रति ।। ४० ।।

श्रीभगवानुवाच -

ज्ञातं मया पुरैवेतद् ऋषिणा करुणात्मना ।
यच्छ्रीमदान्धयोर्वाग्भिः शापः सोऽनुग्रहः कृतः ।। ४१ ।।

सत्यधर्मीया — करुणात्मना ऋषिणा श्रीमदान्धयोर्वाग्भिः शापः कृतः सोऽनुग्रहः कृत इति यदेतन्मया पुरैव ज्ञातम् । सानुग्रहोऽनुग्रहो मोचनविषयिणी करुणा तेन सहित इति शापविशेषणमिति तत्पाठपक्षे ज्ञेयम् ।। ४१ ।।

सुमनोरञ्जनी — पुरैव भवद्भिर्ज्ञापनात्प्रागेव । सानुग्रहः मोचनलक्षणानुग्रहसहितः ।। ४१ ।।

साधूनां समचित्तानां सुतरां मत्कृतात्मनाम् ।
दर्शनान्नो भवेद् बन्धः पुंसोऽक्ष्णोः सवितुर्यथा ।। ४२ ।।

सत्यधर्मीया — सतां माहात्म्यं स्वमाहात्म्यमहत्त्वदात्रिति तौ प्रति तदाह ।। साधूनामिति । समचित्तानां मित्रामित्रमनोरहितानां तत्रापि सुतरां मत्कृतो मयि कृतः समर्पित आत्मा मनो येषां नारदादीनां दर्शनाद्बन्धो नो भवेत् । कृतात्मनां शिक्षितमतीनां मत्तः सुतरां बन्धो न भवेदिति किं वक्तव्यमित्यन्वयो वा । एवमन्वये सुतरामिति सुतरां लग्नमिति मन्तव्यम् । सवितुः सूर्यस्य दर्शनाद्दर्शनमप्राप्य पुंसोऽवलोकयितुर्जनस्य यथा बन्धो यक्ष्माच्छादनरूपो भवेन्न तथेति व्यतिरेकदृष्टान्तः । सूर्यावलोकयितृलोचनाच्छादनं तत्ता यतो भवतीत्यामरपामरं विदितमिति । सवितुर्दर्शने कर्तव्यतयोपस्थिते यथा बन्धो न भवेत्तथेत्यन्वयदृष्टान्तो वा । बन्धोऽन्धकारं वा ।।४२।।

सुमनोरञ्जनी — यत्पूर्वभावो मा भूदिति प्रार्थितं तस्योत्तरमाह ॥ साधूनामिति । मय्येव कृतं आत्मा मनो येषां ते मत्कृतात्मानः । बन्धः संसारः । सवितुर्दर्शनात् । अक्ष्णोर्बन्धः अप्रकाशरूपः॥ ॥ ४२ ॥

तद् गच्छतं मत्परमौ नरवाहनिकेतनम् ।
सञ्जातो मयि भावो वामीप्सितः परमोत्सवः ॥ ४३ ॥

सत्यधर्मीया — परम उत्सवो येन सः । ईप्सितो वाञ्छितो वां, मयि भावो भक्तिः सञ्जात इति । मत्परमौ अहं परम उत्तमो ययोस्तौ । मयैव परा मा ज्ञानं पुनर्मदानर्पिका ययोस्ताविति वा । नरवाहनिकेतनं नरवाहः कुबेरः पिता तस्य निकेतनमलकां तद्गच्छतम् । नलकूबरसादनमिति पाङ्कः पाठो मञ्जुलश्च । प्राधान्यादेकस्य सम्बोधनम् । हे नलकूबर! तत्तस्मात्सादनं सदनमिति विवरणकृद्बादरायणकालिक इति स्वं मन्यत इति तदुपेक्ष्यम् । नरवाहनिः कुबेरस्तस्य केतनं निकेतनमिति वा ॥ ४३ ॥

सुमनोरञ्जनी — मय्येव परा आसक्ता मद्विषयिणीति यावत्, मा बुद्धिर्ययोस्तौ ॥ नरवाहः कुबेरः । परम उत्सवः मुक्तिलक्षणो यस्मात्सः । भावो भक्तिः ॥ ४३ ॥

श्रीशुक उवाच -
इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः ।
बद्धोलूखलमामन्त्र्य जग्मतुर्दिशमुत्तराम् ॥ ४३ ॥

इति श्रीमद्भागवते दशमस्कन्धे एकादशोऽध्यायः ।

सत्यधर्मीया — बद्धोलूखलं बद्धमुलूखलं यस्मिन्स तम् । ननु स्वयं तेन मोचितावित्युचितम् । तदुलूखलबन्धमोचनमतयोरित्यनयोर्गमनं तथैवेति चेत् । न । एतदवतारेऽर्जुनमोचकोऽयमेवास्मत्तो मोचनेऽर्जुनमोचितः कृष्ण इत्यपप्रथा स्यात्स्वावचप्रत्यवायिनावावामिति मतिमन्तौ विना मोचनं जग्मतुरिति तात्पर्यमनेन सूचितं ज्ञेयम् । आमन्त्र्य गच्छाव इत्युक्त्वोत्तरां दिशं स्वतातपालितां जग्मतुः ॥ ४४ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमपूर्वार्धे एकादशोऽध्यायः ॥ १०-११ ॥

सुमनोरञ्जनी — बद्धं उलूखलं यस्मिन् तं श्रीकृष्णं, आमन्त्र्य भगवन् गच्छाव इत्यभिभाष्य ॥ ॥ ४४ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां एकादशोऽध्यायः ॥ १०-११ ॥

॥ अथ द्वादशोऽध्यायः ॥

श्रीशुक उवाच–

गोपा नन्दादयः श्रुत्वा द्रुमयोः पततो रवम् ।
तत्राजग्मुः कुरुश्रेष्ठ निर्घातरवशङ्किताः ॥ १ ॥

सत्यधर्मीया — हरिचरितं दुरितहरणपुरःसरं संविन्निदानं सत्साधनं तद्धामाप्त्य इति निरूप्यतेऽस्मिन्नध्याये । तत्रादौ यमलार्जुनभञ्जनतो नन्दाद्याश्चर्यं स्वजातरज्जुविसर्जनं कथयति ॥ गोपा इति । पततोर्द्रुमयो रवं शब्दं श्रुत्वा निर्घातस्याशने रवस्तत्पातज इति शङ्किताः सन्देहयुतास्तत्र तत्स्थल आजग्मुः । भयशङ्किता इति पाठः स्फुटार्थः ॥ १ ॥

सुमनोरञ्जनी — पततोः द्रुमयोः रवं शब्दम् । निर्घातः अशनिपात इति भयेन शङ्किताः ॥१॥

भूम्यां निपतितौ तत्र ददृशुर्यमलार्जुनौ ।
बभ्रमुस्तदविज्ञाय लक्ष्यं पतनकारणम् ॥ २ ॥

सत्यधर्मीया — पतनकारणं लक्ष्यं प्रत्यक्षविषयमविज्ञाय बभ्रमुर्भ्रान्ता अभवन् । तत्तर्कणप्रकारस्तु

विना वर्षं विना वातं विद्युत्प्रपतनं विना ।
विना हस्तिकृतं दोषं केनेमौ पतितौ द्रुमौ ॥

इति हरिवंशशंसितोऽवसेयः ॥ २ ॥

सुमनोरञ्जनी — पतनकारणं लक्ष्यं प्रत्यक्षसिद्धमपि तदविज्ञाय बभ्रमुः । किं तल्लक्ष्यं कारणमित्यत आह ॥ उलूखलमिति । यद्वा, यद्यपि दाम्ना बद्धं उलूखलं विकर्षंतं बालकं कृष्णं ददृशुस्तथापि तं पतनकारणमविज्ञाय बभ्रमुरिति पूर्वेणान्वयः ॥ २ ॥

उलूखलं विकर्षन्तं दाम्ना बद्धं च बालकम् ।
कस्येदं कुत आश्चर्यमुत्पातभयकातराः ॥ ३ ॥

सत्यधर्मीया — दाम्ना बद्धमुलूखलं विकर्षन्तं बालकं च स्वस्तिमन्तं दृष्ट्वा । इदमेतत्पादपपातनं कस्य कर्मेदं कुतः किं कारणमाश्चर्यम् । उत्पातो दैविकारिष्टं तस्माद्यद्भयं तेन कातरा इत्यालोचयामासुः ॥ ३ ॥

सुमनोरञ्जनी — इदं चर्यं कस्य, कुतो वा कारणात् । उत्पातभयेन कातराः व्याकुलचित्ताः । आः कष्टमिति । आश्चर्यमद्भुतमिति वा ॥ ३ ॥

बाला ऊचुरनेनेति तिरश्चीनमुलूखलम् ।
विकर्षता मध्यगेन पुरुषावप्यचक्ष्महि ॥ ४ ॥

सत्यधर्मीया — एवं सन्दिहानान्नन्दादींस्तत्रत्या बाला अवोचन्नित्याह ॥ बाला इति । मध्यगेन वृक्षयोर्मध्यगेनोलूखलं तिरश्चीनं विकर्षताऽनेन पातनं तत्रापि पुरुषौ द्वावप्यचक्ष्महि दृष्टवन्त इति बाला ऊचुः ॥ ४ ॥

सुमनोरञ्जनी — तिरश्चीनं उलूखलं विकर्षता मध्यगेन वृक्षयोर्मध्यगतेन । अनेनैवेदं कृतम् । किंच वृक्षान्निर्गतौ द्वौ पुरुषावपि वयं अचक्ष्महि दृष्टवन्त इति बाला ऊचुरित्यन्वयः ॥ ४ ॥

न ते तदुक्तं जगृहुर्न घटेतेति तस्य तत् ।
बालस्योत्पाटनं तर्वोः केचित् सन्दिग्धचेतसः ॥ ५ ॥

सत्यधर्मीया — तर्वोर्बालस्योत्पाटनं तस्य तन्न घटत इति केचित्तदुक्तं न जगृहुः । असम्भावितमनृतगिर एत इति न स्वीचक्रुः । केचित्पूतनादिघातस्मृतिमन्तो दृष्ट्वैतन्निषेद्धृकाः सन्दिग्धं चेतो येषां ते तथाऽभवन् ॥ ५ ॥

सुमनोरञ्जनी — तस्य श्रीकृष्णस्य बालस्य तत् तर्वोः समूलोत्पाटनं न घटेत न युज्येतेति तदुक्तं बालोक्तं न जगृहुः न स्वीचक्रुः ॥ ५ ॥

उलूखलं विकर्षन्तं दाम्ना बद्धं स्वमात्मजम् ।
विलोक्य नन्दः प्रहसद्वदनो विमुमोच ह ॥ ६ ॥

सत्यधर्मीया — प्रहसद्वदनं यस्य सः । किमिदं सुदती व्यदधादिति नन्दो मन्दं हसन्नन्दनं विमुमोचामोचयत् । हेत्यनेन जगद्बन्धकस्येव मोचकस्य बन्धं तथा मोचनं चोपजहास व्यास इति ज्ञेयम् ॥ ६ ॥

सुमनोरञ्जनी — विमुमोच मोचयामास ॥ ६ ॥

गोपीभिः स्तोभितोऽनृत्यद् भगवान् बालवत् क्वचित् ।
उद्गायति क्वचिन्मुग्धस्तद्वशो दारुयन्त्रवत् ॥ ७ ॥

सत्यधर्मीया — स्तोभितो वञ्चित इव नर्तनं कुरु कर्तरित्युक्तावनृत्यन्ननर्त । नृत्यन्निति शत्रन्तपाठे तथा सन्नुद्गायतीत्यन्वयः । तद्वशो गोपीवशो दारुयन्त्रवत्काष्ठमयनियम्यपुत्तलिकादिवन्मुग्धः किञ्चिदजानान इव ॥ ७ ॥

सुमनोरञ्जनी — श्रीकृष्णस्य बालानुकरणमाह ॥ गोपीभिरिति । स्तोभितः फलं दास्यामि नटनं कुर्विति वञ्चितः । नृत्यन् नर्तनं कुर्वन् । उद्गायति उच्चैर्गायति । क्वचिच्च दारुयन्त्रवत् दारुपुत्रिकावत् । तद्वशः तैर्गृहीतहस्तः सन् नृत्यति ॥ ७ ॥

बिभर्ति क्वचिदाज्ञप्तः पीठकोन्मानपादुकम् ।
बाहुक्षेपं च कुरुते स्वानां च प्रीतिमावहन् ॥ ८ ॥

सत्यधर्मीया — पीठकं चोपवेष्टव्यफलकमुन्मानं मापकवैणवं प्रस्थादिकम् । पादुका दारुमयोपानत् । अथ पादुका पादूरुपानत्स्त्रीत्यमरः । पादुकं सर्वो द्वन्द्व इत्येकवद्भावः । जातिरप्राणिनामिति पीठकादीनां समाहारो वा । स्वानां ज्ञात्यादियोषिताम् ॥ ८ ॥

सुमनोरञ्जनी — ताभिः आज्ञप्तः । पीठकं पीठं, उन्मानं धान्यादिमापकं प्रस्थं, पादुकं पादपीठम् । बाहुक्षेपं बाह्वोः आस्फोटनम् । आवहन् कुर्वन् ॥ ८ ॥

दर्शयंस्तद्विदां लोक आत्मनो भक्तवश्यताम् ।
व्रजस्योद्वाहयन् हर्षं भगवान् बालचेष्टितैः ॥ ९ ॥

सत्यधर्मीया — तद्विदां स्वस्वरूपज्ञानिनां नारदादीनाम् । लोके स्वस्य भक्तवश्यतां दर्शयन् बालचेष्टितैर्व्रजस्य तद्गतजनव्रजस्य हर्षमुद्वाहयन्प्रवहन् तं तन्वन्बाहुक्षेपं च कुरुत इत्यतीतेनान्वयः ॥९॥

सुमनोरञ्जनी — तद्विदां हरिरेवायमवतीर्ण इति ज्ञानवतां नारदादीनाम् । आत्मनः स्वस्य भक्तवश्यतां दर्शयन् । व्रजस्य हर्षं उद्वाहयन् अवर्धयन् ॥ ९ ॥

गोपवृद्धा महोत्पातानननुभूय बृहद्वने ।
नन्दादयः समागम्य व्रजकार्यमचिन्तयन् ॥ १० ॥

सत्यधर्मीया — समागम्य मिलित्वा । व्रजकार्यं भविष्यत् ॥ १० ॥

सुमनोरञ्जनी — गोपेषु वृद्धाः वयसा बुध्या च । समागम्य स्थानविशेषे मिलित्वा । व्रजकार्यं गोकुलस्य हितकरं कृत्यम् ॥ १० ॥

तत्रोपानन्दनामाऽऽह गोपो ज्ञानवयोधिकः ।
देशकालार्थतत्त्वज्ञः प्रियकृद् रामकृष्णयोः ॥ ११ ॥

सत्यधर्मीया — ज्ञानं च वयश्च ताभ्यामधिकः । तज्ज्ञानमेव विवेचयति ॥ देशकालार्थतत्त्वज्ञ इति । रामकृष्णयोः प्रियकृत् । एतेन श्रीकृष्ण एव स्थानान्तरं गन्तुं तानप्रेरयदिति ध्वन्यते ॥ ११ ॥

सुमनोरञ्जनी — तत्र तेषु मध्ये । देशकालार्थानां तत्त्वं स्वरूपं जानातीति तथोक्तः । अस्मिन् देशे काले वा अयमर्थो हितः अन्योऽहित इति ज्ञानवानित्यर्थः ॥ ११ ॥

उत्थातव्यमितोऽस्माभिर्गोकुलस्य हितैषिभिः ।
आयान्त्यत्र महोत्पाताः प्रजानां नाशहेतवः ॥ १२ ॥

सत्यधर्मीया — उत्थाने निमित्तमाह । प्रजानां नाशहेतवो महोत्पातास्ते चोत्पाता वृकाद्याः । यथोक्तं हरिवंशे । सन्त्रासयावो भद्रं ते किञ्चिदुत्पाद्य कारणमित्यारभ्य घोरांश्चिन्तयतस्तस्य स्वतनूरुहजास्तथा । विनिष्पेतुर्भयकराः सर्वशः शतशो वृकाः । ते वृकाः पञ्चबद्धाश्च दशबद्धास्तथापरे । निश्चेरुस्तस्य गात्रेभ्यः श्रीवत्सकृतलक्षणा इति गर्भीकृत्य व्रजो निष्पन्दचेष्टः स्म एकस्थानचरः कृत इत्यन्तेन । ते च स्थलान्तरगमनमनसा श्रीकृष्णेन बहिराविर्भावितास्तदात्मका इति ज्ञेयम् । श्रीवत्सकृतलक्षणा इति तदसाधारणलक्षणोक्तेः । अत्रायान्तीत्यपरिचितस्थलं चेत् झडिति न घटेत तदनिष्टमिति भावः ॥ १२ ॥

सुमनोरञ्जनी — इतः एतत्स्थानात् । उत्थातव्यम् । गोकुलस्य गोसमुदायस्य ॥ १२ ॥

मुक्तः कथञ्चिद् राक्षस्या बालघ्न्या बालकोऽप्यसौ ।
हरेरनुग्रहान्नूनमनश्चोपरि नापतत् ॥ १३ ॥

सत्यधर्मीया — अपिना बालकतां गर्हयामास । अनुग्रहान्नोपर्यनुग्रहं प्राप्य कथञ्चिदस्म-दूहानास्पदतया कथञ्चित्केनाप्युपायेन बालघ्न्या राक्षस्या मुक्तोऽनः शकटश्च हरेरस्योपरि नापतन्नूनं निश्चयो बाह्यार्थस्तु लोकानुवृत्त्या ॥ १३ ॥

सुमनोरञ्जनी — असौ बालकः कृष्णः । बालघ्न्या राक्षस्याः पूतनायाः । अनश्च शकटोऽपि । उपरि कृष्णस्योपरि ॥ १३ ॥

चक्रवातेन नीतोऽयं दैत्येन वियदूद्यता ।
शिलायां पातितस्तत्र परित्रातः सुरेश्वरैः ॥ १४ ॥

सत्यधर्मीया — वियदाकाशं प्रत्यूह्यता । वचि स्वपीति सम्प्रसारणम् । लटः शता यत्प्रत्ययः कर्तरि छान्दसः । वियन्नीतः शिलायां पातितस्तत्रापि सुरेश्वरैर्दैवैस्त्रातो रक्षित इति बहिः । सुरा हरेर्गुणा प्रोक्ता इत्येकादशतात्पर्योक्तेस्तेषामीश्वरैः । भाव प्रधानः । सामर्थ्यविशेषैस्ते च त ईश्वराः स्वभेदेन तैरयमस्मच्छुभदैवं च निमित्तीकृत्येति शेषः । परित्रातः स्वगुणैरेव रक्षित इत्यन्तरर्थः । ॥१४॥

सुमनोरञ्जनी — चक्रवातेन । तत्स्वरूपेण दैत्येन । ऊह्यता श्रीकृष्णं वहता । वियत् प्रति । तत्र तस्यां अवस्थायाम् ॥ १४ ॥

यन्न म्रियेत द्रुमयोरन्तरं प्राप्य बालकः ।
असावन्यतमो वाऽपि तच्चाप्यच्युतरक्षणम् ॥ १५ ॥

सत्यधर्मीया — द्रुमयोरन्तरं मध्यं प्राप्यापि बालको यः कोऽपि चेन्म्रियेत न मृतः सुरेश्वरैर्हेतोरन्यतमोऽपि बालको न म्रियेतेति यत्तच्चाप्यच्युतस्य रक्षणं कृतं तेनेत्येतद्रक्षणमित्यर्थः ॥ ॥ १५ ॥

सुमनोरञ्जनी — द्रुमयोरन्तरं मध्यम् । अन्यतमः कृष्णादन्यबालकेषु कश्चित् बालकः न म्रियेत इति यत् तदपि अच्युतरक्षणं अच्युतकृतं रक्षणमेव ॥ १५ ॥

यावदौत्पातिकोऽरिष्टो व्रजं नाभिभवेदितः ।
तावद् बालानुपादाय यास्यामोऽद्यैव सानुगाः ॥ १६ ॥

सत्यधर्मीया — औत्पातिक उत्पातोत्पन्नोऽरिष्टोऽनर्थः । तत्रारिष्टं शुभाशुभे इति विश्वः । लिङ्गाशिष्यतयाऽरिष्ट इत्युक्तम् । अरिष्टमस्यास्तीत्यरिष्टः । औत्पातिकिः कश्चनानर्थ इति शेष इति वा । यावद्व्रजं नाभिभवेन्न तत्स्थं जनं पराभावयेत्तावन्मध्ये बालानुपादायेतोऽस्माद्देशाद्यास्यामः । आलस्येन न भाव्यं न स्थेयं चैकेनाप्यस्मदीयेनेत्याह ॥ अद्यैव सानुगा इति । तत्स्थलं सम्यग्वाऽसम्यग्वाऽऽलायो मिलत वैको गत्वा विचार्यायात्वत उत्तरं याम इति नेति स्वस्थितिमाहुः । वयं सानुगाः स्वान्वित्युपलक्षणम् । सानुगिरिदर्यादिवासिनां न गृहादिकृत्यमत इदानीमेव यास्याम इति भावः ॥१६ ॥

सुमनोरञ्जनी — औत्पातिकः उत्पातसूचितः । अरिष्टः अनर्थः । व्रजं गोकुलम् । नाभिभवेत् न नाशयेत् तावत् ततः पूर्वमेव । इतः बृहद्वनात् ॥ १६ ॥

वनं वृन्दावनं नाम पशव्यं नवकाननम् ।
गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधम् ॥ १७ ॥

सत्यधर्मीया — यदस्मदवश्यापेक्षितं तदत्र वर्तत इति नाम निदर्शयोपनन्द उपदिशति ॥ वनमिति । वृन्दावनं नाम प्रसिद्धं वनम् । पशव्यं पशुभ्यो हितम् । नवानि नूतनानि काननान्यवान्तराण्युपवनानि यस्मिंस्तत् । नवा एव नवका नूतनागता इतो वयं तेषामेवाननं चेष्टा गमनमिति यावत् यस्मिंस्तत् । एतावत्पर्यन्तं कैरप्यनवलोकितमिति यावदिति वा । गोपगोपीगवाम् । कृत्यानां कर्तरि वेति षष्ठी । सेव्यं सेवनीयम् । पुण्येत्यद्र्यादिवीरुधां विशेषणम् । पुण्याद्रयः पुण्यानि तृणानि पुण्या वीरुधा गुल्माश्च यस्मिंस्तत् । टापं चेति टाबन्तो वीरुधाशब्दः । पुण्यद्रुवीति क्वचित्पाठः । द्रुद्रुमागमा इत्यमराद्द्रवो द्रुमा इत्यर्थः ॥ १७ ॥

सुमनोरञ्जनी — पशव्यं पशूनां हितम् । नवानि काननानि अवान्तरवनानि यस्मिन् तत् । पुण्याः मनोहराः, अद्रयः, तृणाः, वीरुधो गुल्मिन्यः यस्मिन् तत् । वीरुद्गुल्मिन्यपीत्यमरः । वीरुधशब्दोऽकारान्तोऽप्यस्तीति पदरत्नावल्याम् ॥ १७ ॥

तत् तत्राद्यैव यास्यामः शकटान् युङ्ध्व माचिरम् ।
गोधनान्यग्रतो यान्तु भवतां यदि रोचते ॥ १८ ॥

सत्यधर्मीया — तत् ततः । तत्राद्यैव यास्यामः शकटाननांसि यूयं युङ्ध्व युङ्ध्वं चिरं माऽस्त्वित्यर्थः । ध्वमो मलोपश्छान्दसः । यद्वा युङ्ध्वं आचिरमिति छेदः । आ सम्यगिति अचिरं शीघ्रमतिशीघ्रम् । अभिविधिरेवात्र सम्यक्त्वेन विवक्षित इति क्त्वान्न प्रकृतिभावः । युङ्ध्वं भवतामग्रतो गोधनानि यान्तु । अग्रत इत्यावर्तते । सार्वविभक्तिकश्च तसिः । अग्रेभ्यो प्रधानेभ्यो यदि रोचते तर्हि शकटान्युङ्ध्वं यास्याम इत्यन्वयः । अग्रमालम्बने वाते परिणामे परस्य च । प्रान्ते पुरस्तादधिके प्रधाने प्रथमोर्ध्वयोरिति विश्वः । एवं च रुच्यर्थानामित्यस्योपपत्तिर्जातेति ज्ञेयम् । युङ्क्षमाचिरमिति पाठस्तु कल्पितः । एतदर्थापनानिपुणैर्बहुवचनक्रमाननुगुण इत्युपेक्ष्यः ॥ १८ ॥

सुमनोरञ्जनी — तत् तस्मात् । मा चिरं शीघ्रम् । युङध्वं अनडुद्भिः संयोजयध्वमित्यर्थः । भवतां भवद्भ्यः ॥ १८ ॥

तच्छ्रुत्वैकधियो गोपास्सर्वे नन्दपुरोगमाः ।
उपनन्दवचो राजन् प्रतिनन्द्य गृहान् ययुः ॥ १९ ॥

सत्यधर्मीया — नन्दपुरोगमा नन्दादयः उपनन्दवचः श्रुत्वा केचनानुमेनिरे नानुमेनिरे च केचनेति नेतीरयति ॥ सर्व एकधिय इति । एकस्मिन्वृन्दावनगमनविषये धीर्येषां ते गोपास्तत्प्रतिनन्द्य गृहान्स्वान्स्वान्ययुः ॥ १९ ॥

सुमनोरञ्जनी — तत् उपनन्दोक्तम् । एकधियः एकविषयकधियः । प्रतिनन्द्य शिरसा श्लाघ्य ॥ ॥ १९ ॥

सरित्तीरगतं कृष्णं भग्नार्जुनमथाह्वयत् ।
रामं च रोहिणी देवी क्रीडन्तौ बालकैर्भृशम् ॥ २० ॥

सत्यधर्मीया — बालकैर्भृशं क्रीडन्तौ क्रीडां कुर्वन्तौ भग्नार्जुनं सरित्तीरगतं कृष्णमथ रामं चेत्येतौ रोहिणी देव्याह्वयदाजुहावेत्यर्थः ॥ २० ॥

सुमनोरञ्जनी — सरित्तीरे यमुनातीरे गतम् । भग्नौ अर्जुनौ येन तम् । रामं च राममपि ॥२०॥

नोपेयातां यदाहूतौ क्रीडासङ्गेन पुत्रकौ ।
यशोदां प्रेषयामास रोहिणी पुत्रवत्सला ॥ २१ ॥

सत्यधर्मीया — यदा क्रीडासङ्गेन तदासक्त्याऽऽहूतावपि नोपेयातां समीपं नापतुस्तदा पुत्रवत्सला रोहिणी यशोदां प्रेषयामास त्वं वा कारयेति ॥ २१ ॥

सुमनोरञ्जनी — यदा आहूतावपि । क्रीडायां आसङ्ग आसक्तिस्तेन । नोपेयातां समीपं नागतौ तदा ॥ २१ ॥

क्रीडन्तं स्वसुतं बालमतिवेलं सहाग्रजम् ।
यशोदाऽजोहवीद् वीक्ष्य पुत्रस्नेहस्नुतस्तनी ॥ २२ ॥

सत्यधर्मीया — बालमतिवेलं भृशं सहाग्रजं सहरामं क्रीडन्तं स्वसुतं पुत्रस्नेहेन स्नुतौ स्तनौ यस्याः सा । स्वाङ्गादिङीष् । यशोदाऽजोहवीत् । ह्वेञ् स्पर्धायां शब्दे चेत्यस्माद्यङ्लुगन्ताल्लङि अभ्यस्तस्येति सम्प्रसारणे कुहोश्चुरिति चुत्वेन जकारे गुणो यङोरिति गुणे यङो वेतीडागमे सार्वधातुकगुणे अडागमे च रूपम् । शब्दमात्रार्थकत्वेऽपि पुनः पुनः स्तुतिपूर्वकाकारणार्थत्वं प्राकरणिकं ज्ञेयम् । यथोक्तं प्रथमाष्टकाष्टमाध्यायदशमवर्गीयाजोहवीन्नासत्याकरवामित्यादिव्याख्यायां माधवेन वध्रिमती नाम रुच्यचिराजर्षेः पुत्री नपुंसकभर्तृका । सा पुत्रलाभार्थं नासत्यौ करा

अभिमतकर्तारौ अजोहवीत् । पुनः पुनः स्तुत्या पुत्रलाभार्थमाहूतवती । ह्वयतेर्यङ्लुगन्ताल्लङ् यङो वेति तिप ईडागम इति ॥ २२ ॥

सुमनोरञ्जनी — यशोदा । अतिवेलं वेलां भोजनकालमतिक्रम्य क्रीडन्तम् । अजोहवीत् आह्वयत् ॥ २२ ॥

कृष्ण कृष्णारविन्दाक्ष तात एहि स्तनं पिब ।
अलं विहारैः क्षुत्क्षान्तस्तद् भवान् भोक्तुमर्हति ॥ २३ ॥

सत्यधर्मीया — तात त्वमेहि क्वासि न दृश्यस इति न वदेति वदति ॥ तेऽरविन्दाक्षतेति । यतोऽरविन्दाक्षता तेऽतः पश्य एहीति । कमलपत्रलोचन सूर्यचन्द्रवल्लोचनेति वा नानवलोकनं युक्तमिति भावः । विहारैः क्रीडाभिरलम् । कुत इत्यत आह ॥ क्षुत्क्षान्त इति । बहुलवत ऊहनं मोहनाङ्ग्या इति ज्ञेयम् । यद्वक्ष्यति च प्रातरेव कृताहार इति ॥ २३ ॥ २४ ॥

सुमनोरञ्जनी — हे तात । क्षुधा क्षान्तः श्रान्तोऽसि ॥ २३ ॥

हे रामागच्छ ताताशु सानुजः कुलनन्दन ।
प्रातरेव कृताहारः क्रीडाश्रान्तोऽसि पुत्रक ॥ २४ ॥

सुमनोरञ्जनी — सानुजः अनुजेन कृष्णेन सहितः । कुलं नन्दयति आनन्दयतीति तथोक्तः ॥ ॥ २४ ॥

प्रतीक्षते त्वां दाशार्हो भोक्ष्यमाणो व्रजाधिपः ।
एह्यावयोः प्रियं धेहि स्वगृहान् यान्तु बालकाः ॥ २५ ॥

सत्यधर्मीया — दाशार्हो व्रजाधिपो नन्दोऽधिपो मां व्रजेत्युक्त्वा त्वां प्रतीक्षते सहाशितव्यमित्यासीनो मार्गं निरीक्षते । एह्यावयोः प्रियं धेहि पिधेहि बालकाः स्वगृहान्यान्तु । यातेति पाठे हे बालका यात गच्छतेत्यर्थः । बालान्स्वबालाभ्यां सहानाजुहाव यशोदा भुक्त्यर्थम् । न दारिद्र्यान्न वा लोभादपि स्वपुत्रेण सहादनसाधनसुकृतास्याद्याप्यनुदितत्वादिति मन्तव्यम् ॥ २५ ॥

सुमनोरञ्जनी — दाशार्हः दशार्हकुलोत्पन्नः । व्रजाधिपो नन्दगोपः भोक्ष्यमाणः । त्वां प्रतीक्षते त्वदागमनमाकांक्षते । आवयोः मह्यं नन्दाय च रौहिण्यै चेति वा । हे बालकाः । यात गच्छत ॥२५॥

जन्मर्क्षं तेऽद्य भविता विप्रेभ्यो देहि गाः शुचिः ।
धूलिधूसरिताङ्गस्त्वं तात मज्जनमावह ॥ २६ ॥

सत्यधर्मीया — धूलिधूसरितान्यङ्गान्यवयवा यस्य सः । मज्जनं स्नानं चावह । नन्दादिमं त्वमन्यं नावह परकीयोऽयमिति नोऽनुसन्दध्याः किन्तु मज्जनं मम जनो हि मज्जनस्तमावह । अत इत आगते स्वकीयता स्फुटीभविष्यतीति भावः । हे मज्ज मत्तो जायत इति स तथा । तातमिति शेषः । आव सम्यग्रक्ष च । हेत्येतदुभयकार्यकारितेतरत्र दुःसाधनेति द्योत्यते । हे अज्ज आश्चर्यकरजन्म । उर्वरितं पूर्ववत् । हे मज्जन मत्तो जनो जननं यस्य तत्सम्बुद्धिः । मा मामवेति वा ॥ २६ ॥

सुमनोरञ्जनी — अन्यच्च निमित्तमस्तीत्याह ॥ जन्मेति । जन्मर्क्षं जन्मनक्षत्रम् । शुचिः सन् । धूलिधूसरितांगः रजसा मलिनाङ्गः । मज्जनं अभ्यङ्गस्नानम् । आवह कुरुष्व ॥ २६ ॥

पश्य पश्य वयस्यांस्ते मातृमृष्टान् स्वलङ्कृतान् ।
त्वं च स्नातः कृताहारो विहरस्व स्वलङ्कृतः ॥ २७ ॥

सत्यधर्मीया — मातृमृष्टान्स्वमातृकृताभ्यङ्गशोधिताङ्गान्स्वमात्रलङ्कृतान् । विहरस्व क्रीड । ञित्त्वात्स्वरितञित इत्यात्मगामिनि क्रियाफल आत्मनेपदता ॥ २७ ॥

सुमनोरञ्जनी — मातृमृष्टान् स्वस्वमातृभिः मृष्टान् निर्मलीकृतान् । त्वं च त्वमपि ॥ २७ ॥

इत्थं यशोदा तमशेषशेखरं मत्वा सुतं स्नेहनिबद्धधीर्नृप ।
हस्ते गृहीत्वा सहराममच्युतं नीत्वा स्ववाटं कृतवत्यथोदयम् ॥ २८ ॥

सत्यधर्मीया — इत्थं यशोदाऽशेषशेखरमशेषाणां शेखरमशेषः शेषविरोधी गरुडः स शेखरे यस्य स गरुडध्वजस्तमिति वा मा पीडारूपस्तम् । शिखास्वापीडशेखरावित्यमरः । शिरोधार्यमालावाच्यप्ययं शिरोमान्यतां निमित्तीकृत्योत्तमार्थक इति ज्ञेयम् । शिखि गतौ । बाहुलकादरः । आगमशासनानित्यतया नुम् पुगन्तगुणे रूपम् । स्ववाटं व्रजं स्वमार्गं वा । उदयं मज्जनाद्युत्सवं कृतवती ॥ २८ ॥

सुमनोरञ्जनी — अशेषस्य शेखरम् । सर्वोत्तममित्यर्थः । तं कृष्णम् । सुतं मत्वा । स्नेहेन निबद्धा युक्ता धीर्मनो यस्याः सा । स्ववाटं स्वव्रजं प्रति । उदयं जन्मर्क्षनिमित्तोत्सवम् ॥ २८ ॥

अथ नन्दः समाहूय गोपानिदमभाषत ।
श्वोऽतो वृन्दावनं यामो यत्ता भवथ माचिरम् ॥ २९ ॥

सत्यधर्मीया — श्वोऽत एतत्स्थलाद्यत्ताः सन्नद्धाः । श्वो याम इति लकारव्यत्ययः । यद्वा श्वोऽपि माचिरमित्यन्वयः ॥ २९ ॥

सुमनोरञ्जनी — श्वः परदिने । अतः अमुष्मात् स्थानात् । यत्ताः सन्नद्धाः ॥ २९ ॥

तच्छ्रुत्वैकधियो गोपाः साधु साध्विति वादिनः ।
रथान् स्वान् स्वान् समायुज्य ययू रूढपरिच्छदाः ॥ ३० ॥

सत्यधर्मीया — रूढा आरोपिताः परिच्छदा आस्तरणानि साधनानि यैस्ते ॥ ३० ॥

सुमनोरञ्जनी — समायुज्य वृषैः संयोज्य । रूढाः शकटाधिष्ठिताः परिच्छदाः भाण्डादिसाधनानि यैस्ते ॥ ३० ॥

वृद्धान् बालान् स्त्रियो राजन् सर्वोपस्करणानि च ।
अनस्स्वारोप्य गोपालान् यत्ता आत्तशरासनाः ॥ ३१ ॥

सत्यधर्मीया — सर्वोपस्कराणि घरट्टक्षुब्धादीनि गतमुपरिस्करेति । आत्तं शरासनं धनुर्यैस्ते ॥ ॥ ३१ ॥

सुमनोरञ्जनी — अनस्सु शकटेषु । यत्ताः सन्नद्धाः । आत्तानि स्वीकृतानि शरासनानि यैस्ते तथोक्ताः ॥ ३१ ॥

गोधनानि पुरस्कृत्य शृङ्गाण्यापूर्य सर्वतः ।
तूर्यघोषेण महता ययुः सहपुरोहिताः ॥ ३२ ॥

सत्यधर्मीया — शृङ्गाणि विषाणरचितगोपोचितवाद्यान्यापूर्य पूरयित्वा महता तूर्याणां घोषेण च । तूर्येति गतम् । सहपुरोहिता गर्गो वा स्वासत्तादशायां तेन स्थापितो वा यः कश्चित्पुरोहितस्तेन सहिताः ॥ ३२ ॥

सुमनोरञ्जनी — शृङ्गाणि मुखेनाध्माय मान वाद्यविशेषान् । सर्वतः आपूर्य आध्माय्य । तूर्याणां वाद्यानाम् । सर्वतः सर्वाण्यपि गोधनानि ॥ ३२ ॥

गोप्यो रूढरथा नृत्यत्कुचकुङ्कुमकान्तयः ।
कृष्णलीलां जगुः प्रीताः स्निग्धकण्ठ्यः सुवाससः ॥ ३३ ॥

सत्यधर्मीया — नृत्यन्तो विशङ्कटशकटनटनेन नटन्तश्च ते कुचाश्च तेषु कुङ्कुमानां कान्तिर्द्युतिर्यासां ताः । स्निग्धाः मनोहराः कण्ठाः यासां ताः ॥ ३३ ॥

सुमनोरञ्जनी — नृत्यत्कुचाश्च ता कुङ्कुमकान्तयश्च । नृत्यत्कुचेषु कुङ्कुमकान्तिर्यासामिति वा । स्निग्धः मनोहरः कण्ठः ध्वनिर्यासां ताः ॥ ३३ ॥

तथा यशोदारोहिण्यावेकं शकटमास्थिते ।
रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके ॥ ३४ ॥

सत्यधर्मीया — कृष्णरामाभ्यां सहोपविष्टाभ्याम् ॥ ३४ ॥

सुमनोरञ्जनी — कृष्णरामाभ्यां सह । तथा कृष्णरामाभ्यां कथ्यमाना या कथाऽव्यक्तमधुररूपा । तयोः या कथा व्रजस्त्रीभिर्गीयमाना वा तच्छ्रवणोत्सुके यशोदारोहिण्यौ रेजतुरित्यन्वयः ॥३४॥

वृन्दावनं सम्प्रविश्य सर्वकालसुखावहम् ।
तत्र चक्रुर्व्रजावासं शकटैरर्धचन्द्रवत् ॥ ३५ ॥

सत्यधर्मीया — सर्वेषु कालेषु सर्वर्तुषु यत्सुखं तदावहतीति तत् । अर्धचन्द्रवदर्धचन्द्रानुकारं व्रजावासं चक्रुः ॥ ३५ ॥

सुमनोरञ्जनी — व्रजावासं गोकुलस्थानम् । अर्धचन्द्राकारम् चक्रुः ॥ ३५ ॥

वृन्दावनं गोवर्धनं यमुनापुलिनानि च ।
वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप ॥ ३६ ॥

सत्यधर्मीया — वृन्दावनं, गोवर्धनं पर्वतं, यमुनायाः पुलिनानि च । प्रीतिः । रामेति गतम् ॥ ॥ ३६ ॥

सुमनोरञ्जनी — गोवर्धनं तन्नामकं पर्वतम् । गवां वर्धनं वृन्दावनमिति वा ॥ ३६ ॥

एवं व्रजौकसां प्रीतिं यच्छन्तौ बालचेष्टितैः ।
कलवाक्यैश्च कालेन वत्सपालौ बभूवतुः ॥ ३७ ॥

सत्यधर्मीया — कालेन वत्सपालौ तर्णरक्षकौ बभूवतुः ॥ ३७ ॥

सुमनोरञ्जनी — यच्छन्तौ दास्यन्तौ । कलवाक्यैः अव्यक्तमधुरवचनैः । कालेन तद्योग्यकालेन । वत्सपालौ गोवत्सपालौ ॥ ३७ ॥

अविदूरे व्रजभुवः सह गोपालबालकैः ।
चारयामासतुर्वत्सान् नानाक्रीडापरिच्छदौ ॥ ३८ ॥

सत्यधर्मीया — अविदूरे समीपे । नानाप्रकारक्रीडासाधनोपेतौ ॥ ३८ ॥

सुमनोरञ्जनी — व्रजभुवः गोकुलनिवासात् । अविदूरे समीपे । चारयामासतुः गतिभक्षणे कारयामासतुः । नाना नानाविधः क्रीडापरिच्छदः क्रीडासामग्री ययोस्तौ ॥ ३८ ॥

क्वचिद् वादयतो वेणून् क्षेपणैः क्षिपतः क्वचित् ।
क्वचित् पदैः किङ्किणीभिः क्वचित् कृत्रिमगोवृषैः ॥ ३९ ॥

सत्यधर्मीया — क्षेपणैरश्मयन्त्रैः कवणीत्यपभ्रष्टभाषया । किङ्किणीभिः क्षुद्रघण्टाभिः कृत्रिमगोवृषैर्मृद्वृषदारुगवकादिभिः ॥ ३९ ॥

सुमनोरञ्जनी — क्रीडाप्रकारमाह ॥ क्वचिदिति । वेणून् वादयतः स्वनयतः । क्षेपणैः अश्मयन्त्रैः । बिल्वामलकादिभिर्वा । क्षिपतः परस्परम् । लक्ष्यं वा ताडयतः । किङ्किणीभिः किङ्किणीयुक्तैः । क्वचित् कदाचित् । कृत्रिमगोवृषैः मृद्दार्वादिनिर्मितगोवृषैः ॥ ३९ ॥

वृषायमाणौ नर्दन्तौ युयुधाते परस्परम् ।
अनुकृत्य रुतैर्जन्तून् चेरतुः प्राकृतौ यथा ॥ ४० ॥

सत्यधर्मीया — वृषायमाणौ वृषवदाचरन्तौ । नर्दन्तौ कूजन्तौ । जन्तून् रुतैस्तत्तच्छब्दैरनुकृत्य कृत्वाऽनुकरणं चेरतुः ॥ ४० ॥

सुमनोरञ्जनी — क्वचिच्च स्वयमपि वृषायमाणौ वृषवद्वर्तमानौ । तद्वदेव नर्दन्तौ शब्दं कुर्वन्तौ । परस्परं युयुधाते इत्यर्थः । क्वचिच्च रुतैः शब्दैः । जन्तून् हंसमयूरादीन् । अनुकृत्य विडंब्य ॥ ४० ॥

कदाचिद् यमुनातीरे वत्सान् चारयतोः स्वकैः ।
वयस्यैः कृष्णबलयोर्जिघांसुर्दैत्य आगमत् ॥ ४१ ॥

सत्यधर्मीया — जिघांसुर्हन्तुमिच्छुः ॥ ४१ ॥

सुमनोरञ्जनी — स्वकैः वयस्यैः सह । कृष्णबलयोः । षष्ठी द्वितीयार्थे ॥ ४१ ॥

तं वत्सरूपिणं वीक्ष्य वत्सयूथगतं हरिः ।
दर्शयन् बलदेवाय शनैर्मुग्ध इवासदत् ।। ४२ ।।

सत्यधर्मीया — वत्सयूथगतं स्वगोवत्ससमूहनिविष्टं मुग्ध इवाज्ञवच्छनैर्मन्दं शनैः शनैश्चर-ग्रहवत्स यथा प्रायेणायमशुभग्रह इति पञ्चमोक्तेर्दुःस्थानस्थितोऽनर्थदस्तथाऽसददित्यावृत्त्याऽप्यन्वयः । ।। ४२ ।।

सुमनोरञ्जनी — वत्सयूथगतं वत्ससमुदाये प्रविष्टम् । तं दैत्यम् । मुग्ध इव अजानन्निव । आसदत् समीपमागतवान् ।। ४२ ।।

गृहीत्वाऽपरपादाभ्यां सहलाङ्गूलमच्युतः ।
भ्रामयित्वा कपित्थाग्रे प्राहिणोद् गतजीवितम् ।। ४३ ।।

सत्यधर्मीया — अपरपादाभ्यां पाश्चात्यचरणाभ्यां सहलाङ्गूलं पुच्छं गृहीत्वा तथैव भ्रामयित्वा कपित्थाग्रे तत्तर्वग्रे गतजीवितं प्राहिणोच्चिक्षेप । भ्रामणक्षण एव गतप्राणं वृक्षोपरि प्राक्षिपदिति । अथ कपित्थे स्युर्दधित्थग्राहिमन्मथाः । तस्मिन्दधिफलं पुष्पफलं दन्तशठावपीत्यमरः ।। ४३ ।।

सुमनोरञ्जनी — अपरपादाभ्यां पाश्चात्यपादाभ्यां सह लाङ्गूलं गृहीत्वा । भ्रमणेन गतजीवितम् । तं दैत्यम् । प्राहिणोत् चिक्षेप ।। ४३ ।।

स कपित्थैर्महाकायः पात्यमानैः पपात ह ।
तं वीक्ष्य विस्मिता बालाः शशंसुः साधु साध्विति ।। ४४ ।।

सत्यधर्मीया — स पात्यमानैः कपित्थानां फलानि कपित्थानि तैः फलैः सह पपात । तन्महादेहसंस्पर्श एव फलपतनहेतुरिति भावः । तं वत्सं फलपातं च । विस्मिता बालाः साधु साध्विति शशंसुः । अनायासेन यातानि नः फलानि निहितश्चायं दैतेय इति विस्मय इति भावः । ।। ४४ ।।

सुमनोरञ्जनी — स महाकायः सन् । कपित्थैः कपित्थफलैः सह पपात । तं पूर्वं वत्साकृतिं अनन्तरं महाकायम् ।। ४४ ।।

देवाश्चोपरि सन्तुष्टा बभूवुः पुष्पवर्षिणः ।
तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ ।। ४५ ।।

सत्यधर्मीया — देवाः च ऊपरीति छेदः । उत्कृष्टत्वादुनामासाविति छान्दोग्यभाष्योक्तेः । ओः उत्कृष्टस्य कृष्णस्योपरि तदुपरीतिवद्देवाः पुष्पसन्ततिं ववृषुः । सर्वलोकैकपालकौ सर्वलोकैकपौ तावलकावलकौ शुक्लकृष्णकेशात्मकाविति वा भूत्वा वत्सपालकौ सन्तौ तौ ॥ ४५ ॥

सुमनोरञ्जनी — वत्सपालकौ भूत्वापि । सर्वलोकानां एकपालकौ मुख्यपालकौ । दुष्टशिष्टशिक्षणेनेत्येवं सन्तुष्टाः देवाः । उपरि श्रीकृष्णेपरि । पुष्पसन्ततिम् । ववृषुरिति सम्बन्धः ॥ ॥ ४५ ॥

सप्रातराशौ गोवत्सान् चारयन्तौ विचेरतुः ।
स्वंस्वं वत्सकुलं सर्वे पाययिष्यन्त एकदा ॥ ४६ ॥

सत्यधर्मीया — सप्रातराशौ आशोऽशनं प्रातराशेन प्रातर्भोजनेन सहितौ कृतप्रातरशनौ गोवत्सांश्चारयन्तौ विचेरतुरित्यन्वयः । सर्वे बालाः ॥ ४६ ॥

सुमनोरञ्जनी — प्रातराशौ प्रातर्भोजनवन्तौ । पाययिष्यन्तः पाययितुमिच्छन्तः ॥ ४६ ॥

गत्वा जलाशयाभ्याशं पाययित्वा पपुर्जलम् ।
ते तत्र ददृशुर्बाला महासत्त्वमवस्थितम् ॥ ४७ ॥

सत्यधर्मीया — जलाशयस्य महासरसोऽभ्याशं समीपम् । पाययित्वा ताञ्जलं पपुः स्वयं च । महासत्त्वमद्भुतजन्तुम् ॥ ४७ ॥

सुमनोरञ्जनी — जलाशयस्याभ्याशं समीपम् । महासत्वं महान्तं जन्तुम् ॥ ४७ ॥

तत्रसुर्वज्रसंभिन्नगिरेः शृङ्गमिव च्युतम् ।
स वै बको नाम महानसुरो बकरूपधृक् ॥ ४८ ॥

सत्यधर्मीया — वज्रसम्भिन्नश्चासौ गिरिश्च तस्य सकाशाच्च्युतं शृङ्गमिव ददृशुः । अनन्तरं तत्रसुरिदमित्थमित्यनिर्णयादिति भावः । सत्त्वोऽस्त्री जन्तुष्विति यादवः । स बको नाम नाम्ना प्रागपीति वैकारः सूचयति । इदानीं बकरूपधृक् बकस्य कङ्कस्य । बकः कङ्क इत्यमरः । रूपं धृष्णाति धरतीति स तथा ॥ ४८ ॥

सुमनोरञ्जनी — कीदृशम् । वज्रसंभिन्नगिरेश्च्युतं शृङ्गमिव स्थितम् । दृष्ट्वा तत्रसुः भीता अभवन् । सः महासत्वः बको नामतः । वै प्रसिद्धः ॥ ४८ ॥

आगत्य तरसा कृष्णं तीक्ष्णतुण्डोऽग्रसद् बली ॥ ४९ ॥

सत्यधर्मीया — तीक्ष्णतुण्डो बली बकस्तरसाऽऽगत्य कृष्णमग्रसज्जग्रास ॥ ४९ ॥

सुमनोरञ्जनी — रामादयः । विचेतसः कर्तव्यज्ञानहीनाः आसन् ॥ ४९,५० ॥

कृष्णं महासुरग्रस्तं दृष्ट्वा रामादयोऽर्भकाः ।
बभूवुरिन्द्रियाणीव विना प्राणैर्विचेतसः ॥ ५० ॥

सत्यधर्मीया — इन्द्रियाणि प्राणैर्विना यथा विचेतसो विमनस्का बभूवुः ॥ ५० ॥

तं तालुमूलं प्रदहन्तमग्निवद् गोपालसूनुं पितरं जगद्गुरोः ।
चच्छर्द सद्योऽतिरुषाऽक्षतं बकस्तुण्डेन हन्तुं पुनरभ्यपद्यत ॥ ५१ ॥

सत्यधर्मीया — अग्निवदग्निमिव तालुमूलं द्रंष्ट्रामूलम् । तालुकाकुदमित्यमरः । प्रदहन्तम् । जगद्गुरोश्चतुराननस्य पितरं तातम् । अनेन गोपालसूनुतामुपजहास मूलकृदिति मन्तव्यम् । सद्यश्चच्छर्द । निरष्टीवदक्षतं मत्वाऽतिरुषा तुण्डेन चञ्चुपुटेन हन्तुं पुनरभ्यपद्यत ॥ ५१ ॥

सुमनोरञ्जनी — जगद्गुरोश्चतुर्मुखस्य पितरम् । अग्निमिव । तालुमूलं कण्ठम् । प्रदहन्तम् । चच्छर्द वान्तवान् । तथापि तं अक्षतम् । पुनरपि रुषा तुण्डेन चुञ्चुपुटेन हन्तुम् । अभिमुखं प्राप्तवान् । ॥ ५१ ॥

तमापतन्तं स निगृह्य तुण्डयोर्दोर्भ्यां बकं कंससखं सतां पतिः ।
पश्यत्सु बालेषु ददार लीलया मुदावहो वीरणवद् दिवौकसाम् ॥ ५२ ॥

सत्यधर्मीया — स कृष्णः । कंसस्य सखा कंससखो राजाहःसखिभ्यष्टजिति टच् । तम् । वीरणवत्तृणविशेषवत् । वीरणं श्रीतृणं विदुरिति यादवः । दिवौकसां मुदावहो बालेषु पश्यत्सु सत्सु तुण्डयोर्दोर्भ्यां निगृह्य ददारादारयत् । नायास आसेत्याह ॥ लीलयेति ॥ ५२ ॥

सुमनोरञ्जनी — सः । कंसस्य सखायं मित्रं बकम् । तुण्डयोः निगृह्य । बालेषु पश्यत्सु सत्सु । वीरणवत् पर्वरहिततृणविशेषवत् । विददार । तेन दिवौकसां मुदावहश्चासीदिति ॥ ५२ ॥

तदा बकारिं सुरलोकवासिनः समाकिरन् नन्दनमल्लिकादिभिः ।
समीडिरे चानकशङ्खसंस्तवैस्तद् वीक्ष्य गोपालसुता विसिस्मिरे ॥ ५३ ॥

सत्यधर्मीया — तद्बकबलनं तत्संहरणं पुष्पवर्षणं देवस्तवनादिकं च वीक्ष्य विसिस्मिरे विस्मिताः ॥ ५३ ॥

सुमनोरञ्जनी — नन्दनवनोत्पन्नमल्लिकादिभिः कुसुमैः अवाकिरन् ववृषुः । आनकैः शंखैश्च संस्तवैः स्तुतिसाधनैः प्रबन्धैश्च । सम्यक् ईडिरे स्तुतवन्तः पूजयामासुः । तत् पुष्पवृष्ट्यादिकं वीक्ष्य । विसिस्मिरे विस्मिताः बभूवुः ॥ ५३ ॥

मुक्तं बकास्यादुपलभ्य बालका रामादयः प्राणमिवैन्द्रियो गणः ।
स्थानागतं तं परिरभ्य निर्वृताः प्रणीय वत्सान् व्रजमेत्य तज्जगुः ॥ ५४ ॥

सत्यधर्मीया — ऐन्द्रिय इन्द्रियाणामयमैन्द्रियो गणः । स्थानं स्वावस्थितस्थलं प्रति वत्सान्प्रणीय नीत्वा तत्कृष्णकृतं कर्म जगुः ॥ ५४ ॥

सुमनोरञ्जनी — इन्द्रियगणः इन्द्रियाभिमानिदेवसमूहः । स्थानागतं स्वस्थानमागतम् । प्राणं मुख्यप्राणमिव । रामादयः । तं कृष्णम् । उपलभ्य परिरभ्य आश्लिष्य । निर्वृताः सन्तुष्टाः सन्तो वत्सान् स्वस्थानं प्रणीय नीत्वा । तत् बकवधलक्षणं श्रीकृष्णचरितम् ॥ ५४ ॥

तच्छ्रुत्वा विस्मिता गोपा गोप्यश्चातिप्रियादृताः ।
प्रेत्यागतमिवौत्सुक्यादैक्षन्त तृषितेक्षणाः ॥ ५५ ॥

सत्यधर्मीया — अतिप्रियमित्यादृताः प्राप्तादराः । तृषिते तद्विलोकनलोलुपे ईक्षणे यासां ताः ॥ ॥ ५५ ॥

सुमनोरञ्जनी — अतिप्रिये श्रीकृष्णे आदृताः आदरेण युक्ताः । प्रेत्यागतमिव लोकान्तरं गत्वा आगतमिव । तृषितानि तृष्णोपेतानि अतृप्तानि ईक्षणानि यासां येषां च तथाविधाः ॥ ५५ ॥

अहो बतास्य बालस्य बहवो मृत्यवोऽभवन् ।
अप्यासीद् विप्रियं तेषां कृतं पूर्वं यतो भयम् ॥ ५६ ॥

सत्यधर्मीया — मृत्यवस्तत्कारणानि । यतो येभ्यो भयं प्रसक्तं तेषां तैः कृतं तदेव विप्रियमप्यासीत् । अपिना नाकृतकार्याणां स्वदेशकदेशगमनं किन्तु मरणमासीदिति द्योतयति । तेषामपि तादृशानामपि विप्रियं कृतमासीदिति वा योजना । यतो भयमन्येषां पूर्वमासीत्तेषामिति वा । श्लोकद्विकस्यैकान्वयः ॥ ५६,५७ ॥

सुमनोरञ्जनी — मृत्यवः मारकाः । अभवन् प्राप्ता अभवन् । अपि तथापि । यतः येभ्यः भयं संभावितं तेषां अनेनैव विप्रियं, कृतपूर्वं पूर्वं एतावत्पर्यन्तं कृतमासीत् । अहो आश्चर्यं, बत ॥ ५६ ॥

अथाप्यभिभवन्त्येनं न ह्येते घोरदर्शनाः ।
जिघांसयैनमासाद्य नश्यन्त्यग्नौ पतङ्गवत् ॥ ५७ ॥

सुमनोरञ्जनी — न केवलं पूर्वमेवमासीत्, अथापि अनन्तरमपि ते घोरदर्शनाः । एनं नाभिभवन्ति । किन्तु जिघांसया हन्तुमिच्छया । एनं प्राप्य । अग्नौ पतङ्गवत् शलभवत् नश्यन्ति ॥ ॥ ५७ ॥

अहो ब्रह्मविदां वाचो नासत्याः सन्ति कर्हिचित् ।
गर्गो यदाह भगवानन्वभावि तथैव तत् ॥ ५८ ॥

सत्यधर्मीया — ब्रह्मविदां परब्रह्मज्ञानां वाचोऽसत्याः कर्हिचिदपि न सन्ति न भवन्ति । अहो ब्रह्मज्ञानमाहात्म्यम् । भगवान्पूज्यो गर्गोऽथापि व्रजमाव्रजन्तोऽपि घोरदर्शनास्ते तवैनं सुतं नाभिभवन्ति न पराभावयन्ति । यतोऽयं नारायणसमस्ते नैतत्पराभावकाः पराभावकाश्च नायं तेषामिति समः समाधिरित्यतोऽभिधत्ते जिघांसया हननेच्छयैनमासाद्य प्राप्य नश्यन्तीति । तत्रैतदनायासं च निदर्शनेन दर्शयति ॥ अग्नौ पतङ्गा इव शलभवदिति । इति यदाह तत्तथैवान्वभावि अनुभूतम् । पृथगन्वयने तु विप्रियं तेषां कृतमासीदित्यनन्तरं पान्त्यादेरवक्तव्यत्वेनासङ्गत्यापत्तेः । यदि पृथगन्वय इष्टस्तर्ह्येवं योजना । यतो येभ्यः पूतनादिभ्यो भयमितरेषां प्राक् तेषां सकाशात्किञ्चिद्विप्रियं कृतमासीत् । अथाऽपि घोरदर्शना एनं नाभिभावयन्ति । इतरद्यथापूर्वम् । पुरोहिताभिहितं स्मारम् । सामान्यतो ब्रह्मविदां तन्निदर्शनेन मनसि माननं तन्वते ॥ अहो इति ॥ ५८ ॥

सुमनोरञ्जनी — असत्याः अयथार्थाः । तदनुभवमारोहयति ॥ गर्ग इति । यदाह तत् तथैव अभावि अभूत् ननु ॥ ५८ ॥

इति नन्दादयो गोपा रामकृष्णकथां मुदा ।
कुर्वन्तो रममाणाश्च नाविन्दन् भववेदनाम् ॥ ५९ ॥

सत्यधर्मीया — रामकृष्णकथां तत्सङ्कथनम् । भववेदानां संसारदुःखं नाविन्दन्नापुः ॥ ५९ ॥

सुमनोरञ्जनी — रामकृष्णयोः कथां गुणानुवादम् । रममाणाः सुखिनः । भववेदनां संसारदुःखम् ॥ ५९ ॥

एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे ।
निलायनैः सेतुबन्धैर्मर्कटोत्प्लवनादिभिः ॥ ६० ॥

सत्यधर्मीया — कुमाराणामिमे कौमारास्तैर्विहारैः क्रीडाभिः कौमारं वयो जहतुः । निलायनैरेकेनैकस्य निलीनस्य मार्गणरूपैः सेतुबन्धैः सिकतादिभिर्मर्कटोत्प्लवनादिभिः कपिवदुड्डीवनादिभिः । आदिशब्देन मयूरादिक्रीडा ग्राह्याः । अनेन नारायणकपिलदाशरथिभावं स्वस्य ध्वनयामास कृष्णः । एवं छत्रिन्यायेन बल एतदेकलकोऽपि गृहीत इति ज्ञेयम् । क्वचिद्विनाशायेत्यारभ्यैतत्सुहृद्भिश्चरितं मुरारेरित्यन्तो ग्रन्थः प्रक्षिप्त इति प्रेक्षावन्तोऽतो न व्याख्यातोऽस्माभिः।६०।

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे द्वादशोऽध्यायः ॥ १०-१२ ॥

सुमनोरञ्जनी — एवंरीत्या कौमारैः कुमारावस्थायोग्यैः । निलायनैः निलीनं एकं अपरोऽन्वेषयति तन्निलायनम् । तैः । सेतुबन्धैः वालुकादिना प्रस्रवज्जलनिवारणैः । मर्कटवदुत्प्लवनमेव आदि येषां तैः विहारैः क्रियमाणैः । कौमारं कुमारावस्थाम् । जहतुरिति योजना ॥ ६० ॥

नन्दगोपं यशोदां च लीलयाऽऽनन्दयो यथा ।
मम हृन्मन्दिरेऽप्येवं विहरानन्दयन्मनः ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां द्वादशोऽध्यायः ॥ १०-१२ ॥

॥ अथ त्रयोदशोऽध्यायः ॥

श्रीशुक उवाच–

ततश्च पौगण्डवयः श्रितौ व्रजे बभूवतुस्तौ पशुपालसम्मतौ ।
गाश्चारयन्तौ सखिभिः समं पदैर्वृन्दावनं पुण्यमतीव चक्रतुः ॥ १ ॥

सत्यधर्मीया — आपंचमसंवत्सरं बाल्यमानव पौगण्डं तत उत्तरमाषोडशं कैशोरं तत्र कृष्णपौगण्डवयःकृतं चरितं दुरितहारि निरूपयत्यस्मिन्नध्याये । ततो बाल्यात्पौगण्डसंज्ञं वयःश्रितौ । पशवो महान्तस्तत्पालाविति सम्मतौ तत्त्वेन लोकानां सम्मतौ बभूवतुः । सखिभिर्मित्रैः समं साकं गाश्चारयन्तौ पदैः साङ्घ्रिक्षेपैः स्वतः पुण्यं वृन्दावनमतीव पुनरधिकं चक्रतुः ॥ १ ॥

सुमनोरञ्जनी — श्रीहरेः पौगण्डवयसि क्रियमाणं विक्रमं निरूपयत्यस्मिन्नध्याये । ततः कौमारात् । पौगण्डवयः नववर्षलक्षणं वयः । श्रितौ प्राप्तौ । पशुपालनयोग्य इति संमतौ । वृन्दावनं अतीव पुण्यं अत्यन्तपवित्रम् ॥ १ ॥

तन्माधवो वेणुमुदीरयन् वृतो गोपैर्गृणद्भिः स्वयशो बलान्वितः ।
पशून् पुरस्कृत्य पशव्यमाविशद् विहर्तुकामः कुसुमाकरं वनम् ॥ २ ॥

सत्यधर्मीया — स्वयशो गृणद्भिः स्तुवद्भिर्गोपैर्वृतो माधवः सबलः पशून्पुरस्कृत्य, पशव्यं तद्धितम् । विहर्तुकामः । तुं काममनसोरपीत्यादेर्विहर्तुं काम इच्छा यस्य सः । कुसुमाकरं कुसुमानां पुष्पाणामाकरः खनिरुत्पत्तिस्थानमिति यावत् तद्वनं वेणुमुदीरयन्रणयन्प्राविशत् ॥ २ ॥

सुमनोरञ्जनी — माधवः वेणुं उदीरयन् ध्वनयन् । स्वयशः गृणद्भिः वृतः । तद्वनं आविशत् । कीदृशम् । कुसुमाकरं कुसुमोत्पत्तिस्थानम् ॥ २ ॥

तन्मञ्जुघोषालिमृगद्विजाकुलं महन्मनः प्रख्यपयःसरस्वता ।
वातेन जुष्टं शतपत्रगन्धिना निरीक्ष्य रन्तुं भगवान् मनो दधे ॥ ३ ॥

सत्यधर्मीया — मञ्जवो मञ्जुला मनोहराः घोषा येषां तेऽलयश्च भ्रमराश्च मृगाः सिंहादयश्च

द्विजाः कोकिलादिपक्षिणश्च तैराकुलम् । मञ्जुघोषेत्यलिमात्रविशेषणं वा । तन्मञ्जुघोषेण वेणुमनोहरघोषेणालयो मृगा द्विजा आकुला अपूर्वरवश्रवणतो यत्रेति तद्वा । महतां मनो महन्मनस्तेन । प्रख्यं नैर्मल्येन तुल्यं पयो जलं तद्वत्सरस्तद्वान् तदुपरि पतनेन तेनात एव शतपत्राणां कुशेशयानां गन्धः सोऽस्यास्तीति तद्वांस्तेन वातेन जुष्टं निरीक्ष्य भगवान्रन्तुं मनो दधे दध्रे ॥ ३ ॥

सुमनोरञ्जनी — भगवान् । तद्वनं निरीक्ष्य रन्तुं मनो दधे । मंजु मनोहराः घोषाः येषान्ते च ते अलयः भ्रमराः, मृगाः, द्विजाः पक्षिणश्च तैः आकुलं व्याप्तम् । महतां भागवतानां मनःप्रख्यं मनस्तुल्यं तद्वत् स्वच्छं पयो येषु तानि सरांसि यस्मिन्देशे सन्ति तेन । तथा शतपत्राणां पद्मानां गन्धोऽस्मिन्नस्तीति वा, गन्धिनो गन्धवदवयवाः यस्मिन्निति वा तेन । वातेन जुष्टं सेवितम् ॥ ३ ॥

स तत्र तत्रारुणपल्लवश्रिया फलप्रसूनोरुभरेण पादयोः ।
स्पृशच्छिखान् वीक्ष्य वनस्पतीन् मुदा स्मयन्निवाहाग्रजमादिपूरुषः ॥ ४ ॥

सत्यधर्मीया — स आदिपूरुषस्तत्र तत्र वनावनौ । अरुणपल्लवश्रियाऽरुणानां पल्लवानां श्रिया सह । अनेन नीराजनं ध्वन्यते । फलानां प्रसूनानां चोरुर्महान्भरो भारस्तेन । पादयोः, स्पृशन्त्यः

शिखा अग्रभागा येषां ते तान् । अनेन नमनसत्कृतनमनमनवद्ध्वन्यते । वीक्ष्य मुदा स्मयन्नग्रजं बलं प्राह । स्वसाम्राज्यं जनसभाजनार्थमग्रजेऽर्पयन्नाहेतीवशब्देन द्योतयति ॥ ४ ॥

सुमनोरञ्जनी — आदिपूरुषः श्रीकृष्णः । तत्र तत्र वनस्पतीन् वृक्षान् वीक्ष्य । अग्रजं बलभद्रं आहेत्यन्वयः । कथंभूतान् । अरुणानां पल्लवानां नवदलानां श्रिया सह । फलप्रसूनानां फलपुष्पाणां उरुभरेण भारेण । पादयोः रामकृष्णपादयोः । स्पृशंत्यः शिखाः अग्रभागाः येषां तान् । पदरत्नावल्यां अरुणपल्लवश्रिया युक्तयोः पादयोरित्यन्वयो दर्शितः ॥ ४ ॥

श्रीभगवानुवाच—

अहो अमी देववरामरार्चितं पदाम्बुजं ते सुमनःफलार्हणम् ।
नमन्त्युपादाय शिखाभिरात्मनस्तमोपहत्यै तरुजन्म यत्कृतम् ॥ ५ ॥

सत्यधर्मीया — किमाह महामाहात्म्यो हरिर्हलधरं प्रतीत्यतः श्लोकत्रितयेनाह ॥ अहो इति । हे देववर । अमरार्चितं देवपूजितं ते पदाम्बुजं पादकमलं सुमनःफलार्हणं पुष्पफलात्मकं पूजोपायन-मुपादाय शिखाभिर्येन पापेन कृतमात्मनस्तरुजन्म तस्य तमसः पापस्यापहत्या अमी शिखाभिर्न-मन्ति । अहो आश्चर्यचर्योऽस्यार्थित्वमिति भावः ॥ ५ ॥

सुमनोरञ्जनी — हे देववर! सुमनःफलार्हणैः पुष्पफलरूपपूजासाधनैः । सुष्ठु मनसः फलं यध्द्यानादिरूपं तद्रूपार्हणैरिति वा । अमरार्चितं ते पादाम्बुजम् । अमी वृक्षाः । शिखाभिः शिखाग्रैः उपादाय स्वीकृत्य स्पृष्ट्वेति यावत् । त्वां नमन्ति । कस्मै प्रयोजनाय । तमसोऽज्ञानस्य अपहत्यै परिहाराय । यत् यदर्थं त्वत्पूजार्थमेव । तरुजन्म कृतं स्वीकृतं, ऋष्यादिभिरिति । येन तमसा तरुजन्म कृतं तत्तमसोऽपहत्यै इति वा ॥ ५ ॥

एतेऽलिनस्तव यशोऽखिललोकतीर्थं
गायन्त आदिपुरुषानुपथं भजन्ते ।
प्रायो अमी मुनिगणा भवदीयमुख्या
गूढं वनेऽपि न जहत्यनघात्मदैवम् ॥ ६ ॥

सत्यधर्मीया — हे आदिपूरुष अग्रज । अलानि पक्ष्ममूलानि सन्त्येषामित्यलिनः । भ्रमराणां पक्ष्ममूलमलमाहुर्मनीषिण इति वचनात् । अखिललोकतीर्थमखिलानां लोकानां तीर्थमृषिजुष्टजलतुल्यम् । अखिललोकस्य ज्ञानिजनस्य शास्त्ररूपमिति तीर्थं वा । यशो दिक्स्फूर्तिमर्ती कीर्तिम् । दिक्षु यानाद्यश इति छान्दोग्यभाष्योक्तेः । गायन्तः सन्तोऽनुपथमनुपदं वा भजन्ते यतोऽतः प्रायो बाहुल्येन भवदीयेषु

तावकसेवकेषु मुख्या मुनिगणा एवामी । हे अनघ निर्दोष! हे अमर वा । आत्मदैवं स्वस्तुत्यं त्वां वने गूढमपि न जहति न त्यजन्ति । मनुजतनुं निगूढं त्वामेतेऽप्यल्यादितया गूढस्वस्वरूपास्तज्जात्यनुरूपस्वरादिना त्वां सेवन्त इति भावः । अला वृश्चिकलाङ्गूलं तदिवास्त्येषा-मित्यलिनः । अल भूषणादौ सर्वधातुभ्य इन् । मधुपालिनः, षट्पदभ्रमरालय इत्युभयतश्चामरः । पूर्वत्र चोपयुक्त उत्तरत्र चोपयोक्ष्यत इति लेखनमत्रेति ज्ञेयम् ।। ६ ।।

सुमनोरञ्जनी — हे आदिपूरुष! एते अलिनो भ्रमराः । अखिललोकानां तीर्थं पावनम् । शास्त्रेऽप्यंभसि पावन इति च । तव यश एव गायन्ति । अनुपथं मार्गमनुसृत्य । भजन्ते च । इदं नोत्प्रेक्षेत्याह ।। प्राय इति । प्रायः प्रायशः । अमी मुनिगणाः । कीदृशाः । भवदीयेषु वैष्णवेषु मुख्याः । अत एव गूढं मर्त्यलिङ्गधरमपि । अमराणां आत्मदैवं कुलस्वामिनं न जहति न त्यजन्ति ।। ।। ६ ।।

नृत्यन्त्यमी शिखिन ईड्य मुदा हरिण्यः
कुर्वन्ति गोप्य इव ते प्रियमीक्षणेन ।
सूक्तैश्च कोकिलगणा गृहमागताय
धन्यो वनौकस इयान् हि सतां निसर्गः ।। ७ ।।

सत्यधर्मीया — अमी शिखिनः केकिनः । शिखी केकीत्यमरः । नृत्यन्ति । ईड्य मुदेति योग्ययोग्यान्वयि । इदं तु स्वजलदतुलकायच्छविविलोकनघटितनटनानेतान्भ्रातर्यारोप्योचे हरिरित्यामरपामरं विज्ञातमेव सर्वत्रासम्भावितं भगवति योज्यमित्यान्तरङ्गिको भावोऽवसेयः । ईड्यमुदेति पदमेकं वा । या रमयेड्यः स्तुत्योऽहं तद्धेतुकमुदेति तदाऽर्थः । यद्वा शुभ्राण्यप्यभ्राणि सन्ति बलकलेवरमपि शुभ्रमिति तदभ्रभ्रान्त्या तन्नर्तनप्रवर्तनं युक्तमित्येवमुक्तिः । उक्तं च रामायणे । पाण्डुरारुणवर्णानि नीलमाञ्जिष्ठकानि च । प्रविशन्नभ्रजालानि निष्क्रामंश्च पुनः पुनः इति । अत एव नीलमेघसमाभास इत्यादौ नीलादिपदसार्थकता दृढनिरूढेति ज्ञेयम् । हरिण्यो हरिणतरुण्यो गोप्य इव ते ईक्षणेन निरीक्षणेन प्रियं कुर्वन्ति । कोकिलगणाः सूक्तैः पञ्चमरागप्रपञ्चनवचनैर्वनौकसो वनमोको भवनं येषां ते तथा । गृहं वनरूपस्वनिवासमागताय प्रियं कुर्वन्ति किलैतत्सम्भावितं हि यतोऽतो धन्यः कृतार्थः सतां निसर्गः स्वभाव इयानेतावानेव । अमी मुनिगणा इति पूर्वोक्तमत्राप्यनुसन्धेयम् ।। ।। ७ ।।

सुमनोरञ्जनी — हे ईड्य स्तुत्य । शिखिनो मयूराः । त्वां दृष्ट्वा मुदा नृत्यन्ति । हरिण्यः हरिणस्त्रियः । मुदा ईक्षणेन सप्रेमावलोकनेन । गोप्य इव ते प्रियं कुर्वन्ति । गृहं वनौकसां गृहं वनमेव

तत्प्रत्यागताय ते । कोकिलगणाश्च । सूक्तैः मधुरस्वरवचनैः प्रियं कुर्वन्ति । एते वनौकसो धन्याः सज्जनाः । कुतः । हि यस्मात् सतां इयान् यद्गृहमागताय सप्रेमावलोकनसूनृतवाण्यादिभिः प्रीणनमित्येतावान् निसर्गः स्वभावः । तस्मात् । इति रामाविष्टस्वांशमुद्दिश्य भगवानुवाचेति ॥ ७ ॥

श्रीशुक उवाच—

एवं वृन्दावनं कृष्णः श्रीमत् प्रीतमनाः पशून् ।
रेमे सञ्चारयन्नद्रेः सरिद्रोधस्सु सानुगः ॥ ८ ॥

सत्यधर्मीया — एवमग्रजसमर्पितस्वप्राज्यसाम्राज्यः श्रीमद्वृन्दावनमिति प्रीतमना अद्रेर्गोवर्धन-सम्बन्धिनी या सरिद्यमुना तद्रोधस्सु तत्तीरेषु । कूलं रोधश्च तीरं चेत्यमरः । सानुगः पशूंश्चारयन्रेम इत्यन्वयः । अद्रेः सानुग इति वाऽन्वयः । तदणुशृङ्गोपरिग इत्यर्थः ॥ ८ ॥

सुमनोरञ्जनी — एवं श्रीमद्वृन्दावनं प्रति । प्रीतमनाः कृष्णः । सानुगः सन् । अद्रेः पादेषु । सरितां रोधस्सु तटेषु । रेमे चिक्रीडे ॥ ८ ॥

क्वचिद् गायति गायत्सु मदान्धालिष्वनुव्रतैः ।
उपगीयमानचरितः सखिसङ्कर्षणान्वितः ॥ ९ ॥

सत्यधर्मीया — कुसुमरसास्वादनमदेनान्धा अलिनोऽलयो वा तेषु गायत्सु क्वचित्क्वापि गायति । अनुवृतैस्तत्कूजनानुकृतस्वकूजनैरुपगीयमानचरित इदं मुद्रणाभावाद्देवादिभिरित्यर्थः । अनुव्रतैर्गोपालै-रिति व्याख्या सखीति स्तुत्यकृष्णेन सह छत्रिन्यायेन वा तदाप्तमत्वेन स्तव्यतया सम्मतजनविशेष-विषयकतया नेतव्यम् । सखीभिः सङ्कर्षणेन चान्वितोऽनुगतः ॥ ९ ॥

सुमनोरञ्जनी — तत्प्रकारमेवाह ॥ क्वचिदिति नवतिश्लोकैः । अनुव्रतैः अनुगैः । उपगीय-मानचरितः । सख्या श्रीदाम्ना संकर्षणेन चान्वितः । मदान्धेष्वलिषु गायत्सु स्वयं गायति ॥ ९ ॥

क्वचिच्च कलहंसानामनु कूजति कूजितम् ।
अभिनृत्यति नृत्यन्तं बर्हिणं हासयन् क्वचित् ॥ १० ॥

सत्यधर्मीया — कूजितं कूजनमनु कूजति । बर्हिणं मयूरं हासयन्पार्श्वस्थैर्लोकैरयं स्वरो न कृष्णस्वरवदित्युपहासयन् बर्हिणमिति वा ॥ १० ॥

सुमनोरञ्जनी — कलहंसानां कूजितं अनु अनुसृत्य कूजति । बर्हिणं नृत्यन्तं अभि पुरतः नृत्यति । सखीन् हासयन् ॥ १० ॥

मेघगम्भीरया वाचा नामभिर्दूरगान् पशून् ।
क्वचिदाह्वयति प्रीत्या गोगोपालमनोज्ञया ॥ ११ ॥

सत्यधर्मीया — गोगोपालमनोज्ञया मनोहारिण्या मेघगम्भीरया वाचा नामभिः स्वसङ्केतितैः । तन्मनो जानातीति तथा ॥ ११ ॥

सुमनोरञ्जनी — क्वचिच्च गवां गोपालानां च मनोज्ञया मनोहारिण्या । वाचा । नामभिः गङ्गा यमुनेत्यादिस्वसंकेतितनामभिः ॥ ११ ॥

चकोरक्रौञ्चचक्राह्वभारद्वाजालिबर्हिणाम् ।
अनुरौति स्म सत्वानां भीतवद् व्याघ्रसिंहयोः ॥ १२ ॥

सत्यधर्मीया — चकोरक्रौञ्चचक्राह्वभारद्वाजालिबर्हिणामित्यत्रान्तराविद्यमानमाह्वेति देहलीदीप-न्यायेन सर्वान्वयि । चकोरेत्यादि बर्हिणान्तं गतम् । चकोरादीनां सत्वानामिति सामानाधिकरण्यम् । वैय्यधिकरण्येन तदितरेषां सत्त्वानां प्राणिनामिति वा । अनु रौति तद्रुतवद्रुतं करोतीत्यर्थः । सिंहव्याघ्रयोः सकाशाद्भीतवदनुरौति । व्याघ्रो मां ग्रसत्यर आगच्छेति यं कश्चित्प्रति शब्दं करोति ॥ ॥ १२ ॥

सुमनोरञ्जनी — चकोरादीन् बर्ह्यन्तान् अनुकृत्य रौति । सत्वानां इतरसत्वानाम् । व्याघ्रादीनप्यनुरौति । क्वचिच्च व्याघ्रसिंहयोः सकाशात् भीतवत् प्रदर्शयति । पलायतीति भावः ॥१२॥

क्वचित् क्रीडापरिश्रान्तं गोपोत्सङ्गोपबर्हणम् ।
स्वयं विश्रामयत्यार्यं पादसंवाहनादिभिः ॥ १३ ॥

सत्यधर्मीया — गोपस्य यस्य कस्यचिदुत्सङ्ग आरोह उपबर्हणं शिरःपीठम्, आर्यं पादसंवाहनादिभिः स्वयं साक्षाद्विश्रामयति । वा चित्तविराग इत्यनुवृत्तो वाशब्दो व्यवस्थित-विकल्पार्थः । विश्रमं करोति । रजो विश्रामयन्राज्ञां धुर्यान्विश्रामयेति स इत्यादिवत् ॥ १३ ॥

सुमनोरञ्जनी — गोपस्य उत्सङ्ग एव उपबर्हणं शिरोवलम्बनं यस्य सः । तं आर्यं ज्येष्ठं बलभद्रम् । पादसंवाहनादिभिः । विश्रामयति विगतश्रममकरोत् । इदं च बलरामस्य लक्ष्मणजन्मनि कृतस्वयोग्यताधिकसाधनस्य ह्रासार्थं मन्तव्यम् । तदुक्तं श्रीमन्महाभारततात्पर्ये ॥ १३ ॥

नृत्यतो गायतो वाऽपि वल्गतो युध्यतो मिथः ।
गृहीतहस्तौ गोपालान् हसन्तौ प्रशशंसतुः ॥ १४ ॥

सत्यधर्मीया — वल्गत उत्प्लवनादि कुर्वतः । गृहीततद्धस्तौ रामकृष्णौ हसन्तौ प्रशशंसतुर्नर्तनादिकं बहुसमीचीनमिति तुष्टुवतुः ॥ १४ ॥

सुमनोरञ्जनी — रामकृष्णौ गृहीतहस्तौ वल्गतः उत्प्लवनं कुर्वतः । नृत्यादीन् कुर्वतो गोपालान् सम्यक् नृत्यतः प्रशशंसतुः । अलं हसन्तौ बभूवतुः ॥ १४ ॥

क्वचित् पल्लवतल्पेषु नियुद्धश्रमकर्शितः ।
वृक्षमूलाश्रयः शेते गोपोत्सङ्गोपबर्हणः ॥ १५ ॥

सत्यधर्मीया — नियुद्धं द्वन्द्वयुद्धं तेन जातो यः श्रमस्तेन कर्शितः क्लिष्ट इव । पल्लवतल्पेषु कोमलकिसलयकलितास्तरणेषु ॥ १५ ॥

सुमनोरञ्जनी — नियुद्धेन यः श्रमस्तेन कर्शित इव । पल्लवमयतल्पेषु शेते स्वपिति ॥ १५ ॥

पादसंवाहनं चक्रुः केचित् तस्य महात्मनः ।
अपरे हतपाप्मानो व्यजनैः समवीजयन् ॥ १६ ॥

सत्यधर्मीया — हतः पाप्मा येषां ते तथा । इदं संवहद्वीजयद्विशेषणम् ॥ १६ ॥

सुमनोरञ्जनी — पादयोः संवाहनं कराभ्यां पीडनम् । व्यजनैः अपरे समवीजयन् । शुकः तान् स्तौति । हतपाप्मान इति ॥ १६ ॥

अन्ये तदनुरूपाणि मनोज्ञानि महात्मनः ।
गायन्ति स्म महाराज स्नेहक्लिन्नधियः शनैः ॥ १७ ॥

सत्यधर्मीया — तदनुरूपाणि चरितानीति पूरणीयम् । स्नेहेन, एतत्पादस्य कृष्णहस्तस्पर्शायोग्यत्वादेवोत्तरत्र गूढत्वप्राप्तिः फलमित्युत्प्रेक्षयन्ति । भक्तिरसेन क्लिन्ना आर्द्रा धीर्येषां ते तथा शनैर्निद्राविद्रुतिदरतः ॥ १७ ॥

सुमनोरञ्जनी — अन्ये तदनुरूपाणि तत्कालोचितानि । महात्मनः श्रीकृष्णस्य । मनोज्ञानि सन्तोषकारीणि । शनैः गायन्ति गानानि कुर्वन्ति । सर्वेषां मनोज्ञानि महात्मनः चरित्राणि गायन्तीति वा । स्नेहेन क्लिन्ना आर्द्रा धीर्येषां ते तथाविधाः ॥ १७ ॥

एवं निगूढात्ममतिः स्वमायया गोपात्मजत्वं चरितैर्विडम्बयन् ।
रेमे रमालालितपादपल्लवो ग्राम्यैः समं ग्राम्यवदीशचेष्टितम् ॥ १८ ॥

सत्यधर्मीया — एवं निगूढात्मनो मतिर्यस्य सः । स्वरूपभूतेत्यात्मा मतिर्यस्येति वा । गूहनमीहात एव नेतरत इत्याह ॥ स्वमाययेति । स्वेच्छयेत्यर्थः । चरितैः कर्मभिर्गोपात्मजत्वं विडम्बयन्ननुकुर्वन् रमालालितपादपल्लवोऽपि ग्राम्यैरश्लीलजनैः समं साकं रेमे । नरेषु जनने नरवत्प्रवृत्तिरित्यादेरीशचेष्टितं ग्राम्यवदश्लीलवद्भवति । अयं चानुकरणस्य महामहिमा ॥ १८ ॥

सुमनोरञ्जनी — स्वमायया स्वेच्छया निगूढा अनाविर्भाविता आत्ममतिः आत्मा परमात्मेति मतिर्येन स तथा । अन्येषामिति शेषः । चरितैः गोपात्मजत्वं नन्दात्मजत्वम् । विडम्बयन् ज्ञापयन् । रमालालितपादपल्लवोऽपि । ग्राम्यैः भूतैः समं ग्राम्यवदेव रेमे । तत्किमर्थमित्यत आह ॥ ईशेति । ईशचेष्टितं, एवमेव ग्राम्यैः समं ग्राम्यवदेव । तदुक्तं भारततात्पर्ये । यद्वा एवं रेमे । कुत इति चेत् । ईशचेष्टितं ग्राम्यैः समं ग्राम्यवदेवेति ॥ १८ ॥

धन्येयमद्य धरणी तृणवीरुधस्तत्
पादस्पृशो द्रुमलताः करजाभिमृष्टाः ।
नद्योऽद्रयः खगमृगाः सदयावलोकै-
र्गोप्योऽन्तरेण भुजयोरपि यत्स्पृहा श्रीः ॥१९॥

सत्यधर्मीया — हरिचरणस्मरणपरवशचेताः शुकः स्वयमवन्यादिधन्यतां मनस्यानीय लोकावगत्यै प्रकाशयति ॥ धन्येति । अद्य धरिणीयं धन्या । तृणवीरुधस्तृणानि श्रीतृणानि धन्याः । तत्र तन्त्रम् । यत्पादस्पृशो यस्य हरेः पादौ स्पृशन्तीति तास्तथा । नद्योऽद्रयश्च धन्याः । सदयावलोकैः खगमृगा धन्याः । श्रीरपि यत्स्पृहा यस्योरसः स्पृहेच्छा यस्याः सा । तद्भुजयोरन्तरेणोरसाऽऽलिङ्गितेन गोप्यो धन्याः । परवशश्रीरियमिति न पूर्वोत्तरसङ्गतिरेतस्याः ॥ १९ ॥

सुमनोरञ्जनी — शुकः सानन्दं तदानीन्तनतृणादिकं स्तौति ॥ धन्येति । इयं धरिणी भूमिः धन्या । तृणानि वीरुधः पत्रशाखादिप्रतानवत्यो लताः धन्या इति वचनव्यत्ययेनानुवर्तते । कुतः । यस्मादेताः तत्पादस्पृशः तस्य श्रीकृष्णस्य पादं स्पृशन्तीति तथोक्ताः । द्रुमलताश्च धन्याः । करजैः नखैः अभिमृष्टाः स्पृष्टाः नद्यादयः । सदयैः अवलोकैः अभिमृष्टाः अवलोकिताः । श्रीरपि, यत्स्पृहेति सर्वत्रान्वेति । येभ्यः पादस्पर्शादिभ्यः स्पृहयतीति तथोक्तेति । भुजयोरन्तरेण गोप्योऽपि अभिमृष्टाः अतस्ता अपि धन्याः ॥ १९ ॥

श्रीदामा नाम गोपालो रामकेशवयोः सखा ।
सुबलास्तोककृष्णाद्यान् गोपान् प्रेम्णेदमब्रवीत् ॥ २० ॥

सत्यधर्मीया — प्रकृत आह ॥ श्रीदामेति । सुबलास्तोककृष्णाद्यान्गोपान्प्रेम्णा स्नेहेनेदं वक्ष्यमाणमब्रवीत् । सुबलस्तोककृष्णाद्या गोपाः प्रेम्णेदमब्रुवन्निति पाठः सरलः । श्रीदाम्न एकस्योत्कृष्य कथने निमित्तं बहुप्रेमपात्रता । सुबलः कृष्णश्चान्यौ बलकृष्णाभ्याम् ॥ २० ॥

सुमनोरञ्जनी — इदानीं धेनुकासुरसंहाररूपं श्रीकृष्णविक्रमं वक्तुं प्रक्रमते ॥ श्रीदामेत्यादिना । श्रीदामा तन्नामकः । सुबलश्च अशोकश्च कृष्णश्च त एवाद्याः येषां तान् ॥ २० ॥

रामराम महासत्त्व कृष्ण दुष्टनिबर्हण ।
इतोऽविदूरे सुमहद्वनं तालालिसङ्कुलम् ॥ २१ ॥

सत्यधर्मीया — श्रीदामा श्रीदामोदरमतद्धागत्वाद्धेनुकस्यापुरस्कृत्य पुरस्कृत्य न तिरस्कार्योऽयमनार्य इति मतिमान् किञ्चायं तालाङ्क इति नेयादुपायात्तमन्यं निवारयेदिति तन्मुखबन्धं विधातुं बलं प्रत्यादावलपदित्यालपति ॥ राम रामेति । अविदूरे समीपे । तालानां तृणराजतरूणामालयः पङ्क्तयस्ताभिः सङ्कुलं व्याप्तम् ॥ २१ ॥

सुमनोरञ्जनी — महत्सत्वं बलं यस्यासौ तथोक्तः । दुष्टानां निबर्हणं निग्रहो यस्मात्स तथोक्तः । अविदूरे समीपे । तालानां तालवृक्षाणां आलिभिः पङ्क्तिभिः सङ्कुलं निबिडम् ॥ २१ ॥

फलानि तत्र भूरीणि पतन्ति पतितानि च ।
सन्ति किन्त्ववरुद्धानि धेनुकेन दुरात्मना ॥ २२ ॥

सत्यधर्मीया — पतितानि प्राक् , पतन्तीदानीम् । तर्हि गच्छ भक्षय को नेति वदतीत्यत आह । किन्तु दुरात्मना धेनुकेन तन्नाम्नाऽसुरेणावरुद्धानि प्रतिबद्धानीति ॥ २२ ॥

सुमनोरञ्जनी — भूरीणि बहूनि । सन्ति चेदुपभुक्ष्मामह इति तत्राह ॥ किं त्विति ॥ २२ ॥

सोऽतितीव्रोऽसुरो राम हे कृष्ण खररूपधृक् ।
आत्मतुल्यबलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः ॥ २३ ॥

सत्यधर्मीया — कुमारान्, गृहीत्वा गत्वा मारयित्वा तं भुङ्क्तेत्युक्तावाह ॥ स इति । अतितीव्रो बहुतापकः । तीव्रमत्युत्कटकटुकनितान्तेष्वन्यवन्मतमिति विश्वः । तद्रूपं निरूपयति ॥ खररूपधृगिति । गर्दभाकारः । आत्मतुल्यबलैरात्मना तुल्यं स्वबलसदृशं बलं येषां ते तैः । साम्येति पाठे आत्मनो बलेन साम्यं यस्य तद्बलं येषामिति विग्रहः । अन्यैस्तर्हि भेदं विधायादाय फलान्यागच्छेत्यत आह ॥ ज्ञातिभिरिति । नास्मच्चतुर्विधोपाय साध्यः स इति भावः ॥ २३ ॥

सुमनोरञ्जनी — एवं चेत्स एव हन्तव्य इति तत्राह ।। स इति । तीव्रः क्रूरः । खररूपं गर्दभदेहं धारयतीति तथोक्तः । असहायश्चेत्तत्राह ।। आत्मेति । आत्मनः आत्मबलस्य साम्यं यस्य तदात्मसाम्यम् । तच्च तद्बलं येषां तैः । आत्मनः साम्यं खररूपपादिलक्षणं बलं च येषां तैरिति ।। ।। २३ ।।

तस्मात् कृतनराहाराद् भीतैर्नृभिरमित्रहन् ।
न सेव्यते पशुगणैः पक्षिसङ्घैर्विवर्जितम् ।। २४ ।।

सत्यधर्मीया — गताश्चेत्किं गतिं यापयति स इत्यत आह । कृतनराहारात्कृतो नराणां गतानामाहारो येन तस्मादिति । हे अमित्रहन् शत्रुसंहारक । पृथक् पृथगन्वयः । भीतैर्नृभिर्वनं न सेव्यते । पशुगणैः पक्षिसङ्घैश्च विवर्जितम् । विवर्जितमिति सरलः पाठः । विवर्जितैरिति पाठे सुपां सुपो भवन्तीति प्रथमायास्तृतीयादेश इत्युपदिशन्ति । भीतैः कथञ्चिद्गतैर्विवर्जितैः प्राणेभ्यः शवैः सेव्यत इति वा ।। २४ ।।

सुमनोरञ्जनी — कृतः नररूप आहारो येन स तथा । तस्माद्भीतैः । विवर्जितं परित्यक्तम् ।। ।। २४ ।।

विद्यन्तेऽभुक्तपूर्वाणि फलानि सुरभीणि च ।
एष वै सुरभिर्गन्धो विषूचीनो विगृह्यते ।। २५ ।।

सत्यधर्मीया — सुरभीण्यभुक्तपूर्वाणि पूर्वमभुक्तान्यभुक्तपूर्वाणि । एतदावासात्प्राग्भुक्तपूर्वाणि पूर्वजैरिति वा । पक्षद्वन्द्वेऽपि तत्सुरसता कथं ज्ञातेत्यत ऊहनत इत्याह ।। एष इति । विषूचीनो विष्वगञ्चतीति विष्वगिति स्थिते ऋत्विगित्यादिनाऽञ्चेः सुप्युपपदे क्विन्प्रत्यये तस्य सर्वापहारित्वेन लोपे तस्यानिदितां हल उपधायाः क्ङितीत्युपधानकारलोपे विभाषाञ्चेरदिविस्त्रयां स्वार्थे खप्रत्यये तस्येनादेशे यचि भमिति भसंज्ञायामच इति धात्वकारलोपे चावित्यणो दीर्घे विषूचीनो व्याप्त इत्यर्थः। सुरभिर्गन्धो विगृह्यते विशेषेण गृह्यते नासिकयेति शेषः ।। २५ ।।

सुमनोरञ्जनी — अन्यैः अभुक्तपूर्वाणि पूर्वमभुक्तानि । विषूचीनः विष्वक् सर्वतः अंचति प्रसरतीति विषूचीनः । विशेषेण गृह्यते घ्राणेन ।। २५ ।।

प्रयच्छ तानि नः कृष्ण गन्धलोभितचेतसाम् ।
वाञ्छाऽऽसीन्महती राम गम्यतां यदि रोचते ।। २६ ।।

सत्यधर्मीया — अन्ततो गत्वा बलबलोदयं कृष्णत एवेति तं पुरस्करोतीतीरयति ।। प्रयच्छ तानि नः कृष्ण इति । गन्धेन लोभितम् । लुभ गार्ध्ये । गृध अभिकाङ्क्षायामिति स्मरणात्साकाङ्क्षं चेतो येषां तेषां नो, लोभितेति णिजन्तान्निष्ठा तानि फलानि प्रयच्छ देहि । हे राम! महती, विना तत्फलदानमनिवर्त्या वाञ्छाऽऽसीत् । यदि तुभ्यं रोचते तर्हि गम्यताम् ।। २६ ।।

सुमनोरञ्जनी — तानि नः अस्मभ्यं प्रयच्छ । कुतः । गन्धेन लोभितानि आकांक्षायुक्तानि चेतांसि येषां तेषाम् । अस्माकं वाञ्छा तत्फलेषु इच्छा आसीत् अत इत्यर्थः । यदि तत्र गमनं भवते रोचते तर्हि गम्यताम् ।। २६ ।।

एवं सुहृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया ।
प्रहस्य जग्मतुर्गोपैर्वृतं तालवनं प्रभू ।। २७ ।।

सत्यधर्मीया — एवं सुहृदः श्रीदाम्नः सुहृदां श्रीदामादीनां वा वचः श्रुत्वा सुहृत्प्रियचिकीर्षया कियानयं खर इति प्रहस्य गोपैर्वृतं तालवनं प्रतिजग्मतुः । एवं साहसं नानुष्ठेयमित्यत आह ।। प्रभू इति ।। २७ ।।

सुमनोरञ्जनी — एवं उक्तप्रकारेण । सुहृदां वचः ।। २७ ।।

बलः प्रविश्य बाहुभ्यां तालान् सम्परिकम्पयन् ।
फलानि पातयामास मतङ्गज इवौजसा ।। २८ ।।

सत्यधर्मीया — तालो द्रुमभेद इति विश्वः । मतङ्गजो मत्तगजः । ओजसा बलेन । ओजोऽवष्टम्भबलयोरिति यादवः ।। २८ ।।

सुमनोरञ्जनी — तालान् तालवृक्षान् मतङ्गज इव कुरङ्ग इव । ओजसा बलेन ।। २८ ।।

फलानां पततां शब्दं निशम्यासुररासभः ।
अभ्यधावत् क्षितितलं सनगं परिकम्पयन् ।। २९ ।।

सत्यधर्मीया — असुररासभो रासभरूपी दैत्यः सनगं सवृक्षं क्षितितलं परिकम्पयन्नभ्यधावत् ।। ।। २९ ।।

सुमनोरञ्जनी — असुररासभः असुरस्वरूपो रासभः । सनगं नगैः वृक्षैः सहितम् ।। २९ ।।

समेत्य तरसाऽऽवृत्य द्वाभ्यां पद्भ्यां बलं बली ।
निहत्योरसि काशब्दं मुञ्चन् पर्यचरद् बलम् ॥ ३० ॥

सत्यधर्मीया — बलं समेत्य सङ्गम्य तरसाऽऽवृत्य परावृत्य द्वाभ्यां क्षितितलं स्पृष्ट्वा पद्भ्यां पाश्चात्त्याभ्याम् । गूढपात्परिवृढस्य पादघात एवारुन्तुदस्तत्रापि पाश्चात्याङ्घ्रिकुट्टनं बहुरोषावहमिति तत्स्वाभाविकेदं क्रियापदेशेन ग्रन्थकृदुध्वनयामासेति ज्ञेयम् । उरसि निहत्योरगत्वादुरसि ताडनमपि तथा काशब्दं स्वजात्यनुरूप एव पथ्यक्षपुरुषान्यतमत्वाभावेऽपि शब्दशब्दस्य तस्मिन्परतः कुशब्दस्य कादेश आर्षः । अनुकरणशब्दो वा । इतिशब्दकलोपीति । इतिशब्दव्यपेतानीत्यादेः शेषो वेतिशब्दस्य मुञ्चन्बलं पर्यचरत् । अयमपि स्वभावो गर्दभानाम् ॥ ३० ॥

सुमनोरञ्जनी — तरसा समेत्य आवृत्य पराङ्मुखो भूत्वा । बलं द्वाभ्यां पद्भ्यां उरसि निहत्य ताडयित्वा काशब्दं कुत्सितं शब्दं पर्यचरत् परितश्चचार ॥ ३० ॥

पुनरासाद्य संरब्ध उपक्रष्टुं पराक् स्थितः ।
चरणावपरौ राजन् बलाय प्राहिणोद् रुषा ॥ ३१ ॥

सत्यधर्मीया — पुनर्बलमासाद्योपक्रष्टुं काशब्दं कर्तुं संरब्धः संरम्भयुतः पराक् स्थितः पुरेवापरौ चरणौ बलाय प्राहिणोत्ताभ्यां तताडेति यावत् ॥ ३१ ॥

सुमनोरञ्जनी — पुनरपि बलं बलभद्रं उपक्रोष्टम् । क्रोशतिरत्रक्षेपार्थः । क्रोष्टुं क्षेप्तुमिति रत्नावली । पराक् स्थितः सन् । अपरौ पाश्चात्यौ । प्राहिणोत् चिक्षेप ॥ ३१ ॥

स तं गृहीत्वाऽथ पदोर्भ्रामयित्वैकपाणिना ।
चिक्षेप तृणराजाग्रे भ्रामणत्यक्तजीवितम् ॥ ३२ ॥

सत्यधर्मीया — स बलस्तं खरासुरं पदोः पादयोरेकपाणिनैकेन हस्तेन भ्रामयित्वा तेन भ्रामणेनैव त्यक्तं जीवितं येन तं मृतं, तृणराजस्तालस्तदग्रे तत्प्रान्तभागे चिक्षेप ॥ ३२ ॥

सुमनोरञ्जनी — सः बलभद्रः । पदोः तं रासभं एकपाणिना गृहीत्वा । भ्रामणेन त्यक्तं जीवितं जीवनं येन तम् । तृणराजस्तालः तस्याग्रे ॥ ३२ ॥

तेनाहतो महातालः पतमानो बृहच्छिराः ।
पार्श्वस्थं कम्पयन् भग्नः स चान्यं सोऽपि चापरम् ॥ ३३ ॥

सत्यधर्मीया — तेन खरशवेनाहतस्ताडितो बृहच्छिराः पतमानो हि पतन्महातालः पार्श्वस्थं तालं कम्पयन्सन्स्वयं भग्नः । स च तालविलोलितस्तालोऽन्यत्तालं सोऽप्यन्यमित्येवं पङ्क्तिशः समकम्पत ॥ ॥ ३३ ॥

सुमनोरञ्जनी — तेन खरदेहेन । आहतः ताडितः पार्श्वस्थं तालम् । कंपयन् स्वयं भग्नः ॥३३॥

बलस्य लीलयोत्सृष्टखरदेहहताहताः ।
तालाश्चकम्पिरे सर्वे महावातेरिता इव ॥ ३४ ॥

सत्यधर्मीया — स्वदेहहत एकस्तदाहतहता महावातेरिता इव सर्वे तरवश्चकम्पिरे ॥ ३४ ॥

सुमनोरञ्जनी — बलस्य रामस्य लीलया अनायासक्रियया उत्सृष्टः तालोपरि क्षिप्तः यः खरदेहः तेन हतो यः तालः तेनाहता इत्यर्थः । महावातेन चण्डमारुतेन ईरिताः नुन्ना इव चकंपिरे अकंपन्त ॥ ॥ ३४ ॥

नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे ।
ओतप्रोतमिदं यस्मिन् तन्तुष्वङ्ग यथा पटः ॥ ३५ ॥

सत्यधर्मीया — एकतालताडने तालालीनां कम्पकं बलस्य बलमियदहो कथमिति मनसि सन्देहं कुर्वन्तमिवोर्वीशं विदित्वा शुकस्तमपास्तं कर्तुं किञ्च स्वस्य तत्त्वेनैव तत्त्वतो मुक्तावस्थानं चेति तन्महिमानमाह ॥ नैतदिति । जगदीश्वरे जगत्स्वामिनि । अङ्ग हे परीक्षित् । तन्तुषु पटो यथा तथेदं जगदोतं प्रोतं तद्धारकतयाऽनन्ते तन्नाम्नि शेषे । धराऽखिलेयम् । ननु सर्षपायतीत्यादिप्रसिद्धं हिराह । तस्मिन्नेतत्खरासुरासुहरणं तरुकम्पनं चेत्येतच्चित्रमाश्चर्यं नेति सर्वोपपत्तिकृद्भवतीति भगवति जगदीश्वरे कृष्णे सहाये सतीति वा ॥ ३५ ॥

सुमनोरञ्जनी — जगत इन्द्रादिजगत ईश्वरे । एतत् धेनुकासंहरणादिकम् । अनन्ते शेषावतारे । हि यस्मात् । इदं जगत् । तन्तुषु पटो यथा तथा । यस्मिन् ओतप्रोतं ओतप्रोतमिव तदाधारतया स्थितमिति यावत् । अङ्गेति परीक्षितं प्रति प्रियसंबोधनम् ॥ ३५ ॥

ततः कृष्णं च रामं च ज्ञातयो धेनुकस्य ये ।
क्रोष्टारोऽभ्यद्रवन् सर्वे संरब्धा हतबान्धवाः ॥ ३६ ॥

सत्यधर्मीया — क्रोष्टारः । क्रोष्टृशब्दो ऋकारान्तः । काशब्दं कुर्वन्तो, हतो बान्धवो धेनुको येषां ते तथाऽभ्यद्रवन् ॥ ३६ ॥

सुमनोरञ्जनी — धेनुकस्य ये ज्ञातयः । क्रोष्टारः आक्रोशन्तः । संरब्धाः क्रुद्धाः । हतो बान्धवो येषां ते ।। ३६ ।।

तांस्तानापततः कृष्णो रामश्च नृप लीलया ।
गृहीतपश्चाच्चरणान् प्राहिणोत् तृणराजसु ।। ३७ ।।

सत्यधर्मीया — प्राहिण्णोदिति पृथगन्वेति । तृणराजस्विति, जानन्ति पूर्वराजान इत्यादिवत्समासान्तविधेरनित्यताश्रित्योक्तमिति ज्ञेयम् । तृणराजानां तालानां सूर्गर्भवद्धिद्यमानफलस्तबकमोचनं यस्मिन्कर्मणि तद्यथा भवति तथोपरि प्राहिणोदिति वा । ह्रस्वो नपुंसक इति ह्रस्वः । सा तु हिंसायां सूस्तू गर्भविमोचन इति विश्वः ।। ३७ ।।

सुमनोरञ्जनी — आपततः आगच्छतः । गृहीतौ पश्चाच्चरणौ येषां तान् । तृणराजसु तालद्रुमेषु ।। ३७ ।।

फलप्रकरसङ्कीर्णा दैत्यदेहैर्गतासुभिः ।
रराज भूः सतालाग्रैर्घनैरिव नभस्तलम् ।। ३८ ।।

सत्यधर्मीया — फलानां प्रकरो निकरस्तेन सङ्कीर्णा आकुला । गतासुभिर्दैत्यदेहैर्गता असवः प्राणा येभ्यस्तैः । सतालाग्रैस्तालशिरोभिः सहितैरिति देहविशेषणम् । घनैः सहितं नभस्तलमाकाशप्रदेश इव भू रराजाशोभत । नभस्तलमिन्द्रनीलमिति सुधाभिधानादिन्द्रनीलवच्च रराजेति वा । फलानां नैल्यात्तदुपमता चेति तलशब्दश्च केवलप्रदेशमात्रार्थकतापेक्षया युक्ततया चेति ज्ञेयम् । चशब्दाध्याहारमात्रं सोढव्यम् ।। ३८ ।।

सुमनोरञ्जनी — फलानां प्रकरः समूहः तेन सङ्कीर्णा व्याप्ता । दैत्यदेहैः निमित्तैः । दैत्यदेहैश्च तालाग्रैश्च सङ्कीर्णेति वा । अनेन अरुणश्वेतनीलमेघसादृश्यं संपादितं भवति । घनैः मेघैः । नभः स्थलमिव भूः रराजेति ।। ३८ ।।

तयोस्तत् सुमहत्कर्म निशाम्य विबुधादयः ।
मुमुचुः पुष्पवर्षाणि चक्रुर्वाद्यानि तुष्टुवुः ।। ३९ ।।

सत्यधर्मीया — वाद्यानि चक्रुरवादयन् ।। ३९ ।।

सुमनोरञ्जनी — तयोः कृष्णरामयोः । निशाम्य दृष्ट्वा । विबुधादयः देवगन्धर्वादयः । पुष्पवर्षाणि मुमुचुः पुष्पवृष्टिमकुर्वन् ।। ३९ ।।

अथ तालफलान्यादन् मनुष्या गतसाध्वसाः ।
तृणं च पशवश्चेरुर्हतधेनुककानने ॥ ४० ॥

सत्यधर्मीया — आदन्भक्षयन् । गतं साध्वसं भयं येषां ते । हतो धेनुको यस्मिंस्तच्च तत्काननं वनं च तस्मिन् । तृणं पशवश्चेरुरभक्षयन् ॥ ४० ॥

सुमनोरञ्जनी — अथ अनन्तम् । गतं अपगतं साध्वसं भयं येषां ते तथाविधाः । आदन् भक्षयामासुः । चेरुः अभक्षयन् ॥ ४० ॥

कृष्णः कमलपत्राक्षः पुण्यश्रवणकीर्तनः ।
स्तूयमानोऽनुगैर्गोपैः साग्रजो व्रजमाव्रजत् ॥ ४१ ॥

सत्यधर्मीया — पुण्यानि तद्धन्ति श्रवणानि येन तत्कीर्तनं यस्य स तथा ॥ ४१ ॥

सुमनोरञ्जनी — कमलपत्रवत् विशाले आरक्तरेखासम्पन्ने च अक्षिणी यस्य सः । पुण्यं मनोहरं पुण्यकरं वा श्रवणं यद्विषयकं तादृशं कीर्तनं च यस्य सः । साग्रजः सहरामः ॥ ४१ ॥

तं गोरजश्छुरितकुन्तलबद्धबर्ह-
वन्यप्रसूनरुचिरेक्षणचारुहासम् ।
वेणुं क्वणन्तमनुगैरुपगीतकीर्तिं
गोप्यो दिदृक्षितदृशोऽभ्यगमन् समेताः ॥ ४२ ॥

सत्यधर्मीया — गवां रजसा छुरिता रूषिताश्च ते कुन्तलाश्च तेषु बद्धानि बर्हाणि पिच्छानि, वन्यानि वनभवानि प्रसूनानि यस्य स चासौ, रुचिरे ईक्षणे यस्य स चासौ चारुर्मनोहरो हासो यस्य च । पिच्छबर्हे नपुंसक इत्यमरः । दिदृक्षिता दर्शनेच्छावत्त्वेनाशङ्किता दृशो यासां ता गोप्यः समेता मिलिता वेणुं क्वणन्तमनुगैरुपगीतकीर्तिं प्रत्यगमन् ॥ ४२ ॥

सुमनोरञ्जनी — गोरजसा छुरितानि मिश्रितानि । तेषु कुन्तलेषु वक्रकेशेषु बद्धानि बर्हाणि, वन्यानि वनजानि प्रसूनानि च यस्य । रुचिरे ईक्षणे चारुहासश्च यस्य । तं क्वणन्तं वादयन्तम् । दिदृक्षिताः दर्शनोत्कण्ठाः दृशो यासां ताः ॥ ४२ ॥

पीत्वा मुकुन्दमुखसारघमक्षिभृङ्गै-
स्तापं जहुर्विरहजं व्रजयोषितोऽह्नि ।
तत्सत्कृतिं समधिगम्य विवेश गोष्ठं
सव्रीडहासविगमो यदपाङ्गमोक्षः ॥ ४३ ॥

सत्यधर्मीया — व्रजयोषितोऽह्नि विरहजं हरिविरहजातं तापमक्षिभृङ्गैरक्षीण्येव भृङ्गास्तैर्मुकुन्द-मुखसारघं मुकुन्दस्य मुखमेव सरघा मधुमक्षिकास्तासामिदं सारघं मधु पीत्वा । सरघा मधुमक्षिकेत्यमरः । सरं गतिं घातयति हन्त्यन्येभ्योऽपीति डः णिलोपटिलोपः रघणं रघि गतौ स्वनौघश्चेति घित्करणादन्येभ्योऽपीति घः । आगमशासनस्यानित्यत्वान्न नुम् । सहरघं वर्तत इति सरघा । यासामपाङ्गमोक्षो वीक्षणं तन्निरीक्षणम् । सव्रीडहासविगमो व्रीडा लज्जा तया सहितः सव्रीडो हासस्तस्य विगमो येन स लज्जाहासनिरासककटाक्षमोक्षो यासां तत्सत्कृतिं समधिगम्य प्राप्य गोष्ठं विवेश । यासां सव्रीडहासविगमो बहिर्व्रीडासहितहासप्रसरोऽपाङ्गस्यानङ्गस्य तदुपद्रवस्येति यावत् मोक्षो मोचनं येन सः । यासां तत्सत्कृतिं सत्कारमिति वा ॥ ४३ ॥

सुमनोरञ्जनी — व्रजयोषितः गोप्यः । मुकुन्दस्य मुखपद्मे विद्यमानं सारघं, सरघा मधुमक्षिकेत्यमरात् तत्सम्बन्धि सारघं मधु । अक्षिभृङ्गैः पीत्वा अह्नि विरहजं श्रीकृष्णविरहेणोत्पन्नं तापं मनस्तापम् । जहुः तत्यजुः । सव्रीडः व्रीडया लज्जया सहितः हासः तस्य विगमो निर्गमः । अपांगमोक्षः कटाक्षवीक्षणं चेति यत् तत् सत्कृतिं गोपीजनकृतसत्कारं समधिगम्य ज्ञात्वा प्राप्य वा । गोष्ठं विवेशेति सम्बन्धः ॥ ४३ ॥

तदा यशोदारोहिण्यौ पुत्रयोः पुत्रवत्सले ।
यथाकालं यथाकामं व्यधत्तां परमाशिषः ॥ ४४ ॥

सत्यधर्मीया — रोहिणीयं बाल्हीकपुत्री कौरव्यायणी । यथोक्तं बृहदारण्यकभाष्ये । बाल्हीकसुता रोहिणी । अतो बलभद्रः कौरव्यायणीपुत्र इति । प्रसङ्गसङ्गत्येदमुक्तमिति ज्ञेयम् । आशिषः परं व्यधत्तां परमाशिषो व्यधत्तामिति वा ॥ ४४ ॥

सुमनोरञ्जनी — यथाकालं वयोनुसारेण । यथायोगं योग्यतानुसारेण । आशिषः आशीर्वचनानि ॥ ४४ ॥

विगताध्वश्रमौ तत्र मज्जनोन्मर्दनादिभिः ।
नीवीं वसित्वा रुचिरां दिव्यस्रग्गन्धमण्डितौ ॥ ४५ ॥

सत्यधर्मीया — मज्जनं स्नपनमुन्मर्दनमङ्गादेर्मलनिष्कासनं तदादिभिरादर्शप्रदर्शनादिभिः । रुचिरां नीवीं वस्त्रं वसित्वाऽऽच्छाद्य । वस्त्रबन्धेऽपि नीवीत्यमरः । स्त्रीलिङ्गो नीवीशब्दः स्त्रीपुंससामान्यकटीवस्त्रवाचक इति बहवः । स्त्रीकटीवस्त्रमात्रवाचक इति पक्षेऽप्यन्वयव्यत्यसनेनानुपदं क्रियमाणं व्याख्यानान्तरमिति विवेकः । निवियते व्यञ् संवरणे, नौ व्यञो यलोपः पूर्वस्य च दीर्घोण इति दीर्घः । कृदिकारादिति ङीष् । आच्छाद्य । नीवीं स्त्रीकटबन्धन इति मेदिनी ।

दिव्यस्रग्गन्धालङ्कृतौ रुचिरां नीवीं योषिद्वस्त्रं वसित्वा स्थितया तया जनन्योपहृतं परिवेषितं स्वाद्वन्नं प्राश्य भुक्त्वा ताभ्यामुपलालितावादौ, मृदुशय्यायां संविश्य सुखं यथा तथा सुषुपतुः ॥ ४५,४६ ॥

सुमनोरञ्जनी — मज्जनं स्नानं उन्मर्दनं गात्रोन्मर्दनं पादसंहननादिकं वा । तैः विगतमार्गश्रमाविव । नीवीं वस्त्रम् । वसित्वा परिधाय ॥ ४५ ॥

जनन्युपहृतं प्राश्य स्वाद्वन्नमुपलालितौ ।
संविश्य मृदुशय्यायां सुखं सुषुपतुर्व्रजे ॥ ४६ ॥

सुमनोरञ्जनी — जनन्या यशोदया रोहिण्या वा । उपहृतं आनीतं प्राश्य भुक्त्वा ॥ ४६ ॥

एवं स भगवान् कृष्णो वृन्दावनचरः क्वचित् ।
ययौ राममृते राजन् कालिन्दीं सखिभिर्वृतः ॥ ४७ ॥

सत्यधर्मीया — रामं बलमृते तेनालोच्य तं गोपादिशान्त्यै स्थापयित्वा गत इति ज्ञेयम् । तथा हि हरिवंशे । ससङ्कर्षणमामन्त्र्य, एवं कृते बाहुवीर्यं लोके ख्यातिं गमिष्यतीत्यादिनोक्तम् । ज्येष्ठं विहाय स कदाचिदचिन्त्यशक्तिर्गोगोपगोगणयुतो यमुनातटेषु । रेमे भविष्यदनुवीक्ष्य हि गोपदुःखं तद्बोधनाय निजमग्रजमेष सोऽधादित्याचार्योक्तेः । विना तस्य सरीसृपवरीयसाननसहगमने कालियस्याहेरेतत्परिचरस्य दमनं यमुनातो बहिर्यापनं च समक्षं चेत्किञ्चित्सङ्कुचितचेतस्कताहेतुर्भवेदिति राममृत इत्यनेन ध्वनयतीति मन्तव्यम् ॥ ४७ ॥

सुमनोरञ्जनी — महिमान्तरं वर्णयितुमुपक्रमते ॥ एवमिति । राममृते रामं विना । क्वचित् कदाचित् । कालिन्दीं यमुनाम् ॥ ४७ ॥

अथ गावश्च गोपाश्च निदाघातपपीडिताः ।
दुष्टं जलं पपुस्तस्यास्तृषार्ता विषदूषितम् ॥ ४८ ॥

सत्यधर्मीया — निदाघो ग्रीष्मर्तुस्तत्सम्बन्ध्यातप औष्ण्यं तेन पीडिताः । विषदूषितमिति दुष्टम् ॥ ४८ ॥

सुमनोरञ्जनी — निदाघेन ग्रीष्मकालीनेन आतपेन पीडिताः तप्ताः । दुष्टम् । कुतः । यतो विषेण विदूषितम् ॥ ४८ ॥

विषाम्भस्तदुपस्पृश्य दैवोपहतचेतसः ।
निपेतुर्व्यसवः सर्वे मूर्छिता वै कुरूद्वह ॥ ४९ ॥

सत्यधर्मीया — दैवोपहतचेतसस्तद्विषाम्भ उपस्पृश्याचम्य पीत्वा च निपेतुर्व्यसवस्तत्प्रायः । मूर्च्छा सञ्जातैषामिति ते तथा । विषं जलधरैः पीतं मूर्च्छिताः पथिकाङ्गना इत्याद्युदाहृत्याकरे विस्तरत उपपादितोपपत्तिर्ज्ञेया ॥ ४९ ॥

सुमनोरञ्जनी — विषाम्भः विषसंपृक्तोदकम् । उपस्पृश्य पीत्वा । किं विषांभ इति वार्तैव न श्रुता तैरिति चेत्तत्राह ॥ दैवेन अदृष्टविशेषेण उपहृतं चेतः स्मृतिर्येषां ते । श्रुतवार्ता अपि तदानीं विस्मृतवार्ता अभवन्निति भावः । व्यसवः विगतप्राणा इव । निपेतुः ॥ ४९ ॥

वीक्ष्य तान् वै तथाभूतान् कृष्णो योगेश्वरेश्वरः ।
ईक्षयाऽमृतवर्षिण्या स्वनाथान् समजीवयत् ॥ ५० ॥

सत्यधर्मीया — अमृतवर्षिण्या वीक्षया कटाक्षेण ॥ ५० ॥

सुमनोरञ्जनी — योगेश्वराणामपीश्वरः कृष्णः । तथाभूतान् मूर्छितान् । वीक्ष्य । कथंभूतान् । स्वयमेव नाथो येषां तान् । ईक्षया दृष्ट्या ॥ ५० ॥

ते सम्प्रतीतस्मृतय उत्थाय च जलान्तिकात् ।
आसन् सुविस्मिताः सर्वे वीक्षमाणाः परस्परम् ॥ ५१ ॥

सत्यधर्मीया — सम्प्रति तत्काले । इता स्वान्प्राप्ता स्मृतिर्येषां ते तथा ॥ ५१ ॥

सुमनोरञ्जनी — ते गोपाः संप्रति तत्काले इतस्मृतयः प्राप्तस्मृतयः ॥ ५१ ॥

अन्वमंसत तद् राजन् गोविन्दानुग्रहेक्षितम् ।
पीत्वा विषं परेतस्य पुनरुत्थानमात्मनः ॥ ५२ ॥

इति श्रीमद्भागवते दशमस्कन्धे त्रयोदशोऽध्यायः ॥

सत्यधर्मीया — विषं पीत्वा परेतस्य तत्प्रायस्य गोपजनस्यात्मनः पुनरुत्थानं यत्तद्गोविन्दानुग्रहेक्षितमनुग्रहाद्दर्शितमन्वमंसत व्यजानत् ॥ ५२ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां दशमपूर्वार्धे त्रयोदशोऽध्यायः ॥ १०-१३ ॥

सुमनोरञ्जनी — विषं विषयुक्तजलं पीत्वा । परेतस्य मृतस्य । आत्मनः स्वस्य पुनरुत्थानं यत् तत् तत्कारणम् । गोविन्दस्यानुग्रहपूर्वकेक्षितम् । अन्वमंसत ज्ञातवन्तः ॥ ५२ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां सुमनोरञ्जन्यां त्रयोदशोऽध्यायः ॥ १०-१३ ॥

।। अथ चतुर्दशोऽध्यायः ।।

श्रीशुक उवाच—

विलोक्यं दूषितां कृष्णां कृष्णः कृष्णाहिना विभुः ।
तस्या विशुद्धिमन्विच्छन् सर्पं तमुदवासयत् ।। १ ।।

सत्यधर्मीया — संसारविषमतां जरयत्कंसारिचरितं सङ्कुच्योक्तं प्रपञ्चयत्यस्मिन्नध्याये । तत्रादौ शुको राजप्रश्नबीजमावपतीति निरूपयति ।। श्रीशुक इति । कृष्णः कृष्णाहिना सकालिम्ना कालियेन कृष्णां यमुनां दूषितां विषविषमतया जनानुपयोजनां वीक्ष्य तस्या विशुद्धिं निर्विषतामन्विच्छस्तं सर्पमुदवासयत्ततो निष्कासयामास ।। १ ।।

सुमनोरञ्जनी — यथा श्रीकृष्णः कालियविषदूषितं यामुनं जलं तन्निष्कासनेन निर्मलीचकार एवं प्रसन्नो हरिः संसारव्यालगरलदूषितं स्वभक्तजनं संसारान्मोचयिष्यतीति भावेन कालियनाग-शिक्षणरूपं महिमानं विस्तरतो विवक्षया सामान्यतोऽनुवदति शुकः ।। विलोक्येति । कृष्णाहिना कालियनामकेन कृष्णसर्पेण । कृष्णां यमुनाम् । तस्याः यमुनायाः । विशुद्धिं निर्विषत्वम् । तं सर्पम् । उदवासयत् निष्कासितवान् ।। १ ।।

राजोवाच—

कथमन्तर्जलेऽगाधे न्यगृह्णाद् भगवानहिम् ।
स वै बहुयुगावासी यथाऽऽसीद् विप्र कथ्यताम् ।। २ ।।

सत्यधर्मीया — स कुतो निकेतनं तत्र चक्रे कथं वा बहुविधं तत्र कृतवासं वासुदेवोऽवासितमचीकरत्सोऽप्यनन्ताज्ञप्तः क्व वाऽवात्सीत्सर्वं हे विप्र सर्वज्ञ कथयेति पृच्छति परीक्षिदित्याह ।। राजेति । अगाधे लोडयितुमशक्ये जलेऽहिं भगवान्कथं न्यगृह्णाज्जग्राह । स सर्पोऽन्तर्यमुनान्तः कथं बहुयुगावास्यासीत् हे विप्रेदं सर्वं कथ्यताम् इदानीम् । शुकेन बहुयुगेत्याद्यनुक्तामपि मानान्तरतोऽवगत्याप्राक्षीत्परीक्षिदित्यर्थद्योतको वैशब्दः ।। २ ।।

सुमनोरञ्जनी — अथ जातजिज्ञासू राजा पृच्छति ।। कथमिति । अगाधे गम्भीरे । अन्तर्जले जलस्यान्तः । अहिं कथं न्यगृण्हत् निगृहीतवान् । सः कालियः । अन्तर्जल इत्यनुकृष्यते । यथा येन प्रकारेण । अन्तर्जले, बहुयुगं आवासोऽस्यास्तीति तथोक्तः । बहुकालं आवासवान् आसीत् । तदपि कथ्यताम् ।। २ ।।

ब्रह्मन् भगवतस्तस्य भूम्नः स्वच्छन्दवर्तिनः ।
गोपालोदारचरितं कस्तृप्येतामृतं जुषन् ॥ ३ ॥

सत्यधर्मीया — इयतापि नातुष्यः किलेलापालेत्यतो लपति ॥ ब्रह्मन्निति । स्वच्छन्दवर्तिनो भूम्नस्तस्य भगवतो गोपालोदारचरितं गोपालैर्गोपालिभिर्गोपालैश्च सह कृतं यदुदारचरितममृतं तदाख्यं पीयूषं जुषन्सेवमानः कस्तृप्येत अलमिति लपेत् । यदि कश्चित्तृप्येतालमिति वदेत्तर्हि स कः कुत्सित इत्यपि कश्छन्दसां योगमावेदेत्यादिवदन्वयो ज्ञेयः ॥ ३ ॥

सुमनोरञ्जनी — भूम्नः पूर्णस्य । स्वच्छन्देन स्वेच्छयैव वर्तते प्रवर्तते इति तथोक्तस्य । स्वतन्त्रस्येत्यर्थः । तस्य श्रीकृष्णस्य । गोपालेषु मध्ये यत् उदारं उत्कृष्टं चरितं तत् जुषन् शृण्वन्निति यावत्, कस्तृप्येत अलंबुद्धिमान् स्यात् । अमृतं जुषन् सेवयन्निव । अथवा गोपालोदारचरितं तल्लक्षणममृतं जुषन् कस्तृप्येतेति ॥ ३ ॥

श्रीशुक उवाच—

कालिन्द्यां कालियस्यासीद् ह्रदः कश्चिद् विषाग्निना ।
श्रप्यमाणपयो यस्मिन् पतन्त्युपरिगाः खगाः ॥ ४ ॥

सत्यधर्मीया — यस्मिन् श्रप्यमाणं श्रा पाके पुगन्तः । विषजनिताग्निना क्वथ्यमानं पयो जलम् । उपरिगाः खगाः पक्षिणोऽपि पतन्ति स कश्चित्कालिन्द्यां कालियस्य कालीयस्य संज्ञाद्वयं ज्ञेयं ह्रद आसीत् ॥ ४ ॥

सुमनोरञ्जनी — कालियस्य तन्नामकसर्पस्य विषाग्निना । श्रप्यमाणं क्वथ्यमानं पयो यस्मिन् सः श्रप्यमाणपयाः । श्रप्यमाणपय इति पाठे यस्मिन्नासीदिति सम्बन्धः । अतः उपरिगाः उपरि गच्छन्तः खगाः यस्मिन् ह्रदे । पतन्ति ॥ ४ ॥

विप्रुष्मता विषोदोर्मिमारुतेनाभिमर्शिताः ।
म्रियन्ते तीरगा यस्य प्राणिनः स्थिरजङ्गमाः ॥ ५ ॥

सत्यधर्मीया — चेत्किमित्यतो वक्ति ॥ विप्रुष्मतेति । विप्रुष्मता विषाग्निकणवता । विषोदोर्मिमारुतेन विषविदूषितं यदुदं तस्य ये या वोर्मयस्तरङ्गास्तत्सङ्गतः सदा तेनाभिमर्शिताः स्पृष्टाः । यस्य तीरगाः स्थिरजङ्गमाः प्राणिनो म्रियन्ते । प्राणिनोऽन्तश्चेष्टावतः कालियस्येति वाऽन्वयः । अनेन स्थिरजङ्गमा इत्यत्रत्यजङ्गमपदेन प्राणिनां लाभात्तदतिरिच्यत इति निरस्तम् ॥५॥

सुमनोरञ्जनी — विप्रुष्मता अम्बुबिन्दुयुतेन । विषोदस्य विषमिश्रोदकस्य ये ऊर्मयः तरङ्गाः तत्सङ्गिमारुतेन अभिमर्शिताः स्पृष्टाः । यस्य ह्रदस्य । तीरगाः तीरे गच्छन्ति तिष्ठन्तीति तथोक्ताः ॥ ५ ॥

तं चण्डवेगविषवीर्यमवेक्ष्य तेन
दुष्टां नदीं च खलसंयमनावतारः ।
कृष्णः कदम्बमधिरुह्य ततोऽतितुङ्गा-
दास्फोट्य गाढरसनो न्यपतद् विषोदे ॥ ६ ॥

सत्यधर्मीया — चण्डः प्रचण्डोऽपरिहार्यो वेगो यस्य तच्च तद्विषवीर्यं यस्य तमवेक्ष्य तेन च दुष्टां नदीं यमुनां चावेक्ष्य । किमार्द्रकवणिजो वहित्रचिन्तयेति पशुपालस्य पथिकस्येयती व्यथेत्यतः कथयति । खलस्य संयमनं येन सः । संयमयतीति संयमनोऽवतारो यस्य स इति कृष्णः । कदम्बं नीपपादपम् । कदम्बमाहुः सिद्धार्थे नीपेऽपि निकुरम्बक इति विश्वः । तन्मात्रस्य विषोर्मिवातघातेऽपि न घातो गरुत्मतो हरतोऽमृतं बिन्दुः पतितः करत इति । यथोक्तं मात्स्ये ।

गृहीत्वाऽमृतपात्रं हि गच्छन्मार्गे क्षुधार्दितः ।
कदम्बे कलशं न्यस्य यमुनातीरगो विराट् ।

जहार मत्स्यं नीरस्थं शप्तः सौभरिणा रुषेति । सर्पराजसचिवमोचितविषभयं काननं तद्विहारार्थं रक्षितमिति वृक्षेऽपि तदुपान्तवर्त्यवर्ततेति वा । यथोक्तं हरिवंशे ।

तदिदं दारुणाकारमरण्यं रूढशाद्वलम् ।
रक्षितं सर्पराजस्य सचिवैराप्तकारिभिः ।
वनं निर्विषयाकारं विषान्नमिव दुःस्पृशम् ।

तैराप्तकारिभिर्नित्यं सर्वतः परिरक्षितमित्यादि । अधिरुह्य ततस्तस्यातितुङ्गात्प्रदेशाद्गाढरसनो दृढबद्धकाञ्चिर्दृढशाब्द इति वाक । यथोक्तं हरिवंशे । बद्ध्वा परिकरं दृढं, ह्रदमध्येऽकरोच्छब्दं निष्पतन्नम्बुजेक्षण इति । रसनं स्वादने ध्वाने रसना काञ्चिजिव्हयोरिति विश्वः । आस्फोट्य भुजेनैकेनापरं भुजं द्वाभ्यां कराभ्यामङ्कद्वन्द्वं वाऽस्फालयित्वा विषोदे ह्रदे न्यपतदुड्डीनं कृतवान् ॥६॥

सुमनोरञ्जनी — तं कालियम् । कीदृशम् । चण्डः क्रूरो वेगो यस्य तच्चण्डवेगम् । तादृशं विषमेव वीर्यं यस्यासौ तथोक्तः तम् । तेन कालियेन । दुष्टां नदीं चावेक्ष्य । यतः कृष्णः । खलानां

दुर्जनानां संयमनार्थं निग्रहार्थं अवतारो यस्य तादृशः कृष्णः । कदम्बं तन्नामकं वृक्षम् । अधिरुह्य । अतितुङ्गात् उन्नतात् । ततः वृक्षात् । गाढा दृढं बद्धा रशना कक्ष्या कटिबन्धनवस्त्रं येन सः । आस्फोट्य स्ववामबाहुं दक्षिणकरतलेन सशब्दं आहत्य । विषोदे विषसंपृक्तजले ॥ ६ ॥

सार्पो ह्रदः पुरुषसारनिपातवेग-
सङ्क्षोभितोरगविषोच्छ्वसिताम्बुराशिः ।
विष्वक् प्लुतो विषकषायविभीषणोर्मि-
भीमो धनुःशतमनन्तबलस्य किं तत् ॥ ७ ॥

सत्यधर्मीया — सर्पस्यायं सार्पो ह्रदः । पुरुषसारस्य, रसः सारो वर इति गीताभाष्योक्तेः पुरुषोत्तमस्य, निपातस्य यो वेगस्तेन सङ्क्षोभितस्येतस्ततश्चलनवत उरगस्य सर्पस्य गतं यद्विषं तेनोच्छ्वसित उद्रेचितोऽम्बुराशिर्जलजालं यस्मिन्सः । विषकषायेण तत्काथेन विभीषयन्ति जनानिति विभीषणा ऊर्मयस्तैस्ताभिर्वा भीमो भयङ्करः । रागे क्वाथे कषायोऽस्त्री निर्यासे सौरभे रस इति यादवः । कषायोऽपि सुरभौ लोहितेऽन्यवदिति विश्वाद्रसविशेषो वा । धनुः शतं तत्प्रमाणम् । विष्वङ्नद्याः परितः प्लुत आप्लुतः । इदं यदुपतेर्न चित्रमित्याह ॥ अनन्तबलस्य किं तदिति । अनन्तं बलं यस्य तस्य धनुःशतजलोत्प्लावनं किं कियत् । तर्हि बहुदवीयः पदवीं प्रति कुतो नाकारि वारिप्लावनं भगवतेति तु तत्रत्यजनार्दनं स्यादिति जानता जनार्दनेनैतावदेवाकारीति निरस्तम् ।

अमितादिपदानि बन्धनानन्तपदबन्धनेन नोभयथापि विषविषमतेति द्योतयन्ति । अनन्ते शेषे बलं परिवर्तमानं यस्य स तथा शेषशयनस्य न विषबाधेति नाद्भुतम् । योऽनन्तनामा गरुडस्तदंसक इत्यादेरनन्तो गरुडस्ते वलनं सञ्चरणं यस्य तस्येति नाद्भुतमिति ॥ ७ ॥

सुमनोरञ्जनी — सार्पः सर्पाश्रयभूतः ह्रदः । पुरुषसारस्य पुरुषोत्तमस्य निपातवेगेन संक्षोभितः चलितः उरगस्य विषोच्छसितं विषफूत्कारो यस्मिन् तादृशश्च अंबुराशिर्यस्य तथोक्तः । संक्षोभितेत्युरगविशेषणं वा । विषेण कषायै रक्तैः विभीषणैः भयजनकैः ऊर्मिभिः तरङ्गैः भीमः भयङ्करः । एतादृशो ह्रदः । धनुःशतपरिमितं देशम् । पर्यक् परितः प्लुतः प्रसृतः । इदं न चित्रमित्याह ॥ अनन्तबलस्य तत् किं, किं चित्रमिति ॥ ७ ॥

तस्मिन् ह्रदे विहरतो भुजदण्डघूर्ण-
वार्घोषमङ्ग वरवारणविक्रमस्य ।
आश्रुत्य तत् स्वसदनाभिभवं ससैन्य-
श्चक्षुःश्रवाः समसरत् तममृष्यमाणः ॥ ८ ॥

सत्यधर्मीया — चक्षुरेव श्रवः श्रवणं यस्य स सर्पस्तस्मिन्ह्रदे विहरतः क्रीडतः । अङ्ग हे राजन् । वरवारणविक्रमस्य वरः श्रेष्ठो वारणो गजस्तस्य विक्रम इव विक्रमो यस्य तस्य । अङ्गेन वरो वारणः पुष्ट इति तस्येति । भुजदण्डाभ्यां घूर्णन्भ्रमन्वारुदकं तस्य घोषम् । स्वसदनस्याभिभवस्तिरस्क्रिया येन तं ध्वनिं श्रुत्वा ससैन्य इतरसरीसृपयुतोऽमृष्यमाणोऽसहमानस्तत्तस्मात्समसरदुपगतः । वरवारणविक्रमस्येत्युक्तिस्त्वितरालक्ष्यतां निमित्तीकृत्येति वा । जलविहारोत्साहो बहुलस्तस्येति वेति ज्ञेयम् ॥ ८ ॥

सुमनोरञ्जनी — हे अङ्गेति परीक्षितः सम्बोधनम् । तस्मिन् ह्रदे विहरतः बाहुभ्यां प्लवतः । वरवारणस्य गजश्रेष्ठस्य विक्रम इव विक्रमो यस्य तस्य श्रीकृष्णस्य । भुजदण्डाभ्यां घूर्णस्य इतस्ततश्चलितस्य वारः जलस्य घोषं शब्दम् । आश्रुत्य, तेन स्वसदनस्याभिभवं नाशं च आश्रुत्य निरीक्ष्य । चक्षुःश्रवस्त्वेन श्रवणचक्षुषोरेकत्वात् । अथवाऽभिभवं अमृष्यमाणः असहमानः तं श्रीकृष्णं समसरत् अभिससार ॥ ८ ॥

तं प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुन्दरास्यम् ।
क्रीडन्तमप्रतिभयं कमलोदराङ्घ्रिं सन्दश्य मर्मसु रुषा भुजया चछाद ॥ ९ ॥

सत्यधर्मीया — प्रेक्षणीयश्चातिसुन्दरश्चासौ सुकुमारश्चासौ घनवन्मेघवदवदातः श्यामस्तम् । अवदातोऽरुणे श्यामे पीते श्वेते निरामय इति यादवः । श्रीर्वत्से वक्षसि यस्य स चासौ पीतं वसनं यस्य स च तम् । उरो वत्सं च वक्षश्च । वत्सं तु वक्षसीत्यमरविश्वौ । स्मितेन सुन्दरमास्यं यस्य स तम् । अप्रतिभयं प्रति प्रतिस्थितप्रतिभटभयशून्यम् । तु विप्रतिं नरमित्यृग्भाष्ये महान्प्रतिस्थश्च तु विप्रतिरीरित इत्युक्तेः विस्तरस्तु तट्टीकादितोऽनुसन्धेयः । क्रीडन्तं, कमलोदराङ्घ्रिमुदरनाभिश्चाङ्घ्रिः पादश्च तौ कमले इव यस्य तमिति केचित् । कमलोदरवदङ्घ्रिर्यस्य स तं पद्मगर्भारुणेक्षणम् । पद्मोदरसुन्दराभ्यामित्यादेः । मर्मसु सन्दश्य भुजया वाहयेतिवद्भुजाशब्दष्टावन्तः । भोगेनेति यावत् । चछादापावृणोत् । तं नागभोगेत्युत्तरोक्तिस्वारस्यात्सरसः पाठः । ललितशुलया बाहयेति प्रयोगाद्भुजग इति लेखकगतिः ॥९॥

सुमनोरञ्जनी — प्रेक्षणीयः दर्शनीयः सुकुमारश्च, घनवत् अवदातः श्यामश्चेति तथाविधः तम् । अवदातोऽरुणे पीते श्वेते श्यामे निरामय इत्यभिधानात् । श्रीवत्सपीतवसनम् । पीतं वसनं यस्य सः पीतवसनः । श्रीवत्सयुक्तश्चासौ पीतवसनश्च तम् । स्मितेन मन्दहासेन सुन्दरं मनोहरं आस्यं यस्यासौ तथोक्तः तम् । अप्रतिभयं प्रतिवीराद्भयरहितम् । कमलोदरमिव कोमले अङ्घ्री यस्य स तथाविधः तम् । चछाद आच्छादितवान् ॥ ९ ॥

तं नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः पशुपा भृशार्ताः ।
कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामा दुःखानुशोकभयमूढधियो निपेतुः ॥ १० ॥

सत्यधर्मीया — यस्मिन् कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामा अर्पिताः सुहृदो बान्धवा अर्था रायः कलत्रं भार्याः कामोऽपेक्षणीयसर्वविषयो यैस्ते । नागभोगपरिवीतम् । अत्र नागपदद्दष्ट्या भोगशब्दः शरीरमात्रपरः । सरीसृपशरीरबद्धम् । अदृष्टचेष्टं स्वतः सचेष्टमपीतरादृष्टा चेष्टा यस्य तं विलोक्य । स प्रियो येषां ते च ते सखायश्चेति ते पशुपा गोपा भृशमार्ताः । दुःखं चान्तरङ्गिकं तदनुशोको बहिरश्रुप्रदर्शनं भयं चैतैर्मूढा कर्तव्यास्फूर्तिहेतुर्धीर्येषां ते निपेतुः ॥ १० ॥

सुमनोरञ्जनी — नागस्य भोगेन देहेन परिवीतं वेष्टितम् । तस्य प्रियाः, स प्रियो येषामिति वा सखायश्च असवयस्काः, प्रेमपात्राः प्रियाः, सवयस्काः तथाविधाः सखाय इति भेदः । पशुपाः गोपाः । कृष्णे अर्पिताः, आत्मदेहः, सुहृदः बन्धवः, अर्थश्च, कलत्रं च तद्रूपाः कामाः, काम्यन्त इति कामाः विषया यैस्तथाविधाः कृष्णार्थमेवेदं देहादि । तद्भिनात्यर्थमिति मन्वाना इति भावः ॥ ॥ १० ॥

गावो वृषा वत्सतर्यः क्रन्दमानाः सुदुःखिताः ।
कृष्णे न्यस्तेक्षणा भीता रुदन्त्य इव तस्थिरे ॥ ११ ॥

सत्यधर्मीया — वत्सतर्यो गर्भाधानयोग्यवयस्काः क्रन्दमानाः क्रोशमाना रुदन्त्य इव तस्थिरे । छान्दसमात्मनेपदम् । ईत्याश्चर्यात्मकमव्ययम् । वतस्थिरेऽवतस्थिरे । वष्टि भागुरिरल्लोपम-वाप्योरित्युक्तेरल्लोपे समवप्रविभ्यस्थ इति वाऽऽत्मनेपदता ॥ ११ ॥

सुमनोरञ्जनी — वत्सतर्यः गर्भाधानयोग्यवयस इति रत्नावल्याम् ॥ ११ ॥

अथ व्रजे महोत्पातास्त्रिविधा ह्यतिदारुणाः ।
उत्पेतुर्दिवि भुव्यात्मन्यासन्नभयशंसिनः ॥ १२ ॥

सत्यधर्मीया — व्रजेऽतिदारुणास्त्रिविधा उत्पाता उत्पेतुः । तान्प्रकारानुदीरयति । दिवि सवितरि सुषिरादिदर्शनं भुवि कम्पादिरात्मनि देहे पुंसि वामलोचनादिस्फुरणं वामलोचनानां दक्षिणाक्ष्यादि-स्फुरणादीनिति । तत्फलं लपति । आसन्नभयंशसिन आसन्नमतिसमीपसमापतद्यद्भयं तच्छंसितुं शीलं येषामस्तीति ते तथा । अन्ततो गत्वा किंरूपास्त इत्यतोऽप्याह ॥ आसन्निति । अभयशंसिनोऽभयं शंसितुं शीलमेषां ते तथा त आसन् ॥ १२ ॥

सुमनोरञ्जनी — के ते त्रिविधा इत्यत आह ॥ दिवीत्यादि । उल्कापातादयः । भुवि भूविदारणकम्पादयः । आत्मनि देहे । वामनेत्रस्फुरणादयः । आसन्नभयशंसिनः समीपे भयसूचकाः ॥ १२ ॥

तानालक्ष्य भयोद्विग्ना गोपा नन्दपुरोगमाः ।
विना रामेण गाः कृष्णं ज्ञात्वा चारयितुं गतम् ॥ १३ ॥

सत्यधर्मीया — नन्दपुरोगमा गोपास्तानुत्पातानालक्ष्य दृष्ट्वा भयेनोद्विग्नाः कातराः कृष्णस्य किं भयमायातमित्युद्विग्ना भीता वा । चारयितुं सञ्चारयितुं तृणानि खादयितुं वा ॥ १३ ॥

सुमनोरञ्जनी — तान् आलक्ष्य । भयोद्विग्नादयः सन्तो गोकुलात् निर्जग्मुरित्यन्वयः । भयेन उद्विग्नाः सम्भ्रान्तचित्ताः । तं श्रीकृष्णं, न विदन्ति अप्रतिहतमहिमानं न जानन्तीत्यतद्विदः । तत्प्राणाः तस्मिन्नेव न्यस्तेन्द्रियाः । पशुवृत्तयः । सर्वान् अविशेषेण पश्यतीति पशुः । तद्वद्वृत्तिर्येषाम् । कृष्णं इतराविशेषेण मन्यमाना इत्यर्थः । अनेनातद्विद् इत्येतद्विवृतं भवति ॥ १३,१४,१५ ॥

तैर्दुर्निमित्तैर्निधनं मत्वा प्राप्तमतद्विदः ।
तत्प्राणास्तन्मनस्काश्च दुःखशोकभयातुराः ॥ १४ ॥

~~**सत्यधर्मीया —** तैस्तैर्दिव्यभौमकायकैः । अतद्विदस्तत्प्रभावाज्ञाः ॥ १४ ॥~~

आबालवृद्धवनिताः सर्वेऽङ्ग पशुवृत्तयः ।
निर्जग्मुर्गोकुलाद् दीनाः कृष्णदर्शनलालसाः ॥ १५ ॥

सत्यधर्मीया — आबालवृद्धवनिता इति पदे आ अभिव्याप्य । इत्यादयः सर्वे पशुवृत्तयः पशूनां वृत्तिवद्वृत्तिर्येषां ते मुग्धा इति यावत् ॥ १५ ॥

तांस्तथा कातरान् वीक्ष्य भगवान् माधवो बलः ।
प्रहस्य किञ्चिन्नोवाच प्रभावज्ञोऽनुजस्य सः ॥ १६ ॥

सत्यधर्मीया — माधवो मधुकुलजो बलोऽनुजस्य कृष्णस्य प्रभावज्ञो प्रहस्य किञ्चिदपि नोवाच । ॥ १६ ॥

सुमनोरञ्जनी — कातरान् भीतान् । माधवः मधुकुलोद्भवः । बलः बलरामः ॥ १६ ॥

तेऽन्वेषमाणा दयितं कृष्णं सूचितया पदैः ।
भगवल्लक्षणैर्जग्मुः पदव्या यमुनातटम् ॥ १७ ॥

सत्यधर्मीया — भगवन्ति श्रीमन्त्यैश्वर्यवन्तीतरविलक्षणानि लक्षणानि येषां तानि तैः पदैः पादैः । अनेन कृष्णमिति पृथक् सत्त्वात्तल्लक्षणैः पदैरिति वक्तव्यं भगवदित्यतिरिक्तमिति निरस्तम् । भग ऐश्वरर्यमाहात्म्यज्ञानवैराग्ययोनिषु । यशोवीर्यप्रयत्नेच्छाश्रीधर्मरविमुक्तिष्विति विश्वः । सूचितया पदव्याऽन्वेषमाणा यमुनातटं जग्मुः ॥ १७ ॥

सुमनोरञ्जनी — भगवतो हरेर्यानि लक्षणानि ध्वजवज्राङ्कुशपद्मादीनि तानि येषु तैः । पदैः भुवि न्यस्तचरणाङ्कैः । सूचितया मापितया पदव्या जग्मुः ॥ १७ ॥

ते तत्र तत्राब्जयवाङ्कुशाशनिध्वजोपपन्नानि पदानि विश्पतेः ।
मार्गे गवामन्यपदान्तरान्तरे निरीक्षमाणा ययुरङ्ग सत्वराः ॥ १८ ॥

सत्यधर्मीया — लक्षणान्येवंरूपाणीति निरूपयति ॥ त इति । अब्जं कमलरेखा यवो व्रीहिरेखा अशनिर्वज्रमङ्कुशरेखा ध्वजेन चोपपन्नानि पदानि । विश्पतेः प्रजास्वामिनः । शब्दसुश्राव्यतायै विश्पतिरिति छान्दसः प्रयोगः । गवां मार्गेऽन्यपदान्तरान्तरेऽन्येषां गोपानां पदान्तरान्तरे तन्मध्यावकाशे निरीक्षमाणाः पश्यन्तः सत्वरा ययुः ॥ १८ ॥

सुमनोरञ्जनी — अब्जं पद्मरेखा । अशनिः वज्ररेखा । विश्पतेः विशां प्रजानां पत्युः श्रीकृष्णस्य । द्वौ विशौ वैश्यमनुजावित्यमरः । पदानि । गवां मार्गे । अनेन रेणुपौष्कल्यं व्यङ्ग्यम् । अन्येषां गोपानां यानि पदान्तराणि ध्वजवज्रादिचिह्नरहितानि पदानि । तेषामन्तरान्तरे मध्ये मध्ये निरीक्ष्यमाणाः । सत्वराः त्वरया सहिताः ॥ १८ ॥

अन्तर्ह्रदे भुजगभोगपरीतमारात् कृष्णं निरीहमुपलक्ष्य जलाशयान्ते ।
गोपांश्च मूढधिषणान् परितः पशूंश्च सङ्क्रन्दतः परमकश्मलमापुरार्ताः ॥१९॥

सत्यधर्मीया — ह्रदे भुजगभोगपरीतं भुजगश्च भोगश्च ताभ्यां बहिरन्तश्च परीतस्तम् । भोगः सुखे धने चाहेः शरीरफणकाययोरिति विश्वः । अन्तर्निभृतसुखम् । जलाशयान्ते ह्रदसमीपे । मूढधिषणान्बुद्धिहीनान्सङ्क्रन्दतो रुदतः स्वयमार्ताः परमकश्मलमापुः ॥ १९ ॥

सुमनोरञ्जनी — ह्रदे अन्तः । भुजगस्य भोगेन शरीरेण परीतं वेष्टितम् । तेन निरीहं निश्चेष्टं उपलक्ष्य ज्ञात्वा । जलाशयस्य ह्रदस्य । अन्ते समीपे । मूढधिषणान् मोहयुतबुद्धीन् । तेषां परितः

स्थितान् । संक्रन्दतः हंभावं च कुर्वतः पशूंश्च । आलक्ष्य । परमकश्मलं अतीव मूर्च्छां, मूर्छा तु कश्मलं मोह इत्यमरः ॥ १९ ॥

गोप्योऽनुरक्तमनसो भगवत्यनन्ते तत्सौहृदस्मितविलोकगिरः स्मरन्त्यः ।
ग्रस्तेऽहिना प्रियतमे भृशदुःखतप्ताः शून्यं प्रियव्यतिहृतं ददृशुस्त्रिलोकम् ॥२०॥

सत्यधर्मीया — अनुरक्तं मनो यासां ताः । तस्य तत्कर्तृकाः, सौहृदं च स्मितं च विलोकश्च गिरो वचनानि च ताः स्मरन्त्यस्त्रिलोकं प्रियव्यतिहृतं प्रियविरहितं ददृशुः ॥ २० ॥

सुमनोरञ्जनी — तस्य श्रीकृष्णस्य सौहृदं स्नेहः, स्मितं मन्दहासः, विलोकः कटाक्षवीक्षणं, गिरः भाषणानि च । स्मरंत्यः । प्रियेण श्रीकृष्णेन व्यतिहृतं विरहितं त्रिलोकं त्रैलोक्यं शून्यमेव ददृशुः ॥ २० ॥

ताः कृष्णमातरमपत्यमनुप्रविष्टां
तुल्यव्यथाः समनुगृह्य शुचः स्रवन्त्यः ।
त्रस्ता व्रजप्रियकथाः कथयन्त्य आसन्
कृष्णाननेऽर्पितदृशो मृतकप्रतीताः ॥ २१ ॥

सत्यधर्मीया — अपत्यमनुप्रविष्टां ह्रदं प्रवेष्टुकामां कृष्णमातरं समनुगृह्य परिरभ्य स्थापयित्वा तुल्यव्यथास्तद्यशोदासमानखेदाः शुचो निमित्ताच्छ्रवन्त्यः श्रावयन्त्यो बिन्दूंस्त्रस्ता अन्याः प्रति । व्रजप्रियकथा व्रजे कृताः प्रियस्य कृष्णस्य कथाः । एवं बहव उपद्रवा जाताश्चेदपि न पोतघात इदानीमप्येवमिति चिन्ता कुत इति तत्कथाः कथयन्त्यः । अथवा प्राग्या एतादृश्यस्ता इदानीं मृतकप्रतीताः शववन्निश्चेष्टा ज्ञाताः । लोकेन लोकेशेन वा । प्रतीका इति पाठे शवसदृशा इत्यर्थः । कृष्णानने तन्मुखेऽर्पितास्तदेकविषया दृशो यासां ता आसन् । कृष्णस्याननं चेष्टां तद्विषयेऽर्पितदृश इति वा । हे कृष्णेति मातरं मा न विद्यत आतरस्तरपण्यं यस्य स तदपत्यमन्विति वा तरणोपकरणविरहितमित्यर्थः । आतरस्तरपण्यं स्यादित्यमरः ॥ २१ ॥

सुमनोरञ्जनी — ताः गोप्यः । अपत्यम् । मनसाऽनुप्रविष्टां तदेकमनस्कामिति यावत् । यद्वा अपत्यं अनु अनुसृत्य प्रविष्टां जले प्रविष्टामित्यर्थः । कृष्णमातरं यशोदां समनुगृह्य कराभ्यां परिरभ्य । तस्याः व्यथया तुल्या व्यथा यासां ताः । शुचः शोकात् । स्रवन्त्यः अश्रूणि मुञ्चन्त्यः । शुचः शोकाश्रूणीति वा । व्रजप्रियस्य कृष्णस्य याः कथाः ताः कथयंत्य एव मृतकप्रतीकाः आसन् । तूष्णीमासन्नित्यर्थः । अनेन शोकातिशयो व्यङ्ग्यः ॥ २१ ॥

कृष्णप्राणान् निर्विशतो नन्दादीन् वीक्ष्य तं ह्रदम् ।
प्रत्यषेधत् स भगवान् रामः कृष्णानुभाववित् ॥ २२ ॥

सत्यधर्मीया — कृष्णानुभावविद्भगवान्स रामः, कृष्णः प्राणो येषां ते तथा तान्नन्दादीन् ह्रदं निर्विशतः प्रवेष्टुकामान्प्रत्यषेधन्निषिषेध ॥ २२ ॥

सुमनोरञ्जनी — कृष्णे प्राणा येषाम् । कृष्ण एव प्राणो येषामिति वा । निर्विशतः प्रवेष्टुमुद्युक्तान् । कृष्णस्यानुभावं वेत्तीति तथाविधो रामः प्रत्यषेधत् ॥ २२ ॥

इत्थं स्वगोकुलमनन्यगतिं निरीक्ष्य
सस्त्रीकुमारमतिदुःखितमात्महेतोः ।
आज्ञाय मर्त्यपदवीमनुवर्तमानः स्थित्वा
मुहूर्तमुदतिष्ठदुरङ्गबन्धात् ॥ २३ ॥

सत्यधर्मीया — इत्थं स्वगोकुलं तज्जनं सस्त्रीकुमारमात्महेतोः स्वनिमित्तमतिदुःखितमाज्ञाय ज्ञात्वा पुच्छं वामकरेण धृत्वेति शेषः । यथोक्तं रुक्मिणीशविजये ।

स दन्दशूकस्य मुखं विभिन्दंस्तदीयपुच्छं जगृहे करेण ।
यथापराधं ननु दण्डदाता निरागसं कं वरयेन्न शौरिरिति ।

स्वस्वामिनो यात्रां कृत्वा मोचनं कार्यमित्यत आह । इत्थं स्वमनन्यगतिं गत्यन्तरशून्यं स्वात्मानमेव सर्वगतिं निरीक्ष्य च मर्त्यपदवीमनुवर्तमानो मुहूर्तं स्थित्वोरङ्गबन्धादुरगबन्धात् । नुमागमो बिन्दुर्वा इतराशक्यपरिहारताद्योतको बन्धस्येति ज्ञेयः । उदतिष्ठत् । एवमाज्ञाय निरीक्ष्येति पदयोरन्वयेऽश्लिष्टता । अन्यथाऽन्यतरवैय्यर्थ्यमिवानन्यगतीति भाव्यं कथमनन्यगतिमिति च निरस्तम् । गवां कुलानि गोकुलो गोकुलश्च तमिति वा । अनुबन्धो हि भक्तिः स्याद्बन्धः स्नेह उदाहृत इति वचनादुरङ्गात्मनो बलरामस्नेहं निमित्तीकृत्योरङ्गबन्धादुदतिष्ठदिति वा । यथोक्तं हरिवंशे ।

सङ्कर्षणस्तु सङ्क्रुद्धो बभाषे कृष्णमव्ययम् ।
कृष्ण कृष्ण महाबाहो गोपानां नन्दवर्धन ।
दम्यतामेष वै क्षिप्रं सर्पराजो विषायुधः ।
इमे नो बान्धवास्तात त्वां मत्वा मानुषं विभो ।
परिदेवन्ति करुणं सर्वे मानुषबुद्धयः ।

तच्छ्रुत्वा रौहिणेयस्य वाक्यं तत्स्नेहयन्त्रितः । विक्रुश्यास्फोटयद्बाहू इत्यादि ॥ २३ ॥

सुमनोरञ्जनी — अनन्यगतिं स्वमन्तराऽन्यगतिशून्यम् । निरीक्ष्य । तत्रापि आत्महेतोः स्वनिमित्तम् । इत्थं अतिदुःखितम् । आज्ञाय, मर्त्यानां पदवीं रीतिम् । अनुवर्तमानः अनुरुन्धानः । मुहूर्तं स्थित्वा उरङ्गबन्धात् सर्पबन्धात् । उदतिष्ठत् उत्थितः ॥ २३ ॥

तत्प्रथ्यमानवपुषा व्यथितात्मभोग-
स्त्यक्त्वोन्नमय्य कुपितः स्वफणान् भुजङ्गः ।
तस्थौ श्वसन् श्वसनरन्ध्रविषाम्बरीष-
स्तब्धेक्षणोल्मुकमुखो हरिमीक्षमाणः ॥ २४ ॥

सत्यधर्मीया — तस्य कृष्णस्य तेन वा प्रथ्यमानं विपुलीभवद्वपुः कलेवरं तेन । व्यथितो व्यथायुक्त आत्मनः स्वस्य भोगो यस्य सः । हरिं त्यक्त्वोत्सृज्य स्वफणानुन्नमय्योद्धृत्य भुजङ्गः कुपितः श्वसन्श्वसनरन्ध्रयोर्नासिकयोर्विषमेवाम्बरीषं भ्राष्ट्रं लाजभर्जनभाण्डं यस्य कालिम्ना साम्यं स्तब्धानीक्षिणानि यस्य चासौ, उल्मुकानीवास्पृश्यानि आस्यानि मुखानि यस्य सः । अम्बरीषं भवेद्भ्राष्ट्र इति विश्वः । क्लीबेऽम्बरीषं भ्राष्ट्रो ना । अङ्गारेऽलात उल्मुक इत्युभयतश्चामरः । ईक्षमाणः श्वसंस्तस्थौ ॥ २४ ॥

सुमनोरञ्जनी — तस्य कृष्णस्य, तेन कृष्णेन वा प्रथ्यमानं विस्तीर्यमाणं यद्वपुस्तेन । स चासौ प्रथ्यमानवपुश्च तेनेति वा । व्यथितः आत्मनो भोगः शरीरं यस्यासौ तादृशः । त्यक्त्वा श्रीकृष्णं परित्यज्य । कुपितः स्वफणान् उन्नमय्य । श्वसनरंध्रेषु वायुसंचारयुक्तरंध्रेषु मुखनासिकादिच्छिद्रेषु विषं यस्य, अम्बरीषमिव भ्राष्ट इव स्तब्धे अनिमिषे ईक्षणे यस्य, उल्मुकानि अङ्गाराणि मुखे यस्य स तथा । मुखादङ्गाराणि विसृजन्तमित्यर्थः । अम्बरीषः पुमान्भ्राष्ट्रमित्यभिधानम् । भ्राष्ट्रः भर्जनपात्रम् । अङ्गारेऽलात उल्मुकमित्यमरः । क्लीबेऽम्बरीषं भ्राष्टो नेत्यमरश्च ॥ २४ ॥

तं जिह्वया द्विशिखया परिलेलिहानं
द्वे सृक्किणी ह्यतिकरालविषाग्निदृष्टिम् ।
क्रीडन्नमुं परिससार यथा खगेन्द्रो
बभ्राम सोऽप्यपसरन् प्रसमीक्षमाणः ॥ २५ ॥

सत्यधर्मीया — तं, यथा खगेन्द्रो गरुडस्तथा जिव्हया द्विशिखया द्वे शिखे अग्रभागौ यस्याः सा तथा प्रातिस्विकमेकैकमुखशिखया । द्वे सृक्किणी ओष्ठान्तःपुटयोर्लेलिहानमास्वादयन्तमतिकरालो

यो विषाग्निस्तद्युक्तनेत्रममुं क्रीडन्नेव परिससार । सोऽप्यपसरन्पश्चाद्गच्छन्प्रसमीक्षमाणः सन् बभ्राम चचार ॥ २५ ॥

सुमनोरञ्जनी — द्वे शिखे प्रान्तभागौ यस्याः सा तया । जिह्वया । सृक्विणी ओष्ठप्रान्तभागौ । प्रान्तावोष्टस्य सृक्विणी इत्यमरः । परिलेलिहानम् । अतिकरालविषाख्याग्निर्दृष्टिषु यस्य तम् । अमुं सर्पम् । परिससार परितश्चचार । सोऽपि सर्पोऽपि । अपसरन् तिर्यग्गच्छन् । परितो बभ्राम । अवसरं प्रसमीक्ष्यमाण इति पाठे अवसरं अवकाशमित्यर्थः ॥ २५ ॥

एवं परिभ्रमहतौजसमुन्नतांसमानम्य तत्पृथुशिरस्यधिरूढ आद्यः ।
तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादाम्बुजोऽमृतकलाधिगुरुर्ननर्त ॥ २६ ॥

सत्यधर्मीया — एवं परिभ्रमेण परितः परिवर्तनेन हतमोजो यस्य सः । उन्नता अंसाः स्कन्धा यस्य तमानम्यानमय्य शिरस्यधिरूढ आद्यः पुराणपुरुष आद्यः प्राक्तेन भक्ष्यत्वेन कृतः सोऽप्यधिरूढ इति वा । अदधातोर्ऋहलोर्ण्यदिति ण्यत्प्रत्ययः । तस्य मूर्धसु विद्यमानानां रत्नानां निकरस्त-त्स्पर्शेनातिताम्रं पादाम्बुजं यस्य सः । अमृतकलाधिगुरुरमृतकलो ह्यमृतकिरणः सोमः स एवादि-गुरुर्मूलपुरुषो यस्य सः । अमृतकला अधिरधिको यस्य तस्य वंशस्य गुरुरिति वा । अखिलकलाधि-गुरुरिति पाठे सकलकलास्वामीत्यर्थः । पक्षद्वन्द्वेऽपि न विषयविषमताऽस्येति ध्वन्यते । ननर्त ॥२६॥

सुमनोरञ्जनी — एवं परितो भ्रमणेन हतं ओजः सामर्थ्यं यस्य तम् । उन्नतौ अंसौ यस्य तम् । आनम्य नम्रीकृत्वा । तस्य सर्पस्य पृथुशिरसि विस्तृते मूर्धनि । अधिरूढः सन् । तस्य मूर्धसु विद्यमानो यो रत्ननिकरः तस्य स्पर्शेन अतिताम्रं पादाम्बुजं यस्य सः । ननर्त । ननु एतस्य विषाग्निना पार्श्वस्थाः कथं न दग्धा इत्यत उक्तम् ॥ अमृतकलस्य चन्द्रस्य अधिगुरुरिति । चन्द्रापेक्षयाऽधिकशीतलकृपावलोकनेन न दग्धा इति ध्वनितम् । अखिलकलाधिगुरुरिति पाठे तु नर्तनकौशलं सूचितं भवति ॥ २६ ॥

तं नर्तुमुद्यतमवेक्ष्य तदा तदीयगन्धर्वसिद्धसुरचारणदेववध्वः ।
प्रीत्या मृदङ्गपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः ॥ २७ ॥

सत्यधर्मीया — नर्तुं नर्तितुमुद्यन्तं तं कृष्णमवेक्ष्य । तदीयास्तद्भक्ताश्च गन्धर्वसिद्ध-मुनिचारणदेववध्वः प्रीत्या मृदङ्गपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः उपस्थिताः सहस उपसेदुरिति पदद्वयं हे सहस एवं विपर्यासेऽपि हाससहितेत्युपसेदुरिति वा ॥ २७ ॥

सुमनोरञ्जनी — ननु नर्तनाङ्गमृदङ्गतालोपगीताद्यभावे नर्तनं कथं शोभत इत्यत आह ।। तमिति । तं श्रीकृष्णम् । नर्तुं नर्तनं कर्तुं उद्यतम् । तदीयाः श्रीकृष्णे भक्तिमत्यः गन्धर्वादीनां वध्वः । मृदङ्गादिभिः उपसेदुः उपस्थिताः । तत्र गन्धर्वादिस्त्रियो मृदङ्गादिभिः । मुन्यादिस्त्रियस्तु पुष्पोपहारनुतिभिरिति विवेकः ।। २७ ।।

यद्यच्छिरो न नमते गरकालशीर्ष्णस्त-
त्तन्ममर्द खलदण्डधरोऽङ्घ्रिपातैः ।
क्षीणे बले भगवतोल्बणमाशु वक्त्राद्
रक्तं वमन् परमकश्मलमाप नागः ।। २८ ।।

सत्यधर्मीया — गरेण कालानि श्यामानि शीर्षाणि यस्य तस्य यद्यच्छिरो न नमते न नमति तत्तद्दण्डधरोऽङ्घ्रिपातैः पादकुट्टनैममर्द । एवं भगवता बले क्षीणे सति वक्त्रान्मुखेभ्य आशूल्बणं रक्तं वमन्परमकश्मलं मूर्छां नाग आप । मूर्छा तु कश्मलं मोह इत्यमरः । परमकश्मलं नागः किं, न प्राप्तोऽसि किमिति ममर्द ।। २८ ।।

सुमनोरञ्जनी — गरेण विषेण कालशीर्ष्णः नीलशिरसः नागस्य यद्यच्छिरो न नमते न प्रह्वीभवति तत्तच्छिरः अङ्घ्रिपातैः ममर्द । कुतः । यस्मादयं खलेभ्यो दण्डधरः । खलानां शिक्षणार्थमेवावतीर्ण इति भावः । भगवता श्रीकृष्णेन निमित्तेन । बले क्षीणे सति । उल्बणं रक्तं वमन् । परमकश्मलं मोहमापेति सम्बन्धः ।। २८ ।।

तस्याक्षिभिर्गरलमुद्वमतः शिरस्सु यद्यत्
समुन्नमति निःश्वसतो रुषोच्चैः ।
नृत्यन् पदाऽनुनमयन् स यदा बभूव
पुष्पैः स्तुतोऽथ भगवान् पुरुषः पुराणः ।।२९।।

सत्यधर्मीया — अक्षिभिर्नयनैर्गरलमुद्वमतो रुषा चोच्चैरुच्छ्वसतः । शिरस्सु मध्ये यद्यत्स-मुन्नमति प्रह्वं भवति नृत्यंश्च पदाऽनुनमयन् पुनर्नम्रं कुर्वन्नृत्यन्यदा बभूव तदा पुष्पैस्तद्धर्षणपुरःसरं स्तुतो बभूव । दमयाम्बभूवेत्यपि पठन्ति । तत्र पदद्वयम् । नियतश्चानुप्रयोगः । पुष्पैः सुपूजित इवेह पुमान्पुराण इति केचित्पठन्ति । स्फुटार्थः पाठः ।। २९ ।।

सुमनोरञ्जनी — अक्षिभिर्गरलं विषम् । उद्वमतः विसृजतः । रुषा उच्चैः निःश्वसतः फूत्कारं कुर्वतः । तस्य नागस्य । शिरस्सु मध्ये । यद्यत्समुन्नमति स्तब्धतया तिष्ठति तत्तच्छिर अनुनमयन् सन् । नृत्यन् नर्तनकर्ता यदा बभूव तदा देवैः पुष्पैः वृष्टः स्तुतश्चेति ॥ २९ ॥

तच्चित्रताण्डवविरुग्णफणातपत्रो रक्तं मुखैरुरु वमन् नृप भग्नगात्रः ।
स्मृत्वा चराचरगुरुं पुरुषं पुराणं नारायणं तमरणं मनसा जगाम ॥ ३० ॥

सत्यधर्मीया — तस्य श्रीकृष्णस्य चित्रं यत्ताण्डवम् ।

अनीनदत्पद्मभवो मृदङ्गं जगौ हनूमाञ्जगतामधीशम् ।
अदर्शयत्तालगतीः कपर्दी ननर्त गोपालकबालमौलिः ।

इत्यादेश्चित्रता ताण्डवस्य । तेन विरुग्णं भग्नं फणारूपं फणरूपं वाऽऽतपत्रं यस्य सः । मुखैरुरु यथा रक्तं वमन् । भग्नमितरद्गात्रं यस्य सः । चराचरगुरुं पुराणं पुरुषं नारायणं स्मृत्वा स एवायमिति सञ्चिन्त्य मनसाऽरणं शरणं दंशनादिरणाभावं च जगाम ॥ ३० ॥

सुमनोरञ्जनी — तस्य श्रीकृष्णस्य चित्रं नानाजातीयम् । चित्रं चेतनानां रमणं रञ्जकं वा । चिच्छब्दोपपदाद्रमतेः रञ्जतेर्वा डः । ताण्डवं नर्तनम् । तेन विरुग्णं भग्नं फणातपत्रं फणालक्षणं आतपत्रं छत्रमेव यस्य सः । उरु पूर्वापेक्षया उत्कृष्टं रक्तम् । वमन् । तं श्रीकृष्णम् । नारायणं स्मृत्वा प्रत्यभिज्ञाय मनसा अरणं शरणं जगामेति ॥ ३० ॥

कृष्णस्य गर्भजगतोऽतिभरावसन्नपार्ष्णिप्रहारपरिरुग्णफणातपत्रम् ।
दृष्ट्वाऽहिराजमुपसेदुरमुष्य पत्न्य आर्ताः श्लथद्वसनभूषणकेशबन्धाः ॥३१॥

सत्यधर्मीया — गर्भे उदरमध्ये जगद्यस्य तस्य योऽतिभरस्तेनावसन्नं कृशं पार्ष्णेः पादपृष्ठ-भागस्य प्रहारैस्ताडनैः परिरुग्णं भग्नं फणातपत्रं यस्य तमहिराजं दृष्ट्वाऽमुष्य पत्न्यः श्लथद्वसन-भूषणकेशबन्धाः सत्य आर्ता उपसेदुः ॥ ३१ ॥

सुमनोरञ्जनी — गर्भे जगत् यस्य तस्य कृष्णस्य अतिभरेणैव अवसन्नः पीडितः । तत्रापि पार्ष्णिर्गुल्फाधोभागस्तेन यः प्रहारस्तस्मात् परिरुग्णं फणातपत्रं यस्य तम् । पुमान्पार्ष्णिस्तयोरध इत्यमरः । एवंविधमहिराजं दृष्ट्वा । अमुष्य पत्न्यः उपसेदुः तत्समीपं प्राप्ताः । कीदृश्यः । श्लथद्वसनभूषणकेशबन्धाः विस्रंस्यमानाः वस्त्रालङ्कारवेण्यो यासां ताः । उद्विग्नानां स्वभावोक्तिरियम् ॥ ३१ ॥

तं ता विपन्नमनसोऽथ पुरस्कृतार्हाः कायं निधाय भुवि भूतपतिं प्रणेमुः ।
साध्व्यः कृताञ्जलिपुटाः परमस्य भर्तुर्मोक्षेच्छवः शरणदं शरणं प्रपन्नाः ॥३२॥

सत्यधर्मीया — विपन्नमनसो नम्रचित्ताः पुरस्कृतोऽर्होऽर्हणसाधनं याभिस्ताः खिन्नमानसा वा । भुवि तीरभूमौ जलादिस्थानमात्रे वा कायं निधाय दण्डवत्, कायं निधायेत्यनेन विना न कायजबाधाबाध इति वध्वो ध्वनयामासुरिति तच्चातुर्यं महदिति ज्ञेयम् । भूतपतिं जगद्राजं कृताञ्जलिपुटाः परमस्य स्वोत्तमस्य भर्तुः कालियस्य मोक्षेच्छवो मोक्षमिच्छन्तीति तास्तथा । नलोकेति निषेधान्न षष्ठी । स्वपतिमोचनमिच्छन्त्यः । परमस्य सकाशात्पत्युर्मोक्षेच्छव इति व्याख्याने भूतपतिमिति किञ्चिदुश्चित्तं भवतीति वदन्ति । शरणदं शरणं प्रपन्नाः प्रणेमुर्नेमुः । भुवि शरणदमिति वाऽन्वयः ॥ ३२ ॥

सुमनोरञ्जनी — साध्व्यः पतिव्रताः । परमस्य सकाशात् । स्वभर्तुः मोक्षं मोचनमिच्छन्त्यः । कृताञ्जलिपुटाः सत्यः शरणं प्रपन्नाः । अथ पुरस्कृतानि अर्हाणि पूजासाधनानि याभिस्ताः । भुवि कायं निधाय प्रणेमुः साष्टाङ्गं प्रणेमुरित्यर्थः ॥ ३२ ॥

नागपत्न्य ऊचुः

न्याय्यो हि दण्डः कृतकिल्बिषेऽस्मिन् तवावतारः खलनिग्रहाय ।
रिपोः सुतानामपि तुल्यदृष्टेः धत्से दमं फलमेवानुशंस्यम् ॥ ३३ ॥

सत्यधर्मीया — कृतकिल्बिषेऽस्मिन्विषधरे दण्डः शिक्षा न्याय्यो न्यायादनपेतो न्यायप्राप्त इति यावत् । रिपोर्वैरिवारे सुतानां पुत्रेष्वपि तुल्या समा तत्तद्योग्यतानुसारिणी दृष्टिर्यस्य तस्य तवावतारः खलनिग्रहायैव । अनुशास्यमानोऽनुगुणतया वर्णनीयं फलं तद्रूपं दममनुग्रहं धत्से धरसि करोषीति यावत् ॥ ३३ ॥

सुमनोरञ्जनी — अस्मिन्सर्पे यो दण्डः निग्रहलक्षणः सः न्याय्यः युक्तः । ननु अनपराधिनि कथं दण्डो युक्त इत्यत आह ॥ कृतेति । कृतं किल्बिषं अपराधो येन तस्मिन् । कृतकिल्बिषेऽपि कुतो निग्रह इत्यत उक्तम् ॥ तवावतारः खलानां निग्रहाय निग्रहार्थमेव भवतीति । नैतावता त्वयि निग्रहानुग्रहलक्षणं वैषम्यं मन्तव्यमित्याह ॥ तुल्यदृष्टेरिति । तुल्या अपराधाद्यनुसारिणी दृष्टिर्यस्य स तथा तस्य । यद्वा तुल्यदृष्टेरिति पञ्चमी तृतीयार्थे । तुल्यदृष्ट्या अपराधानुसारिदृष्ट्या रिपोः सुतानामपि यद्दमं दण्डं धत्से तत् फलं अनुग्रहरूपमेवेत्यनुशंसनीयं प्रशंसनीयं न तु निग्रहरूपं मन्तव्यम् ॥ ३३ ॥

अनुग्रहोऽयं भवता कृतो हि नो दण्डोऽसतां ते खलु कल्मषापहः ।
यद् दन्दशूकत्वममुष्य देहिनः क्रोधोऽपि तेऽनुग्रह एव सम्मतः ॥ ३४ ॥

तात्पर्यम् – 'दण्डोऽपि भगवच्चीर्णो ममैषोऽनुग्रहः स्मृतः । इति भक्त्या चिन्तयतां शुभकारी भवत्यलम् । तत्रापि कुर्वतां द्वेषं तमः प्राप्त्यै तथा भवेदि'ति च ॥ ३४ ॥

सत्यधर्मीया — अनुग्रहोऽयं भवता कृत इति श्लोके केशवकृतदमनमात्रस्य पात्राधिकारिमात्रपापनाशकता प्रतीयते । तथा चेज्जरासन्धादिदुर्जनैर्नो नाशकतापन्ना । सा च मानदूनेत्यतो मानतस्तदभिप्रायमाह ॥ **दण्डोऽपीति ।** एष भगवच्चीर्णो दण्डो ममोपर्यनुग्रहः कृत इति चिन्तयताम् । तदपि न साल्वादिचिन्तनवदित्याह ॥ **भक्त्येति ।** अलं शुभकारी भवति । तत्राप्येवं दण्डे कृते द्वेषमेवं कृतवान्भगवानिति द्वेषं कुर्वतां तमःप्राप्त्यै यथाऽशुभाप्त्यै तथा भवेदिति च महाकौर्म इति शेषः ॥ **ततश्चायं श्लोकार्थः ।** ननु निग्रहः कृतोऽयमनुग्रहः कथमित्यत एवमनुसन्धाने स तथा । नैवं चेदनेवमित्यावेदयन्ति ॥ **अनुग्रह इति ।** भवता कृतो दण्डो न उपर्यनुग्रहस्तदात्मा । हि यतस्ते दण्डोऽसतामौपाधिकासत्कर्मणां कल्मषापहः पापहरः खलु निश्चयः । अयं तु तिर्यग्जन्मवानिति भवति चासन्नित्याह ॥ **यदिति ।** अमुष्य देहिनः कालीयस्य यद्यतो दन्दशूकत्वं जनदंशनयोनित्वं तदयमसदत एतज्जन्मापादकपापमोचकत्वाद्वैतद्योनावपि त्वच्चरणस्मरणकारणत्वाद्वाऽयं क्रोधोऽपि तेऽनुग्रह एवेति नः सम्मतः । येऽसत्कर्माणोऽपि दण्डे त्वया चीर्णेऽयमग्रनुहः कृतः कृतज्ञेनेति चिन्तयन्ति तेषामन्तः सत्स्वभावानां कल्मषमसुरावेशादिसन्निवेशकृतं पापमपहन्ति स तथा । अखलु यत्कल्मषमपहन्तीति वा । खं मोक्षसुखं लुनाति छिनत्तीति तच्च तत्कल्मषं च तन्न भवतीत्यखलुकल्मषं तदपहन्ति नाशयतीति स तथेति वा । अनेन तत्पातकस्य स्वरूपाननुबन्धिता ध्वन्यते । येषामसतामसत्स्वभावानां चीर्णे दण्डे क्रोधो जरासन्धादीनां भवता कृतो दण्डः कल्मषापहः पातकघातकः खलु नेत्यप्यर्थो मानानुयानेन ज्ञेयः । अलंखल्वोः प्रतिषेधयोः खलु निषेधने च वीप्सायामिति विश्वः । पापापनोदेन तेषां तमःप्राप्त्यै भवतीति भावः । उपलक्षणमेतत् । असतां मध्यमानां च दण्डः खलुश्च कल्मषापहश्चेत्युभयरूप इत्यपि योजना ज्ञेया । इति भवता कृतो भवोऽस्त्येषामित्यर्शआद्यचि संसारिणस्तेषां भावो भवता नित्यसंसारिता कृता येन स इति तदर्थ इति वा । उतामृतत्वस्येशान इतिवद्वर्गार्थे वा त्वप्रत्ययवदयं तल् । संसारसङ्कृदिति वा । अमुष्यामुं पतिभिक्षामिति यावत् । नो देहीत्यान्तरङ्गिको भावो भामिनीनां ज्ञेयः ॥ ३४ ॥

सुमनोरञ्जनी — कथं दण्डोऽनुग्रहरूप इत्यतस्तदेव प्रपञ्चयति ॥ अनुग्रहेति । भवता कृतः अयं व्यापारः अनुग्रह एव नो दण्डः । कुतः । हि यतोऽसतामप्यस्माकं कल्मषापहः पापपरिहारकः । किं

तत्कल्मषमित्यत आह ।। यत् यस्मात् कल्मषात् अमुष्य देहिनः दंदशूकत्वं सर्पजन्मप्राप्तमिति । ननु क्रोधपूर्वको व्यापरः कथं न दण्ड इत्यत उक्तम् ।। क्रोधोऽपीति । ते त्वया क्रियमाणः निग्रहरूपव्यापारः क्रोधोऽपि क्रोधकार्यतया प्रतीयमानोऽपि अनुग्रह एवेति संमतः सम्यक् भक्त्या मतः चिन्तितोऽस्माभिरिति । न केवलं वाचा व्यवहरामः अपि तु भक्त्या चिन्तयाम इति भावः । अथवा नः अस्माकं यो दण्डो भवता कृतः अयमनुग्रह एव न निग्रह इति पदरत्नावलीरीतिरनुसर्तव्या। ननु भर्तृव्यसनव्यग्रचेतोभिः तत्परिहार एव प्रार्थनीयो न पुनस्तस्य दण्डानुमोदनं कर्तव्यमित्याशङ्कायां न दण्डानुमोदनं कृतमपि तु भगवत्कृतदण्डस्यानुग्रहतया चिन्तनं भगवत्तुष्टिकरणमेव सम्पादयेत् । अन्यथा त्वन्यथेति तथानुसंहितमाभिरिति भावेनाहुराचार्याः ।

दण्डोऽपि भगवच्चीर्णो ममैषोऽनुग्रहः कृतः ।
इति भक्त्या चिन्तयतां शुभकारी भवत्यलम् ।

तत्रापि कुर्वतां द्वेषं तमः प्राप्त्यै तथा भवेत् । इति । यद्यपि दण्डो निग्रहस्तथापि । तत्रापि तत्र तु । भगवत्कृतदण्डे त्वित्यन्वयार्थः ।। ३४ ।।

तपः सुतप्तं किमनेन पूर्वं निरस्तमानेन च मानदेन ।
धर्मोऽथवा सर्वजनानुकम्पया यतो भवांस्तुष्यति सर्वजीवः ।। ३५ ।।

सत्यधर्मीया — स्वपतिरपि न पतितः किन्तु त्वदनुग्रहपात्रमिति महानित्याहुः ।। **तप इति ।** अनेन । निरस्तो मानोऽहन्ता येन स तेन । तथा मानदेन माननीयमानप्रदेन । मानदेन मौनव्रतवता वा । मा न विद्यते नदः समुद्रः स्वावासत्वेन यस्य स इति प्रस्तुतविवक्षया । इदानीं त्यक्तसमुद्रवासेन प्राक् किं किंरूपं तपः सुतप्तं कृतम् । निर्धारणे सप्तमी तपस्सु तन्मध्ये किं तपश्चीर्णमिति वा । यथोक्तं हरिवंशे ।

उत्सृज्य सागरावासं यो मया विदितः पुरा ।
भयात्पतगराजस्य सुपर्णस्योरगाशिनः ।। इति ।

सर्वजनानुकम्पया सर्वेषु जनेष्वनुकम्पया । धर्मो भूदानादिलक्षणोऽथवाऽनुष्ठितः । कुत इत्यत आह ।। **यत इति ।** भवान्सर्वजीवः सर्वजीवनदस्तुष्यति ।। ३५ ।।

सुमनोरञ्जनी — रमाप्रमुखसर्वदैवतवरप्रार्थनीयोऽपि त्वच्चरणरेणुस्पर्शाधिकारो यदस्य दन्दशूकस्याभूत्तत्प्राग्भवीयभवद्विषयतप आदिषु किंप्रभावप्रभवमिति न जानीम इत्यभिनन्दन्तीत्याह ।। तप इति । न इत्यनुवर्तते शेषो वा । नः अस्माकं मानदेन पत्या । हे मानदेन स्वामिन् इति वा । यद्वा

मानं गर्वं घ्नन्ति खण्डयन्ति ये ते मानदाः । तेषां इनेति वा । निरस्तः मानो गर्वो यस्य तेन । अनेन सर्पेण । किं तपः । सु सम्यक् त्वत्प्रीत्युद्देशेनेति यावत् । तप्तं कृतम् । प्राग्जन्मनीति शेषः । अथ सर्वान् जीवयतीति तथाविधो भवान् । यतो यस्माद्धर्मात् अनुष्ठितात् तुष्यति स धर्मोऽनुष्ठितो वा किम् ? ॥ ३५ ॥

कस्यानुभावोऽस्य न देव विद्महे तवाङ्घ्रिरेणुस्पर्शाधिकारः ।
यद्वाञ्छया श्रीर्ललनाऽचरत् तपो विहाय कामान् सुचिरं धृतव्रता ॥ ३६ ॥

सत्यधर्मीया — हे देव । अयं कस्य तप आद्यन्यतमस्यानुभावः प्रभाव इति न विद्महे न जानीमः । हे देव न विद्मेति वा । अयं क इत्यत आह ॥ **तवाङ्घ्रिरेणुस्पर्शाधिकार इति** । अङ्घ्र्योः रेणवो धूलयस्तेषां स्पर्शः सम्बन्धस्तस्मिन्नधिकारोऽनुभाव इत्यप्यन्वेति । कुतस्तस्य दुर्मिलता चरणरेणुस्पर्शस्येत्यत आहुः ॥ **यदिति** । ललना श्रीरपि कामानितरविषयान्विहाय सुचिरं धृतव्रता सती यद्वाञ्छया तपोऽचरच्चचार ॥ ३६ ॥

सुमनोरञ्जनी — अस्य सर्पस्य । तवाङ्घ्रिरेणुस्पर्शोऽधिकारो योग्यता । तप आदिषु मध्ये । कस्य सुकर्मणः अनुभावः माहात्म्यं सामर्थ्यमिति यावत् तत् न विद्महे । यस्य तव अङ्घ्रिरेणुस्पर्शस्य वाञ्छया इच्छया । श्रीर्ललना महालक्ष्मीरपि । तपः आलोचनम् । नूनं तपो यस्य न मन्युनिर्जय इत्यादिरूपम् । अचरत् अकरोत् । अथ च कामान् काम्यान् ब्रह्मादीनपि विहाय त्वय्येव सुचिरं धृतव्रता आसीत् । त्वया नित्यावियोगिनी बभूवेति भावः ॥ ३६ ॥

न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा वाञ्छन्ति त्वत्पादरजःप्रपन्नाः ॥ ३७ ॥

तात्पर्यम् – 'अपुनर्भवमात्रात्तु हरिसामीप्यमुत्तमम् । तत्रापि स्पर्शयोग्यत्वं यथा वेदविदो विदुरि'ति पाद्मे ॥ ३७ ॥

सत्यधर्मीया — न नाकपृष्ठमिति श्लोके न मोक्षसदृशं किञ्चिदित्याद्युक्तपुरुषार्थोत्तमं मोक्षं न वाञ्छन्तीति कथं कथ्यत इत्यतस्तत्तात्पर्यं मानेनाह ॥ **अपुनर्भवमात्रादिति** । जननादिविकलान्मोक्षाद्धरिसामीप्यं तद्रूपो मोक्ष उत्तमस्तत्रापि सामीप्येऽपि स्पर्शयोग्यत्वमुत्तममित्यन्वेति । यथा सम्यगुत्तममिति वेदविदो विदुः ॥ **ततश्चायं श्लोकार्थः** ॥ के ते कामास्तस्य त्यक्ता इत्यतस्तानाहुः ॥ **नेति** । नाकपृष्ठं नाकस्य पृष्ठे सुकृते तेऽनुभूत्वेत्यादेः स्वर्गं, न च पारमेष्ठ्यं सत्यलोकाधिपत्यं न सार्वभौमं चक्रवर्तितां गतम् । इमा रामाः सरथाः सतूर्या इत्युक्तेः साम्राज्यं रसाधिपत्यं बलिप्रभावं न

योगसिद्धीरणिमादीन् । अपुनर्भवं सामान्यमुक्तिम् । तत्पादरजः प्रपन्नाः । तदित्यव्ययं षष्ठ्यर्थे । त्वत्पादेति पाठस्तु स्फुटार्थः । न वाञ्छन्तीत्यन्वयः ॥ ३७ ॥

सुमनोरञ्जनी — अन्येऽपि त्वत्पादरजःप्रपन्नाः नाकपृष्ठादिकं न वाञ्छन्तीत्यन्वयः । नाकपृष्ठं स्वर्गम् । पारमेष्ठ्यं सत्यलोकाधिपत्यम् । सार्वभौमं चक्रवर्तिपदम् । रसाधिपत्यं रसातलाधिपत्यम् । सार्वभौमातिरिक्तभूपतित्वं वा । योगसिद्धीः अणिमाद्याः । अपुनर्भवं पुनर्भवशून्यं लोकम् । नन्विदमयुक्तमिवाभाति । पुनर्भवशून्यलोको हि मोक्ष एव । तत्रानाकांक्षाया अयोगादित्याशङ्कां मोक्षेऽपि तारतम्यसद्भावाद्भगवदंगस्पर्शलक्षणमोक्षापेक्षया अपुनर्भवमात्रस्यावरत्वेन तत्रौदासीन्यं भगवत्पादरजः प्रपन्नानां युक्तमेवेति भावेन परिहरन् मोक्षेऽपि तारतम्यबोधकं पाद्मवचनमेवोदाहरति भगवानाचार्यः ।

अपुनर्भवमात्रात्तु हरिसामीप्यमुत्तमम् ।
तत्रापि स्पर्शयोग्यत्वं यथा वेदविदो विदुः ॥

इति पाद्म इति ।

अपुनर्भवमात्रात्, न विद्यते पुनर्भव उत्पत्तिर्यस्मिन्सोऽपुनर्भवाख्यो मुक्तिविशेषः । केचिदत्रैव मुच्यन्त इत्यादिशास्त्रोक्तः । तस्मात् । हरिसामीप्यं आदघ्रास इत्याद्युक्तम् । तत्रापि सामीप्येऽपि । स्पर्शयोग्यत्वं हरेरङ्गस्पर्शयोग्यत्वं उत्तमम् । इतीमं प्रभेदम् । यथा यथावत् । वेदं विदन्तीति तथोक्ताः वेदार्थज्ञानिनो विदुरित्यर्थः ॥ ३७ ॥

तदीश नाथाप दुरापमन्यैस्तमोजनिः क्रोधवशोऽप्यनीशः ।
संसारचक्रे भ्रमतः शरीरिणो यदीप्सितं स्याद्धि भवत्समक्षम् ॥ ३८ ॥

सत्यधर्मीया — ईश लक्ष्मीसुखद! नाथ सर्वनाथ । संसारचक्रे तत्समूहे वा तदात्मकचक्रे वा भ्रमतः शरीरिणो देहधारिणो यदीप्सितं वाञ्छितं स्यात्तदन्यैः साधनसामग्रीशून्यैर्दुरापं दुष्प्राप्यं तमोजनिः क्रोधवशोऽनीशोऽस्मदादिप्राणिनां नार्थः समर्थेतरो वा । भवत्समक्षं भवतोऽपरोक्षं प्राप । हिना सर्वानुभवसिद्धतामाहुः ॥ ३८ ॥

सुमनोरञ्जनी — हे ईशानां ब्रह्मादीनामपि नाथ ! संसारचक्रे भ्रमतः । अनीशोऽस्वतन्त्रस्य शरीरिणः । संसारनिवर्तकतया यद्भवतः समक्षं साक्षात्कारणमीप्सितं वाञ्छितं अन्यैर्दुरापं तत् भवतः समक्षं आप । तमोजनिः तमोगुणेन जनिर्जन्म यस्यासौ तथोक्तः । क्रोधवशोऽपि भवदपरोक्षसाधनसामग्रीरहितोऽपीति यावत् । भवतः समक्षं प्रत्यक्षत एव तत् भवत्पादरजः आपेति केचिद्योजयन्ति । अहीश इत्यपि पठन्ति ॥ ३८ ॥

नमस्तुभ्यं भगवते पुरुषाय महात्मने ।
भूतावासाय भूताय पराय परमात्मने ॥ ३९ ॥

तात्पर्यम् – भूताय सदा विद्यमानाय ॥ ३९ ॥

सत्यधर्मीया — नमस्तुभ्यं भगवत इति पद्ये भूताय भूतभूतायेति जगज्जनार्दनैक्यमुच्यत इति भ्रमं भ्रंशयन्ननूद्य व्याकरोति ॥ **भूताय सदा विद्यमानायेति ।** भू सत्तायामित्यस्मात्कप्रत्ययः । कालप्रबन्धमात्र इति द्योतयितुं सदेति पूर्वाचार्यैरिति ज्ञेयम् ॥ **ततश्चायं पद्यार्थः** ॥ महात्मने भगवते पुरुषाय भगवते नमः । भूतावासाय जगन्निलयाय भूताय सदा विद्यमानाय पराय परात्मने । तत्तद्वेदान्तगतशब्दानुकृतिरियमिति न पुनरुक्तिरिति हृदयम् । एवमुत्तरत्रापि ॥ ३९ ॥

सुमनोरञ्जनी — भगवते पूर्णषड्गुणाय पुरुषाय अन्तर्यामिणे । पुरुषो हृदिस्थः परम इति ब्राह्मवचनात् । भूतानां प्राणिनामावासाय । भूताय विद्यमानाय भू सत्तायामिति धातोः । कालविशेषानुक्तेः सर्वदा विद्यमानायेति यावत् । तदुक्तं भूताय सर्वदा विद्यमानायेति । पराय विलक्षणाय । भूतेभ्य इति लभ्यते । परमात्मने परमश्चासावात्मा चेति तस्मै । परमं उत्कृष्टज्ञानं आददातीति तथोक्ताय वा ॥ ३९ ॥

ज्ञानविज्ञाननिधये ब्रह्मणेऽनन्तशक्तये ।
अगुणायाविकाराय नमस्तेऽप्राकृताय च ॥ ४० ॥

तात्पर्यम् – अप्राकृताय ॥ ४० ॥

सत्यधर्मीया — ज्ञानेति श्लोकेऽप्राकृतेति पदमिति दर्शयति ॥ **अप्राकृतायेति ।** ज्ञानं सामान्यं, विज्ञानं, सामान्यैर्ये त्वविज्ञेया विशेषा मम गोचराः । देवादीनां तु तज्ज्ञानं विज्ञानमिति कीर्तितमिति मानिकं विज्ञानं तन्निधये । अगुणायाविकारायाप्राकृताय तुभ्यं नमः ॥ ४० ॥

सुमनोरञ्जनी — भगवत्त्वमेव विवृण्वन्ति ॥ ज्ञानेति । ब्रह्मणे ऐश्वर्यादिगुणैः अपरिच्छिन्नाय । अगुणाय सत्वादिगुणबन्धशून्याय । स्वभिन्नानन्दादिगुणरहिताय वा । तदुक्तं पूर्वमेव । अगुणो गुणदेहत्वादिति । अविकाराय । कुतः । अप्राकृताय । न विद्यते प्राकृतं शरीरादिकं यस्य तस्मै । अत्र प्राकृतायेति पदविभागभ्रमं वारयितुं अप्राकृतायेति विभागमात्रं प्रदर्शितं तात्पर्ये ॥ ४० ॥

कालाय कालनाभाय कालावयवसाक्षिणे ।
विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे ॥ ४१ ॥

तात्पर्यम् – कालनाभाय कालाश्रयाय । 'विश्वस्य तदधीनत्वाद्विश्वं विष्णुरुदीर्यते । मूलहेतुत्वतो हेतुः कर्ता प्रातिस्विकं कृते'रित्याग्नेये ॥ ४१ ॥

सत्यधर्मीया — कालनाभायेत्यप्रतीतेरनूद्य व्याचष्टे ॥ **कालनाभायेति ।** नाभिशब्दपर्यायोऽयं स्वार्थतद्धितो नाभशब्दः कालाश्रयत्वार्थक इति केचित् । नाभिरित्यथ नाभः स्याद्विष्णुः सर्वाश्रयो यत इत्यादेर्नाभिशब्द आश्रयमात्रार्थकः । तथा च कालस्य नाभ इति विग्रह इति वदन्ति । भगवदङ्गानां भगवताऽभेदात्कालो नाभौ स्वस्मिन्नित्यच्प्रत्ययेति योगाविभागात्कालनाभः पद्मनाभस्तस्मै । बहुव्रीह्यर्थ एवाचार्यैः साम्मुग्ध्येनोक्त इत्यपि व्याचक्रिरे । विश्वाय तत्कर्त्रे । विश्वहेतव इति पदार्थं मानत आह ॥ **विश्वस्येति ।** मूलहेतुत्वतो विष्णुहेतुः प्रातिस्विकं प्रति व्यक्तिकरणत्वात्कर्तेत्युच्यत इत्यन्वयः । अनेन मूले कर्तृपदानन्तरं सतो विश्वहेतुपदस्य मुख्यसर्वकारणार्थकत्वात् प्रागन्वयनीयता सूचितेति मन्तव्यम् । ततश्चायं श्लोकार्थः ॥ कालाय पुमर्थदात्रे । कालनाभाय तदाश्रयाय । कालावयवसाक्षिणे क्षणलवादिलक्षणतदवयवसाक्षिणे । विश्वाय स्वाधीनीकृतप्रपञ्चत्वाद्विश्व-शब्दवाच्याय । तदुपद्रष्टे तत्तत्कृतसुकृतदेयफलज्ञाय । तद्धेतवे तन्मूलकारणाय । तत्कर्त्रे प्रातिस्विकं तदुत्पत्तिकर्त्रे ॥ ४१ ॥

सुमनोरञ्जनी — कालाय कालनियामकाय । सर्वगताय रुद्रान्तर्गताय वा ।

पुरुषो हृदिस्थः परमः कालः सर्वगतो हरिः ।
अथ वा रुद्रदेहस्थो हरिः काल इतीरितः ॥

इति तृतीयोदाहृतब्राह्मवचनात् । यद्वा कालाय सर्वज्ञाय, सर्वजगद्बन्धकाय,सर्वसंहारकाय वा । कल ज्ञाने, कल बन्धने, कल छेदने, कल कामधेनुरिति पठन्तीति गीताभाष्योक्तरीत्याऽर्थः । कालनाभाय कालाश्रयाय । तदुक्तं कालनाभाय कालाश्रयायेति । कालावयवानां सूक्ष्मकालानां साक्षिणे साक्षाद्द्रष्ट्रे । विश्वाय स्वाधीनप्रपञ्चाय । तदुक्तम् विश्वस्य तदधीनत्वाद्विश्वं विष्णुरुदीर्यत इति । तदुपद्रष्ट्रे तत्साक्षिणे । सर्वज्ञायेति यावत् । तत्कर्त्रे तस्य विश्वस्य कर्त्रे । विश्वस्य हेतवे मूलकारणाय । अत्र पौनरुक्त्यपरिहाराय तात्पर्यम् । मूलहेतुत्वतो हेतुः कर्ता प्रातिस्विकं कृतेः । इत्याग्नेय इति । तथा च हेतव इत्यनेन प्रकृत्यादिनियमनेन मूलकारणत्वम् । कर्त्रे इत्यनेन कुलालादौ स्थित्वा प्रातिस्विककर्तृत्वं विवक्षितमिति न पौनरुक्त्यमिति भावः ॥ ४१ ॥

भूतमात्रेन्द्रियप्राणमनोबुद्ध्याशयात्मने ।
निर्गुणेनाभिमानेन गूढस्वात्मानुभूतये ॥ ४२ ॥

सत्यधर्मीया — भूतानि पञ्च । मात्राः शब्दाद्याः । इन्द्रियाणि श्रोत्रादीनि दश । प्राणाः पञ्च दश वा । मनः सङ्कल्पात्मकम् । बुद्धिः कार्याकार्यविनिश्चयो बुद्धिः । ज्ञानं प्रतीतिर्बुद्धिस्तु कार्याकार्यविनिश्चय इति गीताभाष्योक्तेः । भूतादीनामाशयः स्थानमात्मा देहः स्वभावो वा यस्य तस्मै । आशयोऽन्तःकरणं वा तेषामात्मा स्वामी तस्मै वा । आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म चेत्यमरः । स्थानेऽभिप्राय आशय इति यादवः । निर्गुणेन सत्त्वादिगुणसम्बन्ध-विधुरेणाभिमानेनेच्छया । गूढाऽप्रकाशिताऽऽत्मनां जीवानां स्वा स्वरूपभूताऽनु मुक्तिगा भूतिरैश्वर्यं येन स तस्मै । अन्वाश्रये बन्धने मोक्ष इति विश्वः ॥ ४२ ॥

सुमनोरञ्जनी — भूतानि आकाशादीनि, मात्राः शब्दादयः, इन्द्रियाणि, प्राणाः, मनः संकल्पविकल्पात्मकमन्तःकरणं, बुद्धिः कार्याकार्यनिश्चयः तद्धेतुर्वा । बुद्धिस्तु कार्याकार्यविनिश्चय इति गीताभाष्यात् । एतासां आशयः आश्रयो जीवः । स्थानेऽभिप्राय आशय इति यादवः । तस्यात्मने अन्तर्यामिणे । भूतादीनामाशयश्चासावात्मा चेति वा । गूढस्य सर्वहृदयगुहासु निगूढस्य । अव्यक्तस्वभावस्य वा । स्वात्मनः स्वस्वरूपस्य बिम्बसंज्ञकस्य अनुभूतिः अनुभवः अपरोक्षज्ञानं यत्प्रसादाद्भवति सः तादृशः । तस्मै । निर्गुणेन सत्वादिगुणानुत्पन्नेन । अभिमानेन परमेश्वरे बहुमानेन । निर्गुणेन भक्तिलक्षणगुणशून्येन । अभिमानेन, अभि मीयते अनेनेति व्युत्पत्या अभिमानपदबोध्यज्ञानसामग्र्या अहंकारेण वा । गूढ अनाविर्भूतः स्वस्वरूपविषयकानुभवो यस्येति वा । भक्त्यैकलभ्यायेति यावत् ॥ ४२ ॥

नमोऽन्ताय सूक्ष्माय कूटस्थाय विपश्चिते ।
नानावादानुरोधाय वाच्यवाचकशक्तये ॥ ४३ ॥

सत्यधर्मीया — अनन्ताय निर्नाशायाबद्धाय वा । सूक्ष्मायाव्यक्ताय । अनन्ताय सर्वगताय वा । नित्यं विभुं सर्वगतं सुसूक्ष्ममिति श्रुतेः । कूटस्थाय शश्वदेकप्रकाराय । कूटमाकाशः । कूटं खं विदलं व्योम सन्धिराकाश उच्यत इत्यभिधानाद्गीताभाष्ये । विपश्चिते पूर्णज्ञानाय । नानावादानुरोधाय नानाविधा वादाः सत्सिद्धान्तास्तेषामनुरोधायानुकूलतया स्थिताय । नानावादानामनुरोधो मर्यादा येन स तस्मै वा । वाच्यवाचकानां शब्दार्थशब्दानां शक्तिर्वाच्यत्ववाचकत्वसामर्थ्यं येन तस्मा इति वा ॥ ॥ ४३ ॥

सुमनोरञ्जनी — अनन्ताय नित्याय । अपरिमिताय वा । सूक्ष्माय अणीयसे । कूटवत् आकाशवत् स्थिताय । निर्विकाराय व्याप्तायेति वा । कूटं खं विदलं व्योमेत्यभिधानात् । विपश्चिते ज्ञानस्वरूपाय । नानावादः भेदवादः तदनुरोधाय तदनुकूलाय । भेदवादप्रियायेति यावत् । यद्वा

नानाविधाः शिवो जगत्कर्तेत्यादिरूपाः वादाः तेषामनुकूलाय शिवादिशब्दवाच्यत्वेन तत्प्रतिपाद्यायेति यावत्। अथ वा नानाविधा वादाः

त्वां ब्रह्म केचिदवयन्त्युत धर्ममेक एकं परं सदसतोः पुरुषं परेशम्।
अन्ये वदन्ति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतन्त्रम्॥

इत्यादिरूपाः तदनुकूलाय तद्विषयायेति। वाच्यवाचकयोः शक्तिर्यस्मात्। वाच्ये स्थित्वा वाच्यत्वशक्तिप्रदाय। वाचके शब्दे तच्छक्तिप्रदायेत्यर्थः॥ ४३॥

नमः प्रमाणमूलाय कवये शास्त्रयोनये।
प्रवृत्ताय निवृत्ताय निगमाय नमो नमः॥ ४४॥

सत्यधर्मीया — प्रमाणानां मूलं प्रतिष्ठापकस्तस्मै। कवयेऽतिक्रान्तदर्शिने। शास्त्रयोनये शास्त्रं योनिर्ज्ञप्तिकारणं यस्य तस्मै। प्रवर्तकतया प्रवृत्तायैवं निवृत्ताय निगमाय गर्भगतागमाय मार्गरूपाय वा। अयनं पदवी मार्गः पद्या चेति निगद्यत इति हलः। निश्चायकाय वा। निगमो निश्चये वेदे परे पथवणिक्पथ इति यादवः॥ ४४॥

सुमनोरञ्जनी — शास्त्रं योनिर्ज्ञप्तिकारणं यस्य तस्मै। शास्त्रज्ञेयत्वमपि नापाततः किं तु प्रमाणमूलाय। प्रमाणानि प्रमापकानि उपक्रमादीनि श्रुतिलिङ्गादीनि च मूलानि ज्ञापकानि यस्यासौ तथोक्तः तस्मै। प्रत्यक्षादिप्रतिष्ठापकाय वा। कवये सर्वज्ञाय। प्रवृत्ताय प्रवृत्तधर्मफलरूपाय। निवृत्तधर्मफलरूपाय च। तथा चोक्तं बृहद्भाष्ये। 'किं पुनर्निगमाय विधिनिषेधात्मकशास्त्रस्यापि नियामकाय' इति॥ ४४॥

नमः कृष्णाय रामाय वसुदेवसुताय च।
प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः॥ ४५॥

सत्यधर्मीया — कृष्णाय वर्णतोऽपि। नामतः गतम्। रामाय तन्नाम्ने। प्रकृष्टं द्युम्नं यस्य स तस्मै। कीर्तिर्द्युम्नं सहस्रसातममित्यृग्भाष्ये विद्यां कीर्तिं, टीकायां च द्युम्नं कीर्तिं चेति व्याख्यातत्वात्। तथा तु विद्युम्न महाकीर्ते इति तत्रैवोक्तत्वाच्च। म्ना अभ्यास इत्यस्माद्धत्रर्थे कविधानमिति कर्मणि कप्रत्यये दिवि म्नायत इति व्युत्पत्त्या द्युम्नशब्देन कीर्तिरुच्यते। हिरण्यं द्रविणं द्युम्नमित्युक्तेः प्रकृष्टसुवर्णवान्वा तस्मै। द्युम्नं द्योतयतेऽर्थशो वाऽन्नं वेति यास्कनिरुक्तेः प्रकृष्टान्नरूपाय वेति। अनिरुद्धाय केनापि निरुद्धो न भवतीति, अनिनः प्राणिनः सर्वे रुद्धा येनेति वा स तस्मै वा।

सात्वन्तो भक्ता यादवा वा तेषां पतिस्तस्मै । सात्वतामिति षष्ठ्याऽलुक्त्वेनैकपद्ये घिसंज्ञेति वा षष्ठीयुक्तश्छन्दसि वेति वा पतिशब्दो लाक्षणिकोऽयमिति वोपपत्तिः ।। ४५ ।।

सुमनोरञ्जनी — नियमेन सकललोककर्षणात्कृष्णाय । यद्वा कृष्णाय उत्कृष्टाय । निरुक्तत्वात् टकारस्य णकारः । तत एवोपपदलोपश्च । उत्कृष्टं णं सुखं यस्येति वा । एवमेवाचार्यचरणैः श्रीमन्महाभारततात्पर्यनिर्णये कृष्णशब्दनिर्वचनं कृतम् । रामाय लोकरमणत्वाद्रामः । रश्चामश्चेति वा रामः तस्मै । आनन्दरूपाय निष्परिमाणायेत्यर्थः । आनन्दरूपो निष्परिमाण एष लोकश्चैतस्माद्रमते । तेन राम इति गीताभाष्योदाहृतश्रुतेः । प्रद्युम्नाय प्रकृष्टद्युत्या मेयत्वेन तच्छब्दवाच्याय । अनिरुद्धाय अप्रतिबद्धाय । सातिः सुखार्थः । पूर्णानन्दरूपत्वात्सात् परमात्मा । तद्वन्तो भक्तजनाः तेषां पतये स्वामिने ।। ४५ ।।

नमो गुणप्रदीपाय गुणात्मस्थोदयाय च ।
गुणप्रत्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे ।। ४६ ।।

तात्पर्यम् – गुणप्रदीपाय गुणज्ञापकाय । गुणात्मस्थोदयाय । गुणात्मिका प्रकृतिः तस्यां स्थित उदयस्वरूपो हरिः ।। ४६ ।।

सत्यधर्मीया — नमो गुणप्रदीपायेत्यत्राकारप्रश्लेषेण पदभ्रमं विश्लेषयन्विवक्षितमर्थमाह ।। **गुणप्रदीपायेति** । गुणान्दीपयति ज्ञापयतीति स तथा तस्मै । गुणात्मस्थोदयायेत्यनूद्य व्याचष्टे ।। **गुणात्मस्थोदयायेति** । गुणात्मिका प्रकृतिस्तस्यां स्थित उदयः स्वरूपं यस्य स हरिस्तस्मै ।। **ततश्च श्लोकव्याकृतिः** ।। गुणान्प्रदीपयति ज्ञापयतीति स तथा तस्मै । गुणात्मनि तिष्ठतीति स उदयो यस्येति वा स चासावुदयश्चेति वा तस्मै । गुणैः प्रत्युपलक्षयितुं योग्यतानुसारेण ज्ञातुं योग्यस्तस्मै । गुणद्रष्ट्रे भक्ततरतमभावस्थितगुणसाक्षिणे । स्वसंविदे स्वप्रकाशाय । तद्ब्रह्मास्मीत्यादेः ।। ४६ ।।

सुमनोरञ्जनी — गुणप्रदीपाय गुणानां स्वगुणानां ज्ञापकाय । गुणात्मनि प्रधाने तिष्ठतीति गुणात्मस्थः उदयस्वरूपश्च प्रकाशस्वरूप इत्यर्थः । तस्मै । तदुक्तमाचार्यैः । 'गुणप्रदीपाय गुणज्ञापकाय । गुणात्मस्थोदयाय च । गुणात्मिका प्रकृतिः तस्यां स्थितः । उदयस्वरूपो हरिः' इति । मूले गुणप्रत्युपलक्ष्याय । गुणैरानन्दादिभिः प्रत्युपलक्ष्याय ज्ञेयाय । गुणान्प्रत्युपलक्ष्याय लक्ष्यस्वरूपाय । आनन्दादिगुणैः लक्षितायेत्यर्थः । गुणद्रष्ट्रे गुणानां विषयाणां द्रष्ट्रे । जीवेन्द्रियच्छुरितस्वेन्द्रियैरिति शेषः । स्वसंविदे स्वप्रकाशाय ।। ४६ ।।

अव्याकृतविहाराय सर्वव्याकृतसिद्धये ।
हृषीकेश नमस्तेऽस्तु मुनये मौनशालिने ।। ४७ ।।

सत्यधर्मीया — अव्याकृताः साकल्येन व्याख्यातुं विवरीतुमिति यावत् अशक्या विहारा यस्य स तस्मै । दयायां, सर्वव्याकृता सिद्धिर्यथायोग्यं येन तस्मै । मनःपूर्वकं नागस्कृदयं नाग इति त्वं जानीष इति मनसि कृत्वा तथा सम्बोध्य नमन्ति ।। **हृषीकेशेन्द्रियस्वामिन्निति** । मुनये गतम् । मौनशालिनेऽसम्भाष्यभाषणशून्याय । इयताऽपि प्रयत्नेन किञ्चिदोष्ठानाकुञ्चनमिति युवतयोऽनेन कटाक्षयन्ति ।। ४७ ।।

सुमनोरञ्जनी — हृषीकाणां इन्द्रियाणां ईश ! यः प्राणे तिष्ठन्नित्यादेः । यद्वा अग्नीषोमाद्यन्तर्यामितया तदंशुनिविष्टैः स्वकेशैः जगतो हर्षणात् हृषीकेशः । तथा हृष्याः हर्षहेतवः केशाः यस्येति विग्रहः । एवमेव निरुक्तं गीताभाष्ये एकादशेऽध्याये । अव्याहृताः व्याहर्तुमशक्याः साकल्येन वाङ्मानसागोचरा इत्यर्थः । विहाराः सृष्ट्यादिव्यापाराः यस्य तस्मै । तर्हि तज्ज्ञानं कथम्? सर्वव्याकृतसिद्धये । सर्वान् भक्तान्प्रति, स्वेनैव व्याकृता प्रकटिता सिद्धिः स्वस्वरूपज्ञानं येन तस्मै । अव्यक्तस्वभावत्वेऽपि स्वप्रसादेनैव ज्ञेयायेति भावः । यथोक्तं, अतोऽनन्तेन तथा हि लिङ्गमिति । मुनये सर्वविद्यानामनादितो द्रष्ट्रे । ऋषिस्तु सर्वविद्यानामित्यादेः । सर्वविद्याप्रवर्तकायेति यावत् । तथापि मौनं मननम् । तत्स्वभावाय । लोकशिक्षणायेति शेषः । यदि ह्यहं न वर्तेयमित्यादेः ।। ४७ ।।

परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः ।
अविश्वाय च विश्वाय तद्द्रष्ट्रे विश्वहेतवे ।। ४८ ।।

तात्पर्यम् – अविश्वाय जीवेभ्योऽन्यस्मै । 'शरीरेषु प्रविष्टत्वाद्विश्वो जीव उदीर्यते । जीवस्य तदधीनत्वाद्विश्वो विष्णुरिति स्मृतः । तस्योत्पत्त्यादिहेतुत्वाद्विश्वहेतुश्च कीर्त्यत' इति मात्स्ये ।। ४८ ।।

सत्यधर्मीया — परावरगतिज्ञायेति श्लोकेऽविश्वाय विश्वायेति व्याहतमुच्यते । तद्द्रष्ट्रे विश्वहेतव इति प्रागभिहितेः पुनरुक्तिश्चेत्यतो विश्वपदं स्वयं व्याकृत्य मानं चोदाहृत्य पुनरुक्तिमपाकरोति ।। **अविश्वाय जीवेभ्योऽन्यस्मा इति** । न विश्वोऽविश्व इति व्युत्पत्तिः । शरीरेषु प्रविष्टत्वाज्जीवो विश्व उदीर्यते । विशेरौणादिकः कर्तर्यशुपृषिलटिकणिखटिविशिभ्यः कन्निति क्वन्प्रत्यये विशतीति विश्व इति व्युत्पत्तिर्ज्ञेया । विश्वायेति घटयदाह । जीवस्य विश्वस्य भगवदधीनत्वाद्विष्णुर्विश्व इति स्मृत इत्यन्वयः जीवस्यैव विश्वस्योत्पत्त्यादिहेतुत्वाद्विश्वहेतुरित्यत्र विश्वो जीवः, प्राग्जगद्विश्वपदार्थ इति न

पुनरुक्तिरिति भावः ।। **ततश्च श्लोकार्थः** ।। परावरगतिज्ञाय कारणकार्यस्थितिविदे उत्तमाधमगतिमतये वा । सर्वाध्यक्षाय सर्वस्वामिनेऽविश्वाय जीवविलक्षणाय विश्वाय स्वाधीनजीवनिकायाय । तद्द्रष्टे जीवगुणकर्मादिद्रष्ट्रे । विश्वस्य जीवस्योत्पत्त्यादिहेतवे नमः । प्रभुर्हि जीवो जडमपेक्ष्येत्युक्तेः प्रपञ्चान्तर्गतत्वेऽपि विशेषशङ्कास्पदतेति पृथगुक्तिरिति ज्ञेयम् ।। ४८ ।।

सुमनोरञ्जनी — परावराणां कार्यकारणानां गतिं स्थितिं जानातीति तथोक्ताय । इदं एतादृशमेवोत्पादयतीति सूक्ष्मतरास्मदाद्युत्प्रेक्षागोचरस्थितिज्ञायेत्यर्थः । सर्वाध्यक्षाय सर्वाधिपतये । अविश्वशब्दघटकविश्वो जीवो न भवतीत्यविश्वः । विश्वाय जीवस्वामिने । विश्वस्य जीवस्य हेतवे । जन्मादिप्रदाय । ननु प्रथमविश्वशब्दः कथं जीवपरः । तथात्वेऽपि वा द्वितीयस्तु केन निमित्तेन भगवत्परः । विश्वाय विश्वहेतव इति पूर्वमुक्त्या पुनर्विश्वहेतव इत्युक्ते च पुनरुक्तिश्च, जीवस्य नित्यत्वेन तद्धेतुत्वमयुक्तं चेति शङ्काः परिहरति भगवानाचार्यः ।

शरीरेषु प्रविष्टत्वाद्विश्वो जीव उदीर्यते ।
जीवस्य तदधीनत्वाद्विश्वो विष्णुरिति स्मृतः ।
तस्योत्पत्यादिहेतुत्वाद्विश्वहेतुश्च कीर्त्यते ।।

इति माहात्म्य इति च । विश् प्रवेशने, वृतु वर्तने, शरीरेषु इति योग्यतया लभ्यते । प्रविश्य वर्तत इति विश्वो जीव इत्युक्तं भवति । अनेनाद्यशङ्का परिहृता । जीवस्य तदधीनत्वादित्यनेन द्वितीया तृतीया चापाकृता । विष्णुर्विश्व इति स्मृत इत्यन्वयः । तदधीनत्वादर्थवदिति न्यायेनेति भावः । तथा च पूर्वं विश्वशब्देन प्रपञ्चो विवक्षितः । अत्र जीव इति न पौनरुक्त्यमिति, न जीवं प्रति हेतुः किन्तु जीवस्य यच्छरीरसम्बन्धादिलक्षणोत्पत्त्यादि तद्धेतुत्वं विवक्षितमित्यभिप्रायकेण तस्येत्यनेन चतुर्थी परिहृता ज्ञेया । पूर्वेणास्य गतार्थत्वेऽपि सामान्यविशेषभावाश्रयेण पुनर्वचनम् । जीवस्य चेतनत्वेन स्वातन्त्र्यशङ्कानिवारणार्थत्वेनेति पदरत्नावलीकृत उपदिशन्ति ।। ४८ ।।

त्वं ह्यस्य जन्मस्थितिसंयमान् विभो गुणैरनीहोऽकृतकालशक्तिधृक् ।
तस्मात् स्वभावात् प्रतिबोधयस्व नः समीक्षयाऽमोघविहार ईहसे ।। ४९ ।।

तात्पर्यम् – 'हरेः स्वरूपशक्तिर्या कालशक्तिरुदीर्यते । सदा सर्वगुणात्मत्वाद्दुर्गा वाप्यवरा ततः । सर्वसंहारकारित्वाद्वायुः सर्वस्य जीवनात् । कालाभिमानिनावेतौ दुर्गावायुश्च कीर्तिताविं' ति प्रकाशंहितायाम् ।। ४९ ।।

सत्यधर्मीया — त्वं ह्यस्य जन्मस्थितिसंयमान्विभाविति श्लोके दुर्गमार्थत्वात्कालशक्तिपदं स्वयं व्याख्याय तत्स्थेम्ने मानमुदाहरति । अकृतकालशक्तिधृक् अकृतं वराद्यनिर्मितं स्वरूपमिति यावदिति । हरेर्या स्वरूपशक्तिः सा सदा सर्वगुणात्मकत्वान्निमित्तात्कालशक्तिरुदीर्यते । कल कामधेनुरिति स्मरणात् गतम् । अन्यत्रापि तच्छब्दं सप्रवृत्तिनिमित्तं दर्शयति ।। **तत इति ।** ततो हरेरवरा दुर्गाऽपि सर्वसंहारकारित्वात्कालशक्तिरुदीर्यते । वाशब्दो वायुरित्यनेन समुच्चायकः सन्नन्वेति । सर्वस्य जीवनाद्वायुर्वा कालशक्तिरुदीर्यते । किञ्च कालाभिमानिनावभिमानी चाभिमानी चेत्यभिमानिनौ । एवमेवैतौ कीर्तिताविति ज्ञेयम् । अतोऽपि कालशक्तित्वं तयोः प्रबोधिन्याम् । अनीहोऽकृतकाल-शक्तिधृगित्यत्र कृतकालशक्तिधृगिति पदच्छेदेन काले शक्तिः कालशक्तिः कृता च सा कालशक्तिश्च तां धरतीति हरिशक्तेस्तत्काले जातत्वभ्रान्तिर्भवति तन्निरासाय पदच्छेदं प्रदर्श्य व्याचष्ट इत्यवतारितम् । तत्र पूर्वपक्षी सर्वथाऽप्रेक्षावांश्चेन्न तर्हि कक्षीकार्यः प्रेक्षावांश्चेदनीहोऽकृतेत्यत्र कुः पोः कः पौ चेति कथं कृतेत्यादिपदं विच्छिन्द्यादथैत उभयाप्यनुपपन्नावतारिकेति वदन्ति ।। **ततश्चायं श्लोकार्थः ।।** मूलकारणं हरिरित्युक्तं स्पष्टयितुमाह ।। **त्वं हीति ।।** अमोघविहारोऽव्यर्थक्रीडस्त्वमस्य जगतोऽनीहोऽक्लिष्टकारित्वादकृतकालशक्तिधृक् अकृताऽकारणिका नित्येति यावत् कालशक्तिः सकलगुणात्मकत्वात्कालाख्या शक्तिस्तां धृष्णोतीति कालशक्तिधृक् । कालशक्तिर्दुर्गा वायुश्च तौ धृष्णाति तद्द्वारा सृष्ट्यादिकरणेन तौ धारयसीति भावः । गुणैः सत्त्वादिभिर्जन्मस्थितिसंयमानीहसे हि यतस्तस्मात् । देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहेत्यादेः । स्पृहापूर्वं सृष्ट्याद्य-करणात्स्वभावात्समीक्षया सम्यग्ज्ञानेन नोऽस्मान्प्रतिबोधयस्व जाग्रतीकुरु । स्वभावत एवाततीति स तथेति वा । दासप्राणाविति । अनीहोऽनिनि मुख्यप्राणे ईहा चेष्टा यस्य सः । ईहसे या रमाया हसे हासार्थं सन्तोषार्थमिति यावत् । अमोघविहार इत्यर्थकरणे मानानुयानं भवतीति ज्ञेयम् ।। ४९ ।।

सुमनोरञ्जनी — एवं स्तुत्वा प्रार्थयते ।। त्वमिति । त्वं अनीहः अक्लिष्टकर्मा । अस्य जगतः । गुणैः रजःसत्वतमोभिः । जन्मस्थितिसंयमान् सृष्टिस्थितिसंहारान् । नियमनं च । स्थितिशब्देन नियमः क्वचिज्जीवनमुच्यत इत्येकादशतात्पर्ये वक्ष्यमाणत्वात् । अकृत अकरोः । कीदृशः । कालशक्तिधृक् । कालशक्तिं कालाख्यस्वरूपशक्तिं धारयतीति तथोक्तः । यद्वा कालशक्तिपदबोध्यौ दुर्गावायू धारयति संहारे स्थितौ चेति ते निमित्ततया स्वीकरोतीति तथाविधः । एतादृशस्त्वं, नः, समीक्षया समीचीनया करुणार्द्रयेति यावत् । ईक्षया अवलोकनेन । तस्मात्स्वभावात् दन्दशूकस्वभावात् । प्रतिबोधयस्व उज्जीवय । अमोघविहारः अमोघव्यापारः त्वम् । ईहसे चेत् उज्जीवयितुमिच्छसि चेत् तथा कुरुष्वेति । यद्वा जन्मादीनीहसे करोषीत्यन्वयः । कीदृशः । अकृतां नित्यां कालाख्यां शक्तिं धारयतीति तथोक्त इत्यर्थः । तदुक्तमाचार्यैः–

हरेः स्वरूपशक्तिर्या कालशक्तिरुदीर्यते ।
सदा सर्वगुणात्मत्वाद्दुर्गा वाप्यवरा ततः ।
सर्वसंहारकारित्वाद्वायुः सर्वस्य जीवनात् ।
कालाभिमानिनौ त्वेतौ दुर्गा वायुश्च कीर्तितौ ॥

इति प्रकाशिकायामिति । अस्यायमर्थः । या विष्णोः स्वरूपशक्तिः सा सदा सर्वगुणात्मत्वा-न्निमित्तात्कालाख्या शक्तिरित्युदीर्यते । कल धातोः सर्वगुणार्थत्वादिति भावः । ततः हरेः स्वरूपशक्तेः अवरा दुर्गा वा कालशक्तिरुदीर्यते । तत्र निमित्तं, सर्वसंहारकारित्वादिति । कल च्छेदन इति धातोः । कामधेनुवत्सर्वार्थवाचकत्वात्कलधातोः सर्वस्य जीवनान्निमित्ताद्वायुरपि कालशक्ति-रुदीर्यत इति पूर्वेणान्वयः । निमित्तान्तरमप्याह ॥ कालाभिमानिनाविति । दुर्गावायुश्चेत्येतौ कालाभिमानिनौ तु कालाभिमानिनावपि । अतोऽपि तत्पदबोध्याविति ॥ ४९ ॥

तस्यैव तेऽमूस्तनवस्त्रिलोक्यां शान्ता अशान्ता उत मूढयोनयः ।
शान्ताः प्रियास्ते ह्यधुनाऽवितुः सतां स्थातुश्च ते कर्मपरीप्सयेहतः ॥५०॥

तात्पर्यम् – 'अन्तःप्रियं बहिश्चेति द्विधा प्रियमुदाहृतम् । अन्तःप्रिया हरेः सन्तः सर्वं चापि हरेः प्रियम् । असन्तश्चापि संहार ईषदन्तःप्रिया इव । तदपेक्षया तथा सन्तो विशेषान्तःप्रिया स्थिता' इति षाड्गुण्ये । 'सुखान्तं प्राप्नुयुर्यस्माद्देवाः शान्ता उदाहृताः । अशान्ता मानुषाः प्रोक्ता विमूढा आसुरा मता' इति प्रकाशसंहितायाम् । कर्मपरीप्सया कर्मप्रवर्तनार्थम् । सर्वशरीरेषु स्थातुः ईहतः प्राणस्य सकाशात् । प्राणसकाशाद्धि कर्म प्रवर्तनमिच्छति भगवान् । 'वायोः सकाशाज्जगतः प्रवृत्तिं कारयत्यजः । प्राणप्राणमतः प्राहुर्विष्णुं वायोरपि प्रभुमि'ति च ॥ ५० ॥

सत्यधर्मीया — तस्यैव तेऽमूस्तनवस्त्रिलोक्यामिति श्लोके शान्ताः क्रोधरहितास्ते तव प्रिया इति निष्कोपस्य कस्यचिद्भगवत्प्रियत्वमिति भ्रान्तिनिरासाय प्रमाणेन तत्तात्पर्यं दर्शयंस्तेनैव प्रमाणेन भगवत्प्रियाणामैकविध्यभ्रान्तिं निरस्यानेकविधत्वं च दर्शयति ॥ **अन्तः प्रियमिति** । अन्तःप्रियं बहिःप्रियमित्यावर्तितमन्वेति । इति द्विधा प्रियमुदाहृतम् । चः समुच्चये । सन्तो हरेरन्तःप्रियाः सर्वे च सदसत्त्वाविवेकेन सर्वं हरेर्बहिःप्रियम् । सर्वमिति सङ्कोचयति ॥ **असन्तश्चेति** । संहारे कर्तव्ये ईषत्किञ्चिदसन्तोऽन्तःप्रिया इव भवन्ति तदपेक्षयाऽसदपेक्षया सन्तो विशेषान्तःप्रियाः । कुत इत्यत आह ॥ **तथास्थिता इति** । तथैव स्थितिमन्त इति । सन्तः शान्ताः कथमित्यतो मानेन तद्व्युत्पत्तिप्रकारमाह ॥ **सुखान्तमिति** । शस्य सुखस्यान्तो निर्णयो येषां ते तथा यस्मात्सुखान्तं प्राप्नुयुस्तस्माद्देवाः शान्ता उदीरिता अशान्ताः सुखदुःखमिश्रफलतयाऽतदन्ता मानुषाः प्रोक्ता असुरा

विमूढा मताः । तत्रैव स्थातुः कर्मपरीप्सयेहत इत्यप्रतीतार्थतयाऽनूद्य व्याकरोति । सर्वकर्मपरीप्सया कर्मप्रवर्तनार्थम् । अनेन तृतीया चतुर्थ्यर्थ इति सूचयति । स्थातुरित्यस्य किञ्चिदध्याहृत्यान्वयं दर्शयति ॥ **सर्वशरीरेषु स्थातुरिति** । ईहत ईहमानस्य प्राणस्य सकाशात् । विशिष्टवाक्यार्थमाह ॥ **प्राणसकाशाद्धि कर्मप्रवर्तनमिच्छति भगवानिति** । प्राणाद्धीति वक्तुं शक्ये प्राणस्य सकाशादिति वचनं मानगतवायोः सकाशादित्यनुकरणरूपं सत्समानस्य छन्दसीत्यतः समानस्येति योगो विभज्यते । तेन सपक्षः साधर्म्यं सजातीयमित्यादि सिद्धमिति काशिकोक्तेः । प्राणस्य समानः काशः सुखभोजनं यस्य तस्माच्चतुर्मुखात् ।

सहशब्दो वा सदृशावाची । सदृशः सख्या ससखीति यथेति । तेनायमस्वपदविग्रहो बहुव्रीहिः । समानः पक्षो यस्येत्यादीति कौमुद्युक्तेः समानः काशो यस्येति सकाशस्तस्मादित्यर्थविशेषं द्योतयितुं सकाशादित्युक्तम् । अजो भगवान्हरिर्वायोः सकाशाज्जगतः प्रपञ्चस्य प्रवृत्तिं कर्मप्रवर्तनं कामयतीच्छति । पदव्यत्ययेन तमतिहायापि हरेः सामर्थ्यं द्योतयति वायोरपि प्रभुं विष्णुमतः प्राणप्राणं प्राहुः प्रेक्षावन्तः ॥ **अथ श्लोकार्थः** ॥ त्रिलोक्यां विद्यमानचेतने । तस्यैव नमस्तुभ्यमिति प्रस्तुतस्तुतस्यामूस्तनवस्ते तनव इव तनवः सन्निधानपात्रम् । ता आह । शान्ताः शस्यान्तो निर्णयो येषां देवानां तेऽशान्ता नित्यसंसारिण उत मूढयोनयो मूढा योनिर्येषां तेऽसुरा अधुना सतामवितू रक्षयितुस्ते शान्ता विशेषान्तःप्रियाः । हिशब्दोऽन्तःप्रियाः किञ्चिदन्तःप्रिया इव बहिः प्रियाश्चेति मानिकार्थद्योतकः । सतामवनादिकं पवनद्वारकमित्याह ॥ **स्थातुरिति** । सर्वशरीरस्थितस्येहत ईहमानस्यानस्य सकाशात्कर्मपरीप्सया कर्मणां परीप्सा तदर्थं तत्प्रवर्तनार्थमीहतश्चेष्टमानस्य त इत्यप्यन्वयः । यो भवान्कर्मपरीप्सया कर्मप्रवर्तनं स्थातुरीहतो वायोः सकाशादिच्छति तस्यैव ते नम इति वाऽन्वयः । अधुनेत्यनेन नास्मन्नाथनाशसमयोऽयमतो मुञ्चेति द्योतयन्ति । प्राणस्य प्राणमित्यादिप्रसिद्धिं वा हिराह ॥ ५० ॥

सुमनोरञ्जनी — विश्वायेत्यनेनापातप्रतीत्या प्राप्तां जीवाभेदशङ्कां जीवानां भगवत्प्रतिमास्थानीयत्वोक्त्या परिहरति ॥ तस्यैवेति । हे कृष्ण ! तस्यैव यो जगत्कारणत्वेन प्रकृतस्तस्यैव ते तव । अमूः शान्ताः शं सुखम् तस्यांतं प्रान्तं येषां ते तथोक्ताः देवाः । अशान्ताः अतथाविधाः मानुषाः । मूढयोनयो मूढजन्मानः असुराश्चैतास्तिस्रोऽपि प्रजाः तनवः प्रतिमास्थानीयाः । तत्रापि विशेषमाहुः । ईहतः मुख्यप्राणस्य सकाशात् । कर्मपरीप्सया कर्मप्रवर्तनेच्छया । सर्वशरीरेष्विति शेषः । सर्वशरीरेषु स्थातुः । सतां सज्जनानाम् । अवितुः रक्षकस्य ते तव । शान्ताः देवाः अधुना स्थितिसमये प्रियाः । अन्ये अप्रिया इति भावः । अवितुः अधुना शान्ताः प्रिया इत्यनेनान्ये अन्यदा प्रिया इति लभ्यते । तत्कथं मानुषादीनां भगवत्प्रियत्वमित्यतोऽस्य तात्पर्यमाविश्चक्रुराचार्यचरणाः ।

अन्तःप्रियं बहिश्चेति द्विधा प्रियमुदाहृतम् ।
अन्तःप्रिया हरेः सन्तः सर्वे चापि बहिःप्रियाः ।
असन्तश्चापि संहार ईषदन्तः प्रिया इव ।
तदपेक्षया तथा सन्तो विशेषान्तःप्रियाः स्थिताः ॥ इति षाड्गुण्ये ।

सुखान्तं प्राप्नुयुर्यस्माद्देवाः शान्ता उदाहृताः ।
अशान्ता मानुषाः प्रोक्ताः विमूढा असुरा मताः ॥ इति प्रकाशिकायाम् ।

कर्मपरीप्सया कर्मप्रवर्तनार्थं सर्वशरीरेषु । ईहतः प्राणस्य सकाशात् । प्राणसकाशाद्धि कर्म प्रवर्तयति भगवान् ।

वायोः सकाशाज्जगतः प्रवृत्तिं कामयत्यजः ।
प्राणप्राणमतः प्राहुर्विष्णुं वायोरपि प्रभुम् ॥ इति चेति ।

अयमर्थः । अन्तःप्रियं बहिश्च बहिःप्रियं चेति प्रियं वस्तु द्विविधम् । सन्तो देवादयः हरेरन्तःप्रियाः । अन्ये बहिःप्रिया इत्यर्थः । यद्यपि संहारे कर्तव्ये निमित्तत्वादसन्तोऽपि ईषदन्तःप्रिया इव । तथा च सन्त एवान्तःप्रिया इति व्यपदेशोऽनुपपन्नः । तथापि सन्तो देवाः स्थितौ कर्तव्ये तदपेक्षया असदपेक्षया । विशेषेणान्तःप्रियाः । अतो देवानामन्तःप्रिया इति व्यपदेशः । असाधारण्येन व्यपदेशा भवन्तीति भावः । इत्थं च अधुना स्थितिसमये देवा प्रिया इत्युक्त्या संहारेऽन्येषामपि प्रियत्वं लब्धम् । एतच्च प्रियत्वमीषदेव न देववद्विशेषेणेति तात्पर्यमवसेयमित्युक्तं भवति । एवं वाक्यार्थमुक्त्वा पदार्थमाह ॥ सुखेति । सुखस्य अन्तं प्रान्तं पारमिति यावत् । स्वयोग्यतानुसारेण परिपूर्तिरिति यावत् । यस्माद्देवाः प्राप्नुयुः तस्माच्छान्ता उदाहृता इत्यर्थः । अतथाविधाः मानुषाः अशान्ता इति प्रोक्ताः । तेषां मिश्रफलत्वेन सुखस्य परिपूर्तेरभावादिति भावः । असुरास्तु विमूढाः । विशेषेण मोहः दुःखादौ सुखाभिमानः । तेन युक्तत्वात् विमूढा इति मता इत्यर्थः । कर्मपरीप्सयेति मूलस्थं पदमनूद्य व्याख्यातं कर्मप्रवर्तनार्थमिति । सर्वशरीरेष्विति शेषोक्तिः । ईहत इत्यस्यार्थो प्राणस्येति । तत्र प्रमाणं प्रतिजानीते ॥ प्राणेति । हि प्रमाणप्रसिद्धमित्यर्थः । किं तत्प्रमाणमित्याशङ्कायां न्यायोपेतां स्मृतिमाह ॥ वायोरिति । यतः जगतः प्रवृत्तिं स्वनियम्याद्वायोः सकाशात् कामयति कारयितुमिच्छति अतः एव निमित्तात् वायोरपि प्रभुं विष्णुं प्राणप्राणमाहुः । प्राणस्य प्राणमित्याद्याः श्रुतय इति । प्राणस्य सकलजगच्चेष्टकस्य प्राणः चेष्टक इत्यनेन प्राणद्वारा भगवान् सकलचेष्टक इति लभ्यते । अन्यथा प्राणस्य प्राण इत्युक्तिरेव न स्यादिति भाव इत्याचार्यवचनार्थो द्रष्टव्यः ॥ ५० ॥

अपराधः सकृद् भर्त्रा सोढव्यः स्वप्रजाकृतः ।
क्षन्तुमर्हसि शान्तात्मन् मूढस्य त्वामजानतः ॥ ५१ ॥

सत्यधर्मीया — फलितमभिलपन्ति ॥ **अपराध इति ।** यस्माद्भर्त्रा पोषयित्रा । सकृदेकवारम् । स्वप्रजाकृतः सोढव्यस्तस्मात् । यस्मात्तस्मादिति च पूर्वश्लोकादनुवर्तेते । त्वं ह्यस्य जन्मेत्यादि त्वन्महिम्नाऽयं त्वत्प्रजेति । हे शान्तात्मन् देवस्वामिन् समाधानमूर्त इत्यन्तर्भावः । मूढस्येत्युक्तौ मूढयोनय इत्युक्तमूढता चेन्न कदाचिदपि दयनीयता स्यादिति त्वामजानत इति मौढ्यं विवृतवत्य इति ज्ञेयम् । क्षन्तुमर्हसि ॥ ५१ ॥

सुमनोरञ्जनी — भर्त्रा सर्वस्वामिना त्वया । अपराधः सोढव्यः । कुतः । यतोऽयमपराधः स्वप्रजाकृत इति । स्वपुत्रकृतापराधं पिता यथा सहते तथा त्वमपि कुर्विति भावः । यद्वा क्षन्तुमर्हसीति प्रार्थयितुं सामान्यं न्यायमाह ॥ अपराध इति । भर्त्रा राज्ञा सहने निमित्तान्तरमाह ॥ क्षन्तुमिति । शान्तात्मन् सुखपूर्ण ! त्वां परमपुरुषत्वेनाजानतः । अत एव मूढस्य मानुषत्व-प्रकारकमोहयुक्तस्य नागस्य । अपराधमिति विभक्तिव्यत्ययेनानुवर्तते । तथा चाज्ञानकृतत्वादपराधः सोढव्य इत्यर्थः ॥ ५१ ॥

अनुगृह्णीष्व भगवन् प्राणांस्त्यजति पन्नगः ।
स्त्रीणां नः साधु शोच्यानां पतिःप्राणः प्रदीयताम् ॥ ५२ ॥

सत्यधर्मीया — अम्बुजाक्ष्यः क्षणं प्रतीक्षध्वं मोक्षणमनन्तरं तनुयामिति नानन्त वद तावदवकाशो नास्तीति विज्ञापयन्ति । अनुगृह्णीष्वेति । हे भगवन्! साधु यथा तथा शोच्यानां शोकयोग्यानां तत्रापि स्त्रीणां नोऽनुगृह्णीष्वानुग्रहं कुरु । पन्नगः प्राणांस्त्यजति । अनुग्रहविग्रहमाहुः । पतिः प्राणस्तत्समः प्रदीयताम् । समस्तपाठे पतिश्चासौ प्राणश्चेति वा पत्युः प्राण इति वा विग्रहो ज्ञेय इति । साधुभिः शोच्यानामिति वा ॥ ५२ ॥

सुमनोरञ्जनी — साधुशोच्यानां साधुभिः सज्जनैः परशोकनिमित्तशोकवद्भिरिति यावत् । शोच्यानां शोकोद्देश्यानाम् । प्राणः प्राणवत्प्रियः पतिः प्रदीयतामित्यन्वयः ॥ ५२ ॥

विधेहि ते किङ्करीणामनुष्ठेयं तवाज्ञया ।
यच्छ्रद्धयाऽनुतिष्ठन् वै मुच्यते स पुमान् भयात् ॥ ५३ ॥

सत्यधर्मीया — युष्मत्पतिप्राणप्रदानमन्यमरणकारणमित्यत आहुः ॥ **विधेहीति** । ते तव किङ्करीणां दासीनां तवाज्ञयाऽनुष्ठेयं विधेहि । यत्त्वदाज्ञप्तं श्रद्धयाऽनुतिष्ठन् यः पुमान्स भयान्मुच्यते । अयं श्रद्धयाऽनुतिष्ठन्भवेदित्येतद्दृष्टिविषयः । पुमांश्चेतनमात्रं भयाद्विषयान्मुच्यत इत्यावृत्त्याऽन्वयोऽपि ज्ञेयः । इतःपरं नाद्यादयं परान्नरादीनिति हृदयम् ॥ ५३ ॥

सुमनोरञ्जनी — दुष्टजन्तुषु युष्मासु अनुकम्पा अन्येषां मनःकम्पहेतुरिति चेत्तत्राहुः ॥ विधेहीति । तवाज्ञया । अनेन अस्मद्भर्त्रा । अनुष्ठेयं इतःपरं कर्तव्यम् । ते किंकरीणां नः विधेहि अनुशाधि । यत् भवदाज्ञप्तमनुतिष्ठन् कुर्वन् ॥ ५३ ॥

श्रीशुक उवाच—

इत्थं स नागपत्नीभिर्भगवान् समभिष्टुतः ।
मूर्च्छितं भग्नशिरसं विससर्जाङ्घ्रिकुट्टनैः ॥ ५४ ॥

सत्यधर्मीया — स भगवान्नागपत्नीभिरित्थं समभिष्टुतः । अङ्घ्रिकुट्टनैः । अनेन गूढपदः पादप्रहारो बह्वरुन्तुद इति माधवस्तथा चकारेति ध्वन्यते । भग्नानि शिरांसि यस्य तं मूर्छितं विससर्ज । ततोऽहिपत्नीप्रियमञ्जुवाक्यं निशम्य तं निर्भयमाशु चक्रे । तथा हि नारीकृतमृदुभाषणेन न कस्य चित्तं मृदुतामुपैतीति रुक्मिणीशविजयोक्तेः ॥ ५४ ॥

सुमनोरञ्जनी — अङ्घ्रिकुट्टनैः अङ्घ्रिताडनैः ॥ ५४ ॥

प्रतिलब्धेन्द्रियप्राणः कालियः शनकैर्हरिम् ।
कृच्छ्रात् समुच्छ्वसन् दीनः कृष्णं प्राह कृताञ्जलिः ॥ ५५ ॥

सत्यधर्मीया — शनकैः प्रतिलब्धेन्द्रियप्राणः कृच्छ्रात्समुच्छ्वसन्दीनः कृष्णं हरिं कृताञ्जलिः सन्प्राह ॥ ५५ ॥

सुमनोरञ्जनी — प्रतिलब्धेन्द्रियप्राणः प्रतिलब्धाः उद्बुद्धशक्तयो इन्द्रियाणि प्राणाश्च यस्य सः । कृच्छ्रात्समुच्छ्वसन् । शनकैः प्राहेत्यन्वयः ॥ ५५ ॥

वयं खलाः सहोत्पत्त्या तामसा दीर्घमन्यवः ।
स्वभावो दुस्त्यजो नाथ भूतानां यदसद्ग्रहः ॥ ५६ ॥

सत्यधर्मीया — उत्पत्त्या सह खला आजनीनखलतोपेतास्तामसास्तमःप्रचुरा दीर्घकोपाश्च । स्वभावस्यानपायादित्याह ॥ **भूतानां नाथेति ।** यद्यतोऽसद्ग्रहोऽसन् ग्रह आग्रहो दुराग्रहः स भूतानां स्वभाव इति वाऽन्वयः । दुस्त्यजो हातुमशक्यः ॥ ५६ ॥

सुमनोरञ्जनी — वयं सहोत्पत्या खलाः स्वभावत एव खला इत्यर्थः । तत्र निमित्तं तामसा इति । तत्र ज्ञापकं दीर्घमन्यव इति । हे नाथ ! यदसद्ग्रहो दुराग्रहः सः स्वभावश्च दुस्त्यजः ॥ ५६ ॥

त्वया सृष्टमिदं विश्वं धातुर्गुणविसर्जनम् ।
नानास्वभाववीर्यौजोयोनिबीजाशयाकृति ॥ ५७ ॥

तात्पर्यम् – धातुर्गुणविसर्जनम् । हिरण्यगर्भसकाशाद्गुणभूता सृष्टिरस्य जगतः । प्राधान्येन विष्णोरेव । 'विष्णुः प्रधानतः स्रष्टा गुणस्रष्टा चतुर्मुख' इति नारदीये ॥ ५७ ॥

सत्यधर्मीया — त्वया सृष्टमिदं विश्वमिति श्लोके धातुर्गुणविसर्जनमित्यनूद्य व्याख्यायमानमुदाहरति ॥ **धातुरिति ।** धातुर्हिरण्यगर्भस्य सकाशाद्गुणभूता सृष्टिरस्य जगतः । तावकीना तु प्रधानसृष्टिरित्याह ॥ **प्राधान्येन विष्णोरेवेति ।** विष्णुः प्रधानतो मुख्यतया स्रष्टा सृष्टिकर्ता चतुर्मुखो गुणकर्ता । ततश्च श्लोकार्थः ॥ इदं विश्वं त्वया सृष्टं मुख्यतः । धातुर्गुणरूपं विसर्जनं यस्य तत् । अर्थमाह ॥ **नानेति ।** नानास्वभावा जलादीनां स्पन्दनादयो वीर्यं विलक्षणकार्यजननसामर्थ्यमोजोऽवष्टम्भो योनिर्बीजं रक्तशुक्लादिराशयोऽभिप्रायो येषामाकृतिः स्वरूपं यस्य तत् ॥५७॥

सुमनोरञ्जनी — इदं विश्वं त्वया त्वयैव सृष्टम् । धातुस्तु गुणविसर्जनम् । गुणभूता अप्रधानभूता सृष्टिरित्यर्थः । अस्य जगत इति शेषः । नाना नानाविधाः । स्वभावाः वस्तुस्वभावा यथाऽग्न्यादेः दाहकत्वादयः । वीर्याणि पराक्रमाः । ओजः अवष्टंभशक्तिः । योनयः पश्वादयः । बीजं शुक्लस्वेदादि । आशयः पुण्यपापे । आकृतिः संस्थानविशेषः यथा भवति तथा त्वया सृष्टमिति पूर्वेणान्वयः ॥ ५७ ॥

वयं च तत्र भगवन् सर्पा जात्युरुमन्यवः ।
कथं त्यजामस्त्वन्मायां दुस्त्यजां मोहिताः प्रभो ॥ ५८ ॥

सत्यधर्मीया — तत्राप्येवंविधे । वयं सर्पजातय इत्युरुमन्यवो बहुकोपा यया मोहिता वयं दुस्त्यजां तां त्वन्मायां कथं त्यजामः ॥ ५८ ॥

सुमनोरञ्जनी — हे प्रभो ! वयं जात्या जन्मत एव सर्पाः । त्वन्मायां त्वदिच्छया निर्मिताम् । अत एव दुस्त्यजां अस्मज्जातिम् । कथं त्यजाम इति । ज्ञानमहिम्नेति चेत्तत्रोक्तम् ॥ मोहिता इति ॥ ॥ ५८ ॥

भवान् हि कारणं तत्र सर्वज्ञ जगदीश्वर ।
अनुग्रहं निग्रहं वा मन्यसे तद् विधेहि नः ॥ ५९ ॥

सत्यधर्मीया — तर्हि न कदाऽपि मोहापवाह इत्यत आह ॥ **भवानिति ।** तत्रैतन्मोहापोहे भवान्कारणमनुग्रहं वा निग्रहं वेति यन्मन्यसे तन्नो विधेहि ॥ ५९ ॥

सुमनोरञ्जनी — तत्र अस्मत्स्वभावपरित्यागे वक्ष्यमाणनिग्रहानुग्रहयोर्वा । यन्मन्यसे तत् निग्रहानुग्रहयोरन्यतरत् ॥ ५९ ॥

श्रीशुक उवाच—

इत्याकर्ण्य वचः प्राह भगवान् कार्यमानुषः ।
नात्र स्थेयं त्वया सर्प समुद्रं याहि माचिरम् ॥ ६० ॥

सत्यधर्मीया — कार्यार्थं मानुषोऽवतार इति स तथा । आज्ञापयति ॥ **नेति** ॥ ६० ॥

सुमनोरञ्जनी — कार्यमानुषः देवकार्यार्थं मानुषवत्प्रतीतः । माचिरं शीघ्रम् ॥ ६० ॥

सज्ञात्यपत्यदाराढ्यो गोनृभिर्भुज्यते नदी ।
य एतत् संस्मरेन्मर्त्यस्तुभ्यं मदनुशासनम् ।
कीर्तयन्नुभयोः सन्ध्योर्न युष्मद्भयमाप्नुयात् ॥ ६१ ॥

सत्यधर्मीया — नैकल इत्यप्याह ॥ **सज्ञात्यपत्यदाराढ्य इति ।** गावश्च नराश्चेति तैः । तुभ्यं यन्मदनुशासनं मर्त्यः संस्मरेत्सन्ध्योः सन्ध्ययोर्यश्च कीर्तयन्स युष्मद्भयं नाप्नुयात् ॥ ६१ ॥

सुमनोरञ्जनी — ज्ञातिभिरपत्यैः दारा एवाद्या येषां तैः सहितः । कुतः । यतः गोभिः नृभिश्चेयं नदी भुज्यते सेव्यते । अत एतत् पूर्ववृत्तं मदनुशासनम् । संध्योः प्रातःसायं सन्धियुगे । भयं नाप्नुयात् । केभ्यः? युष्मत् । युष्मद्भयमिति समस्तं वा ॥ ६१ ॥

योऽस्मिन् स्नात्वा ममाक्रीडे देवादींस्तर्पयेज्जलैः ।
उपोष्य मां स्मरन्नर्चेत् सर्वपापैः प्रमुच्यते ॥ ६२ ॥

सत्यधर्मीया — आक्रीडे एवंविधक्रीडास्थाने ॥ ६२ ॥

सुमनोरञ्जनी — मम क्रीडास्थाने अस्मिन् ह्रदे ॥ ६२ ॥

द्वीपं रमणकं हित्वा ह्रदमेतमुपाश्रितः ।
यद्भयात् स सुपर्णस्त्वां नाऽद्यान्मत्पादलाञ्छनम् ॥ ६३ ॥

सत्यधर्मीया — न च सुपर्णभयादिहायातस्य पुनस्तत्र गच्छेति वचनं युक्तं नेति वाच्यमित्याह ॥ **द्वीपमिति** । यद्भयाद्रमणकं द्वीपं हित्वैतं ह्रदमुपाश्रितः । एतदिति पाठेऽव्ययम् । स सुपर्णस्त्वां नाद्यान्न भक्षयेत् । तत्र तन्त्रं मत्पादलाञ्छनमिति । मम पादयोर्लाञ्छनं चिह्नं यस्मिंस्तं त्वामिति ॥ ॥ ६३ ॥

सुमनोरञ्जनी — ननु गोगोपपरिरक्षयाऽस्मन्निष्कासनेऽस्माकं गरुडाद्भयं भवेदेवेत्यतस्तदपि नेत्याह ॥ द्वीपमिति । यस्य गरुडस्य भयात् रमणकं तत्संज्ञकं द्वीपं समुद्रमध्यवर्तिस्थानं हित्वा । स सुपर्णो गरुडः । मत्पादयोर्लाञ्छनं चिह्नं यस्मिन् तादृशं त्वां नाद्यात् न भक्षयेत् ॥ ६३ ॥

एवमुक्तो भगवता कृष्णेनाद्भुतकर्मणा ।
तं पूजयामास मुदा नागपत्न्यश्च सादरम् ॥ ६४ ॥

सत्यधर्मीया — एवमुक्तो मुदा स्वोदवसितवितरणजया तं पूजयामास नागपत्न्यश्च पूजयामासुः ॥ ६४ ॥

सुमनोरञ्जनी — तं श्रीकृष्णं नागपत्न्यश्च पूजयामासुः ॥ ६४ ॥

दिव्याम्बरस्रङ्मणिभिः परार्घ्यैरपि भूषणैः ।
दिव्यगन्धानुलेपैश्च महत्योत्पलमालया ॥ ६५ ॥

सत्यधर्मीया — परार्घ्यैर्महामूल्यैर्गन्धाः सुगन्धिद्रव्यमनुलेपा मल्लिकातैलाद्यास्तैः ॥ ६५ ॥

सुमनोरञ्जनी — पूजाप्रकारमाह ॥ दिव्येति । दिव्याभिः द्योतमानाभिः । अम्बरमणिमयस्रग्भिः। दिव्यगन्धैः दशांगाद्युद्भवैः अनुलेपैश्चन्दनादिभिश्च ॥ ६५ ॥

पूजयित्वा जगन्नाथं प्रसाद्य गरुडध्वजम् ॥ ६६ ॥

सत्यधर्मीया — गरुडध्वजमित्यनेन तन्निश्चिन्ततां ध्वनयति ॥ ६६ ॥

सुमनोरञ्जनी — गरुडध्वजमित्युक्त्या गरुडप्रसादोऽपि भगवत्प्रसादाल्लब्ध इति ध्वनितम् ॥६६॥

नागराजोऽभ्यनुज्ञातः परिक्रम्य प्रणम्य च ।
सकलत्रसुहृत्पुत्रो द्वीपमब्धेर्जगाम ह ॥ ६७ ॥

सत्यधर्मीया — पूर्वं दाराणामुदारस्नेहपात्रत्वेऽपि कृष्णेन ज्ञात्यपत्यानन्तरमुक्तिस्तत्पक्ष-पातान्मोचनमिति न प्रकाशयितुमत्र सकलत्रेति तत्पुरस्कृतिस्तुतस्तस्य सर्वापेक्षया मूलत्वादिदानीं स्तुतितः स्वमुक्तिकर्त्रीति निमित्तत इति ज्ञेयम् ॥ ६७ ॥

सुमनोरञ्जनी — परिक्रम्य प्रदक्षिणीकृत्य ॥ ६७ ॥

तदैव साऽमृतजला यमुना निर्विषाऽभवत् ।
अनुग्रहाद् भगवतः क्रीडामनुजरूपिणः ॥ ६८ ॥

इति श्रीमद्भागवते दशमस्कन्धे चतुर्दशोऽध्यायः ।

सत्यधर्मीया — प्राङ्निर्विषा नितरां विषसहिता यमुना तदैवामृतजला तत्तुलसलिलाऽभवत् । क्रीडामनुजरूपिणो भगवतोऽनुग्रहादिति हेतूक्तिः ॥ ६८ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे चतुर्दशोऽध्यायः ॥ १०-१४ ॥

सुमनोरञ्जनी — तदैव तद्गमनोत्तरमेव । क्रीडार्थं मनुजवत्प्रतीतरूपवतः श्रीकृष्णस्यानुग्रहात् । निर्विषा सती । अमृततुल्यजला अभवत् ॥

यथा विषजलाशयात्तरणिकन्यकायाः सरीसृपं समुदवासयन्नकृत तज्जलं सज्जलं तथैव मम मानसाशयनिवेशकामाहिनं व्युदस्य कुरु भो प्रभो ! मम मनस्त्वदाक्रीडनम् ॥ ६८ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां चतुर्दशोऽध्यायः ॥ १०-१४ ॥

॥ अथ पञ्चदशोऽध्यायः ॥

राजोवाच—

नागालयं रमणकं कस्मात् तत्याज कालियः ।
कृतं किं वा सुपर्णस्य तेनैकेनासमञ्जसम् ॥ १ ॥

सत्यधर्मीया — श्रुतरमणकवासविरमणककालियो राजा निमित्तं विविच्य वदेति पृच्छतीति वदति ॥ राजेति । नागालयमित्यनेकेषां तद्द्वीप ओकः सर्पाणामिति सूच्यते उत्तरोक्तिस्वारस्यात् । असमञ्जसमपराधः ॥ १ ॥

सुमनोरञ्जनी — नागानां आलयं निवासस्थानम् । असमञ्जसं अप्रियम् ॥ १ ॥

श्रीशुक उवाच—

उपहार्यैः सर्पजनैर्मासिमासीह यो बलिः ।
वानस्पत्यो महाबाहो नागानां प्राङ् निरूपितः ॥ २ ॥

सत्यधर्मीया — सर्पजनैरुपहार्यैरुपायनत्वेन देयैः पदार्थैः सह मासिमासि प्रतिमासं पदमेकम् । प्राङ्नागानां रक्षणार्थमिति शेषः । वानस्पत्यो बलिः वृक्षमूले देय इति केचित् । सोमे वनस्पतिं गत इत्यमावास्यायां क्रियमाण इत्यर्थः । निरूपितः कृतसङ्कल्पितः । ऐकमत्येनात्मरक्षणाय बलिकल्पनं कृतवन्त इत्यर्थः ॥ २ ॥

सुमनोरञ्जनी — सर्पजनैः सर्पा एव जनाः तैः । उपहार्यैः भक्षणीयैः पदार्थैः । मासि मासि प्रतिमासम् । वानस्पत्यः सोमे वनस्पतिं गते क्रियमाणः, अमायां क्रियमाण इति पदरत्नावल्याम् । यो बलिः प्राक् नागानामर्थे कर्तव्यतया निरूपितः उपकल्पितः । जनैरिति शेषः ॥ २ ॥

स्वं स्वं भागं प्रयच्छन्ति नागाः पर्वणिपर्वणि ।
गोपीथायात्मनः सर्वे सुपर्णाय महात्मने ॥ ३ ॥

सत्यधर्मीया — तदेवाह ॥ स्वं स्वमिति । नागाः स्वं स्वं भागं यथा गृहमायातं पर्वणिपर्वणि पदमेकं महात्मने सुपर्णायात्मनो गोपीथाय रक्षणाय । निपातितः शब्दः । प्रयच्छन्ति ददति ॥ ३ ॥

सुमनोरञ्जनी — तं स्वं स्वं भागम् । नागाः पर्वणि पर्वणि । आत्मनः स्वस्य । गोपीथाय रक्षणाय । सुपर्णाय प्रयच्छन्ति स्म ॥ ३ ॥

विषवीर्यमदाविष्टः काद्रवेयस्तु कालियः ।
कदर्थीकृत्य गरुडं स्वयं तां बुभुजे बलिम् ॥ ४ ॥

सत्यधर्मीया — काद्रवेयः । कद्रुकमण्डल्वोः संज्ञायामित्यङ् स्त्रियाः कद्र्वा अपत्यं काद्रवेयः स्त्रीभ्यो ढगिति ढक् एयादेशः । भानुना देवयोनयोऽमीत्युक्तेर्देवयोनिताऽनेनास्य ज्ञाप्यत इति ज्ञेयम् । कदर्थीकृत्य धिक्कृत्य । तमिति तामित्यपि पाठौ पूजाकररूपयोरर्थयोर्बलिशब्दस्यो-भयलिङ्गत्वादुपपन्नौ । पूजायां स्त्री बलिर्दैत्यभेदे ना कर एव चेति यादवः । स्वयं बुभुजे ॥ ४ ॥

सुमनोरञ्जनी — कद्रोरपत्यं काद्रवेयः । कालियस्तु । गरुडं कदर्थीकृत्य तुच्छीकृत्य तां नागान्तरैः क्रियमाणां बलिं पूजां स्वयं बुभुजे । पूजायां स्त्रीबलिर्दैत्यभेदे ना कर एव चेत्यभिधानम् ॥ ॥ ४ ॥

तच्छ्रुत्वा कुपितो राजन् भगवान् भगवत्प्रियः ।
विजिघांसुर्महावीर्यं कालियं समुपाद्रवत् ॥ ५ ॥

सत्यधर्मीया — विजिघांसुर्हन्तुकामः कालियं समुपाद्रवत् ॥ ५ ॥

सुमनोरञ्जनी — भगवत्प्रियो भगवान् गरुडः । विजिघांसुः हन्तुमिच्छन् ॥ ५ ॥

तमापतन्तं तरसा विषायुधः प्रत्यभ्ययादुद्धृतनैकमस्तकः ।
दद्भिः सुपर्णं व्यदशद् ददायुधः करालजिह्वोच्छ्वसितोग्रलोचनः ॥ ६ ॥

सत्यधर्मीया — विषमेवायुधं यस्य स तथाऽभ्ययात्सम्मुखमाययौ । उद्धृतानि नैकान्यनेकानि मस्तकानि यस्य स दद्भिर्दन्तैः । ददायुधो दन्ता एवायुधं यस्य सः । गतम् । करालजिह्वश्चासावुदुच्चानि श्वसितानि यस्य स चासावुग्राणि लोचनानि यस्य स च ॥ ६ ॥

सुमनोरञ्जनी — तरसा वेगेन । तं गरुडम् । विषमेवायुधं यस्य सः । प्रत्यभ्ययात् योद्धुमभिजगाम । उद्धृतनैकमस्तकः उन्नमितानेकफणः । ददायुधः दन्ता एवायुधानि यस्य सः । कराले क्रूरे जिह्वोच्छ्वसिते यस्य सः उच्छसितदीर्घश्वासः । यद्वा करालजिह्वश्च, उत् उत्कृष्टं दीर्घमिति यावत् । श्वसितं यस्य स च । उग्राणि लोचनानि यस्य स चेत्यर्थः । उच्छ्वसितानि उज्जृम्भितानि उग्रलोचनानि यस्येति वा । दद्भिः दन्तैः । व्यदशत् दंशितवान् ॥ ६ ॥

तं तार्क्ष्यपुत्रः स निरस्य मन्युमान् प्रचण्डवेगो मधुसूदनासनः ।
पक्षेण सव्येन हिरण्यरोचिषा जघान कद्रूसुतमुग्रविक्रमः ॥ ७ ॥

सत्यधर्मीया — मधुसूदनासनो भगवत आसनमुपवेशोऽत्रेति । हिरण्यरोचिषा सुवर्णकान्तिमता सव्येन वामेन पक्षेण । यद्यपि सव्यं दक्षिणवामयोरिति विश्वस्तथाऽपि तदलक्ष्यतां द्योतयितुं वामेनेति व्याकरणं युक्तमिति मन्तव्यम् । एतदुपोद्बलकं तु पक्षेणेत्येकवचनम् । कद्रूसुतं जघान । वामं शरीरं सव्यं स्यादित्यमरः ॥ ७ ॥

सुमनोरञ्जनी — तार्क्ष्यस्य कश्यपस्य पुत्रो गरुडः । मधुसूदनस्यासनं आवासो यस्मिन् सः । मधुसूदन आसतेऽस्मिन्निति वा । मन्युमान् क्रोधी । तं नागम् । सव्येन पक्षेण जघान ॥ ७ ॥

सुपर्णपक्षाभिहतः कालीयोऽतीवविह्वलः ।
ह्रदं विवेश कालिन्द्यास्तदगम्यं दुरासदम् ॥ ८ ॥

सत्यधर्मीया — सुपर्णपक्षेणाभिहतः कालियः । इतरैर्दुरासदं मत्वेति शेषः । अतीवविह्वलः संस्तदगम्यं गरुडागम्यं कालिन्द्या ह्रदं विवेश ॥ ८ ॥

सुमनोरञ्जनी — सुपर्णस्य गरुडस्य पक्षेण अभिहतः ताडितः । कालिन्द्याः यमुनायाः । तस्य गरुडस्य । अगम्यम् । अन्येषामपि दुरासदं दुष्प्राप्यम् ॥ ८ ॥

तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सितम् ।
निवारितः सौभरिणा प्रसह्य क्षुधितोऽहरत् ॥ ९ ॥

सत्यधर्मीया — कुतस्तद्गरुडागम्यमित्यत आह ॥ तत्रेति । ईप्सितमपेक्षितम् । सौभरिणा तपस्यता । प्रसह्य बलात् ॥ ९ ॥

सुमनोरञ्जनी — गरुडागम्यत्वे निमित्तमाह ॥ तत्रेति । भक्ष्यं स्वस्य भक्षयितुं योग्यम् । जलचरं मीनम् । सौभरिणा तन्नामकमुनिना निवारितोऽपि । प्रसह्य बलात्कृष्य ॥ ९ ॥

मीनान् सुदुःखितान् दृष्ट्वा दीनान् मीनपतौ हते ।
कृपया सौभरिः प्राह तत्र तत्क्षेममाचरन् ॥ १० ॥

सत्यधर्मीया — मीनपतौ हते सति मीनांस्तज्ज्ञातीन्सुदुःखितान्दृष्ट्वा तत्र यमुनाह्रदे तत्क्षेमं मीनानामुत्तरत्रोर्वरितानां क्षेममाचरन्कुर्वाणः कृपया प्राह । मीनमिथुनरमणदर्शनजनितकामिनीकामनोपात्तमहामाहात्म्यावहदेहव्यूहग्रहणानुबन्धेनौचितौ रचितः सौभरिणा शापो विपतेरिति ज्ञेयम् ॥ १० ॥

सुमनोरञ्जनी — दीनान् दयापात्रान् । तेषां मत्स्यानाम् । क्षेमम् ॥ १० ॥

अत्र प्रविश्य गरुडो यदि मत्स्यान् स खादति ।
सद्यः प्राणैर्वियुज्येत सत्यमेतद् ब्रवीम्यहम् ॥ ११ ॥

तात्पर्यम् – 'विष्णुना विष्णुभक्तैश्च ब्रह्मशापोऽनुवर्त्यते । ब्राह्मणानामपीडायै बलिभिः क्षत्रियादिभिः । विष्णोश्च विष्णुभक्तानां शापादव्येति तपोऽखिलम् । तथापि चासुरावेशाच्छपेयुर्हरिमप्यहो । अतस्तु सौभरेः शापं नात्यवर्तत्खगेश्वरः । अन्यथा तूत्तमानां हि नाधमैः शाप इष्यते । वरोऽपि दत्तस्त्वधिकैर्नाधमाधिक्यकारणम् । विष्णोरपि वरस्तस्मान्नाधिक्यं सम्प्रयच्छति । क्रमशः श्रीविरिञ्चादेः कथञ्चित्केनचित्कचित् । न च दद्याद्धरिस्तादृग्दद्याद्वा बाह्यमेव त्वि'ति ब्रह्माण्डे ॥ ११ ॥

सत्यधर्मीया — कृपयेत्यारभ्य सार्धश्लोकद्विके सौभरिशापतो विपतेर्भीतता प्रतीयते । सा चोच्चतां विनाऽनुपपद्यमानतामाक्षिपति । सा च प्रमाणबाधितेत्यत एतद्व्याजेन सर्वत्रैतत्सजातीये गतिं व्यवस्थापयन्मानमेवाह ।। विष्णुनेति । ब्रह्मणां ब्राह्मणानामुत्तङ्कभृग्वादीनां शापः । हरिणेत्याद्यन-भिधानेनाभिधानेन च विष्णुनेति विना ष्णौति गच्छतीति व्युत्पत्त्या यत्स्वाम्यपि ब्राह्मणाननुसरति का कथा गुरुडस्येति ध्वनयति । विष्णुभक्तैरप्यनुवर्त्यते तत्फलानुभूत्या । बलिभिः, निन्दनं बलस्येनिनाऽऽह । दुष्टबलवद्भिः क्षत्रियादिभिर्ब्राह्मणानामपीडायै अनुपद्रवार्थम् । उत्तमशापप्रदाने-नाधमानां किमित्यत आह ।। विष्णोरिति । विष्णोर्विष्णुभक्तानां स्वोत्तमानां तत्कर्मकाच्छा-पादधमस्याखिलं तपो व्यैति नश्यति । ऋष्यादिज्ञानिनः कुत आत्मतपोहानिदं कुरुते कार्यमित्यत आह ।। तथाऽपीति । तपःक्षयहेतुत्वेऽपि हरिमपि शपेयुः । तत्र तन्त्रम् ।। असुरावेशादिति । अहो तदासुरं माहात्म्यमद्भुतमित्यर्थः । प्रस्तुतोक्त्योपसंहरति ।। अत इति । एतद्धेतोः सौभरेः शापं खगेश्वरो नात्यवर्तत । देवभूदेवादितरतमभावो मानसिद्ध इति नीचयोनावप्रयोजनानि रिक्तफलकानीति वक्ति । अन्यथा ब्राह्मणपीडापीडार्थमित्यनङ्गीकारे । अधमैः शाप उत्तमानां तैर्नेष्येत नाङ्गीक्रियेतात उक्तमेव प्रयोजनं न निष्प्रयोजनं स्वीकार इति सम्भवति । अप्रेक्षावत्त्वप्राप्तेः । एवं शापे गतिं विचिन्त्य प्रसङ्गसङ्गत्योत्तमैरधमं प्रति प्रदत्तो वरोऽप्येतादृश इति शंसति ।। वरोऽपीति । उत्तमैर्दत्तोऽधमेभ्योऽधमस्याधिक्यं प्रति कारणं न भवति । ननु भवत्वितरेषामुत्तमानां वरो न वरताकरो हरेरवन्ध्यसङ्कल्पत्वान्न तद्दत्तो विफलं भवितुं योग्य इत्यत आह ।। विष्णोरपीति । तस्मात्स्वोत्तमात्क्रमशः क्रमाच्छ्रीविरिञ्चादेर्विष्णोर्वरश्चेदप्याधिक्यं न सम्प्रयच्छति न ददाति । कथञ्चित्केनापि प्रकारेण केनचिद्धेतुना । क्वचित्काले देशे वा । कुत इत्यतोऽपीदमुत्तरम् । तेभ्यस्तेषामधमानां चित् उत मतो य योगिज्ञानं केतीति । हरिस्तादृग्योग्यतामतिक्रम्य विद्यमानं वरं न दद्यात् । वेति यद्यर्थे । यदि दद्यात्तद्बलादिकं बाह्यमेव । अर्जुनादीनां वैरिजयनादिविषयकमेवेति बाह्यं न स्वरूपमित्यर्थः । स गरुडोऽत्र प्रविश्य यदि मत्स्यान्खादति सद्यः प्राणैर्वियुज्येत मृतो भवेदिति यावत् । अहमेतत्सत्यं यथार्थं ब्रवीमि ।। ११ ।।

सुमनोरञ्जनी — किमित्याहेति तत्राह ।। अत्रेति । अत्र अस्मिन् ह्रदे । मत्स्यान् मत्स्यादीन् बहुवचनमाद्यर्थे । खादति भक्षयति । तर्हि सद्यः तत्काल एव । प्राणैर्वियुज्येत मरणं प्राप्नुयादित्यर्थः ।। ।। ११ ।।

तत् कालियः परं वेद नान्यः कश्चित् स लेलिहा ।
अवात्सीद् गरुडाद् भीतः कृष्णेन च विवासितः ।। १२ ।।

सत्यधर्मीया — तत्, तत्र पत्रिराडायातश्चेन्मरिष्यतीत्येतत्परं रहस्यं कालियो वेदान्यः कश्चिल्लेलिहा लेलिहानः सर्पो न वेदातः स गरुडाद्भीतस्तत्रावात्सीत्कृष्णेन विवासितो निष्कासितः ॥ ॥ १२ ॥

सुमनोरञ्जनी — तर्हि सर्वे सर्पाः किमित्यत्र नावासं चक्रुरित्यत आह ॥ तदिति । तत् सौभरिणोक्तम् । परं केवलम् । कालिय एव वेद । अतः स लेलिहा सर्पः । अवात्सीत् आवासं कृतवान् । ननु इन्द्रादिसकलदेवतासार्वभौमेन गरुडेन स्वावरसौभरिशापातिक्रमः किमिति न कृत इत्याशङ्कां परिहर्तुमाहुराचार्यचरणाः ॥

विष्णुना विष्णुभक्तैश्च ब्रह्मशापोऽनुवर्त्यते ।
ब्राह्मणानामपीडायै बलिभिः क्षत्रियादिभिः ॥
विष्णोश्च विष्णुभक्तानां शापाद्व्येति तपोऽखिलम् ।
तथापि चासुरावेशाच्छपेयुर्हरिमप्यहो ॥
अतस्तु सौभरेः शापं नात्यवर्तत् खगेश्वरः ।
अन्यथा तूत्तमानां हि नाधमैः शाप इष्यते ॥
वरोऽपि दत्तस्त्वधिकैर्नाधमाधिक्यकारणम् ।
विष्णोरपि वरस्तस्मान्नाधिक्यं संप्रयच्छति ॥
क्रमशश्च विरिञ्चादेः कथंचित्केनचित्क्वचित् ।
न च दद्याद्धरिस्तादृग्दत्तं वा बाह्यमेव तु ॥ इति ब्रह्माण्ड इति ।

विष्णुनेति दृष्टान्तार्थम् । विष्णुनेव तद्भक्तैरपि ब्रह्मशापः ब्राह्मणकृतशापः । अनुवर्त्यते अङ्गीक्रियते । कस्मै प्रयोजनाय । बलिभिः क्षत्रियादिभिः । ब्राह्मणानाम् । अपीडायै । अन्यथा बलिनः क्षत्रियादयोऽपि ब्राह्मैः शप्ताः तान् पीडयेयुरिति भावः । अत एव खगेश्वरः सौभरेः शापं नात्यवर्तत् नातिक्रान्तवान् । स्वतपोहानिसंपादकं स्वोत्तमं प्रति शापदानं किमर्थं सौभरिणा कृतमित्यतः । सत्यम् । तथाप्यसुरावेशात्तथा कृतमिति भावेनोक्तम् ॥ विष्णोश्चेति । यद्यपि विष्णोः विष्णुभक्तानामुद्देशेन दत्ताच्छापादखिलं तपो व्येति अपगच्छति । तथापि असुरावेशात् हरिमपि शपेयुः किम्वन्यानित्यर्थः । अन्यथा असुरावेशाभावे । उत्तमानां उत्तमान्प्रति । अधमैः शापो नेष्यते । कर्तव्यतयेति शेषः । तथा च उत्तमास्त्वधमशापं स्वयमेवानुवर्तन्ते । न तु शापबलात् स्वभावभूत-योग्यतायाः न्यूनता संपद्यत इति समुदायाभिप्रायः । एतमेव न्यायं वरविषयेऽप्यतिदिशति ॥ वरोऽपीति । यथा शापो न योग्यतान्यूनतापादकः तथा अधिकैः अधमेभ्यो दत्तो वरोऽपि अधमानां स्वयोग्यताधिक्यस्य कारणं न भवति । अधमेन विष्णोः सकाशात्संपादितोऽपि आधिक्यं

स्वरूपयोग्यतातिक्रमेणाधिक्यं न संप्रयच्छति । क्रमशश्च क्रमेणैव । विरिञ्चादेः संपादितोऽपि वरः नाधिक्यं संप्रयच्छतीति पूर्वेणान्वयः । विरिञ्चादिसकाशादाधिक्यमिति वा । कथंचित् केनापि प्रकारेण । गुणेन कर्मणा वा । केनचित् केनापि सहायेन । क्वचित् क्वचिदपि देशविशेषे । नन्विद-मनुपपन्नम् । सत्यसंकल्पेन श्रीहरिणा दत्तस्य वरस्य मोघत्वायोगादित्यतोऽभिप्रायमाह ॥ न चेति । हरिः तादृग्योग्यतातिक्रमेणाधिक्यं यथा स्यात्तथा वरमेव न दद्यात् न ददाति । क्वचिद्दत्तं वा वरं दत्तमपि वरं बाह्यमेव बाह्यविभवादिसंपादकमेव न योग्यतातिशयहेतुं वदन्ति विद्वांस इत्यर्थः ॥१२॥

कृष्णं ह्रदाद् विनिष्क्रान्तं दिव्यस्रग्गन्धमण्डितम् ।
महामणिगणाकीर्णं जाम्बूनदपरिष्कृतम् ॥ १३ ॥

सत्यधर्मीया — स्रजो माला गन्धाद्याश्च तैर्मण्डितम् । जाम्बूनदं सुवर्णं तेन परिष्कृतं तन्मयभूषणोपेतम् ॥ १३ ॥

सुमनोरञ्जनी — महान्तो ये मणयः तेषां गणैः आकीर्णं व्याप्तम् । जाम्बूनदं सुवर्णम् । तेन परिष्कृतं अलंकृतम् ॥ १३ ॥

उपलभ्योत्थिताः सर्वे लब्धप्राणा इव प्रजाः ।
प्रमोदनिभृतात्मानो गोपाः प्रीत्याऽभिरेमिरे ॥ १४ ॥

सत्यधर्मीया — लब्धाः प्राणा यासां ताः । प्रमोदेन सन्तोषेण निभृतः पूर्ण आत्मा मनो येषां ते तथाऽभिरेमिरे आलिलिङ्गुः ॥ १४ ॥

सुमनोरञ्जनी — उपलभ्य दृष्ट्वा । प्रमोदेन निभृतात्मानः पूर्णमानसाः । अभिरेमिरे आलिलिङ्गिरे ॥ १४ ॥

यशोदा रोहिणी नन्दो गोपा गोप्यश्च कौरव ।
कृष्णं समेत्य लब्धेहा आसंल्लब्धमनोरथाः ॥ १५ ॥

सत्यधर्मीया — प्राङ्निश्चेष्टा इदानीं लब्धेहा चेष्टा याभिस्ताः । लब्धमनोरथा आसन् ॥ १५ ॥

सुमनोरञ्जनी — लब्धेहाः लब्धचेष्टाः ॥ १५ ॥

रामश्चाच्युतमालिङ्ग्य जहासास्यानुभाववित् ।
नरा गावो वृषा वत्सा लेभिरे परमामुदम् ॥ १६ ॥

सत्यधर्मीया — अस्य कृष्णस्य । परमामुदमिति पदमेकं परमा च साऽमुच्च तामिति च ॥१६॥

सुमनोरञ्जनी — जहास मंदस्मितोऽभवत् । कुतः । तस्य कृष्णस्य अनुभावं माहात्म्यं वेत्तीति तथा ॥ १६ ॥

नन्दं विप्राः समागम्य गुरवः सकलत्रकाः ।
ऊचुस्ते कालियग्रस्तो दिष्ट्या मुक्तस्तवात्मजः ॥ १७ ॥

सत्यधर्मीया — ते विप्रा इत्यन्वयः ॥ १७ ॥

सुमनोरञ्जनी — विप्राः, गुरवः वृद्धाश्च । सकलत्रकाः सभार्याः । कालियग्रस्तः तवात्मजो मुक्त इति यत् तद्दिष्ट्या परमानन्दकरम् ॥ १७ ॥

यशोदा च महाभागा नष्टलब्धप्रजा सती ।
परिष्वज्याङ्कमारोप्य मुमोचाश्रुकणान् बहून् ॥ १८ ॥

सत्यधर्मीया — नष्टाऽदर्शनं गता सा लब्धा प्रजाऽपत्यं यस्याः सा सती ॥ १८ ॥

सुमनोरञ्जनी — नष्टा अदर्शनं गता च । नश् अदर्शने । लब्धा उपलब्धा च प्रजा यस्याः सा । कृष्णं परिष्वज्य आलिङ्ग्य । अङ्कं उत्सङ्गम् । अश्रुकणान् आनन्दबाष्पबिन्दून् ॥ १८ ॥

ततश्चास्तंगते भानौ कृष्णो वासमकल्पयत् ।
सरामः सह गोपालैर्मात्रा पित्रा सगोधनैः ॥ १९ ॥

सत्यधर्मीया — सगोधनैर्गोपालैरित्यन्वयः । भानावस्तंगते मित्रः स्वामित्रवंशभवेन तनुजनिर्नैर्मल्यं जातमिति लज्जयाऽमुखप्रदर्शनेन वाऽतोषभरेण समुद्रपातेन वा जामातरं प्रति तव योषाऽविषा जातेति वक्तुं वेत्यस्तंगमनमित्यौत्प्रेक्षिका उत्प्रेक्षयन्ति ॥ १९ ॥

सुमनोरञ्जनी — सरामः कृष्णः । मात्रादिभिः सह वासम् । अकल्पयत् कल्पयामास ॥ १९ ॥

तां रात्रिं तत्र राजेन्द्र क्षुत्तृड्भ्यां श्रमकर्शिताः ।
ऊषुर्व्रजौकसो गावः कालिन्द्या उपकूलतः ॥ २० ॥

सत्यधर्मीया — क्षुत्तृड्भ्यां ताभ्यामुत्पन्नो यः श्रमस्तेन कर्शिताः । उपकूलतः कूलस्योप समीपे ऊषुः ॥ २० ॥

सुमनोरञ्जनी — व्रजौकसो गोपाः क्षुत्तृड्भ्यां श्रमेण च कर्शिताः । तां रात्रिम् । तत्रैव यमुनाकूल एव । ऊषुः । उपकूलतः कूलसमीपे ॥ २० ॥

एतस्मिन्नेव काले तु व्रजे कौरवसत्तम ।
घोरः शुचिबलोद्भूतो दावाग्निः सर्वतो वृतः ॥ २१ ॥

सत्यधर्मीया — शुचिबलोद्भूतः शुचिर्ग्रीष्मस्तस्य यद्बलं सामर्थ्यम् । शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोः सिते । ग्रीष्मे हुतवहे च स्यादुपधांशुककर्मणोरिति विश्वः । ग्रीष्मो नामर्तुर-भवदित्युत्तरत्रोक्तेः । सन्निहितत्वाच्छुचिर्ग्रीष्म इत्युचितम् । अथवा शुचिर्वायुः । दावाग्निर्वनानलः । दवदावौ वनानलावित्यमरः । सर्वतः परितः । वृतो वेष्टितः ॥ २१ ॥

सुमनोरञ्जनी — व्रजे गोगोपस्थाने । शुचेः ग्रीष्मर्तोः बलेन । उद्भूतः अभिवृद्धः दावाग्निः । सर्वतो वृतः परिवृतः आसीदिति । शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोः सिते । ग्रीष्मे हुतवहेऽपि स्यादिति विश्वः । वस्तुतः शुचिः वायुः तद्बलेनोद्भूतः । हंसः शुचिषदित्यत्र वायुस्थः शुचिषदिति भाष्योक्तेः ॥ २१ ॥

सुप्तान् निशीथ आवृत्य प्रदग्धुमुपचक्रमे ॥ २२ ॥

सत्यधर्मीया — निशीथे इति निपातितः शब्दो रात्रिसामान्यस्य तथाऽर्धरात्रं स्यादित्युक्तेर-र्धरात्रस्य च वाचकः । उपचक्रमे उपपराभ्यामिति क्रमेरात्मनेपदता । आरेभे ॥ २२ ॥

सुमनोरञ्जनी — निशीथे अर्धरात्रे ॥ २२ ॥

तत उत्थाय सम्भ्रान्ता दह्यमाना व्रजौकसः ।
कृष्णं ययुस्ते शरणं मायामनुजमीश्वरम् ॥ २३ ॥

सत्यधर्मीया — ते गोपाः ॥ २३ ॥

सुमनोरञ्जनी — शरणं भीतरक्षकम् ॥ २३ ॥

कृष्ण कृष्ण महाभाग हे रामामितविक्रम ।
एष तीव्रतमो वह्निस्तावकान् ग्रसते हि नः ।
सुदुस्तरान्नः स्वान् पाहि कालाग्नेः सुहृदः प्रभो ॥ २४ ॥

सत्यधर्मीया — तावकान्नः । तीव्रपदस्वारस्येनाक्षिपक्ष्मनिमीलनमध्य एवापिबदिति द्योत्यते । अत एवोत्तरत्रेवात्र लोचनानि निमीलयतेत्युक्तिः । ग्रसते ग्रसति पाहि । रामं प्रत्यप्याहुः ॥ अः स्वान्पाहीति । ततोऽतावकान्स्वतावकान्स्तोतॄनिति वा स्वानिति विषयभेदान्न पुनरुक्तिः ॥ २४ ॥

सुमनोरञ्जनी — तावकान् त्वद्भक्तान् । सुदुस्तरात् अस्माभिस्तर्तुमशक्यात् । कालाग्नेः मृत्युरूपादग्नेः । स्वान् स्वकीयान् ॥ २४ ॥

न शक्नुमस्त्वच्चरणं सन्त्यक्तुमकुतोभयम् ॥ २५ ॥

सत्यधर्मीया — अकुतोभयं त्वच्चरणं सन्त्यक्तुं न शक्नुमः । एतेन मरणं भविष्यतीति चिन्ताऽपि न, कृष्णविरहभीत्याऽवदन्निति भावः सूचितो भवति ॥ २५ ॥

सुमनोरञ्जनी — मृत्युभीत्या न वयं प्रार्थयामः किन्तु त्वद्वियोगभीत्येत्याहुः ॥ नेति । अकुतोभयं सर्वतोऽपि भयरहितम् ॥ २५ ॥

इत्थं स्वजनवैक्लव्यं निरीक्ष्य जगदीश्वरः ।
तमग्निमपिबत् तीव्रमनन्तोऽनन्तशक्तिधृक् ॥ २६ ॥

सत्यधर्मीया — अनन्तशक्तिधृक् अपरिमितबलवांस्तीव्रं यथा भवति तथाऽपिबत्पपौ ॥ २६ ॥

सुमनोरञ्जनी — अनन्तशक्तिधृक् ॥ २६ ॥

अथ कृष्णः परिवृतो ज्ञातिभिर्मुदितात्मभिः ।
अनुगीयमानो न्यविशद् व्रजं गोकुलमण्डितम् ॥ २७ ॥

इति श्रीमद्भागवते दशमस्कन्धे पञ्चदशोऽध्यायः ।

सत्यधर्मीया — अथ तत्पानानन्तरम् । अनुगीयमानोऽनुगैरिति शेषः । गोकुलमण्डितं व्रजं न्यविशत् ॥ २७ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे पञ्चदशोऽध्यायः ॥ १०-१५ ॥

सुमनोरञ्जनी — अथ दावाग्निजन्यभयपरिहारानन्तरम् । अनुगीयमानः स्तूयमानः ॥ २७ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां पञ्चदशोऽध्यायः ॥ १०-१५ ॥

॥ अथ षोडशोऽध्यायः ॥

श्रीशुक उवाच—

व्रजे विक्रीडतोरेवं गोपालच्छद्मरूपिणोः ।
ग्रीष्मो नामर्तुरभवन्नातिप्रेयान् शरीरिणाम् ॥ १ ॥

सत्यधर्मीया — रूपमाकारस्तद्वतोः । रूपं स्वभावे सौन्दर्ये चालोके पशुशब्दयोः । ग्रन्थावृत्तौ नाटकादावाकारश्लोकयोरपीति विश्वः । नातिप्रेयांस्तापोपपातात् ॥ १ ॥

सुमनोरञ्जनी — यस्य देवे परा भक्तिर्यथा देव इत्युक्तरीत्या हराविव तद्भक्तेषु देवेष्वपि यथायोग्यभक्तिजननाय बलरामस्य माहात्म्यं प्रलम्बासुरहननलक्षणं निरूप्यतेऽस्मिन्नध्याये ॥ व्रजे इत्यादिना । गोपालाविति छद्म कापट्यम् रूपयतः प्रकाशयत इति तथाविधौ । गोपालनाख्यछद्मना रूपिणौ शरीरिणौ वा । गोपालाविति कपटशब्दोपेताविति रत्नावल्याम् । रूपं शब्दे यशोग्रन्थ इति यादवः । व्रजे विक्रीडतोः सतोः । ग्रीष्मः तन्नामको ऋतुः तदानीम् । अभवत् । नातिप्रेयान्, नातिप्रियः घर्मेण स्वेदादिजननात् ॥ १ ॥

स च वृन्दावनगुणैर्वसन्त इव लक्षितः ।
यत्रास्ते भगवान् साक्षाद् रामेण सह केशवः ॥ २ ॥

सत्यधर्मीया — स चेतरत्र तेषां तादृशोऽपि वृन्दावनगुणैर्वसन्त इव लक्षितः । अमुख्यं भूगुणं तद्धेतुमभिधाय मुख्यं हेतुमाह ॥ यत्रास्त इति ॥ २ ॥

सुमनोरञ्जनी — स च सोऽपि वसन्त इव लक्षितः लक्षणयुक्तः दृष्टो वा । जनैः । वसन्तलक्षणोपेतत्वे निमित्तमाह ॥ यत्रेति । यत्र वृन्दावने ॥ २ ॥

यत्र निर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकम् ।
शश्वत् तच्छीकरैर्जुष्टं द्रुमपिप्पलमण्डितम् ॥ ३ ॥

सत्यधर्मीया — वसन्तं कृष्णं सेवितुम् । वसन्तं चकारेव तदभिमानी देव इति तत्साम्राज्यं वक्ति ॥ यत्रेति । निर्झराणां झराणां निर्ह्रादो ध्वनिस्तेन निवृत्त आच्छादित इति यावत्स्वनो यासां ताः झिल्लिकाश्चीर्यः । भृङ्गारी चीरुका चीरी झिल्लिका च समा इमा इत्यमरः । तच्छीकरैः सरिन्नीरबिन्धुभिर्जुष्टं सेवितं द्रुमैरितरैः पिप्पलैरपि मण्डितं द्रूणां मा येभ्यस्तैः पिप्पलैरिति वा । मा च शोभा ॥ ३ ॥

सुमनोरञ्जनी — कानि तानि वसन्तलक्षणानि ।। यैः ग्रीष्मोऽपि श्रीकृष्णसेवायै लक्षितोऽभवदिति । तान्याह ।। यत्रेति । यत्र यस्मिन्ग्रीष्मे । निर्झराणां निर्ह्रादेन निवृत्तस्वनाः अश्रूयमाणरवाः झिल्लिकाः कीटविशेषाः यस्मिन् तथाविधं श्रीमद्वनमित्युत्तरेणान्वयः । तच्छीकरैः तेषां निर्झराणां शीकरैः जलकणैः । जुष्टं सेव्यम् । द्रुममण्डलेन मण्डितं अलङ्कृतम् ।। ३ ।।

सरित्सरःप्रस्रवणोर्मिवायुना कह्लारकञ्जोत्पलरेणुहारिणा ।
न विद्यते यत्र वनौकसां दवो निदाघवह्न्यर्कभवोऽतिशाद्वले ।। ४ ।।

सत्यधर्मीया — सरिच्च नदी, सरो देवखातः, प्रस्रवणं निर्झर एतेषामूर्मयस्तरङ्गास्तद्वायुना । कल्हाराणि सौगन्धिकानि कञ्जानि कमलान्युत्पलानि रक्तानि नीलानि च तेषां रेणवः परागास्तान्हरति तच्छील इति हारी । तेन निदाघवन्ह्यर्कभवो निदाघसम्बन्धिनौ वन्ह्यर्कौ ताभ्यां भवतीति भवो दवो वनहुताशनो वनौकसां यत्र न विद्यते तत्रेदमपि किञ्चित्कपिवद्रामस्य दावतापापनोदे सहकारीतीरयति ।। अतिशाद्वल इति । नडशादाद्वलजिति वलच् । शाद्वलं स्यादहरितोरित्यमरः । अतिशयितं शाद्वलं यस्मिंस्तस्मिन् ।। ४ ।।

सुमनोरञ्जनी — सरित् यमुनानदी । सरांसि देवखाताः । प्रस्रवणाः क्षुद्रनद्यः । तदीयोर्मिवायुना निमित्तेन । कथंभूतेन । कल्हाराणि सौगन्धिकानि, कञ्जानि पद्मानि, उत्पलानि नीलोत्पलानि च तेषां रेणुभिः हारिणा मनोहरेण । वनौकसां प्राणिनाम् । अतिशाद्वले अत्यन्तहरिततृणयुते स्थाने । निदाघो ग्रीष्मः तदानीन्तनाभ्यां वन्ह्यर्काभ्यां भवः उत्पत्तिर्यस्य तादृशो दवः तापः यत्र न विद्यते ।। ४ ।।

अगाधतोयह्रदिनीतटेरुहैर्द्रवत्पुलिन्याः पुलिनैः समन्ततः ।
न यत्र चण्डांशुकरा विषोल्बणा भुवो रसं शाद्वलितं निगृह्णते ।। ५ ।।

सत्यधर्मीया — अगाधं तोयं यस्याः सा च ह्रदिनी महानदी तस्यास्तटे रुहैस्तीरोत्पन्नैर्वृक्षैः । वैवक्षिकसंज्ञात्वमङ्गी हलदन्तात्संज्ञायामिति सप्तम्या अलुगिति केचित् । केचिच्च पदभेदं वदन्तो रुहेः कप्रत्ययमाचक्षाणा रुहन्तीति रुहा इत्याचक्षते । अन्ये तु मन्यन्ते तटे स्वप्रसरेण तरणेः ई कोपो यैस्ते सन्तश्च ते रुहाश्चेति । ई दुःखभावने कोप इति विश्वात्तदुपपत्तिमेकपद्ये । किरणाप्रसरणात्तरणेः कोप इति भावस्तत्र । अत एव न यत्र चण्डांशुकारा विषोल्बणा इत्याद्यनुपदं वक्ष्यतीत्युपपत्तिमाहुः । द्रवत्पुलिन्याः स्वप्रतिष्टावान्तरनद्याः पुलिनैः । नलिपुलिभ्यामितीनम् । सिकताभिर्विषवदुल्बणाः क्रूराश्चण्डांशोः सूर्यस्य कराः किरणाः । शाद्वलितं सञ्जाताशाद्वलमिति । भुवो रसं जलं न निगृह्णते न गृह्णन्ति । स्वरितेत्त्वात्कर्तृगामिनि क्रियाफले आत्मेनपदता ।। ५ ।।

सुमनोरञ्जनी — द्रवत्पुलिन्याः द्रवन्त्याः स्यन्दन्त्याः पुलिन्याः नद्याः । पुलिनैः सूक्ष्मवालुकाभिः निमित्तैः । स्वत एव पुलिनस्थलम् । तत्रापि नदीसन्निधानम् । तस्मान्निमित्तादित्यर्थः । तथा अगाधं तोयं यस्याः सा तथाभूता यद्भ्रदिनी नदी तस्याः तटेरुहैः तीरजनितैः । अनेन सर्वदा तोयसन्निधानेन वृक्षाणां निबिडच्छायता ध्वनिता । वृक्षैश्च निमित्तैः । यत्र वृन्दावने । विषापेक्षया उल्बणा अपि चण्डांशोः सूर्यस्य कराः । शाद्वलितं शाद्वलनिबिडं भुवो रसम् । न निगृण्हते न शोषयति । स्वत एव द्रवीभूतायाः पुलिनभूमेः पुलिन्याः सन्निधानात् । तत्रापि महावृक्षस्थायाः संच्छन्नायाः रसो न कदापि सूर्यकिरणैः शुष्यतीति भावः ॥ ५ ॥

श्रीमद्वनं कुसुमितं नदच्चित्रमृगद्विजम् ।
गायन्मयूरभ्रमरं कूजत्कोकिलसारसम् ॥ ६ ॥

सत्यधर्मीया — कुसुमितं । तारकादीतच् । नदच्चित्रमृगद्विजं चित्रं नदन्तो नदच्चित्राः । कोकिलाः सारसाश्च यस्मिंस्तत् ॥ ६ ॥

सुमनोरञ्जनी — श्रीमत् शोभावत् । कुसुमान्यस्मिन् संजातानि तत्कुसुमितम् । नदन्तः चित्राः नानाजातीयाः मृगाः द्विजाः पक्षिणो यस्मिन् तत् । गायन्तो गानं कुर्वन्तः । षड्जादिस्वरानुच्चरन्तो मयूराः भ्रमराश्च यस्मिन् तत् । कूजन्तो मधुरध्वनिं कुर्वन्तः कोकिलाः सारसाश्च यस्मिन् तत् ॥ ६ ॥

क्रीडिष्यमाणस्तत् कृष्णो भगवान् बलसंयुतः ।
वेणुं विरणयन् गोपैर्गोधनैः संवृतोऽविशत् ॥ ७ ॥

सत्यधर्मीया — तद्वनं कृष्णोऽविशदित्यन्वयः ॥ ७ ॥

सुमनोरञ्जनी — क्रीडिष्यमाणः भाविक्रीडेच्छुः । तत् वनम् । विरणयन् विविधं यथा स्यात्तथा रणयन् स्वनयन् । गोरूपैः धनैः संवृतो युक्तः ॥ ७ ॥

प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः ।
रामकृष्णादयो गोपा ननृतुर्युयुधुर्जगुः ॥ ८ ॥

सत्यधर्मीया — प्रवालाः किसलया बर्हाणि पिच्छानि स्तबका गुच्छाः, स्रजश्च मालाश्च धातवो गौरिकादयश्च तैः कृतं भूषणं येषां ते ॥ ८ ॥

सुमनोरञ्जनी — प्रवालाः किसलयाः, बर्हाः पिंछाः, तेषां स्तबकैः गुच्छैः कृताः स्रजो यैस्ते च ते, धातुभिः गैरिकादिभिः सुवर्णादिभिर्वा कृतानि भूषणानि यैस्ते च ॥ ८ ॥

कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन् ।
वेणुं पाणितलैः शृङ्गैः प्रशशंसुरथापरे ॥ ९ ॥

सत्यधर्मीया — केचिदवादयन्वेणुं पाणितलैः शृङ्गैरवादयन्नपरे प्रशशंसुस्तव वादनं समीचीन-मित्यस्तुवन् ॥ ९ ॥

सुमनोरञ्जनी — नृत्यतः कृष्णस्यानुसारेण केचित् जगुः । वेणुं अवादयन् । पाणितलैः परस्पराहतैः पाणितलैः मृदङ्गान्वा । शृङ्गैः गानानुकूलस्वरैः वाद्यविशेषैः ॥ ९ ॥

गोपजातिप्रतिच्छन्ना देवा गोपालरूपिणः ।
ईडिरे कृष्णरामौ च नटा इव नटं नृप ॥ १० ॥

सत्यधर्मीया — नटा नटमिव कृष्णरामावीडिरे । नटमित्येकवचनेन बले कर्मत एतद्धटनं विघटनं च कृष्ण इति सूचयति ॥ १० ॥

सुमनोरञ्जनी — गोपालरूपिणः सन्तः । गोपानां जातौ । प्रतिच्छन्नाः देवाः ईडिरे । ईड स्तुतौ । नटाः नटनाभिज्ञाः ॥ १० ॥

भ्रामणैर्लङ्घनैः क्षेपैरास्फोटनविकर्षणैः ।
चिक्रीडतुर्नियुद्धेन काकपक्षधरावुभौ ॥ ११ ॥

सत्यधर्मीया — भ्रामणैरेकस्य हस्तं गृहीत्वैकेन मण्डलाकरेण परिवर्तनानि तैः । लङ्घनैः पादनियत्योत्प्लवनैः । क्षेपैर्गृहीत्वैकं पिण्डीकृत्य प्रक्षेपैरास्फोटनैर्भुजोर्वादिह- स्तताडनैर्विकर्षणैरा-कर्षणैर्नियुद्धेन बाहुयुद्धेन चिक्रीडतुः । उभौ काकपक्षधरौ धरत इति धरौ काकपक्षस्य धरौ । काकपक्षः शिखण्डक इत्यमरः । शिरःपार्श्वद्वयतः कर्णपर्यन्तं धार्यः केशसंवेश इत्यर्थः ॥ ११ ॥

सुमनोरञ्जनी — भ्रामणैः मण्डलाकारेण लङ्घनैः । एकं मध्ये उपवेश्य तल्लंघनैः । क्षेपैः पाषाणादिक्षेपणैः । आस्फोटनैः बाह्वोः आस्फालनैः । विकर्षणैः परस्परं पाणिना पाणिमवलम्ब्य विकर्षणैः । नियुद्धेन मल्लयुद्धेन । काकपक्षधरौ काकपक्षाकृतिकेशधारिणौ । काकपक्षधारणमधुनापि औत्तराः कुर्वन्ति ॥ ११ ॥

क्वचिन्नृत्यत्सु चान्येषु गायकौ वादकौ स्वयम् ।
शशंसतुर्महाराज साधु साध्विति वादिनौ ॥ १२ ॥

सत्यधर्मीया — स्वयं रामकृष्णौ ॥ १२ ॥

सुमनोरञ्जनी — अन्येषु गोपेषु नृत्यत्सु स्वयं रामकृष्णौ गायकौ बभूवतुः ॥ १२ ॥

क्वचिद् बिल्वैः क्वचित् कुम्भैः क्व चामलकमुष्टिभिः ।
अस्पृश्यनेत्रबन्धाद्यैः क्वचिन्मृगखगेहया ॥ १३ ॥

सत्यधर्मीया — कुम्भः वर्तुलाकारफलवान् गुग्गुलवृक्षः । कुम्भोलूखलकं क्लीबे कौशिको गुग्गुलः पुमानित्यमरः । कुम्भेति सञ्जातविगृहीतकार्मुके वारतार्यां च कुम्भः । क्लीबं तु गुग्गुलाविति रभसः । उलूखले गुग्गुलौ च क्लीबं कुम्भमुलूखलमिति रुद्रः । कुम्भोलूखलकं कुम्भकुम्भोलूखलकं वरमिति वाचस्पतिः । क्व च काप्यामलकमुष्टिभिरामलकपूर्णमुष्टिभिरस्पृश्यनेत्रबन्धाद्यैः पृष्ठतोऽनुगतोऽस्पृश्यं मां स्पृशेति समयबन्धं कृत्वा पुरोगमनक्रीडया स्पृश्येत्येकदेशोक्त्या ग्राह्यः । नेत्राच्छादनादिपदेन हस्तप्रतित्याजनादिकं ग्राह्यम् । कापि मृगखगेहया तच्चेष्टया ॥ १३ ॥

सुमनोरञ्जनी — कुम्भैः गुग्गुलवृक्षफलैः । त्वं मां स्पृशेत्युक्त्वा तत्पाणिं पाणिना स्पृष्ट्वा पृष्टतः पुरतो धावनमस्पृश्यसंज्ञकम् । एकः स्वपाणिभ्यामन्यस्य नेत्रे आच्छाद्य । तदैव तत्र तत्र लीनान् सर्वानन्वेषयेति वदति । अन्योऽपि तानन्वेषयति यत्तन्नेत्रबन्धक्रीडनम् । आद्यपदेन दूरस्थलक्ष्यवेधादिकं गृह्यते । मृगानां खगानां चेहया चेष्टया ॥ १३ ॥

क्वचिच्च दर्दुरप्लावैर्विविधैरुपहासकैः ।
क्वचित् तथाऽऽन्दोलिकया कर्हिचिन्नृपचेष्टया ॥ १४ ॥

सत्यधर्मीया — दर्दुरप्लावैर्मण्डूकप्लवनैर्मर्कटमुखवन्मुखविकसनादिभिरान्दोलिकया परस्परं द्वयोर्बाह्वोः प्रसरणकृतान्दोलिकया । नृपचेष्टयाऽहं नृपो भवानि त्वममात्यो भवेत्यादिव्यापारेण ययातिशापेन भूपतित्वाभावादिदमपदेशेन किञ्चित्तत्सुखमनुभविष्याव इति लीलामेतां लालयामासुरिति भावः ॥ १४ ॥

सुमनोरञ्जनी — दर्दुरच्छावैः मण्डूकवदुत्प्लवनैः । उपहासकैः नर्मवचनैः । आन्दोलिकया आन्दोलाकृतिषु गोपेष्ववलम्बनेन । नृपलीलया च ॥ १४ ॥

एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने ।
नद्यद्रिद्रोणिकुञ्जेषु पुलिनेषु सरस्सु च ॥ १५ ॥

सत्यधर्मीया — लोकसिद्धाभिः क्रीडाभिर्नद्यश्चाद्रयश्च द्रोणयः काष्ठाम्बुवाहिन्यः । द्रोणी काष्ठाम्बुवाहिनीति विश्वः । ङ्यापोः संज्ञाछन्दसोरिति ह्रस्वः । कुञ्जो गुल्मविशेषो लतापिहितस्थानम् । निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदर इत्यमरः । चेरतुः ॥ १५ ॥

सुमनोरञ्जनी — नद्यः । अद्रिद्रोणयः पर्वतमध्यवृत्तिनिम्नभूमयः । कुञ्जाः लतागृहाणि तेषु ॥ ॥ १५ ॥

पशूंश्चारयतो गोपैस्तद्वने रामकृष्णयोः ।
गोपरूपी प्रलम्बोऽगादसुरस्तज्जिघांसया ॥ १६ ॥

सत्यधर्मीया — इदानीं शेषोऽशेषबलत्वेन जातः किञ्चिच्चकार स्मृतहरिचरणः परिचरमिति वक्तुमुपक्रमते ॥ पशूनिति । तज्जिघांसया तयोर्जिघांसा हननेच्छा तया ॥ १६ ॥

सुमनोरञ्जनी — पशून् चारयतोः सतोः । तद्वने तस्मिन्वने । प्रलम्बो नामतः । जात्या त्वसुरः । गोपस्य रूपमिव रूपमस्यास्तीति तथोक्तः सन् । तयोर्जिघांसया ॥ १६ ॥

तं विद्वानपि दाशार्हो भगवान् सर्वदर्शनः ।
अन्वमोदत तत्सख्यं वधं तस्य विचिन्तयन् ॥ १७ ॥

सत्यधर्मीया — सर्वदर्शनः सर्वज्ञस्तस्य वधस्तत्सख्यावधिरिति तदन्वमोदताभिमतमतनोत् । ॥१७॥

सुमनोरञ्जनी — दाशार्हः दशार्हाणामधिपः श्रीकृष्णः । सर्वस्य दर्शनं यस्य सः । सर्वज्ञ इत्यर्थः । तं विद्वानपि जिघांसया । आगतं जानन्नपि तस्य वधं चिन्तयन् । तेन सख्यं सर्वेषा अन्वयोदत अङ्गीचकार ॥ १७ ॥

तत्रोपाहूय गोपालान् कृष्णः प्राह विहारवित् ।
हे गोपा विहरिष्यामो द्वन्द्वीभूय यथायथम् ॥ १८ ॥

सत्यधर्मीया — द्वन्द्वीभूयैतस्य प्रतिभटोऽयं तस्यायमिति द्वयोर्मेलनं कृत्वा विहरिष्यामः ॥१८॥

सुमनोरञ्जनी — तत्र तदानीम् । यथा यथा वयोबलाद्यनुसारेण । द्वन्द्वीभूय । विहरिष्याम इति प्राह ॥ १८ ॥

तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ ।
कृष्णसङ्घट्टिनः केचिद् गोपा रामस्य चापरे ॥ १९ ॥

सत्यधर्मीया — परिवृढौ नायकौ कृष्णसङ्घट्टिनस्तत्पक्षस्थाः । सङ्घट्टिन इति विघटितं रामस्य च सङ्घट्टिन इत्यन्वेति ॥ १९ ॥

सुमनोरञ्जनी — परिवृढौ नायकौ । कृष्णसङ्घट्टिनः कृष्णपक्षीयाः । अपरे रामस्य सङ्घट्टिनः ॥ ॥ १९ ॥

आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः ।
तत्रारोहन्ति जेतारो वहन्ति च पराजिताः ॥ २० ॥

सत्यधर्मीया — वाह्या वाहका इति लक्षणं चिह्नं यासां ताः । जेतारो ये ते पराजितमारोहन्ति पराजिता जयवन्तं वहन्ति ॥ २० ॥

सुमनोरञ्जनी — वाह्यवाहकत्व एव लक्षणे जयपराजयज्ञापके यासां ताः क्रीडाः । तदेव स्पष्टमाह ॥ तत्रेति ॥ २० ॥

वहन्तो वाह्यमानाश्च चारयन्तश्च गोधनम् ।
भाण्डीरकं नाम वटं जग्मुः कृष्णपुरोगमाः ॥ २१ ॥

सत्यधर्मीया — वहन्तः स्वयमन्यानन्यैर्वाह्यमानाश्च । नाम प्रसिद्धम् ॥ २१ ॥

सुमनोरञ्जनी — वाह्यमानाः पृष्टेनोह्यमानाः ॥ २१ ॥

रामसङ्घट्टिनो ये तु श्रीदामवृषभादयः ।
क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो नृप ॥ २२ ॥

सत्यधर्मीया — श्रीदामा च वृषभश्चादी येषां ते तथा । तथा कृष्णादयश्चेत्येतद्युगमध्ये ये ये क्रीडायां जयिनस्तांस्तान्पराजयिन इति शेषः । ऊहुः । उत्तरस्थतात्पर्यस्वारस्यादेवमन्वयः संलग्नः ॥ ॥ २२ ॥

सुमनोरञ्जनी — श्रीदाम वृषभादयः । अत्र पराजितः श्रीदामा क्रीडायां ये जयिनः कृष्णादयः तांस्तानूहुरिति सम्बन्धः ॥ २२ ॥

उवाह कृष्णो भगवान् श्रीदामानं पराजितः ।
वृषभं भद्रसेनस्तु प्रलम्बो रोहिणीसुतम् ॥ २३ ॥

तात्पर्यम् – श्रीदामा कृष्णमुवाह । हरिवंशादिवचनात् । 'बहुमानविरोधे तु व्यत्यासः शब्दतोऽर्थतः । कार्योऽनिरुक्तदेवानां गुणसिध्यै न चान्यथा । विष्णुर्ब्रह्म तथा वायुरनिरुक्ताः प्रकीर्तिताः । तत्पत्यश्चेतरगुणा व्यत्यास्यास्तेष्वसंशय' इति ब्रह्मतर्के ॥ २३ ॥

सत्यधर्मीया — उवाह कृष्णो भगवानिति श्लोके लोकेशस्य कृष्णस्य पराभवः प्रतीयते स च बहुमानावमानित इत्यतः किञ्चिन्माननामग्रहणपूर्वकं विरोधं प्रदर्श्य विभक्तिव्यत्ययेन चान्वयं लापयित्वा तत्स्थेम्ने ब्रह्मतर्कवचनमुदाहरति ॥ श्रीदामेति । श्रीदामा । अनेन द्वितीया प्रथमार्थ इव प्रथमा कृष्णमिति द्वितीयार्थ इत्युक्तं भवति । हरिवंश आदिर्यस्य तद्धरिवंशादिपुराणं तद्विरोधात् । स च अविषह्यं तथा मत्वा कृष्णमद्भुतदविक्रमम् ।

रौहिणेयवधे यत्नमकरोद्दानवोत्तमः । हरिणा क्रीडनं नाम बालक्रीडनमेव हि ।
क्रीडिताश्चैव ते सर्वे द्वौ द्वौ युगपदुत्पतन् । कृष्णः श्रीदामसहितः पुप्लुवे गोपसूनुना ।
सङ्कर्षणस्तु प्लुतवान्प्रलम्बेन सहानघः । गोपालास्त्वपरे द्वन्द्वं गोपालैरपरैः सह ।
प्रद्रुता लङ्घयन्तो वै तेऽन्योन्यं लघुविक्रमाः । श्रीदाममजयत्कृष्णः प्रलम्बं रोहिणीसुतः ।
गोपालैः कृष्णपक्षीयैर्गोपालास्त्वपरे जिता इत्यादिः ।

न च भागवतस्यानन्तरीयकतया व्याख्यारूपतया प्राबल्याद्भारतापबाधनं कुतो न स्यादिति वाच्यं श्रीपरमेश्वरपराजयस्यामरपामरमनोऽनङ्गीकरणीयस्य बहुमानविरुद्धस्य चास्वीकार्यत्वात् । यथा भागवते तूक्तमित्यारभ्य विनैव सर्वमुन्नेयमित्यन्तपञ्चमतात्पर्यानुकूल्यं च तत्रैव योजनाभेदत इत्युक्तेश्च । वचनार्थादिव्यत्यासस्य मानाननतोऽनुपपत्तौ कर्तव्यताश्रावकब्रह्मतर्कवचनाद्भागवतार्थो वचनादिव्यत्यासेनैवावसेय इत्याह ॥ बहुमानेति । तत्रापि नैकलहरिवंशकलहः किन्तु बहूनि मानानि विरोधकानि सन्तीति बलवन्निमित्तं बलवत्त्वं बह्वित्यनेनोक्तमिति ज्ञेयम् । तुरवधारणे बहुमानविरोध एवेति सम्बध्यते । विरोध एव व्यत्यासः प्रस्तुतस्तु शब्दतोऽर्थतो दुःखीत्यादौ कार्यः । केचित्कर्मणः कर्तृत्वं कर्तुस्तु कर्मत्वमित्यर्थव्यत्यासमाहुः । अन्यथा विरोधाभावे । अनेन विरोधोपरोध एवैवमिति न किन्तु फललाभोऽप्यस्तीति लपति । अनिरुक्तदेवानां गुणासिध्या इति च । चः समुच्चये । ते चानिरुक्ताः किमाकारा इत्यत आह ॥ विष्णुरिति । विष्णुर्ब्रह्मा वायुश्चानिरुक्तास्तथा तेषां त्रयाणां पत्न्यो योषितश्चानिरुक्ता इति सम्बन्धः । परशुक्लत्रयं स्मृतमित्यादेः । तेष्वनिरुक्तेष्वितरेषां शिवादीनां गुणाः पराजयादयः प्रतीता वचनादितस्ते व्यत्यास्या व्यत्यासयितव्याः । अत्रासंशयः संशयाभावो रक्षोहागमलध्वसन्देहा इति निर्देशादसंश यः सिद्धो नितरां वक्तुमशक्याः अनिरुक्ता इति विग्रहः ॥ ततश्चायं मूलार्थः ॥ श्रीदामानं श्रीदामा पराजितः सन् कृष्णः कृष्णमुवाह । वृषभं भद्रसेनो गोप

उवाह प्रलम्बो रोहिणीसुतमुवाहेत्यन्वयः । अत्रायं विवेकः । कृष्णो रामश्चेति द्वौ नायकौ तत्र प्रलम्बो भद्रसेनश्च कृष्णपक्षगौ बभूवतुः । श्रीदामा वृषभश्चेत्युभौ बलपक्षगौ बभूवतुस्तत्र श्रीदामा श्रीदामोदरस्य प्रतिभटः, प्रतिभटश्च प्रलम्बो बलस्य, वृषभस्य भद्रसेनस्तत्र श्रीदामा पराजितः कृष्णं, प्रलम्बस्तथा सन्बलं, भद्रसेनस्तु वृषभमुवाहेति । न च कृष्णस्य पक्षिषु जयोऽस्त्विति महाभारततात्पर्यनिर्णये कृष्णपक्षस्य सर्वजयोक्तेः कथमिदमिति शङ्क्यम् । सर्वेष्विति सर्वविद-भाषणत्। द्वित्राणामत्र पराजयस्येवान्यत्र द्वित्राणां जयस्यापि सम्भवात् । अगत्या प्रलम्बकृत-बलोद्वहनेनेत्थमेव वक्तव्यत्वाच्च । बलबालमेलने प्रलम्बेन बलोद्वाहनं न सम्भवति स्वव्यूहस्थ-वाहनानौचित्यात् । अत एव व्याचक्रिरे जनार्दनभट्टाः । अत्रायमाशयः । कृष्णपक्षिभिः सर्वैर्जितं तत्पक्षस्थैः प्रलम्बभद्रसेनाद्यैर्द्वित्रैरेव पराजितम् । रामपक्षीयैः श्रीदामाद्यैः सर्वैः पराजितं वृषभाद्यैर्जितमिति । ननु रावणसमबलः प्रलम्बः प्राक् लक्ष्मणं क्षितौ पतितमुद्धर्तुं न शशाकेति सर्वजनोऽनन्ततनुमेवेमं कथमुन्नीयायं गत इति चेन्न । निद्रितस्त्वं तत्त्वतो यत्प्राक् तृणावर्तेन कृष्णनायकनयने नाप्राक्षीरिति । तत्राचिन्त्याद्भुतशक्तिरिति नानुयोक्ताऽहं निद्रित इति वदसि चेद्धन्त तर्ह्यत्र सस्मार रूपं निजमेव लक्ष्मण इत्युक्तेस्तत्रैव स्वस्वरूपस्मरणस्याभावाल्लाघवतः प्रलम्बबलोन्नीतिर्नीतिमतीति भवान्भवतु वेदिता ॥ २३ ॥

सुमनोरञ्जनी — कृष्णं उवाहेति विभक्तिव्यत्ययेनान्वयो द्रष्टव्यः । एवं भद्रसेनं वृषभ इत्यपि । प्रलम्बो रोहिणीसुतं राममुवाहेत्यन्वयः । तदेतत्सर्वमभिप्रेत्योक्तमाचार्यचरणैः ।

श्रीदामा कृष्णमुवाह ।
हरिवंशादि वचनविरोधात् ।
बहुमानविरोधे तु व्यत्यासः शब्दतोऽर्थतः ।
कार्योऽनिरुक्तदेवानां गुणसिध्द्यै न चान्यथा ।
विष्णुर्ब्रह्मा तथा वायुरनिरुक्ताः प्रकीर्तिताः ।
तत्पत्न्यश्चेतरगुणा व्यत्यास्यास्तेष्वसंशयः ॥ इति ब्रह्मतर्के इति ॥

उवाहेति योज्यमिति शेषः । कुत इत्यत आह ॥ हरिवंशेति । हरिवंशादीत्यादिपदेन विष्णुपुराणवचनं ग्राह्यम् । तथा हि पुराणवचनम् ।

श्रीदामानं ततः कृष्णः प्रलम्बं रोहिणीसुतः ।
जितवान् कृष्णपक्षीयैर्गोपैश्चान्ये पराजिताः ।
ते वाहयन्तस्त्वन्योन्यं भाण्डीरस्कन्धमेत्य वै ।
पुनर्निववृतुश्चैव ये ये तत्र पराजिताः ॥ इति ।

व्यत्यासेन योजनायां नियामकमप्याह ॥ बह्विति । बहुप्रमाणविरोधे प्रकृतवाक्यस्य प्राप्ते सति अनिरुक्तदेवानां गुणसिद्धिरूपप्रयोजनाय शब्दतोऽर्थतश्च शब्दे अर्थे वा उभयत्र वा व्यत्यासः कार्यः । प्रकृते तु प्रथमान्तकृष्णपदस्य द्वितीयान्तता । द्वितीयान्तश्रीदामपदस्य प्रथमान्ततेति व्यत्यासः शब्दे । अर्थतो वा वहनार्थकधातोरारोहार्थता । अनेन श्रीकृष्णः श्रीदामानमुवाह आरुरोहेत्यर्थव्यत्यासेनापि योजना स्वाभिप्रेतेत्युक्तं भवति । अस्मिन्पक्षे परेण अजितः पराजित इत्यर्थः । तर्हि प्रलंबो रोहिणीसुतमित्यत्रापि व्यत्यासः प्राप्त इति चेन्मैवम् । अनिरुक्तदेवानां गुणसिध्यर्थमेव व्यत्यासस्य कर्तव्यत्वात् । अत्र च तदभावात् ।(त वृषभं भद्रसेन इत्यत्रापि व्यत्यासो न कार्यः स्यादिति चेत् न, वृषभस्य रामपक्षीयत्वेन पराजितत्वात् वाह्यमानत्वायोगेन हरिवंशादिवचनानुसारेण व्यत्यासस्याप्राप्तत्वात्) । के तेऽनिरुक्तदेवा इत्यत आह ॥ विष्णुरिति । विष्ण्वादयः तत्पत्न्यश्च अनिरुक्ता इत्यन्वयः । तेषु अनिरुक्तेषु उच्यमाना अपि इतरेषां गुणाः पराजयादयः व्यत्यस्या एवेत्यर्थः ॥२३॥

अविषह्यं मन्यमानः कृष्णं दानवपुङ्गवः ।
वहन् द्रुततरं प्रागादवरोहणतः परम् ॥ २४ ॥

सत्यधर्मीया — ननु कृष्णो मुख्यद्विट् तं विहायोन्नीतिरलक्ष्यस्य बलस्य कुत इत्यत आह ॥ अविषह्यमिति । दानवपुङ्गवः कृष्णमविषह्यं मन्यमानो द्रुततरमतिशीघ्रमवरोहणतोऽवरुह्यते जनोऽत्रेत्यवरोहणम् । अद आसाद्यावतारयितव्योऽयमिति कॢप्तस्थानतः परं परतस्तदतिगति यावत्प्रागात् ॥ २४ ॥

सुमनोरञ्जनी — उभयजिघांसया आगतोऽपि प्रलम्बासुरः । कृष्णं अविषह्यं सोढुमशक्यं मन्यमानः राममेवावहन् । अवरोहणतः अवरुह्यतेऽस्मिन् स्थान इत्यवरोहणं मर्यादास्थानम् । ततोऽपि परं दूरम् । द्रुततरं प्रागात् ॥ २४ ॥

तमुद्वहन् धरणिधरेन्द्रगौरवं महासुरो विगतरयो निजं वपुः ।
स आस्थितः पुरटपरिच्छदो बभौ तटिद्युमानुडुपतिवाडिवाम्बुदः ॥ २५ ॥

सत्यधर्मीया — विगतरयो विगतो रयो वेगो यस्य स महासुरः, धरणिधराः पर्वतास्तेषामिन्द्रो मेर्वादिस्तस्य गौरवं यस्य स तमुद्वहत् । अनेन गतरयतायां हेतुरुक्तो भवति । निजं वपुरसुरशरीरमास्थितः । अनेन च मायिकता प्राक्तनस्यैच्छिकीति द्योत्यते । पुरटपरिच्छदोऽलङ्कारादिर्यस्य सः । अत्राम्बुदः प्रलम्ब उडुपती रामः परिच्छदास्तटित इति रूपम् । तटितो द्यौ प्रकाशस्तद्वान् उडुपतिवाट् उडुपतिं चन्द्रं वहतीति स तथा । उडुपतिमानिति पाठेऽपि स एवार्थः । वाहयतेः क्विप् । अथवा वहेश्श्वेति । अम्बुद इव बभावित्यभूतोपमा ॥ २५ ॥

सुमनोरञ्जनी — धरणिधरेन्द्रः पर्वतश्रेष्ठः । तद्वद्गौरवं यस्य तम् । रामम् । विगतं रयो वेगो यस्य सः । निजं आसुरं वपुः आस्थितः आश्रितः सन् पुरटमयाः सुवर्णमयाः परिच्छदाः अलंकाराः यस्य सः । तटिद्युमान् तटित्कान्तियुक्तोऽबुदः मेघः । उडुपतिमानिव चन्द्रवानिव बभौ ॥ २५ ॥

निरीक्ष्य तद्वपुरम्बरेचरं प्रदीप्तदृग् भ्रूकुटितटोग्रदंष्ट्रकम् ।
ज्वलच्छिखं कटककिरीटकुण्डलत्विषाऽद्भुतं हलधर ईषदत्रसत् ॥ २६ ॥

सत्यधर्मीया — तदम्बरे चरम् । अलुक् । प्रदीप्ते दृश्यौ यस्य तत् । उग्रेति भृकुटितटदंष्ट्रोभयविशेषणम् । उग्रं भृकुटितटमुग्रा दंष्ट्रा च यस्य तत् । समासान्तः कप् । आपोऽन्यतरस्यामिति ह्रस्वः । ज्वलन्ती शिखा यस्य तत् । कटककिरीटकुण्डलत्विषा चाद्भुतमाश्चर्यवहं निरीक्ष्य हलधर ईषत्कृष्णप्रबोधात्प्राक् किञ्चिदत्रसद्भीतोऽभूत् । यथोक्तं हरिवंशे ।

स सन्दिग्धमिवात्मानं मेने सङ्कर्षणस्तदा । दैत्यस्कन्धगतः श्रीमान्कृष्णं चेदमुवाच ह ।
ह्रियेऽहं कृष्ण दैत्येन पर्वतोदग्रवर्ष्मणा । तमाह सस्मितं कृष्णः साम्ना हर्षकलेन वै ।
अभिज्ञो रौहिणेयस्य वृत्तस्य च बलस्य च । अहोऽयं मानुषो भावो व्यक्तमेवानुपाल्यते ।
यस्तं जगन्मयं गुह्यं गुह्याद्गुह्यतरं गतः । स्मर नारायणात्मानं लोकानां त्वं विपर्ययः ॥

इत्यारभ्य संस्मारितस्तु कृष्णेन रौहिणेयः पुरातनम् । बलेनापूर्य तदा त्रैलोक्यान्तरचारिण इत्यन्तेन ग्रन्थेन ॥ २६ ॥

सुमनोरञ्जनी — हलधरः । तस्य प्रलंबासुरस्य वपुः निरीक्ष्य । ईषत् किञ्चित् । अत्रसत् भीतो बभूवेति सम्बन्धः । अनन्तरं श्रीकृष्णं अस्तुवदिति शेषः । कीदृशं वपुः । प्रदीप्ते उज्वले दृशौ, भ्रुकुटितटे, उग्रे दंष्ट्रे च यस्मिन् तत् । उज्ज्वलंत्यः शिखाः केशपाशा यस्मिन् । कटकयोः वलययोः, किरीटस्य कुंडलयोश्च त्विषा दीप्त्या । अद्भुतं विस्मयकरम् ॥ २६ ॥

अथागतस्मृतिरभयो रिपुं बलो विहायसोर्ध्वं च हरन्तमात्मनः ।
रुषाऽहनच्छिरसि दृढेन मुष्टिना सुराधिपो गिरिमिव वज्ररंहसा ॥ २७ ॥

सत्यधर्मीया — आगता स्मृतिर्यस्य स तथा । सस्मार रूपं निजमेव लक्ष्मण इत्यादे-र्लक्ष्मणवत् । अभयो बलो विहायसोर्ध्वमात्मन आत्मानं हरन्तं रिपुमात्मनो दृढेन मुष्टिना वज्ररंहसा वज्रवेगेन सुराधिप इन्द्रो गिरिमिव रुषाऽहनदहन् । सबहुव्रीहिः, सद्वज्ररंहसेति मुष्टिविशेषणं च । अथेन निरन्नेन । अन्नं थमिति हि श्रुतिः । अनश्नन्न्यः । अन्यो निरन्नोऽपि बलेन भूयानित्यादेः ।

कृष्णेनागता तद्बोधनेनेति यावत् स्मृतिर्यस्य स इति वा । अथ एनागता स्मृतिर्यस्य इति वा । अकारो वासुदेवः स्यादित्यादेः ॥ २७ ॥

सुमनोरञ्जनी — अथ श्रीकृष्णस्तवानन्तरम् । कृष्णेन बोधितो रामः । आगता स्मृतिः स्वस्य शुक्लकेशाविष्टतास्मृतिर्यस्य स तथोक्त इत्यर्थः । तदुक्तं भारततात्पर्ये ।

भीतेन रोहिणिसुतेन हरिस्तुतोऽसौ स्वाविष्टतामुपदिदेश बलाभिपूर्त्यै ।
तेनैव पूरितबलोऽम्बरचारिणं तं पापं प्रलंबमुरुमुष्टिहतं चकार ॥ इति ।

अभयः भयरहितः सन् । आत्मनः आत्मानम् । ऊर्ध्वं च ऊर्ध्वमेव हरंतं नयन्तम् । सुराधिपः इन्द्रः । वज्ररंहसा वज्रवेगेन । गिरिमिव । वज्रवेगेन मुष्टिनेति वा ॥ २७ ॥

स आहतः सपदि विशीर्णशीर्षको
मुखाद् वमन् रुधिरमपस्मृतोऽसुरः ।
महारवं व्यसुरपतत् समीरयन्
गिरिर्यथा मघवत आयुधाहतः ॥ २८ ॥

सत्यधर्मीया — सपद्याहतो विशीर्णं शीर्षं यस्य स मुखाद्रुधिरं वमन्नुद्गिरन्नपस्मृतोऽपगतं स्मृतं स्मृतिः । भावे क्तः । यस्य सः । महारवमन्तकालिकं समीरयन्व्यसुर्मघवत इन्द्रस्यायुधं वज्रं तेनाहतो गिरिर्यथा तथाऽपतत् ॥ २८ ॥

सुमनोरञ्जनी — विशीर्णशीर्षकः विस्फुटितशिरस्कः । अपगतं स्मृतं स्मरणं यस्य सः । महारवं समीरयन् । व्यसुः विगताः असवो यस्यासौ तथाविधः । मघवतः इन्द्रस्य । आयुधेन वज्रेण आहतो यथा गिरिः ॥ २८ ॥

दृष्ट्वा प्रलम्बं निहतं बलेन बलशालिना ।
गोपाः सुविस्मिता आसन् साधु साध्विति राविणः ॥ २९ ॥

सत्यधर्मीया — रावो येषामस्तीति ते तथा ॥ २९ ॥

सुमनोरञ्जनी — साधु साध्विति राविणः वादिनः ॥ २९ ॥

आशिषोऽभिगृणन्तस्ते प्रशशंसुस्तदर्हणम् ।
प्रेत्यागतमिवालिङ्ग्य प्रेमविह्वलचेतसः ॥ ३० ॥

सत्यधर्मीया — तदर्हणं तद्योग्यं प्रेम्णाऽऽलिङ्गन्याशिषोऽभिगृणन्तः प्रशशंसुस्तुष्टुवुः । प्रेत्य गत्वाऽऽगतमिवेति ॥ ३० ॥

सुमनोरञ्जनी — तस्याः प्रशंसायाः अर्हणं अर्हम् । तस्य रामस्य अर्हणं अर्हं योग्यतां प्रशशंसुरिति वा । प्रेम्णा विह्वलं विवशीकृतं चेतो येषां ते ॥ ३० ॥

पापे प्रलम्बे निहते देवाः परमनिर्वृताः ।
अभ्यवर्षन् बलं माल्यैः शशंसुः साधु साध्विति ॥ ३१ ॥

इति श्रीमद्भागवते दशमस्कन्धे षोडशोऽध्यायः ॥

सत्यधर्मीया — यद्भयात्प्राक् परं अनिर्वृतास्ते देवा इदानीं परमनिर्वृता इत्यावृत्त्याऽन्वयः । माल्यैः प्रसूनैः ॥ ३१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे षोडशोऽध्यायः ॥ १०-१६ ॥

सुमनोरञ्जनी — परमनिर्वृताः अतीव सन्तुष्टाः । माल्यैः पुष्पैः ॥ ३१ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां षोडशोऽध्यायः ॥ १०-१६ ॥

अथ सप्तदशोऽध्यायः

श्रीशुक उवाच—

क्रीडासक्तेषु गोपेषु तद्गावो दूरचारिणीः ।
स्वैरं चरन्त्यो विविशुस्तृणलोभेन गह्वरम् ॥ १ ॥

सत्यधर्मीया — तद्गावस्तदित्यव्ययम् । दूरचारिणीर्दूरचारिण्यो गह्वरमरण्यानीम् ॥ १ ॥

सुमनोरञ्जनी — श्रीहरिः स्वचरणारविन्दैकशरणानां भवदवानलदलनं स्वयं करिष्यतीति ज्ञापयितुं परितः परिदह्यमानदावदहनाद्गोपरक्षणलक्षणं भगवतो माहात्म्यं निरूपयत्यस्मिन्नध्याये ॥

क्रीडासक्तेषु सत्सु । तेषां गावः । दूरचारिणीः दूरचारिण्यः । स्वैरं यथेच्छम् । गह्वरं अरण्यम् । गहनं काननं वनमित्यमरः ॥ १ ॥

अजा गावो महिष्यश्च निर्विशन्त्यो वनाद् वनम् ।
मुञ्जाटवीं निविविशुः क्रन्दन्त्यो दावतर्षिताः ॥ २ ॥

सत्यधर्मीया — वनाद्वनं परम्परा अजा गावो महिष्यश्च निर्विशन्त्यो मुञ्जाटवीमीषिकाकाननं दावतर्षिता दावेन तापेन तर्षितास्तृष्णायुताः क्रन्दन्त्यो निविविशुर्निविवेशिरे । निर्विविशुरिति पाठस्त्वक्केशिष्ठः । शरो मुञ्ज इतीरित इति हलः ॥ २ ॥

सुमनोरञ्जनी — मुंजः अत्युच्छ्रितस्तृणविशेषः शरो वा । शरो मुंज इतीरित इति हलायुधः । दावेन तापेन तर्षिताः । तर्षा जलाकांक्षा आसां संजातेति तथोक्ताः । तृषार्ता इति यावत् ॥ २ ॥

तेऽपश्यन्तः पशून् गोपाः कृष्णरामादयस्तदा ।
जातानुतापा न विदुर्विचिन्वन्तो गवां गतिम् ॥ ३ ॥

सत्यधर्मीया — कृष्णरामादयो गोपास्ते पशूनपश्यन्तोऽनवलोकमाना गावश्च गावश्च गावस्तासाम् । ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्रीति स्त्र्येकशेषः । गवां गतिं तत्स्थानं विचिन्वन्तो न विदुर्यदा तदा जातानुतापा जातोऽनुतापो किं लीलालसैरुपेक्षिताः पशव इति तापो येषां ते तथा बभूवुः ॥ ३ ॥

सुमनोरञ्जनी — तदा ते क्रीडासक्ताः । हेतुगर्भविशेषणमिदम् । कृष्णरामादयो गोपाः । अतद्गुणसंविज्ञानोऽयम् । पशूनपश्यन्तः । जातः अनुतापो येषां ते तथोक्ताः । गवां गतिं मार्गम् । विचिन्वन्तः अन्वेषयन्तः ॥ ३ ॥

तृणैस्तत्खुरदच्छिन्नैर्गोष्पदैरङ्कितैर्गवाम् ।
मार्गमन्वगमन् सर्वे नष्टाजीव्या विचेतसः ॥ ४ ॥

सत्यधर्मीया — तासां खुरैर्दद्भिर्दन्तैश्छिन्नैस्तृणैरङ्कितैर्गोष्पदैः । गोष्पदं सेवितासेवितप्रमाणेष्विति निपातितः शब्दः । सर्वेऽपि गवां मार्गेऽन्वगमन् । नष्टाजीव्या इति पाङ्कः पाठः । आजीव्यं जीविका तन्नष्टं येषां ते तथा नष्टस्वजीवनोपाया इति यावत् । नष्टजीवा इति पक्षे मृतकप्रतीका इत्यर्थः। विचेतसो विमनस्काः ॥ ४ ॥

सुमनोरञ्जनी — तेषां पशूनां खुरैः । दद्भिः दन्तैश्च । च्छिन्नैः निकृन्तैः । गोष्पदैः अङ्कितैश्च तृणैः । इत्थंभूतलक्षणे तृतीया । गवां मार्गं ज्ञात्वा । अन्वगमन् । नष्टः अदर्शनं गतः । नश् अदर्शन इति धातोः । जीवो जीवनभूतं गोधनं येषां ते । अत एव विचेतसः विमनस्काः । वौ परमात्मनि चेतो येषामिति रत्नावल्याम् ॥ ४ ॥

मुञ्जाटव्यां भ्रष्टमार्गं क्रन्दमानाः स्वगोधनम् ।
अप्राप्य तृषिताः श्रान्तास्ततस्ते सन्न्यवर्तयन् ॥ ५ ॥

सत्यधर्मीया — भ्रष्टोऽज्ञातो मार्गो यस्य तद्गोधनम् । मुञ्जाटवीत्यनेन मुञ्जापुञ्जिता महीति खुराद्यनङ्कितता तस्य द्योत्यते । अप्राप्य श्रान्तास्ततो गतमार्गत एव सन्न्यवर्तयन्प्रत्यागन्तुकामा अभवन्नित्यर्थः । मनः सन्न्यवर्तयन्निति वा ॥ ५ ॥

सुमनोरञ्जनी — भ्रष्टः त्यक्तः मार्गो येन तत् । गोधनमुद्दिश्य क्रन्दमानाः क्रोशमानाः । स्वगोधनं अप्राप्य श्रान्ताः । अत एव तृषिताः । सन्न्यवर्तयन् । स्वसमुदायमिति शेषः ॥ ५ ॥

ता आहूता भगवता मेघगम्भीरया गिरा ।
स्वनाम्ना निनदं श्रुत्वा प्रतिनेदुः प्रहर्षिताः ॥ ६ ॥

सत्यधर्मीया — आहूतास्ता गावो भगवता कर्त्रा मेघगम्भीरया गिरा करणेन स्वनाम्ना श्रीनिकेतनसङ्केतितस्वनाम्ना निनदम् । वैशिष्ट्ये तृतीयार्थः । नामसमेतं निनदं श्रुत्वा प्रहर्षिताः प्रतिनेदुर्हम्भावं चक्रुः ॥ ६ ॥

सुमनोरञ्जनी — भगवता श्रीकृष्णेन स्वनाम्ना गङ्गायमुनेत्यादिना गोषु संकेतितनाम्ना । आहूताः। निनदं श्रीकृष्णस्याह्वानशब्दम् । श्रुत्वा प्रहर्षिताः सत्यः । प्रतिनेदुः प्रतिध्वनिं चक्रुः ॥ ६ ॥

ततः समन्ताद् वनधूमकेतुर्यदृच्छयाऽभूत् क्षयकृद् वनौकसाम् ।
समीरितः सारथिनोल्बणोल्मुकैर्विलेलिहानः स्थिरजङ्गमान् महान् ॥ ७ ॥

सत्यधर्मीया — वनौकसां पक्षिवृक्षादीनां क्षयकृन्नाशकरो यदृच्छया वनधूमकेतुर्वनानलो यस्ततस्तेन गतं सारथिना वायुना समीरितः प्रेरितो वर्धित इति यावत् । अत्रोल्मुकशब्दो ज्वालापरः । उल्बणैरुल्मुकैर्ज्वालाभिः स्थिरजङ्गमान्विलेलिहान आस्वादयन्निवाभूत् प्रससर्पेति भावः ॥ ७ ॥

सुमनोरञ्जनी — वनधूमकेतुः दावाग्निः । सारथिना वायुना । समीरितः प्रज्वलितः । उल्बणैः क्रूरैः । उल्मुकैः ज्वालाभिः उल्कैर्वा विलेलिहानः आस्वादयन् । स्पृशन्निति यावत् ॥ ७ ॥

तमापतन्तं परितो दवाग्निं गोपाश्च गावः प्रसमीक्ष्य भीताः ।
ऊचुः स्म कृष्णं सबलं प्रपन्ना यथा हरिं मृत्युभयार्दिता जनाः ॥ ८ ॥

सत्यधर्मीया — गोपाश्च गावश्च परित आपतन्तं तं दवाग्निं प्रसमीक्ष्य भीताः । भयं तूभयेषां सबलं कृष्णं प्रपन्ना अतिप्रह्वा ऊचुः । मृत्युभयार्दिता जना हरिं यथोचुरिति गोपमात्रान्वयि ॥ ८ ॥

सुमनोरञ्जनी — परितः समन्तात् आपतन्तम् । मृत्युभयेन अर्दिताः पीडिताः जनाः यथा हरिं प्रपन्ना भवन्ति तथा कृष्णं प्रपन्नाः शरणं गताः सन्तः ऊचुः ॥ ८ ॥

कृष्णकृष्ण महावीर्य हे रामामोघविक्रम ।
दावाग्निना दह्यमानान् प्रपन्नांस्त्रातुमर्हथः ॥ ९ ॥

सत्यधर्मीया — प्रपन्नान् शरणागतान् ॥ ९ ॥

सुमनोरञ्जनी — महत् वीर्यं यस्यासौ । अमोघः फलपर्यवसायी विक्रमः पराक्रमो यस्य सः अमोघविक्रमः । एतादृशौ युवाम् । दावाग्निना दह्यमानान् । प्रपन्नान् नः त्रातुं रक्षितुम् । अर्हथः योग्यौ स्वः ॥ ९ ॥

नूनं त्वद्बान्धवाः कृष्ण न चार्हन्त्यवसीदितुम् ।
वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणाः ॥ १० ॥

सत्यधर्मीया — समान्याग्रज इति सह कृष्णो न बलमिदं दवकवलनमेकसाध्यमिति कृष्णमेकं प्रति वदन्ति ॥ नूनमिति । त्वं बान्धवो येषां ते तथा त्वन्नाथास्त्वद्याचकास्त्वत्परायणा-स्त्वद्रूपमुख्यगतिकाः ॥ १० ॥

सुमनोरञ्जनी — अवसीदितुं क्लेशयितुम् । न मे भक्तः प्रणश्यति । अनन्याश्चिन्तयन्त इति वचनादिति भावः । अनन्यत्वादिकमेव कथं भवत्स्विति तत्राह ॥ वयमिति । सर्वधर्मान् प्रपन्नपालनाद्यखिलधर्मान् जानातीति तथोक्तः । त्वमेव नाथो याचनीयो नान्यः येषां ते तथोक्ताः । त्वत्परायणाः त्वय्यासक्ताः । त्वयि भक्तिमन्त इति यावत् । त्वमेव परायणं मुख्याश्रयो येषामिति वा ॥ १० ॥

श्रीशुक उवाच—

वचो निशम्य कृपणं बन्धूनां भगवान् हरिः ।
निमीलयत मा भैष्ट लोचनानीत्यभाषत ॥ ११ ॥

सत्यधर्मीया — कृपणं दीनं वचो निशम्य लोचनानि निमीलयत मा भैष्ट चेत्यभाषत ।। ११ ।।

सुमनोरञ्जनी — मा भैष्ट । लोचनानि निमीलयतेत्यभाषत ।। ११ ।।

तथेति मीलिताक्षेषु भगवानग्निमुल्बणम् ।
पीत्वा मुखेन तान् कृच्छ्राद् योगाधीशो व्यमोचयत् ।। १२ ।।

सत्यधर्मीया — तथेत्युक्त्वा मीलिताक्षेषु सत्सु गोपेषु भगवानुल्बणमग्निं मुखेन पीत्वा तान्कृच्छ्राद्व्यमोचयत् । मुखे पीत्वा नतान् व्यमोचयदिति वा । करादिना शमनं दमनसोऽविधाय मुखपानं कुर्वञ्जनकजन्ययोर्मेलनेन स्वस्यैव तयोरपि तोषविशेषं ध्वनयामासेति ज्ञेयम् । मुखादिन्द्रश्चाग्निश्च ।

स्तुवन्तु सर्वे वनवह्निपानकृतानुभावं न वयं मुरारेः ।
स्वजन्मभूमिं शिखिनि प्रविष्टे क ईशितुस्तेन कृतोऽनुभावः ।।

इत्यादेः । एतत्सम्भावकमाह ।। योगाधीश इति ।। १२ ।।

सुमनोरञ्जनी — तथेत्युत्का मीलिताक्षेषु सत्सु । तान् गोगोपालान् । कृच्छ्रात् कष्टात् व्यमोचयत् मोचितवान् ।। १२ ।।

ततश्च तेऽक्षीण्युन्मील्य पुनर्भाण्डीरमाश्रिताः ।
निशाम्य विस्मिता आसन्नात्मानं गाश्च मोचिताः ।। १३ ।।

सत्यधर्मीया — तत्र निमीलिताक्षाः पुनस्तदुन्मील्य विलोकमाना भाण्डीरं वटमाश्रिता आत्मानं मोचितं गाश्च मोचिता निशाम्य विस्मिता आसन् ।। १३ ।।

सुमनोरञ्जनी — ततो गोपाः अक्षीणि उन्मील्य उन्मीलनसमकालम् । मुखं व्यादाय स्वपितीतिवत् । भाण्डीरं तन्नामकवटवृक्षम् । आश्रिताः आसन्नाः । यद्वा पुनः तत्क्षण एव । कृष्णेन ते गोपाः । भाण्डीरं आश्रिताः कृताः । ततश्च तदनन्तरम् । नेत्राण्युन्मील्य । आत्मानं जात्यैकवचनम् । स्वात्मानः गाश्च मोचिताः । चशब्दात् तत्क्षण एव भाण्डीरप्राप्तिं च निशाम्य दृष्ट्वा । विस्मिता आसन्नित्यन्वयः ।। १३ ।।

कृष्णस्य योगवीर्यं तद् योगमायानुभावितम् ।
दावाग्नेरात्मनः क्षेमं वीक्ष्य तं मेनिरेऽमरम् ।। १४ ।।

सत्यधर्मीया — तस्य योगवीर्यं योगसामर्थ्यं वीक्ष्य दावाग्नेरात्मनो गवां च क्षेमं वीक्ष्य तं कृष्णं योगमायानुभावितं योगमायायाः स्वरूपसामर्थ्यस्यानुभावोऽस्य सञ्जात इति स तथा तममरं श्रीनारायणं मेनिरे । उन्मील्य विस्मिता इति वाऽन्वयः ॥ १४ ॥

सुमनोरञ्जनी — योगमायया स्वेच्छया अनुभावितं प्रज्ञापितम् । ज्ञानिनः प्रतीति शेषः । योगवीर्यं आत्ममोक्षणोपायभूतं स्वरूपसामर्थ्यं, किं तत् । दावाग्नेः आत्मनः क्षेमं अभयकारणं वीक्ष्य तं श्रीकृष्णम् । चतुर्विधमरत्वादित्वाद्विरहितम् । श्रीहरिं मेनिरे ॥ १४ ॥

गाः सन्निवर्त्य सायाह्ने सहरामो जनार्दनः ।
वेणुं विरणयन् गोष्ठमगाद् गोपैरभिष्टुतः ॥ १५ ॥

सत्यधर्मीया — सायाह्ने सायं समय आसन्ने ॥ १५ ॥

सुमनोरञ्जनी — सन्निवर्त्य निवर्तयित्वा । वेणुं विरणयन् विविधं वादयन् ॥ १५ ॥

गोपीनां परमानन्द आसीद् गोविन्ददर्शने ।
क्षणं यथा युगशतं यासां येन विनाऽभवत् ॥ १६ ॥

सत्यधर्मीया — येन विना यासां क्षणम् । क्षणलिङ्गमशिष्यमिति भाष्यात् । यथा युगशतं तथाऽभवत् । विना विः पक्षिपरमात्मनोरिति तेन सहितानां यासां युगशतं यथा क्षणस्तथाऽभवदिति वाऽन्वयः ॥ १६ ॥

सुमनोरञ्जनी — येन गोविन्ददर्शनेन विना । क्षणं क्षणपर्यन्तं क्षणात्मकः कालो वा युगशतं यथा युगशततुल्यः आसीत् ॥ १६ ॥

तयोस्तदद्भुतं कर्म दावाग्नेर्मोक्षमात्मनः ।
गोपाः स्त्रीभ्यः समाचख्युः प्रलम्बवधमेव च ॥ १७ ॥

सत्यधर्मीया — मोक्षं तद्रूपम् । गोपा एव स्त्रीभ्यः स्वस्वयोषिद्भ्यः समाचख्युरपृष्टाः स्वयमित्येवार्थः ॥ १७ ॥

सुमनोरञ्जनी — गोपाः आत्मनो दावाग्नेः मोक्षः प्रलम्बवधश्चेत्येतत् द्वयं तयोः रामकृष्णयोः । कर्म । स्त्रीभ्यः उपलक्षणमेतत् । वृद्धेभ्यश्च ॥ १७ ॥

गोपवृद्धाश्च गोप्यश्च तदुपाकर्ण्य विस्मिताः ।
मेनिरे देवप्रवरौ कृष्णरामौ व्रजं गतौ ॥ १८ ॥

इति श्रीमद्भागवते दशमस्कन्धे सप्तदशोऽध्यायः ।

सत्यधर्मीया — रामकृष्णौ देवप्रवरौ मेनिरे । प्रेपरतोवलघुता द्वन्द्वेऽप्रथमोद्दिष्टस्य सावधिकप्रवरतां ध्वनयति । प्रह्वे इति पिङ्गलनागोक्तेः । तन्मुख्यं ज्ञानशब्दयोरितिवद्वा ज्ञेया ॥१८॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे सप्तदशोऽध्यायः ॥ १०-१७ ॥

सुमनोरञ्जनी — देवप्रवरौ कृष्णरामौ भूत्वा व्रजं गताविति मेनिरे । कृष्णरामौ देवप्रवराविति मेनिर इति वा ॥ १८ ॥

योगः प्रचण्डदावाग्निं पीत्वा कृत्स्नादमूमुचः ।
तस्य ते मम दारिद्र्यदावाग्निदलनं कियत् ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां सप्तदशोऽध्यायः ॥ १०-१७ ॥

अथ अष्टादशोऽध्यायः ॥

श्रीशुक उवाच—

ततः प्रावर्तत प्रावृट् सर्वसत्वसमुद्भवा ।
विद्योतमानपरिधिर्विस्फूर्जितनभःस्थला ॥ १ ॥

सत्यधर्मीया — ॥ व्यासोच्छिष्टमिदं जगदित्यादेरेतदध्याये वैदिकावैदिकनिदर्शनप्रदर्शनेन प्रावृट्ऋतुवर्णनापदेशेन कवीनां सरससरणीं करुणातो दर्शयति व्यास इति वक्ति ॥ श्रीशुक इति । ततो ग्रीष्मर्तुगमनानन्तरं सर्वसत्त्वानां नानाविधस्थावरजङ्गमानां समुद्भव उत्पत्तिर्यस्यां सा । विद्योतमानाः प्रकाशमानाः परिधयः परिवेषा यस्यां सा । विशेषेण स्फूर्जितमशनिध्वनिर्यस्मिंस्तन्नभःस्थलं यस्यां सा प्रावृट् वर्षर्तुः प्रावर्तत ॥ १ ॥

सुमनोरञ्जनी — प्रावृडृतुवर्णनव्याजेन मुमुक्षुभिः सारासारविवेकिभिर्भवितव्यमिति शिक्षयत्यस्मिन्नध्याये । सर्वेषां सत्वानां प्राणिनां समुद्भवो यस्याम् । विद्योतमानाः प्रकाशमानाः परिधयः परिवेषाः चन्द्रसूर्ययोर्यस्यां सा । विस्फूर्जितं मेघगर्जनोपेतं नभःस्थलं यस्याम् ॥ १ ॥

सान्द्रनीलाम्बुदैर्व्योम सविद्युत्स्तनयित्नुभिः ।
अस्पष्टज्योतिराच्छन्नं ब्रह्मेव सगुणं बभौ ॥ २ ॥

सत्यधर्मीया — सविद्युत्स्तनयित्नुभिः । अत्र विद्युतश्च स्तनयित्नुः शब्दश्च तत्सहितैः । स्तनयित्नुः पयोवाहे तधूध्वनाविति विश्वः । सान्द्रा जलेन नीलाम्बुदा नीलमेघास्तैराच्छन्नं नभोऽत एवास्पष्टं ज्योतिर्यस्मिन्सूर्यादिस्तत् । सूर्यो ज्योतिरुत्तरमित्यादेः । व्योम सगुणं ब्रह्म नारायणाख्यं दुर्मतजलदैराच्छन्नमस्पष्टज्योतिरनभिव्यञ्जितस्वज्ञानं तथा बभौ । कार्यब्रह्म चतुर्मुखाख्यमिति वेति पूर्वे । हरिस्तु निर्गुणं ब्रह्म श्रीर्ब्रह्म सगुणं स्मृतेति तृतीयतात्पर्योक्ते रमा च ॥ २ ॥

सुमनोरञ्जनी — सान्द्रैः जलपूर्णैः अत एव नीलैः अम्बुदैः । विद्युता तटिता, स्तनयित्नुना अशनिना च सहितैः । विद्युद्गर्जनसहितैर्वा । आच्छन्नम् । तत एवास्पष्टं ज्योतिः सूर्यादिज्योतिर्मण्डलं व्योम । अविद्याच्छन्नं अस्पष्टं ज्योतिः स्वरूपभूतं तेजो यस्य । तथाविधं सगुणं सत्वादिगुणबद्धम् । ब्रह्म जीवाख्यम् । बृहजीवजातीत्यादिधातोः ॥ २ ॥

अष्टौ मासान् निपीतं यद् भूम्यामुदमयं वसु ।
स्वगोभिर्मोक्तुमारेभे पर्जन्यः काल आगते ॥ ३ ॥

सत्यधर्मीया — यद्भूम्यास्तद्गतमुदमयम् । स्वतन्त्रोऽयमुदकवाच्युदशब्दः । तदात्मकं वसु धनं स्वगोभिरार्जनविसर्जनकरणमित्युभयान्वयि । स्वगोभिः स्वकिरणैरष्टौ मासान्निपीतम् । कालाध्वनोरत्यन्तसंयोग इति द्वितीया । पर्जन्यः परस्य सस्यादेर्जननाद्यथायोग्यतममत्र सूर्यः । काल आगते सति तद्वस्तु मोक्तुमारेभे आरब्धवान् । आदित्याज्जायते वृष्टिरित्यादेः । अत्र पर्जन्यः परैः शत्रुभिर्जन्यं युद्धं येन सोऽथवा परे जन्योत्तरत्रोत्पत्स्यमाना येन सः । अनेनेदानीं मृधे मारिता येनेति यावत् काले ज्ञानवत्यागते सत्यष्टौ मासान्निपीतं नाम सङ्गृहीतं वसु धनं मोक्तुं दातुं यथाऽऽरभते तथेति शत्रुजिद्राजनिदर्शनमत्रेति ज्ञेयम् । पूर्वत्रोत्तरत्र च निदर्शनप्रदर्शनानुगुण्यात् । अन्यथा ततः प्रावर्तत प्रावृडित्यनेनैवाष्टौ मासान्निपीतमित्यनेन च काललाभात्काल आगत इत्यवक्तव्यं स्यात् । वसुशब्दस्वारस्याच्च । जननात्परसस्यादेः पर्जन्यो मेघसन्ततिरिति गीतातात्पर्योक्तेः । पृषोदरादित्वाद्रेफाकारलोपः । पर्जन्य इत्युणादिनिपातितः । पर्जन्य इवेन्द्र इवेति वा

रवेर्वासवनिदर्शनमिति वा । पर्जन्यो वासवे गर्जदभ्रे जीमूतनि:स्वन इति शब्दरत्नाकरोक्तेः । पर्जन्यो मेघनिर्घोषे वासवे गर्जदम्बद नानार्थरत्नमालायां च । पर्जन्यो मेघशब्दे स्याद्ध्वनदम्बुदशक्रयोरिति विश्वः ॥ ३ ॥

सुमनोरञ्जनी — पर्जन्यो मेघसन्ततिः । जननात्परसस्यादेः पर्जन्यो मेघसन्ततिरिति गीतातात्पर्योक्तनारदीयवचनात् । तदभिमानी सूर्यः । मेघचक्राभिमानी च पर्जन्य इति गीताभाष्यात् । काले प्रावृट्काले आगते सति । पुनः स्वगोभिर्मोक्तुमारेभे । वसुपदप्रयोगेण पर्जन्यस्य राजसाम्यं सूचितम् । प्रजाभ्यः करात्मना गृहीतमेव वसु पुनः कालविशेषे प्रजाभ्य एव प्रयच्छन्ति हि राजान इति ॥ ३ ॥

तटित्वन्तो महामेघाश्चण्डश्वसनवेपिताः ।
प्राणिनां जीवनं ह्यम्बु मुमुचुः करुणा इव ॥ ४ ॥

सत्यधर्मीया — तटित्वन्तस्तटितो येषां सन्तीति सौदामिनीयुक्ततामात्रबोधकः । झञ् इति मो वत्वं तसाविति भसंज्ञेति न जश्त्वम् । चण्डश्वसनेन वेपिताः कम्पिता महामेघाः प्राणिनामम्बु मुमुचुः । करुणाः करुणयन्तीति करुणाः कृपावन्तः प्राणिनां कृच्छ्रजीविनां जीवनं जीवयन्तीति जीवनं ज्ञानमिव पर्जन्य इवेति वा सोऽपि दातोदकस्य करुणा अम्बु भक्तिमिवेति, अम्बुवदग्रहणादिति व्याख्यायां तत्त्वप्रदीपकाख्यायां स्नेहात्मकत्वादम्बुनस्तेन मानसं स्नेहं लक्षयतीत्युक्तेरम्बुपदं स्नेहपदलक्षकं तेन च भक्तिर्लभ्यते मानसिकस्नेहरूपिणीति युक्तमम्बुदपदेन भक्तिग्रहणम् । जीवनं भुवनं वनमित्युक्तेरेतत्पक्षे जीवनमुदकम् ॥ ४ ॥

सुमनोरञ्जनी — चण्डश्वसनेन वायुना वेपिताः कम्पिता अपि तटित्वन्तः । अनेन तेजस्विता ध्वनिता । प्राणिनां जीवनप्रदं अम्बु मुमुचुः । करुणा इव दयालव इव । लोके हि दयालवः तत्रापि तेजस्विनो जनाः स्वयं अन्यैः उपद्रुता अपि दीनजनार्थे स्वजीवनमप्युत्सृजन्ति ॥ ४ ॥

तपःकृशा देवमीढा आसीद् वर्षीयसी मही ।
यथैव काम्यतपसस्तनुः सम्प्राप्य तत्फलम् ॥ ५ ॥

सत्यधर्मीया — तपःकृशा ग्रीष्मोष्मकृशा देवमीढा देवेन्द्रेण सवित्रा मीढा सिक्ता मही वर्षीयस्यतिवृद्धियुताऽऽसीत् । इदमस्थिरमित्यनुरूपं निदर्शनं निरूपयति ॥ यथैवेति । काम्यतपसः पुंसः फलमुद्दिश्य तपः कुर्वतस्तनुस्तत्फलं तत्कर्मफलं सम्प्राप्य वर्षीयसी भवति तथेति ॥ ५ ॥

सुमनोरञ्जनी — तपसा ग्रीष्मेण कृशा मही । देवेन पर्जन्येन मीढा सिक्ता सती । वर्षीयसी पुष्टा । आसीत् । काम्यं तपो यस्य तस्य पुंसः । तनुः शरीरम् । तत्फलं काम्यतपःफलं संपदादिकं प्राप्य यथा वर्धते तथेति ॥ ५ ॥

निशामुखेषु खद्योतास्तमसा भान्ति न ग्रहाः ।
यथा पापेन पाखण्डा न हि वेदाः कलौ युगे ॥ ६ ॥

सत्यधर्मीया — निशामुखेषु प्रदोषेषु सन्ध्यास्विति यावत् । तमसा कारणेन ग्रहा आदित्यादयो न भान्ति । तर्हि के भान्तीत्यत आह ॥ खद्योता इति । खद्योतो ज्योतिरिङ्गण इत्यमरः । यथा पापेनानुष्ठितदुष्कर्मणा कलौ युगे वेदा न हि भान्ति भान्ति च पाखण्डाः पाषण्डिनः । ते च चतुर्थस्कन्धे, भृगुः प्रत्यसृजच्छापं ब्रह्मदण्डं दुरत्ययमित्यारभ्य सेतुविदारणं पुंसामतः पाखण्डमाश्रिताः इत्यन्तेन कथिताः । तानि पापस्य खण्डानि लिङ्गम् । लिङ्गं खण्डमित्युक्तेश्च । वर्णस्य लोप इत्युक्तेश्च नामैकदेशग्रहणेन वा । पानां पापानां खण्डानि लिङ्गानि येषामिति निरुक्तिर्ज्ञेया ॥ ६ ॥

सुमनोरञ्जनी — निशामुखेषु प्रदोषसमयेषु । ग्रहाः चन्द्रादयः । तमसा प्रतिबन्धकेन । न भान्ति किन्तु खद्योता एव भान्ति । यथा कलौ युगे पापेन निमित्तेन । पाखण्डाः बौद्धपाशुपताद्याः भान्ति न वेदाः तथेति । अनेन कलियुगस्वभावो दर्शितः ॥ ६ ॥

श्रुत्वा पर्जन्यनिनदं मण्डूका व्यसृजन् गिरः ।
तूष्णीं शयानाः प्राग् यद्वद् ब्राह्मणा नियमात्यये ॥ ७ ॥

सत्यधर्मीया — पर्जन्यानां निनादं श्रुत्वा मण्डूका भेका गिरो नानाविधध्वनीन्व्यसृजन् । तेषामनिमिषानुग्रहाच्छब्दवैचित्र्यम् । यथोक्तं शान्तिपर्वण्यग्निमार्गणप्रस्तावे । अग्निशापादजिह्वापि रसज्ञाने बहिष्कृताः । सरस्वतीं बहुविधां यूयमुच्चारयिष्यथ । देवास्त्वनुग्रहं चक्रुर्मण्डूकानां भृगूत्तमेति । प्राक् ते कथम्भूता इत्यत आह ॥ तूष्णीं शयाना इति । क इवेत्यतोऽप्याह ॥ शयानाः शूद्रा यद्वदिति । ते यथा तूष्णीकास्तथेति । यथोक्तमेकादशतात्पर्ये । त्रैवर्णिकः सञ्चरस्तु वेदमार्गप्रवर्तनात् । अतत्प्रवर्तनादेव शयानः शूद्र उच्यत इति । यथा प्राक् गुर्वाज्ञाकरणात्पूर्वं शयानाः शिष्या नियमात्यये गुर्वाज्ञायां छात्रेण वर्तितव्यमिति नियमस्यात्यये प्रसक्ते आकारणे कृतेऽनुत्थाने नियमात्ययः प्रसक्तस्तस्मिन्सति गिरो विसृजन्ति स्वामिन्नायास्याम इति तथेति । एवमन्वये निनादं श्रुत्वा गिरो व्यसृजन्नित्येतद्दार्ष्टान्तिकसमग्रानुरूपता दृष्टान्तस्य भवतीति मन्तव्यम् । नियमात्यये गुरुमौनातिक्रमे तन्निनदं श्रुत्वा ब्राह्मणा वेदाध्ययनशीलाः शिष्या गिरो वेदवाणीर्विसृजन्ति तथेति वा ॥ ७ ॥

सुमनोरञ्जनी — प्राक् तूष्णीं शयानाः मण्डूकाः । पर्जन्यस्य निनदं गर्जनं श्रुत्वा व्यसृजन् शब्दमकुर्वन् । यथा ब्राह्मणाः नियमस्य जपादिनियमस्य अत्यये समाप्तौ सत्यां गिरो वचनानि स्वाध्यायादिरूपाणि विसृजन्ति उच्चरन्ति तथेति । अनेन जपादिनियमे मौनेन भाव्यमिति सूचितम् ॥ ॥ ७ ॥

आसन्नुत्पथवाहिन्यः क्षुद्रनद्योऽनुशुष्यतीः ।
पुंसो यथाऽस्वतन्त्रस्य देहो द्रविणसम्पदा ॥ ८ ॥

सत्यधर्मीया — अनुशुष्यन्त्यो ग्रीष्मे, क्षुद्रनद्यः स्वल्पजलाः क्षुद्रस्रोतसोऽनु ग्रीष्मानन्तरमुत्पथवाहिन्यः स्वतीरमुल्लङ्घ्य वहन्त्य आसन् । शुष्यन्तीर्महानदीरन्वनुसृत्य स्वयं शुष्यन्त्य इति वा । यथाऽस्वतन्त्रस्य स्वं धनं तन्त्रमधीनं यस्य स नेत्यस्वतन्त्रस्तस्य दरिद्रस्य पुंसो देहो द्रविणसम्पदा यथा पुष्टो भवति तथेति । अस्वतन्त्रस्यास्वाधीनेन्द्रियादिमतो वा पुंस इति रजःप्रवृत्तिमदधिकारिपरं ज्ञेयम् ॥ ८ ॥

सुमनोरञ्जनी — अनुशुष्यतीः ग्रीष्मकालमनुसृत्य शुष्यंत्यः क्षुद्रनद्यः । प्रावृषि उत्पथवाहिन्यः उद्रिच्य स्यंदमाना बभूवुः । यथा अस्वतन्त्रस्य इन्द्रियपराधीनस्य । स्वतन्त्रस्य स्वच्छन्दवर्तिन इति वा । पुंसो देहः द्रविणसंपदा यथा उत्पथवाही उन्मार्गवर्ती भवति तथा । अनेन क्षुद्राणां राजसः स्वभावो दर्शितः । ते हि प्राक् दरिद्राः कदाचिद्दैववशेन प्राप्तसंपदश्चेदुन्मार्गवर्तिन इति ॥ ८ ॥

हरिता हरिभिः शष्पैरिन्द्रगोपैश्च लोहिता ।
उच्छिलीध्रकृतच्छाया नृणां श्रीरिव भूरभूत् ॥ ९ ॥

सत्यधर्मीया — हरिभिः श्यामैः शष्पैर्बालतृणैर्हरिता श्यामा स्वत एव कृष्णा चेदपि विलक्षणा कान्तिरभूदिति भावः । इन्द्रगोपैर्लोहितवर्णकृमिविशेषैः शकलातीत्यपभ्रष्टभाषया लोहिता रक्ता चोच्छिलीध्रैश्छत्राकैरुत्कृष्टैः शिलीध्रैः कदलीपुष्पैः । कदल्यां तु शिलीध्रं स्यादिति शब्दार्णवः । कृता छाया शोभा यस्याः सा नृणां श्रीर्यथा नानाविधा तथेयं भूरभूत् । अनेन सम्पदि गुणानुगुणकार्यं ध्वन्यते ॥ ९ ॥

सुमनोरञ्जनी — हरिभिर्नीलैः शष्पैः बालतृणैः । हरिता श्यामला । क्वचिच्च इन्द्रगोपैः वर्षाकाले जायमानैः लोहितकीटविशेषैः । लोहिता । उच्छिलिंध्रैः उद्गतछत्राकैः । उद्गतकदलीपुष्पैर्वा । कृता छाया शोभा वा यस्याः सा भूः नृणां श्रीरिव संपदिव अभूत् बहुधा अदृश्यतेति यावत् ॥ ९ ॥

क्षेत्राणि सस्यसम्पद्भिः कर्षकाणां मुदं ददुः ।
मानिनामनुतापं वा विपत्तिं तदजानताम् ॥ १० ॥

सत्यधर्मीया — कर्षकाणां स्वयं भूलेखकानां कृषीबलानां क्षेत्राणि केदाराः सस्यसम्पद्भिर्भाविफलोन्नाहोहिकाभिर्मुदं ददुः । मानिनामहङ्कारेण स्वयमकर्षकाणां तत्प्रकारज्ञानां नास्माभिः कर्षणं कृतमतो न फलं तद्वदासीदिति पश्चात्तापं ददुः । तदजानतामेतत्प्रकारज्ञानहीनानां विपत्तिं बाधान्याद्यलाभजनितविषादं च ददुः । सस्य सारत्वात्स इत्युक्तेर्हरेः क्षेत्राणि नानावताराः कर्षकाणां भक्त्या ध्यात्वा मुदं ददुः । मानिनामभिमानिनामनुतापं तद्ध्यानादिसाधनमजानतामज्ञानिनां मिथ्याज्ञानिनां च विपत्तिं नरकतमादिरूपां ददुरित्यान्तरङ्गिको भावोऽवसेयः ॥ १० ॥

सुमनोरञ्जनी — सस्यानां व्रीह्यादीनाम् । संपद्भिः फलोद्रेकसूचकशोभाविशेषैः । क्षेत्राणि केदाराः । कर्षकाणां कर्षणक्रियाकुशलानाम् । मुदं ददुः । मानिनां अहङ्कारिणां अद्य श्वो वा करिष्याम इत्यहङ्कारेण यथोचितकालं कर्षणादिकमकुर्वताम् । अनुतापं पश्चात्तापम् । कर्षणादिकं अजानतां तु विपत्तिमेव ददुः । वृष्टितदभावाभ्यां सस्यभङ्गात् । अनेन सकलसत्कर्माणि हर्यर्पणादितिकर्तव्यताकुशलैरनुष्ठितान्येव भगवत्प्रसादरूपफलप्रदानि नान्यथेति सूचितं भवति ॥१०॥

जलस्थलौकसः सर्वे नववारिनिषेवया ।
अबिभ्रन् रुचिरं रूपं यथा हरिनिषेवया ॥ ११ ॥

सत्यधर्मीया — जलौकसः स्थलौकसः सर्वे नववारिणो निषेवया स्नानपानादिरूपसेवया रुचिरं रूपं नैर्मल्येन भासुरं । अबिभ्रन्दध्रुः । जलौकसः स्थलौकसः सर्वे तपस्विनो हरिनिषेवया भगवत्सेवया यथा रुचिरं ज्ञानाद्यात्मकतया मनोहरं रूपं स्वस्वरूपं बिभ्रति तथेति ॥ ११ ॥

सुमनोरञ्जनी — नवं नूतनं यद्वारि तस्य निषेवया सेवनेन । सर्वेऽपि जलस्थलौकसः सस्य जातीयाः । रुचिरं मनोहरं रूपम् । अबिभ्रन् बभ्रुः । यथा हरेः बिम्बसंज्ञकस्य 'हरयः शतादशेति श्रुतेः' निषेवया उपासनेन । रुचिरं भग्नावरणं चिदानन्दात्मकं रूपं बिभ्रति ज्ञानिनः तथा । अनेन बिम्बोपासनमेव बिम्बापरोक्षद्वारा स्वरूपाविर्भावलक्षणमुक्त्यन्तरंगसाधनं नान्यदिति ध्वनितम् ॥११॥

सरिद्भिः सङ्गतः सिन्धुश्चुक्षोभ श्वसनोर्मिमान् ।
अपक्वयोगिनश्चित्तं कामार्तं गुणयुग् यथा ॥ १२ ॥

सत्यधर्मीया — श्वसनोर्मिमान् । यद्यपि मादुपधाया इति ऊर्मिवानिति वक्तव्यं तथापि यवादिगणगणिततया वस्य मत्वं ज्ञेयम् । सिन्धुः समुद्रः सरिद्भिर्नदीभिः सङ्गतो मिलितो यथाऽपक्वयोगिनोऽपक्वः फलपरिपाकमप्राप्तश्चासौ योगश्च सोऽस्यास्तीति स तस्य, कामार्तं सरिद्भिरिति स्त्रीलिङ्गनिर्देशेन योषिन्निमित्तं मन्मथमथितं गुणयुग्गुणैर्विषयैर्ज्यत इति तत्तथा । यथा क्षोभं प्राप्नोति तथा चुक्षोभाचलत् ।। १२ ।।

सुमनोरञ्जनी — सरिद्भिः गङ्गागोदावर्यादिनदीनदैः । संगतः । तत्रापि श्वसनेन वायुना ऊर्मिमान् सन् । चुक्षोभ चलितोऽभूत् । यथा अपक्वः परिपाकमप्राप्तो योगोऽस्यास्तीति तथाविधः । तस्य पुंसः चित्तं, गुणेषु विषयेषु युज्यते संबन्ध्यत इति गुणयुक् विषयसंगतं सत् । तेन च कामार्तं कामपीडितम् । सङ्गात्संजायते काम इत्युक्तेः । यथा क्षुभ्यति । अनेन योगमारुरुक्षुणा विषयसङ्गो वर्जनीय इत्युक्तं भवति ।। १२ ।।

गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः ।
अभिभूयमाना व्यसनैर्यथाऽधोक्षजचेतसः ।। १३ ।।

सत्यधर्मीया — व्यसनैः सांसारिकक्लेशैरभिभूयमानास्तिरस्क्रियमाणा अपि । अधोक्षजचेतसो हरिनिरतमनस्का यथा व्यथा नाप्नुवन्ति तथा वर्षधाराभिर्हन्यमाना गिरयः पर्वता न विव्यथुः ।।१३।।

सुमनोरञ्जनी — वर्षस्य वृष्टेः धाराभिः संपातैः न विव्यथुः व्यथिता न बभूवुः । यथा व्यसनैः सांसारिकैः अभिभूयमानाः तिरस्कृता अपि अधोक्षजे चेतो येषां ते ।। १३ ।।

मार्गा बभूवुः सन्दिग्धास्तृणैश्छन्ना असंश्रिताः ।
नाभ्यस्यमानाः श्रुतयो द्विजैः कालहता इव ।। १४ ।।

सत्यधर्मीया — द्विजैरनभ्यस्यमानाः पक्षग्रन्थत्वात्तासां श्रुतयो वेदाः कालहता यथा सन्दिग्धपाठा भवन्ति तथा मार्गास्तृणैश्छन्ना असंश्रिता जनैर्वृष्टिकष्टतो नाश्रिता इति केचित् । असंश्रिताः प्रागमिलिता इदानीं तृणैश्छन्ना इति सन्दिग्धा बभूवुः । नाभ्यस्यमाना इति नसमासः ।। ।। १४ ।।

सुमनोरञ्जनी — तृणैः च्छन्नाः मार्गाः । संदिग्धाः सन्देहविषयाः । अत एव । असंश्रिताः जनैरनाक्रान्ताः । नाभ्यस्यमानाः अनभ्यस्यमानाः श्रुतयः कालेन हताः विस्मृता इवेति यावत् । अनेन संदेहादिनिवृत्तये सच्छास्त्रश्रवणाद्यावृत्तिः सर्वदा कार्येत्युक्तं भवति । यथोक्तमन्यत्र ।

श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ ।
संशयं च पराणुद्य लभते ब्रह्मदर्शनम् ॥ इति ॥ १४ ॥

लोकबन्धुषु मेघेषु विद्युतश्चलसौहृदाः ।
स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्विव ॥ १५ ॥

सत्यधर्मीया — गुणिषु सौन्दर्यादिगुणयुक्तेषु पुरुषेषु । चलं सौहृदं यासां ताः कामिन्य इव यथा स्थैर्यं न कुर्वन्ति तथा लोकबन्धुष्वनिमित्तोपकारिषु मेघेषु विद्युतः स्थैर्यं न चक्रुः । विद्युच्चञ्चला चपलाऽपीति स्वनामानुयानं चक्रुरिति भावः ॥ १५ ॥

सुमनोरञ्जनी — लोकानां बन्धुषु उपकारिषु । विद्युतः तटितः । चलं सौहृदं यासां ताः । चाञ्चल्योपेता इति यावत् । स्थैर्यं स्थिरां स्थितिं न चक्रुः । गुणिष्वपि पुरुषेषु कामिन्यः पुंश्चल्य इव । ॥ १५ ॥

धनुर्वियति माहेन्द्रं निर्गुणं च गुणिन्यभात् ।
व्यक्ते गुणव्यतिकरेऽगुणवान् पुरुषो यथा ॥ १६ ॥

सत्यधर्मीया — गुणव्यतिकरे कार्योन्मुखतया गुणानां भवने । व्यक्ते प्रवृत्त इति यावत् । गुणवान्सत्त्वादिप्रवर्तकतया तद्वान्ज्ञानानन्दादिगुणपूर्ण इति वा । अप्रधानप्रकृत्यादिसंयुत इति वाऽगुणवान्सत्त्वादिभिर्वा स्वभिन्नगुणैर्वा हीन इति वा । एतेन दार्ष्टान्तिके निर्गुणमित्युक्तेरत्र गुणवानिति कथमिति परास्त इति वदन्ति । यथा पुरुषो नारायणो भाति तथा गुणिनि शब्दगुणके आकाशो निलिमोदेतीत्यादेर्नीलिमगुणयुते वा वियत्याकाशे, निर्गुणं ज्याविकलं माहेन्द्रमिन्द्रसम्बन्धि धनुश्चापं तथाऽभूत् ॥ १६ ॥

सुमनोरञ्जनी — गुणिनि शब्दगुणोपेते नीलिमोपेते वा वियति आकाशे निर्गुणं ज्यारहितं माहेन्द्रं धनुः । अभात् । गुणव्यतिकरे सत्वादिगुणव्यतिकरात्मकप्रपञ्चे । व्यक्ते सति तस्मिन् अगुणवान् सत्वादिगुणाबद्धो पुरुषो हरिर्यथा ज्ञानिनां भाति तथेति ॥ १६ ॥

न रराजोडुपश्छन्नः स्वज्योत्स्नाराजितैर्घनैः ।
अहंमत्या भासितया स्वभासा पुरुषो यथा ॥ १७ ॥

सत्यधर्मीया — स्वज्योत्स्नाराजितैः सन्ध्यारागमात्रैर्घनैश्छन्न उडुपः स्वभासा स्वयंप्रकाशमानेन भासितया व्यक्तयाऽहम्मत्याऽभिमत्या पुरुषो जीवो न राजति तथा न रराज । यद्वा स्वभासा

स्वप्रकाशेन सहितोऽपि स्वरूपभूतेन पुरुषो जीवोऽहम्मत्याऽभिमत्या भासितया विकर्मविशेषात्तदभि-भावकतयोज्वलया न ज्ञानादिस्वरूपत्वेन यथा भाति तथोडुपश्चन्द्रस्तैर्घनैश्छन्नः स्वज्योत्स्नाराजि-स्वत्यन्तं न विद्यते ज्योत्स्नानां कौमुदीनां राजिः पङ्क्तिर्यस्मिन्कर्मणि तद्यथा भवति तथा न रराज न शुशुभे । आनुरूप्यं दृष्टान्तदार्ष्टान्तिकयोरेवमन्वयने लगति नान्यथेति विदांकुर्वन्तु विन्दवः । अखण्डं नरराजेत्यावर्तितं परीक्षित्सम्बोधनं च ॥ १७ ॥

सुमनोरञ्जनी — स्वज्योत्स्नया राजितैः रागं प्राप्तैः । घनैः सांध्यजीमूतैः । छन्नः आच्छादितः । उडुपः चन्द्रः । न रराज । स्वभासा स्वरूपभूतप्रकाशेन । भासितया विषयीकृतया । अहंमत्या अहंकारेण । छन्नः अनभिव्यक्तस्वरूपः । पुरुषो जीवः ॥ १७ ॥

मेघागमोत्सवा हृष्टाः प्रत्यनन्दन् शिखण्डिनः ।
गृहेषु तप्ता निर्विण्णा यथाऽच्युतजनागमे ॥ १८ ॥

सत्यधर्मीया — गृहेषु भार्यादिषु तप्ताः कुटुम्बपोषणादिनाऽतो निर्विण्णा निर्वेदमाप्ता अच्युतजनागमे भगवदवगमकसज्जनसमासज्जने जाते यथा प्रतिनन्दन्ति तथा मेघागमे तन्निदाघकालिकतापापनोदोदित उत्सवो येषां ते हृष्टा रोमाञ्चनसहिताः शिखण्डिनो मयूराः प्रत्यनन्दंस्तुतुषुः । तप्ता निर्विण्णा अच्युतागमे तज्जनागमे च हृष्टा रोमाञ्चितगात्रा इति वा । उत्सवाहृष्टा इति पाठ उत्सवेनासम्यग्रोमाञ्चिता इति पदार्थाः । उत्सवे हृष्टा इति स्फुटार्थः पाठः । मयूरादिपदं विहाय शिखण्डिन इति वदता गृहेषु तप्तानां स्वतोऽनिर्वाहकत्वान्नपुंसकसमता च ध्वनितेति ज्ञेयम् ॥ १८ ॥

सुमनोरञ्जनी — मेघागमेन उत्सवो येषां ते । हर्षजनकमनोवृत्तिविशेषः उत्सव इत्युच्यते । हृष्टाः रोमाञ्चं प्राप्ताः । शिखण्डिनो मयूराः । प्रत्यनन्दन् । यद्वा हृष्टाः सन्तुष्टाः प्रत्यनन्दन् मनसा श्लाघयांचक्रुः । यथा तप्ताः विविधसांसारिकदुःखदर्शनेन सन्तप्ताः । अत एव निर्विण्णाः निर्वेदयुक्ताः। विरक्ता इति यावत् । अच्युतजनानां भगवद्भक्तानां आगमे सति हृष्यन्ति तथा ॥ १८ ॥

पीत्वाऽपः पादपाः पद्भिरासन् नम्रात्ममूर्तयः ।
प्राक् क्षामास्तपसा श्रान्ता यथा कामानुसेवया ॥ १९ ॥

सत्यधर्मीया — यथा प्राक् कामानुसेवया विषयसेवनेनानम्रास्तपसा कृच्छ्रचान्द्रायणादिना क्षामाः कृशाः श्रान्ताश्च सन्तो नम्रात्ममूर्तयो भवन्ति तथा तपसा माघाद्यारभ्य ग्रीष्मपर्यन्तं क्षामाः । तपो माघे च शिशिर इति विश्वः । पादपाः पद्भिर्मूलैरप उदकं पीत्वा नम्रा आत्ममूर्तयः स्वगात्राणि येषां ते तथा सन् ॥ १९ ॥

सुमनोरञ्जनी — पादपाः वृक्षाः । पद्भिः मूलैः । अपः पीत्वा । फलपुष्पादिभिर्नम्राः आत्ममूर्तयो येषां ते तथाविधाः आसन् । कीदृशाः । प्राक् तपसा ग्रीष्मेण । क्षामाः म्लानाः । यथा प्राक् तपसा श्रान्ताः अत एव क्षामाः कृशाः जनाः कामानुसेवया अभ्यञ्जनादिविषयसेवनेन नम्रात्ममूर्तयो मृदुशरीराः भवन्ति ॥ १९ ॥

सरस्स्वशान्तरोधस्सु ह्यूषुरङ्गापि सारसाः ।
गृहेष्वशान्तकृत्येषु ग्राम्या इव दुराशयाः ॥ २० ॥

सत्यधर्मीया — यथायथं मध्यमोत्तमलक्षणानि तत्र तत्रानुसन्धेयानीति सूचयितुं स्पष्टं नित्यसंसारिसाधर्म्यमाह ॥ सरःस्विति ॥ शेन सुखेनान्तःप्रान्तभागो गम्यो येषां तानि तानि न भवन्तीत्यशान्तानि रोधांसि येषां तेषु । कूलं रोधश्च तीरं चेत्यमरः । सरस्सु सारसाश्चक्रवाका ऊषुः । तेषां विस्तृतत्वाद्रसवत्कुसुमसमेतत्वात्तत्र सरसाः सारसा यथाऽशान्तकृत्येष्वसुखनिर्णयनकृन्ति कृत्यानि कर्माणि येषां तेषु गृहेषु दुराशया दुर्मनस्का नित्यसंसारिणो ग्राम्या मूर्खास्तथोषुरित्यन्वयः । अङ्ग हे राजन् अशान्तकृत्येषु कदाऽपि तत्कर्मापरिसमाप्तिमत्सु गृहेष्विति वा ॥ २० ॥

सुमनोरञ्जनी — हे अङ्ग प्रियेति परीक्षितं प्रति सम्बोधनम् । सारसाः तन्नामानः पक्षिणः चक्रवाका वा । सरस्सु क्षुद्रनदीषु कासारेषु वा । अशान्तरोधस्स्वपि अशान्तानि अनुपरतानि जलप्रवाहोपेतानीति यावत् । रोधांसि येषां तथाविधेष्वपि ऊषुः वासं चक्रुः । ग्राम्याः जनाः दुराशयाः दुर्मनस्काः । अशान्तकृत्येषु अनुपरतकर्तव्येषु गृहेषु यथा वसन्ति ॥ २० ॥

जलौघैर्निरभिद्यन्त सेतवो वर्षतीश्वरे ।
पाखण्डागमशैवाद्यैर्वेदमार्गाः कलौ युगे ॥ २१ ॥

सत्यधर्मीया — ईश्वरे सूर्ये इन्द्रे वा वर्षति सति सेतवो जलौघैर्बलवत्तरजलप्रवाहैर्यथा पाखण्डागमशैवाद्यैरित्यत्रागमपदस्य शैवपदोत्तरं योग्यतयाऽन्वयो ज्ञेयः । पाखण्डागमैः शैवागमाद्यैः पाशुपतागमाद्यैः । अथवा शैवपदेन पाशुपतागमो ग्राह्यः । पाखण्डागमाश्च शैवाश्चाद्या येषां तैः । पाखण्डवामशैवाद्यैरिति पाठो वामनः । ते वामा महावाममध्यमवामाणुवामभेदभिन्ना ''नार्च्यं महावाममतं वामैरन्यैरुदीर्यते । अणुवामा न तद्युक्तमित्याद्यनुव्याख्यासुधायां शाक्तास्त्रिविधा इत्यादिना सविस्तरं तन्मतमुक्तमनुसन्धेयम् । वेदमार्गाः कलौ युगे भिन्ना भवन्ति तथा निरभिद्यन्त । इदं ज्ञानं नरकादिसाधनमिति बोध्यम् ॥ २१ ॥

सुमनोरञ्जनी — ईश्वरे पर्जन्यादिनियामके हरौ वर्षति सति । जलौघैः जलप्रवाहैः । सेतवो निरभिद्यन्त भिन्नाः बभूवुः । वेदमार्गाः वेदोक्तयज्ञादिक्रियाः । पाषण्डवामशैवाद्यैः । वामाः शाक्ताः। पाषण्डाः बौद्धादयः ॥ २१ ॥

व्यमुञ्चन् वायुभिर्नुन्ना भूतेभ्यो ह्यमृतं धनाः ।
यथा विशो विट्पतयः काले काले द्विजेरिताः ॥ २२ ॥

सत्यधर्मीया — यथा विशः प्रजा उद्दिश्य विश्पतयो विशां प्रजानां पतयो राजानो द्विजेरिताः पुरोहितादिबोधिताः काले काले विहिते सर्वस्मिन्कालेऽमृतमन्नं विमुञ्चन्ति ददति तथा वायुभिर्नुन्नाः प्रेरिता घना मेघा भूतेभ्योऽमृतं जलं व्यमुञ्चन् । अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने । अयाचिते जले दुग्धे मोक्षेऽन्ने हेम्नि गोरस इति यादवः । यथाऽऽशिषो विश्पतय इति पाठे भूतेभ्य इत्यावृत्त्याऽन्वयः । विश्पतिभ्य इति पाठे विशः प्रजा राजभ्योऽमृतं धनमिति वा ॥ २२ ॥

सुमनोरञ्जनी — घनाः मेघाः वायुभिः वर्षवायुभिः नुन्नाः प्रेरिताः । भूतेभ्यः प्राणिभ्यः । अमृतं उदकम् । पयः कीलालममृतमित्यमरः । व्यमुंचन् । विश्पतयो राजानः । विशः प्रजाः उद्दिश्य । काले काले । द्विजैः ईरिताः प्रेरिताः सन्तो अमृतं हेम यथा प्रयच्छन्ति तथेति । अमृतं व्योम्नि देवान्ने यज्ञशेषे रसायने । अयाचिते जले दुग्धे मोक्षेऽन्ने हेम्नि गोरस इति यादव इति पदरत्नावली ॥ २२ ॥

एवं वनं तद् वर्षिष्ठं पक्वखर्जूरजम्बुमत् ।
गोगोपालैर्वृतो रन्तुं सबलः प्राविशद् हरिः ॥ २३ ॥

सत्यधर्मीया — वर्षिष्ठं बहुवर्षवच्छ्रेष्ठम् । वर्षशब्दादर्श आद्यचि तत इष्ठन्प्रत्यय इति ज्ञेयम् । अथवा वर्षिष्ठमतिशयेन वृद्धम् । वर्षिष्ठमूतये भर इत्यृग्व्याख्यावसरे वृद्धशब्दादतिशायने तमबिष्टनावितीष्टन् प्रियस्थिरेत्यादिना वृद्धशब्दस्य वर्षादेश इत्युक्तेः । खर्जूरशब्दो निपातितः । पक्वेत्युभयविशेषणम् । पक्वाः खर्जूराः पक्वानि जम्बूनि फलानि चास्य सन्तीति तत्तथा । जम्बुजाम्बवमित्यमरः । सबलः कृष्णः प्राविशत् ॥ २३ ॥

सुमनोरञ्जनी — वर्षिष्टम् अतिशयितवृष्ट्युपेतम् । एवं प्राग्वर्णितगुणोपेतं च । पक्वखर्जूर-जंबुमद्वनम् । हरिः प्राविशत् ॥ २३ ॥

धेनवो मन्दगामिन्य ऊधोभारेण भूयसा ।
ययुर्भगवताऽऽहूता द्रुतं प्रीत्या स्नुतस्तनीः ॥ २४ ॥

सत्यधर्मीया — ऊधोभारेणोधसां भारस्तेन । ऊधस्तु क्लीबमापीनमित्यमरः । मन्दगामिन्य एतादृश्योऽपि स्नुतस्तनीः स्नुतस्तन्यः क्षरत्कुचा भगवताऽऽहूता द्रुतं ययुरित्यन्वयः ॥ २४ ॥

सुमनोरञ्जनी — ऊधोभारेण पयःपूर्णस्तनभारेण मन्दगामिन्यो धेनवः । प्रीत्या प्रेम्णा निमित्तेन । स्नुतस्तनीः क्षरितस्तन्यः ॥ २४ ॥

वनौकसः प्रमुदिता वनराजीर्मधुश्च्युतः ।
गिरेर्गम्भीरसन्नादसन्नादा ददृशुर्गुहाः ॥ २५ ॥

सत्यधर्मीया — वनैकसो गोपा मधुश्च्युतो वनराजीर्वनपङ्क्तीर्ददृशुस्तेन च प्रमुदिताः । किञ्च गिरेर्गम्भीरसन्नादसन्नादा गिरेस्तत्सबन्धिनिर्झरादीनां सन्नादस्तज्जातस्सन्नादो यासां ता गुहा ददृशुः ॥ २५ ॥

सुमनोरञ्जनी — धेनव इत्याकृष्यते । धेनवः तत्र प्रमुदिताः । वनौकसः वन्यप्राणिनः । मधु च्यवन्तीति मधुच्युत्तः । वनराजीः वनपङ्क्तीश्च । तथा हरेः श्रीकृष्णस्य गम्भीरो यः सन्नादस्तेन सन्नादाः प्रतिध्वनिमत्यो गुहाश्च ददृशुरिति । यद्वा हरेर्गंभीरसन्नादेन गंगे यमुनेत्यादि गवाव्हानशब्देन सन्नादाः प्रतिध्वनिं ददत्यो धेनव इति ॥ २५ ॥

क्वचिद् वनस्पतिक्रोडे गुहायां चाभिवर्षति ।
निर्विशन् भगवान् रेमे कन्दमूलफलाशनैः ॥ २६ ॥

सत्यधर्मीया — वनस्पतिक्रोडे वनस्पतेर्वृक्षस्य क्रोडे कोटरेऽभिवर्षति मेघे गुहायां च निर्विशन्भगवान्कन्दमूलफलाशनै रेमे चिक्रीड ॥ २६ ॥

सुमनोरञ्जनी — क्वचिद्देशे काले वा मेघे अभिवर्षति सति । वनस्पतेः वृक्षस्य क्रोडे कोटरे । क्वचिच्च गुहायां च । निर्विशन् उपविशन् । कन्दमूलफललक्षणैः अशनैः । कन्दमूलफलानि अशनानि येषां तैः गोपैः सहेति वा ॥ २६ ॥

दध्योदनमुपानीतं शिलायां सलिलान्तिके ।
सम्भोजनीयैर्बुभुजे गोपैः सङ्कर्षणान्वितः ॥ २७ ॥

सत्यधर्मीया — सम्भोजनीयैः समं भोजनीयं भोक्तव्यं येषां ते तैः । संशब्दस्य समर्थत्वं तु सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् । प्रोपाभ्यां समर्थाभ्यां व्यवहृपणोः समर्थयोरित्यत्रैकव्याख्याने

दृष्टमित्यत्र समर्थता ज्ञेया । उपानीतं गृहाद्दध्योदनं सङ्कर्षणान्वितः सलिलान्तिके शिलायां सम्भोजनीयैस्सहभोज्यास्तैरिति वा बुभुजे । सलिला सलीलाः केचन । ते क्रीडासक्ता नायाता भुक्त्यै तेषामन्तिके समीप इति । एकदेशविकृतन्यायेन सलिला हि सलीलाः । यथोक्तं बृहद्भाष्ये । सलीलः सलिल इति वेति ॥ २७ ॥

सुमनोरञ्जनी — उपानीतं गृहादानीतं सम्भोजनीयैः सहभोक्तुं योग्यैः ॥ २७ ॥

शाद्वलोपरि संविश्य चर्वतो मीलितेक्षणान् ।
तृप्तान् वृषान् वत्सतरान् गाश्च स्वोधोभरश्रमाः ॥ २८ ॥

सत्यधर्मीया — प्राक् चर्वतो भक्षयतोऽनन्तरं शाद्वलोपरि संविश्य मीलितेक्षणान् तथा चर्वतीर्मिलितेक्षणाः, तृप्तांस्तृप्ता वृषान्वत्सतरानूधोभारेण श्रमो यासां ता गाश्च वीक्ष्येत्युत्तरेणान्वयः ॥ २८ ॥

सुमनोरञ्जनी — दृप्तान् बलिष्ठान् । मत्तान्वत्सान् वत्सतरांश्च । सर्वतः सर्वाः । स्वोधोभरश्रमा गाश्च शाद्वलोपरि हरिततृणोपरि । संविश्य संशाययित्वा । संविश्य उपविश्य, मीलितेक्षणान् वत्सादीन् वीक्ष्येति वा ॥ २८ ॥

प्रावृट्श्रियं च तां वीक्ष्य सर्वभूतमुदावहाम् ।
भगवान् पूजयाञ्चक्रे आत्मशक्त्युपबृंहिताम् ॥ २९ ॥

सत्यधर्मीया — भगवानात्मशक्त्युपबृंहितां स्वसमार्थ्योत्तेजितां सर्वभूतमुदावहां प्रावृषः श्रियं च वीक्ष्य तां पूजयाञ्चके पदद्वन्द्वम् । परन्तु नियतोऽनुप्रयोगः । तं पातया प्रथमासुरित्यादयस्त्वपभ्रंशा इति शेखराद्याकराः । चकारो वीक्ष्येत्यतीतश्लोकेऽन्वेतव्यमिति सूचयति ॥ २९ ॥

सुमनोरञ्जनी — आत्मशक्त्या स्वस्य शक्त्या उपबृंहितां संवर्धिताम् । पूजयांचक्रे श्लाघयामास ॥ ॥ २९ ॥

एवं निवसतोस्तत्र रामकेशवयोर्व्रजे ।
शरत् समभवद् व्यभ्रा स्वच्छाम्बुप्लुषितानिला ॥ ३० ॥

सत्यधर्मीया — व्रजे एवं निवसतो रामकेशवयोः सतोर्व्यभ्रा विगतान्यभ्राणि मेघा यस्यां सा स्वच्छानि निर्मलान्यम्बूनि जलानि तेषां विप्लुड्भिर्बिन्दुभिरितो युतोऽनिलो वायुर्यस्याः सा । विप्लुषाः सञ्जाता अस्येति विप्लुषितः । विप्लुडित इत्यत एव नेति ज्ञेयम् । शरत्तदृतुः समभवत्प्रादुरभूत् ॥३०॥

सुमनोरञ्जनी — एवं अनया रीत्या । व्रजे निवसतोः । शरत् शरदृतुः । तामेव वर्णयति ॥ व्यभ्रा विगतमेघा । स्वच्छांबुप्लुषिताः स्वच्छाम्बुनः प्लुषिताः विप्लुषो बिन्दवो यस्मिन् स अनिलो यस्यां सा ॥ ३० ॥

शारद्या नीरजोत्पत्त्या नीराणि प्रकृतिं ययुः ।
भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया ॥ ३१ ॥

सत्यधर्मीया — भ्रष्टानां योगभ्रष्टानां चेतांसि मनांसि सुकर्मवशात्पुनर्योगनिषेवया योगाभ्यासेन प्रकृतिं यान्तीव । प्राग्वार्युपरि वीथीपयोभिः कश्मलानि जलानि नीरजानां कमलादीनामुत्पत्त्या शारद्या शरत्सम्बन्धिन्या प्रकृतिं नैर्मल्यं ययुः प्रापुः ॥ ३१ ॥

सुमनोरञ्जनी — शारद्या शरत्कालीनया । नीरजानां कमलानामुत्पत्त्या । नीराणि प्रकृतिं स्वच्छताम् । ययुः । भ्रष्टानां योगभ्रष्टानाम् । पुनर्योगनिषेवया उपायभूतसत्कर्माद्याचरणेन चेतांसि यथा स्वच्छतां यान्ति तथा ॥ ३१ ॥

व्योम्नोऽब्दमभ्रशाबल्यं भुवः पङ्कमपां मलम् ।
शरज्जहाराश्रमिणां कृष्णभक्तिर्यथाऽशुभम् ॥ ३२ ॥

सत्यधर्मीया — आश्रमिणां प्रशस्ताश्रमचतुष्टयवतां कृष्णभक्तिः कृष्णसम्बन्धिनी भक्तिरशुभममङ्गलं भाव्यन्तरापतितेन दुष्कर्मणा हरति तथा व्योम्नो गगनादब्दं मेघसङ्घमभ्राणां शाबल्यं चित्रतां भुवः पङ्कमपां मलं च शरज्जहार ॥ ३२ ॥

सुमनोरञ्जनी — व्योम्नः आकाशात् । अभ्रं मेघं जहार । अभ्रेषु च शाबल्यं नीलताम् । भुवः पङ्कं, अपां मलं रजःकालुष्यम् । आश्रमिणां सन्यासिनाम् । चतुर्विधाश्रमिणां वा । श्रीकृष्णे भक्तिः यथाऽशुभं पापम् ॥ ३२ ॥

सर्वस्वं जलदा हित्वा विरेजुः शुभ्रवर्चसः ।
यथा त्यक्तैषणाः शान्ता मुनयो मुक्तकल्मषाः ॥ ३३ ॥

सत्यधर्मीया — यथा शान्ताः सशमा मुक्तकल्मषास्त्यक्ता ईषणाः पुत्रादित्रिकेषणा इच्छा यैस्ते मुनयो राजन्ते तथा जलदाः सर्वस्वं सर्वं स्वं धनरूपं जलं हित्वा त्यक्त्वा शुभ्रवर्चसः सन्तो विरेजुः ॥ ३३ ॥

सुमनोरञ्जनी — जलदाः सर्वस्वं उदकरूपं हित्वा । शुभ्रवर्चसः पाण्डुरवर्णाः सन्तो विरेजुः । त्यक्तं ईषणं विषयैषणं यैस्ते । मुक्तकल्मषाः भवन्ति तथेति ।। ३३ ।।

गिरयो मुमुचुस्तोयं क्वचिन्न मुमुचुः शिवम् ।
यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा ।। ३४ ।।

सत्यधर्मीया — यथा ज्ञानिनो ज्ञानामृतं ज्ञानरूपममृतं कालेऽधिकारानधिकारौ विलक्ष्य ददते न वा ददते तथा गिरयः पर्वतास्तोयं क्वचिन्मुमुचुः । यत्र निर्झरास्तत्र क्वचिच्छिवं जलं न मुमुचुरुन्नतप्रदेशे । शिवं मोक्षे सुखे भद्रे सलिलेऽथेति विश्वः ।। ३४ ।।

सुमनोरञ्जनी — गिरयः तोयं क्वचित् मुमुचुः । क्वचिच्च शिवं जलं न मुमुचुः । शिवं शोभनं तोयमिति वा । यथा ज्ञायतेऽनेनेति ज्ञानं,ज्ञानसाधनं वेदादिसच्छास्त्रम् । तदेव अमृतमिव काले अनध्यायादिभिन्ने । ज्ञानिनः योग्यशिष्याय । ददते अनाध्यायादौ वा न ददते तथा । अयोग्याय न ददते तथेति । अनेन शास्त्रोपदेशो योग्यस्यैव कर्तव्यो नायोग्यस्येति सूचितम् । अनार्यकायानृजवे शठायेति श्रुतेः ।। ३४ ।।

नैवाविदन् क्षीयमाणं जलं गाधजलेचराः ।
यथाऽऽयुरन्वहं क्षय्यं नरा मूढाः कुटुम्बिनः ।। ३५ ।।

सत्यधर्मीया — अन्वहं क्षय्यं सत्कर्मभिः क्षेतुं शक्यमायुस्तथा मूढाः कुटुम्बिनो नरा न जानन्ति यथा तथा । गाधजलेचरा अल्पजलचारिणः । चरेष्ट इति टः । हलदन्तादित्यलुक् । क्षीयमाणं जलं तत्क्षयप्रकारं नाविन्दन् न व्यजानन् । क्षय्यजय्यौ शक्यार्थ इति स्मरणात्क्षेतुं योग्यं क्षय्यम् । पाठान्तरं तु काचित्कमिति न धृतमव्याकृतं च ।। ३५ ।।

सुमनोरञ्जनी — गाधजलेचराः अल्पजलेचराः मत्स्यादयः जलं क्षीयमाणम् । नैवाविन्दन् । जलक्षयं नैवाजानन्नित्यर्थः । कुटुम्बिनः कुटुम्बलोलुपाः । अत एव मूढाः मोहयुक्ताः । नराः अन्वहं प्रतिदिनम् । क्षय्यं क्षेतुं शक्यम् । क्षीयमाणमिति यावत् । आयुर्यथा न जानन्ति तथा । अनेनायुषः प्रत्यहं क्षीयमाणत्वेन ज्ञानसंपादने अनालस्येन भवितव्यमिति ध्वनयति ।। ३५ ।।

गाधवारिचरास्तापमविन्दन् शरदर्कजम् ।
यथा दरिद्रः कृपणः कुटुम्ब्यविजितेन्द्रियः ।। ३६ ।।

सत्यधर्मीया — यथा दरिद्रः कृपणो दीनोऽविजितानीन्द्रियाणि येन स कुटुम्बी । अनेन तत्पोषणानिर्वाहात्तापं विन्दति तथा गाधवारिचरा अल्पजलकृतालया मत्स्याद्याः शरदर्कजं शरत्सम्बन्धी योऽर्कः सूर्यस्तस्माज्जायत इति स तथा तं तापमविन्दन्नापुः ॥ ३६ ॥

सुमनोरञ्जनी — शरत्कालीनो योऽर्कः । तस्माज्जनितं तापम् । अविन्दन् प्रापुः । कुटुम्बी तत्रापि अविजितेन्द्रियः । तथापि दरिद्रः कृपणः लुब्धः पुमान् । सांसारिकं तापं यथा विन्दति तथेति । अनेन संसारे सुखाभावो दुःखप्राचुर्यं च सूचितम् ॥ ३६ ॥

शनैश्शनैर्जहुः पङ्कं स्थलान्यासंश्च वीरुधः ।
यथाऽहंममतां धीराः शरीरादिष्वनात्मसु ॥ ३७ ॥

सत्यधर्मीया — यथा शरीरादिष्वनात्मस्वस्वसम्बन्धिषु । धीरा धैर्यवन्तो योगिनोऽहंममतां त्यजन्ति । वीरुध आसन्नित्यनुरूपमङ्कुरणं कस्येत्यतोऽप्याह ॥ धीरा इति । धियां रता इति । एतेन वीरुद्बीजवद्बुद्धिबीजे सति सुकर्मरूपे तत्प्ररोहणं ज्ञेयम् । यथा स्थलानि पङ्कं शनैर्जहुस्तत्र वीरुधस्तृणानि चासन् ॥ ३७ ॥

सुमनोरञ्जनी — स्थलानि पङ्कं शनैःशनैः जहुः । वीरुधः तृणादयश्च आसन् अभवन् । यथा सन्तः अनात्मसु जडेषु शरीरादिषु । अहंममतां जहन्ति । धीराः धीरेषामस्तीति धीराः ज्ञानाङ्कुरयुक्ताश्च भवन्तीत्यर्थः । एवं संसारे अहंममतां परित्यज्य ज्ञानाय यतेतेति सूचितम् ॥ ३७ ॥

निश्चलाम्बुरभूत् तूर्ष्णीं समुद्रः शरदागमे ।
आत्मन्युपरते यद्वन्मुनिर्व्युपरतागमः ॥ ३८ ॥

सत्यधर्मीया — यथाऽऽत्मनि मनस्युपरते विषयेभ्योऽस्पृहया मुनिरुपरतागम उप एव मनोनियामकरुद्रेन्द्रे हरौ रतास्तन्मात्रपरत्वेन योजितागमास्तदुपलक्षितसर्वशब्दा अन्तरे च येन सः । व्युपरतागमो विर्भगवानेवोप इति रतागम इति वा । उपरतो निवृत्त आगम इतरत्र गमागमौ यस्येति वा समाधिस्थस्तत्काले वेदाध्ययनाध्यापनादिरहित इति वा । असम्प्रज्ञातसमाधिस्थोऽयं तथा शरदागमे समुद्रो निश्चलाम्बुर्निश्चलान्यम्बूनि जलानि यस्य स तूष्णीमभूत् । शरेण द्यति खण्डयतीति तदुद्योगवान् शरदो रामस्तस्यागमे सति यथा समुद्रस्तूर्ष्णीं निश्चलाम्बुरभूत्तथेति वा । प्रत्यक्षसिद्धमिदमेकान्तरामेश्वरे ॥ ३८ ॥

सुमनोरञ्जनी — व्युपरतागमः विशेषतः उपे सर्वोत्तमे रतः यः सद्गुरुः तस्य आगमः समागमो यस्य सः सद्गुरूपदेशसंपन्नः । तेन आत्मनि मनसि । उपरते विषयेष्वनासक्ते सति । मुनिः ग्राम्यकथायां मौनयुक्तः मननशीलो वा यथा भवति ॥ ३८ ॥

केदारेभ्यस्त्वपोऽगृह्णन् कर्षका दृढसेतुभिः ।
यथा प्राणैः स्वविज्ञानं तन्निरोधेन योगिनः ॥ ३९ ॥

सत्यधर्मीया — यथा तन्निरोधेन तेषामिन्द्रियाणां निरोधोऽप्रसरणमन्यत्र तेन, प्राणैरिन्द्रियैर्योगिनः समाधिस्थाः स्वविज्ञानं स्वज्ञानं परमात्मज्ञानं चाप्नुवन्ति । तथा कर्षकाः कृषीवलाः केदारेभ्य इतरकृषिभ्यश्चतुर्थी च दृढसेतुभिर्मध्येमार्गं बद्धसेतुभिरपोऽगृह्णन् स्वकृषिं त्यक्त्वा यथा न गच्छेयुरापस्तथा चक्रुरित्यर्थः ॥ ३९ ॥

सुमनोरञ्जनी — दृढसेतुभिः बद्ध्वा अपः । केदारेभ्यः केदारार्थं प्राणैः इन्द्रियैः । स्वविज्ञानं स्वः परमात्मा तस्य विज्ञानं, स्वप्रकाशरूपं परमात्मानं वा । तन्निरोधेन तेषां इन्द्रियाणां निग्रहेण यथा गृह्णन्ति स्वीकुर्वन्ति ध्यानविषयीकुर्वन्ति वा । मनसाऽवलोकनस्य ध्यानरूपत्वादिन्द्रियकरणकत्वम् । ध्यानावस्थायां स्वप्न इव मनसः सर्वेन्द्रियशक्तिमत्वाद्बहुवचनम् ॥ ३९ ॥

शरदर्कांशुजं तापं भूतानामुडुपोऽहरत् ।
देहाभिमानजं बोधो मुकुन्दो व्रजयोषिताम् ॥ ४० ॥

सत्यधर्मीया — शरदर्कश्चांशुरंशुकं च ताभ्यां जात इति स तं तापं, भूतानां व्रजयोषितां चोडुपश्चन्द्रो मुकुन्दश्च जहारेति पृथक् पृथगन्वयः । तत्र निदर्शनमाह ॥ बोध इति । सज्ज्ञानं देहाभिमानजं मिथ्याज्ञानमिव यथा तद्धरति तथेति । अंशुः सूत्रादिसूक्ष्मांशकिरणे चण्डदीधितौ । उपादानोपादेययोरभेदात्सूत्रसूक्ष्मांशवाच्यंशुपदेन वस्त्रग्रह इति ज्ञेयम् । अथवा आ अंशवो यस्मिन्निति पाठो गृह्यते । तत्परिधानजनितघर्मस्य तन्मोचनेन कृष्णकृतं हरणं ज्ञेयम् । रासोत्सवस्मरणलालसमानसानां नासह्यबन्धमिह मोचयतीत्यपूर्वम् । यत्केशपक्षकुचकुङ्कम-रम्यनीवीग्रन्थिं स विश्लथयति व्रजवल्लवीनामित्यादेः । दृष्टान्तद्वयमिति वा ॥ ४० ॥

सुमनोरञ्जनी — उडुपश्चन्द्रः । भूतानां, शरदर्कस्य येंऽशवः तज्जनितं तापम् । मुकुन्दश्च, व्रजयोषितां तापं दिवा स्वविरहजम् । अहरत् । यथा बोधः ब्रह्मज्ञानं, देहाभिमानाख्यं संसारजं तापं हरति तथेति ॥ ४० ॥

खमशोभत निर्मेघं शरद्विमलतारकम् ।
सत्त्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनम् ॥ ४१ ॥

सत्यधर्मीया — शरदा विमलास्तारका यस्मिंस्तत् । निर्मेघं निर्गता मेघा यस्मात्तत्ख-मशोभताभात् । सत्त्वेन व्यवसायेन गुणेन च युक्तं चित्तं यथा शब्दब्रह्म वेदस्तदर्थो भगवांस्तं दर्शयतीति तत्तथा । अर्थस्य दर्शनं येनेति वा ॥ ४१ ॥

सुमनोरञ्जनी — निर्मेघं निर्गताः मेघाः यस्मात्तत् । शरदा विमलाः स्पष्टप्रकाशाः तारकाः यस्मिन् तथाविधम् । यथा सत्वयुक्तं सत्वगुणोपबृंहितं चित्तम् । शब्दब्रह्म वेदः । तस्मात्करणात् आत्मदर्शनं यस्मिन् । आत्मानं दर्शयतीति वा । अर्थदर्शनमित्यपि पठन्ति । तत्र शब्दब्रह्मार्थस्य वेदार्थभूतस्य भगवतो दर्शनं यस्मादित्यर्थः ॥ ४१ ॥

अखण्डमण्डलं व्योम्नि रराजोडुगणैः शशी ।
यथा यदुपतिः कृष्णो वृष्णिचक्रैर्वृतो भुवि ॥ ४२ ॥

सत्यधर्मीया — यथा वृष्णिचक्रैर्यादवसमूहैर्वृतो यदुपतिः श्रीकृष्णो राजति व्योम्नि उडुगणैरखण्डमण्डलं यथा तथा शशी रराज ॥ ४२ ॥

सुमनोरञ्जनी — अखण्डमण्डलं यथा भवति तथा । उडुगणैर्वृतः । चक्रं समुदायः ॥ ४२ ॥

आश्लिष्य समशीतोष्णं प्रसूनवनमारुतम् ।
जनास्तापं जहुर्गोप्यो न कृष्णाहृतचेतसः ॥ ४३ ॥

सत्यधर्मीया — समशीतोष्णं समेऽन्यूनाधिके शीतोष्णे यस्य स तम् । समं शीतोष्णं यस्येति वा । प्रसूनवनानां तत्सम्बन्धी मारुतो वातस्तं जना आश्लिष्य तापं तपनजं जहुः । एतन्मात्रस्य न तापापनोद इत्याह ॥ गोप्य इति । कृष्णेन हृतं चेतो यासां ता गोप्यस्तापं कामजं न जहुः । कृष्णाहृतचेतसः कृष्ण आहृतो यस्मिंस्तच्चेतो यासां ता गोप्यो न इवेति वा चक्रं न वृत्रमिति यथा ॥ ४३ ॥

सुमनोरञ्जनी — समौ शीतोष्णौ यस्मिन् । नात्युष्णं नातिशीतलमिति यावत् । प्रसूनवनसंबन्धसुगन्धिनं मारुतम् । आश्लिष्य जनाः तापं बाह्यं जहुः । गोप्यस्तु एतादृङ्मारुतं आश्लिष्यापि । तापं मन्मथोद्रेकजनितं न जहुः । कुतः । कृष्णाहृतचेतसः । कृष्णेन आहृतम्, कृष्णे आहृतं अर्पितं वा चेतो यासां ताः ॥ ४३ ॥

गावो मृगाः खगा नार्यः पुष्पिण्यः शरदाऽभवन् ।
अन्वीयमाना वृषभैः फलैरीषत्क्रिया इव ॥ ४४ ॥

सत्यधर्मीया — गावो मृगाः खगा नार्यश्च पुष्पिण्यः पुष्पवत्यो गर्भिण्यः कान्तानकामयन्त्यः शरदा निमित्तेन वृषभैः स्वस्वपुरुषा एकत्रापरत्र विवेकाविकलतया सर्वत्र विवेकविकलतयेति वा यथायथमन्वीयमाना अभवन् । कचित्प्राक्तनगर्भस्यानङ्कूरणं कचिन्नार्यादौ बलवद्बालाभवनमितीषताऽविहितकाल आहितरेतस्कत्वाज्ज्ञेया । ईषत्क्रिया न सम्यक्संसाधितहलमुखविलेखनादिक्रियाः कृषयः फलैरिव कचिदुप्तानां तप्तानामनुत्पत्तिर्बीजानां कचिदुत्पत्तावपि सम्पत्तिर्नाङ्गस्येतीषत्फलैर्धान्यादिभिर्यथा तथेति फलैर्न स्वैरः स्वर्गादिभिरीषत्क्रियाः प्रवृत्तकर्माणीवेति । ईशक्रिया इति पाठे ता यथा फलवत्यो न तथेत्यन्वयः ॥ ४४ ॥

सुमनोरञ्जनी — गवादयः वृषभादिस्वस्वपुरुषैरन्वीयमानाः संयुज्यमानाः सत्यः पुष्पिण्यः गर्भिण्यः अभवन् । यद्वा गवाद्याः पुष्पिण्यः पुष्पवत्यः सत्यः वृषभैरन्वीयमानाः । फलैः गर्भाख्यैः अन्विताः अभवन्निति योजना । का इव । वृषभैः अनडुद्भिः अन्वीयमानाः उप्यमानाः ईषक्रियाः लाङ्गलादिना कर्षणादिक्रियावत्यो भूमयः फलैः सस्यादिभिरिव ॥ ४४ ॥

उदहृष्यन् वारिजानि सूर्येण कुमुदं विना ।
राज्ञा तु निर्भयो लोको यथा दस्यून् विना नृप ॥ ४५ ॥

सत्यधर्मीया — राज्ञा सूर्येण च लोकः सर्वो निर्भयो भवति दस्यून्विना यथा तथा सूर्येण कुमुदं विना वारिजान्युदहृष्यन्विकसितान्यभवन् । राज्ञा चन्द्रेण वारिजानि विना कुमुदमुदहृष्यत् ॥ ४५ ॥

सुमनोरञ्जनी — उदहृष्यन् विकसितान्यभवन् । यथा राज्ञा दस्यून्विना सर्वोऽपि निर्भयः ॥४५॥

पुरग्रामेष्वाश्रमिणामिन्द्रयागमहोत्सवैः ।
बभौ भूः पक्वसस्याढ्या कलाभ्यां नितरां हरेः ॥ ४६ ॥

सत्यधर्मीया — आश्रमिणां गृहस्थानाम् । इन्द्रयागमहोत्सवैरिन्द्रोद्देश्येन क्रियमाणा यागा आग्रहायण्येष्ट्यादिलक्षणा ये महोत्सवास्तैः । पुरग्रामेषु, पक्वसस्याढ्या भूर्हरेः कलाभ्यामाविष्टानाविष्टरूपाभ्यां रामकृष्णाभ्यां नितरां बभौ । नितरामिन्द्रयागमहोत्सवैः पक्वसस्याढ्येति च, हरेः कलाभ्यामिव बभाविति वा । अन्तिमश्लोकेऽपि निदर्शनप्रदर्शनस्वारस्यात् ॥ ४६ ॥

सुमनोरञ्जनी — आश्रमिणां गृहस्थानाम् । इन्द्रयागमहोत्सवैः इन्द्रदेवताकाग्रयणाद्युत्सवैः । हरेः कलाभ्यां रामकृष्णाभ्याम् । नितरां बभावित्यन्वयः ॥ ४६ ॥

वणिजो नगरात् स्वीयान्निर्गत्यार्थान् प्रपेदिरे ।
वर्षरुद्धा यथा सिद्धाः स्वपिण्डान् काल आगते ॥ ४७ ॥

इति श्रीमद्भागवते दशमस्कन्धे अष्टादशोऽध्यायः ।

सत्यधर्मीया — यथाकाले आगते समाधिनिवृत्तौ स्वपिण्डानभिमानिसहिततया स्वान्देहान्प्रपद्यन्ते भोज्यान्नानि वा प्राक् प्राणायामादिनिरोधेनानङ्गस्मरणानन्तरं सिद्धास्तत्सम्पन्ना यथा तथा वर्षरुद्धा वृष्टिप्रतिबद्धा वणिजो वर्षेऽतीति स्वीयात्स्वहितदात् । तस्मै हितमित्यर्थे प्राक्क्रीताच्छ इति छः आर्थिकं स्वत्वमनुसन्धेयम् । निर्गत्य नगरान्नगरान्तरं प्राप्यार्थान्प्रपेदिरे ॥४७॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे अष्टादशोऽध्यायः ॥ १०-१८ ॥

सुमनोरञ्जनी — वणिजः । वर्षेण वृष्ट्या रुद्धाः प्रावृषा वा रुद्धाः । शरदि स्वीयान्नगरात् । निर्गत्य । अर्थान् क्रयादिना प्रपेदिरे । यथा सिद्धाः ज्ञानिनः । काले प्रारब्धभोगोत्तरकाले । स्वपिण्डान् आविर्भूतस्वस्वरूपदेहान् । प्रपद्यन्ते । यद्वा सिद्धाः तपःसिद्धाः । काले फलकाले स्वपिण्डान् स्वभोग्यान् स्वभोगयोग्यदेहान्वा ॥ ४७ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां अष्टादशोऽध्यायः ॥ १०-१८ ॥

॥ अथ एकोनविंशोऽध्यायः ॥

श्रीशुक उवाच—

इत्थं शरत्स्वच्छजलं पद्माकरसुगन्धिना ।
न्यविशद् वायुनाऽऽवीतं सगोगोपालकोऽच्युतः ॥ १ ॥

सत्यधर्मीया — ॥ हरौ रतिमात्रं कण्ठमणिर्वैकुण्ठासौ मतिमनतिहायेति निरूप्यतेऽत्राध्याये । तत्रादौ गोपीनां नाथे प्रेमप्रवाहं वक्तुमुपक्रमते ॥ इत्थमिति । शरदा स्वच्छजलं निर्मलं जलं यस्मिन् । शोभनश्चासौ गन्धश्च सुगन्धः । पद्माकराणां तटाकानां सुगन्धोऽस्यास्तीति पद्माकरसुगन्धी तेन

वायुना आवीतं परिवृतं वनमिति शेषः । सगोगोपालको गावश्च गोपालकाश्च तैः सहितः सगोगोपालकोऽच्युतो न मारव्यापारपारवश्येन प्रवेशोऽपि तु स चैच्छिक इति ध्वनयत्यच्युत इत्युच्चरन्निति ज्ञेयम् । न्यविशन्न्यविशत ॥ १ ॥

सुमनोरञ्जनी — यया कयाचन रीत्या भगवति भक्तिः संपादनीयेति शिक्षयन् भगवतः श्रीकृष्णपादारविन्दे समर्पितसर्वस्वानां गोपीनां भक्त्यतिशयो निरूप्यतेऽस्मिन्नध्याये । पद्माकरेभ्यः निमित्तेभ्यः सुगन्धिना वायुना आवीतं युक्तम् । शरदा स्वच्छं निर्मलं जलं यस्मिन् तत् । वनमिति शेषः ॥ १ ॥

कुसुमितवनराजि शुष्मिभृङ्गद्विजकुलघुष्टसरस्सरिन्महीध्रम् ।
मधुपतिरवगाह्य चारयन् गाः सहपशुपालबलश्चुकूज वेणुम् ॥ २ ॥

सत्यधर्मीया — कुसुमितानि सञ्जातपुष्पाणि । तारकादिः । वनानां वृक्षाणाम् । वनं काननीरयोः । प्रवासे निलये चापि वनं प्रस्रवणेऽपि च । बहुवृक्षे नले रौद्रे शुभ्रे काष्ठान्तकीटके । अपक्वमृण्मये पात्रे वनशब्दं प्रचक्षत इति विश्वः । अवान्तरवनानां वा राजयः पङ्क्तयस्ता यस्मिंस्तत् । शुष्मिणो बलिनः । यथोक्तमृग्भाष्यटीकाटिप्पणेषु । संयन्मदाय शुष्मिणे बलिनेऽस्मै शुष्मिणो बलिने ओजो वाजः शव इत्याद्यष्टाविंशतिसङ्ख्याकेषु बलनामसु पठितस्य शुष्मशब्दस्य बलमर्थ इति भाव इति । भृङ्गा द्विजा इतरे तेषां कुलेन घुष्टानि गतमष्टमे । शब्दितानि सरांसि सरितो नाड्यश्च महीध्राः पर्वताश्च यस्मिंस्तत् । मधुपतिरेवंविधं वनमवगाह्य विलोड्य सहपशुपालबलो गोपालबलरामसहितो गाश्चारयन्वेणुं चुकूज ध्वनयामास ॥ २ ॥

सुमनोरञ्जनी — कुसुमिते पुष्पिते वने, राजत इति राजी राजनं वा येषामिति तथोक्ताः । ते च ते शुष्मिणो मत्ताः भृङ्गाः द्विजाः कलहंसादयः पक्षिणः तेषां कुलैः घुष्टाः शब्दिताः सरांसि सरितो नद्यः महीध्राः पर्वताश्च यस्मिन् तत् । कुसुमितवनराजिषु शुष्मिणो ये भृङ्गादय इति वा । अत्र वनशब्देन कतिपयवृक्षसमुदायात्मकावान्तरवनानि बोध्यानि । कुसुमितवनराजयश्च ते शष्मिभृङ्गद्विज-कुलघुष्टाश्च ते सरःसरिन्महीध्रा यस्मिन्निति वा । वनराजिशुष्मिणः वनपङ्क्तिसमीपवर्तिन इति वा । शुष्ममग्निसमीपयोरित्यभिधानात् । कुसुमितवनराजीति भिन्नं वा पदम् । मधुपतिः माधवः । पशुपालैः गोपैः बलेन च सहितः सन् । एवंविधं वनमवगाह्य वेणुं चुकूजेत्यन्वयः ॥ २ ॥

तद् व्रजस्त्रिय आश्रुत्य वेणुगीतं महोदयम् ।
काश्चित् परोक्षं कृष्णस्य स्वसखीभ्यो न्यवेदयन् ॥ ३ ॥

सत्यधर्मीया — महोदयं महस्योत्सवस्योदयो येन तत् मह उत्सवस्तस्य दया दानं येन तदिति वा। वेणुगीतं तद् व्रजस्त्रियस्तद्व्रजस्त्रिय इति वाऽऽश्रुत्य काश्चित्परोक्षं दूरवर्तिनीभ्यः सखीभ्योऽन्ववर्णयन् ॥ ३ ॥

सुमनोरञ्जनी — स्मरस्य उदयः उद्रेको यस्मात् यच्छ्रवणात् । महोदय इति पाठेऽपि महः कामः । तादृशं वेणुगीतम् । आश्रुत्य काश्चिद्गोप्यः कृष्णस्य परोक्षम् । कृष्णचेष्टितमित्याकृष्यते । स्वसखीभ्योऽन्ववर्णयन् अकीर्तयन् ॥ ३ ॥

तद् वर्णयितुमारब्धाः स्मरन्त्यः कृष्णचेष्टितम् ।
नाशकन् स्मरवेगेन विक्षिप्तमनसो नृप ॥ ४ ॥

सत्यधर्मीया — कृष्णचेष्टितं स्मरन्त्यस्तद्वर्णयितुमारब्धाः । कर्तरि क्तः । स्मरवेगेन विक्षिप्तमनसो नाशकन्न समर्था अभवन् ॥ ४ ॥

सुमनोरञ्जनी — काश्चिच्च कृष्णचेष्टितं वर्णयितुमारब्धाः । कृष्णस्य स्मरंत्यः स्मरवेगेन विक्षिप्तमनसः चलितमनस्काः । वर्णयितुं नाशकन् ॥ ४ ॥

बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं
बिभ्रद्वासः कनककपिशं वैजयन्तीं च मालाम् ।
रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दैः
वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्तिः ॥ ५ ॥

सत्यधर्मीया — बर्हमेवापीडं शेखरोत्तमं यस्य तत् । नटवरस्य वपुः । कर्णयोः कर्णिकारं, कल्हारं, कनककपिशं वासो, वैजयन्तीं मालां च बिभ्रद्वेणो रन्ध्रान्रन्ध्राणि छिद्राणि सन्ति येषु ते प्रदेशा रन्ध्रास्तान् । रन्ध्रं श्वभ्रं वपा सुषिरित्यमरः । अधरसुधया पूरयन्गोपवृन्दैः सह । वृद्धो यूनेत्यादिवत् । गीतकीर्तिर्वादिभिः । स्वपदरमणं स्वपदैस्तदङ्कैः रमयति जनानिति तत् । वृन्दारण्यं वृन्दावनम् । गोपवृन्दैर्गीतकीर्तिरिति वा प्राविशत् । स्वामिन्पुरतः पङ्कादिकं जागृहीति गीता कीर्तिः पङ्कादिर्यस्य स इति वा । कीर्तिः प्रसादयशसोर्विस्तारे कर्दमेऽपि चेति विश्वः ॥ ५ ॥

सुमनोरञ्जनी — कीदृग्रूपं स्मरंत्य इति तत्सूचयन्वर्णनप्रकारं दर्शयति ॥ बर्हापीडमिति । बर्हः पिंछमेव आपीडं शिरोभूषणं यस्य तत् । नटवरस्य वपुरिव वपुः । बिभ्रत् । कर्णयोः कर्णिकारं कर्णभूषणं तन्नामकपुष्पं वा बिभ्रदिति प्रत्येकं सम्बध्यते । कनकमिव स्वर्णमिव कपिशं पिङ्गटं वासः।

वैजयन्तीं तत्संज्ञां मालां, वेणोः रंध्रान् सुषिराणि अधरसुधया पूरयन्निवेत्युत्प्रेक्षा । अधरनिहितवेणुरिति भावः । श्रीदेवीविवक्षया तु यथाश्रुतमेव । गोपवृन्दैः गीतकीर्तिः । स्वपदैः अंकितैः रमणं सुखकरम् । स्वपदेन रमत इति वा ॥ ५ ॥

बर्हापिच्छो वनचरवपुः कर्णयोः कर्णिकारः
सव्ये बाहौ निहितवदनः सज्जमन्यत्र हस्ते ।
भ्रूविन्यासाङ्गुलिभि रणयन् गापयन् गोपवृन्दान्
भूतग्रामं तर्हि रमयन् ब्रह्म गान्धर्वमेव ॥ ६ ॥

सत्यधर्मीया — बर्हैर्मयूरगरुद्भिरापिच्छा वेष्टनं यस्य सः । पिच्छा तु शाल्मले वेष्टे मण्डे चेति विश्वः । तेषां पङ्क्तिर्वा समूहो वा यस्य पङ्क्तौ । छटापूगेत्यादिः । स एव वनचरवपुर्गोपालकलेवरः । आन्तरङ्गिको भावस्तु नारायणतनुरिति । कर्णिकारो द्रुमोत्पलं सोऽस्यास्तीत्यर्श आद्यच् । कर्णिकारस्तु शम्याके कर्णिकारे द्रुमोत्पल इति विश्वः । तत्स्थलमाह ॥ कर्णयोरिति । अलुक्त्वेनैकपदं वा । सव्ये दक्षिणे निहितं वदनं यस्य येन वा सः । अन्यत्रान्यस्मिन्वामे सज्जं सम्बद्धं वेणुं स्वयं रणयन् भ्रूविन्यासश्चाङ्गुलयश्च भ्रूविन्याससहिताश्च ता अङ्गुलयश्च ताभ्यो भीर्यथा भवति तथा गान्धर्वं ब्रह्म भरतशास्त्रं गोपवृन्दान्गोपानां वृन्दं येषु ताञ्जनान् । अथ वृन्दं निकुरम्बं कदम्बकमित्यमरः । गापयन् भ्रूविक्षेपाङ्गुलिसूचनभीत्या गोपा अस्वरतालव्यत्यासं गायन्तीति भावः । द्विकर्मकोऽयं धातुः। भूतग्रामं जनसङ्घं तर्हि तदा रमयन्वृदारण्यं प्राविशदित्यन्वयः । अङ्गुलिभी रणयन्नित्यत्र रोरि ढ्रलोप इति दीर्घाभावश्छान्दस इति वा । गान्धर्वं ब्रह्म भ्रूविन्यासाङ्गुलिभिः अणयन्नुत्तानानुत्तानस्वरान्गमयन्ज्ञापयन्निति यावदिति वा । अणतीत्यणः पचाद्यजन्तः । अणं कारयतीत्यणयन् । प्रातिपदिकाद्धात्वर्थ इति णिच् इष्टवद्भावश्च टिस्थानिवद्भावान्नोपधावृद्धिः । कै गैशब्दे अस्मदादेच इत्यात्वेति ह्रीति पुगागमे गायन्निति भवति शतरीति मन्तव्यम् । ये भीतवद्विद्यमाना भिन्नं गानं कुर्वन्ति तान्प्रेरयन्गापयन्नित्युच्यते ॥ ६ ॥

सुमनोरञ्जनी — वनचराः गोपाः कर्णयोः कणिकारं यस्य सः । कण्ठे काल इतिवदेकमिति रत्नावली । अन्यत्र हस्ते वामहस्ते । सिज्जं वेणुम् । भ्रूविन्यासैः भ्रूविलासैः सह । अङ्गुलिभी रणयन् । गोपवृन्दान् । गान्धर्वं गन्धर्वशास्त्रोक्तं ब्रह्म गानप्रभेदम् । गापयन् गानार्थं प्रेरयन् स्वयं चाङ्गुलिभिः रणयन्निति भावः । अङ्गुलीभी रणयन्निति वक्तव्यम् । ह्रस्वता तु छन्दोभङ्गभयात्कृता । अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेदित्युक्तेः । भूतग्रामं रमयन् वनं प्राविशदिति पूर्वेणान्वयः । गान्धर्वं गन्धर्वैर्गानप्रभेदोपास्यं ब्रह्म श्रीकृष्णमिति वा ॥ ६ ॥

इति वेणुरवं राजन् सर्वभूतमनोहरम् ।
श्रुत्वा व्रजस्त्रियः सर्वा वर्णयन्त्योऽभिरेमिरे ॥ ७ ॥

तात्पर्यम् – 'श्रीदेवी वेणुमाविश्य रेमे कृष्णमुखाम्बुजे । पपौ च तद्गतं गीतं सुरा इतरभाण्डगा' इति तन्त्रभागवते ॥ ७ ॥

सत्यधर्मीया — इति वेणुरवं राजन्निति श्लोके व्रजयोषितामेव वेणुरवश्रवणमुख्याधिकारः प्रतीयते तथा गोप्यः किमाचरदयं कुशलं स्म वेणुरिति श्लोके च केवलं जडवेणोरेव माधवाधरोष्ठा-मृतपानभ्रान्तिश्च भविष्यत्यत एतदुभयनिरासाय तन्त्रभागवतवाक्यं पठन्ति ॥ श्रीदेवीति । श्रीदेवी रमा वेणुमाविश्य कृष्णमुखाम्बुजे रेमे । तद्गतं गीतं तद्रूपममृतं पपौ च । अत्र मुख्याधिकारिणी वेणुतनुः श्रीरेवेति भावः । सुरा इतरभाण्डगा इतरदधरसुधानास्पदं साक्षाद्यद्भाण्डं वेणुमूलं तद्गच्छन्तीति तद्गाः सुरा देवा इत्यर्थः । वेणुमूले धने पात्रे भाण्डं भूषाश्वभूषयोरिति यादवः । इतरालङ्कारगा इति वा । इतरेषां बलादीनां भाण्डानि वेणुमूलानीति वा ॥ ततश्चायं श्लोकार्थः ॥ हे राजन्! सर्वभूतमनोहरं वेणुरवं श्रुत्वा सर्वा व्रजस्त्रियो वर्णयन्त्योऽभिरेमिरे । औपचारिकं व्रजनारीणामभिर-मणमुक्तप्रमाणादिति ज्ञेयम् ॥ ७ ॥

सुमनोरञ्जनी — इति अस्मादेव हेतोः । अभिरेमिरे आननन्दुः । अभिरेभिर इति पाठे मनसा आलिलिङ्गुः ॥ ७ ॥

गोप्य ऊचुः—

अक्षण्वतां फलमिदं न परं विदामः
सख्यः पशूननुविवेशयतोर्वयस्यैः ।
वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं
यैर्यैर्निपीतमनुरक्तकटाक्षमोक्षम् ॥ ८ ॥

सत्यधर्मीया — व्रजगजगामिनीनां वर्णनप्रकारं वर्णयति ॥ अक्षण्वतामिति । यैर्यैर्जनैर्दृष्टिभिर्वयस्यैः सखिभिः सह पशून्गोष्ठेऽनुवेशयतोः प्रवेशयतोर्व्रजेशसुतयो रामकृष्णयोः । एकस्य कृष्णस्यैव ग्रहणे कलङ्कमावहेयुरिति तालाङ्कस्यापि ग्रहणमिति ज्ञेयम् । अनुवेणुजुष्टम् । अनुरक्तः स्निग्धः कटाक्षमोक्षो यस्मिंस्तत् वक्त्रं निपीतं तेषां हे सख्योऽक्षण्वताम् । श्रौतपदानुकृतिः । अष्टमाष्टकद्वितीयाध्यायत्रयोविंशतिवर्गीयैवमृग्विधृताज्ञानपादानुव्याख्यानेऽक्षण्वन्तः कर्णवन्त इत्यादिना

व्याख्याता चानो नुडिति सुधायाम् । साऽपि व्याकृता वाक्यार्थचन्द्रिकायाम् । तथा हि तैजसत्वादन्योभ्योऽङ्गेभ्यो व्यक्ततरं दृश्यत इति तथा च श्रूयते तस्मादेते व्यक्ततरे इवेति । तादृशाक्षियुक्ता अक्षण्वन्तस्तेषामिदं पानमेव फलं परमेतदितरन्नेति विदामः ॥ नपरं न विद्यते परं यस्मादित्यनुत्तमं वा विदामः । हे सख्य इत्यप्रतारणीयतां ध्वनयति । तेन चादोऽर्थस्य यथार्थता च ध्वन्यते । अक्षण्वतामिति विलक्षणपदनिधानेनाक्षण्वन्तः कर्णवन्त इति श्रुत्युक्तमुक्तसमतामेतेषां च सूचयामास व्यास इति मन्तव्यम् ॥ ८ ॥

सुमनोरञ्जनी — वर्णनप्रकारं विशदयति ॥ अक्षण्वतामिति । अक्षण्वतां चक्षुष्मतां फलमिदमेव नातः परमुत्तमं फलमस्तीति विदामः विद्मः । व्रजेशसुतयोः रामकृष्णयोः । कीदृशयोः । पशून् अनुनिवेशयतोः व्रजं प्रवेशयतोः । वक्त्रं, कीदृशम् । अनुवेणुजुष्टं अनु पश्चाद्वेणुना जुष्टम् । वेणुना अनुजुष्टं सेवितं वा । पुनः कीदृशम् । अनुरक्तः स्नेहयुक्तः कटाक्षमोक्षः यस्मिन् तत् । अनुरागेण स्नेहेन युक्तः कटाक्षमोक्षो यथा स्यात्तथेति वा । यैर्निपीतं तेषाम् । तेषामित्यनन्तरं अक्षण्वतामित्यारभ्य इत्येतदन्तं ज्ञेयम् ।॥ ८ ॥

चूतप्रवालबर्हस्तबकोत्पलाब्ज-
मालानुरक्तपरिधानविचित्रवेषौ ।
मध्ये विरेजतुरलं पशुपालगोष्ठ्यां
रङ्गे यथा नटवरौ क्व च गायमानौ ॥९॥

सत्यधर्मीया — चूतानां प्रवालाः पल्लवास्तैः । बर्हस्तबकैः पिच्छगुच्छैः । छन्दोच्छेदाय रेफः पृथगुच्चार्यः । उत्पलानि चाब्जानि च तेषां मालाभिश्चानुरक्तं संसक्तं यत्परिधानं पीतनीलवसनं तेन विचित्रौ वेषौ ययोस्तौ । पशुपालगोष्ठ्यां गोपालकसभायाम् । समज्या परिषद्गोष्ठी सभासमितिसंसद इत्यमरः । गावो वाचो वा तिष्ठन्त्यस्यामिति घञर्थे कः । अम्बाम्बेति षत्वम् । गौरादिङीष् । तत्रापि मध्ये क्वापि गायमानौ गायन्तौ रङ्गे नटवरौ यथा तथा यौ विरेजतुस्तयोर्वक्त्रमित्यतीतेनान्वयः । मध्येवीत्येकं पदं वीनां पक्षिणां मध्ये मध्येवि पारे मध्ये षष्ठ्या वेत्यव्ययीभावः । पशुपालगोष्ठ्यां रेजतुरित्यन्वयः । तेऽपि पक्षिणस्तत्र स्वत एवायाता इति वा क्रीडार्थं सङ्गृहीता इति वा तन्मध्य इत्युपपन्नम् । एतेन गोष्ठ्यामिति गोष्ठ्यैव तन्मध्य इति सम्भवत्यर्थे मध्ये इत्यतिरिक्तमिति निरस्तम् ॥ ॥ ९ ॥

सुमनोरञ्जनी — चूतप्रवालाः नवाम्रपल्लवाश्च, बर्हस्तबकाः पिच्छगुच्छाश्च, उत्पलानां नीलोत्पलानां अब्जानां च मालाश्च, अनुरक्तपरिधानानि कुसुम्भारुणप्रावरणानि च तैः विचित्रवेषौ नानावेषधारिणौ । पशुपालगोष्ठ्यां क च गोपशालायां गायमानौ विरेजतुः ॥ ९ ॥

गोप्यः किमाचरदयं कुशलं स्म वेणुः
दामोदराधरसुधासरसाग्रचगेयम् ।
भुङ्क्ते स्वयं यदवशिष्टरसौघमार्गे
हृष्टत्वचोऽश्रु मुमुचुस्तरवः सदर्भाः ॥१०॥

सत्यधर्मीया — हे गोप्य इति काश्चित्सम्बोध्य काचिद्वक्ति । अयं वेणुः किं कुशलं सुकृतमाचरत् चचार स्मातीते जन्मनि । स्मातीत इति विश्वः । प्राक् । कुशलं शिक्षिते क्षेमपर्याप्तसुकृतेषु चेति विश्वः । केनेत्थमूहसि मोहनदेह इत्यत आह ॥ दामोदरेति । दामोदरस्य यावधरावोष्ठौ तयोः सुधयाऽमृतेन स समो रसः सुधासरसोऽग्र्यैः श्रेष्ठैर्ब्रह्माद्यैर्गेयो गातुमर्हश्च तमोष्ठसम्बन्धिसुधा-रसममग्र्यगेयं भुङ्क्ते स्वयं पिबतीत्यर्थः । सशब्दस्य समार्थकत्वं कथमिति सखाऽपि सपत्नः सन्नावकाशं दिशेत् तव प्रष्टुं हृष्टत्वचः सन्त इव सदर्भास्तेषामेव रोमाञ्चरूपता ज्ञेया । ते यथाऽश्रु आनन्दोदकं मुञ्चन्ति तथा तरवो वृक्षा यदवशिष्टरसौघमार्गे येन वेणुनावशिष्टस्तत्पूर्वरितो यो रसौघो रसप्रवाहस्तद्वान्यो मार्गः पन्थास्तस्मिन्नश्रुरसविशेषं वाऽन्वयः ॥ १० ॥

सुमनोरञ्जनी — हे गोप्यः!अयं वेणुः वेणुस्थिता रमा । किं किञ्जातीयम् । कुशलं सुकर्म । आचरत्स्म । कुतः । यतः दामोदरस्य या अधरसुधा तया सरसं रसवत् अत एवाग्र्यं गेयं गीतं स्वयं भुङ्क्ते अनुभवति । अतः । अग्रगेयमित्यपि पठन्ति । तदा दामोदराधरसुधायां सरसा सानुरागा अग्रगा सर्वस्त्रीरत्नभूता रमापि इयं एतद्वेणुस्थिता सती दामोदराधरसुधासरसाग्रगेयं स्वयं भुंक्ते यतोऽत एतस्याः भोगाधिष्ठानभूतो वेणुः किं कुशलं आचरदिति आवृत्या योजनीयम् । दामोदराधरसुधायां याः सरसाः साभिलाषाः तासां मध्ये अग्रगा श्रेष्ठा अग्र्यत्वेन तिष्ठन्ती वा श्रीदेवी, तयैव ईयं प्राप्यं यतोऽतः दामोदराधरसुधासरसाग्रगा रमा । दामोदराधरसुधासरसाग्रगेयं स्वयं भुङ्क्ते खलु । परं तु इयं एतद्वेणुस्थिता सती भुंक्ते अतोऽयं वेणुः किं कुशलं आचरदिति वा । येन वेणुना अवशिष्टः अवशेषितो यो रसः तस्य ओघः प्रवाहो यस्मिन् तस्मिन्मार्गे विद्यमानाः । सदर्भाः दर्भैः अङ्कुरैः सहिताः सकुशा वा, तरवोऽपि । अश्रुमानन्दबाष्पं मुमुचुः । वेणुं वादयतः श्रीकृष्णस्य मार्गे विद्यामानाः तरवोऽपि तद्गीताकलनानन्दनिर्भराः आनन्दजलं मधुधारामिषेण मुमुचुरिति भावः । तदेतत्सर्वमुक्तमाचार्यचरणैः ।

श्रीदेवी वेणुमाश्रित्य रेमे कृष्णमुखाम्बुजे ।
पपौ च तद्गतं गीतं सुरा इतरभाण्डगाः ।। इति तन्त्रभागवत इति ।

इतराणि यानि भाण्डानि भूषणानि कौस्तुभादीनि तद्गाः सुराः । गीतं पपुरित्यर्थः । भाण्डं भूषणमात्रेऽपीति विश्वः । भाण्डं भूषाश्च भूषयोरिति च रत्नमाला । सुरा इत्यनेन तरवः सदर्भा इत्यस्य तात्पर्यं वर्णितम् । सुराः देवाः इतराणि वेणुव्यतिरिक्तानि भाण्डानि भाजनानि तरुदर्भादीनि तेषु गच्छन्ति तिष्ठन्तीति तथाविधाः सन्तो गीतं पपुरित्यप्युपदिशन्ति ।। १० ।।

वृन्दावनं सखि भुवो वितनोति कीर्तिं
यद् देवकीसुतपदाम्बुजलब्धलक्ष्मि ।
गोविन्दवेणुमनुमत्तमयूरनृत्यं
प्रेक्ष्याद्रतानुचरितान्यसमस्तसत्त्वम् ।। ११ ।।

सत्यधर्मीया — काश्चित्काश्चित्प्रति कथयन्ति । अथ का त्वं, चिकीर्षसि च किं मुनिवर्येतिवदनङ्गबाधयाऽनङ्गस्मरणेन बहूः प्रत्यप्येका प्राहैवमित्याह ।। सखीति । हे सखि! वृन्दावनं यद्यतो देवकीसुतपादाम्बुजलब्धलक्ष्मि देवकीसुतस्य पदाम्बुजे ताभ्यां लब्धा लक्ष्मीर्येन तत् । लक्ष्मेत्यपि लक्षणम् । लब्धसम्पल्लब्धचिह्नमित्युभयत्रार्थः । गोविन्दवेणुं तत्स्वरमन्वनुसारेण मत्ताः । अनेन गोविन्दस्य मेघसमतासमता तत्स्वरेणैतत्स्वरस्य सूच्यते । ते च ते मयूरास्तेषां नृत्यं च प्रेक्ष्याद्रतान्यनुचरितान्येतदनुसारीणि चरितानि येषां तान्यन्यानि सत्त्वानि प्राणिनो यस्मिंस्तत् । सत्त्वं प्राणिष्विति विश्वः । आद्रतौ सादरार्चितावित्यमरः । अतो भुवः कीर्तिं विस्तारयति । क्व च गायमानाविति पर्यन्तं किञ्चिन्मर्यादयोक्तवत्योऽत उत्तरं निर्लज्जा जनाः किं वा वदन्तु न इत्येकं प्रकृत्य स्तुवन्तीति तात्पर्यमवधेयम् । वनत्वेन पदाम्बुजलब्धसम्पत्कत्वं युक्तं, गोविन्देति वदत्सुदतीनां किञ्चिदेष्यज्ज्ञत्वं च सूचितमिति ज्ञेयम् । तन्नाम्न उत्तरत्र शचीशवितार्यत्वाल्लोकदृष्टचेति ।। ११ ।।

सुमनोरञ्जनी — अन्याः काश्चिदाहुः । हे सखि ! वृन्दावनं भुवः भूमण्डलस्य कीर्तिं स्वर्गाद्यपेक्षयाऽतिशयितं यशः वितनोति । कस्मात् । यत् देवकीसुतस्य पदाम्बुजेन अङ्कितेन लब्धा लक्ष्मीः शोभा येन तत् । अतः । गोविन्दस्य वेणुं वेणुस्वरं अनु अनुसृत्य प्रवृत्तं मत्तमयूरीणां नृत्यं प्रेक्ष्य । आद्रतानि स्वीकृतानि । क्रियमाणानीति यावत् । अनुचरितानि नृत्यानुकूलता-लमृदङ्गाद्यनुकरणानि यैस्तानि च । अन्यानि मयूरातिरिक्तानि समस्तसत्वानि प्राणिनः यस्मिन् तत् । समस्तानि सत्वानि वेणुनादं अनुसृत्य प्रवृत्तमत्तमयूरनृत्तानुकूलतालमृदङ्गादिशब्दमनुकुर्वन्ति स्मेति

भावः । अत्र मत्तपदेन नीलनीरदश्यामे श्रीकृष्णे मयूराणां मेघभ्रान्त्या नर्तनं युक्तमिति व्यञ्जयति ॥ ११ ॥

धन्याः सुमूढमतयोऽपि हरिण्य एता-
यन्नन्दनन्दनमुपात्तविचित्रवेषम् ।
आपीय वेणुरचितं च सकृष्णसाराः
पूजां दधुर्विरचितां प्रणयावलोकैः ॥ १२ ॥

सत्यधर्मीया — एताः हरिण्यः कुरङ्ग्यः सुमूढमतयः पशुत्वात्सुमूढा कार्याकार्यविचारातिमन्दा मतिर्यासां ताः सत्योऽपि यद्यत उपात्तविचित्रवेषं नन्दनन्दनं वेणुरिणितं रणितं रचितमिति समार्थाः पाठाः स्वरसाः । आपीय कर्णपुटैरास्वाद्य सकृष्णसाराः सस्वपतयः । अनेन स्वपतीननागतानागतांश्चेदपि तद्वत्सहेयुरिति च कटाक्षयन्ति ता इति ध्वनयति । प्रणयावलोकैः सस्नेहनिरीक्षणैर्विरचितां निर्मितां पूजां सपर्यामिदं पर्यायतो दधुः । उद्धृतोत्तमाङ्गतया दधुरित्युक्तिः । अतो धन्याः । धन्या इत्यनेन कृष्णमतित्वेऽपि किन्न हरिमतयस्ता इति शङ्का आतङ्कः । धन्यो हरिर्यासामस्तीत्यर्शं आद्यचि कृष्णस्य हर्यात्मकत्वात्तन्मतिमत्त्वे तन्मतिमत्त्वमिति सूच्यते । अनपेक्षो गुणैः पूर्णो धन्य इत्युच्यते बुधैरिति शब्दनिर्णय इति चतुर्थतात्पर्योक्तेः । त्वं धन्यस्त्वमाश्चर्य इत्यादेः। येनैवमस्मन्नायकादयो धन्या इति परिदृश्यमानाः सुमूढमतय इत्यप्यान्तरङ्गिको भावो भामिनीनां बोध्यः ॥ १२ ॥

सुमनोरञ्जनी — एताः हरिण्यः । सु अत्यन्तं मूढा विवेकरहिता मतिः बुद्धिर्यासां तथाविधा अपि धन्याः कृतार्थाः । कुतः । यतः यस्मात् सकृष्णसाराः कृष्णसारेण स्वपुरुषेण सहिताः सत्यो वेणुना रचितं गीतम् । वेणुरणितमित्यपि पाठो दृश्यते । श्रवणपुटाभ्यामापीय प्रतिदिनं उपात्ताः स्वीकृता विचित्राः वेषाः येन तं नन्दनंदनमुद्दिश्य । प्रणयावलोकैः सप्रेमनिरीक्षणैः ह्यस्तने विरचितामेव पूजां पुनर्दधुः चक्रुः। अत इति । स्वस्वपतिभिः सहिताः हरिण्यः प्रणयावलोकलक्षणपूजां श्रीकृष्णे पुनः पुनः वितेनुः । अतो धन्याः । वयं तु तस्मिन्सप्रणया अपि पतीनां मूढत्वेन तैः सार्धं पुनः पुनः कर्तुं न शक्नुमः । अतो अधन्या इति भावः ॥ १२ ॥

कृष्णं निरीक्ष्य वनितोत्सवरूपसारं
श्रुत्वा च तत्क्वणितवेणुविचित्रगीतम् ।
देव्यो विमानगतयः स्मरनुन्नसारा
भ्रश्यत्प्रसूनकबरा मुमुहुर्विनीव्यः ॥१३॥

सत्यधर्मीया — वनितोत्सवरूपसारं वनितानामुत्सवो येन तद्रूपं येषां तेषु सारं श्रेष्ठं कृष्णं निरीक्ष्य दृष्ट्वा । तेन क्वणितः शब्दितो यो वेणुस्तस्य विचित्रं नानाविधं स्वरोत्तरतानुत्तरतायापनेनाद्भुतं गीतं श्रुत्वा । विमानगतयो विमानस्थाः । स्मरनुन्नो मन्मथमथितः सारो धृतिर्यासां ताः । भ्रश्यन्ति प्रसूनानि येभ्यस्ते कबराः केशपाशा यासां ताः । कबरः केशपाशः स्यात्कबरं लवणाम्लयोः । कबरी केशविन्यासशाकयोरिति हैमः । विनीव्यो विगता नीव्यो वस्त्राणि तद्ग्रन्थयो वा यासां ताः सत्यो मुमुहुः । नीवी वस्त्रेऽशुकग्रन्थयोरिति यादवः । नारीणां पारवश्यान्न परस्परश्लोकसङ्गमने मनः खेदनीयमिति केचित् । धन्या इति चान्वय इति केऽपि ॥ १३ ॥

सुमनोरञ्जनी — वनितानां उत्सवो यस्मात् तच्च तत् रूपसारं साररूपं श्रेष्ठसौन्दर्यं यस्य तमित्यर्थः । कृष्णं निरीक्ष्य । तेन क्वणितः सन्नादितः यो वेणुः तत्करणकं यद्विचित्रगीतं नानास्वरमिश्रितं गीतं च श्रुत्वा । विमानैः गतिः गमनं यासां ताः देव्यः देवस्त्रियः । स्मरेण नुन्नं नष्टं सारं स्थैर्यं मनःस्थैर्यं यासां ताः तथा । भ्रश्यन्ति प्रसूनानि पुष्पाणि येभ्यस्तथाविधाः कबराः केशपाशाः यासान्तास्तथाविधाः । विगताः विगलिताः नीव्यो यासां तथाविधाः सत्यो मुमुहुः ॥१३॥

गावश्च कृष्णमुखनिर्गतवेणुगीत-
पीयूषमुत्तभितकर्णपुटैः पिबन्त्यः ।
शावाः स्नुतस्तनपयः कवलाः स्म-
तस्थुर्गोविन्दमात्मनि दृशाऽश्रुकणान् स्रवन्त्यः ॥ १४ ॥

सत्यधर्मीया — गावः शावाः स्ववत्सास्तत्स्मरणेन स्नुतं स्तनपयः स्नुताः कबलाः मुखस्थापितयवसग्रासा यासां ताः । ग्रासस्तु कबलः पुमानित्यमरः । गोविन्दमात्मनि स्वमनसि प्रस्थाप्य दृशा अश्रूणि स्रवन्त्य उत्तभितकर्णपुटैरुत्तभितानि स्तब्धीकृतानि कर्णपुटानि तद्रूपपत्राणि तैः । ग्रसितस्कभितोत्तभितेति निपातनादिडागमो वैदिके तत्प्रायत्वादत्रानुवादस्तस्यैवेति ज्ञेयः । पिबन्त्यः सत्यस्तस्थुः कर्तव्यमूढा अवतस्थिर इति भावः । स्म स्मरन्त्य इति वा । शावा इति पाठे तेऽपि पिबन्तोऽश्रुकणान्दृशा स्रवन्तो गोविन्दमात्मनि स्म स्मरन्तस्तस्थुरिति योजना ॥ १४ ॥

सुमनोरञ्जनी — उत्तभितैः उन्नमितैः कर्णपुटैः । कृष्णमुखनिर्गतवेणुगीताख्यं पीयूषं पिबन्त्यः । सानन्दनम्रतनवः कवलाः कवलसहिताः । शावाः स्नुतस्तनपयः कवला इति पाठे तु । शावाः वत्साः । स्नुतं यत् स्तनपयः तत्कवलाः गृहीतपयोलक्षणकवलमात्रा एव तस्थुरित्यर्थः । गोविन्दं आत्मनि हृदि कृत्वा ॥ १४ ॥

प्रायो बताम्ब मुनयो विहगा वनेऽस्मिन्
कृष्णेक्षणास्तदुदितं कलवेणुगीतम् ।
आरुह्य ये द्रुमभुजान् रुचिरप्रवालान्
शृण्वन्ति मीलितदृशो विगतान्यवाचः ॥ १५ ॥

सत्यधर्मीया — हे अम्ब मातः । अस्मिन्वने ये कृष्णेक्षणा विहगाः विहायसः । विह चेति विहादेशो गमेर्डच् । विहायसो विहादेशो वक्तव्य इति विहगः । रुचिरप्रवालान्मनोहरपल्लववतो द्रुमभुजान्वृक्षस्कन्धानारुह्य मीलितदृशो, विगतान्यवचो विगतास्त्यक्ता अन्या वाचो वाण्यो यैस्ते तथा तदुदितं कृष्णोद्भूतं कलं मधुरं वेणुगीतं शृण्वन्तीति प्रायो मुनयो बताश्चर्यम् । कृष्णेक्षणत्व-विगतान्यवचस्त्वादिभिः साम्यात्तत्त्वोत्प्रेक्षणं युक्तमिति भावः ॥ १५ ॥

सुमनोरञ्जनी — हे अम्ब! अस्मिन्वने ये विहगाः ते प्रायो मुनयः । कुतः । कृष्णेक्षणाः कृष्णे ईक्षणानि येषां ते । ये रुचिरप्रवालान् । द्रुमाणां भुजान् स्कन्धान् आरुह्य, विगताः अन्यविषयवाचो येभ्यस्ते मीलितदृशश्च सन्तो, तेन कृष्णेन उदितं वेणुगीतं शृण्वन्ति यतोऽतः । मुनयोऽपि श्रीकृष्णे दत्तेक्षणाः सन्तो विगतान्यवाचो मीलितदृशश्च भवन्ति ॥ १५ ॥

नद्यस्तदा तदुपधार्य मुकुन्दगीत-
मावर्तलक्षितमनोभवभग्नवेगाः ।
आलिङ्गनप्रमुदितोर्मिभुजैर्मुरारेः
गृह्णन्ति पादयुगलं कमलोपहाराः ॥ १६ ॥

सत्यधर्मीया — यदा, मुकुन्देन गीतमिति मुकुन्दगीतं तत्तदा नद्य उपधार्य, आवर्तेनाम्भसां भ्रमेण लक्षितः सूचितो मनोभवस्तेन भग्नो वेगः प्रवाहो यासां ताः । आलिङ्गनप्रमुदितोर्मिभुजैः । आलिङ्गनमत्र स्पर्शनमात्रम् । तेन प्रमुदिता ऊर्मय एव भुजास्तैर्मुरारेः पादयुगलं कमलोपहाराः कमलान्येवात्मोत्थान्युपहाराः पूजासाधनानि यासां ता गृह्णन्ति । भक्ता अप्येवमिति तथा नद्यो व्यद्दश्यन्तेति भावः ॥ १६ ॥

सुमनोरञ्जनी — नद्योऽपि तत् मुकुन्दगीतम् । उपधार्य । आवर्त इति लक्षितः ख्यातः आवर्ताख्यो मनोभवः कामः तेन भग्नवेगाः । वस्तुतः आवर्तेन भग्नवेगानाम् । मनोभवभग्नवेगत्वस्य आवर्ते मनोभवत्वस्य चोत्प्रेक्षाः सत्य आलिङ्गने प्रमुदितैः प्रमोदयुक्तैः आलिङ्गनोत्सुकैरिति यावत् ऊर्मिभुजैः तरङ्गाख्यभुजैः । मुरारेः पादयुगलं गृह्णन्ति । कमलान्युपहरन्तीति कमलोपहाराः ॥१६॥

दृष्ट्वाऽऽतपे व्रजपशून् सह रामगोपैः
सञ्चारयन्तमनु वेणुमुदीरयन्तम् ।
प्रेमप्रवृद्धहृषितः कुसुमावलीभिः
सख्युर्व्यधात् स्ववपुषाऽम्बुद आतपत्रम् ॥ १७ ॥

सत्यधर्मीया — अम्बुदो मेघः । सख्युः कृष्णस्य । सावर्ण्यं स्वरादेः । आतपे, रामश्च गोपास्तदितरे च तैः सह व्रजपशूंश्चारयन्तं दृष्ट्वा । वेणुरवाकर्णनमपि भाविकार्यहेतुरिति ज्ञेयम् । प्रेमप्रवृद्धं हृषितं यस्य स समञ्चितरोमाञ्चः । हृषेर्लोमस्वितीट् । कुसुमावलीभिः स्वेन सह नभस्वदानीतपुष्पपङ्क्तिभिः सह स्ववपुषा पूषाच्छादकेनातपत्रं व्यधाच्चकार ॥ १७ ॥

सुमनोरञ्जनी — अम्बुदो मेघः । आतपे पशून् सञ्चारयन्तम् । अनु अनुसृत्य । वेणुं उदीरयन्तम् । श्रीकृष्णं दृष्ट्वा प्रेम्णा प्रवृद्धं हृषितं हर्षो यस्य तथाभूतः सन् । श्यामवर्णसाम्यात् लोकार्तिहरणसाम्याद्वा । सख्युः मुरारेः श्रीकृष्णस्य । कुसुमावलीभिः तुषारैर्वा सह । मेघपुष्पं घनरसमित्यभिधानात् । स्ववपुषा आतपत्रं स्ववपुर्लक्षणं छत्रं व्यधात् ॥ १७ ॥

पूर्णाः पुलिन्द्य उरुगायपदाब्जराग-
श्रीकुङ्कुमेन दयितास्तनमण्डितेन ।
तद्दर्शनस्मररुजस्तृणरूषितेन
लिम्पन्त्य आननकुचेषु जहुस्तदाधिम् ॥ १८ ॥

सत्यधर्मीया — पुलिन्द्यः पुलिन्दानां शबराणामिमाः पुलिन्द्यः । प्राग्रामफलार्पणेनास्मदार्यासपर्यां चचाराप च सतीं गतिमिति श्रुण्मः कथाः स एवायमिति वयमप्येतद्दृष्ट्या धन्यमूर्धन्याः स्यामेति ता आगता इति द्योतयितुं पुलिन्द्य इति ग्रन्थकृन्न्यभांत्सीदिति तात्पर्यमवधेयम् । तद्दर्शनस्मररुजस्तस्य कुङ्कुमस्य यद्दर्शनं तेनाविर्भूतो यः स्मरस्तदुपद्रवरूपा रुग्रोगो यासां ताः स एव रुग्यासां ताः । दयितायाः कस्याश्चिद्गोपयोषितः स्तनयोर्मण्डितेन भूषणतया सम्बद्धेनोरुगायो महत्स्तुत्यस्तस्य पदाब्जाभ्यां रागोऽरुणिमा यस्य स चासौ श्रीमांश्चासौ कुङ्कुमश्च तेन । स क्व, क्व चैता इत्यतो घटनप्रकारमाहुः ॥ तृणरूषितेनेति । तृणेषु मार्गगेषु रूषितेन सम्बद्धेनाननकुचेषु लिम्पन्त्यः सत्यस्तदाधिं तन्मनोभवभवमनोव्यथां यतो जहुस्तत एताः पूर्णाः कृतकृत्यास्तत्पदाब्जयो रागार्थं लिप्तः श्रीमान्कुङ्कुमस्तेनेति वा । क्रीडासमये रूषणं तृणानां मन्तव्यम् । नन्वधुनाऽपि मधुनाथस्य विधुमुखीमुखानवलोकनाद्दयितास्तनमण्डितताकथनं कथमिति चेत् । सत्यम् । एकान्ततः

कान्तासङ्गतिसम्भवात् । न चैतद्व्यापृतस्य बादरायणस्यैतदनुक्तौ कारणाभावादिदमनुपपन्नमेवेति वाच्यम् । दयिता च योग्यतयावनिस्तस्याः स्तनाश्च पर्वता गिराववस्थाय गिरा गा आव्हयत उरुगायस्य पदाब्जरागश्रीमत्कुङ्कुमेन तत्र मण्डितेन तथा तृणरूषितेन च ता अपि पर्वतकृतनिकेता इति सम्भवीदं लेपनम् । समुद्र वसने देवि पर्वतस्तनमण्डिते । विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व म इत्यादेरिति समादधते ॥ १८ ॥

सुमनोरञ्जनी — पुलिंद्यः शबरांगनाः । पूर्णाः कृतकृत्याः । कुतः । तस्य श्रीकृष्णस्य दर्शनेन जातः स्मररुक् मन्मथतापो यासां ता अपि, दयितायाः प्रियायाः गोप्याः स्तनयोर्मण्डितेन लिप्तेन । अनन्तरं उरुगायस्य श्रीकृष्णस्य पदाब्जरागेण श्रीः कान्तिर्यस्य तेन कुङ्कुमेन । कीदृशेन । सञ्चरणसमये तृणेषु रूषितेन लिप्तेन, आननेषु कुचेषु च लिंपन्त्यः । तदाधिं स्मररुग्जनितमानसव्यथां जुहुर्यतोऽत इति ॥ १८ ॥

हन्तायमद्रिरबला हरिदासवर्यो
यद् रामकृष्णचरणस्पर्शप्रमोदः ।
मानं तनोति सहगोगणयोस्तयोर्यत्
पानीयसूयवसकन्दरकन्दमूलैः ॥ १९ ॥

सत्यधर्मीया — पुनः सर्वाः सम्बोध्यैका कथयति ॥ हन्तेति । हे अबलाः! अयमद्रिर्हरिदासवर्य इव दृश्यते । हन्ताश्चर्यम् । कुत इत्यत इत इत्यप्याह ॥ यद्रामेति । इत आयान्ता इति यन्तौ तौ च तौ रामकृष्णौ च तयोः रामकृष्णयोश्चरणानां स्पर्शाज्जातः प्रमोदो यस्य सः । किञ्च सहगोगणयोस्तयोर्मानं सत्कारं तनोति । तत्सत्कारसाधनमभिधत्ते ॥ पानीयसूयवसकन्दरकन्दमूलैरिति। पानीयं निर्झरवारि । ऋग्वेदे द्वितीयाष्टके तृतीयाध्याये एकविंशतिमवर्गे । सूयसाद्भगवतीति । तथा यजुर्वेदे प्रथमाष्टकसप्तमप्रपाठके सूयसं सूदकमिति प्रयोगात्तदनुकृतिः । माधवेन च शोभनानि यवसानीति व्याख्यातत्वाच्च सूयवसमिति सम्भवति । यद्वा सु शोभनानि तथा उ ऊर्ध्वप्ररोहाणि यवसानि तृणानि कन्दरो गुहागृहं कन्दमूलैः सूरणोशीराद्यैर्यत्तत इति हरिदासा अप्येवं सभाजयन्ति भगवन्तमिति तत्त्वमद्रेरिति मन्तव्यम् । यद्रामकृष्णचरणस्पर्शप्रमोदो यन्मानं तनोतीति यच्छब्दद्विकान्वयो वा ॥ १९ ॥

सुमनोरञ्जनी — हे अबलाः । अयं अद्रिः । हरिदासेषु वर्यः श्रेष्ठः । कस्मात् । ययोः रामकृष्णयोः चरणस्पर्शेन प्रकृष्टमोदः सन् । सहगोगणयोः तयोः । पानीयैः पानयोग्यैः अम्बुभिः सूयवसैः शोभनतृणैः कन्दरैः गुहाभिः कन्दमूलैश्च करणैः मानं पूजां तनोत्यत इति ॥ १९ ॥

गा गोपकैरनुवनं नयतोरुदार-
वेणुस्वनैः कलपदैस्तनुभृत्सु सख्यम् ।
अस्पन्दनं गतिमतां पुलकस्तरूणां
निर्योगपाशकृतलक्षणयोर्विचित्रम् ॥ २० ॥

सत्यधर्मीया — गोपकैः सहानुवनं गा नयतोः कलपदैरुदारवेणुस्वनैः । निर्योगपाशकृतलक्षणयोर्निर्योगपाशः क्षेपणीरज्जुस्तेन कृतं लक्षणं चिह्नं ययोस्तयोः स्कन्धद्वन्द्वासञ्जिततद्रज्ज्वोर्गतिमतां जङ्गमानामस्पन्दनं तत्परवशतया किञ्चिच्चलनाभावः । तथा तरूणां स्थावराणाम् । पुलक इति पाठः। पुलकः कृमिभेदे स्यात्तल्पेऽश्रमणिदोषयोः । गजात्तपिण्डे रोमाञ्चे हरिताले शिलान्तर इति विश्वः । पुलको रोमाञ्चनमिति तनुभृत्सु सख्यं विचित्रं चेतनाचेतनीभवनं भवनमचेतनस्य चेतनधर्मतयेति चित्रं सख्यं पश्यतेति सखीः प्रति सखी वदति ॥ २० ॥

सुमनोरञ्जनी — गोपकैः सह गाः अनुवनं नयतोः सञ्चारयतोः । निर्योगः गवादिनियोजनार्थश्चर्ममयरज्जुः, पाशाश्च तैः कृतलक्षणयोः कृतगोपालचिह्नयोः । वस्तुतो महात्मनोः। तनुभृत्सु प्राकृतशरीरधारिषु गोपालेषु अस्मदादिषु वा सख्यं विचित्रम् । किं च कलपदैः अव्यक्तमधुरपदैः उदारवेणुस्वनैः क्रियमाणं द्वयं अतीव चित्रम् । किं तत् द्वयम् । यत् गतिमतां जङ्गमानां अस्पन्दनं चलनाभावरूपस्थावरधर्मभजनम् । तरूणां पुलकं रोमांचनं जङ्गमधर्मभजनं चेति ॥ २० ॥

एवंविधा भगवतो या वृन्दावनचारिणः ।
वर्णयन्त्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः ॥ २१ ॥

इति श्रीमद्भागवते दशमस्कन्धे एकोनविंशोऽध्यायः ।

सत्यधर्मीया — या वृन्दावनचारिणो भगवत एवंविधाः क्रीडा मिथः परस्परं वर्णयन्त्यो गोप्यस्तन्मयतां सो मयं प्रधानं येषां ते तथा तेषां भावस्तन्मयता तां तत्स्वामिकतां ययुः । मयं प्रधानमुद्दिष्टमिति बृहदारण्यकभाष्यतृतीयस्कन्धतात्पर्याद्युक्तेः । स मयं प्रधानं यासां ता इति वा तन्मयास्तासां भावः ॥ २१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे एकोनविंशोऽध्यायः ॥ १०-१९ ॥

सुमनोरञ्जनी — वृन्दावनचारिणो भगवतः याः क्रीडाः ताः मिथः अन्योन्यं रहसि वा वर्णयंत्यः तन्मयतां तदेकमनस्कतां ययुरिति सम्बन्धः ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां एकोनविंशोऽध्यायः ॥ १०-१९ ॥

अथ विंशोऽध्यायः

श्रीशुक उवाच—

हेमन्ते प्रथमे मासि नन्दव्रजकुमारिकाः ।
चेरुर्हविष्यं भुञ्जानाः कात्यायन्यर्चनव्रतम् ॥ १ ॥

सत्यधर्मीया — भगवद्भजनमेव तत्प्रसादजननं तदपि न वेदादिकवेदितृकृतमेवेति नियम इत्यावेदयितुं सुदत्यस्तत्कृत्वा प्रसादमापुरिति प्रतिपाद्यते । तत्रादौ मनोनियामिका भवानीति तत्स्थिरतायै पूर्वमनन्तरमनन्तप्राप्तिमङ्गलदा सर्वमङ्गलेति तदर्चनप्रकारमाह ॥ श्रीशुक इति । हेमन्ते मार्गशिरः पुष्यमासात्मके ऋतौ प्रथमे मार्गशीर्षमासि । नन्दव्रजे विद्यमानाश्च ताः कुमारिकाश्च । हविष्यं संयावाद्यन्नं होमशिष्टं भुञ्जानाः । कात्यायिन्या अर्चनव्रतं चेरुः । कतस्यापत्यं कतेति दक्षस्य नामान्तरम् । हिमवदाह्वयान्तरं वा । गर्गादित्वाद्यञ् । सर्वत्र लोहितादिकतन्तेभ्य इति ष्युषित्वाङ्ङीष् । उमा कात्यायनी गौरीत्यमरः । उमा कात्यायनी दुर्गा काली हैमवतीश्वरी । सती कालञ्जरी गोत्रेति वाचस्पतिः ॥ १ ॥

सुमनोरञ्जनी — अन्यदेवताभजनमपि भगवत्प्रीतिकामनया कृतं भगवत्प्रसादजनकं भवतीति ज्ञापयितुं व्रजकुमारिकाचरितकात्यायिन्यर्चनाप्रकारं, तासु भगवत्प्रसादप्रकारं दर्शयत्यस्मिन्नध्याये । नन्दव्रजे विद्यमानाः कुमारिकाः हैमन्ते हिमन्तऋतुघटके । प्रथमे मासि मार्गशीर्षे । यद्वा हैमन्ते प्रत्यासन्ने । तस्मात्प्रथमे पूर्वस्मिन् मासि कार्तिक इत्यर्थः । पदरत्नावली तु कार्तिककृष्णपक्षस्य पौर्णम्यन्तमासपक्षे हिमन्तऋत्वन्तर्गतत्वेन तद्विवक्षया प्रवृत्ता । तत्पक्षे तस्य मार्गशीर्षकृष्णपक्षत्वेऽपि कार्तिके मासीति व्याख्यानं दाक्षिणात्यानां सुज्ञानार्थं मन्तव्यम् । कात्यायिन्याः उमायाः अर्चनाख्यं व्रतम् । अर्चनायां व्रतं नियमं वा ॥ १ ॥

आप्लुत्याम्भसि कालिन्द्या जलान्ते चोदितेऽरुणे ।
कृत्वा प्रतिकृतिं देवीमानर्चुर्नृप सैकतीम् ॥ २ ॥

सत्यधर्मीया — कालिन्द्या अम्भस्याप्लुत्य स्वयं स्नात्वा । अनेन सावर्ण्यादिव तत्कृतोपकारा सर्पापसर्पणादियमपि कामितकृष्णलक्षणमतिदात्री स्यादिति भावो भामिनीनां सूच्यते । अरुणे उदिते तस्यैव सिद्धिसमयत्वात् । हे नृप ! कालिन्द्या जलान्ते स्वपुलिने । लीला कल्पेद्भगवतेति सैकतीमित्युक्त्या ध्वन्यते । तटे सैकतीं सिकतामयीं प्रतिमां कृत्वा देवीं तदन्तरावाहितामानर्चुरपूजयन् ॥ २ ॥

सुमनोरञ्जनी — तदितिकर्तव्यतासहितमर्चनाप्रकारमाह ॥ आप्लुत्येति । अरुणे उदिते सति । तदानीमेव कालिन्द्याः अम्भसि । आप्लुत्य स्नात्वा । जलान्ते जलसमीपे सैकतीं प्रतिमां सिकतात्मिकां प्रतिकृतिं कृत्वा देवीं आनर्चुरित्यन्वयः ॥ २ ॥

गन्धैर्माल्यैः सुरभिभिर्बलिभिर्धूपदीपकैः ।
उच्चावचैश्चोपहारैः प्रवालफलतण्डुलैः ॥ ३ ॥

सत्यधर्मीया — अर्चनचर्चनमेतैरित्याह ॥ गन्धैरिति । माल्यैर्मालाभिः पृथक्कुसुमैश्च । सुरभिभिरिति योग्यसर्वान्वयि । बलिभिः कात्यायनीभृत्यपूजाभिरेवमुच्चावचैरनेकप्रकारैः । प्रवालाः किसलयाः फलानि तण्डुलाश्च तैरुपहारैरानर्चुरित्यतीतेनान्वयः ॥ ३ ॥

सुमनोरञ्जनी — सुरभिभिः सुगन्धिभिः । माल्यैः पुष्पैः । बलिभिः नैवेद्यैः । परिवारदेवतापूजाभिरिति पदरत्नावल्याम् । प्रवालाः विद्रुमाः । फलानि नारिकेलजम्बीरादीनि । तण्डुलाश्च तद्रूपैः उच्चावचैः उपहारैः चैलाञ्चलपूरणादिभिः ॥ ३ ॥

कात्यायनि महामाये महायोगिन्यधीश्वरि ।
नन्दगोपसुतं देवि पतिं मे कुरु ते नमः ॥ ४ ॥

सत्यधर्मीया — तत्र मन्त्रमिममिमाः समा उमामुद्दिश्य जेपुरित्याह ॥ कात्यायनीति । महामाये महती च साऽमायाऽकपटप्रवृत्तिर्यस्याः सा तत्सम्बुद्धिः । महाशक्तिमतीति वा श्रेष्ठोपायवतीति । महायोगिनी स्वामिनीति । अधीश्वरि हे देवि! नन्दगोपसुतं मे पतिं कुरु । मम युष्माभिः क्रियमाणोचितापचितिः केत्यत आहुः ॥ ते नम इति । म इति प्रातिस्विकमेकैकस्याः प्रार्थनेत्येकवचनोपपत्तिः । आन्तरङ्गिको भावश्चेतरस्या अस्तु वा माऽस्त्वित्यत्येवानेन ध्वन्यते । सापत्न्यं

स्नेहापवाहकमिति लोकप्रसिद्धेरिति केचित् । आन्तरङ्गिको भावश्च नैतन्मात्रप्रार्थना किन्तु रमामपि । हे मे इति सम्बोध्य प्रार्थयामासुरिति वाऽवसेयः । तदावेशं विना श्रीशसम्बन्धासम्भवात् । ऋते रमां जातु ममाङ्गसङ्गयोग्याङ्गना नैव सुरालयेऽपीत्याद्युक्तेः । ते मः शिवो न इव पतिं नन्दगोपसुतं कुरु । मः शिवे मा रमायां च मा निषेधेऽव्ययं मतम् । मासे च समये चन्द्रे यमे वेधसि मं विष इति विश्वः । यथा तव धवो भवस्तथा नन्दनन्दनं मे पतिं कुरु । ते नमोऽस्तु ॥ ४ ॥

सुमनोरञ्जनी — प्रत्येकप्रार्थनान्मे इत्येकवचनं युज्यते ॥ ४ ॥

इति मन्त्रं जपन्त्यस्ताः पूजां चक्रुः कुमारिकाः ।
उषस्यभ्येत्य ताः स्वैरमन्योन्याबद्धबाहवः ॥ ५ ॥

सत्यधर्मीया — कुमारिका इत्येवंरूपं मन्त्रं जपन्त्य उषसि प्रातः । स्वैरं यथेच्छम् । स्वादीरेरिणोरिति वृद्धिः । अन्योन्यमाबद्धा बाहवो यासां ताः । गतमन्योन्येति । अभ्येत्य कालिन्दीम् । तास्ता इव पूजाश्चक्रुः । तासां ता एवोपमानरूपा इत्यन्वयः । तच्छब्दस्य यद्विभक्तिकवचनान्तं यत्पदं तदन्तं तल्लिङ्गविभक्तिकस्यैवार्थकता प्राक् प्रथमस्कन्धगततद्वै धनुस्त इषव इति श्लोकतात्पर्योदाहृतिपूर्वकमुपपादिताऽनुसन्धेया । अन्यथा तच्छब्द एक एवालमतिरिच्यत एक इति स्यात् । यदा कदाचिदुषस्यभ्येति कृष्ण इति स्वयमता गता इति वा ॥ ५ ॥

सुमनोरञ्जनी — उषसि ब्राह्मे मुहूर्ते । उत्थायाभ्येत्येति पाठे पूजां चक्रुरिति पूर्वेणान्वयः । अन्योन्याबद्धबाहवः परस्परं सन्न्यस्तबाहवः अन्योन्यं गृहीतपाणयो वा ॥ ५ ॥

कृष्णमुच्चैर्जगुर्यान्त्यः कालिन्द्यां स्नातुमन्वहम् ।
एवं मासव्रतं चेरुः कुमार्यः कृष्णचेतसः ॥ ६ ॥

सत्यधर्मीया — कालिन्द्यामन्वहं स्नातुं यान्त्य उच्चैः कृष्णं जगुः । अनेन निर्लज्जता द्योत्यते । उच्चैर्गुणयुतमिति वा । एवं मासव्रतं कृष्णचेतसः कुमार्यश्चक्रुः ॥ ६ ॥

सुमनोरञ्जनी — कालिन्द्यां स्नातुं यान्त्यः । कृष्णं उच्चैः जगुः । एवं उक्तप्रकारेण व्रतं नियमम् । मासं एकमपि दिनमविहाय मासपर्यन्तम् । कालाध्वनोरत्यन्तसंयोगे द्वितीया । चेरुः चक्रुः । नन्दस्नुषाः भूयास्मेत्याशयेन भद्रकालीं गौरीमानर्चुश्चेति ॥ ६ ॥

भद्रकालीं समानर्चुर्भूयान्नन्दसुतः पतिः ।
नदीं कदाचिदागत्य तीरे निक्षिप्य पूर्ववत् ।
वासांसि कृष्णं गायन्त्यो विजह्रुः सलिले मुदा ॥ ७ ॥

सत्यधर्मीया — नन्दसुतः पतिर्भूयादिति भद्रकालीं समानर्चुः । भूयान्नन्दस्नुषा इतीति काचित्कः पाठः । तत्र नन्दस्नुषा नन्दनभार्या भूयाद् भूयास्मेत्यर्थः । पुरुषवचनव्यत्यासो बहिः स्नुषा इत्यन्तस्त्वेकाऽहमेव स्नुषा स्यामितीत्येकवचनबहुवचनोपपत्तिश्च ज्ञेया । कदाचिन्मासमध्य एव । वासांसि तीरे निक्षिप्य कृष्णं मुदा गायन्त्यः सलिले विजह्रुः । पूर्ववदिति, निक्षिप्येत्यत्र गायन्त्य इत्यनेन विजह्रुरित्यनेनाप्यन्वेति ॥ ७ ॥

सुमनोरञ्जनी — कदाचित् नद्यां नदीं आगत्य वासांसि पूर्ववत् पूर्वस्मिन् दिवस इव तीरे निक्षिप्य । सलिले विजह्रुः ॥ ७ ॥

भगवांस्तदभिप्रेत्य कृष्णो योगेश्वरेश्वरः ।
वयस्यैरागतस्तत्र वृतस्तत्कर्मसिद्धये ॥ ८ ॥

सत्यधर्मीया — भगवान्कृष्णस्तत् स्वपतित्वमुद्दिश्य व्रताचरणादिकमभिप्रेत्य ज्ञात्वा । को वाऽवादीद्वासुदेवं प्रतीत्यत आह ॥ योगेश्वरेश्वर इति । योगेश्वरा ब्रह्माद्यास्तेषामीश्वरोऽतीता-नागतवेदितृत्वात्स्वयमेवावेत्यायात आयताक्षीः प्रतीति भावः । वयस्यैर्वृतस्तत्रागतः । प्रयोजनमिदमित्याह ॥ तत्कर्मसिद्धय इति । तासां यत्कर्मोपास्त्यादिस्तस्य सिद्धिः साफल्यं तस्यै । अनेन न तत्सङ्गेन कृष्णस्योत्कृष्टता किन्तु तासामेवाभीष्टावाप्तिरिति ध्वन्यते । यदर्थं ताभिर्वृतस्तत्कर्मसिद्धय इति वा वयस्यैः सहेति वा ॥ ८ ॥

सुमनोरञ्जनी — योगेश्वराणामपीश्वर इत्यनेन परमनोगताभिज्ञत्वं मनोरथपूरणसामर्थ्यं च सूचयति । वयस्यैर्वृतः सन् तत्रागतः आगतवान् । तत्कर्मणां ताभिः क्रियमाणकर्मणां सिद्धये फलसिध्यर्थं फलदानायेति यावत् ॥ ८ ॥

तासां वासांस्युपादाय नीपमारुह्य सत्वरः ।
हसद्भिः प्रहसन् बालैः परिहासमुवाच ह ॥ ९ ॥

सत्यधर्मीया — तासां सलिलसलीलानां ललनानां वासांसि दुकूलानि नीरतीरस्थापितान्यु-पादाय। अनेन वसनापहारेण भवद्भवदज्ञानाच्छादनमप्येवं हरामीति हरिरसूचयदिति मन्तव्यम् । सत्वरो नीपमर्जुनवृक्षमारुह्य हसद्भिर्बालैः सह स्वयमपि प्रहसन्परिहासं परितो हासो यस्मिंस्तद्वचनं यथा भवति तथोवाचेति वा ॥ ९ ॥

सुमनोरञ्जनी — सत्वरः त्वरया सहितः । नीपं कदम्बम् । नीपः कदम्बबन्धूकनीलाशोकद्रुमेषु चेति भानुजः । हसद्भिर्बालैः सह प्रहसन् परिहासं नर्मोक्तिम् । परितः हासो यस्माद्वचनात्तद्वचनं वा ॥ ९ ॥

अत्रागत्याबलाः कामं स्वंस्वं वासः प्रगृह्यताम् ।
सत्यं ब्रवाणि नो नर्म यद् यूयं व्रतकर्शिताः ॥ १० ॥

सत्यधर्मीया — हे अबला:! अत्रागत्य कामं यथेच्छं स्वंस्वं पदमेकं वासः प्रगृह्यतां यद्यस्माद्यूयं व्रतकर्शितास्तच्छ्रान्तास्तन्नो नर्म महाव्रतयुताः प्रति नर्म न धर्म इति भावः । सत्यं ब्रवाणि वच्मि । ब्रूञ् व्यक्तायामस्माल्लोटयानि गुणे सार्वधातुके वादेशे कुप्वेति णत्वे ब्रवाणीति रूपम् । ब्रुवाणीत्यपपाठः । अष्टमाष्टकीयपञ्चमाध्याये चोर्वशीवाक्ये प्रतिब्रवाणि वर्तय तेऽश्रु इत्युक्तेः ॥१०॥

सुमनोरञ्जनी — किमुवाचेति तत्राह ॥ अत्रेति । हे अबलाः ! यथाकामं अत्रागत्य स्वं स्वं वासः । नर्म परिहासः । यत् यस्माद्यूयं व्रतकर्शिताः कृशाः ॥ १० ॥

न मयोदितपूर्वं वा अनृतं तदिमे विदुः ।
एकैकशः प्रतीच्छन्तु सहैवोत सुमध्यमाः ॥ ११ ॥

सत्यधर्मीया — मयाऽनृतं नोदितपूर्वं पूर्वं नोदितं तत्र साक्षिणः सारसाक्षीः प्रति बोधयति ॥ तदिति । ममाननृतवाक्त्वमिमे बाला विदुरेकैकशः पृथगुत । हे सुमध्यमाः सहैव प्रतीच्छन्तु प्रतिगृह्णन्तु भवत्यो नोभयथापि ममासम्मतिरिति भावः । सुमध्यमा इत्यनेन सु सार्वजनीनतया दृश्यमानो मध्ये मकारो यस्मिंञ्छब्दे स शब्दः कुमार्य इति शब्दस्तेन तदर्थः स्वीकार्य इति हे कुमार्य इत्यपि सम्बुद्धिः । ननु कान्तैकान्तसङ्केतनिकेतं प्रति वयस्यनयनं नयस्यापनयनमित्यतोऽप्याह ॥ ये सुमध्यमा इति । साक्षित्वेन दर्शितैरनृतोक्तौ कथमित्यतो वाऽऽह ॥ सुमध्यमा इति । अत्यन्तं प्रोक्तकारिण इति न कार्यद्वयप्रतिबन्धकता तेषामिति ॥ ११ ॥

सुमनोरञ्जनी — मया अनृतं नोदितपूर्वम् । तत् इमे गोपबालकाः विदुः । काममित्युक्तं विवृणोति । एकैकश आगत्य भवत्यो वासांसि प्रतीच्छन्तु स्वीकुर्वन्तु । सहैव वा मिलित्वा वा ॥११॥

तस्य तत् क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः ।
व्रीडिताः प्रेक्ष्य चान्योन्यं जातहासा न निर्ययुः ॥ १२ ॥

सत्यधर्मीया — एवं गोविन्दे ब्रुवति सति तस्य तत्क्ष्वेलितमित्येकान्वयः श्लोकद्विकस्य ज्ञेयः । इति परिहासवचनं दृष्ट्वा श्रुत्वा तदर्थं चानुभूयेत्यर्थः । प्रेमपरिप्लुतास्तपः फलितमिति प्रेम्णा परिप्लुता अन्योन्यं प्रेक्ष्य जातहासा व्रीडिताश्च सत्यो न निर्ययुर्यमुनाजलादिति शेषः । किञ्चास्य नर्मणाक्षिप्तचेतसः शीतोदे आकण्ठमग्ना अत एव वेपमानास्तमब्रुवन्निति । तस्य यामुनजलस्य

सकाशान्न निर्ययुरिति वा । एवमन्वये तस्य तत्क्ष्वेलितं दृष्ट्वेत्यनन्तरमेवं ब्रुवति गोविन्द इत्यवक्तव्यत्वादसाङ्गत्यापत्तेः ॥ १२,१३ ॥

सुमनोरञ्जनी — तस्य तत्क्ष्वेडितं परिहासं दृष्ट्वा प्रेमपरिप्लुताः प्रेममग्नाः । अन्योन्यं प्रेक्ष्य जातहासाः जलान्न निर्ययुः ॥ १२ ॥

एवं ब्रुवति गोविन्दे नर्मणाऽऽक्षिप्तचेतसः ।
आकण्ठमग्नाः शीतोदे वेपमानास्तमब्रुवन् ॥ १३ ॥

सुमनोरञ्जनी — एवं गोविन्दे ब्रुवति सति । नर्मणा विनोदवचनेन आक्षिप्तं अपहृतं चेतो यासां ताः । शीतोदे हैमन्तेन अतिशीतले उदके । आकण्ठमग्नाः । अत एव वेपमानाः कंपमानाः तं श्रीकृष्णं मानयन्त्यः बहुमानं कुर्वन्त्यः । सानुनयं अब्रुवन्निति सम्बन्धः ॥ १३ ॥

मानयं त्वं कृथाः त्वां तु नन्दराजसुतं प्रियम् ।
जानीमोऽङ्ग व्रजश्लाघ्यं देहि वासांसि वेपिताः ॥ १४ ॥

सत्यधर्मीया — तत्र सहसा नान्तरं देयमित्यालोचनचतुराः सुलोचनावचनप्रसूनमालां मालाल्यचरणाय भक्तिसूत्रजटिलां बहिः किञ्चित्कुटिलामार्पयन्निति सार्धश्लोकद्विकेनाह ॥ मानयं त्वं कृधा इति । अङ्ग हे कृष्ण! अनयमन्यायं कन्यानामपाणिगृहीतानां वसनापहाररूपं मा कृथा न कुरु । व्रजश्लाघ्यं नन्दराजस्य नन्दगोपभूपस्य सुतं प्रियं जानीमः । चेत्किमित्यत आहुः ॥ वेपिता इति । नो वासांसि देहि । मानयं भोः कृधा इति पाठे भोः कृष्णानयं मा कृधाः । अङ्गव्रजश्लाघ्यमिति पदम् । अङ्गं च शरीरं च व्रजस्य श्लाघ्यं यस्य व्रजेन श्लाघ्यं यस्य स तमिति वाऽर्थः । नो चेदङ्गेति वा भोरिति वाऽतिरिच्यत इति ज्ञेयम् । मानयन्त्यो वयमिति न सरसः पाठः । प्रयोजनं वर्तते गृहं प्रति गच्छामीत्यतोऽप्याहुः । वासांसि देहि अनन्तरं व्रज । श्लाघ्यं सर्वश्लाघ्यम् । एतेन सर्वसुपर्वश्लाघ्यस्य व्रजमात्रश्लाघाविषयत्ववचनं कियदिति निरस्तम् ॥ १४ ॥

सुमनोरञ्जनी — किमब्रुवन्निति तत्राह ॥ वयमिति । वयं त्वां नन्दराजसुतं तत्रापि प्रियम् । नन्दराजस्य प्रियसुतमित्यर्थः । न केवलं नन्दराजप्रियमपि तु व्रजश्लाघ्यम् । जानीमः । माऽनयं भो कृथा इत्यपि पठन्ति । तस्य, भोः कृष्ण अनयं अन्यायं मा कृथा इत्यर्थः । वयं वेपिताः स्मः । अतो वासांसि देहीति ॥ १४ ॥

स्याम सुन्दर ते दास्यः करवाम तवोदितम् ।
देहि वासांसि धर्मज्ञ वेपितानां महाबल ।
शीतार्दितानां बालानां नो चेद् राज्ञे ब्रुवामहे ॥ १५ ॥

सत्यधर्मीया — अनयं मा कृथा इत्युक्तिर्मुखत आयातेत्यायताक्ष्यः क्षमापयन्ति तमित्याह ॥ स्यामेति । हे सुन्दर! ते दास्यः स्याम । ननु सुन्दरेत्यस्यामन्त्रितत्वेनाविद्यमानवद्भावात्कथं त इत्यादेशः स्यादिति चेन्न । तस्यापदत्वेन पदात्परत्वाभावेऽपि गृणन्ति विप्र ते धिय इत्याद्यलौकिके, लौकिके च सर्वदा रक्ष देव न इत्यादि दृष्टमिति स्यामेत्यस्य पदत्वात्तत्परताश्रयणेन त इत्यादेशसम्भवात्काऽत्र कथन्ता । अव्ययतया समाधिस्तु मातर्म इत्यादिनिर्गतिकस्थल एवेति विजानीहि । दासीनां मध्य आसीना एवं ललना जले जलजलोचनं प्रति कृत्यं विज्ञापयन्ति ॥ करवामेति । तवोदितं त्वयोक्तं करवाम । त्वयोदितमिति वक्तव्ये तवोदितमिति वचनेन तवोदितमपत्याद्युत्पत्तिद्वारोदयम् । भावे क्तः । करवामेत्यपि ध्वनयन्ति वध्व इति बोध्यम् । हे महाबल! धर्मज्ञ वेपितानां शीतार्दितानां बालानामङ्गस्मरणाभावाद्वेपितानां शीतार्दितानामिति चोक्ती ज्ञेये । नो वासांसि देहि । नो चेन्न रासि चेद्राज्ञे नन्दाय । शीतार्दितानां बालानां नो वसनानि न दत्तवांस्तव शावक इति ब्रुवामह इत्यन्वयो वा ॥ १५ ॥

सुमनोरञ्जनी — अपरा अनुनयन्ति । हे सुन्दर ! वयं ते दास्यः स्याम भवामः । श्यामेति तालव्यपाठे इन्द्रनीलवर्णनी सुन्दर इत्यर्थः तव त्वया उदितं करवाम । बालानां शीतेन आर्दितानाम् । अत एव वेपितानां अस्माकं वासांसि देहि । धर्मज्ञ 'अबलाः अनुकंपनीया' इति धर्मं जानातीति तथा । अपरा आहुः । नो चेत् राज्ञे नंदायेति ॥ १५ ॥

श्रीभगवानुवाच—

भवन्त्यो यदि मे दास्यो मयोक्तं वा करिष्यथ ।
अत्रागत्य स्ववासांसि प्रतीच्छत सुमध्यमाः ॥ १६ ॥

सत्यधर्मीया — कुमारिकोदीरितं श्रुत्वा किमकरोद्धरिरित्यत एवमसूच इति सुचेता आह ॥ श्रीभगवानुवाचेति । भवन्त्यो भवत्य इति भवतः पाठौ । पूर्वस्मिंश्छत्रन्तता नुमचा परस्मिन्नुचतुप्रत्ययान्ततेति विवेकः । यदि मे दास्यो, यदि वचो मयोक्तं करिष्यथ तर्ह्यत्रागत्य स्ववासांसि स्वस्ववासांसि प्रतीच्छत स्वीकुरुत ॥ १६ ॥

सुमनोरञ्जनी — मयोक्तं वा यदि करिष्यथ तर्हि अत्रागत्य स्ववासांसि प्रतीच्छत स्वीकुरुत ॥ ॥ १६ ॥

नो चेन्नाहं प्रदास्ये किं क्रुद्धो राजा करिष्यति ।
ततो जलाशयात् सर्वा दारिकाः शीतवेपिताः ।
पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुस्तीरमङ्गनाः ॥ १७ ॥

सत्यधर्मीया — इदमेकं विहाय हे यदुनाथ काऽन्यत्किञ्चिदाज्ञापय तत्परिज्ञाय कुर्म इत्यतः क्रोश एवाक्रोशेन बहुलं लुण्ठनमनन्तरं रामराज्यमितिवत्प्रथमग्रासे मक्षिकापात इव च न वदत सुदत्य इत्याह ॥ नो चेदिति । नो चेदधुनासमीपसमापतनं तर्हि नाहं दास्यामि न दास्योऽपि भवत्यः । नो चेदिति नाहं प्रदास्यामीति वचनादादौ संयोज्यस्य राज्ञे ब्रुवामह इत्यस्योत्तरमाह ॥ क्रुद्ध इति । क्रुद्धो युष्मद्भाषोद्भूतरोषो राजा नन्दः किं करिष्यति स्वप्रदर्शितदण्डे खण्डिते स्वानुकूलमेवेदमिति दुकूलानि वा लातुमनुकूलं कालिन्द्या आयाताः पुनर्भगवद्भारतीशुश्रूषा इमामेकां धाटीमटीकन्त कान्ता इत्याह ॥ तत इति । दारिकाः कुमारिका अङ्गना गतिमत्यः । अगेः कर्तरि युच् । अतो न दारिकातिरेकः । पाणिभ्यां स्वस्वहस्ताभ्यां गतम् । तीरं प्रति प्रोत्तेरुः । यद्यप्येकेन शयेन शक्यमाच्छादनं तथा चेदेवः शय एकस्मिन्वसनं क्षिपेच्चेन्नास्मदभिलषितसम्पत्तिः स्यात्स्याच्चैतावान्यत्नः कृतो विफल इत्याशयेन शयद्वयमयूयुजंस्तनीयस्यपि कार्ये नार्यसु चातुर्य इति भावः ॥ १७ ॥

सुमनोरञ्जनी — नो चेत् यद्यत्र नागमिष्यथ तर्हि । अपरा प्रत्याह । किमिति । ततः तदनन्तरं शीतेन वेपिताः । दारिकाः कुमार्यः । जलाशयात् प्रोत्तेरुः निर्गताः ॥ १७ ॥

भगवानथ ता वीक्ष्य मुग्धभावप्रसादितः ।
स्कन्धे निधाय वासांसि प्रीतः प्रोवाच सस्मितः ॥ १८ ॥

सत्यधर्मीया — मुग्धभावो मनोहरचेष्टाभिप्रायो वा तेन प्रसादितो लीला वा । भावः स्वभावाभिप्रायचेष्टासत्तात्मजन्तुषु । लीलापदार्थेष्विति विश्वः । तेन प्रसादितः प्रसादं प्रापितः । स्कन्धे तरुशाखासु । सस्मितः प्रीतस्तदुपरि प्रोवाच ॥ १८ ॥

सुमनोरञ्जनी — अथ अनन्तरं मुग्धभावेन मौग्ध्येन मुग्धानां अप्रौढस्त्रीणां भावेन स्नेहेन वा प्रसादितः प्रसन्नः । स्कन्धे वृक्षस्कन्धे ॥ १८ ॥

यूयं विवस्त्रा यदपो धृतव्रता व्यगाहतैतद् तदु देवहेलनम् ।
बद्ध्वाऽञ्जलिं मूर्ध्न्यपनुत्तयेंऽहसः कृत्वा नमो वो वसनं प्रगृह्यताम् ॥१९॥

सत्यधर्मीया — स्वेन धर्ममर्मावश्यं वाच्यमिति ताभिरेव कुमारीभिर्धर्मज्ञेति प्रागात्मानं बोधयित्रीभिर्बीजावापः कृतोऽतो मया तत्प्ररोहित्रा भाव्यमिति यथा तन्मनसे रुच्येत तथा धर्मपथं नर्मपूर्वकं दर्शयन्कान्ताः श्रीकान्तस्ता वशयति ॥ यूयमिति । यूयं धृतव्रता आमासान्तं सङ्कल्पितसतीप्रसत्तिजनकव्रतनिष्ठाः सत्यो विवस्त्रा वस्त्रहीना अपो व्यगाहतेति यत्तत् उ उत्कृष्टं देवहेलनं देवतातिरस्क्रियोत्तापकं वा कुत्सितमिति वा । उत्तापेऽव्ययमीशे ना चेति यादवः । उ उत्कर्षे कुत्सायामिति रन्तिदेवः । उ वाच्ये चैव कुत्सायामम्बायां स्यादनव्ययमिति विश्वः । अस्मदोघव्रतं मोघं न भवेद्भवेच्चाघपरिहारस्तथा कथय स्वामिन्यामः कामिन्यस्तेन पथेति तदाशयं जानन् जगन्नाथः स्वयमाह ॥ बद्ध्वेति । हे वध्वोऽञ्जलिं बद्ध्वैतदंहसोऽपनुत्तये परिहारार्थं नमः कृत्वा वो वसनं प्रगृह्यताम् । नीवीग्रन्थग्रन्थनस्य तच्छ्लथनस्य च शयद्वयहेतुकत्वात्तत्सम्पुटीकरणेन यदपराधस्तदुप-रोधोऽनुरोद्धव्यो भवतीति बद्ध्वाञ्जलिमिति जजल्पानल्पमतिरिति तात्पर्यमवधेयम् ॥ १९ ॥

सुमनोरञ्जनी — तासां मुग्धतां प्रकटयितुमाह ॥ यूयमिति । यूयं धृतव्रताः सत्यो यत् यस्मात् विवस्त्राः अपो व्यगाहत अप्सु स्नाताः तत् तस्मात् एतत् धृतव्रतानां नग्नस्नानं देवहेलनं उ देवहेलनमेव । देवतापराध एवेति यावत् । अतः अपराधस्य पापस्य अपनुत्तये परिहाराय मूर्ध्नि अंजलिं बध्वा नमः वन्दनं कृत्वा वः यद्यद्वसनं तत्तत् प्रगृह्यतां स्वीक्रियताम् ॥ १९ ॥

इत्यच्युतेनाभिहिता व्रजाबला मत्वा विवस्त्राप्लवनं व्रतच्युतिम् ।
तत्पूर्तिकामास्तदशेषकर्मणां साक्षात्कृतं नेमुरवद्यमुज्झितुम् ॥ २० ॥

सत्यधर्मीया — तदभिहितमेवाभितो हितं न तत्प्रच्यावयितुं शक्यमित्यच्युतेनेत्यभिहिता व्रजाबाला विवस्त्राप्लवनं विवस्त्राभिः स्वाभिः कृतं यदाप्लवनं व्रतस्य च्युतिर्भ्रंशस्तां मत्वा तत्पूर्तिकामा व्रतसाङ्गतां कामयमानास्तदवद्यं पापमुज्झितुं हातुमशेषकर्मणां साक्षात्कृतं साक्षात्करोतीति स तं नेमुः। कर्मसाक्षात्कृतः पुरतः । करौ च तत्कर्मकरावित्यादेः करसम्पुटीकरणं युक्ततरमित्यनेन ध्वन्यते । अभिहितं तथा व्रतच्युतीत्यपि पठन्ति । तत्र व्रतस्य च्युतिर्यस्मात्तद्व्रतच्युतीति द्विकमपि विवस्त्राप्लवनविशेषणमिति मन्तव्यम् ॥ २० ॥

सुमनोरञ्जनी — इत्यच्युतेनाभिहिताः विवस्त्राप्लवनं व्रतच्युतिकारणं मत्वा । तत्पूर्तिकामाः तस्य व्रतस्य पूर्तिं पूर्णतां कामयानाः गोप्यः । तस्य अशेषकर्मणां च अङ्गवैकल्यरूपं अवद्यं दोषं साक्षात् स्वयमेव ज्ञानतोऽज्ञानतो वा कृतं उज्झितुं परिहर्तुं श्रीकृष्णं नेमुः । यद्वा तदशेषकर्मणां साक्षात्कृतं साक्षात्कारवन्तं साक्षिणमित्यर्थः, एवंभूतं कृष्णं नेमुरिति । साक्षात्कृतं प्रत्यक्षीकृतं कृष्णमिति वा । अथवा तस्य अशेषकर्मणां च साक्षात्कृतं मुख्योद्देश्यभूतं श्रीकृष्णं नेमुरित्यर्थः ॥ २० ॥

तास्तथाऽमूर्नता दृष्ट्वा भगवान् देवकीसुतः ।
वासांसि ताभ्यः प्रायच्छत् करुणः स्नेहतोषितः ॥ २१ ॥

सत्यधर्मीया — भगवान्देवकीसुतस्तथा स्वोक्तवर्त्मनाऽमूर्नताः कृतनमना दृष्ट्वा स्नेहेन स्वभक्त्या तोषितः करुणः गतम् । ताभ्यो वासांसि प्रायच्छद्ददौ । भगवानित्यनेन स्वपार्श्ववर्तिवयस्यलोचन-निभालनाकलनस्वमात्रदृष्टिविषयतायापनसामर्थ्यं द्योत्यते ॥ २१ ॥

सुमनोरञ्जनी — अवनताः नम्राः । करुणः करुणाशीलः । तासां स्नेहेन तोषितश्च ॥ २१ ॥

दृढं प्रलब्धास्त्रपया च हापिताः प्रस्तोभिताः क्रीडनवच्च कारिताः ।
वस्त्राणि चैवापहृतान्यथाप्यमुं ता नाभ्यसूयन् प्रियसङ्गनिर्वृताः ॥ २२ ॥

सत्यधर्मीया — तद्भक्तिमेव व्यक्तीकृत्य वक्ति ॥ दृढमिति । दृढं यथा तथा प्रलब्धा वञ्चितास्त्रपयाऽपत्रपया हापितास्त्याजिताः । प्रस्तोभोऽत्र प्रस्तुतापहासपरः । तथा चापहसिताः । क्रीडनं तत्साधनं पुत्तलिकादि तद्वत्कारिताः । वस्त्राणि चापहृतान्यथाऽप्यमुं श्रीकृष्णं नाभ्यसूय-न्नासूयाश्चक्रुः । तत्र तन्त्रम् ॥ प्रियसङ्गनिर्वृता इति । प्रियस्य कृष्णस्य सङ्गः सङ्कथननिभाल-नादिरूपस्तेनैव निर्वृताः सुखिता इति । मनसि वा न किञ्चित्कालुष्यं योषितामिति सूचयितुं न चतुर्थीति ज्ञेयम् । शब्दशक्तिप्रकाशिकायां शिष्यमीर्ष्यतीत्याद्युदाहृत्य द्वितीयाद्युपपद्यत इत्युक्तेर्द्वितीया वा ॥ २२ ॥

सुमनोरञ्जनी — दृढं अत्यन्तं प्रलब्धाः वञ्चिताः,विवस्त्रस्नानं देवहेलनमित्युक्त्या, तासु जलविहारव्यग्रासु तद्वस्त्रहरणेन वा । त्रपया लज्जया हापिताः त्याजिताः । नग्नानां जलान्निष्क्रामणेन प्रस्तोभिताः परिहासवचनं प्रापिताः, क्रीडनवत् दारुपुत्तलिकावत् कारिताः बद्धांजलिं मूर्ध्नीत्यनेन । तथाप्यमुं प्रति नैवाभ्यसूयन् न दोषदृष्टयोऽभवन् । कुतः । प्रियस्य सङ्गः संवासः तेन निर्वृताः सन्तुष्टाः ॥ २२ ॥

परिधाय स्ववासांसि प्रेष्ठसङ्गमसज्जिताः ।
गृहीतचित्ता नोच्चेलुस्तस्मिंल्लज्जेषितेक्षणाः ॥ २३ ॥

सत्यधर्मीया — स्ववासांसि वस्त्राणि । स्वस्ववस्त्राणीत्युक्तौ तन्मार्गणे समयगमनं स्यात् । किञ्च सर्वासामेककान्तकामुकमनस्कत्वेनापि भाविकार्यगुरुतया च न देवयानीशर्मिष्ठावद्दुर्गोष्ठीभाविनीति यस्याः कस्याश्चिद्याचका च पर्यधादिति ध्वनयितुं स्वेत्येवोक्तिरिति ज्ञेयम् । नियमो नास्तीति सूचयितुं

वा । प्रेष्ठस्य सर्वत इष्टस्य सङ्गमे सज्जिताः सन्नद्धास्तेन गृहीतं चित्तं यासां ताः । तस्मिन्नेव लज्जयेषितानि प्रेषितानीक्षणानि याभिस्ताः । लज्जा ईषिता प्रेषिता च येन स तस्मिन्कृष्णे क्षण उत्सवोऽस्ति यासां ताः । अर्श आद्यच् । ईकरः क्षणो यासामिति लज्जेषितेक्षणा इति पदमेकं वा । ई च सौभाग्यम् । येर्मन्मथस्येक्षणौ यासामिति वा । नोच्चेलुस्तद्देशान्नागच्छन् ।। २३ ।।

सुमनोरञ्जनी — प्रेष्ठस्य श्रीकृष्णस्य संगमे सज्जिताः कृतसङ्कल्पाः । गृहीतं श्रीकृष्णेन चित्तं यासाम् । तस्मिन् श्रीकृष्णे । लज्जया ईषितेन इच्छया च ईक्षणं अवलोकनं यासां ताः । नोच्चेलुः न चलितवत्यः तस्मात्स्थानादिति ।। २३ ।।

तासां विज्ञाय भगवान् स्वपादस्पर्शकाम्यया ।
धृतव्रतानां सङ्कल्पमाह दामोदरोऽबलाः ।। २४ ।।

सत्यधर्मीया — स्वपादस्पर्शकाम्ययेति मर्यादावचनम् । स्वाङ्गसङ्गकामनया पादस्पर्शः पादसंवाहनं तच्च योषित्सु प्रायो भार्याकार्यमिति वैवं वचनम् । धृतव्रतानां तासां सङ्कल्पं विज्ञाय दामोदरोऽबलाः प्रत्याह ।। २४ ।।

सुमनोरञ्जनी — दामोदरः, स्वपादयोः स्पर्शकाम्यया । पादं शरीरमिति रत्नावल्याम् । धृतव्रतानां तासां सङ्कल्पं विज्ञाय अबलाः प्रति आहेत्यन्वयः ।। २४ ।।

सङ्कल्पो विदितः साध्व्यो भवतीनां मदर्चनम् ।
मयाऽनुमोदितः सोऽसौ सत्यो भवितुमर्हति ।। २५ ।।

सत्यधर्मीया — हे साध्व्यः! भवद्भिर्लज्जया न प्रकाशितोऽपि मया भवतीनां सङ्कल्पो विदितः । न हि प्राज्ञज्ञानमात्रं प्रयोजकमित्यत आह ।। मयेति । अनुमोदितः सम्मतीकृत इति सः सत्यो भवितुमर्हति । किञ्चासौ मदर्चनं मत्पूजेति सत्यो भवितुमर्हति । गृहे गृहीणी वर्तेत चेन्न परप्रणयिनीपरिणयनं सम्भवति भवतस्तु वक्षस्येव लक्ष्मीरास्ते कथमस्मन्मनोरथः स्यात्कथयेत्यतोऽप्याह । मया रमया चानुमोदितोऽतः सत्यो भवितुमर्हतीति । तव तु तदेकसङ्गित्वात्कथमनुमतः सङ्कल्प इति भगवन्वञ्चनवचनमित्यतो वाऽऽह । मया युष्मत्सन्निहितया निमित्तेनानुमत इति ।। २५ ।।

सुमनोरञ्जनी — भोः साध्व्यः ! मदर्चनं पतित्वेन मत्पूजामुद्दिश्य कृतः भवतीनां सङ्कल्पः नन्दसुतः पतिर्मे भूयादित्येवंरूपः विदितः अनुमोदितश्च । अतः सत्यः सफलः भवितुं अर्हति ।।२५।।

न मय्यावेशितधियां कामः कामाय कल्पते ।
भर्जिता क्वथिता धाना प्रायो बीजाय नेष्यते ॥ २६ ॥

सत्यधर्मीया — अयं कामो नासारसंसारप्रापक इति हेयो हे योषित इत्याह ॥ नेति । मय्यावेशिता धीर्धिषणा यासां तास्तासां कामः कामाय पुनः संसारसाधकविषयेच्छोत्पत्त्यै न कल्पते । अत्र दृष्टान्तमाचष्टे ॥ भर्जितेति । भर्जिता भ्राष्ट्रे क्वथिता पक्वीकृता धाना धान्यं बीजाय पुनरङ्कुरजननाय प्रायो नेष्यते । दावदग्धवेत्रबीजानां कदलीकाण्डाङ्कुरजनकता दृष्टेत्यतः प्रायः सदृशाङ्कुरजननायेति । प्रायश्चानशने मृत्यौ तुल्यबाहुल्ययोरपीति विश्वः । यथा तथेत्यध्याहारः । धाना भ्रष्टयवे प्रोक्तेति सत्यभिधानेऽत्र धानाशब्दोऽण्व्य इवेमा धाना इति श्रुतेः सामान्यधान्यमात्रपरोऽवसेयः । प्रायो बीजाय नाशिष्यत इति वा ॥ २६ ॥

सुमनोरञ्जनी — मयि आवेशिता धीर्मनो यैस्तेषां जनानां कामः विषयेच्छा । कामाय पुनः पुनर्विषयसङ्गरूपसंसाराय । प्रायः नैव कल्पते । सर्वत्र विषयेषु मदनुचिन्तनरूपविषयसमर्पणं कुर्वतां विषयेच्छापि न संसाराय भवतीति भावः । स्वोक्तमर्थं निदर्शयति ॥ भर्जितेति । भर्जिता दग्धाः, क्वथिता पक्वा, धाना बीजं, बीजाय अङ्कुरोत्पादनाय नेष्यते यथेति ॥ २६ ॥

याताबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः ।
यदुद्दिश्य व्रतमिदं चरथार्यार्व्रतं सतीः ॥ २७ ॥

सत्यधर्मीया — सतीः सत्यो बाला यदुद्दिश्यार्याया दाक्षायण्या व्रतं चरथ मया सहेमा बुद्धिसन्निहिताः सद्यस्तनीः क्षपा रात्री रंस्यथेति सिद्धा व्रजं यात गच्छत ॥ २७ ॥

सुमनोरञ्जनी — सिद्धाः प्राप्तमनोरथाः । अतो व्रजं यात । इमाः आगामिनीः क्षपाः रात्रीः । आर्यार्चनं कात्यायनीपूजाम् । सतीः सत्यः ॥ २७ ॥

श्रीशुक उवाच—

इत्यादिष्टा भगवता लब्धकामाः कुमारिकाः ।
ध्यायन्त्यस्तत्पदाम्भोजं कृच्छ्रान्निर्विविशुर्व्रजम् ॥ २८ ॥

सत्यधर्मीया — भगवतेत्येवमादिष्टा आज्ञप्ता आदिष्टं दैवं यासां ताः सुदैवा इत्यावर्तिता इत्यादिष्टपदार्थः । लब्धकामा लब्धमनोरथाः कुमारिकास्तत्पदाम्भोजं ध्यायन्त्यः कृच्छ्राद्विरहसहिष्णुतायातकष्टाद्व्रजं निर्विविशुः ॥ २८ ॥

सुमनोरञ्जनी — कृच्छ्रात् श्रीकृष्णदर्शनविच्छेदजन्यात् ॥ २८ ॥

अथ गोपैः परिवृतो भगवान् देवकीसुतः ।
वृन्दावमाद् गतो दूरं चारयन् गाः सहाग्रजः ॥ २९ ॥

सत्यधर्मीया — वृन्दावनात्तत्सन्त्यज्य ॥ २९ ॥

सुमनोरञ्जनी — वृन्दावनाद्दूरं गतः ॥ २९ ॥

निदाघार्कातपे तिग्मे छायाभिः स्वाभिरात्मनः ।
आतपत्रायितान् वीक्ष्य द्रुमानाह व्रजौकसः ॥ ३० ॥

सत्यधर्मीया — तिग्मे तीक्ष्णे । आत्मनः स्वान् आतपत्रायितान् छत्रायितान्वीक्ष्य व्रजौकसो गोपान्प्रति आह ॥ ३० ॥

सुमनोरञ्जनी — द्रुमवर्णनव्याजेन सज्जनस्वभावं शिक्षयति ॥ निदाघेत्यादिना । तिग्मे तीक्ष्णे । निदाघार्कवर्द्धिद्यमाने आतपे । आतपत्रायितान् छत्रायितान् द्रुमान्वीक्ष्य व्रजौकसः प्रति आहेत्यन्वयः ॥ ॥ ३० ॥

हे स्तोक कृष्ण हे अंशो श्रीदामन् सुबलार्जुन ।
विशालर्षभ तेजस्विन् देवप्रस्थ वरूथप ॥ ३१ ॥

सत्यधर्मीया — कृष्ण तन्नामन् ॥ ३१ ॥

सुमनोरञ्जनी — स्तोक कृष्ण इति कश्चित् ॥ ३१ ॥

पश्यतैतान् महाभागान् परार्थैकान्तजीविनः ।
वातवर्षातपहिमान् सहन्तो वारयन्ति नः ॥ ३२ ॥

सत्यधर्मीया — परेषामर्था एवैकान्तं नियतं यथा तथा जीवितुं शीलं येषां ते परार्थैकान्तजीविनः। णिनिरयम् । वातवर्षातपहिमानातपश्च हिमं च ते, वर्षेण सहिते आतपहिमे येषां ते च ते वाताश्च वातवर्षातपहिमास्तान् । अनेन हिमशब्दस्य नपुंसकत्वाद्धिमानिति कथमिति शङ्कापरासोऽवसेयः । सहन्तः । धात्वन्तरस्य चुरादौ पठितस्य परस्मैपदत्वात् स एवायं नागः सहति कलभेभ्यः परिभवमित्यादेः । तान्वातादीन्नो वारयन्ति स्वयं सोढ्वाऽस्मान्रक्षन्तीति भावः ॥ ३२ ॥

सुमनोरञ्जनी — परार्थाय परप्रयोजनाय एकान्तेन नियमेन अनन्यमनसा वा जीवनं येषां तान् द्रुमान् पश्यतेति । तदेवाह । वातवर्षादीन् स्वयं सहंतो नः अस्माकं तान् वारयन्ति ॥ ३२ ॥

अहो एषां वरं जन्म सर्वप्राण्युपजीवनम् ।
सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः ॥ ३३ ॥

सत्यधर्मीया — एषां वृक्षाणां सर्वप्राण्युपजीवनमिति जन्म वरम् । सुजनस्य समीपे आयाता अर्थिनो यथा न विमुखा यान्ति तथाऽर्थिनो विमुखा न यान्ति फलादिभिः प्रीणयन्तीति तात्पर्यम् । वयः पक्षिणो मुखं येषां ते विमुखाः पक्ष्यादयोऽर्थिनो निवृत्तिमन्तो न यान्ति फलं विना न गच्छन्तीत्यर्थः । विमुखा इत्यस्यावृत्तिर्वा ॥ ३३ ॥

सुमनोरञ्जनी — सुजनस्य सज्जनस्य जन्मेव एषां द्रुमाणां जन्म वरम् । कुतः । यतः सर्वप्राणिनः उपजीवंत्यनेनेति, सर्वप्राणिनामुपजीवनं येनेति वा । तथाविधम् । अतः । तदाह । अर्थिनो येषां विमुखाः न यांतीति ॥ ३३ ॥

पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ।
गन्धनिर्यासभस्मास्थितोकमैः कामान् वितन्वते ॥ ३४ ॥

सत्यधर्मीया — तदेव देवो विशदयति । पत्रेत्यादिना । निर्यासो हि द्रढिमरसस्तोकमाण्यङ्कुराः शष्पाणि च । तोकमानि चेत्यष्टमपञ्चकाष्टमखण्डव्याकृतौ तोकमाण्यङ्कुरा इत्युक्तेः । कामानपेक्षितान्वितन्वते कुर्वन्ति ददतीति यावत् ॥ ३४ ॥

सुमनोरञ्जनी — कैः अर्थिजनार्थं पूरयन्तीति तत्राह ॥ पत्रेति । निर्यासो घनीभूतरसः । तोक्मैः पल्लवाद्यंकुरैः । अस्थीनि साराणि ॥ ३४ ॥

एतावज्जन्मसाफल्यं देहिनामिह देहिषु ।
प्राणैरर्थैर्धिया वाचा श्रेयआचरणं सदा ॥ ३५ ॥

सत्यधर्मीया — देहिष्वितरेषु प्राणिषु प्राणैस्तद्व्ययेन दध्यङादिवत् । अर्थै रन्तिदेवादिवत् धिया वाचा विदुरादिवच्छ्रेय आचरणं श्रेयसः करणमिह नृलोके देहिनां जन्मसाफल्यम् ॥ ३५ ॥

सुमनोरञ्जनी — देहिनां जन्मनः साफल्यं एतावदेव । किं तत् । देहिषु प्राणिषु प्राणादिभिः श्रेय आचरणमेव ॥ ३५ ॥

इति प्रवालस्तबकफलमूलदलोत्करैः ।
तरूणां नम्रशाखानां मध्येन यमुनां गतः ॥ ३६ ॥

सत्यधर्मीया — इत्येतावदेवेति गोपान्प्रति तद्वाग्यं वदन्भगवान् । प्रवालस्तबकफलमूलदलोत्करैर्नम्रशाखानां तरूणां मध्येन यमुनां गतः सन् ॥ ३६ ॥

सुमनोरञ्जनी — इति श्लाघयन् । प्रवालैः नवदलैः, स्तबकैः पुष्पगुच्छैः, मूलानि जटाः, दलानि पत्राणि, तेषामुत्करैः समूहैः । नम्रशाखानां तरूणां मध्येन यमुनां गतः प्राप्तः ॥ ३६ ॥

तत्र गाः पाययित्वाऽपः सुमृष्टाः शीतलाः शिवाः ।
ततो नृप स्वयं गोपाः कामं स्वादु पपुर्जलम् ॥ ३७ ॥

सत्यधर्मीया — सुमृष्टाः शीतलाः शिवा मङ्गलदा अपो गाः पाययित्वा स्वयं पपौ । हे नृप! गोपाश्च पपुः ॥ ३७ ॥

सुमनोरञ्जनी — सुमृष्टाः पद्मादीनां सुगन्धेन, शिवाः आरोग्यदाः, अपः गाः पाययित्वा, स्वयमपि पपुः ॥ ३७ ॥

तस्या उपवने कामं चारयन्तः पशून् नृप ।
कृष्णरामावुपागम्य क्षुधार्ता इदमब्रुवन् ॥ ३८ ॥

इति श्रीमद्भागवते दशमस्कन्धे विंशोऽध्यायः ।

सत्यधर्मीया — क्षुधार्ताः पदमेकमनेकं च । आद्ये पक्षे हलन्ततया टाबन्तः शब्दः ॥ ३८ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे विंशोऽध्यायः ॥ १०-२० ॥

सुमनोरञ्जनी — तस्याः यमुनायाः । क्षुधार्ताः कृष्णेन करिष्यमाणकुमारिकावसनग्रहणकौतूहलैरगृहीतभोज्यैरेवागमनात् ॥ ३८ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां विंशोऽध्यायः ॥ १०-२० ॥

॥ अथ एकविंशोऽध्यायः ॥

श्रीशुक उवाच -

रामराम महाबाहो कृष्ण दुष्टनिबर्हण ।
एषा वै बाधते क्षुन्नस्तच्छान्तिं कर्तुमर्हथः ॥ १ ॥

सत्यधर्मीया — भगवद्भक्तिरेव मुक्तिसाधनं, न तन्त्रं श्रुतिश्रवणादिकमिव पुंस्त्वमपीति प्रतिपादयत्यस्मिन्नध्याये । तत्रादौ गोपालगोविन्दकथां तदुपयोगिनीं कीर्तयति श्रीशुक इति वक्ति ॥ श्रीशुक इति । तस्याः क्षुधः शान्तिं प्रशमम् । शान्तिः प्रशममङ्गल इति यादवः । शान्तिः शमेऽपि कल्याण इति विश्वः ॥ १ ॥

सुमनोरञ्जनी— श्रीहरिचरणारविन्दैकभक्तिर्जन्मान्तराराधितश्रीहरिप्रसादोद्बोधितयोग्यतावतामेवाभिव्यज्यते नान्यसाधनसन्दर्भैरित्येतन्निदर्शयितुं विप्रपत्नीनां भक्त्यभिव्यक्तिप्रकारं निरूपयत्यस्मिन्नध्याये । तत्र तमनु क्षुधार्ता इदमब्रुवन्नित्युक्तम् । किमब्रुवन्निति तत्राह ॥ रामरामेति । दुष्टान् निबर्हति निगृण्हातीति तथोक्त । एषा इदानीं जाता क्षुत् नः बाधते । तस्याः शान्तिं शमनम् ॥ १ ॥

इति विज्ञापितो गोपैर्भगवान् जगदीश्वरः ।
भक्ताया विप्रभार्यायाः प्रसीदन्निदमब्रवीत् ॥ २ ॥

सत्यधर्मीया — भक्ताया विप्रभार्याया उपरि इदं वक्ष्यमाणम् । सैका पतिप्रविधृता पदमाप विष्णोरित्यादेस्तदैवैकस्याः कायत्यागे ससद्गतिवितरणमित्येकवचनं युक्तम् । या विप्रभार्यास्तासु तदतिरिक्तासु च प्रसीदन्नित्यप्यान्तरङ्गिकोऽपि भावो विभाव्यः ॥ २ ॥

प्रयात देवयजनं ब्राह्मणा ब्रह्मवादिनः ।
सत्रमाङ्गिरसं नाम ह्यासते स्वर्गकाम्यया ॥ ३ ॥

सत्यधर्मीया — देवयजनं देवा इज्यन्ते यत्रेति, देवानां यजनं यस्मिन्निति वा, यज्ञवाटं प्रति यात। ब्रह्मवादिनो वेदवादिनो ब्राह्मणाः । सत्रं बहुदिनसाध्यं बहुकर्तृकं च तन्नामानमाङ्गिरसं बृहस्पतिसवनमिति नाम प्रसिद्धम् । स्वर्गकाम्यया तदिच्छयाऽऽसते कुर्वन्ति । धात्वनैकार्थ्यात् । हि यतस्तत्र प्रयात । तत्राभ्यागतेभ्योऽन्नवितरणं विहितं मयाऽभिहितमित्यभिहिते तु सुमिलं तदिति भावः । आवाभ्यां विसर्जिता नियुक्ता आर्यस्य मम चाभिधां च कीर्तयन्तस्तत्र गत्वौदनं याचत ।

तद्दिनमारभ्य यायावर्यचर्यैं रामकृष्णाय नम इत्युच्चार्य याचना प्रववृत इति मन्तव्या । तत्र प्रथमत आर्यस्येति रामस्योक्तिश्च, न तेऽन्नं दास्यन्ति किन्तु मत्सन्निधिमागत्य पुनर्गमनानन्तरं वर्त्मान्तरेणान्नलाभ इति द्योतयितुं मम चेत्यनन्तरमनन्तेन स्वनामोक्तिश्चानुगुणेति निपुणता निस्मीमेति मन्तव्यम् ।। ३,४ ।।

सुमनोरञ्जनी — भक्तायाः विप्रभार्यायाः पत्या विधृतायाः । भक्तां विप्रभार्यां प्रति प्रसीदन् प्रसादं कर्तुमिच्छन् । देवाः इज्यन्तेऽस्मिन्निति देवयजनं यज्ञमण्टपं प्रति प्रयात गच्छत । तत्र ब्राह्मणाः आङ्गिरसं तन्नामकं सत्रं उद्दिश्य कुर्वन्त इति यावत् । आसते स्थिताः । आसते कुर्वते । अनेकार्थत्वाद्धातूनामिति पदरत्नावल्याम् ।। ३ ।।

तत्र गत्वौदनं गोपा याचतास्मद्विसर्जिताः ।
कीर्तयन्तो भगवत आर्यस्य मम चाभिधाम् ।। ४ ।।

सुमनोरञ्जनी — तत्र गत्वा ओदनं याचत । अस्मद्विसर्जिताः आवाभ्यां प्रेषिताः । कथमस्मभ्यं ते दद्युरित्यत आह ।। कीर्तयन्त इति । आर्यस्य ज्येष्ठस्य रामस्य मम चाभिधां कीर्तयन्तो याचतेत्यन्वयः । यन्नामश्रवणेन व्यक्तभक्तयो भक्तं प्रयच्छन्तीति भावः ।। ४ ।।

इत्यादिष्टा भगवता गत्वाऽयाचन्त ते तथा ।
कृताञ्जलिपुटा विप्रान् दण्डवत् पतिता भुवि ।। ५ ।।

सत्यधर्मीया — भुवि दण्डवद्दण्डा इव पतिताः । अनेन देहनिस्त्राणतेव भक्तिपरवशता च द्योत्यते ।। ५ ।।

सुमनोरञ्जनी — इत्यादिष्टाः विप्रानयाचन्तेत्यन्वयः । दण्डवत्पतिता दण्डो यथा भुवि पतितः तद्वत्साष्टाङ्गं पतिता इत्यर्थः ।। ५ ।।

हे भूमिदेवाः शृणुत कृष्णस्यादेशकारिणः ।
प्राप्तान् जानीत भद्रं वो गोपान् नो रामचोदितान् ।। ६ ।।

सत्यधर्मीया — हे भूमिदेवाः! शृणुत वाणीमस्माकमिति शेषः । वो भद्रमस्तु । कृष्णस्यादेशकारिण आज्ञाधारकान् तथा रामचोदितान्प्राप्तान्गोपान्नो जानीत वित्त । हरिणा आर्यस्य मम चाभिधामित्युक्तत्वात्तथाऽनुक्त्वा मुरहरपुरस्कृत्या वचनं तेषामभ्यासवशाद्भवदपि विप्राणां योग्यत्वाज्झडिति दुष्प्रतिपत्तिप्रत्यावृत्तिजनकं च भविष्यतीति मन्तव्यम् । रामनामग्रहणे दिशन्ति वा नेति क्षुत्क्षान्ता विपर्यासं चक्रुरिति वाऽवसेयम् ।। ६ ।।

सुमनोरञ्जनी — तद्याचनाप्रकारमाह ॥ हे भूमिदेवा इति । हे भूमिदेवाः ब्राह्मणाः ! कृष्णस्यादेशकारिणः गोपान् अस्मान् जानीत ॥ ६ ॥

गाश्चारयन्तावविदूर ओदनं रामाच्युतौ वो लषतो बुभुक्षितौ ।
तयोर्द्विजा ओदनमर्थिनोर्यदि श्रद्धा च वो यच्छत धर्मवित्तमाः ॥ ७ ॥

सत्यधर्मीया — क्व वा कृष्णः क्व च वा रामः क्व यूयं वयं क्वेत्यतः सङ्गतिं वदन्ति ॥ गा इति । अविदूरे समीपे गाश्चारयन्तौ बुभुक्षितौ रामाच्युतौ वो युष्मत्त ओदनमन्नं लषतः काङ्क्षतस्तयोरर्थिनोर्धर्मवित्तमा धर्मज्ञोत्तमा हे द्विजाः! यदि वः श्रद्धा तर्हि ओदनं यच्छत दिशत । तद्यच्छतेत्यनेन पूर्तावपि यत्पुनरोदनवचनं लोके लोकानामन्नमन्नमित्यायतास्या आयाता इत्याभाणकं समूलमिति ध्वनयितुमिति ज्ञेयम् ॥ ७ ॥

सुमनोरञ्जनी — अविदूरे समीपे । गाः चारयन्तौ रामकृष्णौ । वः सकाशात् युष्मदीयं वा ओदनं अन्नं लषतः अभिलषतः । हे द्विजाः ! वः श्रद्धा आस्तिक्यं दातुमिच्छा वा यद्यस्ति तर्हि तयोः उद्देशेन ओदनं यच्छत ॥ ७ ॥

दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः ।

अन्यत्र दीक्षितस्यापि नान्नमश्नन् हि दूष्यति ॥ ८ ॥

सत्यधर्मीया — दीक्षिता वयं न भक्ष्यान्ना इति वचनस्यावसरमददानाः प्रस्तुतमोदनादनानुमोदनं युक्तं मधुसूदनादेरिति सत्रिणः श्रावयन्ति ॥ दीक्षाया इति । दीक्षायाः पशुसंस्थायाः पशूनां संस्थाऽऽलम्भनं यस्यां सा तस्या दीक्षाया अग्नीषोमीयदीक्षायाः पश्वालम्भनात्पूर्वं नोदनानन्तरं न दोषः । यद्यपि सौत्रामणीयागः स्वतन्त्रः कश्चित्सूत्रामदेवताकोऽन्यस्त्वङ्गभूत इति याज्ञिकास्तत्र नोदनादननिषेध इत्यभ्यधुस्तथाऽप्यत्र सौत्रामण्याश्चेति ग्रहणात्स्मृतिकृद्वचनं वर्ततेति सम्प्रदायज्ञाः । पूर्वमेव यावत्सर्वोपयोगि पृथक् सङ्गाह्योर्वरितपदार्थे स्वत्वमदीक्षितस्य कारितं चेत्तद्भुञ्जाना न दूष्यन्तीति च ज्ञेयम् । तथा च धर्मसूत्रम् । दीक्षितोक्रीतराजकोग्नीषोमीयसंस्थाया एव हुतायां वपायां दीक्षितस्य भोक्तव्यम् । यज्ञार्थे वा निर्दिष्टे शेषाद्ब्राह्मणा भुञ्जीरन्निति ब्राह्मणमिति । एतदन्यत्र दीक्षितस्याप्यन्नमश्नन् हि यतो न दूष्यति ततश्चौदनं यच्छत । गोपाला अपि धर्मज्ञा इति जानन् जनार्दनः प्रागेवमाशङ्केरंस्त इदमुत्तरं देयमिति नान्वशादिति तात्पर्यमवधेयम् । तथा हि ब्राह्मणे द्वितीयपञ्चके खण्डे, स वा एष पशुरित्यारभ्य सर्वाभिर्वा एष देवताभिरालब्धो भवति यो दीक्षितो भवति तस्मादाहुर्न दीक्षितस्याश्नीयादिति, स यदग्नीषोमावुचितं गृभीतानिति, वपायै यजति सर्वाभ्य

एव तद्देवताभ्यो यजमानं प्रमुञ्चन्ति तस्मादाहुरशितव्यं वपायां हुतायां यजमानो हि स तर्हि भवतीत्यन्तेनोक्तम् ॥ ८ ॥

सुमनोरञ्जनी — दीक्षिताः वयं अभोज्यन्ना इत्यतो व्यवस्थामाहुः ॥ पशोः संस्था आलंभनं यस्यां तस्याः दीक्षायाः । सौत्रामण्याश्च दीक्षायाः हिंसा संस्था प्रमीलनमित्यमरः । यद्वा पशु पश्वालंभनं संस्था अवधिर्यस्यास्तस्याः दीक्षायाः दीक्षामारभ्य पश्वालंभनपर्यन्तायाः इत्यर्थः । अन्यत्र पश्वालंभनोत्तरं ज्योतिष्टोमादौ सौत्रामण्यतिरिक्ते च कर्मणि दीक्षितस्यान्नमश्नन्न दूष्यति । हि प्रमितमेतत् ॥ ८ ॥

इति ते भगवद्याच्ञां शृण्वन्तोऽपि न शुश्रुवुः ।
क्षुद्राशा भूरिकर्माणो बालिशा वृद्धमानिनः ॥ ९ ॥

सत्यधर्मीया — क्षुद्राशाः स्वर्गादिनश्वरफलाभिलाषाः । भूरिकर्माणो वृथा कायक्लेशसम्पादककर्मयुताः । वृद्धमानिनस्तत्कार्यं तु महद्प्रश्नो मूर्खा इति । एवं ते भगवद्याच्ञां गोपोपपादितां शृण्वन्तोऽपि न शुश्रुवुः । अतदनुष्ठानादश्रुतप्राया सेति भावः । बालिशौ ऋद्धमानिन इति छेदः । ऋद्धमानिनः सम्पन्नत्वेनाभिमानवन्तो, बालिशौ रामकृष्णाविति तद्याच्ञां न शुश्रुवुरिति वा ॥ ९ ॥

सुमनोरञ्जनी — इत्यनूदितां भगवद्याच्ञां शृण्वन्तोऽपि न शुश्रुवुः अशृण्वन्त इवासन् । तत्रादरशून्या अभूवन्निति यावत् । आदराभावे निमित्तमाह ॥ क्षुद्रेति । क्षुद्रे तुच्छे स्वर्गादावाशा येषां ते । भूरीणि श्रमाधिकानि कर्माणि येषां तथोक्ताः । वृद्धमानिनोऽपि बालिशाः बाला एव । धिया अल्पत्वात् । मूर्खा एवेति वा । बालिशो बालमूर्खयोरित्यभिधानात् ॥ ९ ॥

देशः कालः पृथग्द्रव्यं मन्त्रतन्त्रर्त्विजोऽग्नयः ।
देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ॥ १० ॥

तं ब्रह्म परमं साक्षाद् भगवन्तमधोक्षजम् ।
मनुष्यदृष्ट्या दुष्प्रमा मर्त्यात्मानो न मेनिरे ॥ ११ ॥

सत्यधर्मीया — ग्रन्थकृद्बालिशतां प्रकाशयति ॥ देश इति । गङ्गासिन्धुसङ्गमादिर्देशः । वसन्तादिः कालः । पृथग्द्रव्यं चक्षुर्भूत्यादिकामनानुकूल्येन होम्यदध्यादिनानाद्रव्यम् । मन्त्रास्तत्तद्देवताप्रसादसाधकमन्त्राः । तन्त्रं करक्रिया । ऋत्विजश्च यथासम्भवमध्वर्युप्रमुखाः । अग्नय आहवनीयादयः । देवता इन्द्राद्या अमुख्याः । यजमानो दीक्षितः कर्ता । क्रतुः सङ्कल्पो, धर्मोऽपूर्वं

यन्मयो यत्प्रधानकः । यन्मया इति वक्तव्य एतत्प्रधानभागवतरूपाणां भेदशङ्का स्यात्तदपनुत्यै यन्मय इत्येकवचनम् । यन्माधवप्रधानकस्तस्मा अदनौदनादानमेतन्निदानकमित्याह ॥ तमिति । परमं ब्रह्म साक्षाद्भगवन्तमधोक्षजं मर्त्यात्मानो मर्त्ये मरणशिरस्के शरीरे आत्मा स्वरूपमिति मतिर्यैस्ते । मनुष्य इति दृष्टिर्धीस्तया । दृष्टिर्धीर्दर्शनाक्षिष्विति विश्वः । अत एव दुष्प्रज्ञास्तत्त्वेन न मेनिरे न व्यजानन् ॥ १०,११ ॥

सुमनोरञ्जनी — वस्तुस्थितिं दर्शयन् तदज्ञानात्तेषां तद्बालिशत्वमुपपादयति ॥ देश इति । देशः आर्यावर्तादिः । कालो वसन्तादिः । पृथक्द्रव्यं चरुपुरोडाशादि । मन्त्रो देवताप्रतिपादकोऽग्निमील इत्यादिः । तन्त्रं प्रयोगः । ऋत्विजः ब्रह्मादयः । अग्नयः आहवनीयादयः। देवता इन्द्रादिः । यजमानश्चेत्येतैः प्रवर्त्यमानः क्रतुः ज्योतिष्टोमादिः । देवतामुद्दिश्य द्रव्यत्यागादिरूपः धर्मः तज्जन्यापूर्वं चेत्येष सर्वो यन्मयः यत्प्रधानकः, यः मयः प्रधानः मन्त्रादिप्रतिपाद्यो ऋत्विगादिषु स्थित्वा तत्प्रेरकः सन्, क्रत्वादिकं स्वपूजात्वेन स्वीकृत्यापूर्वादिषु स्थित्वा फलप्रदो यस्येत्यर्थः । एतादृशं परमं ब्रह्म । साक्षात्प्रत्यक्षमपि मनुष्य इति दृष्ट्या ज्ञानेन । अत एव दुष्प्रज्ञाः मर्त्यात्मानो मर्त्ये मरणशीले देहे आत्मा मनो येषाम् । देहाभिमानिनः न मेनिरे न ज्ञातवन्तः ॥ १०, ११ ॥

न ते यदोमिति प्रोचुर्न नेति च परन्तप ।
गोपा निराशाः प्रत्येत्य तथोचुः कृष्णरामयोः ॥ १२ ॥

सत्यधर्मीया — का कथा प्रवृत्तोत्तरत्रेति परीक्षिन्मानसीं शङ्कां शुकः परिहर्तुं वक्ति ॥ नेति । ते विप्रा यद्यदा ॐमित्यन्नं दास्याम इति न प्रोचुर्नेति च न प्रोचुस्तदा निराशा इतः परं दद्युरेत इत्याशाशून्यास्तौ प्रत्येत्य यथा तैरुदितं तथैव रामकृष्णयोरूचुः तौ प्रत्यूचुर्यत्र कुत्र वा स्वयं भुक्त्वा याता दूता इत्यपि नेत्याह ॥ निराशा इति । न विद्यते आशोऽशनं येषां ते तथा प्रातराशययाचित इतिवदुचितमिदम् ॥ १२ ॥

सुमनोरञ्जनी — य एते ब्राह्मणाः । ओमिति अङ्गीकारवचनं, नेति निषेधवचनं च नोचुः । तदा गोपाः निराशाः सन्तः प्रत्येत्य यथावृत्तं तथा कृष्णरामयोः सन्निधावूचुः ॥ १२ ॥

तदुपाकर्ण्य भगवान् प्रहस्य जगदीश्वरः ।
व्याजहार पुनर्गोपान् दर्शयन् लौकिकीं गतिम् ॥ १३ ॥

सत्यधर्मीया — लौकिकीं गतिं, स्वयमत्रैव वितरितुं शक्तोऽप्येकत्रालाभेऽन्यत्र गन्तव्यमिति लौकिकीं गतिम् । तदेतदुक्तमुपाकर्ण्य पुनर्गोपान्प्रति व्याजहार ॥ १३ ॥

सुमनोरञ्जनी — लौकिकीं लोकसिद्धां गतिं रीतिम् । पुरुषैः निषेधे स्त्रियः प्रति याचनारूपाम् ॥ ॥ १३ ॥

मां ज्ञापयत पत्नीभ्यः ससङ्कर्षणमागतम् ।
दास्यन्ति काममन्नं वः स्निग्धा मय्युषिता धिया ॥ १४ ॥

सत्यधर्मीया — हे गोपाः । तत्पत्नीभ्यः ससङ्कर्षणमन्नप्राप्तिर्भवतीति स्वपुरस्कृतिरिव बलस्योपसर्जनतया ग्रहश्चेति ध्येयम् । काममपेक्षितमन्नं दास्यन्ति ता मयि धियोषिता मद्बुद्धयः किञ्च मयि स्निग्धाश्च सहजस्नेहवत्य इति । सराममित्यनुक्त्वा ससङ्कर्षणमित्युक्त्या सम्यक् तत्कर्षणेन सहितं मां ज्ञापयतेत्यप्यूचे सुचेता इति ज्ञेयः ॥ १४ ॥

सुमनोरञ्जनी — ससङ्कर्षणमागतं माम् । पत्नीभ्यः द्विजपत्नीभ्यः । ज्ञापयत विज्ञापयत । तास्तु वः कामं अपेक्षितम् । तत्र कारणमाह ॥ स्निग्धा इति । मयि स्निग्धाः । धिया मनसा मय्येव उषिताः स्थिताः । सर्वदा मामनुस्मरन्त्य इत्यर्थः ॥ १४ ॥

गत्वाऽथ पत्नीशालायां दृष्ट्वाऽऽसीनाः स्वलङ्कृताः ।
नत्वा द्विजसतीर्गोपाः प्रश्रिता इदमब्रुवन् ॥ १५ ॥

सत्यधर्मीया — अथ कृष्णोक्तिश्रवणसमनन्तरं गोपा गत्वा पत्नीशालायां तदुपवेशस्थले आसीनाः स्वलङ्कृता द्विजसतीर्नत्वा प्रश्रिता नम्रा इदमब्रुवन् ॥ १५ ॥

सुमनोरञ्जनी — पत्नीशालायां आसीनाः । द्विजसतीः द्विजपत्नीः । दृष्ट्वा ताः प्रति गोपाः प्रश्रिताः विनीताः सन्तः । इदं वक्ष्यमाणम् ॥ १५ ॥

नमो वो द्विजपत्नीभ्यो निबोधत वचांसि नः ।
इतोऽविदूरे चरता कृष्णेन प्रेषिता वयम् ॥ १६ ॥

सत्यधर्मीया — द्विजपत्नीभ्यो वो नमोऽस्तु नो वचांसि निबोधत । प्रातिस्विकतया सर्वाः प्रति सम्बोध्योक्तेर्वचांसीति बहुवचनम् । इतो युष्मत्स्थलादविदूरे समीपे चरता सञ्चरता कृष्णेन वयं प्रेषिताः ॥ १६ ॥

सुमनोरञ्जनी — इतः अस्मात् यज्ञवाटात् । अविदूरे समीपे । चरता सञ्चरता कृष्णेन वयं प्रेषिताः ॥ १६ ॥

गाश्चारयन् स गोपालः सरामो दूरमागतः ।
बुभुक्षितस्य तस्यान्नं सानुगस्य प्रदीयताम् ॥ १७ ॥

सत्यधर्मीया — सरामो गोपालैः सह गाश्चारयन्दूरं स्वव्रजादागतस्तस्यान्नं दीयताम् । अवश्यमनालस्येन दाने कारणमाहुः ॥ बुभुक्षितस्येति । एकोदरपूर्तिमात्रममत्रे दिशेयुर्मृगदृशा इति भीता आहुः ॥ सानुगस्य सभृत्यस्येति । कदौदनमानयन्तीति स उन्नतस्थाने तिष्ठन्मार्गं निरीक्षत इत्यप्यवगमयन्ति ॥ सानुगस्येति । सानौ गच्छतीति स तथा । प्रदीयताम् ॥ १७ ॥

सुमनोरञ्जनी — स कृष्णः गोपालैः सह सरामश्च दूरम् व्रजाद्दूरम् । बुभुक्षितस्य भोक्तुमिच्छतः । सानुगस्य तस्य पर्याप्तमन्नं दीयताम् ॥ १७ ॥

श्रुत्वाऽच्युतमुपायान्तं नित्यं तद्दर्शनोत्सुकाः ।
तत्कथाक्षिप्तमनसो बभुवुर्जातसम्भ्रमाः ॥ १८ ॥

सत्यधर्मीया — नित्यं तद्दर्शने उत्सुका इष्टार्थोद्युक्ताः । इष्टार्थोद्युक्त उत्सुक इत्यमरः । तत्कथाभिराक्षिप्तं मनो यासां ताः । अच्युतमुपायान्तं श्रुत्वा, जातः सम्भ्रम आदरो यासां ताः । सम्भ्रमस्त्वादरे भय इति वचनात् ॥ १८ ॥

सुमनोरञ्जनी — तस्य श्रीकृष्णस्य कथया पान्थैः कथ्यमानया आक्षिप्तं मनो यासां ताः । अत एव तद्दर्शनोत्सुकाः । अच्युतं उपायातं समीपे समागतम् । श्रुत्वा, जातः संभ्रमः सन्तोषो यासां तथाविधा बभूवुः ॥ १८ ॥

चतुर्विधं बहुगुणमन्नमादाय भाजनैः ।
अभिसस्रुः प्रियं सर्वाः समुद्रमिव निम्नगाः ॥ १९ ॥

सुमनोरञ्जनी — चतुर्विधं लेह्यपेयचोष्यखाद्यभेदेन चतुर्विधं बहुगुणं संस्कारविशेषैः सुरसं सुगन्धि च । भाजनैः भाण्डैरधिकरणैः सह आदाय प्रियं श्रीकृष्णं अभिसस्रुः । तत्र दृष्टान्तः । निम्नगाः गङ्गाद्याः नद्यः समुद्रमिवेति ॥ १९ ॥

निषिध्यमानाः पतिभिर्भ्रातृभिर्बन्धुभिः सुतैः ।
भगवत्युत्तमश्लोके दीर्घश्रुतभृताशयाः ॥ २० ॥

सत्यधर्मीया — निम्नगा नद्यः समुद्रं यथा गच्छन्ति तथा सर्वाः, भाजनैः पात्रैश्चतुर्विधं भक्ष्यभोज्यलेह्यपेयात्मना बहुगुणं मधुरादिरसोपेतमन्नमादायाभिसस्रुः । अहं वैश्वानरो भूत्वेत्याद्यावेदितचतुर्विधं भुक्तभक्तपाकं कुर्वन्तं प्रति चतुर्विधान्धोनयनं सारसनयनानां युक्तमिति ज्ञेयम् । उत्तमश्लोके भगवति । दीर्घं बहुकालं श्रुतं तन्माहात्म्यश्रवणं तेन भृत आशयोऽन्तःकरणं यासां ता याभिस्ता वा । पतिभिर्भ्रातृभिर्बन्धुभिर्जामात्रादिभिः । वैष्णवे बन्धुसत्क्रियेति टीकायां बन्धुर्जामातेत्युक्तेः । सुतैः, जातपुत्रः कृष्णकेशोऽग्नीनादधीतेति श्रुतेर्दीक्षोपयोग्यैकैकतोकैः । उत्तरत्र भगवदङ्गसङ्गाशात एतदागमावगमाद्बहुप्रसवे तदसम्भवादेवमर्थे कृते तत्तारुण्यं सिध्यतीति ज्ञेयम् । यद्वा जातपुत्रः कृष्णकेश इत्यादौ योग्यवयोमात्रं लक्षयित्वाऽधिकारकथनात्सुताः पतिभ्रातृसुता इति वाऽर्थेति तारुण्यं द्योतितं भवतीति वा सुतैरित्युक्तिः । निषिध्यमाना अपीममभिसस्रुरित्यन्वयः ॥२०॥

सुमनोरञ्जनी — पत्यादिभिः निषिध्यमाना अपि । भगवति श्रीकृष्णे । दीर्घं बहुकालं श्रुतेन श्रवणेन भृतः तस्मिन्नेव धृतः आशयोऽन्तःकरणं यासां ताः ॥ २० ॥

यमुनोपवनेऽशोकनवपल्लवमण्डिते ।
प्रचरन्तं वृतं गोपैर्ददृशुः साग्रजं स्त्रियः ॥ २१ ॥

सत्यधर्मीया — अशोकनवपल्लवमण्डिते यमुनोपवने यथा स्वासां कृष्णापेक्षा न तथा कृष्णस्येत्याह ॥ यमुनेति । ई अमुना कृष्णेन सहैव वर्तत इति । गोपैर्वृतं सहितं साग्रजं प्रचरन्तं स्त्रियो ददृशुः । वृतमित्युक्तिः कदा द्रक्ष्याम इति स्ववृत्तमित्यपि स्फोरयत्यर्थम् ॥ २१ ॥

सुमनोरञ्जनी — अशोकानां नवपल्लवैर्मण्डिते यमुनायाः उपवने । प्रचरन्तं श्रीकृष्णं ददृशुः ॥ ॥ २१ ॥

श्यामं हिरण्यपरिधिं वनमाल्यबर्ह-
धातुप्रवालनटवेषमनुव्रतांसे ।
विन्यस्तहस्तमितरेण धुनानमब्जं
कर्णोत्पलालककपोलमुखाब्जहासम् ॥ २२ ॥

सत्यधर्मीया — किं रूपं ददृशुरित्यत आह ॥ श्याममिति । वर्णेन हिरण्यं हिरण्यवद्धियमानः परिधिर्वसनं पीतमिति यावत् सुवर्णमयमेखलमिति वा । वनमाल्यं वनमाला बर्हाणि च धातवो गैरिकाद्याः प्रवालाः पल्लवा एतैर्नटवद्वेषो यस्य तमनुव्रतः कश्चिद्गोपस्तस्यांसे स्कन्धे विन्यस्तहस्तमितरेण हस्तेनाब्जं कमलं धुनानं कम्पयन्तं कर्णयोरुत्पले यस्य तथा । आ

सम्यगलकाश्चूर्णकुन्तलाः । समीचीनौ कपोलौ च यस्य । उत्पलं शुष्कमांसे स्यात्कुष्टेन्दीवरयोरपीति विश्वः । अलकाश्चूर्णकुन्तला इत्यमरः । गण्डकपोलाविति च । तच्च तन्मुखाब्जं च तस्मिन्हासो यस्य स तम् ।। २२ ।।

सुमनोरञ्जनी — कीदृशं ददृशुरित्यत आह ।। श्याममिति । श्यामं इन्द्रनीलश्यामम् । हिरण्यपरिधिं सुवर्णमेखलम् । वनमाल्यैः वन्यपुष्पैः वनमालया वा । माल्यं मालास्रज इत्यमरः । बर्हैः पिञ्छैः, धातुना, प्रवालैः किसलयैश्च, नटवेषवद्वेषो यस्य तम् । अनुव्रतस्य मित्रस्य अंसे । विन्यस्तो हस्तो येन तम् । इतरेण हस्तेनाब्जं धुनानं कंपयन्तम् । कर्णयोः उत्पले, अलकाः कुन्तलाः, कपोलयोः मुखाब्जे हासो यस्य तम् ।। २२ ।।

दीर्घश्रुतप्रियतमोदयकर्णपूरैः
यस्मिन् निमग्नमनसस्तमथाक्षिरन्ध्रैः ।
अन्तः प्रवेश्य सुचिरं परिरभ्य तापं
प्राज्ञं यथाऽभिमतयो विजहुर्नरेन्द्रः ।। २३ ।।

सत्यधर्मीया — दीर्घं श्रुतः प्रियतमस्य कृष्णस्योदयः स एव कर्णपूराः कर्णालङ्कारास्तैः । यस्मिन्प्राङ्निमग्नमनसस्तमेव । अथ दर्शनानन्तरमक्षिरन्ध्रैस्तद्द्वाराऽन्तः प्रवेश्य सुचिरं परिरभ्य तापं तदसहवाससमुद्भूतं जहुः । तत्र निदर्शनमाह ।। प्राज्ञं यथेति । यथाऽभिमतयोऽभितो मतिरनुसन्धानं येषां ते विवेकिनः प्राज्ञं तन्नामकं भगवन्तं परिरभ्य । प्राज्ञेनात्मना सम्परिष्वक्तः सता सोम्य तदा सम्पन्नो भवतीत्यादेः । तापं जहाति तथेति ।। २३ ।।

सुमनोरञ्जनी — दीर्घं श्रुताः प्रियतमस्य उदया उत्कर्षाः कर्णपूरा इव तैः कर्णालंकारायमानैः श्रुतप्रियतमोदयैरित्यर्थः । तैः निमित्तैः । तस्मिन् श्रीकृष्णे निमग्नानि आविष्टानि चेतांसि यासां ताः । अक्षिरंध्रैः नेत्राख्यद्वारैः । तं, अन्तः हृदये प्रवेश्य प्रविष्टं ध्यात्वा परिरभ्य । स्मरसंभवं सुचिरं बहुकालीनं तापं जहुः । कथमिव । अभिमतयो देहाभिमानिनः । प्राज्ञं सुषुप्तिप्रवर्तकं भगवद्रूपं परिरभ्य यथा तापं जाग्रदाद्यवस्थासंभवं विजहुः तथेति । प्राज्ञा इति पाठे अभितो मतिर्येषां ते पूर्णज्ञाना इत्यर्थः । तादृशाः प्राज्ञाः ज्ञानिनः । परमात्मानं हृदये प्रवेश्य ध्यात्वेति यावत् । तस्मिन् निमग्नमनसः । तापं सासारिकं जहन्ति तथेत्यर्थो द्रष्टव्यः ।। २३ ।।

तास्तथा त्यक्तसर्वाशाः प्राप्ता आत्मदिदृक्षया ।
विज्ञायाखिलदृग् दृष्ट्या प्राह प्रहसिताननः ।। २४ ।।

सत्यधर्मीया — दृष्ट्या दर्शनमात्रेणाखिलदृग्सर्ववित् । तास्त्यक्ताः सर्वेषामाशा भर्त्रादीनां यासां ताः । आत्मदिदृक्षया प्राप्तास्तथा तथैव विज्ञाय प्रहसिताननः प्राह ॥ २४ ॥

सुमनोरञ्जनी — त्यक्ताः सर्वेषां पतिपुत्रादीनां आशाः याभिस्ताः त्यक्तसर्वविषयेच्छा इति वा । आत्मनः स्वस्य दिदृक्षया । प्राप्ताः भक्तिपूर्वमागताः स्त्रियः । तथा त्यक्तसर्वाशाः सत्यो भक्तिपूर्वमागता इति विज्ञाय । दृष्ट्या अवलोकनेन सह, प्रहसितं मन्दस्मितं आननं यस्मिन् सः प्रेमावलोकनेन सह मन्दस्मितं कुर्वन्तीति यावत् । अखिलदृक् सर्वज्ञः ॥ २४ ॥

श्रीभगवानुवाच -

स्वागतं वो महाभागा आस्यतां करवाम किम् ।
यन्नो दिदृक्षयाऽभ्येता उपपन्नमिदं हि वः ॥ २५ ॥

सत्यधर्मीया — हे महाभागाः । व आगतं स्वागतमास्यतां किं करवाम यन्नो दिदृक्षयाऽभ्येताः । अभि आङ् एतत्पूर्व इण् धातुः । सम्मुखं सम्यगायाताः । अभि भर्त्रादींस्तिरस्कृत्यादरेणायाता इति वा । अभिप्रेयस इति काठकविवृतावभिरवज्ञानार्थक इत्युक्तेः । इदं हि व उपपन्नं युक्तम् ॥ २५ ॥

सुमनोरञ्जनी — हे महाभागाः ! वः स्वागतं शुभमागमनम् । नो दिदृक्षया अभ्येताः आगता इति यत् । इदं उपपन्नं युक्तम् ॥ २५ ॥

न श्रद्धामधिकुर्वन्ति कुशलार्थनिदर्शनाः ।
अहैतुक्यव्यवहितां भक्तिमात्मप्रिये यथा ॥ २६ ॥

सत्यधर्मीया — नन्वद्धा मयि कुर्वन्तीति सरलः पाठः । कुशलार्थनिदर्शना नित्यक्षेमवानर्थो मोक्षस्तस्यापि निदर्शनं दर्शनमनुसन्धानं भवत्विति तन्न विद्यते येषामधिकारिणां ते तथा । मय्यद्धा सर्वत्यागेनेति सम्यक् । अहैतुक्यव्यवहिताम् । विशेषणयोरेव समासः । हैतुकी फलादिनिमित्तायत्ता सा नेत्यहैतुकी सा च सा व्यवहिताऽन्तरायसहस्रेणाप्यप्रतिबद्धेति निर्व्यवधाना तां भक्तिमात्मप्रिये स्वदेहादौ यथा तथा कुर्वन्ति । आन्तरङ्गिको भावस्तु पत्याविति । न श्रद्धामधिकुर्वन्तीति पाठे श्रद्धां विषयेषु नाधिकुर्वन्ति व्यतिरेकनिदर्शनं वेति पूर्वे । कुशलाः स्वार्थदर्शना इति पाठः स्फुटार्थः ॥२६॥

सुमनोरञ्जनी — युक्तत्वमेवोपपादयति । कुशलाश्च ते, अर्थस्य पुरुषार्थस्य निदर्शनं निर्णयो येषां ते । श्रद्धां फलेच्छाम् । नाधिकुर्वन्ति । अपि तु, आत्मप्रिये भगवति । अहैतुकी निर्निमित्ता च सा

अव्यवहिता निरन्तरा च तथाविधां भक्तिं यथावत् अधिकुर्वन्ति अधिकां कुर्वन्ति । अनेन मदङ्गसङ्गेच्छया यूयमत्र प्राप्ताः । सा परित्याज्या । अहैतुकी भक्तिरेव कर्तव्येति ध्वनयति ॥ २६ ॥

प्राणबुद्धिमनःस्वात्मदारापत्यधनादयः ।
यत्सम्पर्कात् प्रिया आसंस्ततः को न्वपरः प्रियः ॥ २७ ॥

सत्यधर्मीया — आत्मप्रिय इत्युक्तं वितत्य वक्ति । तत्रापि न देहादिकं स्वतन्त्रं प्रीतिहेतुः किन्तु मत्सन्निधेरतः सर्वप्रेयानहमितीदमुपपन्नमित्याह ॥ प्राणबुद्धीति । प्राणाः पञ्च बुद्धिर्मनः खानीतराणीन्द्रियाण्यात्मा स्वयं देहोऽपत्यानि च धनादयश्च यत्सम्पर्कात्प्रियाः । ततो मत्तोऽपरः प्रियः को नु न कोऽपीति युक्तं कृतम् ॥ २७ ॥

सुमनोरञ्जनी — कथमात्मप्रियत्वं तवेत्यत आह ॥ प्राणेति । प्राणः शरीरो वायुः । बुद्धिर्मनश्च मनोवृत्ती । खानि तद्भिन्नेन्द्रियाणि । आत्मा देहो जीवश्च । यस्य श्रीहरेर्मम सम्पर्कात् सम्बन्धात् । मदधिष्ठनत्वादिति यावत् । ततः स्वसम्पर्कात्प्राणादेः प्रियत्वसम्पादकात् मत्तः अपरः को नु प्रियः स्यात् न कोऽपि ॥ २७ ॥

तद् यात साध्व्यो यजनं पतयो वो द्विजातयः ।
स्वसत्रं पारयिष्यन्ति युष्माभिर्गृहमेधिनः ॥ २८ ॥

सत्यधर्मीया — यस्मान्मदाज्ञा नावज्ञेया तत्तस्मात् हे साध्व्यो यजनं यात । वः पतयो द्विजातयो गृहमेधिनस्तदादिकमेव प्रियमिति मेधावन्तो बहिर्मुखादिबहिर्मुखा न मन्निष्ठा अतोऽन्नं न ददुरिति कटाक्षयति हरिरनेनेति ज्ञेयम् । अन्यथा वः पतय इत्यनेन गृहस्थत्वलाभादिदमतिरिक्तं स्यादिति मन्तव्यम् । युष्माभिः सह स्वसत्रं पारयिष्यन्तीति यत्तद्यातेति वा ॥ २८ ॥

सुमनोरञ्जनी — यस्मान्मय्यहैतुकी एव भक्तिः कार्या नाङ्गसङ्गादिफलेच्छया तत् तस्मात् यूयं यजनं यज्ञं समापयितुमिति शेषः । यात गच्छत । कुतः । वः पतयो द्विजातयः प्रत्यागताभिः युष्माभिः सह । स्वकीयं सत्रं पारयिष्यन्ति समापयिष्यन्ति । अतः । अस्मान्विहायैव कुतः सत्रं न पारयिष्यन्तीत्यत उक्तं ॥ गृहमेधिन इति । गृहस्थानां पत्नीर्विना न कर्मसिद्धिरिति भावः ॥ २८ ॥

यज्ञपत्न्य ऊचुः -

मैवं विभोऽर्हति भवान् गदितुं नृशंसं सत्यं कुरुष्व निगमं तव पादमूलम् ।
प्राप्ता वयं तुलसिदाम पदावसृष्टं केशैर्निवोढुमतिलङ्घ्य समस्तबन्धून् ॥ २९ ॥

सत्यधर्मीया — हे विभो! भवानेवं नृशंसमस्मद्धिंसासाधकमिति परुषं गदितुं नार्हति। निगमम् 'न मे भक्तः प्रणश्यति। तांस्तथैव भजामि। न च पुनरावर्तत' इत्याद्यागमम्। सत्यं कुरुष्वास्मत्प्रेषणे निगम उक्तोऽसत्यो भवतीति भावः। वयं समस्तबन्धूनतिलङ्घ्य लङ्घयित्वा पदावसृष्टं निर्माल्यतया पदत्यक्तं यत्तुलसिदाम ङ्यापोः संज्ञाच्छन्दसोरिति ह्रस्वः। तुलस्या दाम मालां केशैर्निवोढुं धर्तुं तव पादमूलं प्राप्तास्ताः प्रति ॥ २९ ॥

सुमनोरञ्जनी — हे विभो ! भवान्। एवंविधं नृशंसं परुषम्। वचनं गदितुं माऽर्हति। निगमं प्रतिज्ञां 'शरणागतरक्षकोऽहं भक्तवत्सलः' इत्यादिरूपाम्। सत्यं यथार्थां कुरु। यद्वा निगमं 'अनन्याश्चिन्तयन्तो मां, ये भजन्ति तु मां भक्त्या, मयि ते तेषु चाप्यहमित्यादिरूपं वचनं सत्यं कुर्वित्यर्थः। भवत्स्वनन्यभक्तत्वमेव कथमित्यत आह ॥ तवेति। तव पदावसृष्टं विसृष्टं यत्तुलस्याः दाम माला तत्। केशैः नितरां वोढुं समस्तबन्धूनप्यतिलङ्घ्य। तव पादमूलं प्राप्ताः स्मः। अतस्त्वय्यनन्यभक्ता एवेति भावः ॥ २९ ॥

गृह्णन्ति नो न पतयः पितरौ सुता वा
न भ्रातृबन्धुसुहृदः कुत एव चान्ये।
तस्मात् प्रसीद पदयोः पतितात्मनां नो
नान्या भवेद् गतिररिन्दम तद् विधेहि ॥ ३० ॥

सत्यधर्मीया — स्वसत्रं युष्माभिः सह विप्राः पारयिष्यन्ति यातेत्युक्तं तत्रोत्तरमीरयन्ति ॥ गृह्णन्ति न इति। नः पतय इतो गता नो न गृह्णन्ति तदाज्ञावज्ञानात्। तर्हि मातृपितृलालितास्तदालये वर्तध्वमित्यत आहुः। न पितरौ पिता मातेत्येकशेषः। मातरपितरौ न च ता भ्रातृबन्धुसुहृदश्च नान्ये कुत एव न गृह्णीयुरिति। भवत्पदयोरिति शुभवत्पतितात्मनां पतितः पातित आत्मा देहो याभिस्तास्तासामुपरि प्रसीद प्रसादं कुरु। हे अरिन्दम अरिश्चक्राभिमानी कामो महतेश्चतुर्मुखादिवत् तं दमयतीति स तथा मत्वर्थे इकारप्रत्ययः। यथाऽन्या गतिरस्माकं मृत्यनन्तरं प्राप्याऽन्या गतिर्न भवेद्भवतस्तथा विधेहि स्वर्गादिकं न लषाम इति भावः। सर्वचेष्टके त्वयि दृष्टेऽन्याऽनितुं त्वया चेष्टयितुं योग्या विधिभवादिरूपिणी त्वन्नियम्येति यावत् सा गतिर्न भवेद्यथा तथा विधेहीत्यान्तरङ्गिकः कुरङ्गनयनानां भावोऽवसेयः। ऋहलोर्ण्यदिति ण्यत्प्रत्ययः ॥ ३० ॥

सुमनोरञ्जनी — किं च स्वजनं प्रति यात। ते तु युष्माभिः स्वसत्रं पारयिष्यन्तीत्युक्तं भवता। तदपीदानीं दुर्घटमित्याहुः। गृह्णन्तीति। पत्यादयो नः अस्मान् न गृह्णन्ति न स्वीकुर्वन्ति।

तदाज्ञोल्लङ्घनात् । पदयोः त्वच्चरणयोः पतितात्मनां पतितदेहानां, पतितं संलग्नं आत्म मनो यासामिति वा । नः प्रसीद । अथ च त्वत्पादकमलादन्या, गम्यत इति गतिः प्राप्यं पत्यादिकं स्वर्गादिकं वा । येनोपायेन न भवेत् तदुपायं विधेहि कुरु । यद्वा पत्याज्ञोल्लङ्घनात्तत्पदादन्या त्वत्पादकमलादन्या नरकादिरूपा गतिः यथा न भवेत्तथा विधेहीति वा ॥ ३० ॥

श्रीभगवानुवाच -

पतयो नाभ्यसूयेरन् नित्यं भ्रातृसुतादयः ।
लोकाश्च वो मयोपेता देवा अप्यनुमन्वते ॥ ३१ ॥

सत्यधर्मीया — पतयो नो न गृह्णन्तीत्यादेरुत्तरमाह ॥ पतय इति । नित्यमित्यनेनारुन्तुदवादराहित्यं द्योतयति । युष्मभ्यमिति शेषः । कुत एवान्य इत्युत्तरयति ॥ लोकाश्चेति । नाभ्यसूयेरन् । मयोपेताः एवं सङ्गताश्चेद्देवा अप्यनुमन्वते सम्मानयति का कथा भूदेवानामिति भावः ॥ ३१ ॥

सुमनोरञ्जनी — श्रीकृष्णः समाधत्ते । पतयः भ्रातृसुतादयश्च अन्ये लोकाश्च । वः प्रति नाभ्यसूयेरन् । मया उपेताः युक्ताः देवा अपि अनुमन्वते अनुमताः भवन्ति । मयोपेताः युक्ताः मत्समीपमागताः वः प्रतीति वा ॥ ३१ ॥

न प्रीतयेऽनुरागाय ह्यङ्गसङ्गो नृणामिह ।
तन्मनो मयि युञ्जाना अचिरान्मामवाप्स्यथ ॥ ३२ ॥

सत्यधर्मीया — पादमूलं प्राप्ता इत्यनेनाङ्गसङ्गाशा शशीमुखीभिः सूचिता । हृदयसङ्गम एव सुसङ्गमो न तनुसङ्गम एव सुसङ्गम इति तत्रोत्तरमाह ॥ नेति । यद्यतो नृणां नार्यश्च नरश्च नरस्तेषां परस्परमङ्गसङ्गः प्रीतये सुखायानुरागाय स्नेहविवृद्ध्यै च नेह भवति । तर्हि कया सेवया न उद्धृतिर्भगवन्नित्यत आह ॥ तदिति । मयि मनो युञ्जाना अचिरान्मामवाप्स्यथ । अनेन बालिशस्य बालस्य मनोजस्य न वशवर्तिन्यो न भवन्तु भवत्यः किन्तु तज्जनकं मनः आश्रयं कृत्वा तस्य मयि योजने प्रयोजनं यौष्माकीणं सेत्स्यतीति ध्वनयामास श्रीश इति ज्ञेयम् ॥ ३२ ॥

सुमनोरञ्जनी — इह नृणां मनुष्याणामङ्गेन सङ्गो मम प्रीतये सुखाय,अनुरागाय स्नेहाय च न भवति । भवतीनां मदङ्गसङ्गः नृणां मनुष्यजन्मनां युष्मद्बन्धूनां प्रीतये अनुरागाय च न भवतीति वा । युष्मासु प्रीतिस्नेहौ न कुर्युरिति भावः । तत् तस्मात् । मयि मनो युञ्जानाः । स्वपत्यादिषु मामेवानुस्मरंत्य इत्यर्थः । मामेव अचिरात् क्षिप्रं अवाप्स्यथेति ॥ ३२ ॥

श्रीशुक उवाच -

इत्युक्ता द्विजापत्न्यस्ता यज्ञवाटं पुनर्गताः ।
ते चानसूयवस्ताभिः स्त्रीभिः सत्रमपारयन् ॥ ३३ ॥

सत्यधर्मीया — इत्युक्ता भगवतेति शेषः । ते च द्विजास्तेऽप्यनसूयवस्ताभ्यस्ताभिः स्त्रीभिः सह सत्रमपारयन्समापयन् ॥ ३३ ॥

सुमनोरञ्जनी — इतिशब्द आवर्तते । इति एवंप्रकारेण । इति अस्मादेव हेतोः । पतयो नाभ्यसूयेरन्निति भगवतोक्तत्वादिति यावत् । ते चानसूयवः अपारयन् समापितवन्तः ॥ ३३ ॥

तत्रैका विधृता भर्त्रा भगवन्तं यथाश्रुतम् ।
हृदोपगुह्य विजहौ देहं कर्मानुबन्धनम् ॥ ३४ ॥

सत्यधर्मीया — भर्त्रा पत्या विधृता यथा नागच्छेत्तथा बलात्स्थापिताबला यथाश्रुतं भगवन्तं हृदोपगूह्यालिङ्ग्य कर्मानुबन्धनं कर्मायातं देहं विजहौ तत्याज । कर्म चानुबन्धो भक्तिः, कर्मभिर्व्यक्तोऽनुबन्धस्तौ नौ नियामकौ, स नो नियामको यस्य तं देहम् । तत्रैष्यति काले । विधृता विशेषेण धृतिर्धारणं यस्याः साऽभवत् ॥ ३४ ॥

सुमनोरञ्जनी — तत्र तासु मध्ये एका स्त्री भर्त्रा विधृता 'त्वं मा याहि' इति हस्ते गृहीता । श्रीकृष्णदर्शनं प्रति गन्तुमसमर्था सती । यथाश्रुतं श्रवणानुसारेण । श्रीकृष्णं मनसाऽवलोक्येति यावत् । हृदा मनसैवोपगूह्य आलिङ्ग्य । कर्मानुबन्धनं कर्मापादितं देहं विजहौ त्यक्तवतीत्यर्थः ॥३४॥

भगवानपि गोविन्दस्तेनैवान्नेन गोपकान् ।
चतुर्विधेनाशयित्वा स्वयं च बुभुजे प्रभुः ॥ ३५ ॥

सत्यधर्मीया — आशयित्वा स्वयं च बुभुजे तत्रत्यमप्राकृतरसं बुभुजे । अवतारे स्थूलभोजनमपि जनार्दनस्य सम्भवति । यथोक्तं प्रमेयदीपिकायाम् । अवतारेषु स्थूलमपि भुङ्क्ते इति । गीतातात्पर्यबृहदारण्यकऋग्भाष्याद्युदाहृत्य सत्तत्त्वरत्नमालोक्तमनुसन्धेयम् ॥ ३५ ॥

सुमनोरञ्जनी — आशयित्वा भोजयित्वा ॥ ३५ ॥

एवं लीलानरवपुर्नृलोकमनुशीलयन् ।
रेमे गोगोपगोपीनां रमयन् रूपवाक्कृतैः ॥ ३६ ॥

सत्यधर्मीया — एवं लीलानरवपुर्नृलोकमनुशीलयन्ननुकुर्वन्गोगोपगोपीनाम् । कर्मणि षष्ठी । गौश्च गोपाश्च तैः सहिताश्च ता गोप्यश्च ता रमयन्स्वयं रेमे । गवि गोपा गोगोपा दिवि तु देवा एव त गोगोपाश्च तथा गावश्च ताभिः पीनां पुष्टां प्रजां रमयन्निति वा । रूपवाकृतै रूपं च वाक् च कृतानि कर्माणि च तै रमयन्नेमे । नृपवाकृतैरित्यपि पठन्ति ॥ ३६ ॥

सुमनोरञ्जनी — लीलार्थं नरवपुरिव वपुर्यस्य सः । नृलोकमनुशीलयन् अनुकुर्वन् । गोगोप-गोपीनां, कर्मणि षष्ठीयम् । मनांसीति शेषो वा । वाग्भिः कृतैः कर्मभिश्च रमयन् सुखयन् ॥ ३६ ॥

अथानुस्मृत्य विप्रास्ते अन्वतप्यन् कृतागसः ।
यद् विश्वेश्वरयोर्याञ्चामहन्मनृविडम्बयोः ॥ ३७ ॥

सत्यधर्मीया — अथ ते विप्राः । नृविडम्बयोर्विश्वेश्वरयो रामकृष्णयोर्यद्यतो याञ्चामहन्म । अहनन्निति पाठे छन्दसो विकरणव्यत्यय इव पुरुषव्यत्ययोऽपीति स न सरलः । नाशितवन्तस्तस्मादनुसृत्य तदीश्वरतां स्मृत्वा । कृतमागो यैस्ते तथेत्यन्वतप्यन्पश्चात्तापं प्राप्ताः । इदं दिनमादीकृत्य विप्राः पश्चिमबुद्धय इति प्रसृतमाभाणकमिति किंवदन्ती ॥ ३७ ॥

सुमनोरञ्जनी — अथ ते दीक्षिताः विप्राः यत् यस्मात् विश्वेश्वरयोः याञ्चामहनन् तत एव कृतागसः, अनुस्मृत्य विश्वेश्वरावेताविति प्रत्यभिज्ञाय । अन्वतप्यन् पश्चात्तप्ता बभूवुः ॥ ३७ ॥

दृष्ट्वा स्त्रीणां भगवति कृष्णे भक्तिमलौकिकीम् ।
आत्मानं च तया हीनमनुतप्ता व्यगर्हयन् ॥ ३८ ॥

सत्यधर्मीया — किं दृष्ट्वाऽनुतापो विप्राणामित्यत आह ॥ भगवति कृष्णेऽलौकिकीं स्वादि-विलक्षणां भक्तिं दृष्ट्वा तया तादृश्या भक्त्या हीनमात्मानं स्वमनुतप्ता व्यगर्हयन्ननिन्दन्निति ॥ ३८ ॥

सुमनोरञ्जनी — अनुतप्तास्ते विप्राः आत्मानं स्वात्मानं व्यगर्हयन् निनिन्दुः । तत्र निमित्तं दृष्ट्वेति । स्त्रीणामिति शास्त्रजन्यज्ञानाभावं सूचयति । अलौकिकीं सर्वलोकविलक्षणां भक्तिं दृष्ट्वा । आत्मानं स्वात्मानं, तया श्रीकृष्णचरणारविन्दे निर्व्याजनिरन्तराप्रतिबद्धप्रेमप्रवाहरूपया भक्त्या विहीनं च दृष्ट्वेति ॥ ३८ ॥

धिग् जन्म नस्तु धिग् बुद्धिं धिग् वृत्तं धिग् बहुज्ञताम् ।
धिक् कुलं धिक् क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे ॥ ३९ ॥

सत्यधर्मीया — तन्निन्दनमिव स्वनिन्दनमेवमिति तत्प्रकारं निरूपयन्ति ।। धिग्जन्मेति । न इति सर्वान्वयि । येऽधोक्षजे विमुखास्तेषां नो जन्म धिक् निधत्ता तस्येत्यर्थः । बहुज्ञता समस्तसमयज्ञता । कुलम् । पत्न्यस्तु कुलान्तरायाता इति स्वकुलं ग्राह्यम् । क्रियादाक्ष्यं कर्मसमर्थता । तुः समुच्चये वर्तते ।। ३९ ।।

सुमनोरञ्जनी — गर्हणाप्रकारमेवाह ।। धिगिति । नः अस्माकम् । जन्म सत्कुले जननम् । बुद्धिं कार्याकार्यनिश्चयम् । व्रतं ब्रह्मचर्यादि । बहुज्ञतां शास्त्रार्थज्ञानं, बहुक्रियायां यज्ञादिक्रियायां साधनानुष्ठाने वा दाक्ष्यमित्येतत्सर्वं धिग्धिगिति कुत्सितं विजानीहीति प्रत्येकमन्वयः । तत्र निमित्तमाहुः । ये वयं अधोक्षजे विमुखा इति ।। ३९ ।।

नूनं भगवतो माया मायिनामपि मोहिनी ।
यद् वयं गुरवो नृणां स्वार्थे मुह्यामहे द्विजाः ।। ४० ।।

सत्यधर्मीया — मायिनां ज्ञानिनाममायिनामकुलचेतसामपि शिखादिर्माया मोहिनी मोहिका यद्यतो नृणां गुरवो द्विजा अपि वयं स्वार्थे मुह्यामहे । हे द्विजा इति कांश्चित्सम्बोध्य केचिद्वदन्तीति वा ।। ४० ।।

सुमनोरञ्जनी — तदव्यक्तमाह हि, अपि संराधने प्रत्यक्षानुमानाभ्यामित्युक्तं प्रमेयमनुसन्दधन्त आहुः ।। नूनमिति । भगवतो हरेर्माया मोहनशक्तिः, मायिनां ज्ञानिनामपि मोहिनी । न तत्र प्रमाणान्तरमन्वेषणीयम् । स्वात्मनामेवानुभवादित्याहुः । यस्माद्वयं नृणां गुरवोऽपि पुरुषार्थसाधनमुपदिशन्तोऽपि स्वार्थे स्वप्रयोजने विषये मुह्यामहे । द्विजा इति तत्रत्यानां सम्बोधनम् । गुरवो द्विजा इति मोहासम्भवे हेतुद्वयमिति पदरत्नावली ।। ४० ।।

अहो पश्यत नारीणामपि कृष्णे जगद्गुरौ ।
दुरन्तभावं यश्छिन्द्यान्मृत्युपाशान् गृहाभिधान् ।। ४१ ।।

सत्यधर्मीया — अहो पश्यतेति स्वारस्यात् । अपिरुत्तरत्र वक्ष्यमाणैतद्दुर्मिलताहेतून्कटाक्षयति । जगद्गुरौ कृष्णे नारीणामपि दुरन्तोऽप्रतिबद्धो भावो भक्तिस्तं पश्यत । अहो । यो गृहाभिधांस्तन्नाम्नो मृत्युपाशांश्छिन्द्यात्तम् ।। ४१ ।।

सुमनोरञ्जनी — दुरन्तभावं परिपूर्णां भक्तिम् । गृहाभिधान् संसारसंज्ञान् मृत्युपाशान् यो भावः छिन्द्यात् छिनत्ति ।। ४१ ।।

नासां द्विजातिसंस्कारो न निवासो गुरावपि ।
न तपो नात्ममीमांसा न शौचं न क्रियाः शुभाः ॥ ४२ ॥

सत्यधर्मीया — तान्हेतूनाह ॥ नेति । आसां द्विजातिसंस्कारः साक्षादुपनीतिरतो न, स्त्रीणां प्रदानकर्मैव यथोपनयनं तथेति विरोधः । गुरावपि न निवासो विद्यार्थमिति शेषः । न तपः स्वातन्त्र्येण तत्रानधिकारात् । आत्ममीमांसा ब्रह्मविचारः । न शौचमस्मद्वदन्तर्बहिःशुद्धिर्न शुभाः क्रिया यागाद्याः ॥ ४२ ॥

सुमनोरञ्जनी — आसां स्त्रीणाम् । द्विजातिसंस्कारः उपनयनादिः । अनेनाध्ययने अधिकारो निषिद्धः । अत एव गुरौ गुरुकुले अध्ययनार्थं निवासोऽपि न । अत एव च तपः शौचं शुभाः क्रियाः मनः शुद्धिसंपादका अपि नेति पृथगन्वयः । तत एव चात्ममीमांसा ब्रह्मविषयकश्रवणादिरूपा जिज्ञासापि न ॥ ४२ ॥

अथापि ह्युत्तमश्लोके कृष्णे योगेश्वरेश्वरे ।
भक्तिर्दृढा न चास्माकं संस्कारादिमतामपि ॥ ४३ ॥

सत्यधर्मीया — एताश्चर्यं किं व्यलोकि भवद्भिरित्यत आहुः ॥ अथाऽपीति । संस्कारादिमतां संस्कारादिशुभक्रियादिसम्पन्नानामप्यस्माकं न दृढा भक्तिः ॥ ४३ ॥

सुमनोरञ्जनी — अथापि एवंविधसामग्र्यभावेऽपि उत्तमश्लोके परमात्मनि दृढा अन्तराय-सहस्रेणाप्यप्रतिबद्धा भक्तिरुत्पन्ना । संस्कारादिमतामप्यस्माकं नोत्पन्नेति । अतः श्रीहर्यनुग्रह एव कारणं न साधनसन्दर्भ इति भावः ॥ ४३ ॥

ननु स्वार्थविमूढानां प्रमत्तानां गृहेहया ।
अहो नः स्मारयामास गोपवाक्यैः सतां गतिः ॥ ४४ ॥

सत्यधर्मीया — उपदेशकाभावादियं दशाऽसीदित्यपि नास्मान्सूचयामास स, तेनापि नास्माकं धीरुदियायेति वर्णयन्ति ॥ नन्विति । स्वार्थविमूढानां गृहेहया प्रमत्तानां नो गोपवाक्यैः सतां गतिः स्मारयामास ॥ ४४ ॥

सुमनोरञ्जनी — प्रमत्तानां श्रुतधनकुलकर्मभिर्मत्तानां,अत एव गृहेहया सांसारिकसुखेच्छया । गृहस्थाश्रमोचितकर्मणा वा । स्वार्थे विमूढानां मोहयुक्तानामप्यस्माकं गोपवाक्यैः स्वात्मानमागतं स्मारयामास । अहो परमदयालुता श्रीहरेः ॥ ४४ ॥

अन्यथा पूर्णकामस्य कैवल्याद्याशिषां पतेः ।
ईशितव्यैः किमस्माभिरीशस्यैतद् विडम्बनम् ॥ ४५ ॥

सत्यधर्मीया — नन्वोदनार्थं गोपानप्रेषयत्स कथं तत्स्मारणं युष्माकमित्यत आह ॥ अन्यथेति । पूर्णकामस्य कैवल्याद्याशिषां मोक्षादिसकलकाम्यानां पतेरुक्ता गतिरनुसन्धेया । तत्काले यदभीप्सितमेषां तद्वितरणधुरीणस्येशितव्यैः सूत्रपुत्तलिकातुल्यैः स्वप्रेर्यैस्तस्य किम् । ईशस्यैतद्विडम्बनं लोकानुकृतिः ॥ ४५ ॥

सुमनोरञ्जनी — अन्यथा ईशितव्यैः नियम्यैः अस्माभिः ईशस्य किं प्रयोजनं न किमपि । नन्वन्नकामनया युष्मान्प्रति गोपान् प्रेषयामासेत्यत उक्तम् ॥ पूर्णकामस्येति । न हि पूर्णकामस्य अन्नादीच्छा घटत इति भावः । ननु च स्वस्य पूर्णकामत्वेऽपि गोपानां क्षुधाशमनाय प्रेषितवानित्यत उक्तम् । कैवल्यादिरूपाशिषां पुरुषार्थानां पतेः दातुः । आशिषांपतेरित्यलुक्समासः । मोक्षादिपुरुषार्थदातुर्हरेः गोपक्षुधाशमनं कियदिति भावः । तर्हि किमर्थमन्नं याचतेति गोपानुक्तवानित्यत उक्तम् ॥ विडम्बनमिति ॥ ४५ ॥

हित्वाऽन्यान् भजते यं श्रीः पादस्पर्शाशयाऽसकृत् ।
आत्मदोषापवर्गेण तद्याश्ञा जनमोहिनी ॥ ४६ ॥

देशः कालः पृथग्द्रव्यं मन्त्रतन्त्रर्त्विजोऽग्नयः ।
देवता यजमानश्च क्रतुर्धर्मश्च यन्मयाः ॥ ४७ ॥

सत्यधर्मीया — आत्मदोषापवर्गेणात्मनो दोषश्चाञ्चल्यं तस्यापवर्गो वर्जनं त्यागस्तेन स्थैर्येणेत्यर्थः । पादस्पर्शाशिया पादस्पर्शेनाशयोऽन्तःकरणं यस्याः सा सती पादस्पर्शस्याशाऽभिलाषस्तया वा श्रीर्याऽन्यान्हित्वा । एष ब्रह्माऽतिवृद्ध इत्यादिप्रतिपादितदोषांश्चतुराननादीन्हित्वा भजते । तद्याश्ञाऽस्मदन्नयाचनं जनमोहिन्यस्मदादिपामरमोहिका ॥ ४६,४७ ॥

सुमनोरञ्जनी — विडम्बनमित्युक्तमेवोपपादयति ॥ हित्वेति । श्रीर्महालक्ष्मीरपि । यस्य हरेः सकृदपि पादस्पर्शाशिया । अन्यान् समुद्रमथनवेलायां समवेतान् । ब्रह्मादीन् हित्वा तत्र दोषबुध्या त्यक्त्वा स्वात्मनः स्वस्य यो दोषः चाञ्चल्यरूपः तस्यापवर्गेण परित्यागेन स्थिरभावेनेति यावत् । यं श्रीहरिमेव भजते तस्य भगवतोऽन्नादियाश्ञा जनमोहिन्येवेति ॥ ४६,४७ ॥

स एष भगवान् साक्षाद् विष्णुर्योगेश्वरेश्वरः ।
जातो भुवीति शृण्वाना ये विमूढा न विद्महे ॥ ४८ ॥

सत्यधर्मीया — भुवि जात इति शृण्वाना ये वयम् ॥ ४८ ॥

सुमनोरञ्जनी — भुवि जात इति शृण्वाना अपि विमूढत्वान्न विद्महे ॥ ४८ ॥

नमस्तुभ्यं भगवते कृष्णायाकुण्ठमेधसे ।
यन्मायामोहितदृशो भ्रमामः कर्मवर्त्मसु ॥ ४९ ॥

सत्यधर्मीया — सञ्चिन्तितं प्रणमन्ति ॥ नम इति । यन्मायामोहिता दृग्धीर्येषां ते । कर्मवर्त्मसु प्रवृत्तकर्ममार्गेषु । अकुण्ठमेधसे गतम् । यस्त्वमकुण्ठं यथा तथैधसे नित्यमभिवृद्धो भवसि । तस्य या च याचना जनमोहिनीति वा ॥ ४९ ॥

सुमनोरञ्जनी — अकुण्ठमेधसे अप्रतिबद्धज्ञानाय । यन्मायया मोहयुक्तमनसः । कर्मवर्त्मसु कर्ममार्गेषु ॥ ४९ ॥

स वै न आद्यः पुरुषः स्वमायामोहितात्मनाम् ।
अविज्ञातानुभावानां क्षन्तुमर्हत्यतिक्रमम् ॥ ५० ॥

सत्यधर्मीया — स्वमायामोहितात्मनामिति, अविज्ञातानुभावानां नोऽतिक्रमम् । आद्य उपजीव्यः पुरुषः क्षन्तुमर्हति योग्यो भवति ॥ ५० ॥

सुमनोरञ्जनी — स्वमायामोहितात्मत्वादविज्ञातः अनुभावो माहात्म्यं यैस्ते तथाविधानाम् । अतिक्रमं अपराधम् ॥ ५० ॥

इति कृष्णमनुस्सृत्य विप्रास्ते कृतहेलनाः ।
दिदृक्षवोऽप्यच्युतयोः कंसाद् भीता न चाचलन् ॥ ५१ ॥

इति श्रीमद्भागवते दशमस्कन्धे एकविंशोऽध्यायः ॥

सत्यधर्मीया — कृतं हेलनमात्मनामात्मनैव यैस्ते अच्युतयोर्मुख्यामुख्यतच्छब्दवाच्ययोः । ते दिदृक्षवोऽपि कंसाद्भीता न चाचलन्स्वस्थानान्नोच्चेलुः ॥ ५१ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे एकविंशोऽध्यायः ॥ १०-२१ ॥

सुमनोरञ्जनी — कृतहेलनाः कृतापराधाः । अच्युतयोः कृष्णरामयोः, कर्मणि षष्ठी । दिदृक्षवोऽपि द्रष्टुमिच्छवोऽपि ॥ ५१ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां एकविंशोऽध्यायः ॥ १०-२१ ॥

॥ अथ द्वाविंशोऽध्यायः ॥

श्रीशुक उवाच -

भगवानपि तत्रैव बलदेवेन संयुतः ।
अपश्यन्निवसन् गोपानिन्द्रयागकृतोद्यमान् ॥ १ ॥

सत्यधर्मीया — सर्ववित्स्वमहिमानं किञ्चिद्व्यक्तीकर्तुमिन्द्रमददमनं कुर्वन्नजानन्निव नन्दादीन्किञ्चित्पप्रच्छेति शुकः शंसति ॥ श्रीशुक इति । तत्रैव गोकुल एव निवसन्निन्द्रमुद्दिश्य क्रियमाणो याग इन्द्रयागस्तत्र कृत उद्योग उद्यमो येषां ते तानपश्यद्ददर्श ॥ १ ॥

सुमनोरञ्जनी — एवं श्रीकृष्णस्य पौगण्डवयसि कृतां लीलां निरूप्य पुनः सिंहावलोकनन्यायेन कौमारे वयसि कृतं गोवर्धनोद्धरणलक्षणमाहात्म्यान्तरमाविष्कर्तुं तदुपोद्घाततया श्रीकृष्णोपदिष्टैर्गोपैरिन्द्रयागत्यागपूर्वकं कृतं गोवर्धनमखोत्सवं वर्णयत्यस्मिन्नध्याये । भगवानपि तत्रैव व्रज एव । निवसन् । इन्द्रयागार्थं कृतोद्यमान् गोपानपश्यदिति सम्बन्धः ॥ १ ॥

तदभिज्ञोऽपि भगवान् सर्वात्मा सर्वदर्शनः ।
प्रश्रयावनतोऽपृच्छद् वृद्धान् नन्दपुरोगमान् ॥ २ ॥

सत्यधर्मीया — सर्वात्मा सर्वदर्शन इति तदभिज्ञताहेतू । प्रश्रयो भक्तिस्तेनावनतः प्रवणः सन्नन्दादीन्वृद्धान् ॥ २ ॥

सुमनोरञ्जनी — सर्वस्यात्मा अन्तर्यामी । सर्वदर्शनः सर्वज्ञश्च यतोऽतस्तदभिज्ञोऽपि प्रश्रयेण विनयेन अवनतः नम्रांगः ॥ २ ॥

कथ्यतां मे पितः कोऽयं सम्भ्रमो व उपागतः ।
किं फलं कस्य चोद्देशः केन वा साध्यते मखः ॥ ३ ॥

सत्यधर्मीया — तत्रापि न प्रलोभः कर्तुं शक्य इति तमेव सम्बोध्य पृच्छति ॥ कथ्यतां मे पितरिति । मे पितर्मे कथ्यतामित्यन्वयः । अयं कः सम्भ्रम उत्सव उपायातः । अकरणे च किं भयमुपागतम् । एतादृशो दुर्भ्रमो मयि सति कुत आयात इत्यान्तरङ्गिकोऽपि भावो भगवतो ज्ञेयः । न दृश्यते किमिति तत्राह ॥ किं फलमित्यादिना । कस्योद्देशः कां देवतामुद्दिश्य केन साधनेनायं मखः साध्यते केनाधिकारिणा वा ॥ ३ ॥

सुमनोरञ्जनी — हे पितः ! अयं संभ्रमः कः किंविषयकः । मखविषयश्चेत्तस्य किं फलम् । कां देवतामुद्दिश्य केन साधनेनायं मखः साध्यते ॥ ३ ॥

एतद् ब्रूहि महान् कामो मह्यं शुश्रूषवे पितः ।
न हि गोप्यं हि साधूनां कीर्त्यं सर्वात्मना त्विह ॥ ४ ॥

सत्यधर्मीया — शुश्रूषवे श्रोतुकामाय मह्यं तदेतत्पृष्टं ब्रूहि । किं तवानेनेत्यत आह । महान्कामः श्रवणनिबर्हणीयोऽभिलाषो वर्तत इति । हि यतः साधूनां सर्वात्मना सर्वं कीर्त्यं गोप्यं गोपनीयं नेति हि प्रसिद्धम् । अन्यथा तव साधुताऽसाधुता स्यादिति भावः । न त्वं साधुरतो गोप्यमित्यपि नेत्याह । साधूनामस्माकं कीर्त्यं न हि गोप्यम् । तुशब्दो वचने वञ्चनेन मया ज्ञातमेव सर्वमित्यान्तर-ङ्गिकविशेषसूचकः । सविशेषं ब्रूहीति सूचको वा ॥ ४ ॥

सुमनोरञ्जनी — एतन्मह्यं ब्रूहि । मम महान् कामः श्रवणेच्छा वर्तते । श्रुश्रूषवे श्रोतुकामाय ॥ ४ ॥

अस्त्यस्वपरदृष्टीनाममित्रोदासविद्विषाम् ।
उदासीनोऽरिवद् वर्ज्य आत्मवत् सुहृदुच्यते ॥ ५ ॥

सत्यधर्मीया — साधूनां साधुस्वभावोऽयमिति न गोप्यमस्तीत्याह ॥ अस्वेति । अस्वपरदृष्टीनां स्वः पर इति दृष्टिः सा न विद्यते येषां तेषां योग्यतातिरेकेण । न विद्यन्ते मित्राण्युदासा उदासीना विद्विषश्च येषां तेषां साधूनाम् । उदासीनः कश्चिद्वर्तेत चेत्स चारिवदेव वर्जनीयः सुहृच्चात्मवदुच्यते । स्वस्मिन्यथा स्वेन न किञ्चिद्गोप्यं तथा सुहृदि सुहृद्भिर्गोप्यं नास्तीति तव सुहृत्त्वान्ममापि तत्त्वात् । गोप्यं नास्तीति ब्रूहीति भावः । उदासीनस्य सर्वसमतया विमतबोधनसम्भवाद्वर्ज्यता योग्यतातिरेकेणेति पूरणेन प्रत्यक्षद्विषः षट्कर्णैर्भिद्यते मन्त्र इत्यादेर्गतिरुदिताऽनुसन्धेया ॥ ५ ॥

सुमनोरञ्जनी — अस्तः निरस्तः स्वः स्वकीयः परः परकीय इति बुद्धीनाम् । अत एव न विद्यन्ते मित्रोदासविद्विषो येषां तेषां साधूनाम् । इह वक्तव्येऽर्थे । गोप्यं किमपि न हि । तु किंतु सर्वात्मना सर्वप्रकारेण कीर्त्यं कीर्तिनीयमेव । एवं साधूनां वस्तुस्थितिमुक्त्वा लौकिकीं रीतिमनुरुन्धान आह ।। उदासीन इति । मित्रविषये उदासीनः अरिवद्वर्ज्यः वर्जनीयः । सुहृत् अनपेक्ष्योपकारकृत् पुत्रादिः आत्मवत् आत्मतुल्यः । तं प्रति गोप्यं किमपि नास्तीति भावः ।। ५ ।।

ज्ञात्वाऽज्ञात्वा च कर्माणि जनोऽयमनुतिष्ठते ।
विदुषः कर्मसिद्धिः स्यात् तथा नाविदुषो भवेत् ।। ६ ।।

सत्यधर्मीया — अस्माकमियज्ज्ञानं न किन्तु सन्ध्याद्युपास्तिर्बाल्य इवास्माभिरनुष्ठीयते ततेत्यत आह ।। ज्ञात्वेति । यो जनः कर्माणि ज्ञात्वा तद्देवताफलादिकं ज्ञात्वा विज्ञाय । अनुतिष्ठतीत्यपि पाठः । अनुतिष्ठति तस्य विदुषः कर्मसिद्धिः कर्मफललाभः । तथाऽज्ञात्वा कर्माणि च योऽयं जनोऽनुतिष्ठति तस्याविदुषः कर्मसिद्धिर्न भवेत् ।। ६ ।।

सुमनोरञ्जनी — किमर्थमेतावत्पृच्छसीत्यत आह ।। अयं जनः ज्ञात्वा देवता, फलेतिकर्तव्यतादिकं ज्ञात्वा । तत्सर्वं अज्ञात्वा च कर्माण्यनुतिष्ठति । तत्र विदुषः देवतादिज्ञानिनः । कर्मणां सिद्धिः विशिष्टफलता । यथावत् स्यात् । यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति श्रुतेः । अविदुषस्तु न भवेत् । तद्धास्यान्ततः क्षीयत एवेति श्रुतेः ।। ६ ।।

तत्र तावत् क्रियायोगा भवता किं विचारिताः ।
अथवा लौकिकास्तन्मे पृच्छतः साधु भण्यताम् ।। ७ ।।

सत्यधर्मीया — त्वमनयोः कतर इत्यादै वद पितरित्याह ।। तत्रेति । भवता क्रियायोगास्तत्र देवताद्यन्यतममध्ये विचारिताः किं ते च कर्मानुष्ठानोपाया अथवा लौकिका गतानुगतिको लोक इतिवदज्ञात्वा करणीयाः । पृच्छतो मे तत्साधु भण्यताम् ।। ७ ।।

सुमनोरञ्जनी — तत्र तावत् प्रथमं तावदिदं मे साधु भण्यताम् । किं तत् । ये क्रियायोगाः कर्मोपायाः । किं शास्त्रतो युक्तिभिश्च विचारिताः । अथवा लौकिकाः गतानुगतिका वेति ।। ७ ।।

नन्द उवाच -

पर्जन्यो भगवानिन्द्रो मेघास्तस्यात्ममूर्तयः ।
अभिवर्षन्ति भूतानां प्राणनं जीवनं पयः ।। ८ ।।

सत्यधर्मीया — पुत्रानुयुक्तेन पित्रा किमकारीत्यत ईरयति ।। नन्द इति । भगवान्पूज्यः पर्जन्यस्तच्छब्दवाच्यः पुरस्तात्तस्यात्ममूर्तय आत्मनो मूर्तयो शरीराणीव शरीराणि तदभिमन्यमानत्वात् कलेवरतुलता । ते च मेघा भूतानां प्राणनं चेष्टाप्रदं जीवनं जीवनसाधनं पय उदकं पयः प्रसरज्जीवनमुदकं वाऽभिवर्षन्ति । इन्द्रः समर्थः शचीशः, पर्जन्यो मेघध्वनिर्यस्तेन सहितं पयो वर्षन्ति । ध्वनिं मुञ्चन्तः पयो वर्षन्तीति यावत् । पर्जन्यो मेघशब्दे स्यादिति विश्वः । अतो नेन्द्रपदातिरेकः ।। ८ ।।

सुमनोरञ्जनी — एवं श्रीकृष्णेन पृष्टो नन्दः युक्तितो विचारित एवायं क्रियायोग इति वदिष्यन् किं फलं का चास्य देवतेत्यस्य परिहारमभिप्रेत्याह ।। भगवानिन्द्रः पर्जन्यस्तसंज्ञकः । कुतः । यतो मेघास्तस्येन्द्रस्यात्ममूर्तय इव स्वशरीराणीव तत्स्वामिका इत्यर्थः, ते मेघाः भूतानां प्राणनं चेष्टकं जीवनं शरीराप्यायनं पयः उदकं अभिवर्षन्ति । अनेनेन्द्रो देवता । वृष्टिरेव फलमिति सूचितम् ।। ८ ।।

तत् तात वयमन्ये च वार्मुचां पतिमीश्वरम् ।
द्रव्यैस्तद्रेतसा सिद्धैर्यजन्ते क्रतुभिर्नराः ।। ९ ।।

सत्यधर्मीया — हे तात! तमिन्द्रं वार्मुचां पतिं घनानां घनमीश्वरमकरणे बाधाक्षमम् । ततत्वात्तदिति प्रोक्तो यानात्सर्वत्र यद्धरिरिति तात्पर्यान्तरोक्तेस्तस्य भगवतो रेतसा । अम्भस्तु यद्रेत उदारवीर्यमित्यादेः । नदपतौ पीतेन जलेन सिद्धैर्द्रव्यैर्व्रीहियवादिभिर्नराः क्रतुभिर्यजन्तेऽत इन्द्रयागोऽनुष्ठेय इति भावः ।। ९ ।।

सुमनोरञ्जनी — हे तात ! तं वार्मुचां मेघानां पतिं तं इन्द्रं उद्दिश्य अन्ये नराः यथा यजन्ते तथा वयमपि यजाम इति शेषः । केन साधनेनेत्यस्योत्तरम् । तेषां मेघानां रेतसा जलेन सिद्धैः द्रव्यैः व्रीह्यादिभिः ।। ९ ।।

तच्छेषेणोपजीवन्ति त्रिवर्गफलहेतवे ।
पुंसां पुरुषकाराणां पर्जन्यः फलभावनः ।। १० ।।

सत्यधर्मीया — तच्छेषेण सवावशिष्टेन । धर्मार्थकामरूपं यत्फलं तद्धेतवे तत्सिद्ध्यै उपजीवन्ति नराः । पुरुषकाराणां कर्मणा फलसम्पादनपौरुषवतां पुंसां जनानां पर्जन्य इन्द्रः फलभावनः फलं भावयति साधयतीति स तथा ।। १० ।।

सुमनोरञ्जनी — तच्छेषेण यज्ञावशिष्टेन धान्यादिना त्रिवर्गफलहेतवे धर्मार्थकामरूप-पुरुषार्थसिद्धये । उपजीवन्ति उपजीवनं कल्पयन्ति । पुरुषकाराणां प्रयत्नशीलपुरुषाणां कर्षकाणां पर्जन्य एव फलभावनः फलोत्पादकः ।। १० ।।

य एवं विसृजेद् धर्मं पारम्पर्यागतं नरः ।
कामाल्लोभाद् भयाद् द्वेषात् स वै नाप्नोति शोभनम् ।। ११ ।।

सत्यधर्मीया — यो नर एवं पारम्पर्यागतं कुलपरम्पराप्राप्तं धर्मं विसृजेज्जह्यात् । तत्र निमित्तं कामाद्विषयान्तराभिलाषाल्लोभाद्दीनताया भयाद्भूपतिभीतेर्द्वेषात्परस्परं ज्ञातिद्वेषात् । स शोभनं मङ्गलं न प्राप्नोति । वै प्रसिद्धमेतत् । विपक्षे दण्डोऽयं दर्शित इति ज्ञेयम् ।। ११ ।।

सुमनोरञ्जनी — अकरणे बाधकमाह ।। य इति । पारंपर्येण वृद्धाचारपरंपरया । कामात् द्रव्यसङ्ग्रहकामनया । अत एव लोभात् । भयाद्राजादेः सकाशात् । द्वेषात् देवताविद्वेषात् ।। ११ ।।

श्रीशुक उवाच -

वचो निशम्य नन्दस्य तथाऽन्येषां व्रजौकसाम् ।
इन्द्राय मन्युं जनयन् पितरं प्राह केशवः ।। १२ ।।

सत्यधर्मीया — न केवलं नन्द एकल एवोवाच किन्तु व्रजौकसोऽपि तथैवावदन्नित्याह ।। तथेति । तथा व्रजौकसां च वचो निशम्य । बहुसंवादेन द्रढिमैतद्धर्मस्य सूचितम् । इन्द्राय मन्युं क्रोधम् ।। १२ ।।

सुमनोरञ्जनी — इन्द्राय इन्द्रस्य मन्युं क्रोधं जनयन्नुत्पादयन् ।। १२ ।।

श्रीभगवानुवाच -

कर्मणा जायते जन्तुः कर्मणैव प्रलीयते ।
सुखं दुःखं भयं मोक्षं कर्मणैवाभिपद्यते ।। १३ ।।

सत्यधर्मीया — सति तत्फलोपलम्भके कर्मणि सर्वं सम्पद्यते तच्च भगवन्नियतमिति किमन्तर्गडुना शचीशेनेत्याह ।। कर्मणेति । ईशेरितेन कर्मणा जन्तुर्जायते कर्मणैव प्रलीयते लयमाप्नोति सुखं दुःखं भयं मोक्षं कर्मणा हरिणा । उक्तं बृहद्भाष्ये । कर्मनामा तु भगवान्फलदातृत्वतो हरिरिति । अभिपद्यते प्राप्नोति ।। १३ ।।

सुमनोरञ्जनी — एवं नन्दगोपेनोक्तः श्रीकृष्णः सकलजगज्जन्मादिकारणे श्रीनारायणे सर्वत्र जाग्रति सति तदाराधनं परित्यज्य किं तदधीनावान्तरेश्वराराधनेनेति भावेन प्रतिवदति ।। कर्मणेति । अत्र कर्तृत्वमातृत्वाभ्यां निमित्ताभ्यां कर्मशब्देन श्रीहरिरेवोच्यते । कर्तृत्वात्कर्ममातृत इत्यैतरेयभाष्यात् । कर्मणैव कर्मशब्दवाच्येन हरिणैव । एवेति सर्वत्र सम्बध्यते । जन्तुः जन्यशरीरी जीवः । समुदायापेक्षया एकवचनम् । जायते । तेनैव प्रलये प्रलीयते । स्थितिसमये सुखादिकं तेनैवाभिपद्यते प्राप्नोति ।। १३ ।।

अस्ति चेदीश्वरः कश्चित् फलरूपः स कर्मणः ।
कर्तारं भजते सोऽपि न ह्यकर्तुः प्रभुर्हि सः ।। १४ ।।

तात्पर्यम् – फलरूपः स कर्मण इत्याद्यवान्तरेश्वरविषयम् ।। १४ ।।

सत्यधर्मीया — अस्ति चेदीश्वरः कश्चिदिति श्लोके लोकेशो भवतीश्वरपदार्थश्चेद्प्रभुत्वादिकं न सम्भवति किञ्च फलं मुख्यमिति च प्रतीयत इत्यत ईश्वरपदार्थोऽत्रायमित्याह ।। फलरूपः सकर्मण इत्याद्यवान्तरेश्वरविषयमिति । फलरूपः स कर्मण इत्यत्र पद्ये आदिभूतमस्ति चेदीश्वरः कश्चिदिति वाक्यमवान्तरो मुख्य ईश्वर एव विषयो यस्य तत्तथाऽतो प्रभुत्वं फलमुख्यता च सम्भवत इति व्याकुर्वते । फलनिरूपकतामात्रं प्रतीयते तच्च निरवधिकेश्वरतां बबाध इत्यत आह ।। फलरूप इति । फलरूपः स कर्मण इत्यादिपादत्रयं प्रथमपादोदितावान्तरेश्वरविषयमिति वाऽन्वयार्थौ ज्ञेयौ ।। ततश्चायं मूलार्थः ।। कर्माणि तानि च पृथक् चेतनान्येव सर्वशः । अचेतनशरीराणि स्वकर्मफलभाञ्जि चेत्युक्तेरचेतनानां स्वतोऽप्रवर्तकमिव चेतनानामस्वतन्त्रतया प्रवर्तकत्वेन कश्चिदीश्वरोऽनुरोद्धव्यः । स च न निरवधिक एवेति स्वाभिप्रेतमेयमजानतो नन्दस्य स्वाभिप्रेतमनाविष्कुर्वन्पातनिकाशङ्कां परिहरति ।। अस्ति चेदिति । ईश्वरः कश्चिदवान्तरोऽस्ति चेत्तर्हि स कर्मणः फलरूपः फलं रूपयति सुखदुःखादिकं निरूपयति वा प्रतिष्ठापयति वैतस्य कर्मण एतत्फलमिति स फलरूपः । सोऽपीश्वरोऽपि कर्तारं भजते फलदातृत्वेन वर्तते हि यतः सोऽकर्तुर्न कर्मकर्ता तस्य प्रभुः फलदाने न समर्थ उक्ताननुष्ठाने न फलप्रापणाशक्तः स इत्यर्थः ।। १४ ।।

सुमनोरञ्जनी — ननु वृष्ट्यादिदानेन जगज्जीवनभूतानामिन्द्रादीनामपि सद्भावात् अवधारणमनुपपन्नमित्यत आह ।। कश्चिद्धरेरन्य ईश्वर अस्ति चेत् । अस्तु नाम तथापि स त्वदभिमत इन्द्रादिरूप ईश्वरः कर्मणः कर्मान्तर्गतस्य कर्मनियामकस्य हरेः फलरूपः फलसदृशः । फलं यथा वृक्षाज्जातं तदाधारतया तिष्ठति तथा अयमपि हरेर्जातो हर्याधारतया तिष्ठतीत्यर्थः तच्छरीरादेर्कर्मजत्वेन तद्विशिष्टस्य तद्व्यपदेशः स्वर्गी ध्वस्त इतिवत् । सोऽपि त्वदभिमतेश्वरोऽपि कर्तारं कर्मकर्तारं भजते

फलदानेनानुवर्तते । अकर्तुः कर्माकर्तुः ज्ञानिनः फलदाने प्रभुः समर्थो न हि । एवं चावान्तरेश्वर एव सः न सर्वेश्वर इत्युक्तं भवति । तदेतत्सर्वमभिप्रेत्योक्तमाचार्यचरणैः । फलरूपः स कर्मण इत्याद्यवान्तरेश्वरविषयम् ।

स्वभावे कर्मणि च यः सत्वादिषु गुणेषु यः ।
स्थितो विष्णुः सर्वकर्ता पृथक्संस्थश्च सर्वशः ।
गुणकर्मस्वभावादिशब्दवाच्यश्च केशवः ।
तेन जातं फलं यस्मात्कर्मणः फलमीर्यते ।
न चासौ कर्मफलभाक् नास्य किञ्चिन्न शक्यते ।
तदन्यावान्तरेशानां तद्वशत्वं यतः सदा ।
कर्मणः फलरूपत्वमतस्तेषामुदीर्यते ।
नान्यकर्मवशत्वं तु तेषां विष्णुं विना क्वचित् ।
स च ब्राह्मणगिर्यादिनामा विष्णुरजः परः ।
एतस्मात्कारणात्कृष्णः शक्रस्य विमदाय तु ।
गिर्यादिस्थितमात्मानं पूजयामास वल्लवैः ॥ इति ।

फलरूपः स कर्मण इति मूलस्य परमेश्वरपरताभ्रमं निवारयितुमाह ॥ फलरूप इति । इत्यादिवाक्यमवान्तरेश्वरविषयमेव । एवं तस्य वाक्यस्य स्ववचनेन तात्पर्यमुक्त्वा प्रमाणेन व्याख्याति ॥ स्वभावेति । यतः विष्णुः स्वभावादिषु स्थितः, तेभ्यः पृथग्विद्यमानश्च सर्वकर्ता तस्मात् गुणकर्मस्वभावादिशब्दवाच्यो भवति । अनेनात्र कर्मपदेन, स्वभावतन्त्रो हि जन इत्युत्तरत्र स्वभावपदेन, सत्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतव इति वक्ष्यमाणसत्वादिगुणवाचकपदेन च भगवानेवोच्यत इत्युक्तं भवति । एवं कर्मपदस्य भगवत्परतामभिधाय कर्मणः फलमिति वाक्यार्थमाह ॥ तेनेति । यस्मात्कारणात् सर्वं जगत्, तेन कर्मपदवाच्येन कर्मान्तर्गतेन हरिणा तदनुग्रहेणेति यावत् । फलं फलमिव जातं तस्मान्निमित्तात्कर्मणः फलमितीर्यते व्यपदिश्यते । यद्वा तेन जगतः फलं शरीरादिकं जातं यस्मात् तस्मात् कर्मणः फलमीर्यते । अनेन कर्मणः फलमित्यस्य कर्माधीनशरीरैश्वर्यादिफलवानित्यर्थ उक्तो भवति । एवमस्य मूलस्यावान्तरेश्वरपरतामुक्त्वा भगवत्परत्वबाधकमाह ॥ न चेति । चो यस्मादित्यर्थे । यस्मादसौ केशवः कर्मफलवान् कर्मजन्यफलाश्रयः न भवत्यतो नैतद्वाक्यं तद्विषयमिति भावः । किं चात्र न ह्यकर्तुः प्रभुर्हि स इत्यनेन ज्ञानफलमोक्षदाने सामर्थ्याभाव उच्यते । स च परमेश्वरे हरावसंभावित इत्याह ॥ नास्येति । अस्य हरेः किंचिदकर्तुः फलदानादिकं न शक्यत इति न । किं तु शक्यत एव । सर्वशक्तिमत्वात् । एवं चावान्तरेश्वरविषयमेतद्वाक्यमिति । सोपनयं

निगमयति ।। तंदन्येति । तस्मात् हरेः अन्ये ये अवान्तरेशाः ब्रह्मादयस्तेषां यतः सदा तद्वशत्वं कर्मवशत्वं, अतः कारणात् तेषामवान्तरेशानां कर्मणः फलरूपत्वमुदीर्यते । अतः अवान्तरेश एवैतद्वाक्यविषयः । अत्र कर्मपदं भगवत्परमेव । न तदन्ययज्ञादिपरम् । तेषां तद्वशत्वायोगादित्याह ।। नान्येति । तेषां अवान्तरेशानाम् । नन्वेतावता कर्मनामकस्य हरेः स्वातन्त्र्यमुपपादितम् । तद्यद्यभिप्रेतं तदाग्रे हरिपूजैव विधातव्या । न गिर्यादिपूजेत्यत आह ।। स चेति । ब्राह्मणगिर्यादिनामा स च स एव । स क इत्यत उक्तं विष्णुरिति । एतस्मात्कारणात् विष्णोः गिर्यादिनामवाच्यत्वान्निमित्तात् कृष्णः । शक्रस्य विमदाय विमदत्वाय मदपरिहारायेति यावत् । गिर्यादौ स्थितमात्मानं स्वयमेव बल्लवैः पूजयामासेति ।। १४ ।।

किमिन्द्रेणेह भूतानां स्वस्वकर्मानुवर्तिनाम् ।
अनीशेनान्यथाकर्तुं स्वभावविहितं नृणाम् ।। १५ ।।

तात्पर्यम् – 'स्वभावे कर्मणि च यः सत्वादिषु गुणेषु च । स्थितो विष्णुः सर्वकर्ता पृथक्संस्थश्च सर्वगः । गुणकर्मस्वभावादिशब्दवाच्यश्च केशवः । तेन जातं फलं यस्मात्कर्मणः फलमीर्यते । न चासौ कर्मफलवान्नास्य किञ्चिन्न शक्यते । तदन्यावान्तरेशानां तद्वशत्वं यतः सदा । कर्मणः फलरूपत्वमतस्तेषामुदीर्यते । नान्यकर्मवशत्वं तु तेषां विष्णुं विना क्वचित् । स च ब्राह्मणगिर्यादिनामा विष्णुरजः परः । एतस्मात्कारणात्कृष्णः शक्रस्य विमदाय तु । गिर्यादिस्थितमात्मानं पूजयामास बल्लवैः ।। १५ ।।

सत्यधर्मीया — किमिन्द्रेणेह भूतानां, स्वभावतन्त्रो हि (जन) पुमानित्यत्र स्वभावस्य स्वातन्त्र्यमुच्यते । तथा देहानुच्चावचानिति श्लोके च कर्मैव गुरुरीश्वर इति कर्मणः स्वतन्त्रतोच्यते । अपि च सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतव इति पद्ये च सत्त्वादीनामेव स्वातन्त्र्यमुच्यत इति भाति । न च तद्युक्तम् । द्रव्यं कर्म च कालश्च स्वभावो जीव एव च । यदनुग्रहतः सन्ति न सन्ति यदुपक्षयेत्यादिमानावमानितत्वादिति स्वयं मानेन तत्तात्पर्यमाह ।। स्वभाव इति । स्वभावे योग्यतायां, कर्मणि पुण्यापुण्यप्रापके, सत्त्वादिषु च गुणेषु । चात्प्रकृतौ स्थितो विष्णुः सर्वकर्ता न तु स्वभावादिकं स्वतन्त्रं किन्तु तदन्तर्गतो भगवान्कर्ता तेभ्यः स्वभावादिभ्यः सर्वशः सर्वभेदकधर्मैः पृथक् संस्थस्तत्तदन्तर्गतस्य तत्खेदादिवेद्यतेति वाऽऽह ।। सर्वशः पूर्णसुख इति । गुणकर्मस्वभावादिशब्दवाच्यः । सर्वनामा सर्वकर्मेत्यादेः । अपिपदेन फलरूपादिपदवाच्यताऽपि ग्राह्या । तत्र फलरूपपदार्थः किं फलात्मकता किंवा फलवत्ता । न द्वयमपि । सर्वविलक्षणस्य तत्त्वानुपपत्तेः अपूर्णतापत्तेश्चेत्यतः फलरूपपदार्थं निरूपयन्मानमुदाहरति ।। तेनेति । येन कारणेन

यस्माद्धरेस्तत्करुणया वा । कर्मण इत्यावर्तते । कर्मणः-करोऽस्मिन्मीयत इति कर्म जीव उदाहृत इति गीतातात्पर्याज्जीवजातस्य । तथा कर्मणः कृतस्य फलं जातं तेन कारणेन कर्मणो भगवान् फलमितीर्यते न तद्भेदात्तद्धत्त्वाद्वेति । तथा च कर्मफलं रूपयतीति कर्मफलरूप इति विग्रह इति सूचितं भवति । असौ भगवानवान्तरेशवत्कर्मफलवान् न च, पूर्वैव पूर्णत्वादिति भावः । न ह्यकर्तुः प्रभुर्हि स इत्यवान्तरेश्वरविषयोक्तामप्रभुत्वादिशङ्कां कर्मापेक्षयैव वितरति फलमयं किंवाऽनपेक्ष्य । नाद्यः स्वातन्त्र्यहानिः स्यात् । द्वितीये सर्वसर्वदानं वाऽऽदानमेव वा स्यादिति प्रापय्य तामपाकरोति ॥ नास्य किञ्चिन्न शक्यत इति । अस्यानेन किञ्चिन्न शक्यमिति न सर्वं शक्यं, कर्म कारयित्वैव तत्तद्योग्यं फलं यच्छति । न कुर्यामित्यवस्थानं दुःखस्थम् । न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्। कार्यते ह्यवशः कर्मेत्यादेः । तर्हि तथा तत्तथा कर्म कारयितुर्भगवतोऽन्ततो वैषम्यादिदोषानुषङ्ग इति तु वैषम्यनैर्घृण्ये नेत्यादिसूत्रे न वैषम्यनामकमित्यादिना निराकार्यम् ।

अवान्तरेश्वरे कर्मफलरूपशब्दप्रवृत्तिं निरूपयति ॥ तदन्येति । भगवदितरावान्तरेशानां सदा यतस्तद्वशत्वं तत्तत्कर्माधीनत्वम् । अतस्तेषां कर्मणः फलरूपत्वं तदप्येतत्कर्ममर्म मत्वा फलं दिशेतीतीशशासनादेव तत्तद्वशत्वमीशानामवान्तराणामित्याह । तेषां विष्णुं विना क्वचिदप्यन्यत्कर्म-वशत्वमपि न नास्तीति । तुश्च स्वस्वोत्तमज्ञाप्यधर्मैरपेक्षणीयेति विशेषसूचकः । अन्यकर्मवशत्वं जडकर्मवशत्वं न तदन्तर्गतस्वोत्तमवशत्वं तेषां तु । तेषां तु तेषामुत्तमानामपि विष्णुं विनेति कृष्णेनोच्यमाना न तत्सत्क्रिया युक्ता । न चायुक्तं वदति यदुनाथः स इति सम्भवतीत्यतः प्रमाणेन तत्तात्पर्यमाह ॥ स चेति । ब्राह्मण इति गिरित्यादी येषां तानि च तानि नामानि यस्य सः । अज उत्पत्तिरहितः परः क्षराक्षरविलक्षणो विष्णुरेतस्माद्ब्राह्मणादिनामवत्त्वहेतोः कृष्णः शक्रस्य कारणात् । ल्यब्लोपनिमित्ता पञ्चमी । कारणं तदस्वातन्त्र्यादिकमिव स्वस्वातन्त्र्यादिकं च प्रदर्श्य विमदाय मदाभावाय गिर्यादिस्थितमात्मानं स्वमेव बल्लवैर्गोपालैः पूजयामास । एतस्मात्कारणादित्यन्वयने कारणशब्दो व्यर्थ इति सत्येवमन्वयने सार्थक इति ज्ञेयम् । इति च तन्त्रभागवत इति शेषः ॥ ततश्चायमस्ति चेदीश्वरः कश्चिदित्यारभ्याध्यायावसिति मूलार्थः ॥ अवान्तरेश्वरप्रभावं प्रतिषिध्य स्वप्रभावमर्थात्साधयति ॥ किमिति । इन्द्रेणेह भूतानां क उपकारः तानि भूतानि किमधीनानि भूतानीत्यत आह ॥ स्वस्वेति ॥ स्वानि स्वानि यानि कर्माणि तान्यनुवर्तितुं शीलं येषां तानि नृणां स्वभावविहितं योग्यतायातमन्यथाकर्तुं सुखदुःखं वा स्वेच्छानुसारेण योजयितुं त्याजयितुं वाऽनीशेनासमर्थेनावान्तरेश्वरेण किं न किमपि प्रयोजनम् । स्वभावादिपदानि तत्स्थत्वात्तत्स्वाम्याद्वा माधवाभिधानानीति ज्ञेयम् । तत्पक्षे स्वस्मिन्भावः स्थितिर्यस्य स स्वभावः । स्वे महिम्नि प्रतिष्ठित इति श्रुतेः । स्वाख्यो भावोऽनन्यापेक्षनित्यसत्तावान्वा ॥ १५ ॥

सुमनोरञ्जनी — नन्वस्तु इन्द्रादेरवान्तरेश्वरत्वम् । तावतापि कर्मफलदातृतया सोऽस्माकं पूज्य एवेत्यतः सोऽपि न स्वातन्त्र्येण फलदाता किं तु परमेश्वरप्रेरित एव । अतस्तद्धेतोरेवेति न्यायेन परमेश्वर एव भजनीयो नावान्तरेश्वर इत्याह ।। किमिन्द्रेणेति । स्वस्वकर्मानुवर्तिनां, स्वस्वकर्मानुसारिफलैः अनुवर्तन्त इति तथोक्तानि । तेषां भूतानाम् । स्वभावविहितं, स्वः स्वतन्त्रो भावः स्वभावः परमात्मा 'गुणकर्मस्वभावादिशब्दवाच्यश्च केशवः'इति पूर्वतात्पर्योक्तेः । तेन विहितं क्लृप्तं स्वस्वकर्मानुसारिफलं सुखं दुःखं वा अनुभूयमानं, अन्यथाकर्तुमनीशेन असमर्थेन इन्द्रेण तदुपलक्षितावान्तरेश्वरेण नृणामस्माकं किं, किं प्रयोजनं न किमपीति योजना ।। १५ ।।

स्वभावतन्त्रो हि जनः स्वभावमनुवर्तते ।
स्वभावस्थमिदं सर्वं सदेवासुरमानुषम् ।। १६ ।।

सत्यधर्मीया — हि यतो जनः स्वभावतन्त्रः स्वभावो हरिस्तन्त्रं कारणं यस्य सः । तन्त्रं कुटुम्बकृत्ये स्यात्कारणं च परिच्छद इति विश्वः । अतः स्वभावं हरिमनुवर्तते । इदं सदेवासुरमानुषं सर्वम् । स्वभावे तिष्ठतीति तत्तथा । हिशब्दोऽस्य सर्वस्यार्थस्य तन्त्रभागवतावगतत्वसूचकः ।। १६ ।।

सुमनोरञ्जनी — ननु स्वभावाख्यपरमात्मनः कर्मफलस्वाम्येऽपि कर्मकर्तृषु प्रेरकतया स्थितानामिन्द्रादीनामादरणं युक्तमेवेत्यतः कर्त्रादिकं सर्वमपि स्वभावाधीनमेवेत्याह ।। स्वभावेति । जनः कर्मकर्ता । स्वभावतन्त्रः स्वभावाख्यभगवदधीन एव । स्वभावं अनु उद्दिश्य वर्तते प्रवर्तते । यद्वा स्वभावं अनु अनुसृत्य वर्तते प्रवर्तते । (? ३०६) सम्प्रवृत्तो प्रवृत्तिमानित्यर्थः । स हि विपर्ययं वक्ति यः वा)?, । किं पुनः सदेवासुरमानुषं सर्वमपि इदं जगत् । स्वभावस्थं स्वभावाधीनतया विद्यमानम् । अतः सर्वस्य तदधीनत्वात्स एव भजनीयो नान्य इति भावः ।। १६ ।।

देहानुच्चावचान् जन्तुः प्राप्योत्सृजति कर्मणा ।
शत्रुर्मित्रमुदासीनः कर्मैव गुरुरीश्वरः ।। १७ ।।

सत्यधर्मीया — यस्मादवान्तरेशानामनीशत्वं न तत्सभाजनेन कृत्यमतो हरिरेवार्हणीयः स च सर्वत्र वर्तत इति नगभिदि न प्रवणं तथा कुशलोऽत इदं तनुतेति वदति ।। देहानिति । जन्तुर्जन्मी, उच्चावचाननेकविधान्देहान्कर्मणा श्रीहरिणा प्राप्य तेनैवोत्सृजति । शत्रुर्मित्रमुदासीन इत्येतेऽपि कर्मैव श्रीहरिरेव शत्र्वादिशब्दवाच्यः शातयितेति, मित्वा त्रातीत्यन्यत्रोक्तेः, सर्वोपर्यासीन इति शत्रुमित्रोदासीनशब्दैरुच्यते । गुरुरीश्वरश्चोपदेशक ईश्वरो योगैश्वर्यवानिति । मूलकृदपि शत्रुरुदासीनो गुरुरीश्वर इति पुल्लिङ्गनिर्देशं कुर्वन्न कर्मपदं व्यापारपरं किन्तु हरिवाचकमिति

सूचयन्प्रमाणतात्पर्यभूमिकां च ध्वनयामासेत्यवसेयम् । तत्तन्निविष्टस्य तत्तद्दुर्भगता भगवतो नेति दर्शयितुमीश्वर इति ॥ १७ ॥

सुमनोरञ्जनी — स्वभावतन्त्रत्वमेवोपपादयति ॥ देहानिति । कर्मणा कर्तृत्वमातृत्वाभ्यां निमित्ताभ्यां कर्मशब्दवाच्येन श्रीहरिणा निमित्तेन जन्तुः जीवः उच्चावचान् देहान् प्राप्य उत्सृजति त्यजति । न केवलमेतावता किन्तु शत्रुमित्रादिषु स्थित्वा दुःखसुखादिफलदातापि स एवेत्याह । अनेन बन्धकत्वमुक्तं भवति । ज्ञानदानेन मोचकोऽपि स एवेत्याह ॥ कर्मैवेति । गुरुः तत्वोपदेशेन ज्ञानादिसंपादक ईश्वरः । तत्फलतया मोक्षरूपफलदानसमर्थ इत्यर्थः ॥ १७ ॥

तस्मात् सुपूजयेत् कर्म स्वभावस्थः स्वकर्मकृत् ।
अञ्जसा येन वर्तेत तदेवास्य हि दैवतम् ॥ १८ ॥

सत्यधर्मीया — स्वभावस्थो हर्याश्रयोऽनन्यथाभवत्स्वस्वभावाश्रयश्चेति बहिः कर्मान्ततो हरिर्बहिः क्रियां, तस्मादितेरषामनीशत्वादेः सुपूजयेत्स्वकर्मकृद्विहितविहितं व्यापृतिर्येन ज्ञानात्मकेनाञ्जसा श्रीहरिरूपतत्त्वेन वर्तेत । उपासनादिभिस्तत्तत्त्वं हरिरेवास्य हि यतो दैवतमतस्तत्कर्मसु पूजयेत् । अञ्जसा त्वरिते तत्त्व इति यादवः । न च सर्वनामा हरिरिति यदि सभाजनीयोऽहं तर्हि कः प्रद्वेषः, शचीशे तदपचितिरपि स्वापचितिर्भवतीति वाच्यम् । शक्रो न वक्रीभूय नश्येदिति दयाऽत एवमाततान काञ्चन लीलां लीलामानुष इति ज्ञेयम् । तच्च तात्पर्ये शक्रस्य विमदायेति प्रकटितमाचार्यैः ॥ १८ ॥

सुमनोरञ्जनी — उपसंहरति ॥ तस्मादिति । स्वकर्मकृत् स्ववर्णाश्रमोचितकर्मकर्ता पुमान् स्वभावस्थः स्वभावाख्ये विष्णौ तिष्ठति मनसेति तथोक्तः । कर्तृत्वपूज्यत्वाभ्यां तस्मिन्नेव मनोनिवेशयुक्त इति यावत् । कर्म कर्मशब्दवाच्यं विष्णुमेव सु सर्वाधिकत्वेन हरिपूजाधिष्ठानमिति यावत् पूजयेत् । तर्हि सालिग्रामादेरपि सर्वेष्टत्वेन तत्रैव हरिपूजा क्रियतां किं गोपर्वतादिपूजयेत्यत आह ॥ अञ्जसेति । अंजसा सौख्येन । वर्तते । तदेवास्य दैवतं कुलदैवतम् । (स्वेष्टे गोपर्वताद्यधिष्ठाने)हि प्रसिद्धमेतत् ॥ १८ ॥

वर्तेत ब्रह्मणा विप्रो राजन्यो रक्षया भुवः ।
वैश्यस्तु वार्तया जीवेच्छूद्रस्तु द्विजसेवया ॥ १९ ॥

सत्यधर्मीया — अस्मदादीनां न स्म शचीशसेवोपयुक्तेति वक्तुं तत्तज्जातिजीविकाधर्मानाह ॥ वर्तेतेति । ब्राह्मणो ब्रह्मणा वेदेन तदुक्तयुक्तानुष्ठानेन वर्तेतेति राजन्य इत्यत्रानुवर्तते । राज्ञ्यां राज्ञा जातो राजन्यो भुवो रक्षया वर्तेत । वैश्यस्तु वार्तया कृषिगोरक्षादिना । शूद्रस्तु द्विजानां सेवया जीवेदित्युभयान्वयि । ब्रह्मणा तपसेति वा । ब्रह्म वेदस्तपस्तत्त्वमित्यमरः ॥ १९ ॥

सुमनोरञ्जनी — न च इष्टप्रदत्वं गिरिपर्वतादिष्वेवास्ति । अतस्त एवात्र पूज्या इति वक्तुं ब्राह्मणादीनामाजीविकां तदुपोद्धातेन वर्णयति ।। वर्तेतेति । विप्रः ब्रह्मणा वेदेन तदुक्तषट्कर्माचरणेन। राजन्यः क्षत्रियः भुवो रक्षया पालनेन । वैश्यस्तु वार्तया । शूद्रस्तु द्विजानां त्रैवर्णिकानां सेवया वर्तेतेत्यन्वयः ।। १९ ।।

कृषिवाणिज्यगोरक्षाः कुसीदं तुर्यमुच्यते ।
वार्ता चतुर्विधा तत्र वयं गोवृत्तयोऽनिशम् ।। २० ।।

सत्यधर्मीया — वार्ता चैतत्प्रकारेति स्ववृत्तिरिति विविच्य, कृषिर्भूलेखनं, वाणिज्यं पदार्थविक्रियादि, गोरक्षा गोपालनम् । कुसीदं तुर्यं चतुर्थं वृद्ध्याऽधिकधनसम्पादनमेवं वार्ता चतुर्विधा । तत्रैतन्मध्ये वयमनिशं गोवृत्तयो गोभिरेव वृत्तिर्जीविका येषां ते तथा । अनेन समाहारासमाहाराभ्यां वैश्यवृत्तिर्वार्तासमग्रचतुष्टयवैशिष्ट्येनैवेत्यभिप्रैति ।। २० ।।

सुमनोरञ्जनी — वार्तयेत्युक्तां तां वार्तां विभज्य दर्शयति ।। कृषीति । कृषिः भूकर्षणादिक्रिया । वाणिज्यं क्रयविक्रयादि । गोरक्षा पशुपालनम् । कृषिवाणिज्याभ्यां सहिता गोरक्षा । कुशीदं वृध्यर्थं ऋणादिदानं तुर्यं चतुर्थमुच्यते । तत्र कृष्यादिषु मध्ये । गोवृत्तयः गोभिः वृत्तयः जीवनं येषां ते तथोक्ताः ।। २० ।।

सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः ।
रजसोत्पद्यते विश्वमन्योन्यं विविधं जगत् ।। २१ ।।

सत्यधर्मीया — सर्वथा न मघवत्कृत्यमिति भगवान्प्रकरान्तरेणाह ।। सत्त्वं रजस्तम इति । स्थितिश्चोत्पत्तिश्चान्तश्च तेषां हेतवः कारणानि । विविधं विश्वं समस्तं जगद्रजसाऽन्योन्यं कारणकार्यतामापन्नमुत्पद्यते । विश्वं मामाश्रित्य स्थित्युत्पत्त्यन्तहेतव इत्यप्यन्वयः ।। २१ ।।

सुमनोरञ्जनी — ननु वयं गोवृत्तयः खलु, न गाव एव स्वरूपतो जीवनप्रदाः किन्तु महेन्द्रेण चोदितेषु मेघेषु वर्षत्सु तदुत्पन्नतृणानदन्त्यः क्षीरादीन् ददत्यः एव । अतोऽपि महेन्द्रः पूज्य इति तत्राह ।। सत्त्वमिति । अत्र सत्वरंजस्तमःशब्दाः भगवद्वाचकाः। तत्र नियामकमाचार्यवचनं प्रागेवोदाहृतम् । विश्वं समस्तं जगत् । अन्योन्यं निमित्तीकृत्य ।। २१ ।।

रजसा चोदिता मेघा वर्षन्त्यम्बूनि सर्वतः ।
प्रजास्तैरेव सिध्यन्ति महेन्द्रः किं करिष्यति ।। २२ ।।

सत्यधर्मीया — रजसा रञ्जकेन हरिणा चोदिता मेघाः सर्वतोऽम्बूनि वर्षन्ति । तैरम्बुभिः प्रजाः सिध्यन्ति तत्र परस्परं भविष्यति किं करिष्यति मघवेति भावः ॥ २२ ॥

सुमनोरञ्जनी — रजसा रजोगुणप्रेरकेण भगवता । सर्वतः सर्वत्र । सिध्यन्ति जीवन्ति ॥२२॥

न नः पुरो जनपदा न ग्रामगृहिणो वयम् ।
वनौकसस्तात नित्यं काननाभिनिवासिनः ॥ २३ ॥

सत्यधर्मीया — केवलं वनवासिनां नः पुरो न सन्ति जनपदा देशाश्च न । वयं च, ग्रामाश्च गृहाणि चैषां सन्तीति ते तथा, न वनौकसस्तपस्विन इव नित्यं काननाभिनिवासिनस्तात वयं वनवासिनो वनौकसः । न च शचीशो दूरेऽस्तीति वचनमिदम् । समीपमुपयातश्चेत्त-दपेक्षाऽऽवश्यकीति जनक न जल्पेति वाऽऽह ॥ केति । आननाभिनिवासिन आननमस्मन्मुख-मभिनिवसतीति स तथा तस्यापि नः काऽपेक्षेति शेषः ॥ २३ ॥

सुमनोरञ्जनी — एतावता गवां पूज्यत्वमुपपाद्य गिरेः पूज्यत्वमुपपादयति ॥ नेति । नः अस्माकं पुरः पुराणि जनपदाश्च जननिवासस्थानानि । ग्रामगृहिणो ग्रामे विद्यमानगृहनिवासिनो वयं न किं तु वनौकसः । अत एव काननाद्रिनिवासिनश्च ॥ २३ ॥

आजीव्यैकतरं भावं यस्त्वन्यमुपधावति ।
न तस्माद् विन्दते क्षेमं जारं नार्यसती यथा ॥ २४ ॥

सत्यधर्मीया — एकतरं परतरशब्दवदयमखण्डः । एकं भावमाजीव्योपजीव्य । उपधौ अतीति वा छेदः । उपधौ व्याजे सति योऽन्यमतिविन्दते स क्षेमं न विन्दते । भक्तिपूर्वकमित्यर्थः । छन्दस्त्वाद्व्यवहितस्याप्यतेरन्वयः । तरन्त्यनेनानिष्टनिचयमिति तर एकश्चासौ तरश्चेत्येकतरस्तं तारकमेकं भावमुपजीव्येति वा । ऋदोरबित्यप्प्रत्ययः । अन्यं भावमुपधावत्युपास्ते स तस्माद्भावात्क्षेमं न विन्दते, आशामात्रं, न काङ्क्षितं प्राप्नोति । असती पुंश्चली जारं प्राप्य यथा सार्वकालिकं क्षेमं न प्राप्नोति तथेति । अस्मज्जीवनं वनादिभिरिति नात्र वासे वासवसव आवश्यक इति भावः ॥ २४ ॥

सुमनोरञ्जनी — उपजीव्यविरोधे बाधकमाह ॥ आजीव्येति । एकतरं भावं वस्तु आजीव्य उपजीव्य यः पुरुषः अन्यं भावं उपधावति उपास्ते सः पुरुषः । तस्मात् उपजीव्यवस्तुभिन्नात् क्षेमं सुखं न विन्दते न लभते । तत्र दृष्टान्तः । नारी कुलस्त्री । जारं विटपुरुषं उपासीना अत एव असती, क्षेमं यथा न विन्दते तथेति ॥ २४ ॥

तस्माद् गवां ब्राह्मणानामद्रेश्चारभ्यतां मखः ।
य इन्द्रयागसम्भारास्तैरयं साध्यतां मखः ॥ २५ ॥

सत्यधर्मीया — अग्रत एव जाग्रता भगवन्भवता भाव्यम् । संभाराः सम्भृता वृथा भविष्यन्तीत्यत आह ॥ तस्मादिति । यद्वा नेह साहिती विहिता हातुं शक्या तस्या एवमवश्यं विनियोगः कार्य इत्यार्यान्प्रति वक्ति ॥ गवां ब्राह्मणानामिति । स्वयं गोगोप इति तत्पुरस्कृतिः अद्रेरान्तरङ्गिको भावोऽद्रिरादरणीयत्वादित्यादेः । सर्वत्रापि सर्वैराद्रियमाणस्य ममेति । गवां मखो ब्राह्मणानां च मखोऽद्रेश्च मख आरभ्यतामिति मखपदस्य पृथक् पृथगन्वयसूचनार्थं पुनर्मख इत्युक्तिः । अन्यथा मख इत्यतिरिक्तं स्यादिति ज्ञेयम् । उखवखिमखिगतौ हलश्चेति घञ्, संज्ञापूर्वकत्वान्न वृद्धिः । क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति घञ्विषयेऽपि । पुंसीति घो वा । तस्मादिन्द्रकृत्याभावादिन्द्रयागसम्भाराः पदार्था एतैरयं मदुक्तो मखः साध्यताम् । ये इन्द्रयागसम्भारास्तैर्गवां ब्राह्मणानामद्रेश्च मखः साध्यताम् । अयं चारभ्यतां अभिया-तन्तीति भ्यतस्ते चाराश्च तेभ्यतश्च तेषां मध्ये मखो गतो दूतमध्ये निविष्ट इति तदिष्टिं त्यक्त्वाऽयं मखः साध्यतामिति मखस्त्वया मखपतित्वेन सम्मतोऽयं चारभ्यतां मध्ये मखो गत इत्यावृत्त्याऽन्वयो वा । चारभ्यतां चारभ्यतः प्रति गत इति वा । यथोक्तं चतुर्थतात्पर्ये तवत्वं चतुर्ष्टीति सूत्रादिति । मखः सहस्वदर्चतीत्यृग्भाष्यटीकयोर्मखात्मा पुरूहूतो वा मखात्मा मखाभिमानीत्युक्तः ॥ २५ ॥

सुमनोरञ्जनी — पूर्वप्रतिज्ञातार्थं निगमयति ॥ तस्मादिति । तेषामेवेष्टप्रदत्वात् । तस्मात् उपजीव्यं परित्यज्य अन्याराधनस्याकरणीयत्वाच्च गवादीनामुद्देशेनैव मख आरभ्यतामित्यन्वयः । संभाराः साधनानि ॥ २५ ॥

पच्यतां विविधाः पाकाः सूपान्धःपायसादयः ।
संयावापूपशष्कुल्यः सर्वदोहश्च गृह्यताम् ॥ २६ ॥

सत्यधर्मीया — विविधा नानाप्रकाराः । सूपो द्विदलपदार्थोऽन्धो भक्तं, पायसं क्षीरविकृतान्नमादिर्येषां ते पाकाः पाक्या भाविनीं संज्ञां गृहीत्वा पायसादीत्युक्तिः । संयावो गोधूमान्नमपूपः पोलिकादिः शष्कुल्यः पिष्टकृतमण्डलभक्ष्याणि पच्यतां सर्वदोहश्च क्षीरादिर्गृह्यताम् । पाका अर्भकाः पाकाननुकूलाभिर्ललनाभिर्गृह्यतामित्यप्यर्थः । अग्न्यादौ पातः पोतानां स्यादिति कक्ष्या निक्षिप्तरोदनं ओदनसिद्धिर्वा न भवेदिति तद्ग्रहणमपि युक्तमिति सूचयितुं पाक्या इत्यनुक्त्वा पाका इत्युक्तमिति मन्येन स्यान्नेयम् । मदुदितकृतौ दास्याम्यहमहर्मोक्षमपरोक्षप्रेक्षां वा तद्गृह्यताम् । न

तादृशी शक्तिस्तवेति नेत्याह ॥ सर्वद इति । अहर्मुहूर्तं विज्ञेयमहर्मोक्षोऽपि भण्यते । अहर्दिनं प्रकाशश्च क्वचिज्ज्ञानं बलं तथेति बृहद्भाष्योक्तेः । प्राग्ज्ञानमनन्तरं मोक्षश्चेत्तत्फलत्वेन गृह्यतामिति वा ॥ २६ ॥

सुमनोरञ्जनी — पाकाः पक्तव्याः पदार्थाः । सूपः, अन्धांसि अन्नानि, पायसाः पयस्येव पक्वाः, संयावापूपानि गोधूमपिष्टनिर्मितापूपानीत्यर्थः । संयावाश्चापूपानीति वा । शष्कुल्यः पिष्टमयाः कुण्डलाकृतयो भक्ष्यविशेषाः । पच्यन्तामित्यन्वयः । सर्वदोहश्च सर्वासां गवां दोहश्च दुग्धमपि गृह्यतां संगृह्यताम् ॥ २६ ॥

हूयन्तामग्नयः सम्यग् ब्राह्मणैर्ब्रह्मवादिभिः ।
अन्नं बहुगुणं तेभ्यो दीयतां धेनुदक्षिणाः ॥ २७ ॥

सत्यधर्मीया — ब्रह्मवादिभिर्ब्राह्मणैरग्नयो हूयंताम् । सम्यगित्यनङ्गभङ्गमाह । तेभ्यो ब्राह्मणेभ्यो बहुगुणं सषड्रसम् । धेनवश्च दक्षिणाश्च ता दीयतां धेन्वात्मका दक्षिणा इति वा ॥ २७ ॥

सुमनोरञ्जनी — बहुगुणं षड्रसोपेतम् । बहुदक्षिणं अन्नम् । तेभ्यो ब्राह्मणेभ्यः ॥ २७ ॥

अन्येभ्यश्चाश्वचाण्डालपतितेभ्यो यथार्हतः ।
यवसं च गवां दत्वा गिरये दीयतां बलिः ॥ २८ ॥

सत्यधर्मीया — आश्वचण्डालपतितेभ्यः श्वानश्च चण्डालाश्च पतिताश्च तेभ्यस्तान् आ अभिव्याप्य द्वे पदे । दीयतां यथार्हतो यथायथायोग्यतः गवां यवसं च दत्वा गिरये पर्वताय बलिर्दीयताम् । अगायेत्यनुक्त्वा गिरय इति वदन्स्वस्मै सर्वनाम्ने वायवे चेत्यभिप्रैति । चतुर्थतात्पर्ये यथोक्तम् । गिरिः प्राणः समुदिष्ट इति ॥ २८ ॥

सुमनोरञ्जनी — आश्वचण्डालपतितेभ्यः । शुन आरभ्य चण्डालपतितपर्यन्तेभ्यः । यथार्हतः यथायोग्यम् । अन्नं दीयतामित्यन्वयः । यवसं तृणम् । गिरये गिरिनामकाय गिरिसन्निहिताय हरये ॥ २८ ॥

स्वलङ्कृता भुक्तवन्तः स्वनुलिप्ताः सुवाससः ।
प्रदक्षिणं च कुरुत गोविप्रानलपर्वतान् ॥ २९ ॥

सत्यधर्मीया — स्वनुलिप्ता गन्धादिना । यूयं गोविप्रानलपर्वतान्प्रदक्षिणं च कुरुत ॥ २९ ॥

सुमनोरञ्जनी — स्वयं भुक्तवन्तः । सुष्टु अलंकृताः । गोविप्रानलपर्वतान् प्रदक्षिणं कुरुत ॥२९॥

एतन्मम मतं तात क्रियतां यदि रोचते ।
अयं गोब्राह्मणाद्रीणां मह्यं च दयितो मखः ॥ ३० ॥

सत्यधर्मीया — रोचते तुभ्यं, मह्यं मम दयितः ॥ ३० ॥

सुमनोरञ्जनी — इत्युक्त्वा उपसंहरति ॥ एतदिति ॥ ३० ॥

श्रीशुक उवाच -

कालात्मना भगवता शक्रदर्पजिघांसया ।
प्रोक्तं निशम्य नन्दाद्याः साध्वगृह्णन्त तद्वचः ॥ ३१ ॥

सत्यधर्मीया — कालात्मना विनाऽन्यान्स्वयं कामपूरकैश्च । यथोक्तं तद्वचः साधु अगृह्णन्त जगृहुः । शक्रदर्पजिघांसा तु तदुद्दिधीर्षयेति ज्ञेयम् ॥ ३१ ॥

सुमनोरञ्जनी — कालात्मना सर्वगुणोद्रिक्तेन हरिणा । भगवता श्रीकृष्णेन । शक्रस्य यो दर्पः असुरावेशकृतो मदः तस्य जिघांसया परिहारेच्छया प्रोक्तं वचः अगृह्णन्त स्वीचक्रुः ॥ ३१ ॥

तथा च विदधुः सर्वे यथाऽऽह मधुसूदनः ।
वाचयित्वा स्वस्त्ययनं द्रव्यैर्गोविप्रभूभृताम् ॥ ३२ ॥

सत्यधर्मीया — गावश्च विप्राश्च भूभृत्पर्वतश्च तेषां स्वस्त्ययनं विदधुः ॥ ३२ ॥

सुमनोरञ्जनी — तथा च तथैव । विदधुः चक्रुः ॥ ३२ ॥

उपहृत्य बलीन् सर्वानादृता यवसं गवाम् ।
गोधनानि पुरस्कृत्य गिरिं चक्रुः प्रदक्षिणम् ॥ ३३ ॥

सत्यधर्मीया — आदृता बलीनुपहृत्य गवां यवसं तृणं चोपहृत्य गोधनानि च पुरस्कृत्य गिरिं प्रदक्षिणं चक्रुः ॥ ३३ ॥

सुमनोरञ्जनी — स्वस्त्ययनं ब्राह्मणैर्वाचयित्वा । द्रव्यैः महेन्द्रयागद्रव्यैरेव गोविप्रभूभृतां बलीनुपाहृत्य दत्वा । आदृताः सादराः । गवां यवसं च दत्वा ॥ ३३ ॥

अनांस्यनडुद्युक्तानि ते चारुह्य स्वलङ्कृताः ।
गोप्यश्च कृष्णवीर्याणि गायन्त्यः सद्विजाशिषः ॥ ३४ ॥

सत्यधर्मीया — अनडुद्भिर्वृषभैरुद्युक्तान्यनांसि शकटानारुह्य सद्विजाशिषस्ताभिः सहिता गोप्यः कृष्णवीर्याणि गायन्त्योऽभवन्निति शेषः ॥ ३४ ॥

सुमनोरञ्जनी — अनडुद्भिर्युक्तानि अनांसि शकटान्यारुह्य । सद्विजाशिषः द्विजाशीर्वचनैः सहिताः गोप्यश्च प्रदक्षिणं चक्रुरिति पूर्वेणान्वयः ॥ ३४ ॥

कृष्णस्त्वन्यतमं रूपं गोपविश्रम्भणं गतः ।
शैलोऽस्मीति ब्रुवन् भूरि बलिमादद् बृहद्वपुः ॥ ३५ ॥

सत्यधर्मीया — गोपान्विस्रम्भयन्तीति तत्तथा । गोपानां विश्रम्भणं येन तद्वा । अन्यतममन्यत् । स्वार्थे तमप् । अन्यतमो मुकुन्दादित्यादिवत् । दृश्यमानान् गतः । शैलोऽहमस्मीति ब्रुवन् भूरि बलिं महान्नराशिं बृहद्वपुश्च सन्नाददभक्षयत् । रूपं दृश्यमानं ततोऽन्यतममन्यद्वपुर्गत इत्यन्वयो वा ॥३५॥

सुमनोरञ्जनी — कृष्णस्तु । अन्यतमं अन्यम् । गोपानां विस्रंभणं विश्वासजनकं रूपं देहं गतः प्राप्तः । बृहद्वपुः सन् भूरिबलिं आदत् भक्षितवान् ॥ ३५ ॥

तस्मै नमो व्रजजनैः स चक्रे ह्यात्मनाऽऽत्मने ।
अहो पश्यत शैलोऽसौ रूपी नोऽनुग्रहं व्यधात् ॥ ३६ ॥

सत्यधर्मीया — व्रजजनैः सहात्मनाऽऽत्मने नमश्चक्रे । असौ शैलरूपी सन्नोऽनुग्रहं व्यधात् । अहो पश्यत । रु-शब्द इत्यस्मादौणादिकडुप्रत्यये रुरिति भवति । रुणा शब्देनोत्कृष्टतया पीनो रूपीनः । यथोक्तं प्राक् । शैलोऽस्मीति ब्रुवन्भूरीति स्वारस्यात् ॥ ३६ ॥

सुमनोरञ्जनी — तस्मै बृहद्वपुषे । आत्मने स्वस्मै । आत्मना स्वयमेव । व्रजजनैः सह नमश्चक्रे । अहो इत्यादिकं ब्रुवन् ॥ ३६ ॥

एषोऽवजानतो मर्त्यान् कामरूपी वनेचरः ।
हन्ति ह्यस्मै नमस्यामः शर्मणे आत्मनो गवाम् ॥ ३७ ॥

सत्यधर्मीया — एष अवजानतोऽवज्ञां कुर्वतः कामरूपी वनेचरो मर्त्यान्हन्ति घातयति । अतोऽस्मै आत्मनां गवां च शर्मणे सुखाय नमस्याम इत्युक्त्वा नमश्च सश्चक्रुरित्यतीतेनान्वयः ॥३७॥

सुमनोरञ्जनी — एषः शैलरूपी भगवान् । अवजानतः अवज्ञां कुर्वतो मर्त्यान् हन्ति हि यस्मादतः शर्मणे क्षेमाय । नमस्याम इति ॥ ३७ ॥

इत्यद्रिगोद्विजमखं वासुदेवप्रचोदिताः ।
यथा विधाय गोपालाः सहकृष्णा व्रजं ययुः ॥ ३८ ॥

सत्यधर्मीया — यथावद्वासुदेवप्रचोदिता गोपाला अद्रिगोद्विजमखम् । अत्र भोक्तृतयाऽद्रेः प्रथमत उक्तिः । विधाय सहकृष्णा व्रजं ययुः ॥ ३८ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां
दशमपूर्वार्धे द्वाविंशोऽध्यायः ॥ १०-२२ ॥

सुमनोरञ्जनी — इति एवंप्रकारेण । यथा यथावत् ॥ ३८ ॥

इति द्वाविंशोऽध्यायः ॥

॥ अथ त्रयोविंशोऽध्यायः ॥

श्रीशुक उवाच -

इन्द्रस्तदात्मनः पूजां विज्ञाय विहतां नृप ।
गोपेभ्यः कृष्णनाथेभ्यो नन्दादिभ्यश्चुकोप ह ॥ १ ॥

सत्यधर्मीया — शक्रदर्पजिघांसयेति मूलेन तात्पर्येण चेन्द्रस्य विमदायेति मदः सूचितस्तं विस्तृत्य तदपनयनं चेत्थमित्थमेव भक्तसामान्यं दयापयोधिरुद्धरतीत्येतदस्मिन्नध्याये प्रतिपाद्यते । तत्रादौ मखविखण्डनं श्रुत्वाऽऽखण्डलः कामारभटीमारेभ इत्यतः शुक आहेत्याह ॥ श्रीशुक इति । इन्द्र आत्मनः पूजां विहताम् । अनेनारब्धता ध्वन्यते । विज्ञाय तत्तदा कृष्णनाथेभ्यो नन्दादिभ्यो गोपेभ्यश्चुकोप । हेति तदज्ञानमन्यकृतमिति सूचयति । क्रुधद्रुहेति चतुर्थी ॥ १ ॥

सुमनोरञ्जनी — गोवर्धनोद्धरणेन शरणागतगोगोपालगोपनलक्षणं माहात्म्यं निरूपयत्यस्मिन्नध्याये । तत्रादावत्यल्पासुरावेशवशादिन्द्रकृतमतिक्रमं वक्तुमुपक्रमते ॥ इन्द्र इति । इन्द्रः आत्मनः स्वस्य पूजां विहतां नाशितां विज्ञाय । कृष्ण एव नाथो येषां तेभ्यो नन्दादिभ्यः चुकोप । क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप इति चतुर्थी ॥ १ ॥

गणं सांवर्तकं नाम मेघानां चान्तकारिणाम् ।
इन्द्रः प्राचोदयत् क्रुद्धो वाक्यं चाहेशमन्युना ॥ २ ॥

सत्यधर्मीया — अन्तकारिणां लयं कल्पतां मेघानां नाम्ना सांवर्तकं प्रलयकालिकमित्यर्थः । गणं सङ्घं प्राचोदयत् । क्रुद्ध ईशमन्युनेशं प्रति कृतक्रुधा । अनेन तस्य नैष्फल्यं सूचयति । वाक्यं चाह । सांवर्तकमित्युक्त्यैवान्तकारितावगतौ पुनरन्तकारिणामित्यनेन काले तथात्वमस्त्वकाले इति नेति ध्वनयतीति मन्तव्यम् ॥ २ ॥

सुमनोरञ्जनी — अन्तकारिणां प्रलयं कुर्वतां मेघानां सांवर्तकं तन्नामकं गणम् । प्राचोदयत् प्रेरितवान् । ईशं श्रीनाथं उद्दिश्य मन्युना कोपेन । इदं वक्ष्यमाणं वाक्यं चाह ॥ २ ॥

अहो श्रीमदमाहात्म्यं गोपानां काननौकसाम् ।
कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनम् ॥ ३ ॥

सत्यधर्मीया — काननौकसां गोपानां श्रीमदमाहात्म्यमहो आश्चर्यावहम् । किंरूपं तदित्यतो निरूपयति । ये मर्त्यं मरणशीलं कृष्णमुपाश्रित्य देवानाममर्त्यानां हेलनमनादरं चक्रुरिति ॥ ३ ॥

सुमनोरञ्जनी — काननमेव ओको निवासस्थानं येषां तेषां गोपानां श्रीमदस्य माहात्म्यं अहो आश्चर्यकरम् । कुतः । यतः कृष्णसंज्ञकं मर्त्यं मनुष्यम् । उपाश्रित्य । देवहेलनं देवस्य मम हेलनं अवज्ञानं कृतवन्तः अत इति ॥ ३ ॥

यथाऽदृढैः कर्ममयैः कुप्लवैर्ज्ञानमानिनः ।
विद्यामान्वीक्षिकीं हित्वा तितीर्षन्ति भवार्णवम् ॥ ४ ॥

सत्यधर्मीया — पूर्वमुक्तं न स्वकं किन्तु परप्रेरणकृतं न तच्चिरस्थायीत्यपि सूचयितुं किञ्चित्सत्स्वभावव्यापारणं निदर्शनेन दर्शयति ॥ यथेति । अदृढैरफलपर्यवसायकैरन्यत्रासारभूरुहकृतैः कर्ममयैः प्रवृत्तकर्मप्रवृत्तैरन्यत्रानल्पशिल्पिकर्मभिः कुप्लवैः कुः पृथिवी तस्यामेव सद्भिः प्लवत्वेन प्रतीयमानैः कुत्सितैरन्यत्रापारगामिभिः पापप्रायैः प्लवैर्वा । कुः पापेऽल्पार्थकुत्सयोरिति यादवः । ज्ञानमस्मदीयं ज्ञानमेवेति मानिनोऽभिमानवन्तः समार्थमिदम् । आन्वीक्षिकीं ब्रह्मतर्कजनितां विद्यां ज्ञानं हित्वाऽन्यत्रार्णवपारमेवं गच्छेदिति परीक्षां हित्वा त्यक्त्वाऽर्णवं तितीर्षतो यथा तथैते भवार्णवं तितीर्षन्ति यं मर्त्यमाश्रित्याहो । आन्वीक्षिकीं विद्यां स्वबिम्बं प्रतिपत्तिं वा ॥ ४ ॥

सुमनोरञ्जनी — तत्र दृष्टान्तमाह ॥ यथेति । ज्ञानमानिनः किञ्चिज्ज्ञानेनाभिमानिनो अहङ्कारिणो वयमेव ज्ञानिन इत्यभिमानवन्तो वा । अदृढैः असारैः अनित्यफलैरिति यावत् । कर्ममयैः कर्मप्रधानकैः । कुप्लवैः कुत्सितप्लववद्विद्यमानैः साधनैः भवार्णवं तितीर्षन्ति । आन्वीक्षिकीं

अपरोक्षज्ञानसाधनीभूताम् । विद्यां परविद्यां हित्वा त्यक्त्वा । आन्वीक्षिकीं बिम्बदर्शनात्मिकां विद्यामिति वा ॥ ४ ॥

वाचालं मानिनं मत्तमज्ञं पण्डितमानिनम् ।
कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियम् ॥ ५ ॥

तात्पर्यम् – 'अत्यल्पस्त्वसुरावेशो देवानां च भविष्यति । प्राणमेकमसौ हित्वाऽऽखणाश्मसमः स्मृतः । तस्मिन्नप्यसुरावेशे गते प्रकृतिरेव त्वि'ति च ॥ ५ ॥

सत्यधर्मीया — ननु वाचालं मानिनं स्तब्धमिति श्लोके तथा मर्त्यमित्यतीतग्रन्थे च नन्दनन्दननिन्दनमिन्द्रकृतं प्रतीयते । तच्च हरिद्विषस्ते वै तमसि प्रपतन्तीत्यादेस्तम आद्यन्यतमानर्थदम् । तद्देवानां निरयो नास्ति तमश्चापि कथञ्चनेति मानबाधितम् । सामान्यतो देवानां किमु तत्सम्मान्यस्य शचीशस्येत्यतस्तात्पर्यं मानाननत आह ॥ अत्यल्प इति । तुशब्दस्तत्तारतम्ययोग्यतातारतम्यादिति विशेषसूचकः । देवानां भविष्यति । देवानामिति बहुवचनेन सर्वसुपर्वणामिति प्राप्तौ किञ्चिद्विषयेऽपवादं वदति ॥ प्राणमिति । एकं मुख्यं प्राणं विना, व्याख्यातो ब्रह्मणा मरुदितिवद्व्याख्यातो वायुना विधिः । तत्स्वरूपं निरूपयति ॥ असाविति । हि यतोऽसौ वायुराखणाश्मसमः स्मृतः स एषोऽश्माखणः । अखन्याश्मानमेवाप्य लोष्टो विध्वंसते यथेति छन्दोगोपनिषद्भाष्योक्तेः । तर्हि बहिर्मुखानामसुरावेशो गच्छत्यागतो न वेत्यत आह ॥ असुरावेश इति । तस्मिन्नसुरावेशे गते प्रकृतिरेव चरत्स्वभाव एवावतिष्ठते । अनर्थश्रुतिस्तु सर्वथा दुरात्माऽसुरपरेति तात्पर्यम् । तुशब्दस्त्वेवमादिमहात्मशिक्षया स्वभावाविर्भाव इति विशेषसूचकः । स्मृत इति भागवततन्त्रं स्वस्यापि मूलं लपत्तद्दार्ढ्यं सूचयतीति मन्तव्यम् ॥ अथ मूलार्थः ॥ वाचालमालजाटचौबहुभाषिणीति । वाचालो बहुगर्ह्यवागित्यमरः । अस्ति चेदीश्वर इत्यादिबहुभाषिणम् । मानिनमप्रमाणप्रमाणताज्ञानिनमित्यर्थो निन्दिततामतं मन्मखविखण्डकत्वात् । अज्ञं, रजसा चोदिता मेघा इति मत्स्वाम्यज्ञानहीनं, पण्डित इति मानी तम् । आजीव्यैकतरं भावमिति तथात्वनटनम् । मर्त्यं कृष्णमुपाश्रित्य गोपा मेऽप्रियं चक्रुः ॥ ५ ॥

सुमनोरञ्जनी — किं तद्देवहेलनं चक्रुरित्यत उक्तमेव पुनस्तदाह ॥ वाचालमिति । वाचालं बहुभाषिणम् । मानिनं गर्विणम् । अज्ञं देवमाहात्म्याज्ञानिनम् । एतादृशं कृष्णमुपाश्रित्य । मे अप्रियं मत्पूजाविघातलक्षणम् ॥ ५ ॥

एषां श्रियाऽवलिप्तानां कृष्णेनाप्यायितात्मनाम् ।
धुनुत श्रीमदस्तम्भं पशून् नयत सङ्क्षयम् ॥ ६ ॥

सत्यधर्मीया — अवलिप्तानामहङ्कृतां कृष्णेनाप्यायित आत्मा मनो येषां ते तथा वर्धितः । आप्यायितः श्रीमदप्रयुक्तस्तम्भोऽविद्यमानसामर्थ्यप्रकटनं धुनुत निराकुरुत । पशूंस्तदुपजीव्यान्सङ्क्षयं नाशं नयत ॥ ६ ॥

सुमनोरञ्जनी — अवलिप्तानां गर्विणां, कृष्णेन आप्यायितात्मनां तोषितमनसां, श्रीमदेन यः स्तम्भः स्तब्धता तं धुनुत निराकुरुत । तदुपायमाह ॥ पशून् संक्षयं नयत । गोजीवित्वेन गवां नाशे स्वोपजीवननाशे स्वत एव मदो गच्छतीति भावः ॥ ६ ॥

अहं चैरावतं नागमारुह्यानुव्रजे व्रजम् ।
मरुद्गणैर्महावेगैर्नन्दगोष्ठजिघांसया ॥ ७ ॥

सत्यधर्मीया — अहं नागं नाम्नैरावतमारुह्य व्रजं गोपालस्थलमनुव्रजे व्रजामि । नैकाकीत्याह । महावेगैर्मरुद्गणैर्महावातैः । फलमालपति ॥ नन्दगोष्ठजिघांसयेति । नन्दगोघोषहननेच्छया । यथोक्तं चतुर्थतात्पर्ये । गोष्ठं घोष इति प्रोक्तो व्रजस्तत्पालसंस्थितिरिति ॥ ७ ॥

सुमनोरञ्जनी — श्रीकृष्णाद्बिभ्यत आह ॥ अहमिति । मरुद्गणैः देवसमूहैः सह अनुव्रजे अनन्तरमेवागच्छामि ॥ ७ ॥

इत्थं मघवताऽऽज्ञप्ता मेघा निर्मुक्तबन्धनाः ।
नन्दगोकुलमासारैः पीडयामासुरोजसा ॥ ८ ॥

सत्यधर्मीया — मघवतेत्थमाज्ञप्ताः । निर्मुक्तानि बन्धनानि शृङ्खला येभ्यस्ते मेघाः । आसारैर्धारासम्पातैर्नन्दगोकुलमोजसा स्वसामर्थ्येन पीडयामासुः । उच्चैःश्रवसं स्यन्दनं वा विहायैरावतारोहणं तच्छुण्डादण्डसमासारान्मुञ्चतेति सूचयितुं नमुचिपविमुच इति भावो भावस्थ इति ज्ञेयम् । धारा वितेरुरुरुनागकरप्रमाणा इति श्रीमदुक्तेः ॥ ८ ॥

सुमनोरञ्जनी — इत्थं एवं प्रकारेण । मघवता इन्द्रेण । प्रलयार्थं पूर्वं बद्धाः इदानीं निर्मुक्तं बन्धनं येभ्यस्ते मेघाः । नन्दस्य गोकुलं गोसमुदायम् । आसारैः जलधारासम्पातैः । ओजसा सामर्थ्येन ॥ ८ ॥

विद्योतमाना विद्युद्भिर्नदन्तः स्तनयित्नुभिः ।
तीव्रैर्मरुद्गणैर्नुन्ना ववृषुर्जलशर्कराः ॥ ९ ॥

सत्यधर्मीया — विद्युद्भिश्चपलाभिर्विद्योतमानाः प्रकाशमानाः । स्तनयित्नुभिः । स्तनयित्नुः पयोवाहे तद्ध्वनौ मृत्युरोगयोरिति विश्वः । अत्र ध्वनिमात्रपरः स्तनयित्नुशब्दः । जलशर्कराः कर्कान्ववृषुः ॥ ९ ॥

सुमनोरञ्जनी — विद्युद्भिः विद्योतमाना प्रकाशमाना स्तनयित्नुभिः अशनिभिः नदंतः गर्जन्तः । तीव्रैः प्रचण्डैः । मरुद्गणैः वायुसमूहैः । नुन्नाः प्रेरिताः जलशर्कराः वर्षोपलान् ववृषुः ॥ ९ ॥

स्थाणुस्थूला वर्षधारा मुञ्चत्स्वभ्रेष्वभीक्ष्णशः ।
जलौघैः प्लाव्यमाना भूर्नादृश्यत नतोन्नतम् ॥ १० ॥

सत्यधर्मीया — स्थाणुवत्स्थूला वर्षधारा अभ्रेषु मुञ्चत्सु सत्सु । विरामो नेत्याह ॥ अभीक्ष्णश इति । भूर्जलौघैस्तत्प्रवाहैः प्लाव्यमाना नतोन्नतमनुन्नतमुन्नतं च यथा भवति तथा नादृश्यत ॥ १० ॥

सुमनोरञ्जनी — अभ्रेषु स्थाणुवत् वृक्षवत् स्थूलाः वर्षधाराः मुंचत्सु । जलौघैः प्लाव्यमाना बभूव । तत्रत्यं नतेन निम्नेन सहितं उन्नतं स्थलं च नादृश्यत ॥ १० ॥

अत्यासारातिवातेन पशवो जातवेपनाः ।
गोपा गोप्यश्च शीतार्ता गोविन्दं शरणं ययुः ॥ ११ ॥

सत्यधर्मीया — अत्यासारसहितो योऽतिवातस्तेन । जातं वेपनं कम्पनं येषां ते गोपा गोप्यश्च शीतेनार्ता गोविन्दं शरणं ययुः ॥ ११ ॥

सुमनोरञ्जनी — अत्यासारेण अतिवातेन च जातवेपनाः जातकंपाः ॥ ११ ॥

शिरस्सुतांश्च कायेन प्राच्छाद्यासारपीडिताः ।
वेपमाना भगवतः पादमूलमुपाययुः ॥ १२ ॥

सत्यधर्मीया — शिरः स्वकीयं सुतानुदरे निवेश्याच्छाद्य कायेन शरीरेणासारपीडिता वेपमाना भगवतः पादमूलम् । स्थातुं भूर्नास्तीति तत्प्रसवितृमूलोपसरणं युक्तिमत्कृतमिति मन्तव्यम् ॥ १२ ॥

सुमनोरञ्जनी — कथं जग्मुरित्यतस्तद्विशिनष्टि ॥ शिर इति । स्वकायेन शिरः सुतांश्च प्रच्छाद्य । भगवतः श्रीकृष्णस्य पादमूलम् ॥ १२ ॥

कृष्ण कृष्ण महाभाग त्वन्नाथं गोकुलं प्रभो ।
त्रातुमर्हसि देवान्नः कुपिताद् भक्तवत्सल ॥ १३ ॥

सत्यधर्मीया — त्वं नाथो यस्य तत्त्वन्नाथम् । कुपितादेवेन्द्रात् । कुतः कोपस्तस्येत्यतस्त्वं देवान्नो देवानामिन्द्रादीनां देयमन्नं यस्य स इति कुपितादिति भावः ॥ १३ ॥

सुमनोरञ्जनी — तत्रागतानां गोपगोपीनां प्रार्थनाप्रकारमाह ॥ कृष्णेति । त्वमेव नाथो यस्य तद्गोकुलं गोसमुदायम् । नः अस्मांश्च । कुपितात् रुष्टात् देवात् इन्द्रात् त्रातुं रक्षितुं अर्हसीति ॥१३॥

शीतवर्षातिवातेन हन्यमानमचेतनम् ।
निरीक्ष्य भगवान् मेने कुपितेन्द्रकृतं हरिः ॥ १४ ॥

सत्यधर्मीया — अचेतनं निस्संज्ञम् । कुपितश्चासाविन्द्रश्च तेन कृतं मेने ॥ १४ ॥

सुमनोरञ्जनी — शीतवर्षाभ्यां सहितेन अतिवातेन । हन्यमानं पीड्यमानं अचेतनं कर्तव्यज्ञानविधुरं निःसंज्ञं वा । गोकुलं निरीक्ष्य । एतादृग्वर्षं कुपितेन्द्रकृतं मेने ॥ १४ ॥

अपर्तावुल्बणं वर्षमतिवातं शिलामयम् ।
स्वयांगे विहतेऽस्माभिरिन्द्रो नाशाय वर्षति ॥ १५ ॥

सत्यधर्मीया — मननप्रकारमेवमालुलोच भगवानित्याह ॥ अपर्ताविति । अवर्षर्तौ स्वयागेऽस्माभिर्विहते नाशिते सति । स्वयाग इति स्फुटार्थः । गोकुलस्य नाशायेन्द्रोऽतिवातं शिलामयं वर्षं वर्षति करोति ॥ १५ ॥

सुमनोरञ्जनी — कथं मेन इत्यतस्तं प्रकारमाह ॥ अपेति । ज्ञात्वा तत्र कर्तव्यमालुलोचेत्याह । अपगतो ऋतुर्यस्य तदपर्तु । अकाले जायमानमिति यावत् । अतिवातं अतिशयितो वातो यस्मिन् तत् । शिलामयं शिलाप्रचुरं अतोऽत्युल्बणं वर्षं यस्मात्तस्मात् । इन्द्र एव नाशाय गोगोपानां संहाराय । वर्षति । तत्र निमित्तं, अस्माभिस्तन्मखे तदुद्देश्यके मखे विहते सतीति ॥ १५ ॥

तत्र प्रतिविधिं सम्यगात्मयोगेन साधये ।
लोकेशमानिनो मौढ्याद् हरिष्ये श्रीमदं तमः ॥ १६ ॥

सत्यधर्मीया — आत्मयोगेन स्वरूपोपायेन साधये साधयामि । मानसिकव्यथावते गोजनाय हितं च साधये इत्यावृत्त्याऽन्वयः । एतदाशयेनैव साधय इत्युक्तिरिति भावः । मौढ्यादेव लोकेशमानिनो लोकेश इति मानी तस्य श्रीमदं तज्जनकं तमो हरिष्ये । लोकेऽशमानीति छेदः । लोकेऽवलोके कृते सत्यशमेनाक्षमया अनिनीति लोकेशमानी ॥ १६ ॥

सुमनोरञ्जनी — तत्र वर्षतु नाम । तत्रोपायं साधयामीत्याह ॥ तत्रेति । तत्र तत्कृतोपद्रवे विषये । प्रतिविधिं प्रतीकारम् । आत्मयोगेन आत्मसामर्थ्येन । स्वनिर्मितोपायेन वा । साधये करोमि । तेन च अहं लोकानामीश इत्यभिमानिन इन्द्रस्य । तमः तमःकार्यं श्रीमदं श्रीनिमित्तको मदो यस्मात्तत् तमोऽज्ञानमिति वा ॥ १६ ॥

न हि मद्भावयुक्तानां सुराणामीशविस्मयः ।
मत्तः सतां मानभङ्गः प्रशमायोपपद्यते ॥ १७ ॥

सुमनोरञ्जनी — कुतो मदः परिहार्य इत्यत आह ॥ न हीति । हि यस्मात् । मयि भावेन भक्त्या युक्तानां सुराणाम् । नाहं तद्वेषादिदं साधये किं तु तदनुग्रहायैवेत्याह ॥ सतामिति । सतां मत्तो मानभङ्गः गर्वभङ्गः प्रशमाय प्रकृष्टमन्निष्ठायै । शमो मन्निष्ठता बुद्धेरिति वचनात् ॥ १७ ॥

तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् ।
गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः ॥ १८ ॥

सुमनोरञ्जनी — किं च ममायं नियमोऽप्यस्तीत्याह ॥ तस्मादिति । यस्मादहमेव शरणं रक्षिता यस्य तत् । मम गृहरूपं वा । गोष्ठं व्रजम् । अहमेव नाथो याचनीयो स्वामी वा यस्य तत् । मय्येकान्तभक्तियुक्तमिति यावत् । अत एव मत्परिग्रहं मया परिगृहीतुं योग्यं गोपम् । तस्मात् आत्मयोगेन स्वसामर्थ्येन रक्षयिष्यामि । मे मया सोऽयं शरणागतरक्षणरूपः । व्रतो नियमः आहितः अङ्गीकृतः ॥ १८ ॥

इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्धनाचलम् ।
दधार लीलया कृष्णश्छत्राकमिव बालकः ॥ १९ ॥

सुमनोरञ्जनी — कृन्त्वा उन्मूल्य । बालकः छत्राकं शिलीन्ध्रमिव ॥ १९ ॥

अथाह भगवान् गोपान् हेऽम्ब तात व्रजौकसः ।
यथोपजोषं विशत गिरिवर्तं सगोधनाः ॥ २० ॥

सुमनोरञ्जनी — हे अम्ब ! हे तात ! हे व्रजौकसः ! सर्वे गिरेर्गर्तं उन्मूलनेन कृतं बिलं यथोपजोषं यथासुखं निर्विशत ॥ २० ॥

न त्रास इह वः कार्यो मद्धस्ताद्रिनिपातनात् ।
वातवर्षभयं चालं तत्त्राणं विहितं हि वः ॥ २१ ॥

सुमनोरञ्जनी — नन्विदं वृश्चिकभयन्यायमनुसरति । यतो वृष्टिभयार्ताः वयं त्वद्धस्तादद्रेर्निपतने सर्वेऽप्येकदैव नश्याम इत्यतो नेत्याह ॥ नेति । वो युष्माभिः । मद्धस्तादद्रेर्निपातनमाशङ्क्य ल्यब्लोपनिमित्तेयं पञ्चमी त्रासो न कार्यः । वातवर्षभयम् । अलं निवारितम् । अलं भूषणपर्याप्तिशक्तिवारणवाचकमित्यभिधानात् । तस्माद्भयात्त्राणं रक्षणं च मया विहितं कृतम् ॥२१॥

तथा निर्विविशुर्गर्तं कृष्णाश्वासितमानसाः ।
यथावकाशं सधनाः सप्रजः सोपजीवनाः ॥ २२ ॥

सुमनोरञ्जनी — कृष्णेनाश्वासितं विश्वासं प्रापितं मानसं येषां तथाविधाः । सोपजीवनाः धान्यादिसहिताः । स्वोपजीवनेन गोधनेन सहिता वा ॥ २२ ॥

क्षुत्तृड्व्यथां सुखापेक्षां हित्वा तैर्व्रजवासिभिः ।
वीक्ष्यमाणो दधाराद्रिं सप्ताहं नाचलत् पदात् ॥ २३ ॥

सत्यधर्मीया — बहुधा बहुधान्यसङ्ग्रहात्क्षुत्तृड्व्यथां क्षुच्च तृट् च ताभ्यां व्यथां हित्वा सुखापेक्षां स्वस्थतयाऽवस्थानात्प्राप्तसुखा इति तदपेक्षां हित्वेत्युक्तिः । तैर्व्रजवासिभिर्गोपैर्वीक्ष्यमाणः सप्ताहमद्रिं दधौ पदात्पदं च नाचलच्चचाल । असंमान्यान्युपायं धराधरहरणं हरिः कुर्वन्पर्वताश्च गोत्रभिच्छात्रव इति तदुद्धृत्या तन्मानहानिः कार्येति काञ्चन वैरी वैरीसहजमित्रमिति किंवदन्तीं लालयामासेत्यवसेयम् । उक्तं च रुक्मिणीशविजये ।

शतक्रतौ वर्षति वासुदेवो गिरिं समुद्धृत्य बभूव तूष्णीम् ।
जिहीर्षुभिः स्वात्समशत्रुशौर्यं तदाद्यवैर्युद्धरणं हि कार्यमिति ॥ २३ ॥

सुमनोरञ्जनी — क्षुत्तृड्व्यथां शयनासनादिजन्यसुखापेक्षां च हित्वा । वीक्ष्यमाणः । अद्रिं गोवर्धनम् ॥ २३ ॥

श्रीशुक उवाच–

कृष्णयोगानुभावं तं निशाम्येन्द्रोऽतिविस्मितः ।
निस्स्तम्भो भ्रष्टसङ्कल्पः स्वान् मेघान् सन्न्यवारयत् ॥ २४ ॥

सत्यधर्मीया — श्रीधर एवं धरति धरं किमचीकरन्नमुचिसूदन इति परीक्षिन्मानसीं शङ्कां शुकः परिहरतीतीरयति ॥ श्रीशुक इति । तं कृष्णयोगानुभावं निशाम्यातिविस्मित इन्द्रो निस्तम्भो गतगर्वः । भ्रष्टः सङ्कल्पो गोकुलनाशविषयो यस्य स सन्स्वान्मेघान्सन्न्यवारयन्निवारयामास ॥ २४ ॥

सुमनोरञ्जनी — योगानुभावं योगैश्वर्यम् । निस्तंभः निर्गतमदः । सन्न्यवर्तयत् निवर्तयामास ॥ ॥ २४ ॥

खं व्यभ्रमुदितादित्यं वातवर्षं च दारुणम् ।
निशम्योपरतं गोपान् गोवर्धनधरोऽब्रवीत् ॥ २५ ॥

सत्यधर्मीया — नीलं नैव नभः सुलज्जितशचीभर्तुर्मुखे नीलिमा मेघाः क्वापि न सन्ति सन्ति दिविजभ्राजद्विमानाम्बुदास्तामिस्रं न हि दिश्यथाऽपि च दृशि त्वां मानुषं मन्वतां चित्तेष्वस्ति न वेपथुर्निजजने भीतेन्द्रगात्रे परम् ॥ १ ॥ धारा नैव पयोमुचां यदुपते प्रेमाश्रुधारा परं स्वानां नो परिगर्जितं स्तुतिकृतां सिद्धेश्वराणां ध्वनिः । विद्युन्नामरनर्तकी करचयालङ्कारकान्तिः प्रभो नो वायुः सुरवृष्टपुष्पसहगानाल्पालिपक्षैर्मरुदित्यादि प्रकारेण केनचिदभिहितः स्वयमाहेत्युत्प्रेक्षितम् । वस्तुतस्तु सर्ववित्प्राह । खमिति । व्यभ्रं विगतान्यभ्राणि यस्मात्तत्खमाकाश उदितादित्यं च दारुणमुल्बणं वातं वर्षं चोपरतं निशम्य गोवर्धनधरो गोपानब्रवीत् ॥ २५ ॥

सुमनोरञ्जनी — व्यभ्रं विगतमेघम् । उदित आदित्यो यस्मिन् तत् । वातसहितं वर्षं च उपारतं निवृत्तम् । निशाम्य दृष्ट्वा ॥ २५ ॥

निर्यात त्यजत त्रासं गोपाः सस्त्रीधनार्भकाः ।
उपारतं वातवर्षं व्युदप्रायाश्च निम्नगाः ॥ २६ ॥

सत्यधर्मीया — हे गोपास्त्रासं त्यजत । सस्त्रीधनार्भका निर्यात बहिर्वातवर्षं वातेन सहितं च तद्वर्षं च तदुपारतं शान्तम् । निम्नगा व्युदप्राया विगतान्युदान्युदकानि येषां ते कासारादयस्तत्तुल्या इति । ता नद्यस्तथा । स्वतन्त्रोऽयमुदकवाच्युदशब्दः ॥ २६ ॥

सुमनोरञ्जनी — हे गोपाः ! बहिर्निर्यात । वातवर्षं उपारतं निवृत्तम् । निम्नगाः नद्यश्च विगतमुदकं याभ्यस्ताः । प्रायशो व्युदाः व्युदप्रायाः । बहुतरं विगततोया इत्यर्थः ॥ २६ ॥

ततस्ते निर्ययुर्गोपाः स्वं स्वमादाय गोधनम् ।
शकटोपकरणं स्त्रीबालस्थविराः शनैः ॥ २७ ॥

सत्यधर्मीया — शकटेष्वनस्स्वटन्ति गच्छन्ति तानि तद्गतानीति यावत् उपकरणान्युर्वरितजीवसाधनान्यस्मिन्कर्मणि तद्यथा भवति तथा निर्ययुः । शकटानामाटोप आरभटी तत्करणं यथा तथेति वा । स्त्रीबालस्थविरा गोपाः शनैः स्वं स्वं गतम् ॥ २७ ॥

सुमनोरञ्जनी — शकटोपकरणं शकटारूढोपकरणं यथा भवति तथा निर्ययुः ॥ २७ ॥

भगवानपि तं शैलं स्वस्थाने पूर्ववत् प्रभुः ।
पश्यतां सर्वभूतानां स्थापयामास लीलया ॥ २८ ॥

सत्यधर्मीया — स्वस्थाने पूर्वोत्कृतस्वस्थले सर्वभूतानां पश्यतां सताम् । अनादरे चैषा षष्ठी । सहाया भवतेत्यनादृत्य स्थापयामास ॥ २८ ॥

तं प्रेमवेगान्निभृता व्रजौकसो यथा समीयुः परिरम्भणादिभिः ।
गोप्यश्च सस्नेहमपूजयन् मुदा दध्यक्षताद्भिर्युयुजुस्तथाऽऽशिषः ॥ २९ ॥

सत्यधर्मीया — प्रेमवेगात्स्नेहप्रवाहान्निभृता नितरां भृतं भरणं येषां ते । पूर्णा इति वा । परिरम्भणादिभिर्व्रजौकसः पुमांसो यथा समीयुस्तथा गोप्यश्च सस्नेहं मुदा दध्यक्षताद्भिः । समासान्तविधेरनित्यत्वाद्युज्यते दध्यक्षताद्भिरिति । अपूजयंस्तथाऽऽशिषश्च युयुजुः ॥ २९ ॥

यशोदा रोहिणी नन्दो रामश्च बलिनां वरः ।
कृष्णमालिङ्ग्य युयुजुराशिषः स्नेहकातराः ॥ ३० ॥

सत्यधर्मीया — स्नेहकातरा स्नेहपरवशाः ॥ ३० ॥

सुमनोरञ्जनी — स्नेहकातराः स्नेहव्याकुलाः ॥ ३० ॥

दिवि देवगणाः सर्वेसिद्धगन्धर्वचारणाः ।
तुष्टुवुर्मुमुचुस्तुष्टाः पुष्पवर्षाणि भारत ॥ ३१ ॥

सत्यधर्मीया — सर्वेसिद्धगन्धर्वचारणा इति पदमेकम् । सर्वश्च शर्वश्च इश्च कामश्च सिद्धगन्धर्वचारणाश्च सर्वेसिद्धगन्धर्वचारणाः । सर्वो ह्येष रुद्र इति श्रुतिः । । सर्वः कालञ्जरः शिव इति नामनिधानम् । अतो न सर्वपदातिरेकः । साध्या इति पाठस्तु नासाध्यार्थः । पुष्पवर्षाणि मुमुचुस्तत्र तन्त्रं तुष्टा इति ॥ ३१ ॥

सुमनोरञ्जनी — देवा अपि ससंभ्रमं स्वसेवां विदधिर इत्याह ॥ दिवीति । दिवि अन्तरिक्षे । सर्वे । सर्व इत्यसंकोचं व्यनक्ति ॥ ३१,३२ ॥

शङ्खदुन्दुभयो नेदुर्दिवि देवप्रचोदिताः ।
जगुर्गन्धर्वपतयस्तुम्बुरुप्रमुखा नृप ॥ ३२ ॥

सत्यधर्मीया — दिवीति दुन्दुभिपदेनेव गन्धर्वपतिपदेनाप्यन्वेति ॥ ३२ ॥

ततोऽनुरक्तैः पशुपैः परिश्रितो राजन् स गोष्ठं सबलोऽविशद् हरिः ।
तथाविधान्यस्य कृतानि गोपिका गायन्त्य ईयुर्मुदिता हृदिस्पृशः ॥ ३३ ॥

इति श्रीमद्भागवते दशमस्कन्धे त्रयोविंशोऽध्यायः ।

सत्यधर्मीया — हृदिस्पृशो मनोज्ञाः । हृद्युभ्यां चेति सप्तम्या अलुक् ॥ ३३ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मकृतायां दशमपूर्वार्धे त्रयोविंशोऽध्यायः ॥ १०-२३ ॥

सुमनोरञ्जनी — अनुरक्तैः स्निग्धैः पशुपैः गोपैः परिश्रितो युक्तः । गोपिकाः अस्य कृष्णस्य । तथाविधानि गोवर्धनोद्धरणादीनि । कृतानि कर्माणि । गायंत्यः ईयुः । हृदिस्पृशः मनोहराः । मनोहरस्य अस्येति वा संबन्धः ॥ ३३ ॥

इति त्रयोविंशोऽध्यायः ।

॥ अथ चतुर्विंशोऽध्यायः ॥

श्रीशुक उवाच -
एवंविधानि कर्माणि गोपाः कृष्णस्य वीक्ष्य ते ।
नतद्वीर्यविदः प्रोचुः समुपेत्य सुविस्मिताः ॥ १ ॥

सत्यधर्मीया — ये डोलालीलामारभ्यैतत्कुत्कीलतोलनादिपर्यन्तमधिकार्यन्तरात्मपरिशुद्ध-येऽनन्तस्मरणेन भवितव्यं सङ्गृह्य तत्रापि सर्वचरिततादूप्यमावेदयितुं धरोद्धरणमादि-तस्तथाकथा कथाव्यत्यासश्च सम्भवतः सम्भूय कथयन्ति गोपा इति शुको वक्ति ॥ श्रीशुक इति । ते

गोपास्तद्वीर्यविदस्तत्पराक्रमज्ञास्ते न भवन्तीति नतद्वीर्यविदः समुपेत्य मिलित्वा सुविस्मिताः सन्तः प्रोचुः ॥ १ ॥

सुमनोरञ्जनी — इह मुमुक्षुभिः श्रीकृष्णस्य विचित्रचरित्राणि संततमनुचिन्तनीयानि इति भावेन बुध्यारोहाय सप्तहायनेन कृष्णेन सप्ताहं सुपर्वसार्वभौमगर्वनिर्हरणं पर्वतोद्धरणं वीक्ष्य विस्मितानां गोपानां श्रीकृष्णस्य पूतनायातनाप्रदानादिबाललीलानुवादक्रमं क्रमेण शुको राज्ञेऽनुवदतीत्याह ॥ - श्रीशुक इति । एवंविधानि कर्माणि वीक्ष्यापि । तस्य कृष्णस्य वीर्यविदो न भवन्तीति नतद्वीर्यविदः । अत एव सुविस्मिताः सन्तो गोपाः समुत्पेत्य एकत्र मिलित्वा प्रोचुः ॥ १ ॥

बालकस्य यदेतानि कर्माण्यत्यद्भुतानि वै ।
कथमर्हत्यसौ जन्म ग्राम्येष्वात्मजुगुप्सितम् ॥ २ ॥

सत्यधर्मीया — यस्य बालकस्यैतानि कर्माण्यत्यद्भुतानि वै प्रसिद्धानि आत्मनः स्वस्य जुगुप्सितं निन्दितं ग्राम्येषु मूर्खेषु मानुषेष्वसौ जन्म कथमर्हतीति परस्परं प्रोचुः ॥ २ ॥

सुमनोरञ्जनी — यत् यस्मात् । बालकस्य एतानि कर्माणि अद्भुतानि । अतोऽयं महापुरुष एव स्यात् । असौ एतादृशः । आत्मनः स्वस्यैव जुगुप्सितं ग्राम्येषु इन्द्रियग्रामवशेषु अस्मासु जन्म कथमर्हति ॥ २ ॥

यः सप्तहायनो बालः करेणैकेन लीलया ।
कथं बिभ्रद् गिरिवरं पुष्करं गजराडिव ॥ ३ ॥

सत्यधर्मीया — सप्त हायनानि वत्सरा यस्य सः । करेण शुण्डया पुष्करं पद्मं बिभ्रद्गजराडिव । कथं बिभ्रत् स्थित इति शेषः । अडभावे छान्दसे गणकार्यस्यानित्यत्वे बिभ्रदबिभ्रदिति वा । बालः करेण गिरिवरं बिभ्रज्जन्म कथमर्हतीत्यन्वयो वा ॥ ३ ॥

सुमनोरञ्जनी — प्रत्येकं कर्माण्यनूद्य अद्भुतत्वमाहुः ॥ य इति । यः, सप्त हायनाः वर्षाणि परिच्छेदकानि यस्य स तथा स, लीलया अनायासेन । एकेनैव करेण । गिरिवरं बिभ्रत् अबिभ्रत् । कथम् । गजराट् पुष्करं पद्ममिव । ननु पूर्वं वर्षात्मकपौगण्डवयसः उक्तत्वेन इदानीं सप्तहायन इत्युक्तिः कथमुपपद्यत इति चेत् । उच्यते । .... किन्तु प्रसङ्गसङ्गत्यधीनाकांक्षानुसारेणैव । एवं च गोवर्धनोद्धारणकथागोपीवस्त्रापहरणा..... आकांक्षाक्रमेण कथितेति ज्ञेयम् । कथाक्रमस्तु श्रीमदाचार्यचरणकृतभारततात्पर्योक्तरीत्यैव ज्ञेय इतिवदेव ॥ ३ ॥

तोकेनामीलिताक्षेण पूतनाया महौजसः ।
पीतः स्तनः सह प्राणैः कालेनेव वयस्तनोः ॥ ४ ॥

सत्यधर्मीया — अमीलिताक्षेण तोकेन । महौजसो महाशक्तेः पूतनायाः सह प्राणैः स्तनः पीतः। तनोर्वयो यौवनं कालेनेव यथा ग्रस्यते कालो वार्धकादिर्यथा वयोऽङ्गस्य नाशयति तथा पूतनामघातयदिति ॥ ४ ॥

सुमनोरञ्जनी — तोकेन शिशुना । आमीलिताक्षेण ईषन्मीलितलोचनेन । महौजसः महाबलायाः पूतनायाः । सहप्राणं स्तनं पीतम् । कालेन तनोः शरीरस्य वयः यथा पीयते तथेति । तत्कथमित्यनुवर्तते ॥ ४ ॥

हिन्वतोऽधश्शयानस्य मास्यस्य चरणावुदक् ।
अनोऽपतद् विपर्यस्तं रुदतः प्रपदाहतम् ॥ ५ ॥

सत्यधर्मीया — मास्यस्य मासेषु चतुर्षु भवो मास्यः । यथोक्तमाचार्यैः । यदाप देवश्चतुरोऽथ मासांस्तदोपनिष्क्रामणमस्य चासीदिति । अधःशयानस्योदगूर्ध्वं चरणौ हिन्वत उत्क्षिपतो रुदतः प्रपदेन पादाग्रेण हतमनो विपर्यस्तं सदपतत् ॥ ५ ॥

सुमनोरञ्जनी — अनसः अधःशयानस्य मास्यस्य मासः परिच्छेदको यस्य । मासि अस्येति वा विभागः । मासि मासात्मके वयसि । अधः शयानस्येत्यन्वयः । उदक् ऊर्ध्वं चरणौ हिन्वतः क्षिपतः। प्रपदेन पादाग्रेणाहतं ताडितं सत् अनः कथं विपर्यस्तम् ॥ ५ ॥

एकहायन आसीनो ह्रियमाणो विहायसा ।
दैत्येन यस्तृणावर्तमहन् कण्ठग्रहातुरम् ॥ ६ ॥

सत्यधर्मीया — एको हायनः शरद्यस्य स यो बालो दैत्येन विहायसा ह्रियमाणः कण्ठग्रहातुरं कण्ठग्रहेणैवातुरस्तं तृणावर्तमहन्हतवानिति यत्तदपि प्रोचुः ॥ ६ ॥

सुमनोरञ्जनी — एकहायनः एकवर्षवयस्कः । दैत्येन तृणावर्तनाम्ना विहायसा ह्रियमाणः कृष्णः । कण्ठग्रहेण आतुरं पीडितम् तृणावर्तम् अहत् अहनत् । तदपि कथम् ॥ ६ ॥

कच्चिद् हैयङ्गवस्तैन्ये मात्रा बद्ध उलूखले ।
गच्छन्नर्जुनयोर्मध्ये बाहुभ्यां तावपातयत् ॥ ७ ॥

सत्यधर्मीया — हैय्यङ्गवं नवनीतं गतम् । तस्य स्तैन्ये चौर्ये । मात्रोलूखले बद्धो बाहुभ्यामबाहुभ्यां पादाभ्यां च । रिङ्खणसमये चतुर्णामुपयोगादिति केचित् । यत्किञ्चिदेतत् । अघृष्टजानुभिः पद्भिरिति पूर्वमुक्तेर्मात्रा बाहुभ्यामुलूखले बद्ध इत्यन्वयः । यद्वा बाहुभ्यां पदभिन्नाभ्यामङ्गुलवत्त्वेन तत्सदृशाभ्यां गच्छन्तावर्जुनावपातयत् ॥ ७ ॥

सुमनोरञ्जनी — कचित् कदाचित् हैय्यंगवं ह्यो गोदोहोद्भवं नवनीतम् । तस्य स्तैन्ये चौर्ये कृते सति । अर्जुनयोर्मध्ये बाहुभ्यां गच्छन् रिंखणं कुर्वन्नित्यर्थः ॥ ७ ॥

वने सञ्चारयन् वत्सान् सरामो बालकैर्वृतः ।
हन्तुकामं बकं दोर्भ्यां मुखतोऽरिमपाटयत् ॥ ८ ॥

सत्यधर्मीया — अरिं बकमित्यन्वयः ॥ ८ ॥

सुमनोरञ्जनी — हन्तुकामं बकं, मुखमारभ्य । अपाटयत् विदारयत् ॥ ८ ॥

वत्सेषु वत्सरूपेण प्रविशन्तं जिघांसया ।
हत्वा न्यपातयत् तेन कपित्थानि च लीलया ॥ ९ ॥

सत्यधर्मीया — वत्सेषु वत्सरूपेण प्रविशन्तं वत्सासुरं हत्वा तेन तद्दैत्यकायेनेव लीलयेव कपित्थानि तत्फलानि । फले लुक् । न्यपातयत् ॥ ९ ॥

सुमनोरञ्जनी — प्रविशन्तं दैत्यम् । तेन दैत्येन कपित्थानि न्यपातयत् ॥ ९ ॥

हत्वा रासभदैतेयं तद्बन्धूंश्च बलान्वितः ।
चक्रे तालवनं क्षेमं परिपक्वफलोचितम् ॥ १० ॥

सत्यधर्मीया — बलान्वितो बलरामसहितो बलवांश्च परिपक्वफलोचितं तालवनं क्षेमम् । क्षेममस्यास्तीत्यर्श आद्यचि । वनमवनवच्चक्रे । फले लुगिति लुक् ॥ १० ॥

सुमनोरञ्जनी — रासभरूपं दैतेयम् । बलेन बलरामेण अन्वितः । तालवनं क्षेमम् क्षेमवत् । परिपक्वफलैः उचितं सेवितुं योग्यं चक्रे ॥ १० ॥

प्रलम्बं घातयित्वोग्रं बलेन बलशालिना ।
अमोचयद् व्रजपशून् गोपांश्चारण्यवह्नितः ॥ ११ ॥

सत्यधर्मीया — बलेनान्तर्वर्तिशुक्लबालबलेन शालत इति स तथा तेन बलेन प्रलम्बं घातयित्वा व्रजपशूनमोचयन्मोचयामास । गोपांश्चारण्यवह्नितो वनानलात् । ल्यब्लोपनिमित्तेयं पञ्चमी । अरण्यवन्हिमापीयामोचयत्तस्मादमोचयदिति वा ॥ ११ ॥

सुमनोरञ्जनी — अरण्यवह्नितः दावाग्नेः ॥ ११ ॥

आशीविषं महारौद्रं दमित्वा विमदं ह्रदात् ।
प्रसह्योद्वास्य यमुनां चक्रेऽसौ निर्विषोदकाम् ॥ १२ ॥

सत्यधर्मीया — विमदं ह्रदात्प्रसह्योद्वास्य निष्कास्य निर्विषोदकां यमुनामसौ चकार चक्रे ॥१२॥

सुमनोरञ्जनी — महारौद्रं अतिक्रूरम् । विमदं विषमदवन्तं दमित्वा निगृह्य । प्रसह्य बलात्कारेण । ह्रदात् उद्वास्य निष्कास्य ॥ १२ ॥

दुस्त्यजश्चानुरागोऽस्मिन् सर्वेषां नो व्रजौकसाम् ।
नन्द ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथम् ॥ १३ ॥

सत्यधर्मीया — परस्परमेवं विचार्य नन्दं प्रति पप्रच्छुः ॥ दुस्त्यज इति । हे नन्द! वनौकसां नोऽस्माकं तेऽस्मिंस्तनये दुस्त्यजस्त्यक्तुमशक्योऽनुरागः स्नेहः कथं जातस्तथाऽस्मासु तस्य कृष्णस्यापि स कथम् । न च स यादृच्छिक इत्याहुः ॥ औत्पत्तिक आजनीन इति । नन्दत इत्यत्र त इत्यन्वयः ॥ १३ ॥

सुमनोरञ्जनी — हे नन्द ! अस्मिन् ते तनये श्रीकृष्णे । नः अस्माकं अनुरागः स्नेहः दुस्त्यजः। तस्यापि त्वत्तनयस्यापि । अस्मासु अनुरागः औत्पत्तिकोऽस्ति । तदेतद्द्वयं कथम् ॥ १३ ॥

क्व सप्तहायनो बालः क्व महाद्रिविधारणम् ।
ततो नो जायते शङ्का व्रजनाथ तवात्मजे ॥ १४ ॥

सत्यधर्मीया — क्रमतो व्युत्क्रमतश्च सङ्गृह्येक्त्वा पुनरतिसन्निहितं तद्विहितमुक्त्वा सम्पुटीकुर्वन्ति ॥ क्वेति । क्व सप्तहायनो बालो महाद्रेर्गोवर्धनस्योद्धरणं क्व । हे व्रजनाथ । तवात्मजे नः शङ्का संशयो जायतेऽतो ''न तद्वीर्यविद'' इति प्रागुदीरितमुज्जीवितम् ॥ १४ ॥

सुमनोरञ्जनी — पुनरप्यतिविस्मिताः उक्तमेवाहुः ॥ क्वेति । ततः अत्यद्भुतकार्यकरणात् । तवात्मजे शंका संशयो जायते । तवात्मजत्वविषये संशयो भवतीति भावः ॥ १४ ॥

नन्द उवाच -

श्रूयतां मे वचो गोपा व्येतु शङ्का च वोऽर्भके ।
एनं कुमारमुद्दिश्य गर्गो मे यदुवाच ह ॥ १५ ॥

सत्यधर्मीया — एवं गोविन्दविषये सन्दिग्धबुद्धीन्गोपान्प्रति स्वेन यद्गर्गेण श्रुतं तन्नन्द उपदिशतीत्याह ॥ नन्द इति । हे गोपाः । मे तद्वचः श्रूयताम् । वोऽर्भके मत्पुत्रविषये शङ्का व्येतु गच्छतु । एनं कुमारमुद्दिश्य गर्गः पुरोधा यदुवाच । हेत्यनेन तद्वचनान्यथात्वप्रसिद्धिं सूचयति । प्रत्यारम्भे प्रसिद्धौ हेति यादवः ॥ १५ ॥

सुमनोरञ्जनी — एवमुक्तो नन्दः प्राप्तगर्गोक्तस्मृतिः प्रत्याहेत्याह ॥ नन्द इति । हे गोपाः! अर्भके या शङ्का सा व्येतु अपगच्छतु । यत् यस्मात् एनं कृष्णाख्यं कुमारम् उद्दिश्य अधिकृत्य गर्गो मे मां प्रति उवाच तस्मात् ॥ १५ ॥

वर्णास्त्रयः किलास्यासन् गृह्णतोऽनुयुगं तनूः ।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ १६ ॥

सत्यधर्मीया — तमेव श्लोकनिकायमनुवदति ॥ वर्णा इति । व्याख्यातचराः श्लोकाः ॥१६-१८॥

सुमनोरञ्जनी — किमुवाचेति तदाह ॥ वर्णा इति । एतच्छ्लोकसप्तकं पूर्वं व्याख्यातमेवातो लेशतो विव्रीयते । शुक्लो रक्तः पीत इति वर्णा आसन् अभवन् ॥ १६ ॥

प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ।
वासुदेव इति श्रीमानभिज्ञाः सम्प्रचक्षते ॥ १७ ॥

सुमनोरञ्जनी — वसुदेवस्य सकाशात् क्वचित् देवक्याम् ॥ १७ ॥

बहूनि सन्ति नामानि रूपाणि च सुतस्य ते ।
गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥ १८ ॥

सुमनोरञ्जनी — गुणान् कर्माणि चानुरूपयन्ति ज्ञापयन्तीति तथा ॥ १८ ॥

एष वः श्रेय आधास्यद् गोपगोकुलनन्दनः ।
अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथ ॥ १९ ॥

सत्यधर्मीया — यदि यूयमस्मिन्भक्तिमकरिष्यंस्तर्ह्ययं वः श्रेयोऽधास्यत् । लिङ्निमित्ते लृङ्क्रियातिपत्ताविति विध्यर्थता ॥ १९ ॥

सुमनोरञ्जनी — गोपान् गोकुलं च नन्दयतीति तथोक्तः । गोपेति गर्गकृतसम्बोधनं वा । आधास्यत् आधास्यति ॥ १९ ॥

पुराऽनेन व्रजपते! साधवो दस्युपीडिताः ।
अराजकेऽरक्ष्यमाणा जिग्युर्दस्यून् समेधिताः ॥ २० ॥

सत्यधर्मीया — पुरा पृथुत्वदशायाम् ॥ २० ॥

सुमनोरञ्जनी — अनेन समेधिताः सन्तो दस्यून् जिग्युरित्यन्वयः ॥ २० ॥

य एतस्मिन् महाभागाः प्रीतिं कुर्वन्ति मानवाः ।
नारयोऽभिभवन्त्येतान् विष्णुपक्षानिवासुराः ॥ २१ ॥

सत्यधर्मीया — दृष्टान्तमन्यमनाचक्षाणो गर्ग एवमाहेत्याह ॥ विष्णुपक्षानिति ॥ २१ ॥

सुमनोरञ्जनी — एतान् अरयो नाभिभवन्ति ॥ २१ ॥

तस्मान्नन्द कुमारोऽयं नारायणसमो गुणैः ।
श्रिया कीर्त्याऽनुभावेन तत्कर्मसु न विस्मयः ॥ २२ ॥

सत्यधर्मीया — तत्कर्मसु कृष्णकृतकर्मचरितेषु विस्मयो न कार्यः ॥ २२ ॥

सुमनोरञ्जनी — अतः तत्कर्मसु तेन क्रियमाणकर्मसु विस्मयो न कार्य इत्येतद्देहलीदीपन्यायेनोभयत्र संबध्यते । इति उवाचेति । इति समादिश्येति ॥ २२,२३ ॥

इत्यद्धा मां समादिश्य गर्गे च स्वगृहं गते ।
मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिणम् ॥ २३ ॥

श्रीशुक उवाच -

इति नन्दवचः श्रुत्वा गर्गगीतं व्रजौकसः ।
दृष्टश्रुतानुभावास्ते कृष्णस्यामिततेजसः ।
मुदिता नन्दमानर्चुः कृष्णं च गतविस्मयाः ॥ २४ ॥

सत्यधर्मीया — मन्य इति साक्षान्नन्दवचः । नन्दम्, एतादृशो नन्दनस्तवेत्यानर्चुः पूजयामासुः। गतविस्मया नारायणश्चेत्सर्वं सम्भावितमिति गतविस्मयाः कृष्णं चानर्चुः ॥ २३-२४ ॥

सुमनोरञ्जनी — दृष्टोऽनुभावः गोवर्धनोद्धरणादिः श्रुतः पुराऽनेनेत्यादिना, अनुभावो माहात्म्यं यस्य । षष्ठी द्वितीयार्थे । तद्विषयकं नन्दस्य वचः श्रुत्वा मुदिताः सन्तः नन्दं कृष्णं आनर्चुः पूजयामासुः ॥ २४ ॥

देवे वर्षति यज्ञविप्लवरुषा वज्राश्मवर्षानिलैः
सीदद्बालपशुस्त्रि याऽऽत्मशरणं दृष्ट्वाऽनुकम्प्युत्स्मयः ।
उत्कृत्यैककरेण शैलमबलो लीलोच्छिलीध्रं यथा
बिभ्रद् गोष्ठमपान्महेन्द्रमदभित् प्रीयान्न इन्द्रो गवाम् ॥ २५ ॥

इति श्रीमद्भागवते दशमस्कन्धे चतुर्विंशोऽध्यायः ॥

सत्यधर्मीया — निरन्तरहरिचरितसमीरणपरवशचेताः शुको बाललीलेदमवधिरिति मङ्गलं तन्वन्सर्वमङ्गलापतिस्वांशिसदाशिवः सुतां गृहीत्वोद्दधार धरं किञ्च कैलासगिर्यगारश्चेति किञ्चिदनुबन्धेन सपरिकरमिमं गिर्युद्धरणपराक्रममनुवर्ण्य श्रीकृष्णो गोगोपानिव नः पायादपायादिति प्रार्थयते ॥ देव इति । यज्ञस्य विप्लवो भङ्गस्तज्जनिता च सा रुट् च रोषश्च तया । देवे मघोनि वर्षति सति वज्राश्मवददार्यदृषद्वद्विद्यमानं च तद्वर्षं तथाऽनिला वायवश्च तैः । सीदन्तश्च सीदन्त्यश्च कम्पमाना बालाः पशवश्च स्त्रियश्च यस्मिंस्तत् । परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति स्मरणात् । विशेषस्तु अधिकारश्च तद्धानिः प्रसङ्गादेव चिन्तितावित्यनुव्याख्यानव्याख्यासुधादितो बोध्यः । स्त्रियात्मेत्यत्राधिकारिवर्जितं च स्त्रियात्मादिकम् । त्रियाद्यवयवात्मिकामितिवद्यणागमः । यद्वा या रमाया आत्मा स्वाम्ययं शरणं यस्य तत् । लक्ष्मीराकार उच्यत इति विश्वः । गोष्ठं दृष्ट्वाऽनुकम्पी शिखादिः । अनुकम्पा हि हृदयद्रवणं साऽस्यास्तीति सः । भक्तानुकम्पादतिशुद्धसंविद्धाऽत्र इत्यनुव्याख्याव्याख्यासुधायामनुकम्पादनुक्रोशादित्युक्तेरकारान्तोऽनुकम्पशब्दः । ततश्चात इती निठनावितीन्वा । हृदयस्य द्रवीभावस्त्वनुकम्पेति कथ्यते । उपकारं कर्तुमिच्छा कृपेत्याहुर्मनीषिण इति शब्दनिर्णय इति चतुर्थतात्पर्योक्तेः । उत्स्मय उत्कृष्टहासः । एककरेण शैलं गोवर्धनं यथाऽबलः बालो लीलोच्छिलीध्रं छत्राकं वा, उत्कृष्टं कदलीपुष्पं वा धरति तथोत्पाट्य । अधिपुरन्ध्रिशिलीध्रसुगन्धिभिरिति

माघव्याख्यायां शिलीध्राणां कदलीकुसुमानाम् । कदल्यां तु शिलीध्रं स्यादिति शब्दार्णव इत्युक्तेः । उत्कृत्य बिभ्रदेककरेणेत्यत्रान्वेति । अपादपीपलदिति । महेन्द्रस्य मदोऽहन्ता तं भिनत्तीति स तथा । गवामिन्द्रः, इदानीं गवां वेदादिवाचामिन्द्रः प्रतिपाद्यतयेति नः पायात् । वेदादिप्रतिपत्तिदोऽपि सन्नः पायादिति प्रकृतव्याकरणाननुगुणं प्रार्थनमिति मन्तव्यम् ॥२५॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे चतुर्विंशोऽध्यायः ॥ १०-२४ ॥

सुमनोरञ्जनी — श्रीशुकः गोवर्धनोद्धरणादिस्मरणेन जातसंभ्रमः स्तौति ॥ देव इति । यज्ञस्य महेन्द्रयागस्य विप्लवेन भङ्गेन या रुट् तया । देवे इन्द्रे वर्षति सति । वज्रैः अशनिभिः अश्मभिः वर्षोपलैः अनिलैः वायुभिश्च । सीदन्तः बालाः पशवः स्त्रियश्च यस्मिन् तत् सीदद्बालपशुस्त्रि । आत्मनः शरणं गृहरूपं गोष्ठम् । आत्मैव शरणं रक्षको यस्य तदिति वा । दृष्ट्वा अनुकंपी सन् उत्स्मयन् उत्कृष्टं स्मयन् । अबलो बालः लीलार्थं उच्छिलीन्ध्रं छत्राकं यथा तथा शैलं उत्पाट्य । एकेन करेण बिभ्रत् सन् गोष्ठं अपात् ररक्ष । सः, महेन्द्रस्य मदं भिनत्तीति तथोक्तः । गवां इन्द्रः गोविन्दः नः अस्माकं प्रीयादित्यन्वयः ॥ २६ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां चतुर्विंशोऽध्यायः ॥ १०-२४ ॥

॥ अथ पञ्चविंशोऽध्यायः ॥

श्रीशुक उवाच -

गोवर्धने धृते शैले आसाराद् रक्षिते व्रजे ।
गोलोकादाव्रजत् कृष्णं सुरभिः शक्र एव च ॥ १ ॥

सत्यधर्मीया — अत्यल्पस्त्वसुरावेश इत्युक्तासुरावेशवशकार्यं शचीशस्य निरूप्याधुना तस्मिन्नप्युसुरावेशे गते प्रकृतिरेव त्वित्यन्तशः शंसितसुत्रामा किं तत्राकरोदनन्तरं वारिदवारणं कृत्वा वारणेन्द्रग इति परीक्षकपरीक्षिन्मानसीं शङ्कामपाकुर्वन्हरौ निरन्तररतिर्मुक्तिसाधनमिति बोधयत्यध्याये ।

तत्रादौ सुरभ्याः सुरर्षभस्यागमनादागमनमवगमयति शुक इति कथयति ॥ श्रीशुक इति । गोवर्धने शैले धृते सति । आसारात्स्वाज्ञया पयोमुङ्मुक्ताद्धारासम्पाताद्व्रजे येन रक्षिते सति गोलोकात्स्वर्गलोकात् । गोः स्वर्गवज्राम्बुभूमिष्विति विश्वः । गोरित्येतेन पूर्तेर्यद्गोलोकादित्यूचे तेन को वाऽवादीदासारासारतामिव व्रजरक्षणं चेत्यतः स्वस्य गोभिः सर्वनेत्रैर्लोकोऽवलोकस्तस्मादित्यबोधयदर्थमिति तात्पर्यमवधेयम् । दृष्टानुभाव इत्युत्तरस्वारस्यं चैवं सति भविष्यतीति ज्ञेयम् । आचार्या अपि सहस्रगुरुगाधगुमग्ग्रादिति सूचितवन्तः । सुरभिः कामधेनुः शक्रः पृथक् पृथगन्वयः । इन्द्रादपि सुरभिपुरस्कृतिरधुना मधुनाथस्य तत्पतित्वं निमित्तीकृत्येति ज्ञेयम् । गवां लोको हि गोलोको गोनिवासस्थानं तस्मात्सुरभिरित्यप्यर्थः । स च स्वर्गोपरितनः । यथोक्तं भारत आनुशासनिके । सुरभिरुवाच ।

वरेण भगवन्मह्यं कृतो लोकः पितामह ।
एष एव वरो मेऽद्य यत्प्रीतोऽस्मि तवानघ ।

ब्रह्मोवाच—

त्रयाणामपि लोकानामुपरिष्टान्न वत्स्यसि ।
मत्प्रसादाच्च गोलोको विख्यातः स भविष्यति ।

निवत्स्यन्ति महाभागे सर्वा दुहितरश्च त इत्यारभ्याष्टाशीतितमाध्यायसमाप्तिपर्यन्तमिन्द्रं प्रति ब्रह्मवाण्याम् । न च "स्वर्गादूर्ध्वं ब्रह्मलोको ब्रह्मर्षिगणसेवितः । तस्योपरि गवां लोकः" इति हरिवंशवचनविरोधः । त्रयाणामपि लोकानामिति सामान्यवचनस्य विशेषपर्यवसानसम्भवात् । दृग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिषु । भूमौ पशौ च गोशब्दो विद्वद्भिर्दशसु स्मृत इति यादो हलायुधोऽप्येवम् । एवकारेण च योऽसुरावेशत आसारैर्बबाधे समाधेयोऽयं माधव इत्यमा धेनुनागतासुरावेश आव्रजदिति द्योतयति ॥ १ ॥

सुमनोरञ्जनी — एवंविधमहामाहात्म्यप्रदर्शनेन विगतमदेन्द्रसंस्तुत्या सुरभिकृतक्षीराभिषेचनेन च प्रीतमनसः श्रीकृष्णस्येन्द्रं प्रत्यभयदानं निरूप्यतेऽस्मिन्नध्याये । तत्र पश्चात्तप्तस्य शक्रस्य श्रीकृष्णक्षमापनप्रकारमाह ॥ गोवर्धन इति । श्रीकृष्णेन गोवर्धने तन्नामके शैले धृते । व्रजे आसारात् धारासंपातात् रक्षिते सति यः कृतापराधः स एव शक्रः गोलोकात् स्वर्गलोकात् । सुरभिश्च कामधेनुः गोलोकात् तत्संज्ञकस्थानात् आव्रजत् । तत्र सुरभेरागमनं वृष्टिभयात्स्वजातिरक्षणहर्षेणेति ज्ञेयम् । अत एवोक्तं रक्षिते व्रज इति ॥ १ ॥

विविक्त उपसङ्गम्य व्रीडितः कृतहेलनः ।
पस्पर्श पादयोरेनं किरीटेनार्कवर्चसा ॥ २ ॥

सत्यधर्मीया — कृतहेलनः कृतं हेलनमनादरो येन स तथेति व्रीडितो लज्जितः । विविक्ते एकान्ते । विजिर् पृथग्भावे क्तः । विचिर् विवेचन इत्यतो वा क्तः । विविक्तौ पूतविजनावित्यमरः । विविक्तं त्रिष्वसम्पृक्तरहःपूजाविवेकिष्विति भानुः । एनं कृष्णमुपसङ्गम्यार्कवर्चसा किरीटेन पादयोः पस्पर्श ॥ २ ॥

सुमनोरञ्जनी — विविक्ते एकान्ते । तत्र हेतुः व्रीडित इति । कुतः । कृतं हेलनं अवज्ञानं यस्य सः । पस्पर्श नमश्चकारेति यावत् ॥ २ ॥

दृष्टश्रुतानुभावोऽस्य कृष्णस्यामिततेजसः ।
नष्टत्रिलोकेशमद इदमाह कृताञ्जलिः ॥ ३ ॥

सत्यधर्मीया — अमिततेजसः कृष्णस्य । इदानीं दृष्टः प्राक् श्रुतश्चानुभावो येन सः । नष्टः, त्रिलोकेश इति मदोऽहन्ता यस्य सः । तस्मिन्नप्यसुरावेशे गते इति तात्पर्यभूमिकेदं विशेषणमिति मन्तव्यम् । कृताञ्जलिर्बलाहकशृङ्खलामोचनस्य करकार्यत्वाद्वाऽऽज्ञायाश्च जिह्वाकार्यत्वात्कृताञ्जलिरिदमाहेत्युक्तिरिव नष्टत्रिलोकेशमद इत्यहङ्कारस्य मनःप्रभेदत्वात्तच्छुद्ध्युक्तिरिति मन्तव्यम् ॥ ३ ॥

सुमनोरञ्जनी — अस्य श्रीकृष्णस्य । इदानीं दृष्टः पूर्वं श्रुतः अनुभावो येन सः । नष्टः, अहं त्रिलोकेश इति मदो यस्य सः ॥ ३ ॥

इन्द्र उवाच -

विशुद्धसत्त्वं तव धाम शान्तं तपोमयं ध्वस्तरजस्तमस्कम् ।
मायामयोऽयं गुणसम्प्रवाहो न विद्यते तेऽग्रहणानुबन्धः ॥ ४ ॥

तात्पर्यम् - विशुद्धसत्वं विगतशुद्धसत्वम् । यस्मात्त्रिगुणसम्बन्धस्त्वयि न विद्यते । यत्राग्रहणमनुबद्धम् । तपोमयं ज्ञानात्मकम् ॥ ४ ॥

सत्यधर्मीया — विशुद्धसत्त्वमिति श्लोके धाम भगवद्देहं शुद्धसत्त्वात्मकमत एव प्रकृतिविकृतं तथा तपोमयं कृच्छ्रचान्द्रायणादिप्राप्यमिति च प्रतीयते । तथा गुणसम्प्रवाहः सत्त्वगुणकार्यप्रवाहो न पारमार्थिको मायामय इति ग्रहणानुबन्धः । ज्ञानं ग्रहणं तेनानुबद्ध्यते सम्बध्यते विषयीक्रियत इति यावत् । ततः प्रपञ्चः प्रातीतिको मिथ्याभूत एवेति प्रतीयत इत्यतस्तत्तात्पर्यार्थमाह ॥

विशुद्धसत्त्वमित्यादिना । यस्मात्त्रिगुणसम्बन्ध इत्यत्रत्यत्रिगुणपदयोर्विशेषणसमासः । त्रयश्च ते गुणाश्च तेषां सम्बन्धस्त्वयि न विद्यते । विगतं शुद्धं रजस्तमोसंवलितं सत्त्वं गुणो यस्मिन्निति विग्रहः सूचितः । मूले त इति षष्ठी सप्तम्यर्थ इति सूचितं त्वयीति । सम्बन्धेति सम्प्रवाहपदप्रतिरूपम् । ते ग्रहणानुबन्ध इत्यत्र न ग्रहणमिति पदमपि त्वकारप्रश्लेषेणेत्याह ॥ यत्राग्रहणमनुबद्धमिति । अग्रहणमज्ञानं यत्र मायामये गुणसम्प्रवाहेऽनुबद्धं सम्बद्धं तपोमयं ज्ञानात्मकम् । तप आलोचन इति स्मृतेः ॥ ततश्चायं श्लोकार्थः ॥ हे देव! तव धाम स्वरूपं देहो वा । तेजः शक्तिः स्वरूपं च गृहं धामेति चोच्यत इति चतुर्थतात्पर्योक्तेः । धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोरिति विश्वः । विशुद्धसत्त्वं शुद्धं रजस्तमोऽमिश्रं सत्त्वं गुणस्तद्रहितम् । आन्तरङ्गिको भावश्च सत्त्वं सद्गुणरूपत इति बृहद्भाष्ये सदा सर्वगुढ्यत्वात्सत्त्वो हरिरुदीर्यत इति कापिलेय इति तृतीयतात्पर्ये चोक्तेः सकलगुणमित्यपि ज्ञेयः । शान्तं बहिः कृतस्वापराधः क्षन्तव्य इति समाधाननिधानमिति, अन्तस्त्वस्मदादिसुखनिर्णायकं मङ्गलरूपं वा । शान्तिः प्रशममङ्गल इत्यभिधानम् । तपोमयं ज्ञानात्मकम् । यद्यपि सत्त्वस्यैव यदा नावकाशः काऽऽशा रजस्तमसोः सत्ताशङ्कायामिति तन्न वक्तव्यम् । तथाऽपि मन्दानुजिघृक्षयाऽऽह ॥ ध्वस्तरजस्तमस्कमिति । ध्वस्तेऽत्यन्तासती रजस्तमसी येन तत् । यद्वा ध्वस्ते रजस्तमसी प्रचुरस्वकार्याजनके यस्य स को ब्रह्मा येन तदिति । शुद्धसत्त्वश्चतुर्मुख इत्युक्तेः । प्रथमेऽसौ पदादाविति सत्त्वं द्वितीये करकादिः । मायामयो माया त्वत्प्रज्ञा सैव मयं प्रधानं निमित्तमिति यावत् यस्य सः । मायेति ज्ञप्तिरुदिष्टा, मयं प्रधानमुद्दिष्टमिति बृहद्भाष्योक्तेः । गुणसम्प्रवाहस्तत्सम्बन्धोऽयं ते त्वयि न विद्यते सन्नेत्यर्थः । यस्मात्तस्मात्तव धाम तथा गुणसम्प्रवाह अग्रहणानुबन्धोऽग्रहणमज्ञानं तस्यानुबन्धः सम्बन्धो जनकतारूपो यस्य सः । एतेन कार्यमज्ञानं नास्ति ततो नियमेन तज्जनको गुणसम्प्रवाहो नास्तीत्युच्यत इति सूचयति ॥ ४ ॥

सुमनोरञ्जनी — किमित्याहेति तत्राह ॥ विशुद्धेति । तव धाम स्वरूपम् । कीदृशम् । शान्तं सुखपूर्णम् । तपः ज्ञानात्मकम् । तदुक्तं तपोमयं ज्ञानात्मकमिति । विशुद्धसत्वं विगतशुद्धसत्वगुणम् । वि निषेधे पृथग्भाव इति वचनात् । अत एव ध्वस्तरजस्तमस्कम् । ध्वस्ते दूरीकृते रजस्तमसी येन तम् । त्रिगुणसम्बन्धशून्यमित्यर्थः । यस्मात्त्रिगुणसम्बन्धः त्वयि न विद्यते तस्मात् । अयं मायामयः त्वदिच्छानिर्मितः । गुणानां सत्वादीनां संप्रवाहः कार्यभूतः संसारः त्वयि न विद्यते । यस्मात्त्वं तपोमयः अतोऽपि त्वयि गुणसंप्रवाहो न विद्यत इत्यभिप्रेत्य गुणसंप्रवाहरूपं संसारं विशिनष्टि ॥ अग्रहणेति । अग्रहणमनुबन्धो निमित्तं यस्य सः । ज्ञानात्मके त्वय्यज्ञाननिमित्तः संसारः कथंकारं स्यादिति भावः । तदेतत्सर्वमाकूतमाविष्कृतमाचार्यचरणैः । विशुद्धसत्वं विगतशुद्धसत्वं यस्मात्त्रिगुणसम्बन्धः त्वयि न विद्यते । यत्र अग्रहणं अनुबन्धः तपोमयं ज्ञानात्मकमिति ।

विशुद्धसत्वात्मकमिति भ्रमनिरासाय व्याख्यातम् ।। विगतेति । वि निषेधे पृथग्भाव इति वचनात् । पूर्वोत्तरार्धयोर्हेतुहेतुमद्भावं प्रदर्शयति ।। यस्मादिति । षष्ठीतत्पुरुषभ्रमं निवारयति ।। अग्रहणानुबन्ध इति पदं विगृण्हाति ।। यत्रेति । तपःशब्दस्यालोचनार्थतां निराह ।। ज्ञानात्मकमिति । मयटः तादात्म्यार्थत्वात् पूर्वार्धगततपोमयशब्दमुत्तरार्धगताग्रहणानुबन्धपदसान्निध्येन व्याकुर्वद्भिस्तपोमयत्वा-त्त्वय्यज्ञाननिमित्तसंसारो न संभवतीति हेतुहेतुमद्भावः सूचितो भवति ।। ४ ।।

कुतो नु तद्धेतव ईश मन्युलोभादयो येऽबुधलिङ्गभावाः ।
अथापि दण्डं भगवान् बिभर्ति धर्मस्य गुप्त्यै खलनिग्रहाय ।। ५ ।।

तात्पर्यम् – पुनर्गुणसंप्रवाहस्य कारणत्वात्तद्धेतवः ।। ५ ।।

सत्यधर्मीया — कुतो नु तद्धेतव इति श्लोके तत्पदार्थो गुणसम्प्रवाहश्चेन्मन्व्यादीनां तं प्रत्यहेतुत्वात्तथा स गुणसम्प्रवाह एव हेतुः साक्षान्न तान्प्रतीति तच्छब्दार्थानुसङ्कटये स्वयं तदर्थमाह ।। पुनर्गुणसम्प्रवाहस्य कारणत्वात्तद्धेतव इति । गुणसम्प्रवाहो हि द्वयीं गतिमवलम्बते महत्तत्त्वादिकारणीभूतमूलसत्त्वादिगुणसम्प्रवाह एकोऽवान्तरश्चापर इति । पुनरप्रथमे प्रश्ने व्यावृत्तावधारण इत्युक्तेः । पुनर्गुणसम्प्रवाह इति पदमेकम् । पुनर्गुणसम्प्रवाहोऽप्रथमो द्वितीयोऽवान्तर इति । तस्य कारणत्वान्मन्व्यादीन्प्रतीति शेषः । तथा च सोऽवान्तरगुणसम्प्रवाहो हेतुर्येषामिति विग्रहः सूचितो भवति ।। ततश्चायं मूलार्थः ।। ननु गुणसम्प्रवाहो मयि नास्तीति शक्यते वक्तुम् । तत्कार्यकोपादेस्त्वदनुभवसिद्धस्यापलपितुमशक्यत्वादित्यतो न ते तत्कृताः किन्तु धर्मादिरक्षणायैव शिक्षणाय दुरात्मनां स्वेच्छा प्रदर्शिता इत्याह ।। कुत इति । हे ईश! तद्धेतवोऽवान्तरगुणसम्प्रवाहकारणका येऽबुधलिङ्गभावा अबुधानामज्ञानां लिङ्गभावो लिङ्गत्वं येषां तेऽज्ञानिचिह्नभूता मन्युलोभादयः स्वकारणगुणसम्प्रवाहस्याभावादेव कुतस्तद्धेतवः स्युर्नु निश्चयः । सोऽवान्तरगुणसम्प्रवाहो हेतुर्येषां त इति विग्रहान्वयौ ज्ञेयौ । अथापि शास्त्रविहितस्या-दोषावहत्वाद्भवान्भगवान्दण्डं वाचोपदेशरूपं सतां मध्यमानां तर्जनादिरूपमधमानां हिंसारूपं बिभर्ति। दण्डोऽस्त्री शासने राज्ञां हिंसायां लकुटे गुण इति यादवः । धर्मस्य गुप्त्यै रक्षायै मध्यमानामुभयरूपाणां धर्मस्य गुप्त्यै उत्तमेष्विवाप्रकाश्यत्वाद्गोपनाय खलानां निग्रहाय संहाराय । वस्तुतस्तु पुनर्गुणसम्प्रवाहस्येति कर्मणि षष्ठी । मन्व्यादीनामिति शेषः । आदौ गुणसम्प्रवाहस्तेन मन्व्यादयस्तैश्च पुनर्गुणसम्प्रवाह इति तेषां पुनर्गुणसम्प्रवाहकारणत्वसम्भवात् । पक्षममुं पुनः-शब्दव्यासनिर्देशावुपोद्बलयत इति ज्ञेयम् । मूले तु तद्धेतव इत्यत्र तस्य हेतव इति विग्रहो ज्ञेयः ।।५।।

सुमनोरञ्जनी — यदा गुणसंप्रवाहो नास्ति तदा एतस्य गुणसंप्रवाहस्य हेतुभूताः मन्युलोभादयो दोषाः कुतः स्युः । न सन्तीति भावः । कार्याभावेन कारणाभावानुमानात् । इतश्च न सन्तीत्याह ॥ अबुधेति । यस्माद्ये मन्युलोभादयोऽबुधस्य अज्ञानिनः लिङ्गभावाः चिह्नभूताः अतोऽपि त्वयि ज्ञानात्मके न सन्तीति । अथापि भगवान् भवान् खलनिग्रहाय यत् दण्डं बिभर्ति तत् धर्मस्य गुप्त्यै रक्षणायैव न मन्युनेति भावः । अत्र तद्धेतव इति यन्मन्युलोभादेः संसारहेतुत्वमुक्तं तदयुक्तम् । मन्युलोभादेः शरीरसंबन्धाख्यसंसारानन्तरभावित्वेन तदयोगादित्याशङ्कां परिहर्तुमाहुराचार्याः । पुनर्गुणसंप्रवाहस्य कारणत्वात्तद्धेतव इति । तेषां संसारप्राप्त्यनन्तरभावित्वेऽपि पुनरुत्तरभाविगुण-संप्रवाहरूपसंसारं प्रति कारणत्वाद्युक्तं तद्धेतुत्वमिति भावः ॥ ५ ॥

पिता गुरुस्त्वं जगतामधीशो दुरत्ययः काल उपात्तदण्डः ।
हिताय चेच्छातनुभिः समीहसे मानं विधुन्वन् जगदीशमानिनाम् ॥ ६ ॥

तात्पर्यम् – 'असतां च सतां चैव हरिरेवानुशासकः । सतां तु श्रेयसे सैव ह्यनुशास्तिर्भविष्यति । असतां विपरीताय लङ्घयित्वाऽनुशासनमि'त्याग्नेये ॥ ६ ॥

सत्यधर्मीया — हिताय चेच्छातनुभिर्जगदीशमानिनामिति तत्सामान्यविहितता तथा मानविधूननं च प्रतीयते । ते च मानिनः सन्तोऽसन्तः सदसन्तश्चेति भिन्नाः । तेषां ते कथं युक्ते इत्यतो मानेनाधिकारिणो विविच्य तद्योग्यं फलं लपति ॥ असतां चेति । यद्यपि भावप्रतीत्यधीनाऽभावप्रतीतिर्नियमेनेत्युक्तेः सतामसतामिति वक्तव्यम् । तथाऽपि तेषां भूयस्त्वात्किञ्च सतामपि तदावेशवशाशुभशासनीयताघटककार्यकारितायास्तत्पुरस्कृतिरिरिति मन्तव्यम् । असतां सतामसतां सतां चेति मध्यमानां च । नित्यानित्यं त्रिधा प्रोक्तमित्यादिवद्धरिरेवानुशासकः । हरेरनुशास्तिः सतां श्रेयसे भाविमङ्गलाय । चान्मध्यमानामनुबन्धनाय च भविष्यति । अन्वाश्रये बन्धने मोक्ष इति विश्वः । असतां विपरीताय तम आद्यनर्थाय । तत्र तन्त्रम् ॥ अनुशासनं लङ्घयित्वा स्थितानामिति । लङ्घयित्वा तत्तत्कर्मानुसारेण लङ्घनं कारयित्वा । सैव शास्तिर्विपरीताय भविष्यतीति वा ॥ अथ मूलार्थः ॥ सर्वोपाधिभिः सर्वानुशासिता त्वमेव तत्त्वत इति विज्ञापयति ॥ पितेति । पिता जनकः । गुरुः शास्त्रोपदेष्टा, जगतामधीशो निरवधिकमधिक इति दुरत्ययो दुःसाधस्वातिक्रमः कालः पुण्यपापफलपाचक इति तद्रूपी । उपात्तदण्डो गृहीतशासनः । हिताय सतां, चात्सदसतां हिताहितफलायेच्छातनुभिः स्वेच्छोपात्तशरीरैर्जगदीशा वयं तदात्मका इति मानिनामसतां मानं मदं विधुन्वंस्तमसि तान्क्षिपंश्च समीहसे चेष्टसे । अमानं यथा तथा हिताय जगदीशमानिनां, तान्विधुन्वन्निति वा गतम् । गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनाम् । इह प्रच्छन्नपापानां

शास्ता वैवस्वतो यम इत्यादिकं त्ववान्तरत्वदाज्ञाकारिशासयितृविषयमिति न विरुणद्धीति हृदयम् ॥ ६ ॥

सुमनोरञ्जनी — किञ्च त्वया कृतमनुशासनं सतां हितायैव खलानामेव निग्रहरूपमिति भावेनाह ॥ पितेति । त्वं जगतः पिता जनकः । गुरुः ज्ञानप्रदः । अधीशो नियामकः । दुरत्ययः । काले संहारकाले उपात्तः स्वीकृतः दण्डो येन सः संहर्तेति यावत् । यद्वा दुरत्ययः कालः संहारकः । स त्वं इच्छातनुभिः स्वेच्छागृहीतावताररूपैः जगदीशाः वयमिति मानिनाम् । जगदीशेति सम्बोधनं वा । मानं गर्वं विधुन्वन् परिहरन् यत्समीहसे चेष्टाङ्करोषि तत्सतां हितायैव भवतीति शेषः ॥ ६ ॥

येऽस्मद्विधाः स्युर्जगदीश मानिन-
स्त्वां वीक्ष्य कालेऽभयमाशु तं मदम् ।
हित्वाऽऽर्यमार्गं प्रभजन्त्यपस्मया-
ईहा खलानामपि तेऽनुशासनम् ॥ ७ ॥

सत्यधर्मीया — त्वं किमध्यस्य इत्यत आह ॥ येऽस्मद्विधा इति । जगदीशमानिन इति वा खण्डं वा पदम् । कालेऽसुरावेशकाले । काले तदनाविर्भावसमये च जगदीशमानिनोऽभयं त्वां वीक्ष्येति यथाक्रममन्वयो ज्ञेयः । तं मदं हित्वाऽऽर्यमार्गमपस्मया गतगर्वाः । प्रभजन्ति । खलानामसतामपि । तवेहा चेष्टाऽनुशासनं शिक्षात्मिकैव नास्मद्वदार्यमार्गभजनं तेषामिति भावः ॥७॥

सुमनोरञ्जनी — कथं हितायेत्यत आह ॥ य इति । यतः ये मद्विधाः जगदीशमानिनस्ते काले असुरावेशनिर्मोकसमये । अभयं त्वा वीक्ष्य । तन्मदं असुरावेशजं मदं हित्वा । अपस्मयाः सन्तो अपगतगर्वाः सन्तः आर्याणां ज्ञानिनां मार्गं त्वच्चरणारविंदैकभक्तिरूपम् । प्रभजन्ति । अतस्तत् हितायैवेति पूर्वेण सम्बन्धः । खलानामपि खलानां तु त्वत्समीहितमनुशासनं दण्डरूपमिति भावः । तदुक्तमाचार्यचरणैः ।

असतां च सतां चैव हरिरेवानुशासकः ।
सतां च श्रेयसे सैव ह्यनुशास्तिर्भविष्यति ।
असतां विपरीताय लंघयित्वाऽनुशासनम् । इति ।

सैव भगवतैवानुशास्तिः सतां श्रेयसे भवति । अनुशासनं लङ्घयित्वा उल्लङ्घ्य स्थितानां विपरीताय अश्रेयसे भवतीत्यर्थः ॥ ७ ॥

स त्वं ममैश्वर्यमदप्लुतस्य कृतागसस्तेऽविदुषः प्रभावम् ।
क्षन्तुं प्रभोऽथार्हसि मूढचेतसो मैवं पुनर्भून्मतिरीश मेऽसती ॥ ८ ॥

सत्यधर्मीया — इतःपरं परमपुरुष! त्वया विधेयं विनेयोपरि दयेदमिति प्रार्थयते ॥ स इति । ऐश्वर्यमदप्लुतस्य तन्मदपारगस्याद्भिः प्लुतोऽप्लुतो ममाप्लुतो मदल्पुत ऐश्वर्येणाभिमानिकेन मदप्लुतस्तस्य ते, कृतागसो मम ते प्रभावं चाविदुषोऽज्ञस्य कृतागसोऽनुष्ठितापराधस्य क्षन्तुमाग इति शेषः । अर्हसि । अथ हे प्रभो ईश श्रीश देव इह मूढचेतसो मेऽसत्यमङ्गला मतिः पुनर्मैवं भूत् । न माङ्योग इति नाडागमः । पृथक् प्रार्थनाविषयत्वान्न मम मेऽविदुषो मूढचेतस इति पुनरुक्तेति मन्तव्यम् ॥८॥

सुमनोरञ्जनी — एवं स्तुत्वा स्वापराधं क्षमापयन् प्रार्थयते ॥ स इति । सः सतां हितकारितया प्रस्तुतः त्वम् । ऐश्वर्यमदेन प्लुतस्य आप्लुतस्य पूर्णस्येति यावत् । अत एव ते प्रभावं अविदुषः ततः एव कृतागसः कृतापराधस्य । मम मां प्रति । क्षन्तुमर्हसि । हे ईश ! मे मम एवं एवंविधाऽसती मतिः पुनर्मा भूरिति ॥ ८ ॥

तवावतारोऽयमधोक्षजेह भुवो भराणामुरुभारजन्मनाम् ।
चमूपतीनामभवाय देव भवाय युष्मच्चरणानुवर्तिनाम् ॥ ९ ॥

सत्यधर्मीया — हे अधोक्षज! इह तवायमवतारो भुवो भूमेरुरुभारजन्मनां बहुभाररूपं जन्म येषां ते तेषां चमूपतीनां सेनानायकानामभवायासत्तायै नाशायेति यावत् तथा भुवोऽभराणामभाररूपाणाम् । अतो न भराणामुरुभारजन्मनामित्यनयोरार्थिकी पुनरुक्तता । युष्मच्चरणानुवर्तिनां सतां चमूपतीना-मित्यत्राप्यन्वेति । तदादीनां भवाय क्षेमायेति यावत् भवति ॥ ९ ॥

सुमनोरञ्जनी — हे अधोक्षज ! अयं तवावतारः भुवः भूमेः भराणां भारभूतानाम् । न केवलं स्वयमेव भारभूतानां किन्तु उरूणां भराणां भारभूतानां जन्म येषां तेषाम् । नात्र भूभारत्वं शरीरगौरवेण किन्तु असह्याचरणवत्त्वेनेति ज्ञेयम् । एवंभूतानां चमूपतीनाम् । अभवाय अक्षेमाय । युष्मच्चरणानुवर्तिनां भवाय क्षेमाय ॥ ९ ॥

नमस्तुभ्यं भगवते पुरुषाय महात्मने ।
वासुदेवाय कृष्णाय सात्वतां पतये नमः ॥ १० ॥

सत्यधर्मीया — वासुदेवाय गतम् । सात्वतां भक्तानामधुना यादवानां वा पतये गतम् ॥ १० ॥
सुमनोरञ्जनी — सात्वतां भक्तानाम् ॥ १० ॥

स्वच्छन्दोपात्तदेहाय विशुद्धज्ञानमूर्तये ।
सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः ॥ ११ ॥

तात्पर्यम् – 'आवेशो वसुदेवादौ देहादानं हरेः स्मृतम् । देहादानं तदन्येषां जन्मेति कवयो विदुः । तथाप्यसुरमोहाय ग्रन्थेषु बहुधैव त्वि'ति पाद्मे ॥ ११ ॥

सत्यधर्मीया — वासुदेवाय स्वच्छन्दोपात्तदेहायेति वसुदेवरेतोविकृतदेहवत्त्वं तथा स्वेच्छोपात्तदेहवत्त्वं चेति विरुद्धं कथमुच्यत इत्यतः प्रमाणेनाविरोधमभिधत्ते ॥ आवेश इति । वसुदेवादौ हरेरावेशः प्रवेशमात्रं देहादानं जन्मेत्युच्यते । तदन्येषां देहादानं नाम जन्म नूतनकर्माधीनतनुप्राप्तिरिति कवयो ज्ञानिनो विदुः । अनेन बहुमहात्मसम्मतोऽयमर्थ इति न सन्देहः कार्य इति बहुवचनकविशब्दाभ्यां सूचयति । ननु वसुदेवादजायत जज्ञे दशरथादित्यादिवचसां का च गतिरित्यत आह ॥ तथाऽपीति । असुरमोहाय तान्वञ्चयितुं ग्रन्थेषु बहुधेयते । तदर्थस्तु नायं गर्भेऽवसद्देव्या नायं दशरथाज्जातो न चापि जमदग्नितः । यदा नृसिंहाकृतिराविरासीत् । प्रादुर्भावो हरेर्जनिरित्यादिना ज्ञातव्यः ॥ ततश्चायं मूलार्थः ॥ स्वच्छन्दोपात्तदेहाय स्वच्छन्देनात्तदेहायेति पाठावेकार्थाविति स्वच्छन्दतः पठनीयौ । स्वच्छन्देनैवोपात्तो देहो यस्य सः । आत्तो देहो येन । कथमित्यतः स्वच्छन्देन स्वेच्छयेति । एतत्सम्भावकमाह ॥ ज्ञानमूर्तय इति । सर्वस्मै 'सर्वं समाप्नोषि ततोऽसि सर्व' इत्युक्तेर्व्याप्तस्तस्मै । सर्वबीजाय सर्वकारणाय । व्यञ्जनाद्बीजमित्युक्त इत्युक्तेः । सर्वव्यञ्जकाय वा । सर्वभूतात्मने सर्वभूतस्वामिने ॥ ११ ॥

सुमनोरञ्जनी — स्वच्छन्देन उपात्तः स्वीकृतः देहो येन स तथा । विशुद्धा अप्राकृता ज्ञानात्मका मूर्तिर्यस्यासौ तस्मै । सर्वस्मै सर्वस्वामिने । सर्वस्य बीजाय मूलकारणाय । सर्वभूतानां आत्मने अन्तर्यामिणे ॥ ११ ॥

मयेदं भगवान् गोष्ठनाशायासारवायुभिः ।
चेष्टितं विहते यज्ञे मानिना तीव्रमन्युना ॥ १२ ॥

सत्यधर्मीया — आसारैः सहिताश्च ते वायवश्च तैर्यज्ञे विहते सति तीव्रमन्युना मानिना गोष्ठनाशायेदं कर्म चेष्टितं कृतम् ॥ १२ ॥

सुमनोरञ्जनी — यज्ञे मदुद्देश्यके मखे विहते सति मानिना गर्वितेन अत एव तीव्रमन्युना मया । आसारैः जलधाराभिः वायुभिश्च गोष्ठनाशाय । इदं अतिवर्षणं चेष्टितं कृतम् ॥ १२ ॥

त्वयेशानुगृहीतोऽस्मि ध्वस्तस्तम्भो वृथोद्यमः ।
ईश्वरं गुरुमात्मानं त्वामहं शरणं गतः ॥ १३ ॥

सत्यधर्मीया — ध्वस्तः स्तम्भो यस्य सः । वृथोद्यमो वृथाभूत उद्यमो मेघौघादिप्रेषणवर्षणादिर्यस्य सः । त्वयाऽनुगृहीतोऽस्मि । अधुनाऽपि मधुनाथेन सुष्ठु तथाऽप्रष्टुर्वा नोक्तं कथयदनुगृहीत इति शक्र इति चेन्न । न मनोपवेशोपश्रवणादिकं नानुग्रहं विना घटेतेति मघवान्भगवन्ननुगृहीत इत्युक्तवानिति सम्भवात् । अहमीश्वरं गुरुमात्मानं शरणं गतः ॥ १३ ॥

सुमनोरञ्जनी — तथापि भो ईश ! त्वया अनुगृहीतोऽस्मि । कुतः । यतो वृथोद्यमः सन् ध्वस्तस्तंभः निरस्तमदः अहं त्वां शरणं गतः ॥ १३ ॥

श्रीशुक उवाच -

एवं सङ्कीर्तितः कृष्णो मघोना भगवानमुम् ।
मेघगम्भीरया वाचा प्रहसन्निदमब्रवीत् ॥ १४ ॥

सत्यधर्मीया — अमुमिन्द्रं, मघोनेन्द्रेण ॥ १४ ॥

सुमनोरञ्जनी — मघोना इन्द्रेण । अमुं इन्द्रम् ॥ १४ ॥

श्रीभगवानुवाच -

मया तेऽकारि मघवन् मखभङ्गोऽनुगृह्णता ।
मदनुस्मृतये नित्यं मत्तस्येन्द्रश्रिया भृशम् ॥ १५ ॥

सत्यधर्मीया — हे मघवन्! इन्द्रः स्वर्गाधिपतिरिति श्रीस्तया । भृशं मत्तस्य नित्यं मदनुस्मृतयेऽनुगृह्णता मया मखभङ्गोऽकारि कृतः ॥ १५ ॥

सुमनोरञ्जनी — इन्द्रोक्तमनुवादयन्नाह ॥ मयेति । हे मघवन् ! ते तुभ्यम् । अनुगृण्हता अनुग्रहं कर्तुमिच्छता । ते मखभङ्गः अकारि कृतः । इन्द्रश्रिया स्वर्गाधिपत्यसंपदा । हे इन्द्रेति सम्बुद्धिर्वा ॥ ॥ १५ ॥

मामैश्वर्यश्रीमदान्धो दण्डपाणिं न पश्यति ।
तं भ्रंशयामि सम्पद्भ्यो यस्य चेच्छाम्यनुग्रहम् ॥ १६ ॥

सत्यधर्मीया — ऐश्वर्यं स्वामित्वं श्रीः सम्पच्चाभ्यां जातो यो मदस्तेनान्धोऽधिकारी । दण्डपाणिं शासितृत्वेन यमसमम् । अदण्डपाणिमस्वतन्त्रयमभिन्नं शिक्षकं न पश्यति चक्षूर्रहितवत् । यो यस्य चोपर्यनुग्रहं कर्तुमिच्छामि तं सम्पद्भ्यो भ्रंशयामि च्यावयामि ।। १६ ।।

सुमनोरञ्जनी — मां दण्डपाणिं यममपि ।। १६ ।।

गम्यतां शक्र भद्रं ते क्रियतां मेऽनुशासनम् ।
स्थीयतां स्वाधिकारेषु युक्तैर्विस्रम्भवर्जितैः ।। १७ ।।

सत्यधर्मीया — हे शक्र ! गम्यतां, ते भद्रमस्तु । मेऽनुशासनं क्रियताम् । सर्वान्सुपर्वण एतद्द्वाराऽनुशास्ति । स्वाधिकारेषु स्वस्वाधिकारेषु युक्तैर्मन्मानससमेतैः स्वर्गादयः स्थिरा इति विश्वासवर्जितैः स्थीयताम् । विश्रम्भो वर्जितो मह्यं दत्तो मयि स्थापित इति यावत् यैस्तैरिति वा । यथोक्तम् । परमावर्जते न इत्यृग्भाष्यटीकादिषु । परमावर्जते नः ददाति त्यागार्थत्वाद्ददातीति । वृजलीत्याग इति कविकल्पद्रुमे पठितत्वेन वृजेस्त्यागार्थत्वादिति ।। १७ ।।

सुमनोरञ्जनी — व इति बहुवचनं इन्द्रेण सहागताग्न्यादिदेवाभिप्रायेण । स्वाधिकारेषु प्राच्यादिदिक्पालनादिव्यापारेषु युक्तैः अप्रमत्तैः । ऐश्वर्यादौ विस्रंभवर्जितैः स्थीयताम् ।। १७ ।।

श्रीशुक उवाच -

अथाह सुरभिः कृष्णमभिवन्द्य मनस्विनी ।
स्वसन्तानैरुपामन्त्र्य गोपरूपिणमीश्वरम् ।। १८ ।।

सत्यधर्मीया — अथ वासववासुदेवसंवादानन्तरम् । सुरभिरागता सा किमकरोदित्यतस्तदारम्भो वाऽथशब्दः । मङ्गलानन्तरारम्भप्रश्नेत्यमरः । मनस्विनी प्रशस्तचित्ता । सुरभिरभिवन्द्य कृष्णं स्वसन्तानैर्गोभिः सहोपामन्त्र्यालोच्य गोपरूपिणमीश्वरं प्रत्याह ।। १८ ।।

सुमनोरञ्जनी — अथ इन्द्रादेशानन्तरम् । सुरभिः । मनस्विनी प्रशंसनीयमनाः । कृष्णं उपामन्त्र्य सम्बोध्य । स्वसन्तानैः गोभिः सह आह ।। १८ ।।

सुरभिरुवाच -

कृष्णकृष्ण महायोगिन् विश्वात्मन् विश्वसम्भव ।
भवता लोकनाथेन सनाथा वयमच्युत ।। १९ ।।

सत्यधर्मीया — विश्वात्मन् जगत्स्वामिन् । महान्योगोऽस्यास्तीति महायोगिन्नणिमादि-सिद्धिसम्पन्न । विश्वसम्भव जगदुत्पादक वायुजनक वा हे अच्युत! लोकनाथेन भगवता वयं सनाथास्त्वदभिन्ननाथसहिता इत्यर्थः ॥ १९ ॥

सुमनोरञ्जनी — विश्वात्मन् विश्वान्तर्यामिन् । विश्वस्य सम्भवो यस्मात्सः । लोकनाथानां ब्रह्मादीनां इन स्वामिन् ! तृतीयान्तं वा । सनाथाः कृताः स्म इति ॥ १९ ॥

त्वं नः परमकं दैवं त्वं न इन्द्रो जगत्पते ।
भवाय भव गोविप्रदेवानां ये च साधवः ॥ २० ॥

सत्यधर्मीया — त्वं नः परमकं पूर्णसुखमत्युत्तमं वा दैवमिष्टं हि । जगत्पते! त्वं न इन्द्रः स्वामी । ये च साधवस्तेषामृष्यादीनां गावश्च विप्राश्च तेषां भवाय श्रेयसे भव ॥ २० ॥

सुमनोरञ्जनी — त्वं नः परमकं परमं कं सुखं यस्मात्तत् । दैवं देवता । एतदभिप्रायेणैव पदरत्नावलीकृद्भिः अत्युत्तमं इष्टदैवमिति व्याख्यातम् । इन्द्रः ईश्वरः । हे गोविन्द ! गोविप्रदेवानां, ये चान्ये साधवः तेषां भवाय क्षेमाय भव ॥ २० ॥

इन्द्रं नस्त्वाभिषेक्ष्यामो ब्रह्मणा चोदिता वयम् ।
अवतीर्णोऽसि विश्वात्मन् भूमेर्भारापनुत्तये ॥ २१ ॥

सत्यधर्मीया — ब्रह्मणा चोदिता वयं, न इन्द्रं त्वामभिषेक्ष्यामः । भूमेर्भारापनुत्तये त्वमवतीर्णश्चासि यतोऽतोऽभिषेक्ष्याम इत्यन्वयः ॥ २१ ॥

सुमनोरञ्जनी — नः इन्द्रं स्वामिनं त्वा त्वां पयसा अभिषेक्ष्यामः ॥ २१ ॥

श्रीशुक उवाच -

एवं कृष्णमुपामन्त्र्य सुरभिः पयसाऽऽत्मनः ।
जलैश्चाकाशगङ्गाया ऐरावतकरोद्धृतैः ॥ २२ ॥

इन्द्रः सुरर्षिभिः साकं चोदितो देवमातृभिः ।
अभ्यषिञ्चत दाशार्हं गोविन्द इति चाभ्यधात् ॥ २३ ॥

सत्यधर्मीया — सुरभिरेवं कृष्णमुपामन्त्र्य सुरभिरात्मना पयसा क्षीरेणैरावतकरोद्धृतै-राकाशगङ्गाया भागीरथ्या जलैः सुरर्षिभिः साकं देवमातृभिर्देवैर्मातृभिर्ब्रह्मादिभिरदित्यादिदेवमातृभिर्वा

दाशार्हमभ्यषिञ्चत । गोविन्द इति । मम स्वातन्त्र्यं नास्ति । गौः स्वर्गस्थं विन्दते लभत इति गोविन्द इति सुरवरसुरभिपक्षे निरुक्तिर्ज्ञेया । अभ्यधादुच्चचार तन्नाम स्थापितवानिति यावत् ॥ २२,२३ ॥

सुमनोरञ्जनी — सुरभिः आत्मनः पयसा अभ्यषिंचत । सुरर्षिभिश्चोदित इन्द्रश्च देवमातृभिः सह । ऐरावतकरोद्धृतैः आकाशगङ्गाया जलैः अभ्यषिंचत । तदा गोविन्द इति नाम अभ्यधात् नाम कृतवानित्यर्थः ॥ २२,२३ ॥

तत्रागतास्तुम्बुरुनारदादयो गन्धर्वविद्याधरसिद्धचारणाः ।
जगुर्यशो लोकमलापहं हरेः सुराङ्गनाः सन्ननृतुर्मुदाऽन्विताः ॥ २४ ॥

सत्यधर्मीया — हरेर्लोकमलापहं गतम् । यशस्तत्रागतास्तुम्बुरुश्च नारदश्चादी येषां ते । घ्यन्तात्पचूत्वापेक्षयाऽभ्यर्हितत्वान्नारदपर्वताभ्यां वासुदेवार्जुनाभ्यामित्यादिवन्नारदशब्दः प्राक् प्रयोज्यस्तथाऽपि रामावतारे विराधः सद्विरोधं कृत्वा शिक्षां प्राप्तो जाग्रत्सन्नग्रत एवायात इति विशेषं द्योतयितुं तुम्बुरुशब्दः प्राक् प्रयुक्त इति ज्ञेयम् ।

रामोऽपि तत्र ददृशे धनदस्य शापाद्गन्धर्वमुर्वशिरतेरथ यातुधानीम् ।
प्राप्तां दशां सपदि तुम्बरुनामधेयं नाम्ना विराधमपि शर्ववरादवध्यम् ।

भङ्क्त्वाऽस्य बाहुयुगलं बिलगं चकार सम्मानयन्वचनमम्बुजजन्मनोऽसौ । प्रादाच्च तस्य सुगतिं निजगायकस्येत्याचार्योक्तेः । गन्धर्वविद्याधरचारणा जगुः । सुराङ्गना अप्सरसो मुदान्विताः सन्ननृतुः ॥ २४ ॥

सुमनोरञ्जनी — हरेर्यशः । कीदृशम् । लोकमलापहम् । जगुः । सुरांगनाः सम्यक् ननृतुः नृत्यं चक्रुः ॥ २४ ॥

तं तुष्टुवुर्देवनिकायकेतवो व्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः ।
लोकाः परां निर्वृतिमाप्नुवंस्त्रयो गावस्तदा गामनयन् पयोद्रुताम् ॥ २५ ॥

सत्यधर्मीया — देवनिकायकेतवः सुरसमूहमहान्तः । अद्भुता आश्चर्यवहाः पृष्पवृष्टयस्ताभिः पुष्पवृष्टिभिर्व्यवाकिरन् । वृष्टं वर्षं भावे क्तः । तदेषामस्ति तानि वृष्टीन्यद्भुतानि च तानि वृष्टीनि च तैराश्चर्यावहवर्षणवत्पुष्पैर्व्यवाकिरन् किरणं चक्रुरिति वा । वर्षत आभिरिति वृष्टयः करणे क्तिन् । पुष्पाण्येव वृष्टयस्ताभिरवाकिरंश्चिक्षिपुरित्यर्थः । यविष्टमन्मभिरित्यृग्भाष्ये मन्मभिर्मतिभिः । तट्टीकायां

मतिभिर्बुद्धिवृत्तिभिः सह । तट्टिप्पणेऽत्र क्तिन्प्रत्ययः करणार्थ इत्युक्तेरिति वा । यत्रापि लोकाः परामुत्कृष्टां निर्वृतिं मुदं तदा गावो गां भूमिं पयोद्रुतां पयोभिः स्वक्षीरैः संक्षरणैर्द्रुतां परिप्लुतामनयंश्चक्रुः । यद्वा पयसा सिक्ता द्रवो द्रुमा यस्याः पयोद्रुस्तस्या भावः पयोद्रुता तां पयःसिक्ततरुकत्वमनयन्यापयामासुः ॥ २५ ॥

सुमनोरञ्जनी — देवनिकायस्य देवसमुदायस्य केतवो ध्वजस्थानीयाः श्रेष्ठा इत्यर्थः । अद्भुतपुष्पाणां वृष्टिभिश्च अवाकिरन् । त्रयो लोकाः परां निर्वृतिं आनन्दं, गावश्च गां भूमिं पयसा द्रुतां आर्द्रां अनयन् अकुर्वन्निति यावत् ॥ २५ ॥

नानारसौघाः सरितो वृक्षा आसन् मधुस्रवाः ।
अकृष्टपच्यौषधयो गिरयोऽबिभ्रदुन्मणीन् ॥ २६ ॥

सत्यधर्मीया — स्वतः पतन्नानावृक्षादिरसवत्यो मधुस्रवा मधुरं स्रवन्ति ते मधुस्रवास्तरवः । अकृष्टपच्यौषधयः कर्षणं विनैव पाकं प्राप्ता अकृष्टपच्यास्ताश्च ता ओषधयश्च । कर्मधारयेऽपि बुद्ध्या विवेकेनौषधीरुद्दिश्याकृष्टपच्यत्वं विधीयते । कृष्णाभिषेकसमय एवैवमभवदिति भावः । राजसूयसूर्य-मृषोद्यरुच्यकृष्टपच्याव्यय्या इति क्यबन्ततया निपातितः कृष्टपच्यशब्दः । गिरयः पर्वता उन्मणीनु-त्कृष्टान्मणीनबिभ्रत् । अगाः प्रत्यन्तपर्वताः सन्त्यस्येति मत्वर्थ इकारप्रत्ययः । अथवा गोऽगिः । तृतीयोऽतिशय इति महामहीध्र इति महापर्वतः प्राग्यत्रायः कृष्णायस्तत्रेदानीमुन्मणीनबिभ्रदिति वा । बहुवचनमेकवचनार्थे । अकृष्टपच्यौषधय इति प्रथमपक्षे गिरिविशेषणं वा ॥ २६ ॥

सुमनोरञ्जनी — सरितो नद्यः । नानारसौघाः नानाविधरसवदुदकवाहिन्यः । मधुररस एव नानाविधत्वविशदत्वादिभेदेन ज्ञेयम् । वृक्षाः मधुधारां मुञ्चन्तः आसन् । अकृष्टपच्याः कर्षणादिकं विनैव पक्वाः ओषधयः आसन् । गिरयः उन्मणीन् उद्गतान् बहिःप्रकटान् मणीन् अबिभ्रत् । उत्कृष्टान्मणीनिति वा ॥ २६ ॥

कृष्णेऽभिषिक्त एतानि सर्वाणि कुरुनन्दन ।
निर्वैराण्यभवंस्तात क्रूराण्यपि निसर्गतः ॥ २७ ॥

सत्यधर्मीया — हे कुरुनन्दन तात परीक्षित्! निसर्गतः स्वभावतः क्रूराण्यप्येतानि सम्यगेकस्थानं प्राप्तानि सत्त्वानि गोव्याघ्रादीनि निर्वैराणि वैररहितान्यभवन् । बुद्धिसन्निहि-तत्वादेतानीत्युक्तिर्वा ॥ २७ ॥

सुमनोरञ्जनी — एतानि पूर्वोक्तानि सर्वाणि निसर्गतः स्वभावात् क्रूराण्यपि व्याघ्रसर्पादि-सत्वानि निर्वैराण्यासन् ॥ २७ ॥

इति गोगोकुलपतिं गोविन्दमभिषिच्य सः ।
अनुज्ञातो ययौ शक्रो वृतो देवादिभिर्दिवम् ॥ २८ ॥

इति श्रीमद्भागवते दशमस्कन्धे पञ्चविंशोऽध्यायः ॥

सत्यधर्मीया — स शक्रो गोगोकुलपतिं गोविन्द इत्युक्तरीत्याऽभिषिच्यानुज्ञातः । प्रथमात्वे तसिलन्तत्वे वाऽर्थः समः । देव्यश्च सुरभ्यादयश्च सुरस्त्रियश्चैकशेषे देवाश्चादयो येषां सिद्धादीनां तैर्वृतो दिवं स्वर्गं ययौ ॥ २८ ॥

इति श्रीभागवतटिप्पण्यां सत्यधर्मयतिकृतायां
दशमपूर्वार्धे पञ्चविंशोऽध्यायः ॥ १०-२५ ॥

सुमनोरञ्जनी — अनुज्ञातः कृष्णेन अनुज्ञातः ॥ २८ ॥

इति श्रीमद्भागवतदशमस्कन्धपूर्वार्धव्याख्यायां
सुमनोरञ्जन्यां पञ्चविंशोऽध्यायः ॥ १०-२५ ॥

महर्षि श्री वेदव्यासप्रणीतम्

श्रीमद् भागवतम्

श्री आनन्दतीर्थविरचित भागवततात्पर्यनिर्णयेन
श्री सत्यधर्मतीर्थविरचित भागवतविवृत्या
सुमनोरञ्जिन्या च सहितम्

अष्टमं सम्पुटम्

(दशमस्कन्धे पूर्वार्धः)

Edited by

Mahāmahopādhyāya

Prof. K.T. Pandurangi

Formerly Prof. of Sanskrit, Bangalore University

Hon. Director of Dvaita Vedanta Studies and Research Foundation, B'lore.

Associate Editor

Vidwan Krishnacharya Upadhyaya, M.A.

Research Scholar at Dvaita Vedanta Studies and Research Foundation, Bangalore

This volume is published with the grant from the Govt. of Karnataka for the Research Project undertaken by Dvaita Vedanta Studies and Research Foundation.

2004

Published by

Dvaita Vedanta Studies and Research Foundation

No.11, Uttaradi Matha Compound, Basavanagudi, Bangalore-4.

Śrīmad Bhāgavatam with Tātparyanirṇaya of Śrī Ānanda tīrtha, Bhāgavata vivṛti of Śrī Satyadharmatīrtha and Sumanorañjani. Edited by Prof. K.T. Pandurangi, Hon. Director of Dvaita Vedānta Studies and Research Foundation, Upakulapati, Poornaprajna Vidyapeetha, Bangalore. and Vidwan Krishnachārya Upādhyāya, Research Scholar at Dvaita Vedanta Foundation. Published by Dvaita Vedanta Studies and Research Foundation, No.11, Uttaradi Matha Compound, Basavanagudi, Bangalore-560 004.

No. of Pages : lxxxviii + 480

No. of Copies : 1000

Price : Rs. 300/-

Copies can be had from :

Dvaita Vedanta Studies and Research Foundation,
No.11, Uttaradi Matha Compound,
Basavanagudi, Bangalore-560 004.
Phone : 080-2662 7272

Printed at : **Raghavendra Enterprises**, Bangalore-560 085.

Preface

This is the Eighth Volume of Śrīmad Bhāgavatam. It contains twenty-five chapters of Pūrvārdha of Tenth Skandha.

In these chapters Devaki's marriage with Vasudeva, Kamsa killing the six children of Devaki, the birth of Kṛṣṇa and Balarāma. Kamsa deputing Pūtanā, Śakatāsura etc. to kill Kṛṣṇa, Kāliyamardana, description of the forest, and the seasons, Kṛṣṇa preventing Indrayāga. Indra begging pardon of Śrī Kṛṣṇa are described.

The commentary of Śrī Satyadharma is continued. A new commentary Sumanoranjani is added.

Prof. Pandurangi has edited this volume with the assistance of Vidwan Krishnacharya Upadhyaya.

We record our appreciation of the hard work of these two scholars.

We thank Raghavendra Enterprises for neat printing and good getup.

N. Narasimha Rau
Chairman

Tenth Skandha (Pūrvārdha)

भागवतम् – दशमस्कन्धः

Introduction

Salient feature of Tenth Skandha

The main theme of the first half of tenth skandha is subduing Kamsa. Kamsa represents the evil force, while Kṛṣṇa represents the noble force. The other charactors are supporting characters in the confrontation of the evil and the noble forces.

The charactor of Kamsa is quite interesting. Though he plays the role of a villain in this confrontation, when he is in normal mood he is a good person. When his sister Devaki was married to Vasudeva he played a leading role in the marriage procession. He took the rein of the horses of the chariot. However, when the aerial voice informed him, he will be killed by his sister's eighth son, he was upset and drew his sword to kill her. When he was assured by Vasudeva that Devaki's children will be offered to him as and when they are born, he withdrew his sword.

When the first child was offered to him, he returned the child by saying that it is the eigth child that is going to kill me, hence, I need not kill this first child. This again indicates that he is a good person when he is in his normal mood.

In Indian Epic and Purāṇa literature, the evil and agressive persons are considered as the incarnations of the devil and the noble and peace-loving persons are considered as the incarnations of deities. These two vie with each other to aquire the Supremacy. The evil persons struggle to acquire Supremacy by aggression. This aggression results in the harassment of the peace loving people, their belongings cows etc and over exploitation of the natural resources. The religious programmes are also disturbed. Then aggressive activities are depicted as a burden on the earth and the earth appeals to the deities assuming the form of cow. To ward off this burden the Supreme God and other deities are considered as coming down to the earth in the human form. This is a symbolic representation of the peace loving people organising themselves to meet the aggression.

To confront the aggressive persons, they have to be provoked. Nārada plays the role of a provoker in the Purāṇa literature.

The Epics and Purāṇa literature has a style and tecknique of its own. The aerial voice, curse, boon, backlash of earlier births, side episodes etc. are adopted.

Here, the aerial voice provoked Kamsa in the first instance. When his sanity was restored, Nārada provokes him again informing him that the deities are consolidating their strength. He was again upset. He consulted his ministers Chanur and Muṣṭika. They advised him to destroy all children born in the villages, towns and cowherd hamlets. As he was kept in dark about the birth of the eigth child he had to resort to sureptitious methods of deputing Pūtanā, Śakatāsura, Bakāsura, Pralamba, Trināvarta etc. It is interesting to note that these appeared in the form of a beautifull young woman, a cart, wirlwind etc forms. In a secret attack, the attackers have to appear in the familier object forms. Naturaly the others will identify these secret forms and mount the counter attack. This kind of attack and counter attack continues until finally Kamsa is subdued.

A narration of only these events will not make it interesting. Hence, certain other episodes directly not connected with the main theme are introuced. The episode of the two Gandharvas i.e. Nalakubara and Manigriva, the episode of Kāliyā mardana are this type.

Even in the side episodes the Epics and Purāṇas have a message to communicate. To guide to inculcate moral values and human values is one of the objects of this literature. The two Gandharvas were sporting in the river Gangā with young women naked. Nārada happens to go that way by chance. The young women put on their cloths but these two Gandharvas did not care to maintain civic deceney. Hence, Nārada cursed them to be born as trees. These arrogant Gandharvas were cut to their size.

The episode of Kāliyamardana has a lesson. The snakes were required to offer food to Garuda regularly. Kāliyā snake refused. Garuda started attacking him. He ran away and hide in the deep water pool of Yamunā. He had caused a serious water polution. Garuda was not able to persue him as he was cursed by the sage Saubhari not to enter into Yamunā river. This episode narrates punishment given to two arrogant persons.

The episode of Kṛṣṇa holding the Govardhana hill on his palm has its own lesson. It is interesting to note that the God himself argues that for the rain and the of the growth of crops, to sustain life of the human beings and the cows, Indra has no role to

play. It is very natural to rain and provide prosperity. Kṛṣṇa convincingly argues for the philosophy of Svabhāvavāda and pursuades Nanda and Gopas not to undertake Indrayāga. This is intended to remove the pride of Indra.

The Bhāgavata narration has become appealing in another way also. The Gopas lived in the forest. Wandered in the forest and enjoyed forest surrounding. There is a detailed description of forest. The forest attains different types of beauty in different seasons. There is a captivating description of seasons.

Kṛṣṇa, Rāma and Gopas played in the forest. A variety of plays of young boys are described.

Until the introduction of modern sports, the rural plays were very popular in our country. As these were played in open air, these contributed to the health of children. The sports constitute an impartant aspect of culture. Modern sports not only destroyed our rural sports but also destroyed an important aspect of our culture. Bhāgavata is not only a philosophical document but also a cultural document.

Finally Bhāgavata keeps the awareness of Kṛṣṇa as Supreme God all along. Kṛṣṇa reveals his devine nature to Devaki, Vasudeva, Yaśoda, Nanda more than once. He revealed the fact that there is no difference between his mūla rūpa and avatārarūpa. Whenever his devine form is witnessed these have offered profuse prayers recounting his auspicious qualities.

The above aspects of Bhāgavata are brought in the narration of the events of Bhāgavata given below.

Naration of these in English or any other language will not be effective. Hence, select verses are also quoted.

Parīkṣit requests Śri Śuka to narrate the history of Yadu dynasty

The tenth skandha commences with a request by the king Parikshit to revered Śuka to narrate the history of Yadu race in which the supreme God Viṣṇu took incarnation.

'Revered Sage, so far you have narrated the history of the dynasty of the Sun and the Moon. Now kindly enlighten me on the great deeds of the Supreme God who took the incarnation in the dynasty of Yadus.

राजोवाच :—

कथितो वंशविस्तारो भवता सोमसूर्ययोः ।
राज्ञां चोभयवंश्यानां चरितं परमाद्भुतम् ॥
यदोश्च धर्मशीलस्य नितरां मुनिसत्तम ।
तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः ॥
अवतीर्य यदोर्वंशे भगवान् भूतभावनः ।
कृतवान् यानि विश्वात्मा तानि नो वद विस्तरात् ॥ (स्कन्ध-१० अध्याय-१)

There has been an intimate association between the Lord Śrī Kṛṣṇa and my ancestors. With his grace my ancestors crossed over the ocean of the great war at Kurukṣetra. He protected me from the ouslaught of the Brahmāstra of Aśvatthāmā by his Sudarṣana Chakra when I was still in the womb of my mother.

Kindly inform me how the child in the womb of Devaki was transfered to the womb of Rohini. Why Śrī Kṛṣṇa was taken to Gokula? What were the great deeds performed at Gokula and Mathura? Why he killed his maternal uncle Kamsa? How long he remained in the human form? How many wives he had? Kindly narrate all these details :

i) पितामहा मे समरेऽमरञ्जयैर्देवव्रताद्यातिरथैस्तिमिङ्गिलैः ।
दुरत्ययं कौरवसैन्यसागरं कृत्वा तरन् वत्सपदं स्म यत्प्लवाः ॥
द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं सन्तानबीजं कुरुपाण्डवानाम् ।
जुगोप कुक्षिङ्गत आत्तचक्रो मातुश्च मे यः शरणं गतायाः ॥

ii) रोहिण्यास्तनयः प्रोक्तो रामः सङ्कर्षणस्त्वया ।
देवक्या गर्भसम्बन्धः कुतो देहान्तरं विना ॥
कस्मान्मुकुन्दो भगवान् पितुर्गेहाद् व्रजं गतः ।

क्व वासं ज्ञातिभिः सार्धं कृतवान् सात्वतां पतिः ॥
व्रजे वसन् किमकरोन्मधुपुर्यां च केशवः ।
भ्रातरं चावधीत् कंसं मातुरद्धा तदर्हणम् ॥
देहं मानुषमश्रित्य कति वर्षाणि वृष्णिभिः ।
यदुपुर्यां सहावात्सीत् पत्न्यः कत्यभवन् विभोः ॥ (१०-१)

The earth taking the form of a cow appeals to Brahmā to reduce the burden on her

Śuka compliments Parīkṣat for asking such a meaningful question about the great deeds of Vāsudeva which will purify the speakers the listener, and all men and women. He initiates the narration by informing that the earth burdened by the arrogant and the evil minded kings approached Chaturmukha Brahmā in the form of a cow with tears in the eyes, and explained her plight. On hearing this Chaturmukha Brahmā went to the bank of Kśheerasamudra with the cow and Śiva, and all other deities. He profusely offered prayers to the supreme God.

The Supreme God informed him by the aerial voice the action he proposed to take. He himself will take the incarnation at the house of Vasudeva. He has instructed the Yogamāyā also to be born. Chaturmukha Brahmā informed the Cow and other deities and returned to Satyaloka.

शुक उवाच—

i) सम्यग् व्यवसिता बुद्धिस्तव राजर्षिसत्तम ।
वासुदेवकथायां ते यज्जाता नैष्ठिकी रतिः ॥
वासुदेवकथाप्रश्नः पुरुषां स्त्रीन् पुनाति हि ।
वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥
भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः ।
आक्रान्ता भूरिभारेण ब्रह्माणं शरणं ययौ ॥
गौर्भूत्वाऽश्रुमुखी खिन्ना रुदन्ती करुणं यथा ।
उपस्थितान्तिके तस्मै व्यसनं समवोचत ॥
ब्रह्मा तु दुपधार्याथ सह देवैस्तया सह ।
जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः ॥
तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् ।
पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ॥

ii) गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच ह ।
गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव माचिरम् ॥
वसुदेवगृहे साक्षात् भगवान् पुरुषः परः ।
जनिष्यते तत्प्रियार्थं सम्भवन्तु सुरस्त्रियः ॥

योगमाया भगवती यया सम्मोहितं जगत् ।
आदिष्टा प्रभुणांऽशेन कार्यार्थे सम्भविष्यति ॥
इत्यादिश्यामरगणान् प्रजापतिपतिर्विभुः ।
आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ ॥ (१०-१)

Devaki's marriage with Vasudeva

Revered Śuka continued the narration. In the city of Mathura, the Yadu king Śūrasena ruled the countries of Madhurā and Śūrasena. This city was the capital of Yādava kings. Ugrasena's brother Devaka gave his daughter in marriage to Vasudeva. After the marriage, a wedding procession was arranged. Kamsa, the son of Ugrasena himself took the reins of the horses of the chariot out of affection for his sister. The procession consisted of four hundred elephants, Ten thousand horses and six hundred chariots. The conch, dundubhis and mridanga instruments were ringing.

राजधानी ततः साऽभूत् सर्वयादवभूभुजाम् ।
शूरसेनो यदुपतिः मधुरामवसन् पुरीम् ।
माधुरान् शूरसेनांश्च विषयान् बुभुजे स्वराट् ॥
तस्यां तु कर्हिचित् शौरिः वसुदेवः कृतोद्वहः ।
देवक्या भार्यया सार्धं प्रयाणे रथमारुरुहत् ॥
उग्रसेनसुतः कंसः स्वसुः प्रिय चिकीर्षया
रश्मीन् हयानां जगृहे रौप्यैः रथशतैः वृतः । (१०-१)

Aerial voice announces that the eigth child will kill Kamsa

As the procession was in prograss, an aerial voice anounced that the eighth child of Devaki will kill Kamsa. On hearing this Kamsa was terribly upset and took his sword and rushed to kill his sister Devaki.

Vasudeva tried to persuade him not to commit such a sinful act of killing his own sister. He advised Kamsa not to be afraid of death. The death arises from the very day of the birth. One may die that very day or after hundred years. In any case death is a certainty. Hence one should not cause injury to others in his own interest. However, Kamsa did not withdraw his attemp to kill his sister. Then Vasudeva thought that he should avoid the immediate death of Devaki. Then he offered to Kamsa that he will handover Devaki's children as and when they were born. The aerial voice has not told

you that your sister would kill you; but only told you that her sons will kill you. Therefore, spare Devaki and I will handover her sons as and when they are born.

पथि प्रग्रहिणं कंसमाभाष्याहाशरीरवाक् ।
अस्यास्त्वष्टमो गर्भो हन्ता यां नयसेऽबुध
इत्युक्तः स खलः पापो भोजानां कुलपांसनः
भगिनीं हन्तुमारब्धः खड्गपाणिः कचेऽग्रहीत्
तं जुगुप्सितकर्माणं नृशंसं निरपत्रपम्
वसुदेवो महाभागः उवाच निरपत्रपम् ।

वसुदेव उवाच–

देहे पञ्चत्वमापन्ने देही कर्मानुगोऽवशः ।
देहान्तरमनुप्राप्य प्राक्तानं त्यजते वपुः ॥
तस्मान्न कस्यचिद् द्रोहमाचरेत् स तथाविधः ।
आत्मनः क्षेममन्विच्छन् द्रोग्धुर्वै परतो भयम् ॥
एषा तवानुजा बाला कृपणा पुत्रिकोपमा ।
हन्तुं नार्हसि कल्याणीमिमां त्वं दीनवत्सल ॥
एवं स सामभिर्भेदैर्बोध्यमानोऽपि दारुणः ।
न न्यवर्तत कौरव्य पुरुषादाननुव्रतः ॥
न ह्यस्यास्ते भयं सौम्य यद् वै त्वाऽऽहाशरीरवाक् ।
पुत्रान् समर्पयिष्येऽस्या यतस्ते भयमुत्थितम् ॥ (१०-१)

श्रीशुक उवाच–

स्वसुर्वधान्निववृते कंसस्तद्वाक्यसारवित् ।
वसुदेवोऽपि तं प्रीतः प्रशस्य प्राविशद् गृहम् ॥ (१०-२)

Kamsa returns the first child

In due course Devaki delivered a son. Vasudeva went to Kamsa to handover that child. Kamsa was pleased, praised Vasudeva for the promise he kept. He told Vasudeva to take back the son. My death is to come by your eighth son. Vasudeva received his son back.

अथ काल उपावृत्ते देवकी सर्वदेवता ।
पुत्रान् प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरम् ॥

कीर्तिमन्तं प्रथमजं कंसायानकदुन्दुभिः ।
अर्पयामास कृच्छ्रेण सोऽनृतादातिविह्वलः ॥
प्रतियातु कुमारोऽयं न ह्यस्मादस्ति मे भयम् ।
अष्टमाद् युवयोः पुत्रान्मृत्युर्मे विहितः किल ॥ (१०-२)

Nārada informs Kamsa that Vasudeva, Devaki, Nanda etc are deities born to support Kṛṣṇa to kill you

In the meanwhile the sage Nārada arrived. He informed Kamsa that Nanda etc Gopas and their wives living in Gokula, Vasudeva, Devaki, Yādavas and their wives are the deities. The relatives and friends of Kamsa are demons. Viṣṇu will be born as a son of Devaki and he will kill you. Nārada gave this information to Kamsa with a view to destroy the demons ultimately and left the place.

नन्दाद्या ये व्रजे गोपा यश्चामीषां च योषितः ।
वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ॥
सर्वे वै देवताप्राया उभयोरपि भारत ।
ज्ञायते बन्धुसुहृदो ये च कंसमनुव्रताः ।
असुराः सर्व एवैते लोकोपद्रवकारिणः ॥
एतत् कंसाय भगवान् शंसयामास नारदः ।
भूमेर्भारवतीर्णानां दैत्यानां च वधोद्यमम् ॥ (१०-२)

Kamsa puts in prison Vasudeva, Devaki and his own father Ugrasena

On the return of Nārada, Kamsa put in prison Vasudeva and Devaki. He went on killing the children one after the other. He was Kālanemi in his previous birth and was killed by Vishnu. Now he has become the enemy of the entire Yadu race.

He put his own father Ugrasena in prison and took charge of Śūrasena Kingdom. He fought against the Yadus with the support of Pralamba, Baka, Chāṇūra, Thriṇāvarta etc. Yadus left the Śūrasena country and went to Kuru, Pānchāla, Vidarbha, Videha and other countries. Akrūra and a few others remained in Madhura.

ऋषेर्विनिगमे कंसो यदून् मत्वा सुरानिति ।
देवक्या गर्भसम्भूतं विष्णुं च स्ववधं प्रति ॥
देवकीं वसुदेवं च निगृह्य निगडैः गृहे ।

जातं जातमहन् पुत्रं तयोरजन शङ्कया ॥
उग्रसेनं च पितरं यदुभोजान्धकाधिपम् ।
स्वयं निगृह्य बुभुजे शूरसेनान् महाबलः ॥ (१०-२)

श्रीशुक उवाच–

प्रलम्बकचाणूर तृणावर्तमहाशनैः ।
मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥
अन्यैश्चासुरभूपालैः बाणभौमादिभिर्युतः ।
यदूनां कदनं चक्रे बली मागधसंश्रयः ॥
ते पीडिता निविविशुः कुरुपाञ्चालकेकयान् ।
साल्वान् विदर्भान् निषधान् विदेहान् मगधानपि ॥
एके तमनुरुन्धाना ज्ञातयः पर्युपासते ।
मधुरायां स्थिताश्चैव येऽक्रूराद्या विशाम्पते ॥ (१०-३)

Yogamāya takes the seventh child from Womb of Devaki and puts it in the womb of Rohiṇi

After six children of Devaki were killed Śeṣa entered the womb of Devaki, Lord Viṣṇu instructed Yogamāyā to takeout the womb of Devaki and put it in Rohiṇīs womb. I myself will be born as a son of Devaki. You will be born from Yaśoda the wife of Nanda. All people will worship you by the name, Rudrā Bhadrakāli, Vijayā etc. As the child born to Rohini is drawn from the womb of Devaki and put in the womb of Rohini, he will be called Sankarṣaṇa. He will also be called Bālabhadra.

Yogamāya went to Madhura and took the child yet to be born from the womb of Devaki and placed it in the womb of Rohini.

हतेषु षड्सु बालेषु देवक्या औग्रसेनिना ।
सप्तमो वैष्णवं धाम यमनन्तं प्रचक्षते ।
गर्भो बभूव देवक्या हर्षशोकविवर्धनः ॥
भगवानपि विश्वात्मा विदित्वा कंसजं भयम् ।
यदूनां निजनाथानां योगमायां समादिशत् ॥
गच्छ देवि व्रजं भद्रे गोपगोभिरलङ्कृतम् ।
रोहिणी वसुदेवस्य भार्याऽऽस्ते नन्दगोकुले ॥

देवक्यां जठरे गर्भं शेषाख्यं धाम मामकम् ॥
तत् सन्निकृष्य रोहिण्या उदरे सन्निवेशय ।
अथाहं स्वांशभागेन देवक्याः पुत्रतां शुभे ॥
प्राप्स्यामि त्वं यशोदायां नन्दपत्न्यां भविष्यसि ।
अर्चिष्यन्ति मनुष्या त्वां सर्वकामवरेश्वरी ॥
दुर्गेति भद्रकालीति विजया वैष्णवीति च ।
कुमुदा चण्डिका कृष्णा माधवी कन्यकेति च ॥
माया नारायणीशाना शारदेत्याम्बिकेति च ॥
गर्भ सङ्कर्षणात् तं वै प्रहुः सङ्कर्षणं भुवि ।
रामेति लोकरमणात् बलभद्रं बलोच्छ्रयात् ॥

श्रीशुक उवाच–

गर्भे प्रणीते देवक्या रोहिणीं योगनिद्रया ।
अहो विस्रंसितो गर्भ इति पौरा विचक्रुशुः ॥ (१०-३)

The Supreme God entered into the womb of Devaki

The Supreme God entered into Vasudeva and then into the womb of Devaki by his Amśa. By the presence of Supreme God in Devaki, Devaki developed extrodinary lustre. On seeing the extroordinary lustre in Devaki, Kamsa felt that his destroyer Viṣṇu was present there. This caused a great tension in him. His mind was haunted by the presence of Supreme God all through the day, whether he was sitting, sleeping and walking.

Chaturmukha Brahmā, Rudra and other deities accompanied by Nārada and other Sages, arrived there to offer their prayers to the God describing his glory, profusely. They brought to their mind Matsya Kūrma etc the incarnation of God, and prastrated and returned to their places.

i) भगवानपि विश्वात्मा भक्तानामभयङ्करः ।
अविवेशांशभागेन मन आनकदुन्दुभेः ॥
ततो जगन्मङ्गलमच्युतांशं समाहितं शूरसुतेन देवी ।
दधार सर्वात्मकमात्मभूतं काष्ठा यथाऽऽनन्दकरं नभस्तः ॥
तां वीक्ष्य कंसः प्रभायाऽजिताम्भरां विरोचयन्तीं भवनं शुचिस्मिताम् ।
आहैष मे प्राणहरो हरिर्गुहां ध्रुवं श्रितो यन्न पुरेयमीदृशी ॥

आसीनः संविशंस्थिष्ठन् भुञ्जानः पर्यटन् पिबन् ।
चिन्तयानो हृषीकेशमपश्यत् तन्मयं जगत् ॥ (१०-३)

ii) ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः ।
देवैः सानुचरैः साकं गीर्भिर्विष्णुमथास्तुवत् ॥

ब्रह्मभवावूचतुः–

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये ।
सत्यस्य सत्यमुत सत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः ॥
शृण्वन् गृणन् संस्मरयंश्च चिन्तयन् नामानि रूपाणि च मङ्गलानि ते ।
क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचित्तो न भवाय कल्प्यते ॥
त्वं पासि नस्त्रिभुवनं च तथाऽधुनेश भारं हर यदूत्तवन्दनं
तद्दिष्टया ते कुक्षितः परः पुमान् अंशेन साक्षाद् भगवान् भवाय नः ॥ (१०-३)

Kṛṣṇa was born on an auspicious day

At a time when all auspicious stars and planets were present the sky was clear, the quarters were plesent, the earth with cities, villages and the cowherds was auspicious. The rivers and lakes were full of water and the minds of the noble people were peaceful. The Supreme God Viṣṇu present in the hearts of all took his incarnation in Devaki. Vasudeva saw this wonderful child holding the Śanka, Chakra etc in his hands and Koustubha in his neck. He offered prayers to him.

श्रीशुक उवाच–

अथ सर्वगुणोपेतः कालः परमशोभनः ।
यर्ह्येवाजनजन्मर्क्षः शान्तर्क्षग्रहतारकः ॥
दिशः प्रसेदुर्गगनं निर्मलोडुगणोदयम् ।
महा मङ्गलभूयिष्ठपुरग्रामव्रजाकरा ॥
नद्यः प्रसन्नसलिला हृदा जलरुहश्रियः ।
द्विजालिकुलसन्नादस्तबका वनराजयः ॥
ववौ वायुः सुखस्पर्शः पुण्यगन्धवहः शुचिः ।
अग्नयश्च द्विजातीनां शान्तास्तत्र समिन्धत ॥
मनांस्यासन् प्रसन्नानि साधूनामसुरद्रुहाम् ।
जायमानेऽजने तस्मिन् नेदुर्दुन्दुभयो दिवि ॥

देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाश्रयः ।
प्रादुरासीत् यथा प्राच्यां दिशीन्दुरिव पुष्कलः ॥
तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधम् ।
श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीताम्बरं सान्द्रपयोदसौरभम् ॥
महार्हवैडूर्यकिरीटकुण्डलत्विषा परिष्वक्तसहस्रकुन्तलम् ।
उद्दामकाञ्च्यङ्गदकङ्कणादिभिर्विरोचमानं वसुदेव ऐक्षत ॥
अथैनमस्तौदवधार्य पूरुषं परं नताङ्गः कृतधीः कृताञ्जलिः ।
स्वरोचिषा भारत सूतिकागृहं विरोचयन्तं गतिभीः प्रभाववित् ॥

वसुदेव उवाच–

विदितोऽसि भवान् साक्षात् पुरुषः प्रकृतेः परः ।
केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक् ॥ (१०-४)

The God revealed his extrordinary form to Devaki

Devaki seeing her child as Supreme God offered her prayers and appealed to him to withdraw the divine form.

The God who revealed his extrordinary form to her informed her that, at the time of Svayambhuva Manu, that you were पृश्नि and your husband Prajāpati of the name of सुतपाः. Chaturmukha Brahma instructed you to beget progeny. You performed a great penance and the Supreme God appeared before you. He told you to ask for a boon. You requested him that you should get a son similar to God himself. Then I was born as your son with the name Prsni Garbha. Again I was born as Upendra when you were Aditi and your husband was Kashyapa. I was called as Vāmana. It is the third occasion when I am born again as your son. I revealed my divine form to you to remind you that I was born as your son on earlier two occasions. Announcing this he took the form of the child.

श्रीशुक उवाच–

अथैनमात्मजं वीक्ष्य महापुरुषलक्षणम् ।
देवकी तमुपाधावत् कंसाद् भीता शुचिस्मिता ॥

श्री भगवानुवाच–

त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायम्भुवे सति ।
तदाऽयं सुतपा नाम प्रजापतिरकल्मषः ॥

युवां वै ब्रह्मणादिष्टौ प्रजासर्गे यदा ततः ।
सन्नियम्येन्द्रियग्रामं तेपाथे परमं तपः ॥
प्रादुरासं वरदराड् युवयोः कामादित्सया ।
व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ॥
तयोर्वां पुनरेवाहमदित्यामास कश्यपात् ।
उपेन्द्र इति विख्यातो वामनत्वाच्च वामनः ।
तृतीयेऽस्मिन् भवेऽहं वै तेनैव वपुषानघे ।
जातो भूयस्तयोरेवं सत्यं मे व्याहृतं सति ॥
एतद् वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे ।
नान्यथा मद्भवज्ञानं, मर्त्यलिङ्गे न जन्यते ॥ (१०-४)

श्री शुक उवाच–

इत्यक्त्वाऽसीद् हरिस्तूर्ष्णी भगवानात्ममायया
पित्रोः सम्पश्यतो सद्यो वभूव प्राकृतः शिशुः ।

Vasudeva takes the child from prison to Nandagokula

Then, instructed by the God, Vasudeva took the child and proceeded to go out from the prison. At the same time, Yogamāya was born as a daughter of Nanda's wife Yaśodā. She made the door keepers of the prison and all other citizens unconscious, opened all the doors and removed the handcuffs of Vasudeva.

The waters of the river Yamuna gave way to Vasudeva. He arrived at Nandas residence, placed the male child of Devaki by the side of Yaśoda and took her female child to the prison.

ततश्च शौरिः भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् ।
यदा बहिर्गन्तुमियेष तर्ह्यजाया योगमायाऽजनि नन्दजायया ॥
तया हृतप्रत्ययसर्ववृत्तिषु पौरेषु च यापितेष्वथ ।
द्वारास्तु सर्वाः पिहिता दुरत्ययाः बृहत्कपाटायासकीलशृङ्खलैः ॥
ताः कृष्णवाहे वसुदेव आगते स्वयं व्यशीर्यन्त यथा तमो रवेः ।
ववर्ष पर्जन्य उपांशु गर्जितः शेषोऽन्वगाद् वारिनिवारयन् फणैः ॥
मघोनि वर्षत्यसकृद् यमानुजा गम्भीरतोयोघजवोर्मिफेनिला
भयानकावर्तकुला नदी मार्गं ददौ सिन्धुरिव श्रियः पतेः ॥

नन्दव्रजं शौरिरूपेत्य तत्र तान् सुषुप्तानुपलभ्य निद्रया ।
शिशुं यशोदाशयने निधाय तत्सुतामुपादाय पुनर्गृहानगात् ॥ (१०-४)

The door keepers informed Kamsa the birth of a child to Devaki

The doors of the prison were closed as before, The door-keepers arose on hearing the cry of the child rushed to king Kamsa and informed the birth of the child to Devaki. He got up quickly and reached the prison. On seeing him his sister Devaki appealed to him 'you have already killed my children born earlier. Please spare this female child. Ignoring her appeal he took the female child and dashed it against the rock. But the child escaped from his nand and jumped to the sky. He saw the child over the sky, with eight arms with bow, shūla, sword etc weapons. She told him what is the use of trying to kill me. Your enemy is born elsewhere. On hearing this Kamsa was surprised and released Vasudeva and Devaki from the prison. He begged her pardon for the ill treatment given by him.

The next day Kamsa invited his ministers, and narrated the events of the previous night. His meeting the sister, his attempt to kill the female child who was yoga māya, and her announcing that his enemy is born else where.

On hearing this, his ministers told him that these are all the mischiefs of the deities. It should not be ignored. We will go around all the cities and villages and kill the new born children.

Viṣṇu is the centre of all the deities. He takes care of the Brahmanas, the cows, their sacrifices etc. Hence, we will go round and kill. On hearing this advice of his ministers, he instructed the demons who were born as his associates to go round and kill all children.

i) बहिरन्तः पुरद्वाराः सर्वा पूर्ववदावृताः ।
ततोबालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः ।
ते नु पूर्णमुपवृज्य देवक्या गर्भ जन्म तत्
आचख्युः भोजराजाय यदुद्विग्नः प्रतीक्षतेः ।
स तल्पात् तूर्णमुत्थाय कालोऽयमिति विह्वलः ।
सूतिका गृहमागात् शीघ्रं प्रस्खलन् मुक्तमूर्धजः । (१०-५)

ii) तमाह भ्रातरं देवी कृपणा करुणं सती ।
स्नुषेयं तव कल्याण स्त्रियं मा हन्तुमर्हसि ।

तां गृहीत्वा चरणयोः जातमात्रां स्वसुः सुताम् ।
अयोय यत् शिलापृष्ठे स्वार्थोन्मूलितसौहृदः ।
सा तद्धस्तात् समुत्प्लत्य सद्यो देव्यम्बरं गता ।
अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा ।
किं मया हतया मन्द जातः खलु तवान्तकः ।
यत्र क्वचित् पूर्वशत्रुः मा हिंसीः कृपणां वृथा ॥
तयाभिहितमाकर्ण्य कंसः परमविस्मितः ।
देवकीं वसुदेवं च विमुच्य प्रश्रितो ब्रवीत् ॥
क्षमध्वं मम दौरात्म्यं साधवो बन्धु वत्सलाः ।
इत्युक्त्वा श्रुमुखः पादौ श्यालस्वस्रोरथा गृहीत् ।

iii) तस्यां रात्र्यां व्यतीत्ययां कंस आहूयमन्त्रिणः
तेभ्य आचष्ट तत् सर्वं यदुक्तं योग निद्रया ।
एवं चेत् तर्हि भोजेन्द्र पुरग्रामव्रजादिषु ।
अनिर्दशान् निर्दशांश्च हनिष्यामोद्यबालकान् ।
मूलं विष्णुर्हि देवानां यत्र धर्मः सनातनः ।
तस्य च ब्रह्मगोविप्राः तपो यज्ञाः सदक्षिणाः ।
तस्मात् सर्वात्मनाराजन् ब्राह्मणान् ब्रह्मवादिनः ।
तपस्विनो यज्ञशीलान् गाश्चहन्मोहविर्दुघाः । (१०-५)

Nanda performs Jātakarma to his son and goes to Mathura to pay tax to Kamsa

Nanda was delighted by the birth of a son for him. He invited the priests and performed the जातकर्म for his son. He gave the gift of cows in large numbers and the precious gems in golden plates. The Gopas offered him presentations. The gopies were also delighting on hearing the birth of a son for Yashoda. Rohini was also delighted.

Nanda went to Madhura to pay the annual tax to Kamsa. Vasudeva met him and told him as your work of paying the tax to Kamsa is over, you please return to Gokula early. There are some signs of calamities.

i) तन्दस्त्वात्मज उत्पन्ने जाताल्हादो महामनाः ।
आहूय विप्रान् वेदज्ञान् स्नातः शुचिरलङ्कृतः ।
वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य वै ।

कारयामास विधिना पितृदेवार्चनं तथा
धेनूनां नियुते प्रादात् विप्रेभ्यः समलङ्कृते ।
तिलाद्रीन् सप्तरत्नौघान् शातकुम्भान्तरावृवात् ।
महार्ह वस्त्राभरणकञ्चुकोष्णीषभूषिताः ।
गोपाः समाययू राजन् नानोपायपाणयः ।
गोपान् गोकुलरक्षायां निरूप्य मधुरांगतः ।
ii) नन्दः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह ।
वसुदेव उपश्रुत्य भ्रातरं नन्दमागतम्
ज्ञात्वा दत्तकरं राज्ञे ययौ तदवलोकनः ।
करो वै वार्षिकौ दत्तो राज्ञे दृष्टा वयं च वः
नेह स्थेयं बहुदिनं सन्त्युत्पाताश्च गोकुले । (१०-६)

Pūtana was killed by Kṛṣṇa

The demon Pūtanā who was asked to kill the children, moved in the cities, villages and hamlets of cowherds killing children. She entered Nandagokula assuming the form of a charming young woman. She entered the residence of Nanda and saw the child sleeping on the bed. She woke up the child and took him on her lap. Seeing her as beautiful young woman, the mother of the child stood intently looking at her. Pūtanā gave her breast to the child. The child crushed her breast forcefully. She started shouting loudly saying 'leave me leave me.' By the sound of her shouting the whole earth with hills on it shivered. She fell down returning to her original frightful form with large teeth, broad nose and hairs scattered over her head.

कंसेन प्रेषिता घोरा पूतना बालघातिनी
शिशूंश्चचार निघ्नन्ती पुरग्राम व्रजाहिषु ।
साखेचर्येकदोपेत्य पूतना नन्दगोकुलम् ।
गोपित्वा माययात्मानं प्राविशत् कामचारिणी ।
बालं प्रतिच्छन्ननिजोरुतेजसं ददर्श तल्पेऽग्निमिवाहितमम्भसि ।
अनन्तमारोपयदङ्कमन्तकं यथोरगं सुप्तमबुद्धिरज्जुधीः ।
वरस्त्रियं तत्प्रभया च धर्षिता निरीक्षमाण जननी अतिष्ठत् ।
तस्मिन् स्तनं दुर्जर वीर्यमुल्बणं घोराङ्कमादाय शिशोर्ददावथ ।
गाढं कराभ्यां भगवान् प्रपीड्य प्राणैः समं रोषसमन्वितोऽपिबत् ।

सा मुञ्च मुञ्चालमिति प्रभाषिणी निष्पीड्यमानाऽखिलजीवमर्षिणी ।
तस्याः स्वनेनातिगभीर रंहसा साद्रिर्महीद्यौश्च चचाल साग्रहा ।
प्रसार्यगोष्ठे निजरूपमास्थिता वज्राहतो वृत्र इवापतन्नृप । (१०-७)

Yaśoda and Rohini rushed to the child and took him away. They prayed for the safety of the child, swirling the tail of the cow. By that time Nanda returned from Madhura. He was surprised to see the large mountainous body of Pūtana. The gopas burnt her body.

Pūtana though was a demon in this birth, there was the āveṣa of Ūrvaśi in her. She attained the heaven.

बालं च तस्या उरसि क्रीडन्तमकुतो भयम् ।
गोप्यः तूर्णं समभ्येत्य जगृहुः जातसम्भ्रमाः ।
यशोदारोहिणीभ्यां ताः समं बालस्य सर्वशः ।
रक्षां विदधिरे सम्यग् गोपुच्छभ्रमणादिभिः ॥
तावन्नन्दादयो गोपाः मधुरायाः व्रजं गताः ।
विलोक्य पूतनादेहं बभूवुरति विस्मिताः ॥
कलेवरं परशुभिः हित्वा तत् ते व्रजौकसः ।
दूरे क्षिप्त्वाऽवयवशो ददहुः काष्ठ वेष्टितम् । (१०-७)

Kṛṣṇa kicks the cart

Yashoda arranged a function to celebrate the starting of walking of the child. When the function was going on the child was sleeping under the cart. It cried for the breast milk. When it was not made available as Yaśoda was absorbed in the function the child kicked the cart. The cart felldown upside down. Yaśoda was surprised and fed the child with her breat milk. She placed the child on her lap and decorated the child with fine clothes and precious ornaments. Nanda offered gifts to the Brahmins.

कदाचिदौत्त्थानिक कौतुकाप्लवे जन्मर्क्षयोगे समवेत योषिताम् ।
वादित्रगीतद्विजमन्त्रवाचकैः चकारसूनोरभिषेचनं सती
औत्त्थानिकौत्सुक्यमना यशश्विनी समागतान् पूजयती व्रजौकसः ।
नैवाश्रुणोत् वै रुदितं सुतस्य सा रुदन् स्तनार्थी चरणावुदक्षिपत् ॥
अधःशयानस्य शिशोरथाल्पकप्रवालमृद्वङ्घ्रिहतं व्यवर्तत ।
विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्षविभिन्नकूबरम् ॥ (१०-८)

Triṇâvarta was blown off

One day Yashoda keeping the child on the ground who was very heavy went to attend her household duties. At that time a demon Thrinâvarta sent by Kamsa arrived there taking the form of a whirlwind and carried away the child. The whole Gokula was enveloped with the dust and horrid sound. Yasoda was not able to see the child, nor herself. Nothing was visible. Thriṇâvarta who had taken away the child assuming the form of whirlwind was not able to move up in the sky and wanted to get disentagled from the child which was holding him in the neck. He was stunned, he was not able comedown. Nanda and others got the child back and were very happy.

नन्दादयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै शकटं विपर्यगात् ।
एकदाऽऽरोहमरूढं लालयन्ती सुतं सती गरिमाणं
शिशोः वोढुं न सेहे गिरिकूटवत् ।
भूमौ निधाय तां गोपी विस्मिता भारपीडिता ।
महापुरुषमादध्यौ जगामाशु च कर्मसु ।
दैत्यो नामा तृणावर्तः कंसभृत्यः प्रचोदितः ।
चक्रवाकस्वरूपेण जहारासीनमर्भकम् ।
गोकुलं सर्वमावृण्वन् मुष्णन् चक्षूंषि रेणुभिः ।
ईरयन् सुमहाघोरशब्देन प्रदिशो दिशाः ॥
तणावर्तः शान्तरयो वात्यारूपधरो हरन् ।
कृष्णं नभोगतो गन्तुं नाशक्नोत् भूरिभारभृत् ॥
गलग्रहणनिश्चेष्टो दैत्यो निर्गललोचनः ।
अव्यक्तवाक्यो न्यपतत् सहबालो व्यसुर्व्रजे । (१०-८)

Yaśodâ sees the whole world in Kṛṣṇa's mouth

One day Yashoda taking her child on her lap was feeding her breast milk. After sucking enough milk the child yawned. Yashoda saw in the little mouth of her child, the Sun, moon, seas, mountains, islands and forest, and all sentients and non sentients. On seeing the whole world she was wonderstruck, and delighted.

एकदाऽर्भकमादाय स्वाङ्कमारोप्यभामिनी
प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता ॥
पीतप्रायस्य जननी सुतस्य रुचिरस्मितम्

मुखं लालयन्ती राजन् जृम्भतो ददृशं इदम् ।
खं रोदसी ज्योतिरनीकमाशाः सूर्येन्दुवह्निश्वसनाम्बुधीश्च ।
द्वीपान् नगान् तद्दुहितॄन् वनानि भूतानि यानि स्थिरजङ्गमानि । (१०-८)

Garga performs Sanskāra for Kṛṣṇa and Balarāma

Garga, the family priest of Yadus arrived at Gokula on the instruction of Vasudeva. Nanda received him with honour and prostrated at his feet. He requested Garga to perform samskāras to Kṛṣṇa and Rāma. Garga told him it is well known that I am the preceptor of the yadu family. When I perform samskāra to the child. Kamsa will realise that he is the son of Devaki. He knows that the eighth child cannot be a female child. Therefore my performing samskāras to these boys will have adverse effect.

Nanda suggested that he can perform the ritual secretly. I will invite only very close relatives for this function. Garga secretly performed the samskāra to the two boys. He named the son of Rohini as Rāma, and named son of Yaśoda as Kṛṣṇa

When the Supreme God took his incarnations in the earlier Yugas he had the conplexions of शुक्ल, रक्त and पीत. Now he has the complexion of कृष्ण. Hence, he is named कृष्ण. Garga informed Nanda, your son is similar to Nārāyaṇa in respect of his virtues. Hence take care of him carefully.

i) गर्गः पुरोहितो राजन् यदूनां सुमहायशाः ।
व्रजं जगाम नन्दस्य वसुदेवप्रचोदितः ॥
त्वं हि ब्रह्मविदां श्रेष्ठः संस्कारान् कर्तुमर्हसि ।
बालयोरनयोर्नॄणां जन्मना ब्राह्मणो गुरुः ॥

ii) यदूनामहमाचार्यः ख्यातश्च भुवि सर्वतः ।
सुतं मया संस्कृतं ते मन्यते देवकीसुतम् ॥
कंसः पापमतिः सख्यं तवचानकदुन्दुभेः ।
देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति ।
इति सञ्चिन्तयन् श्रुत्वा देवकी दारिका वचः ।
अपि हन्ता गताशङ्कः तार्हि तन्नोऽनयो भवेत् ॥

नन्द उवाच–

अलक्षितेऽस्मिन् रहसि मामकैरपि गोव्रजे ।

कुरुद्विजातिसंस्कारं स्वस्ति वाचन पूर्वकम् ॥

श्रीशुक उवाच–

एवं सम्प्रार्थितो विप्रः स्वचिकीर्षितमेव तत् ।
चकार नामकरणं गूढो रहसि बालयोः ।
इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते ।
नन्दः प्रमुदितो मेने आत्मानं पूर्णमाशिषाम्
ततस्तु भगवान् कृष्णः वयस्यैः व्रजबालकैः ।
सह रामो व्रजस्त्रीणां चिक्रीडे जनयन मुदम् । (१०-९)

Once, Kṛṣṇa's friends told Yaśoda that he has eaten soil, when Yaśoda questioned him. He opened his mouth to prove his innocence. Yaśoda saw the whole world in it. She realised that her son was the Supreme God himself.

iii) एकदा क्रीडमानास्ते रामाद्याः गोपबालकाः
कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ।
नाहं भक्षितवानम्ब सर्वे मिथ्याभिशंसिनः ।
यदि सत्यं गिरस्तर्हि समक्षं पश्य मे मुखम् ।
सा तत्र ददृशे विश्वं जगत् स्थास्नु च खं दिशः ।
साद्रिद्वीपाब्धि भूगोलं स वाय्वग्नीन्द्रतारकम् ।
त्रैय्या चोपनिषद्भिश्च साङ्ख्ययोगैश्च सात्वतौ ।
उपगीयमानमाहात्म्यं हरिं साऽमन्यतात्मजम् ॥ (१०-९)

Yaśoda tries to tie Kṛṣṇa

One day Yaśoda started churning the curd herself as the servants were entrusted with other duties. Kṛṣṇa started the mischief of breaking the pots of the curd and spilling the milk pots. Yaśoda was upset and tried to tie him to wooden mortar. The rope became short of two inches. She brought longer one and that also became short of two inches. She went on bringing longer ropes but was not able to tie him. Kṛṣṇa took pity on her and finally enabled her to tie him.

एकदा गृहदासीषु यशोदा नन्दगेहिनी
कर्मान्तरनियुक्तासु निर्ममन्थ स्वयं दधि ।
सञ्जातकोपः स्फुरितारुणाधरं सन्दश्य दद्भिः दधिमण्डभाजनम्

भित्वामृषाश्रुः दृषदश्मनारहो जघासहैयंगवमन्तरं गतः ।
तं मत्वाऽर्भकमव्यक्तं मर्त्यलिङ्गमधोक्षजम् ।
गोपिका उलूखले दाम्ना बबन्ध प्राकृतं यथा ।
तद्दामबध्यमानस्य स्वार्थकस्य कृतागसः ।
द्व्यङ्गुलोनमभूत् तेन सन्दधेऽन्यच्चगोपिका ।
यदासीत् तदपि न्यूनं तेनान्यदपि सन्दधे ।
तदपि व्यङ्गुलं न्यूनं यद्यदादत्तबन्धनम् ।
स्वमातुः खिन्नगात्रायाः विस्रस्तकबरस्रजः ।
दृष्ट्वा परिश्रमं कृष्णः कृपयासीत् स्वबन्धने ।। (१०-१०)

The two Yakṣas born as Arjuna trees

Then Yaśoda again was engaged in her homework. Kṛṣṇa saw two Arjuna trees. These were two yakṣas earlier of the name of नलकूबर and मणिग्रीव. These were cursed by Nārada to be born as trees.

कृष्णस्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः ।
अद्राक्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मतौ ।
पुरा नारदशापात् तौ वृक्षतां प्रापितौ मदात् ।
नल कूबरमणिग्रीवावितिख्यातौ श्रियान्वितौ ।।

Parikṣit desires to know the background of the two Yakṣas

King Parīkṣit requested Śrī Śuka to explain to him the circumstances under which Nārada cursed these two. Śrī Śuka explained. These joined as the servants of Rudra. In the garden of Kailasa in the river Ganga these were sporting with young women heavily drunk. Nārada arrived there. The young women put on their garments. But these two remained naked. Nārada was disturbed. These had become arrogant because of their richness. Nārada thought rich persons indulge in all sorts of aggressive activities. It is better to be poor. Poverty brings humility and self control. I should cut to size these two arrogant. He cursed them to become non-sentient objects. After a long time by the grace of the Supreme God you will attain your original form. As a result of Nārada's curse, these are born as twin Arjuna tree.

To keep the Nārada's words, Kṛṣṇa pushed the wooden mortar between these twin trees and made them to fall. From the broken trees, two yakṣas emerged. They

offered profuse prayers to Śrī Kṛṣṇa. Prostrated at his feet and moved towards the northern direction.

राजोवाच–

i) कथ्यतां भगवन्नेतत् तयोः शापस्य कारणम् ।

श्रीशुक उवाच–

रुद्रस्यानु चरौ भूत्वा सुदृप्तौ धनदात्मजौ
वारुणीं मदिरां पीत्वा मदघूर्णितलौचनौ ।
स्त्रीजनैरनुगायद्भिः चेरतुः पुष्पिते वने ।
अन्तःप्रविश्य गङ्गायामम्भोज वनराजिनि
चिक्रीडितुः युवतिभिः गजाविव करेणुभिः

ii) यदृच्छया च देवर्षिः भगवान् तत्र कौरव
अपश्यत् नारदो देवौ क्षीबाणौ समबुध्यत
तं दृष्ट्वा व्रीडिताः देव्यः विवस्त्राः शापशङ्किताः ।
वासांसि पर्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ ।
तौ दृष्ट्वा मदिरामत्तौ श्रीमदान्धौ सुरात्मजौ
तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ।
नह्यन्यो जुषतो जोष्यात् बुद्धिभ्रंशो रजोगुणः ।
स्त्रीमदादाभिजात्यादेः यत्र स्त्रीदूतमासवम् ।
असतः स्त्रीमदान्धस्य दारिद्र्यं परमाञ्जनम् ।
आत्मौपम्येन भूतानि दरिद्रः परमीक्षते ।
तदहं मत्तयोः माध्व्या वारुण्या श्रीमदान्धयोः
तमोमदं हरिष्यामि स्त्रैणयोरजितात्मनोः
अतोर्हतः स्थावरतां स्यातां नैव यथा पुनः ।
स्मृतिः स्यात् मत्प्रसादेन तत्रापि मदनुग्रहात् ।
वासुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते ।
वृत्ते स्वर्लोकतां भूयो लब्ध्वा भक्तौ भविष्यतः ।
स एवमुक्त्वा देवर्षिः गतो नारायणाश्रमम् ।

iii) इत्यन्तरेणार्जुनयोः कृष्णस्तु यमयोः ययौ ।
आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलम् ।
बालेन निष्कृष्ट मूलुखलं तद् दामोदरेण तरसोत्कलितङ्घ्रिबन्धौ

निष्पेततुः पवनविक्रमितातिवेलस्कन्धप्रवाल विटपौ कृतचण्डशब्दौ
तत्र श्रिया परमया ककुभः स्मरन्तौ
सिद्धावुपेत्य कुजयोरिव जातवेदौ ।
कृष्णं प्रणम्य शिरसाखिललोकनाथं
बद्धाञ्जली विरजसाविदमूचतुःस्म
नमः परमकल्याण नमस्ते विश्वमङ्गल ।
वासुदेवाय शान्ताय यदूनां पतये नमः ।
अनुजानीहि नौ भूमन् सदानुग्रह किङ्करौ ।
दर्शनं नो भगवतः ऋषेरासीदनुग्रहात् । (१०-११)

Nanda and Gopas move from Gokula to Vṛndāvana

The elder Gopas were worried by the repeated occurence of the calamities at Gokula. Nandagopa suggested that we should leave this place before another calamity befalls on us. The Vrindavan forest area is rich with the trees, plants and grass. Let us move to that place today only. Arrange for the carts. Let the cows and the stock of food grains move first. The gopas put the aged, women and children on the cart and started. Yaśodā and Rohiṇi occupied one special cart with Kṛṣṇa and Balarāma. Entering Vrindāvana, the Gopas arranged new residences for dwelling. They were delighted by the sight of Govardhana hill, and the vast sand area along the river Yamuna. They took the cows and calfs around the rich forest area. The gopa boys played on floot, danced, threw the stones at the fruits of the tree, and immitated the sounds of parrots and peacocks.

गोपवृद्धाः महोत्पातान्ननुभूय बृहद्वने ।
नन्दादया समागम्य व्रजकार्यमचिन्तयन् ॥
तत्रोपनन्दनामा गोपो ज्ञानवयोधिकः ।
देशकालार्थतत्त्वज्ञः प्रियकृद् रामकृष्णयोः ॥
उत्त्थातव्यमितोऽस्माभिः गोकुलस्य हितैषिभिः ।
आयान्त्यत्र महोत्पाताः प्रजानां नाशहेतवः ॥
वनं वृन्दावनं नाम पशव्यं नवकाननम् ।
गोपगोपीगवां सेव्यं पुण्याद्रितरुवीरुधम् ।
तत् तत्राद्यैव यास्यामः शकटान् युङ्ध्वं माचिरम् ॥

गोधनान्यग्रतो यान्तु भवतां यदि रोचते ।
अथ नन्दः समाहूय गोपानिदमभाषत ।
श्वोऽतो वृन्दावनं यामो यत्ता भवथ माचिरम् ।
वृद्धान् बालान् स्त्रियो राजन् सर्वोपस्करणानिच ।
अनस्वारोप्य गोपालान् ययुः सहपुरोहिताः ।
तथा यशोदा रोहिण्यावेकं शकटमास्थितौ ।
रेजुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके
वृन्दावनं सम्प्रविश्य सर्वकालसुखावहम्
तत्र चक्रुः व्रजावासं शकटैरर्धचन्द्रवत् ।
वृन्दावनं गोवर्धनं यमुनापुलिनानिच
वीक्ष्यासीदुत्तमा प्रीतिः राममाधवयोर्नृप
क्वचिद् नदयतो वेणून् क्षेपणैः क्षिपतः क्वचित् ।
क्वचित् यमुनातीरे वत्सान् चारयतो स्वकैः । (१०-१२)

Vatsāsura and Bakāsura were killed

A demon appeared assuming the form of calf to kill Kṛṣṇa. Kṛṣṇa caught hold of him by his leg and tail and threw him. His huge body fell on the ground.

When gopa boys went to a pond with their calf to drink the water they saw a demon who had assumed the form of a Baka. He took the branch of a Tāla tree and hit Kṛṣṇa. Kṛṣṇa pounced on him and cut his mouth into two pieces like breaking a cane.

i) वयस्यैः कृष्णबलयोः जिघांसुः देत्य आगमत् ।
तं वत्सरूपिणं वीक्ष्य वत्सयूथगतं हरिः ।
दर्शयन् बलदेवाय शनैः मुग्ध इवासदत् ।
गृहीत्वाऽपरपादाभ्यां सहलाङ्गूलमच्युतः ।
भ्रामयित्वा कपित्थाग्रे प्राहिणोत् गतजीवितम् ।

ii) स वै बको नाम महानसुरो बकरूपधृक् ।
आगत्य तरसा कृष्णं तीक्ष्णतुण्डोऽग्रसद्बली ।
तमापतन्तं निगृह्य तुण्डयोः दोर्भ्यां बकं कंससखं सतां पतिः ।
पश्यत्सु बालेषु ददार लीलया मुदावहो वीरणवद् दिवौकसाम् ।

अहो बतास्यबालस्य बहवो मृत्यवोऽभवन् ।
अप्यासीद् विप्रियं तेषां कृतं पूर्वं यतो भयम् ।
इति नन्दादयो गोपाः रामकृष्णकथां मुदा
कुर्वन्तो रममाणाश्च नाविन्दन् भववेदनाम् । (१०-१२)

Balarāma kills Dhenuka

At Vrindāvana Kṛṣṇa Balarāma and Gopa boys led a delightful life. They danced, sang, immitated the sounds of wild life and various birds.

Śrīdāma a close friend of Kṛṣṇa and Balarāma informed them that there is a vast tāla tree grove with plenty of fragrant fruits. Kṛṣṇa asked Balarāma to go and bring some fruits. Balarāma entered the grove, forcefully moved the tāla tree. Large number of fruits fell down. The demon dhenuk who was in the grove was upset and pounced on Balarāma. Balarāma took him by his legs and moved arround. The demon fell dead. Dhenuka's relatives and associates rushed towards Balarāma. They were all thrown out.

One day Kṛṣṇa went to river Yamuna with his friends. The gopas accompanying him drank the Yamuna water. It was highly poisonous. They fell on the ground lifeless. Kṛṣṇa revived their life by the nector of his eyesight.

i) एवं वृन्दावनं कृष्णः श्रीमत् प्रीतमनाः पशून् ।
रेमे सञ्चारयन्नद्रेः सरिद्रोधस्सु सानुगः ।
क्वचिद् गायति गायत्सु मदान्धालिष्वनुव्रतैः ।
उपगीयमानचरितः सखि सङ्कर्षणान्वितः
क्वचिच्च कलहंसानामनुकूजतिकूजितम्
अभिनृत्यति नृत्यन्तं बर्हिणं हासयन् क्वचित् ।
चकोर क्रोञ्चचक्राह्व भारद्वाजालिबर्हिणाम् ।
अनुरौतिस्म सत्त्वानां भीतवद् व्याघ्रसिंहयोः ।

ii) श्रीदामा नाम गोपालो रामकेशवयोः सखा
सुबलाशोक कृष्णाद्यान् गोपान् प्रेम्णेदमब्रवीत् ।
फलानि तत्र भूरीणि पतन्ति पतितानि च
सन्ति किन्त्ववरुद्धानि धेनुकेन दुरात्मना
बलः प्रविश्य बाहुभ्यां तालान् सम्परिकम्पयन् ।

फलानि पातयामास मतङ्गज इवौजसा
ततः कृष्णं च रामं च ज्ञातयो धेनुकस्य ये
क्रोष्टारोभ्यद्रवन् सर्वे संरब्धाः हतबान्धवाः
तांस्तानापततः कृष्णो रामश्च नृपलीलया ।
गृहीतपश्चाच्चरणान् प्राहिणोत् तृणराजसु
फलप्रकरसङ्कीर्णा दैत्यदेहैः गतासुभिः ।
रराज भूः सतालाग्रैः घनैरिव नभस्तलम् ।

iii) एवं स भगवान् कृष्णो वृन्दावनगतः क्वचित्
ययौ राममृते राजन् कालिन्दीं सखिभिः वृतः ।
अथ गावश्च गोपाश्च निदाघातपपीडिताः ।
दुष्टं जलं पपुस्तस्याः तृषार्ताः विषदूषितम् ॥
विषाम्भः तदुपस्पृश्य दैवोपहतचेतसः ।
निपेतुर्व्यसवः सर्वे मूर्छिता वै कुरूद्वह ॥
वीक्ष्य तान् वै तथाभूतान् कृष्णो योगेश्वरेश्वरः ।
ईक्षयाऽमृतवर्षिण्या सनाथान् समजीवयत् ॥ (१०-१३)

Kāliya serpant pushed out of Kālind rever

On seeing the river contaminated by poison Kṛṣṇa thought of clearing it and pushed out the Kāliya serpant.

At the river Kālindi a deep pool of water was completely poisoned. The birds moving over it used to fall down. The animals and other living beings walking on the bank of the river used die by the wind coming accross the river. Kṛṣṇa jumped into that pool of water from the top of a Kadamba tree. The Kāliya serpant rushed towards him and bit his feet. The cows, calfs and other animals were full of tears in their eyes as they expected the harm to Kṛṣṇa.

At Vrindāvana there were signes of a calamity befalling on it. The Gopas led by Nanda arrived at the river Kālindi. They wanted to rush into the pool to save Kṛṣṇa. Balarāma prevented them by Saying that Kṛṣna is quite capable of taking care of himself. The Kāliya encircled him raising its hoods. With its two toungs started to lick him. Kṛṣṇa stood on its hood and started to dance. The hoods that were raised were bent by Kṛṣṇa by his foot. Kāliya started ommiting blood. Kāliya's wives arrived. They said you have done the right thing in punishing an evil and aggressive being. It is a

favour to us. They offered prayer to him and appealed to him to pardon their husband. Kindly spare the life of our husband. Responding to their appeal, he released him. He ordered Kāliya he should immediately vacate this river and return to his original place Ramaṇak. He returned with his wives and children.

i) कालिन्द्यां कालियस्यासीत् ह्रदः कश्चिद् विषाग्निना ।
श्रप्यमाणपयो यस्मिन् पतन्त्युपरिगाः खगाः
कृष्णः कदम्बमधिरुह्य ततोऽतितुङ्गात्
आस्फोठ्य गाढरशनो न्यपतत् विषोदे ।
आश्रुत्य तत् स्वसदनाभिभवं ससैन्यः
चक्षुःश्रवाः समसरत् तममृष्यमाणः ॥
क्रीडन्तमप्रतिभयं कमलोदराङ्घ्रिं
सन्दश्यमर्मसु रुषा भुजगः चछाद ।
गावो वृषा वत्सतर्यः क्रन्दमानाः सुदुःखिताः ।
कृष्णे न्यस्तेक्षणा भीताः रुदन्त्य इव तस्थिरे ।
अबालवृद्धवनिताः सर्वेऽङ्ग पशुवृत्तयः ।
निर्जग्मुः गोकुलाद् दीनाः कृष्णदर्शनलालसाः ।

ii) ते अन्वेषमाणाः दयितं कृष्णं सूचितया पदैः ।
भगवल्लक्षणैः जग्मुः पदव्या यमुनातटम् ।
एवं परिभ्रमहतौजसमुन्नतांसमानम्य तत्पृथुशिरस्स्वधिरूढ आद्यः
तन्मूर्धरत्ननिकरस्पर्शातिताम्र पादाम्बुजो अमृतकलानिधिगुरुः ननर्त

iii) दृष्ट्वाऽहिराजमुपसेदुरमुष्यपत्न्यः ।
आर्ताः श्लथद्वसन भूषणकेशबन्धाः ॥
अपराधः सकृद् भर्त्रा सोढव्यः स्वप्रजाकृतः ।
क्षन्तुमर्हसि शान्तात्मन् मूढस्य त्वमजानतः ।
अनुगृहीष्व भगवन् प्राणान् त्यजति पन्नगः ।
स्त्रीणां नः साधुशोच्यानां पतिप्राणः प्रदीयताम् ।
इत्याकर्ण्य वचः प्राह भगवान् कार्यमानुषः
नात्र स्थेयं त्वया सर्प समुद्रं याहि माचिरम् ।
द्वीपं रमणकं हित्वा ह्रदमेतमुपाश्रितः ।
यद्भयात् ससुपर्णः त्वां नाद्यात् मत्पादलाञ्छनम् । (१०-१४)

Kāliya had come to Yamuna to avoid Garuda

King Parīkṣit asked Śrī Śuka as to why Kāliya left his place and went to Yamunā.

Nagas had agreed to offer presents to Garuda every mouth for their safety. However, Kāliya did not offer it, being over confident of his strength. Garuda was angree and attacked him. Kāliya pounced upon him raising his hood and bit him by his teeth. Garuda heavily hit him by his wings and Kāliya ran away to river Yamunā. This was a prohibited place for Garuda. Once Garuda was eating the fishes and other creatures in the Yamuna water indiscrinately. Sage Saubhari took pity on them and told him if you eat fishes or any other creature here you will die. Since then, it became a prohibitted place for Garuda.

When Krishna came out of the pool of water. Yaśoda, Rohini, Nanda all other Gopas rejoiced his arrival. When the sun was set Krishna made arrangements for them to spend the night there only. At that time forest fire errapted. All were panicky and approached Kṛṣṇa. He put off the fire.

राजो वाच–

i) नागालयं रमणकं कस्मात् तत्याज कालियः ।
कृतं किं वा सुपर्णस्य तेनैकेना समञ्जसम् ।।
उपहार्यैः सर्पजनैः मासि मासीह यो बलिः ।
वानस्पत्यों महाबाहो नागानां प्राङ् निरूपितः ।
स्वंस्वंभागं प्रयच्छन्ति नागाः पर्वणि पर्वणि ।
गोपीथायात्मनः सर्वे सुपर्णाय महात्मने
विषवीर्यमदाविष्टः काद्रवेयस्तु कालियः ।
कदर्थीकृत्य गरुडं स्वयं तां बुभुजे बलिम् ।
तच्छ्रुत्वा कुपितो राजन् भगवान् भगवत्प्रियः
विजिघांसुः महावीर्यं कालियं समुपाद्रवत्
सुपर्णपक्षाभिहतः कालियोऽतिविह्वलः ।
ह्रदं विवेश कालिन्द्याः तदगम्यं दुरासदम् ।

ii) तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सितम् ।
निवारितः सौभरिणा प्रसह्य क्षुधितोहरत् ।
अत्र प्रविश्य गरुडो यदि मत्स्यान् स खादति ।

सद्यः प्राणै र्वियुज्येत सत्यमेतद् ब्रवीम्यहम् । (१०-१५)

iii) ततश्चास्तं गते भानौ कृष्णो वासमकल्पयत् ।
सरामः सहगोपालैः मात्रापित्रा सगोधनैः ।
एतस्मिन्नेव कालेतु व्रजे कौरवसत्तम ।
घोरः शुचिबलोद्भूतो दावाग्निः सर्वतो वृतः ।
सुप्तान् निशीथ आवृत्य प्रदग्धुमुपचक्रमे ।
इत्थं स्वजवैकल्यं निरीक्ष्य जगदीश्वरः ।
तमग्निमपिबत् तीव्रमनन्तोऽनन्त शक्तिधृक् । (१०-१५)

Kṛṣṇa Plays with Balarāma and Gopas

At Vṛndāvana Grīṣma season commenced. However it was like vasanta season because of the forest surroundings of vṛndāvana. There were trees full of flowers, deers and birds were joyfully singing. Peacocks and honey bees dancing and hovering arround. Kṛṣṇa played with Balarāma and other gopas, playing on his floot. When he started dancing the gopas used clap. They moved in a circular way, jumped, dragged each other, threw the bilva fruits and āmalak fruits at each other, played hide and seek, jumped like frogs. They wandered on the banks of the streams, ponds, creaper groves, on sands and lakes.

व्रजे विक्रीडतोरेवं गोपालच्छद्मरूपिणोः ।
ग्रीष्मो नामर्तुरभवन्नातिप्रेयान् मनीषिणाम् ।
स च वृन्दावनगुणैः वसन्त इव लक्षितः ।
यत्रास्ते भगवान् साक्षात् रामेण सह केशवः ।
श्रीमद्वनं कुसुमितं नदच्चित्रमृगद्विजम् ।
गायन्मयूर भ्रमरं कूजत्कोकिल सारसम् ।।
क्रीडिष्यमाणः तत्कृष्णो भगवान् बलसंयुतः ।
वेणुं विरणयन् गोपैः गोधनैः संवृतोऽविशत् ।।
प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः
रामकृष्णादयो गोपाः ननर्तुर्युयुधु र्जगुः
भ्रामणैः लङ्घनैः क्षेपैरास्फोटनविकर्षणैः ।
चिक्रीडितुः नियुद्धेन काकपक्षधरावुभौ ।
क्वचिद् बिल्वैः कवचित् कुम्भैः क्वचिदामलकमुष्टिभिः ।

क्वचिच्चदर्दुरप्लावैः विविधैरुपहासकैः ।
अस्पृश्य नेत्रबन्धाद्यैः क्वचिद् मृगखगेहया
एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने
नद्यद्रिर्वेणु कुञ्जेषु पुलिनेषु सरस्सु च । (१०-१६)

Balarāma kills Pralamba

When they were looking after their cows the demon pralamba arrived in the form of a gopa. Kṛṣṇa who knew his cunning intention allowed him to join the group of gopas. He proposed the dual between the gopas forming two groups led by himself and Balarāma. Pralamba joined Kṛṣṇa's group. Those who were defeated were required to carry an their shoulders those who won and run. Balarāma's group won. Kṛṣṇa carried Śrīdāma on his shoulders, bhadrasena carried Vṛṣabha, and Pralamba had to carry Balarāma. Pralamba was not able to carry Balarāma who was very heavy and the speed of his running was reduced. He revealed his cruel form. Balarāma was stunned for a moment. When he recovered, he found that he was being taken away by the demon over the sky. Balarāma forcibly hit him on his head. Pralamba's head was broken into pieces, he ommited blood and collpsed. The gopas were wonderstruck and hailed Balarāma's victory.

i) पशून् चारयतो गोपैः तद्वने रामकृष्णयोः
गोपरूपी प्रलम्बोगादसुरस्तज्जिघांसया
तं विद्वानपि दाशार्हो भगवान् सर्वदर्शनः
अन्वमोदत तत्संख्यं वधं तस्य विचिन्तयन्

ii) आचेरुः विविधाः क्रीडाः वाह्यवाहकलक्षणाः ।
तत्रारोहन्ति जेतारो वहन्ति पराजिताः ।
रामसङ्घट्टिनो ये तु श्रीदाम वृषभादयः ।
क्रीडायां जयिनः तांस्तानूहुः कृष्णादयो नृप
उवाह कृष्णो भगवान् श्रीदामानं पराजितः ।
वृषभं भद्रसेनस्तु प्रलम्बो रोहिणीसुतम् ॥

iii) रुषाहनन् शिरसि दृढेन मुष्टिना
सुराधिपो गिरिमिव वज्ररंहसा ।
स आहतः सपदि विशीर्ण शीर्षको मुखाद्
वमन् रुधिरमपस्मृतोऽसुरः

महारवं व्यसुरपतत् समीरयन्
गिरिर्यथा मघवत आयुधाहतः
दृष्ट्वा प्रलम्बं निहतं बलेन बलशालिना
गोपाः सुविस्मिता आसन् साधु साध्विति राविणः ॥ (१०-१६)

Kṛṣṇa quenches the forest fire

When the Gopas were engaged in the play the cows and other animals wandered in the forest in search of grass and entered into the area that was full of munja grass. These were caught by the forest fire and started loudly crying. When gopas did not find them near about they were worried and went in search of them identifying their movement by the marks of their foot steps. They were not able to trace the cows and returned being hungry and thirsty.

The forest fire spread widely with heavy smoke. They appealed to Kṛṣṇa to save them from this calamity. He asked them to close their eyes. Kṛṣṇa suck the fire and quenched it. Kṛṣṇa, Balarāma and gopas returned home. On learning about the death of pralamba and quenching the forest fire the gopa women realised that Kṛṣna and Balarāma were not ordinary men.

i) क्रीडासक्तेषु गोपेषु तद्गावो दूरचारिणीः ।
स्वैरं चरन्तो विविशुः तृणलोभेन गह्वरम् ॥
अजा गावो महिष्यश्च निर्विशन्त्यो वनाद् वनम् ।
मुञ्जाटवीं निर्विविशुः क्रन्दन्त्यो दावतर्षिवाः ।
तेऽपश्यन्तः पशून् गोपाः रामकृष्णादयस्तदा
जातानुतापाः न विदुः विचिन्वन्तो गवां गतिम् ।
तृणैः तत्खुरदच्छिन्न गोष्पदैरङ्कितैर्गवाम् ।
मार्गमन्वगमन् सर्वे नष्टजीवा विचेतसः ॥
मुञ्जाटव्यां भ्रष्टमार्गं क्रन्दमानाः स्वगोधनम् ।
अप्राप्य तृषिताः शान्ताः ततस्ते सन्न्यवर्तयन् ।
ततः समन्ताद् वनधूमकेतुः यदृच्छयाऽभूत्
क्षयकृत् वनौकसाम् ।
कृष्ण कृष्ण महावीर्य हे रामामोघ विक्रम ।
दावाग्निना दह्यमानान् प्रपन्नान् त्रातुमर्हतः ।

ii) वचो निशम्य कृपणं बन्धूनां भगवान् हरिः ।
निमीलयत मा भैष्ट लोचनानीत्यभाषत ।
तथेति मिषिताक्षेषु भगवानग्निमुल्बणम् ।
पीत्वा मुखेन तान् कृच्छ्राद्योगाधीशो व्यमोचयत् ।।
गाः सन्निवर्त्य सायाह्ने सहरामो जनार्दनः ।
वेणुं विरणयन् गोष्ठमागात् गोपैरभिष्टुतः ।
गोपीनां परमानन्द आसीत् गोविन्द दर्शने ।
क्षणं यथा युगशतं यासां येन विनाऽभवत् । (१०-१७)

Description of Rainy reason

Then the rainy season commenced. The clouds gathered over the sky, the vidyut flashed, sunrays became dim. The clouds started pouring the water suck from the earth and sea during the last eight months. The earth was full of waters. The frogs were vociforus. Even the small streams were overflowing. The fields were full of crops. Lake and ponds were full of water. The large rivers rushed into the sea. The rain waters were flowing down the slopes of the mountains. The paths were invisible by the growth of the grass. The peacocks responded to the the sound of the clouds. The trees were green by sucking the rain water.

Kṛṣṇa went into the forest with gopas to enjoy the pleasure of the rainy season.

Sometime they went into the caves of the hill and ate the fruits. They sat on the rock and ate the curds rice brought from home. After the pleasure of rainy season the Śarad season started. The clouds made way for a clear sky. The water of lake and ponds became clear. The mountain slopes were free from the water. The sea became calm. The stars over the sky were clearly visible and the moon was shining. In the villages and cities people observed Indradhvaja festival. The merchants moved out of their places for their commercial activities.

i) ततः प्रावर्तत प्रावृट् सर्वसत्वसमुद्भवा ।
विद्योतमानपरिधिः विस्फूर्जितनभस्तला ।
अष्टौ मासान् निपीतं यद् भूम्यामुदमयं वसु ।
स्वगोभिर्मोक्तुमारेभे पर्जन्यः काल आगते ।
तडित्वन्तो महामेधाः जडश्वसनवेपिताः

प्राणिनां जीवनं हि अम्बु मुमुचुः करुणा इव ॥
निशामुखेषु खद्योताः तमस्वाभान्ति न ग्रहाः ।
यथा पापेन पाखण्डाः नहि वेदाः कलौ युगे ।
श्रुत्वा पर्जन्यनिनदं मण्डूकाः व्यसृजन् गिरः ।
तूर्ष्णीं शयनाः प्राग् यद्वत् ब्राह्मणाः नियमात्यये ।
आसन्नुत्पथवाहिन्य क्षुद्रनद्योनुशुष्यतीः ।
पुंसो यथाऽस्वतन्त्रस्य देहो द्रविणसम्पदा ।
क्षत्राणि क्षेत्रसम्पद्भिः कर्षकाणां मुदं ददुः ।
मानिनामनुतापं वा विपत्तिं वा तदजानताम्
जलस्थलौकसः सर्वे नववारि निषेवया
अबिभ्रन् रुचिरं रूपं यथा हरिनिषेवया ।
सरिद्भिः सङ्गतः सिन्धुः चुक्षोभ व्यसनोर्मिमान् ।
अपक्वयोगिनः चित्तं गुणयुग् यथा ।
गिरयो वर्षधाराभिः हन्यमानाः न विव्यथुः
अभिभूयमानाः व्यसनैः यथाऽधोक्षजचेतसः ।
एवं वनं तद्वर्षिष्ठं पक्वखर्जूरजम्बूवत्
गोपालैः वृतो रन्तुं सबलः प्राविशद् हरिः ।
क्वचिद् वनस्पतिक्रोडे गुहायां चाभिवर्षति ।
निर्विशन् भगवान् रेमे कन्दमूलफलाशनैः
दध्यौदनमुपानीतं शिलायां सलिलान्तिके
सम्भोजनीयैः बुभुजे गोपैः सङ्कर्षणान्वितः ।
प्रावृट्श्रियं च तां वीक्ष्य सर्वभूतमुदावहाम्
भगवान् पूजयाश्चक्रे आत्मशक्त्युपबृंहिताम् ।
ii) एवं निवसतोस्तत्र रामकेशवयो र्व्रजे
शरत् समभवत् व्यभ्रा स्वच्छाम्बुप्लुषितानला ।
व्योम्नोब्दमभ्रशाबल्यं भुवाः पङ्कमपपां मलम् ।
शरज्जहाराश्रमिणां कृष्णाभक्तिर्यथाशुभम् ।
सर्वस्वं जलदा हित्वा विरेजुः शुभ्रवर्चसः ।
यथा त्यक्तैषणाः शान्ताः मुनयो मुक्तवकल्पषाः
निश्चलाम्बुरभूत् तूर्ष्णीं समुद्रः शरादागमे ।

आत्मन्युपरते यद्वत् मुनिर्व्यपगतागमः ।
पुरग्रामेष्वाश्रमिणामिन्द्रयागमहोत्सवैः ।
बभौ भूः पक्वसस्याढ्या कलाभ्यां नितरां हरेः ।
वणिजो नगरात् स्वीयात् निर्गत्यार्थान् प्रपेदिरे ॥ (१०-१८)

Kṛṣṇa's play on the floot delights Gopis

During Śarat season when the rows of the trees and creepers were studed with flowers. Kṛṣṇa moved deep into the forest and played his floot sweetely. He wore a cap of peacock feathers, karnikār flowers over the ear, the cloth of golden colour and garland of vaijayanti. His play on floot was accompanyed by the artistic movement of eyebrows and the fingers. The gopis described the impact of the floot to their friends. It was a festival to the ears and eyes. The floot is lucky to have a touch of the lips of Kṛṣṇa. The trees are dropping the tears of joy in the form of flowers. The peacocks are dancing following the music of the floot. The deers are appreciating by their joyfull look. The cows are attentive slowing down the eating of grass. The birds are listening sitting on the branches of trees. The rivers are touching the feet of Kṛṣṇa with respect.

i) इत्थं शरत्स्वच्छलं पद्माकरसुगन्धिना ।
न्यविशत् वायुना वीतं सगोगोपालकोऽच्युतः
बार्हापीडं नटवरवपुः कर्णयोः कर्णिकारम् ।
बिभ्रद्वासः कनककपिशां वैजयन्तीं च मालाम् ।
रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दैः ।
वृन्दारण्यं स्वपदरमणं प्राविशद् गीतकीर्तिः ।
इति वेणुरवं राजन् सर्वभूतमनोहरम् ।
श्रुत्वा व्रजस्त्रियः सर्वा वर्णयन्त्यो अभिरेमिरे ॥
चूतप्रवालबर्हस्तबको हालाब्ज मालानुरक्तपरिधान विचित्रवेषौ
मध्ये विरेजतुरलं पशुपालगोष्ठ्यां रङ्गे यथा नटवरौ क्वचगायमानौ ।
गोप्यः किमाचरदयं कुशलं स्म वेणुः दामोदराधरसुधासरसाग्रगेयम् ।
भुङ्क्ते यदवशिष्टरसौधमार्गे हृष्टत्वचोश्रुमुमुचुस्तरवः सदर्भाः ।
गोविन्दवेणुमनुयत्त मयूरनृत्यं प्रेक्ष्याद्दताऽनुचर चरितान्यसमस्तसत्वम् ।
आपीय वेणुरचितं च सकृष्णसाराः पूजां दधुर्विरचितां प्रणयावलोकैः ।
गावश्च कृष्णमुख निर्गतवेणुगीतपीयूषमुत्तमुत्तभित वर्णपुटैः पिबन्तः

सानन्द नम्रकवलाश्च तस्थुः प्रायो बताम्बमुनयो विहगा वनेस्मिन्
कृष्णेक्षणाः तदुदितं कलवेणुगीतम् आरुह्य ते द्रुमभुजान् रुचिरप्रवालान्
शृण्वन्तमीलितदृशो विगतान्यवाचः ।
नद्यस्तदा तदुपधार्य मुकुन्दगीतमावर्तलक्षित मनोभवभग्नवेगाः
आलिङ्गन प्रमुदितोर्मिभुजैः मुरारेः
गृण्हन्ति पादयुगलं कमलोपहाराः ।
एवं विधा भगवतो या वृन्दावनचारिणः ।
वर्णयन्त्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः ॥ (१०-१९)

The Gopis perform Kātyāyini ritual

When the Hemanth Season commenced the young gopa girls performed the ritual of Kātyāyani. They took a bath in the Yamunā river prepared the Idol of Kātyāyini by sand. Worshipped the deity by offering the flowers, fruits and light. They prayed Kātyāyini to bestow Kṛṣṇa as their husband. Holding the hands of each other they went to Yamunā every day for a full month and completed the ritual of Kātyāyini.

हेमन्ते प्रथमे मासि नन्दव्रजकुमारिकाः ।
चेरुर्हविष्यं भुञ्जानाः कात्यायन्यर्चनव्रतम् ।
कात्यायनि महामाये महायोगि न्यधीश्वरि ।
नन्दगोपसुतं देवि पतिं मे कुरु ते नमः ॥
एवं मासं व्रतं चेरुः कुमार्यः कृष्णचेतसः ।
आप्लुत्याम्भसि कालिन्द्या जलान्ते चोदितेऽरुणे ।
कृत्वा प्रतिकृतिं देवीमानर्चुः नृप सैकतीम् ।
भद्रकालीं समानर्चुः भूयान्नन्दसुषा इति ॥ (१०-२०)

Kṛṣṇa takes away the cloth of the Gopis

One day Gopa girls entered into the river placing their cloths on the bank. Kṛṣṇa arrived there, took their cloths and climbed on a neepa tree. Kṛṣṇa told the girls to come near the tree one by one and take their cloth. On seeing Kṛṣṇa the girls sank into the river water upto the neck bashfully and appealed to Kṛṣṇa to return their cloth and declared that they will be his servants. Kṛṣṇa told them 'If you are my servants you have to listen to me. Come one by one and take your cloth. They started coming, covering their private part by one hand. Kṛṣṇa said you have committed a sin by taking

your bath naked. Hence, you have to offer namaskara by folded hand. On observing his suggestion, he returned the cloth.

i) नदीं कदाचिदागत्य तीरे निक्षिप्य पूर्ववत्
वासांसि कृष्णं गायन्त्यो विजहुः सलिले मुदा ॥
तासां वासांस्युपादाय नीपमारुह्य सत्त्वरः ।
हसद्भिः प्रहसन् बालैः परिहासमुवाचह ॥
अत्रागत्याबलाः कामं स्वं स्वं वासः प्रगृह्यताम् ।
सत्यं ब्रवाणि नो नर्म यद् यूयं व्रतकर्शिताः ।

ii) श्यामसुन्दर ते दास्यः करवाम तवोदितम् ।
देहि वासांसि धर्मज्ञ वेपितानां महाबल ॥

iii) भवन्त्यो यदि मे दास्यो मयोक्तं वा करिष्यथ ।
अत्रागत्य स्ववासांसि प्रतीच्छत समुध्यमाः ।
ततो जलाशयात् सर्वाः दारिकाः शीत वेपिताः ।
पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुस्तीरमङ्गना

iv) बद्ध्वाञ्जलिं मूर्ध्र्यपनुत्तयेऽहंसः
कृत्वा नमो वो वसनं प्रगृह्वताम् ।
मय्यावेशितधियां कामः कामाय कल्पते ।
भर्जिताः .क्वथिता धानाः प्रायो बीजाय नेष्यते ॥ (१०-२०)

Kṛṣṇa wanders in the forest and praises the services of trees

Kṛṣṇa accompanied by gopas took the cows far away. In the hot sun of the Summar, the tree served as umbrela. He told his friends Śrīdāma, Subala, Amsu, Tejaswin and others. Look at these trees, these serve the people withstanding the heat, cold and the rain. By their leaves, flowers, fruits, roots and wood they provid nurishment to all living beings. The life of leaving beings is worthy if they serve people by words, action and thought.

Kṛṣṇa asks the Gopas to seek the food from the Brāhmaṇas engaged in the performance of Aṅgīrasa yāga

As they had walked quite a distance, the gopas felt hungry. They requested Kṛṣṇa to arrange the food for them. Kṛṣṇa informed them that in a near by place. Some Brāhmaṇas are performing angīrasa yāga. Request them to give the food to you

mentioning my name. The gopas went to that place and requested Brāhmaṇas to provide them food. They stated that excepting Santramaniyāga or paśuyāga food from Dixita can be taken at other yāgas. The brāhmaṇas did not respond. They did not realise that devatā, dravya, priest, agni, yajamāna and all activities of the sacrifice primarily belong to Śrī Kṛṣṇa. The gopas were disappointed and returned.

i) रामराम महाबाहो कृष्ण दुष्ट निबर्हण ।
एषा वै बाधते क्षुन्नः तच्छान्तिंकर्तुमर्हत ॥
ii) प्रयात देवयजनं ब्राह्मणाः ब्रह्मवादिनः ।
सत्रमाङ्गिरसं नाम ह्यासते स्वर्गकाम्यया ।
तत्र गत्वौदनं गोपाः याचतास्मद्विसर्जिताः ।
कीर्तयन्तो भगवतः आर्यस्य मम चाभिधाम् ।
गाश्चारयन्तावविदूर ओदनं रामाच्युतौ वोभिलषतो बुभुक्षितौ
तयोर्द्विजा ओदनमर्थिनोर्यदि श्रद्धा च वो यच्छतधर्म वित्तमाः
इति ते भगवद् याश्चां शृण्वन्तोपि न शुश्रुवुः ।
क्षुद्राशाः भूरिकर्माणो बालिशाः वृद्धमानिनः ॥
न ते यदोमिति प्राचुः न नेति च परन्तप ।
गोपा निराशाः प्रत्येत्य तथोचुः कृष्णरामयोः ॥ (१०-२१)

Kṛṣṇa suggests that you may approach their wives

Kṛṣṇa told to go once again ask the wives of brāhmaṇas to give you the food. The gopas went and requested the wives of the brāhmaṇas. The wives were very happy to know that Kṛṣṇa is here.

They prepared four types of food viz. bhakṣya, lehya and peya and came to Kṛṣṇa, though, their husbands tried to disuade them.

Kṛṣṇa welcomed them and appreciated their devotion. He told them one loves himself, his wives, children, house and others because of the presence of the God in them. The God is the object of the highest love. He asked them to return and help their husbands to complete the sacrifice. They told Kṛṣṇa that their husbands and other relatives may not receive them back. Kṛṣṇa assured them they will not reject you as I have blessed you. They returned. The brāhmaṇas regreted for their mistake and appriciated the devotion of their wives to Śrī Kṛṣṇa.

i) मां ज्ञापयथ पत्नीभ्यः ससङ्कर्षणमागतम् ।
दास्यन्ति काममन्नं वः स्निग्धाः मरयुषताः ध्रुवाः ॥
नमो वै द्विजपत्नीभ्यः निबोधत वचांसिनः ।
इतोऽदूरे चरता कृष्णेन प्रेषिताः वयम् ।

ii) श्रुत्वार्जुनमुपायान्तं नित्यं तद्दर्शनोत्सुकाः ।
तत्कथाक्षिप्तमनसो बभूवुः जातसम्भ्रमाः ।
चतुर्गुणं बहुविधमन्नमादाय भजतैः ।
अभिसस्रुः प्रियं सर्वाः समुद्रमिवपन्नगाः ।
निषिध्यमानाः पितृभिः भ्रातृभिः बन्धुभिः सुतैः ।
भगवत्युत्तमश्लोके दीर्घश्रुतभृताशयाः ।

iii) स्वागतं वो महाभागाः आस्यतां करवाम किम् ।
यन्नो दिदृक्षयाऽभ्येताः उपपन्नमिदं हि वः ।
प्राणबुद्धिमनःस्वात्मदारापत्यधनादयः ।
यत्सम्पर्कात् प्रियाः आसन् ततः कोन्वपरः पुमान् ॥

iv) तद् यात साध्व्यो यजनं पतयो वो द्विजातयः ।
स्वसत्रं पारयिष्यन्ति युष्माभिः गृहमेधिनः ।

v) गृण्हन्ति नो न पतयः पितरौ सुता वा
न भ्रातृबन्धुसुहृदः कुत एव चान्ये ॥
तस्मात् प्रसीद पदयोः पतितात्मनां नो ।

श्रीभगवानुवाच–

पतयो नाभ्यसूयेरन् नित्यं भ्रातृसुतादयः ।
लोकाश्च वो मयोपेताः देवा अप्यनुमन्तते ।
इत्युक्ता द्विजपत्न्यस्ताः यज्ञवाटं पुनर्गताः ।
तेचानसूयवः ताभिः स्त्रीभिः सत्रमपारयन् ॥
भगवानपि गोविन्दः तेनैवान्नेन गोपकान्
चतुर्विधानाशयित्वा स्वयं च बुभुजे प्रभुः ।
अथानुस्मृत्य विप्रास्ते अन्वतप्यन् कृतागसः ।
दृष्ट्वा स्त्रीणां भगवति कृष्णे भक्तिमलौकिकीम् ।
आत्मानं तया हीन मनुतप्ता व्यगर्हयन् । (१०-२१)

Kṛṣṇa prevents yāga for Indra by Nanda and Gopas

Kṛṣṇa found that Nanda and gopas started preparations for the performance of Indrayāga. Though he knew about it, he enquired his father Nanda as to what is the purpose of this yāga who is the deity and how it is performed. Performing yāga without the knowledge of it will not be successful. Have you cousulted the scholars who know about this yāga? Please enlighten me.

Nanda informed that Indra is the deity of rain. The clouds are his form. These shower water which sustains the life of all. Therefore, we worship him offeing the dravyas bestowed by him only. This has been the practice of a long tradition. Voilation of a religious tradition will lead to adverse consequences.

भगवानपि तत्रैव बलदेवेन संयुतः ।
अपश्यन्निवसन् गोपान् इन्द्रयागकृतोद्यमान् ।
कथ्यतां मे पितः कोऽयं सम्भ्रमो व उपागतः ।
किं फलं कस्यचोद्देशः केनवा साध्यते मखः ।

नन्द उवाच–

पर्ज्यन्यो भगवानिन्द्रो मेघाः तस्यात्ममूर्तयः
अभिवर्षन्ति भूतानां प्राणनं जीवनं पयः ।
तत् तात वयमन्ये च वार्मुचां पतिमीश्वरम् ।
द्रव्यैस्तद्रेतसासिद्धैः यजन्ते क्रतुभिः नराः ॥
य एवं विसृजेत् धर्मं पारम्पर्यागतं नरः ।
कामात् लोभात् भयाद् द्वेषात् सवै नाप्नोति शोभनम् ॥ (१०-२२)

Kṛṣṇa explained to Nanda and gopas that in providing the rain and food, Indra has no role. It is the karma of the persons that provides them good or bad results. The rain and growth of the food is a natural process. Indra has nothing to do with it. Every thing functions as per its nature. The birth and death are natural events. People Function as friends and enemies as per their nature. Therefore one should respect Karma. Performing one's duties devotedly is the right way of life. One should worship his own Karma.

Brāhmaṇas, Kṛatriyas and Vaiśyas should carry on with their respective duties agriculture, commerce, taking care of cow and other vocations should be persued devotedly. The clouds moved by the dusty wind shower the rain. Indra has nothing to

do with it. We are forest dwellers we should worship cows and hills. Let us worship these with the preparations made for Indra worship. Let havis be offered to Agni. The food prepared be served to Brāhmaṇas offering the Dakshiṇā of cows. Let the food be distributed to poor people, give grass to cows and the worship the hill.

Nanda and gopas were convinced. They worshipped cows, Brāhmaṇas and the hill. They went round the hill. Kṛṣṇa assumed a large form, declared himself to be the hill and ate a big portion of the food. The gopas were wonderstruck and worshipped Kṛṣṇa.

श्रीभगवानुवाच–

i) कर्मणा जायते जन्तुः कर्मणैव प्रलीयते ।
सुखं दुःखं भयं क्षेमं कर्मणैवातिपद्यते ।
अस्तिचेदीश्वरः कश्चित् फलरूपः सकर्मणः ।
कर्तारं भजते सोपि नह्यकर्तुः प्रभुः सः ॥
किमिन्द्रेणेह भूतानां स्वस्वकर्मानुवर्तिनाम् ।
अनीशेनान्यथा कर्तुं स्वभावविहितं नृणाम् ॥
स्वभावतन्त्रोहि जनः स्वभावमनुवर्तते ।
स्वभावस्थमिदं सर्वं सदेवासुरमानुषम् ।
तस्मात् सुपूजयेत् स्वभावस्थः स्वकर्मकृतम् ।
अञ्जसा येन वर्तेत तदेवास्यहि दैवतम् ॥

ii) रजसा चोदिताः मेघाः वर्षन्त्यम्बूनि सर्वशः ।
प्रजास्तैरेव सिद्ध्यन्ति महेन्द्रः किं करिष्यति ।
तस्मात् गवां ब्राह्मणानामद्रेश्चारभ्यतां मखः ।
य इन्द्रयागसम्भाराः तैरयं साध्यतां मखः ।
हूयन्तामग्नयः सम्यग् ब्राह्मणैः ब्रह्मवादिभिः ।
अन्नं बहुगुणं तेभ्यो दीयतां धेनुदक्षिणाः ।
एतन्मम मतं तात क्रियतां यदि रोचते ।
अयं गोब्राह्मणाद्रीणां मह्यं च दयितो मखः ॥

iii) कालात्मना भगवता शक्रदर्पजिघांसया ।
प्रोक्तं निशम्य नन्दाद्याः साध्वगृण्हन्त तद्वचः ।
उपहृत्य बलीन् सर्वा नादृता यवसंगवाम् ।

गोधनानि पुरस्कृत्य गिरिं चक्रुः प्रदक्षिणम् ।
कृष्णस्त्वन्यतमंरूपं गोपविश्रम्भणं गतः ।
शैलोस्मीति ब्रुवन् भूरि बलिमादद् बृहद्वपुः ।
तस्मै नमो व्रजजनैः स चक्रे चात्मना आत्मने ।
अहो पश्यत शैलोऽसौ रूपी नोऽनुग्रहं व्यधात् ।। (१०-२२)

Indra became angry and ordered Samvartaka clouds to rain heavily

Indra was angry for this act of Kṛṣṇa and gopas. He directed the samvartaka clouds to pour heavy rains and wash off the gopas and their cows. Kṛṣṇa is talking too much. He thinks that he is very clever. He has become very arrogant. The gopas have insulted me by his advice.

The samvartaka clouds moved forcefully shining with lightening and big sound. These poured showers very havily. The whole ground was overflowed with water. The gopas and cows started severing. They appealed to Kṛṣṇa to protect them from this onslought of the heavy rain. Kṛṣṇa found that this is the mischief of Indra. Goverdhana hill was held by him by one hand as an umbrela. He asked the gopas to enter into the caves of the hill. The hill was held by Kṛṣṇa for a full weak. Indra was wonderstruck by the yogic power of Kṛṣṇa and with drew the clouds. The gopas moved out of the hill and returned to Vṛndāvana. Yaśoda, Rohiṇi, Nanda and Balarāma were very happy, and embraced Kṛṣṇa. The gopikas sung his glory.

i) इन्द्रः तदात्मनः पूजां विज्ञाय विहतां नृप ।
गोपेभ्यः कृष्ण नाथेभ्यः नन्दादिभ्यः चुकोप ह ।।
गणं संवर्तकं नाम मेघानां चान्तकारिणाम् ।
इन्द्रः प्राचोदयत् क्रुद्धो वाक्यं चाहेश मन्युना ।।
अहो श्रीमदमाहात्म्यं गोपानां काननौकसाम् ।
कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनम् ।।
एषां श्रियावलिप्तानां कृष्णेनाप्यायितात्मनाम् ।
धुनुत श्रीमदस्तम्भं पशून् नयत संक्षयम् ।।
अहं चैरावतं नागमारुह्यानुव्रजे व्रजम् ।
मरुद्गणैः महावेगैः नन्दगोष्ठजिघांसया ।।
विद्योतमानाः विद्युद्भिः नदन्तः स्तनयित्नुभिः ।

तीव्रैः मरुद्गणैः नुन्नाः ववृषुर्जलशर्कराः ॥
स्थूणास्थूलाः वर्षधाराः मुञ्चत्स्वभ्रेषु अभीक्ष्णतः ।
जलौघैः प्लावमाना भूः नादृश्यत नतोन्नतम् ॥
अत्यासारातिवातेन पशवो जातवेपनाः ।
ii) गोपा गोप्यश्च शीतार्ताः गोविन्दं शरणं ययुः ।
कृष्ण कृष्ण महाभाग त्वन्नाथं गोकुलं प्रभो ।
त्रातुमर्हसि देवान्नः कुपिताद् भक्तवत्सल ॥
तत्र प्रतिनिधिं सम्यगात्मयोगेन साधये ।
लोकेश मानिनो मौढ्यात् हरिष्येस्यमदन्तमः ॥
इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्धनाचलम् ।
दधार लीलया कृष्णः छत्राकमिव बालकः ॥
अथाह भगवान् गोपान् हेऽम्ब तात व्रजौकसः ।
यथोपजोषं विशत गिरिगर्तं सगोधनाः ॥
iii) कृष्णयोगानुभावं तं निशाम्येन्द्रोतिविस्मितः ।
निस्तम्भो भ्रष्टसङ्कल्पः स्वान् मेघान् सन्न्यवारयत् ॥
ततस्ते निर्ययुः गोपाः स्वं स्वमादाय गोधनम् ।
शकटाटोपकरणं स्त्रीबालस्थविराः शनैः
भगवानपि तं शैलं स्वस्थाने पूर्ववत् प्रभुः ।
पश्यतां सर्वभूतानां स्थापयामास लीलया ॥
यशोदा रोहिणी नन्दो रामश्च बलिनां वरः
कृष्णमालिङ्ग्य युयुजुराशिषः स्नेहकातराः ।
शङ्खदुन्दुभयो नेदुः दिवि देवप्रचोदिताः ।
जगुर्गन्धर्वपतयस्तुम्बुरुप्रमुखा नृप ॥ (१०-२३)

The Gopas were wonderstruck and recollected the great deals of Kṛṣṇa

The gopas were wonderstruck by a seven year old boy lifting the hill on his palm. They recollected his earlier great deeds such as killing pūtanā, destroying Śakatāsura, trinavarta, releasing Naḷakubara and Manigrīva, killing Vatsāsura, Bakāsura, dancing on the head of Kaliya and asking him to leave Yamana and return to his original place. Nanda reminded them Garga's words that Kṛṣṇa is Nārāyan himself. In earlier Yugas he had taken incarnations with white, red, and yellow complexions. Now he has taken

incarnation with blue-black complexion and hence, is named as Kṛṣṇa the Gopas were delighted.

i) एवं विधानि कर्माणि गोपाः कृष्णस्य वीक्ष्य ते ।
न तद्वीर्यविदः प्रोचुः समुपेत्य सुविस्मिताः ॥
यः सप्तहायनो बालः करेणैकेन लीलया ।
कथं विभ्रत् गिरिवरं पुष्करं गजराडिव
तोके निमीलिताक्षेण पूतनायाः महो जसः ।
पीतः स्तनः सह प्राणैः कालेनेव यस्तनोः
हिन्वतोऽधश्शयानस्य मास्यस्य चरणावुदक्
अनापतद् विपर्यस्तं रुदतः प्रपदाहतम्
एकहायन आसीनो ह्रियमाणो विहायसा
दैत्येन यस्तृणावर्तमहन् कण्ठग्रहातुरम् ।
क्वचिद् हैयङ्गवस्तैन्ये मात्रा बद्धहलूखले ।
गच्छन्नर्जुनयोः मध्ये बाहुभ्यां तावपातयत्
प्रलम्बं घातयित्वोग्रं बलेन बलशालिना
अमोचयद् व्रजपशून् गोपांश्चारण्यवह्नितः
आशीविषं दमित्वा विमदं ह्रदात्
प्रसह्योद्वास्य यमुनां चक्रेऽसौ निर्विषोदकम्
क्व सप्तहायनो बालः क्व महाद्रिविदारणम् ।
ततो नो जायते शङ्का व्रज नाथ तवात्मजे

ii) नन्द उवाच–

श्रूयतां मे वचो गोपाः व्येतु शङ्का च वोऽर्भके ।
एनं कुमारमुद्दिश्य गर्गो मे यदुवाच ह ॥
वर्णास्त्रयः किलास्यासन् गृह्णतोऽनुयुगं तनूः
शुक्लो रक्तः तथापीतः इदानीं कृष्णतां गतः ।
तस्मात् नन्दकुमारोयं नारायणसमो गुणैः ।
श्रिया कीर्त्याऽनुभावेन तत्कर्मसु न विस्मयः ।
इति नन्दवचः श्रुत्वा गर्गगीतं व्रजौकसः
दृष्टश्रुतानुभावास्ते कृष्णस्यामिततेजसः
मुदिता नन्दमानजुः कृष्णं च गतविस्मयाः । (१०-२४)

Indra begs the pardon of Śri Kṛṣṇa

When Kṛṣṇa lifted the Govardhana hill and protected the gopas and cows, Indra and Kāmadhenu arrived from Svarga. Realising the greatness of Kṛṣṇa, Indra appealed to him with folded hands. You punish the arrogant persons to uphold dharma. You are the father of all. You are lord of the whole world. Small persons like me go astray from the right path. I beg your pardon for my arrogant behaviour. You take incarnations to ward off the burden on the earth. I prostrate at your feet. You favoured by preventing the heavy pouring of the clauds initiated by me.

Kṛṣṇa told him 'I prevented the yāga for you to remove your arrogance. Those who are arrogant with wealth do not realise that I will take away their wealth and punish them. You return to your place and look after your duties with humility.

i) गोवर्धने धृते शैले आसारादूरक्षिते व्रजे ।
गोलोकादावृजत् कृष्णं सुरभिः शक्र एव च ॥
विविक्त उपसङ्गम्य व्रीडितः कृतहेलनः
पस्पर्श पादयोरेनं किरीटेनार्कवर्चसा ।
विशुद्धसत्वं तव धाम शान्तं तपोमयं ध्वस्तरजस्तमस्कम् ।
अथापि दण्डं भगवान् बिभर्ति धर्मस्य गुप्त्यै खलनिग्रहाय
ये मद्विधाः स्युः जगदीशमानिनः त्वां वीक्ष्य कालेऽभयमाशु तं मदम् ।
हित्वार्यमार्गं प्रभजन्त्यपस्मयाः ईहा खलानामपि तेऽनुशासनम् ॥
स त्वं ममैश्वर्यमदप्लुतस्य कृतागसस्तेऽविदुषः प्रभावम्
क्षन्तुं ततोर्हसि मूढचेतसो मैवं पुनर्भूत् मतिरीशतेऽसती ।
तवावतारोयमधोक्षजेह भुवो भराणामुरुभारजन्मनाम् ।
नमस्तुभ्यं भगवते पुरुषाय महात्मने
वासुदेवाय कृष्णाय सात्त्वतां पतये नमः
त्वयेशानुगृहीतोस्मि ध्वस्तस्तम्भो वृथोद्यमः ।
ईश्वरं गुरुमात्मानं त्वामहं शरणं गतः ।

ii) मया तेऽकारि मघवन् मुखभङ्गोऽनुगृण्हता ।
मदनुस्मृतये नित्यं मत्तस्येन्द्रश्रिया भृशम्
गम्यतां शक्र भद्रं ते क्रियतां मेऽनुशासनम् ।
स्थीयतां स्वाधिकारेषु युक्तैः विस्रम्भवर्जितैः ॥

Kāmadhenu and Indra perform abhisheka on Kṛṣṇa

Kāmadhenu also praised Kṛṣṇa 'you are the Supreme God. You have taken incarnation to ward off the burden on the earth. Kāmadhenu poured her milk on Kṛṣṇa along with the water of ākāśagangā by the trunk of the devine elephant Airāvata.

Indra also performed abhiśeka accompanied by Devamātā.

Tumburu, Nārada, Gandharvas and Vidyādharas sung the glory of Śrī Kṛṣṇa.

i) अथाह सुरभिः कृष्णमभिनन्द्य मनस्विनी
स्वसन्तानैरुपामन्त्र्य गोपरूपिणमीश्वरम् ।
त्वं नः परमकं दैवं त्वं न इन्द्रो जगत्पते
भवाय भव गोविप्रदेवानां येच साधवः ॥
इन्द्र नस्त्वभिषेच्यामो ब्रह्मणा चोदिता वयम् ।
अवतीर्णोसि विश्वात्मन् भूमेर्भारापनुत्तये ।
एवं कृष्णमुपामन्त्र्य सुरभिः पयसात्मनः ।
जलैश्चाकाश गङ्गायाः एरावतकरोद्धृतैः ।
इन्द्रः सुरर्षिभिः साकं चोदितो देवमातृभिः
अभ्यषिञ्चत दाशार्हं गोविन्द इति चाभ्यधात
तत्रागताः तुम्बुरु नारदाद्याः गन्धर्व विद्याधर सिद्धचारणाः
जगुर्यशो लोकमलापहं हरेः सुराङ्गनासन्ननृतुः मुदान्विताः । (१०-२५)

The above summary of the events in the tenth skandha of Bhāgavata is intended to enable an avarage reader to follow the development of these closely. The long narration of each event is briefly presented in this summary. To have a direct peep into the style and the vocabulary of the narration select verses of each event are quoted. Mere narration in English will not be effective.

The description of forest, seasons, Kṛṣṇa playing with Gopa boys has its own appeal. These cannot be put in another language. To provide the joy of reading this description also the verses that describe these are quoted.

On reading this summary one may feel that there are more verses than the English narration. However, it is the total effect that is kept in mind while quoting these verses.

I take this opportunity to express my thanks to Sri N. Narasimha Rau, Chairman of Dvaita Vedanta Foundation for giving me this opportunity to edit Bhāgavata with commentaries.

I record my appreciation of the help given to me by Vidwan Krishnacharya Upadhyaya and Aluru Vamanacharya.

Mahāmahopādhyāya
Prof. K.T. Pandurangi
Hon. Director
Dvaita Vedanta Foundation

ಮುನ್ನುಡಿ
ದಶಮಸ್ಕಂಧ

ಶ್ರೀ ಗುರುಭ್ಯೋನಮಃ

ಶುಕಮುನಿಗಳಿಂದ ಅನೇಕ ರಾಜರ ಪರಮಾದ್ಭುತ ಚರಿತ್ರೆಯನ್ನು ಕೇಳಿದ ಪರೀಕ್ಷಿತರಾಜರು ಮತ್ತೆ ಪ್ರಶ್ನಿಸುತ್ತಾರೆ.

ಶುಕಾಚಾರ್ಯರೇ ಸೋಮಸೂರ್ಯರ ವಂಶದ ವಿಸ್ತಾರಚರಿತ್ರೆಯನ್ನು ತಿಳಿಸಿದ್ದೀರಿ. ಯದುಕುಲದೀಪ-ನಾದ ಭಗವಾನ್ ಶ್ರೀಕೃಷ್ಣನ ಕಥೆಯನ್ನು ನಾನು ಕೇಳಬೇಕು.

ಶ್ರವಣಮನಕಾನಂದವೀವ ಜೀವನ್ಮುಕ್ತರೂ ಗಾನ ಮಾಡುವ ಸಂಸಾರರೋಗಕ್ಕೆ ಔಷಧದಂತಿರುವ ಬ್ರಹ್ಮಾದಿಗಳೂ ಗಾನ ಮಾಡುವ ಕಥೆಯನ್ನು ಯಾರುತಾನೇ ಇಷ್ಟಪಡಲಿಕ್ಕಿಲ್ಲ. ಅಂತಹ ಕೃಷ್ಣಕಥೆಯನ್ನು ನಿರೂಪಿಸಿರಿ. ನಮ್ಮ ಪಿತಾಮಹರು ಭೀಷ್ಮಾಚಾರ್ಯ, ದ್ರೋಣಾಚಾರ್ಯ, ಕೃಪಾಚಾರ್ಯ ಮೊದಲಾದವರಿಂದ ಸಮವೇತವಾದ ದಾಟಲಸಾಧ್ಯವಾದ ಕೌರವಸೈನ್ಯಸಾಗರವನ್ನು ಅನಾಯಾಸವಾಗಿ ಸುಲಭವಾಗಿ ದಾಟಿದರು. ಇದು ಭಗವಂತನ ಅನುಗ್ರಹ. ಹೀಗಾಗಿ ಆ ಕಥೆಯನ್ನು ನಾನು ಕೇಳಬೇಕು.

ಪಿತಾಮಹಾ ಮೇ ಸಮರೇಽಮರಂಜಯೈಃ ದೇವವ್ರತಾದ್ಯಾತಿರಥೈಸ್ತಿಮಿಂಗಿಲೈಃ ।
ದುರತ್ಯಯಂ ಕೌರವ ಸೈನ್ಯಸಾಗರಂ ಕೃತ್ವಾಽತರನ್ ವತ್ಸಪದಂ ಸ್ಮಯೇತ್ ಪ್ಲವಾಃ ॥

ನೌಕೆ ಏಕೆ ಬೇಕು–

ಕರುವಿನ ಹೆಜ್ಜೆಯಲ್ಲಿ ನಿಂತನೀರಿಗೆ ಸಮಾನ ಮಾಡಿಕೊಂಡು ಸಾಗರ ದಾಟಿದರು ಎನ್ನುತ್ತದೆ ಭಾಗವತ ಶ್ಲೋಕ. ಈ ನೀರನ್ನು ದಾಟಲು ದೋಣಿಯ ಅವಶ್ಯಕತೆಯಿಲ್ಲ. ಅಂದಮೇಲೆ ಕೃಷ್ಣನನ್ನು ದೋಣಿಯನ್ನಾಗಿ ಮಾಡಿಕೊಂಡು ಸಾಗರದಡ ಸೇರಿದರು ಎಂದು ಹೇಳಿದ್ದು ಹೇಗೆ ಎನ್ನುವ ಪ್ರಶ್ನೆಗೆ ಶ್ರೀಸತ್ಯಧರ್ಮರು ಹೀಗೆ ಉತ್ತರಿಸುತ್ತಾರೆ.

''ಯತ್ಪ್ಲವಾಃ'' ಎನ್ನುವುದಕ್ಕೆ ಕೃಷ್ಣನನ್ನು ದೋಣಿಯನ್ನಾಗಿ ಮಾಡಿಕೊಂಡು ಎಂದರ್ಥವಲ್ಲ. ಆದರೆ

1. ಯತ್ಪ್ಲವಾಃ - ಯಾವ ಕೃಷ್ಣನಿಂದ ಪ್ಲವಃ=ಶೀಘ್ರಗತಿಯುಳ್ಳವರಾಗಿ, ಅಂದರೆ ನೀರನ್ನು ಹಾರುತ್ತಾ ಹಾರುತ್ತಾ ದಾಟಿದರು.

2. ಯತ್ಪ್ಲವಾಃ - ಪ್ಲವಃ ಎಂದರೆ ಶಬ್ದ ಎಂದರ್ಥ. ಯಾವ ಶ್ರೀಕೃಷ್ಣನೆಂಬ ಶಬ್ದವುಳ್ಳವರಾಗಿ ದಾಟಿದರು. ಶ್ರೀಕೃಷ್ಣನಾಮೋಚ್ಚಾರಣ ಮಾಡುತ್ತಾ ದಾಟಿದರು. ಆ ಕಾರಣದಿಂದಾಗಿ ದೋಣಿಯನ್ನು ಮಾಡಿಕೊಂಡು ದಾಟಿದರು ಎನ್ನುವುದಕ್ಕೆ ಅವಕಾಶವಿಲ್ಲ.

ಅಥವಾ ಕೃಷ್ಣನನ್ನು ನೌಕೆಯನ್ನಾಗಿ ಮಾಡಿಕೊಂಡು ದಾಟಿದರು. ಆದರೆ ವತ್ಸಪದಂ ಎನ್ನುವುದಕ್ಕೆ ಕರುವಿನ ಹೆಜ್ಜೆಯಲ್ಲಿ ನಿಂತ ನೀರು ಎಂದರ್ಥವಲ್ಲ. ಕೃಷ್ಣನನ್ನು ವತ್ಸನನ್ನಾಗಿ ಮಾಡಿಕೊಂಡು ಅಂದರೆ ಸುತನೆಂದೂ

ಸ್ನೇಹಿತನೆಂದೂ ದೂತನೆಂದೂ ಕೃಷ್ಣನನ್ನು ಭಾವಿಸಿ ನೌಕೆಯಿಂದ ಸಾಗರವನ್ನು ದಾಟಿದರು. ಇದನ್ನೇ ಭಾಗವತ ಮತ್ತೊಂದೆಡೆ 'ಪ್ರಿಯಃ ಸುಹೃದ್ವಃ ಖಲು ಮಾತುಲೇಯಃ ಆತ್ಮಾऽರ್ಹಣೀಯೋ ವಿಧಿಕೃದ್ ಗುರುಶ್ಚ' ಹೀಗೆ ಹೇಳುತ್ತದೆ. ಅಥವಾ 'ಸ್ಮಯತ್ಪ್ಲವಾಃ' ಎಂಬುದು ಒಂದೇ ಪದ. ಜನರಿಂದ ಪ್ಲವಗಳು ಧಿಕ್ಕೃತವಾದವು. ಅಂದರೆ ಪಾಂಡವರು ಕುರುಸೈನ್ಯವನ್ನು-ಅನಾಯಾಸವಾಗಿ ಕಷ್ಟವಿಲ್ಲದೇ ದಾಟಿದ್ದನ್ನು ನೋಡಿ ನೌಕೆಗಳು ಅವಮಾನಿತ-ವಾದವು. ಅಥವಾ ಆ ನೌಕೆಗಳು ಸ್ಮಯಂತಃ=ಆಶ್ಚರ್ಯಗೊಂಡವು. ನಮ್ಮಿಂದ ಈ ರೀತಿ ದಾಟುವುದು ಅಸಾಧ್ಯವೆಂದು ಚಕಿತವಾದವು.

''ಕೃತ್ವಾऽತರನ್ ವತ್ಸಪದಂ ಸ್ಮಯತ್ಪ್ಲವಾಃ'' ಎಂಬುವುದಕ್ಕೆ ಹೀಗೆ ಅಭಿಪ್ರಾಯ ಹೇಗೆ ಚಿಕ್ಕ ಕರುವಿನ ಹೆಜ್ಜೆ ದಾಟಲು ನೌಕೆಯನ್ನು ಹತ್ತುವುದೇ ಮೊದಲಾದುದು ಕಷ್ಟವಿಲ್ಲದೆ ಸಾಧ್ಯವಾಗುವುದೋ ಹಾಗೆ ದುಃಸಾಧ್ಯವಾದ ಕೌರವಸೈನ್ಯಸಾಗರದ ತರಣವೂ ಸಹ ಯಾವ ಕಷ್ಟವಿಲ್ಲದೇ ಆಯಿತೆಂದು ಅರ್ಥ.

ಶ್ರೀಹರಿಯ ಅನುಗ್ರಹ ನಮ್ಮ ಪೂರ್ವಜರಿಗೆ ಮಾತ್ರವಲ್ಲ. ನನಗೂ ಪೂರ್ಣಾನುಗ್ರಹ ಮಾಡಿರುವನು.

ದ್ರೌಣ್ಯಸ್ತ್ರವಿಪ್ಲುಷ್ಟಮಿದಂ ಮದಂಗಂ ಸಂತಾನಬೀಜಂ ಕುರು ಪಾಂಡವಾನಾಂ ।
ಜುಗೋಪ ಕುಕ್ಷಿಂ ಗತ ಆತ್ತಚಕ್ರೋ ಮಾತುಶ್ಚ ಮೇ ಯಃ ಶರಣಂ ಗತಾಯಾಃ ॥

ಶ್ರೀಹರಿಯು ನನ್ನ ತಾಯಿಯು ನನ್ನನ್ನು ಗರ್ಭದಲ್ಲಿ ಧರಿಸಿ ದ್ರೌಣಿಯ ಬಾಣಕ್ಕೆ ಹೆದರಿಬಂದಾಗ ಗರ್ಭದ ಒಳಗೆ ನಿಂತು ರಕ್ಷಿಸಿದನೋ, ಕುರುಕುಲದ ಬೀಜವಾಗಿದ್ದ ನನ್ನನ್ನು ಅಶ್ವತ್ಥಾಮನ ಅಸ್ತ್ರವು ಸುಡದಿರುವಂತೆ ಸಲಹಿದನೋ ಅಂತಹ ದೇವೋತ್ತಮನಾದ ಶ್ರೀಕೃಷ್ಣನ ಮಹಿಮೆಯನ್ನು ವಿವರಿಸಿರಿ'' ಎನ್ನುತ್ತಾನೆ.

ಪರೀಕ್ಷಿತನ ಪರಿರಕ್ಷಣೆ ಹೇಗೆ?

ಶ್ರೀಕೃಷ್ಣನು ಪರೀಕ್ಷಿತನನ್ನು ರಕ್ಷಿಸಿದ ಬಗೆ ಹೇಗೆ? ಗರ್ಭದಲ್ಲಿ ನಿಂತು ರಕ್ಷಿಸಿದನೋ? ಗರ್ಭದಿಂದ ಮೃತನಾಗಿ ಹೊರಬಂದಮೇಲೆ ರಕ್ಷಣೆ ಮಾಡಿದನೋ? ಚಕ್ರಾಯುಧದಿಂದ ರಕ್ಷಣೆಯೋ? ಇಲ್ಲವೇ ಗದೆ-ಯಿಂದಲೋ? ಎಂಬ ಪ್ರಶ್ನೆಗಳು ಪುಂಖಾನುಪುಂಖವಾಗಿ ನಮ್ಮ ಗರ್ಭದಿಂದ ಹೊರಹೊರಟಿವೆ. ಏಕೆಂದರೆ–

ಪ್ರಥಮಸ್ಕಂಧ ಹೀಗೆ ಹೇಳುತ್ತದೆ–

ಮಾತುರ್ಗರ್ಭಗತೋವೀರಃ ಸ ತದಾ ಭೃಗುನಂದನ ।
ದದರ್ಶ ಪುರುಷಂ ಕಂಚಿದ್ದಹ್ಯಮಾನೋऽಸ್ತ್ರತೇಜಸಾ ।
ಪರಿಭ್ರಮಂತಂ ಉಲ್ಕಾಭಂ ಭ್ರಾಮಯಂತಂ ಗದಾಂ ಮುಹುಃ ॥
ಅಸ್ತ್ರತೇಜಃ ಸ್ವಗದಯಾ ನೀಹಾರಮಿವ ಗೋಪತಿಃ ॥
ಮಿಷತೋ ದಶಮಾಸಸ್ಯ ತತ್ರೈವಾಂತರ್ದಧೇ ಹರಿಃ ॥

ಎಂಬುದಾಗಿ ಭಗವಂತನು ಉತ್ತರೆಯ ಗರ್ಭದಲ್ಲಿ ಪ್ರವೇಶಿಸಿ ಗದಾಪಾಣಿಯಾಗಿ ರಕ್ಷಿಸಿದನೆಂದು ಹೇಳುತ್ತದೆ.

ಅಶ್ವಮೇಧಪರ್ವದಲ್ಲಿ ಭಾಗವತಕ್ಕೆ ವ್ಯತಿರಿಕ್ತವಾಗಿ ಗರ್ಭಪ್ರವೇಶ ಮಾಡದೇ ರಕ್ಷಣೆ ಹೇಳಿದೆ–

ಗರ್ಭಸ್ಥಸ್ಯಾಸ್ಯ ಬಾಲಸ್ಯ ವಿನಾ ಪ್ರಾಣೇನ ಪಾತನಮ್ ।
ತಥಾ ಮೃತಃ ಶಿಶುರಯಂ ಜೀವತಾಮಭಿಮನ್ಯುಜಃ ।
ಇತ್ಯುಕ್ತೇರ್ವಾಸುದೇವಸ್ಯ ಸ ಬಾಲೋ ಭರತರ್ಷಭ ।
ಶನೈಃ ಶನೈರ್ಮಹಾರಾಜ ಪ್ರಾಸ್ಪಂದತ ಸಚೇತನಃ ॥

ಗರ್ಭದಿಂದ ಹೊರಬರುವಾಗ ಜೀವವಿಲ್ಲದೇ ಶಿಶುವಿನ ಪ್ರಸವವಾಯಿತು. ಆಗ ಶ್ರೀಹರಿಯ ''ಅಭಿಮನ್ಯು ಸುತನು ಬದುಕಲಿ'' ಎಂಬ ಮಾತಿನಿಂದಲೇ ನಿಧಾನವಾಗಿ ಚೇತರಿಸಿಕೊಂಡಿತು ಎಂದು ಹೇಳಿದೆ. ಹೀಗಾಗಿ ಕೃಷ್ಣರಕ್ಷಣೆ ಹೇಗೆ ಮಾಡಿದ? ಎನ್ನುವ ಪ್ರಶ್ನೆ.

ಇನ್ನು ಅದೇ ಪ್ರಥಮಸ್ಕಂಧ ಭಾಗವತದಲ್ಲಿ ಶ್ರೀಕೃಷ್ಣನು ಗದೆಯಿಂದ ರಕ್ಷಣೆ ಮಾಡಿದನು ಎಂದು ಹೇಳಿದರೆ, ಈ ದಶಮಸ್ಕಂಧದಲ್ಲಿ ''ಆತ್ತಚಕ್ರಃ ಜುಗೋಪ'' ಚಕ್ರಧಾರಿಯಾಗಿ ರಕ್ಷಣೆ ಮಾಡಿದ ಎನ್ನುತ್ತದೆ. ಇದು ಹೇಗೆ? ಎಂದು ಪ್ರಶ್ನೆ.

ಇದಕ್ಕೆಲ್ಲ ಮಹಾಭಾರತತಾತ್ಪರ್ಯನಿರ್ಣಯದಲ್ಲಿ ಆಚಾರ್ಯರೇ ಸಮಾಧಾನ ಹೇಳಿದ್ದಾರೆ ಎಂದೆನ್ನುತ್ತಾರೆ ಶ್ರೀಸತ್ಯಧರ್ಮತೀರ್ಥರು. ನಿರ್ಣಯದ ಮಾತು ಹೀಗಿದೆ–

ದ್ರೌಣ್ಯಸ್ತ್ರಸೂದಿತಂ ಬಾಲಂ ದೃಷ್ಟ್ವಾ ಕುಂತ್ಯಾದಿಕಾಃ ಸ್ತ್ರಿಯಃ ।
ಶರಣ್ಯಂ ಶರಣಂ ಜಗ್ಮುಃ ವಾಸುದೇವಂ ಜಗತ್ಪತಿಮ್ ॥
ಪ್ರತ್ಯಕ್ಷಮಾತ್ಮನಾ ಗರ್ಭೇ ರಕ್ಷಿತಂ ಪ್ರಸವೇ ಹತಮ್ ।
ಪುನರುಜ್ಜೀವಯಾಮಾಸ ಕೇಶವಃ ಪಾರ್ಥತಂತವೇ ॥

ಗರ್ಭದಲ್ಲಿ ಶಿಶು ಸಾಯದಿರುವಂತೆ ಗರ್ಭದಲ್ಲಿ ನಿಂತು ರಕ್ಷಣೆ ಮಾಡಿದನು. ಮೃತವಾಗಿ ಪ್ರಸವಿಸಿದಾಗ ಮತ್ತೆ ಬದುಕಿಸಿದನು. ಹೀಗಾಗಿ ಪಾಂಡವರ ಸಂತತಿ ಉಳಿಯಿತು ಎಂದು ಆಚಾರ್ಯರು ಎರಡೂ ಮಾತಿಗೂ ಸ್ಪಷ್ಟವಾಗಿ ನಿರ್ಣಯಕೊಟ್ಟರು. ಅಶ್ವಮೇಧಪರ್ವ ಕೇವಲ ಪ್ರಸವಾನಂತರದ ರಕ್ಷಣೆಯನ್ನು ಹೇಳಿದೆ. ಪ್ರಥಮ ಸ್ಕಂಧ ಪ್ರಸವಾತ್ ಪೂರ್ವದಲ್ಲಿನ ಗರ್ಭರಕ್ಷಣೆಯನ್ನು ಹೇಳಿದೆ. ಕಾರಣ ಎರಡೂ ಮಾತಿಗೂ ವಿರೋಧವಿಲ್ಲ.

ಇನ್ನು ಗದಾಸುದರ್ಶನಗಳ ಗದನ (ಮಾತು) ಮಾತ್ರ ಉಳಿಯಿತು. ಅದಕ್ಕೆ ಇಷ್ಟು ಪರಿಹಾರ–

ಚಕ್ರಂ ರಾಷ್ಟ್ರಸ್ತ್ರಯೋರಪಿ । ಎಂದು ವಿಶ್ವಕೋಶ. ಚಕ್ರಶಬ್ದಕ್ಕೆ ಆಯುಧ ಎಂದು ಅರ್ಥ ಹೇಳುತ್ತದೆ. ಆದ್ದರಿಂದ ''ಆತ್ತಚಕ್ರಃ'' ಎನ್ನುವಲ್ಲಿ ಕೇವಲ ಆಯುಧದಾರಿಯಾಗಿ ರಕ್ಷಣೆ ಮಾಡಿದ ಎಂದು ಅಭಿಪ್ರಾಯ. ಆ ಆಯುಧ ಯಾವುದು? ಎಂದರೆ ಪ್ರಥಮಸ್ಕಂಧ 'ಗದಾ' ಎಂದು ಹೇಳಿತು. ಆದ್ದರಿಂದ ಪರಸ್ಪರ ವಿರೋಧವಿಲ್ಲ, ಎಂದು ಒಂದು ಉತ್ತರ.

ಎರಡನೆಯ ಉತ್ತರ— ಭಗವಂತನು ಯಾವಾಗಲೂ ಶಂಖಚಕ್ರಗದಾಪದ್ಮಗಳನ್ನು ಧರಿಸಿರುವುದು ಸಹಜ, ಕಾರಣ ಒಂದು ಕಡೆ ಒಂದು ರೀತಿಯಾಗಿ, ಮತ್ತೊಂದು ಕಡೆ ಮಗದೊಂದು ರೀತಿ ಎಂದು ಎರಡನ್ನು ಹೇಳಿದ್ದು ಯುಕ್ತವೇ ಎಂದೆನ್ನುತ್ತಾರೆ ಶ್ರೀಸತ್ಯಧರ್ಮಸ್ವಾಮಿಗಳು.

ಶ್ರೀಹರಿಯು ಏನೆಲ್ಲ ಕಾರ್ಯಗಳನ್ನು ಮಾಡಿದ ಅದೆಲ್ಲವನ್ನು ವಿಸ್ತಾರವಾಗಿ ಹೇಳಿರಿ. ನಿಮ್ಮ ಮುಖದಿಂದ ಕೃಷ್ಣನ ಕಥೆಯನ್ನು ಕೇಳುತ್ತಿರುವ ನನಗೆ ಉಪವಾಸದ ಪರಿವೆಯೇ ಇಲ್ಲ. ಈ ಹಸಿವೆಯಿಂದ ನನಗೆ ಯಾವ ಬಾಧೆಯೂ ಇಲ್ಲ ಎಂದು ಪ್ರಾರ್ಥಿಸಿದ ಪರೀಕ್ಷಿತ–

ನೈಷಾಽತಿದುಃಸಹಾ ಕ್ಷುನ್ಮಾಂ ತ್ಯಕ್ತೋದಮಪಿ ಬಾಧತೇ ।
ಪಿಬಂತಂ ತ್ವನ್ಮುಖಾಂಭೋಜಚ್ಯುತಂ ಹರಿಕಥಾಮೃತಮ್ ॥

ಪರಮಭಾಗವತನಾದ ಪರೀಕ್ಷಿತನ ಜ್ಞಾನಪಿಪಾಸೆಯನ್ನು ಅರಿತ ಶುಕಮುನಿಗಳು ವಿಸ್ತಾರವಾಗಿ ಶ್ರೀಕೃಷ್ಣನ ಕಥೆಯನ್ನೇ ನಿರೂಪಿಸುತ್ತಾರೆ.

ಜಗದಗಲ ತುಂಬಿದ ದುಷ್ಟರ ಅಪಚಾರ ಸಹಿಸಿದಳು ಭೂಮಿಯು. ಭೂದೇವಿಯು ಎಷ್ಟೇ ಕ್ಷಮಾ ಸಮುದ್ರಳಾದರು ಭಗವದ್ದ್ವೇಷಿಗಳ ಭಾರದಿಂದ ಜರ್ಝರಿತಳಾದಳು. ಪತಿನಿಂದಕರ ಭಾರ ಸಹಿಸದಾಯಿತು. **"ಪತಿವ್ರತಾನಾಮಪರಃ ಕ್ವಭಾರಃ."**

ಗೋರೂಪ ಧರಿಸಿ ಬ್ರಹ್ಮದೇವರೆಡೆಗೆ ನಡೆದಳು. ತನ್ನ ವ್ಯಸನ ನಿವೇದಿಸಿಕೊಂಡಳು. ಬ್ರಹ್ಮದೇವರು ಭೂದೇವಿಯನ್ನು ಶಿವಾದಿ ಇತರ ದೇವತೆಗಳನ್ನೂ ಕರೆದು ಕ್ಷೀರಸಮುದ್ರದ ತೀರಕ್ಕೆ ಬಂದರು–

ಬ್ರಹ್ಮಾ ತದುಪಧಾರ್ಯಾಥ ಸಹದೇವೈಸ್ತಯಾ ಸಹ ।
ಜಗಾಮ ಸತ್ರಿನಯನಃ ತೀರಂ ಕ್ಷೀರಪಯೋನಿಧೇಃ ॥

ತೀರದಲ್ಲಿ ಭಕ್ತಾಭೀಷ್ಟಪ್ರದನಾದ ದೇವದೇವನಾದ ಶ್ರೀಹರಿಯನ್ನು ಪುರುಷಸೂಕ್ತದಿಂದ ಉಪಾಸಿಸಿದರು. ಭಗವಂತ "ನಾನು ಭೂಲೋಕದಲ್ಲಿ ಅವತರಿಸುವೆ. ನೀವೆಲ್ಲ ದೇವತೆಗಳೂ ಭೂಲೋಕದಲ್ಲಿ ಅವತರಿಸಿರಿ" ಎಂದು ಅಶರೀರವಾಣಿ ನುಡಿದ. ಈ ಮಾತನ್ನು ಲಕ್ಷ್ಮೀದೇವಿಯು ಭಗವಂತನನ್ನು ನೋಡುತ್ತಾ ಕೇಳಿದಳು. ಬ್ರಹ್ಮದೇವರಿಗೆ ವಾಣಿ ಮಾತ್ರ ಕೇಳಿಸಿತು. ದೇವತೆಗಳಿಗೆ ಭಗವಂತನ ನುಡಿಯೂ ಕೇಳಿಸಲಿಲ್ಲ. ಬ್ರಹ್ಮದೇವರೇ ಮಿಕ್ಕೆಲ್ಲ ದೇವತೆಗಳಿಗೆ ಭಗವಂತನ ನುಡಿ ತಿಳಿಸಿದನು. ವೇಧಾಃ ತ್ರಿದಶಾನುವಾಚಹ.

ಹೀಗೆ ಭಗವಂತನ ಅಭಯ ನುಡಿ ಕೇಳಿ ದೇವತೆಗಳು ಸ್ವಸ್ಥಾನವನ್ನು ಸೇರಿದರು.

ಕಂಸನಿಗೆ ಅಶರೀರವಾಣಿ

ಒಂದು ದಿನ ಶೂರಸುತನಾದ ವಸುದೇವನು ಕಂಸನ ತಂಗಿಯಾದ ದೇವಕಿಯನ್ನು ವಿವಾಹವಾದನು. ಆಮೇಲೆ ಮರಳಿ ಮನೆಗೆ ತೆರಳಲು ರಥವೇರಿದನು. ಕಂಸನು ತಂಗಿಯ ಸಂತೋಷಕ್ಕಾಗಿ ಸ್ವತಃ ತಾನೇ ಸಾರಥ್ಯ ವಹಿಸಿದನು. ಬಹಳ ಉತ್ಸಾಹದಿಂದ ರಥವನ್ನು ಮುನ್ನಡೆಸುತ್ತಿದ್ದ. ಆಗೊಂದು ಅಶರೀರವಾಣಿ ಕೇಳಿಸಿತು–

ಪಥಿ ಪ್ರಗ್ರಹಿಣಂ ಕಂಸಮಾಭಾಷ್ಯಾಹಾಶರೀರವಾಕ್ ।
ಅಸ್ಯಾಸ್ತ್ವಾಮಷ್ಟಮೋ ಗರ್ಭೋ ಹಂತಾ ಯಾಂ ನಯಸೇಽಬುಧ ।

"ಹೇ ಮೂಢ! ತಂಗಿಯೆಂಬ ಮಮತೆಯಿಂದ ಯಾವಳನ್ನು ಕರೆದೊಯ್ಯುತ್ತಿರುವಿಯೋ ಅವಳ ಎಂಟನೆಯ ಗರ್ಭ ನಿನಗೆ ಮೃತ್ಯುವಾಗಲಿದೆ" ಎಂದು ಅಂತರಿಕ್ಷದಲ್ಲಿ ಮಾತು ಕೇಳಿತು. ಈ ಮಾತು ಎಲ್ಲಿಂದ ಬಂತು? ಆಚಾರ್ಯರು ಹೇಳುತ್ತಾರೆ–

ಜಗಾದ ವಾಯುರ್ಗಗನಸ್ಥಿತೋಽಮುಂ ।

ಅಶರೀರರಾದ ವಾಯುದೇವರು ಈ ಮಾತನ್ನಾಡಿದರು. ಕಾರಣ ಜಡವಾದ ಮಾತು ಹೇಗೆ ನುಡಿಯಿತು ಎನ್ನುವ ಪ್ರಶ್ನೆಗೂ ಅವಕಾಶವಿಲ್ಲ.

ಈ ಅಶರೀರವಾಣಿಯನ್ನು ಕೇಳಿದಾಕ್ಷಣ ಕಂಸನು ರಭಸದಿಂದ ಖಡ್ಗವನ್ನು ಸೆಳೆದು ದೇವಕಿಯ ಜಡೆಯನ್ನು ಹಿಡಿದು ಕೊಲ್ಲಲುದ್ಯುಕ್ತನಾದ. ಹೀಗೆ ಕ್ರೂರಿಯಾದ ನಿರ್ದಯನಾದ ನಿರ್ಲಜ್ಜನಾದ ಕಂಸನನ್ನು ಪರಿಪರಿಯಾಗಿ ಪ್ರಾರ್ಥಿಸಿ ಅನೇಕ ಹಿತನುಡಿಗಳನ್ನು ನುಡಿಯುತ್ತಾನೆ–

ಹೇ ಕಂಸ! ಇವಳು ಹೆಣ್ಣುಮಗಳು, ಮೇಲಾಗಿ ತಂಗಿ. ಮತ್ತೆ ಮದುಮಗಳು. ಇದು ಮಂಗಳಸಮಯ, ಕೊಲ್ಲುವುದಲ್ಲ.

ಸ ಕಥಂ ಭಗಿನೀಂ ಹನ್ಯಾಃ ಸ್ತ್ರಿಯಮುದ್ವಾಪರ್ವಣಿ ।
ಏಷಾ ತವಾನುಜಾ ಬಾಲಾ ಕೃಪಣಾ ಪುತ್ರಿಕೋಪಮಾ ॥

ಇವಳನ್ನು ಕೊಂದರೆ ನೀನು ಸಾಯದೇ ಬದುಕುಳಿಯುವಿಯೇನು? ಎಲ್ಲರೂ ಹುಟ್ಟುವಾಗಲೇ ಅವರ ಮರಣಕಾಲವು ನಿಶ್ಚಿತವಾಗಿರುವುದು. ಮರಣವು ದೇಹಕ್ಕೆ ಹೊರತು ಜೀವ ಸ್ವರೂಪಕ್ಕಲ್ಲ. ಹೀಗಿರುವಾಗ ಸ್ವಾರ್ಥಕ್ಕಾಗಿ ಪರರಿಗೆ ದ್ರೋಹವೆಸಗಬಾರದು–

ಮೃತ್ಯುರ್ಜನ್ಮವತಾಂ ವೀರ ದೇಹೇನ ಸಹ ಜಾಯತೇ ।
ಅದ್ಯವಾ ಅಬ್ದಶತಾಂತೇವಾ ಮೃತ್ಯುರ್ವೈ ಪ್ರಾಣಿನಾಂ ಧ್ರುವಃ ।
ತಸ್ಮಾನ್ನ ಕಸ್ಯಚಿತ್ ದ್ರೋಹಮಾಚರೇತ್ ಸ ತಥಾವಿಧಃ

ಈ ದ್ರೋಹದಿಂದ ನಿನಗೆ ನರಕವು ತಪ್ಪುವುದಿಲ್ಲ. ಕಾರಣ ನಿನ್ನ ಮಗಳಂತಿರುವ ಇವಳನ್ನು ಕೊಲ್ಲಬೇಡ.

ಕಂಸನು ಈ ಮಾತನ್ನು ಕೇಳಲಿಲ್ಲ. ಆದರೂ ವಸುದೇವನು ಹೇಳುವುದನ್ನು ಬಿಡಲಿಲ್ಲ. ಮೃತ್ಯುವನ್ನು ತಡೆಯಲು ದೇವರು ಕೊಟ್ಟ ತನ್ನ ಬುದ್ಧಿಯನ್ನೆಲ್ಲ ಉಪಯೋಗಿಸಿದ. ನಾವು ಪ್ರಯತ್ನ ಮಾಡಿಯೂ ಫಲಿಸಲಿಲ್ಲವಾದರೆ ಅದು ನಮ್ಮ ದೋಷವಲ್ಲ.

ಮೃತ್ಯುರ್ಬುದ್ಧಿಮತಾಽಪೋಹ್ಯಃ ಯಾವದ್ಬುದ್ಧಿಬಲೋದಯಂ ।
ಯದ್ಯಸೌ ನ ನಿವರ್ತೇತ ನಾಪರಾಧೋಽಸ್ತಿ ದೇಹಿನಃ ॥
ಯತ್ನೇ ಕೃತೇ ಯದಿ ನ ಸಿಧ್ಯತಿ ಕೋಽತ್ರ ದೋಷಃ ।
ಪ್ರಯತ್ನಮೇಕಮಗ್ರತೋ ನಿಧಾಯ ಭೂತಿಮಾಪ್ನುಮಃ ॥

ಕಾರಣ ವಸುದೇವ ಸಾಕಷ್ಟು ಪ್ರಯತ್ನಿಸಿದ. ಕೊನೆಗೊಂದು ಮಾತನಾಡಿದ, ಇವಳ ಎಂಟನೆಯ ಮಗು ನಿನಗೆ ಮೃತ್ಯುವೇ ಹೊರತು, ಈ ದೇವಕಿಯು ಮೃತ್ಯುವಲ್ಲವಷ್ಟೇ! ಕಾರಣ ನಿನಗೆ ಯಾವ ಮಕ್ಕಳಿಂದ ಭಯ-ವಿದೆಯೋ ಆ ಮಕ್ಕಳನ್ನು ನಿನಗೊಪ್ಪಿಸುವೆ. ನೀನು ಅವುಗಳನ್ನು ಕೊಂದುಬಿಡು. ಆಗ ನಿನಗೆ ಯಾವ ಭಯವೂ ಇರುವುದಿಲ್ಲ.

ಪುತ್ರಾನ್ ಸಮರ್ಪಯಿಷ್ಯೇಽಸ್ಯಾಃ ಯತಸ್ತೇಭಯಮುತ್ಥಿತಮ್ ॥

ಮೊದಲ ಮಗನಾದ ಕೀರ್ತಿಮಂತನನ್ನು ಕಂಸನಿಗೆ ಅಂಜಿ ಅವನಿಗೆ ಸಂಹರಿಸಲು ಒಪ್ಪಿಸಿದ. ಕಂಸನಿಗೆ ನೀಡುವಾಗ ಕೃಚ್ಛ್ರಪ್ರಾಯಶ್ಚಿತ್ತ ಮಾಡಿಕೊಂಡನು. ಅದರಂತೆ ತನ್ನ ಮಾತಿಗೂ ಅಂಜಿದನು.

ಕೀರ್ತಿಮಂತಂ ಪ್ರಥಮಜಂ ಕಂಸಾಯಾನಕದುಂದುಭಿಃ ।
ಅರ್ಪಯಾಮಾಸ ಕೃಚ್ಛ್ರೇಣ ಸೋಽನೃತಾದತಿವಿಹ್ವಲಃ ॥

ಅನೃತಕ್ಕೆ ಅಂಜಿದನೇ?

ಈ ಶ್ಲೋಕದಲ್ಲಿ ''ಅನೃತಾದತಿವಿಹ್ವಲಃ'' ಎಂದು ವಸುದೇವನಿಗೆ ಸುಳ್ಳು ಮಾತನಾಡುವುದರಿಂದ ಬಹಳ

ಭಯವಿತ್ತೆಂದು ಹೇಳಿದೆ. ಸುಳ್ಳಿಗೆ ಹೆದರುವುದಾಗಿದ್ದರೆ ವಸುದೇವನು ತನ್ನ ಮಾತಿಗೆ ತಕ್ಕಂತೆ ಕೃಷ್ಣನನ್ನು ಕಂಸನಿಗೆ ಒಪ್ಪಿಸಬೇಕಿತ್ತು? ಒಪ್ಪಿಸಲಿಲ್ಲ. ಹೀಗೆ ಮಾಡುವುದು ವಿರುದ್ಧವಲ್ಲವೇ? ಎಂದರೆ ಅದಕ್ಕೆ ಹೀಗೆ ಅರ್ಥೈಸಬೇಕು.

'ಅನೃತಾತ್' ಎಂದರೆ, ಸತ್ಯವಿಲ್ಲದ, ಜ್ಞಾನರಹಿತನಾದ ಕಂಸನೇ ಅನೃತನು. ಅವನಿಂದ ಭಯಗೊಂಡು ಕೀರ್ತಿಮಂತನನ್ನು ಕೊಟ್ಟನು. ಶ್ರೀಕೃಷ್ಣ ಅವತರಿಸಿದಾಗ ವಸುದೇವನಿಗೆ ಕಂಸನಿಂದ ಭಯವಿರಲಿಲ್ಲ. ಕೊಡಲಿಲ್ಲ ಕಾರಣ ಯಾವ ವಿರೋಧಕ್ಕೂ ಅವಕಾಶವಿಲ್ಲ.

ಇನ್ನು ಅನೃತವೆಂದರೆ ಭಗವಂತನ ಪ್ರೀತಿಗೆ ವಿರುದ್ಧವಾದುದು. ಅವನಿಗೆ ಪ್ರಿಯವಾದುದೇ ಋತ.

ಅನೃತ್ಸರ್ವಂ ತತ್ ಪ್ರಿಯತ್ವಾತ್ ಗುಣೋ ದೋಷಸ್ತಥಾಽಪ್ರಿಯಮ್ ।
ಏವಂ ಜ್ಞಾನವತೋ ದೃಷ್ಟಿಃ ಅಜ್ಞಸ್ತನ್ನಾವಗಚ್ಛತಿ ॥

ಎಂಬ ಪ್ರಮಾಣ ಮೇಲಿನ ಮಾತನ್ನು ಪುಷ್ಟೀಕರಿಸುತ್ತದೆ. ಭಗವಂತನ ಮಾತಿನಲ್ಲಿ ವಿಶ್ವಾಸವಿಡದೇ ಧರ್ಮರಾಜನು ನಿಸ್ಸಂದೇಹವಾಗಿ ''ಅಶ್ವತ್ಥಾಮಾಹತಃ'' ಎಂದು ಹೇಳದಿದ್ದುದರಿಂದ ದೋಷ ಬಂತು. ಭಗವಂತನಿಗೆ ಅಪ್ರಿಯವಾಯಿತು. ಕಾರಣ ಧರ್ಮರಾಜನ ಮಾತು ಅನೃತವೆನಿಸಿತು.

ಆದರೆ ಇಲ್ಲಿ ಭಗವಂತನಿಗೆ ಅಪ್ರಿಯವೆನ್ನುವ ಮಾತೇ ಇಲ್ಲ. ಕೃಷ್ಣನನ್ನು ಕಂಸನಿಗೆ ಕೊಡದಿರುವುದು ಭಗವಂತನಿಗೆ ವಿರುದ್ಧವಲ್ಲ. ಅಷ್ಟೇ ಅಲ್ಲ! ಭಗವಂತನಿಗೆ ಕಂಸನಿಗೆ ತನ್ನನ್ನು ಕೊಡದಿರುವುದೇ ಇಷ್ಟ. ಕೊಡದಿರುವುದು ಭಗವಂತನಿಗೆ ಇಷ್ಟವೆನ್ನುವುದು ಭಾಗವತದ ಈ ಮಾತಿನಿಂದ ತಿಳಿದುಬರುತ್ತದೆ. ''ತತಶ್ಚ ಶೌರಿರ್ಭಗವತ್ಪ್ರಚೋದಿತಃ'' ಭಗವಂತನ ಪ್ರೇರಣೆಯಿಂದ ನಂದನ ಮನೆಗೆ ಕೃಷ್ಣನನ್ನು ವಸುದೇವನು ಕರೆದೊಯ್ದ ಎನ್ನುತ್ತದೆ. ಹೀಗಾಗಿ ಅನೃತಕ್ಕೆ ಅವಕಾಶವೇ ಇಲ್ಲ. ಅಂದಮೇಲೆ ಸುಳ್ಳಿಗೆ ಹೆದರುವನೆಂಬುದಕ್ಕೆ ಕೃಷ್ಣನನ್ನು ಕೊಡದಿರುವುದು ವಿರುದ್ಧವಲ್ಲ.

ಮತ್ತು 'ತತಶ್ಚ ಶೌರಿರ್ಭಗವತ್ಪ್ರಚೋದಿತಃ' ಎಂದು ಕೃಷ್ಣನ ಪ್ರೇರಣೆಯಿಂದ ವಸುದೇವನು ಗೋಕುಲಕ್ಕೆ ಕರೆದೊಯ್ದನೇ ಹೊರತು ತಾನಾಗಿಯೇ ಅಲ್ಲ. ಇನ್ನೊಬ್ಬರ ಪ್ರೇರಣೆಯಿಂದ ಅನುಚಿತ ಕಾರ್ಯ ಮಾಡಿದರೂ ಮಾಡಿದವಗೆ ದೋಷ ಬರುವುದಿಲ್ಲ. ಇಲ್ಲವಾದರೆ ವಿಶ್ವಾಮಿತ್ರನ ಪ್ರೇರಣೆಯಿಂದ ವಸಿಷ್ಠರ ಮಕ್ಕಳನ್ನು ಕೊಂದ ಕಲ್ಮಾಷಪಾದನಿಗೆ ಬ್ರಹ್ಮಹತ್ಯಾದೋಷ ಬರಬೇಕಿತ್ತು. ಬಂದಿಲ್ಲ. ಪ್ರೇರಕರಾದ ವಿಶ್ವಾಮಿತ್ರರಿಗೆ ಬಂದಿದೆ. ಪ್ರಕೃತ ಪ್ರೇರಕನಾದ ಕೃಷ್ಣನಿಗೆ ಸ್ವತಂತ್ರನಾದ್ದರಿಂದ ದೋಷ ಪ್ರಸಕ್ತಿಯಿಲ್ಲ. ವಸುದೇವನಿಗೂ ಇಲ್ಲ.

ಇನ್ನು ಸುಳ್ಳು ಎಂದರೆ ಪ್ರತಿಜ್ಞೆಯಂತೆ ನಡೆಯದಿರುವುದು. ವಸುದೇವನ ಪ್ರತಿಜ್ಞೆ– 'ಪುತ್ರಾನ್ ಸಮರ್ಪಯಿಷ್ಯೇಽಸ್ಯಾಃ ಯತಸ್ತೇಭಯಮುತ್ಥಿತಂ' ಎಂದಿದೆ. ಅಂದರೆ ದೇವಕಿಯ (ಸಂಪುತ್ರಾನ್) ಅಭಿನ್ನರಾದ ಮಕ್ಕಳನ್ನು ಅರ್ಪಿಸುತ್ತೇನೆ. 'ಸಂ' ಎನ್ನುವುದಕ್ಕೆ ಯಾದವಕೋಶ 'ಸಂ ಅಭೇಧೇ ಸಮೀಚೀನೇ' ಎಂಬುದಾಗಿ ಅಭೇದ ಎನ್ನುವ ಅರ್ಥ ಹೇಳುತ್ತಿದೆ. ಕಾರಣ 'ಸಂ' ಎನ್ನುವುದನ್ನು ಪುತ್ರಶಬ್ದದ ಜತೆಯಲ್ಲಿ ಅನ್ವಯಿಸಿದಾಗ (ಸಂಪುತ್ರಾನ್) ಅಭಿನ್ನರಾದ ಮಕ್ಕಳು ಎನ್ನುವ ಅರ್ಥ ಬರುತ್ತದೆ. ದೇವಕಿಯಿಂದ ಅಭಿನ್ನರಾದ ಮಕ್ಕಳು ಎಂದರೆ ಶೋಣಿತವೇ ದೇಹಕ್ಕೆ ಕಾರಣವಾಗಿದೆ ಎಂದಭಿಪ್ರಾಯ.

ಒಟ್ಟಾರೆ ಅಭಿನ್ನರಾದ ಮಕ್ಕಳನ್ನು ಕೊಡುವೆನೆಂದು ಪ್ರತಿಜ್ಞೆ. ಕೃಷ್ಣನಂತೂ ದೇವಕಿವಸುದೇವರ ಶುಕ್ಲಶೋಣಿತದಿಂದ ಪ್ರಾದುರ್ಭವಿಸಿದವನಲ್ಲ. ಇದನ್ನೇ ''ತಮದ್ಭುತಂ ಬಾಲಕಂ'' ಎಂದಿತು ಭಾಗವತ.

ಹೀಗಾಗಿ ಕೃಷ್ಣನು ಅಭಿನ್ನ ಮಗನಲ್ಲ. ಭಿನ್ನನಾದ ಮಗ. ಕಾರಣ ಕೃಷ್ಣನನ್ನು ಕೊಡದಿರುವುದರಿಂದ ವಸುದೇವನಿಗೆ ಪ್ರತಿಜ್ಞಾಭಂಗ ಇಲ್ಲ. ಅಭಿನ್ನರಾದ ಮಕ್ಕಳನ್ನು ಕೊಡುತ್ತೇನೆಂದು ಹೇಳಿದ್ದ ಆ ಮಕ್ಕಳನ್ನೇ ಕೊಟ್ಟ. ಕೃಷ್ಣನು ಅಭಿನ್ನನಲ್ಲ. ಕೊಡದಿದ್ದರಿಂದ ತನ್ನ ಪ್ರತಿಜ್ಞಾಹಾನಿಯಿಲ್ಲ. ಸುಳ್ಳಾಡಿದಂತಾಗುವುದಿಲ್ಲ.

ಇನ್ನು ''ಯತಸ್ತೇಭಯಮುತ್ಥಿತಂ'' ಎಂಬಲ್ಲಿ 'ಭಯಂ' ಎಂದೂ 'ಅಭಯಂ' ಎಂದು ಎರಡೂ ರೀತಿ ಪದವಿಭಾಗ. ನಿನಗೆ ಯಾರಿಂದ ಭಯವಿಲ್ಲವೋ (ಯತಃ ತೇ ಅಭಯಂ ಉತ್ಥಿತಂ) ಅವರನ್ನು ಕೊಡುತ್ತೇನೆ ಎಂದು ಪ್ರತಿಜ್ಞೆಯಾಯಿತು. ಕಂಸನಿಗೆ ಭಯಕಾರಣನಾದ ಕೃಷ್ಣನನ್ನು ಕೊಡದಿರುವುದರಿಂದ ದೋಷವಿಲ್ಲ.

ಅಥವಾ ಯಾರಿಗೆ ನಿನ್ನಿಂದ ಭಯವಿದೆಯೋ (ಯತಃ ತೇ ಭಯಂ ಉತ್ಥಿತಂ) ಅವರನ್ನೇ ಕೊಡುತ್ತೇನೆ. ಕೃಷ್ಣನಿಗೆ ನಿನ್ನಿಂದ ಭಯವಿಲ್ಲ. ಕಾರಣ ಅವನನ್ನು ಕೊಡದಿರುವುದರಿಂದ ದೋಷವಿಲ್ಲ. ಕಂಸನ ಯೋಗ್ಯತೆ ತಿಳಿದಿದ್ದರಿಂದ ಮೋಸದ ಪ್ರತಿಜ್ಞೆಯನ್ನು ಮಾಡಿದಾಗ ಸುಳ್ಳುಹೇಳಿದಂತಾಗುವುದಿಲ್ಲ.

ಹೀಗೆ ಕಂಸನಿಗೆ ಮೊದಲ ಮಗುವನ್ನು ಒಪ್ಪಿಸಿದಾಗ ವಸುದೇವನ ಪ್ರಾಮಾಣಿಕತೆಗೆ ಮೆಚ್ಚಿದ ಕಂಸನು ಎಂಟನೇ ಗರ್ಭವಷ್ಟೇ ನನಗೆ ಮೃತ್ಯು. ಅದು ಮಾತ್ರ ಸಾಕು. ಈ ಮಗುವನ್ನು ತೆಗೆದುಕೊಂಡುಹೋಗೆಂದನು. ವಸುದೇವನು ಅವ್ಯವಸ್ಥಿತ ಚಿತ್ತನಾದ ಕಂಸನ ಈ ಪ್ರಸಾದವನ್ನೇ ಭಯಂಕರವೆಂದು ಪರಿಗಣಿಸಿ ಶಿಶುವನ್ನು ಮನೆಗೊಯ್ದನು.

ನಾರದರ ಆಗಮನ–

ವಸುದೇವನು ಮನೆಗೆ ತೆರಳಲು ನಾರದರು ಬಂದರು. ಕಂಸನೇ! ನಿನಗೆ ದೇವತೆಗಳ ಸಂಚು ಯಾವುದೂ ತಿಳಿಯುವುದಿಲ್ಲ. ಗೋಕುಲದಲ್ಲಿರುವ ನಂದಗೋಪ ಗೋಪಾಲಕರು ಗೋಪಿಯರೆಲ್ಲರೂ ದೇವತೆಗಳಾಗಿ-ದ್ದಾರೆ. ನೀವೆಲ್ಲರೂ ದೈತ್ಯರು. ಅವರು ನಿನ್ನನ್ನು ಸಂಹರಿಸುವ ಪ್ರಯತ್ನದಲ್ಲಿದ್ದಾರೆ. ನೀನು ವಸುದೇವ ದೇವಕಿಯರನ್ನು ಹೀಗೆ ನಂಬಬಹುದೇ? ಎಂದು ಹೇಳಿ ಹೊರಟರು. ಕಿಡಿಕಿಡಿಯಾದ ಕಂಸನು ವಸುದೇವ ದೇವಕಿಯರನ್ನು ಸೆರೆಮನೆಯಲ್ಲಿ ಬಂಧಿಸಿದ. ಅವರ ಎಲ್ಲ ಮಕ್ಕಳನ್ನು ಕರುಣೆಯಿಲ್ಲದೆ ಕೊಲ್ಲಹತ್ತಿದ–

ಜಾತಂ ಜಾತಮಹನ್ ಪುತ್ರಂ ತಯೋರಜನಶಂಕಯಾ ।

ಎಲ್ಲ ಮಕ್ಕಳಲ್ಲೂ ಅವನಿಗೆ ಅಜನ ಶಂಕೆಯಿತ್ತು. ಲೋಕವಿಲಕ್ಷಣನಾದ ಜನಾರ್ದನನ ಸಂದೇಹವಿತ್ತು. ಹೀಗಾಗಿ ಎಲ್ಲ ಆರು ಮಕ್ಕಳನ್ನು ಸಂಹರಿಸಿದ. ಆಮೇಲೆ ಶೇಷದೇವರು ದೇವಕಿಯ ಗರ್ಭಕ್ಕೆ ಬಂದರು. ದುರ್ಗಾದೇವಿಯು ಶ್ರೀಹರಿಯ ಆಜ್ಞಾನುಸಾರವಾಗಿ ಶೇಷದೇವರನ್ನು ಉದರದಿಂದ ಆಕರ್ಷಿಸಿ ಗೋಕುಲದಲ್ಲಿದ್ದ ರೋಹಿಣಿಯ ಉದರದಲ್ಲಿಟ್ಟು ತಾನೂ ಯಶೋದೆಯಿಂದ ಅವತರಿಸಲು ಸಿದ್ಧಳಾದಳು. ಜನರು ದೇವಕಿಯ ಏಳನೆಯ ಗರ್ಭಸ್ರಾವವಾಯಿತೆಂದು ಭಾವಿಸಿದರು.

ಹುಟ್ಟಿದ ರೋಹಿಣೀಪುತ್ರನಿಗೆ ಸಂಕರ್ಷಣನೆಂದೂ, ರಮಯತೀತಿ- ರಮಿಸುವವನಾದ್ದರಿಂದ ರಾಮನೆಂದೂ, ಬಲದಿಂದ ಯುಕ್ತನಾದ್ದರಿಂದ ಬಲಭದ್ರನೆಂದೂ ಹೆಸರಾಯಿತು.

ಗರ್ಭಸಂಕರ್ಷಣಾತ್ ತಂ ವೈ ಪ್ರಾಹುಃ ಸಂಕರ್ಷಣಂ ಭುವಿ ।
ರಾಮೇತಿ ಲೋಕರಮಣಾದ್ಬಲಭದ್ರಂ ಬಲೋಚ್ಛ್ರಯಾತ್ ॥

ಬಲದಿಂದ ಶ್ರೇಷ್ಠ ಬಲಭದ್ರ– ಬಲವುಳ್ಳವನಾದ್ದರಿಂದ ಬಲನು. ಶ್ರೇಷ್ಠನಾದ್ದರಿಂದ ಭದ್ರನು. ಭದ್ರ ಶಬ್ದಕ್ಕೆ ಶ್ರೇಷ್ಠ ಎನ್ನುವ ಅರ್ಥವನ್ನು ಹೇಳುವ ''ಭದ್ರೋವಾಚ್ಯವಚ್ಛ್ರೇಷ್ಠ ಸಾಧುನೋಃ'' ಕೋಶವಿದೆ.

ಇಲ್ಲವಾದರೆ ಭದ್ರಪದ ವ್ಯರ್ಥವಾಗುವುದು. ಭದ್ರಶಬ್ದವು ಶ್ರೇಷ್ಠವಾಚಿಯಾದ್ದರಿಂದ ಶ್ರೇಷ್ಠ ಉಚ್ಛ್ರಯ ಶಬ್ದಗಳಿಗೆ ಒಂದೇ ಅರ್ಥ. ಆದ್ದರಿಂದ ''ಬಲೇನ ಭದ್ರಃ'' ಬಲದಿಂದ ಶ್ರೇಷ್ಠನು, ಬಲದಿಂದ ಪೂರ್ಣನು ಎಂದು ಅರ್ಥೈಸಬೇಕು. ಕೆಲವರು ''ಬಲವದುಚ್ಛ್ರಯಾತ್'' ಎಂದು ಪಾಠ ಸ್ವೀಕರಿಸಿರುವರು. ಆ ಪಾಠ ''ಬಲೋಚ್ಛ್ರಯ'' ಶಬ್ದದ ಅರ್ಥವನ್ನು ಅರಿಯದ ಮೂಲಕ ಕಲ್ಪಿತವಾಗಿದೆ.

ಜಗದಾದಾನಾದಿಕರ್ತನಾದ ಶ್ರೀ ನಾರಾಯಣನು ಸ್ವರೂಪಾಂಶದಿಂದಲೇ ಮೊದಲು ವಸುದೇವನ ಹೃದಯದಲ್ಲಿ ಪ್ರವೇಶಿಸಿ, ರೇತಸ್ಸಿನ ಮೂಲಕ ದೇವಕೀಜಠರಕ್ಕೆ ಬಂದನು. ಪೂರ್ವದಿಕ್ಕು ಗಗನದಲ್ಲಿ ಚಂದ್ರ-ನನ್ನು ಧರಿಸಿದಂತೆ ದೇವಕಿಯು ತನ್ನ ಹೃದಯಾಕಾಶದಲ್ಲಿ ಶ್ರೀಹರಿಯ ಕೃಷ್ಣಕೇಶದ ಅಂಶವನ್ನು ಧರಿಸಿದಳು. ಆಗ ಅವಳು ಅತ್ಯಂತವಾಗಿ ವಿರಾಜಿಸಿದಳು. ಇದನ್ನು ನೋಡಿದ ಕಂಸನು ''ಇವಳ ಉದರದಲ್ಲಿರುವ ಕುಮಾರನು ನನ್ನ ಸಂಹಾರಕನಾದ ಹರಿಯೇ ಸರಿ. ಈಗ ಇವಳನ್ನು ಕೊಂದರೆ ಗರ್ಭಿಣೀ ವಧೆಯಿಂದ ನನ್ನ ಆಯುಷ್ಯವು ನಷ್ಟವಾಗುವುದು. ಆದ್ದರಿಂದ ಕೊಲ್ಲುವುದಿಲ್ಲ'' ಎಂದು ನಿಶ್ಚಯಿಸಿ ಹರಿಯ ಜನನ ಕಾಲವನ್ನು ಬಹಳ ಜಾಗರೂಕತೆಯಿಂದ ನಿರೀಕ್ಷಿಸುತ್ತಿದ್ದನು.

ತಂ ವೀಕ್ಷ್ಯ ಕಂಸಃ ಪ್ರಭಯಾಜಿತಂಭರಾ
ವಿರೋಚಯಂತೀಂ ಭವನಂ ಶುಚಿಸ್ಮಿತಾ ।
ಆಹೈಷಮೇ ಪ್ರಾಣಹರೋ ಹರಿರ್ಗುಹಾಂ ।
ಧ್ರುವಂ ಶ್ರಿತೋಽಯನ್ನ ಪುರೇಯಮೀದೃಶೀ ॥
ಸ್ತ್ರಿಯಂ ಸ್ವಸುರ್ಗುರುಮತ್ಯಾ ವಧೋಽಯಂ
ಯಶಃ ಶ್ರಿಯಂ ಹಂತ್ಯನುಕೂಲಮಾಯುಃ ॥

ಗರ್ಭಸ್ತುತಿ : ಬ್ರಹ್ಮಾದಿದೇವತೆಗಳೆಲ್ಲರೂ ಬಂದು ದೇವಕಿಯ ಗರ್ಭಸ್ಥ ಹರಿಯನ್ನು ಸ್ತುತಿಸುವರು :–

ಸತ್ಯವ್ರತಂ ಸತ್ಯಪರಂ ತ್ರಿಸತ್ಯಂ ಸತ್ಯಸ್ಯ ಯೋನಿಂ ನಿಹಿತಂ ಚ ಸತ್ಯೇ ।
ಸತ್ಯಸ್ಯ ಸತ್ಯಮುತ ಸತ್ಯನೇತ್ರಂ ಸತ್ಯಾತ್ಮಕಂ ತ್ವಾಂ ಶರಣಂ ಪ್ರಪನ್ನಾಃ ॥

ಸತ್ಯವ್ರತಂ=ಪೂರ್ಣಾನಂದಜ್ಞಾನಸ್ವರೂಪನು, ಸತ್ಯಪರಂ=ಪಂಚಭೂತಗಳಿಂದ ಭಿನ್ನನು, ತ್ರಿಸತ್ಯಂ= ವೇದಗಳಿಂದ ಮುಖ್ಯ ಪ್ರತಿಪಾದ್ಯನು, ಸತ್ಯಸ್ಯ ಯೋನಿಂ=ಜಗತ್ತಿಗೆ ಮೂಲಕಾರಣನು, ಸತ್ಯೇ ನಿಹಿತಂ= ಜಗದಂತರ್ನಿಯಾಮಕನು, ಸತ್ಯಸ್ಯ ಸತ್ಯಂ=ವಿಶ್ವಕ್ಕೆ ಆನಂದಜ್ಞಾನವನ್ನು ಕೊಡುತ್ತಿರುವವನು, ಸತ್ಯನೇತ್ರಂ= ಜಗತ್ಪ್ರೇರಕನು, ಸತ್ಯಾತ್ಮಕಂ=ಸಂಹಾರಕನು. ಇಂತಹ ನಿನ್ನನ್ನು ನಾವು ಶರಣು ಹೊಂದುವೆವು.

ಏಕಾಯನೋಽಸೌ ದ್ವಿಫಾಲಸ್ತ್ರಿಮೂಲಃ ಚತೂರಸಃ ಪಂಚಶಿಫಃ ಷಡಾತ್ಮಾ ।
ಸಪ್ತತ್ವಗಷ್ಟವಿಟಪೋ ನವಾಕ್ಷೋ ದಶಚ್ಛದೀ ದ್ವಿಖಗೋ ಹ್ಯಾದಿವೃಕ್ಷಃ ॥

ನೀನೆ ಸೃಷ್ಟಿಕರ್ತನಾದ್ದರಿಂದ ನಿನಗೆ ಹುಟ್ಟುವಿಕೆಯೂ ಇಲ್ಲ. ಮರಣವೂ ಇಲ್ಲವೇ ಇಲ್ಲ. ಮತ್ಸ್ಯಾದಿ ಅವತಾರಗಳನ್ನು ಮಾಡಿ ನಮ್ಮನ್ನೂ, ಮೂರು ಲೋಕಗಳನ್ನೂ ಪಾಲಿಸಿರುವೆ. ಈಗಲೂ ಅವತರಿಸಿ ಭೂಭಾರವನ್ನು ಇಳಿಸು. ಯದೂತ್ತಮನೇ! ನಿನಗೆ ವಂದನೆ!

ಅಮ್ಮಾ ದೇವಕಿಯೇ! ನಮ್ಮೆಲ್ಲರ ಮಂಗಳಕ್ಕಾಗಿ ಪುರುಷೋತ್ತಮನು ನಿನ್ನ ಗರ್ಭದಲ್ಲಿ ಪ್ರವೇಶಿಸಿರುವನು. ಕಂಸನಿಗೆ ಮರಣವು ಸಮೀಪಿಸಿತು. ಅವನಿಂದ ನೀನು ಭಯಪಡಬೇಡ. ಈ ನಿನ್ನ ಮಗನೇ ಯಾದವರನ್ನು ರಕ್ಷಿಸುವನು. ಹೀಗೆ ಸ್ತುತಿಸಿ ಸ್ವಸ್ಥಾನಗಳಿಗೆ ಹಿಂತಿರುಗಿದರು.

ದಿಷ್ಟ್ಯಾಽಂಬ ತೇ ಕುಕ್ಷಿಗತಃ ಪರಃ ಪುಮಾನ್ ಅಂಶೇನ ಸಾಕ್ಷಾದ್ ಭಗವಾನ್ ಭವಾಯನಃ ।
ಮಾಭೂದ್ಭಯಂ ಭೋಜಪತೇರ್ಮುಮೂರ್ಷೋಃ ಗೋಪ್ತಾ ಯದೂನಾಂ ಭವಿತಾ ತವಾತ್ಮಜಃ ॥

ಶ್ರೀಕೃಷ್ಣ ಪಾದುರ್ಭಾವ

ಅಥ ಸರ್ವಗುಣೋಪೇತಃ ಕಾಲಃ ಪರಮಶೋಭನಃ

ಜ್ಞಾನಿಗಳಿಗೆ ಶೋಭನ ಪರರಿಗೆ ಅಶೋಭನ–

ಇಲ್ಲಿ ''ಕಾಲಃ ಪರಮಶೋಭನಃ'' ಎಂದು ಸಾಮಾನ್ಯವಾಗಿ ಕಾಲ ಮಂಗಲಕರವೆಂದು ಹೇಳಿದೆ. ಆದರೆ ಕಂಸಾದಿ ದ್ವೇಷಿಗಳಿಗೆ ಅಮಂಗಲವಾಗಿದೆಯಲ್ಲ? ಕಾರಣ ಹೇಗೀಮಾತು? ಎಂದರೆ ಅದಕ್ಕೆ ಹೀಗೆ ಅರ್ಥ ಮಾಡಬೇಕು–

''ಅಥಸರ್ವಗುಣೋಪೇತಃ'' ಎಂಬುದು ಸಮಸ್ತಪದ. ''ಅಥ'' ಎಂದರೆ ಅನ್ನರಹಿತನಾದ (ನ ವಿದ್ಯತೇ ಥಂ ಅನ್ನಂ ಯಸ್ಯ ಸಃ) ಅರ್ಥಾತ್ ನಿರಶನನಾದ ಭಗವಂತನೆಂದರ್ಥ.

''ಅನಶ್ನನ್ನನ್ಯೋಽಭಿಚಾಕಶೀತಿ,'' ''ಅನ್ಯೋ ನಿರನ್ನೋಽಪಿ ಬಲೇನ ಭೂಯಾನ್'' ಎಂದು ಶ್ರುತಿಸ್ಮೃತಿ-ಗಳು ಇದೇ ಅರ್ಥ ಹೇಳುತ್ತದೆ. ಇಂತಹ ಅಥನನ್ನು ತಿಳಿದವರು (ಸರಂತೀತಿ ಸರ್ವಾಃ) ''ಸೃಗತೌ'' ಎನ್ನುವ ಧಾತುವಿಗೆ ವಪ್ರತ್ಯಯಬಂದು ಸರ್ವ ಎಂದು ರೂಪವಾಗಿದೆ. ''ಅಥ ಸರ್ವರಿಗೆ'' ಭಗವಂತನನ್ನು ತಿಳಿದವರಿಗೆ ಕಾಲವು ಗುಣೋಪೇತವಾಯಿತು. ಅಥವಾ ಭಗವಂತನನ್ನು ಅನುಸರಿಸುವವರಿಗೆ ಸುಖವಾಯಿತು.

ಪರಮಾತ್ಮನ ಜ್ಞಾನಿಗಳಿಗೆ, ಪರಮಾತ್ಮನ ಅನುಯಾಯಿಗಳಿಗೆ ಮಂಗಲದಾಯಕವಾದ ಕಾಲ ಎಂದು ಅರ್ಥ. ಅಥವಾ (ಅಥ=) ಭಗವದವತಾರ ಪ್ರಾರಂಭದಲ್ಲಿ ಎಲ್ಲ ಜ್ಞಾನಿಗಳಿಗೂ ಸುಖವಾಗಿದ್ದರೂ, (ಸರ್ವಾನ್ ಪ್ರತಿ ಗುಣೋಪೇತೋಽಪಿ) ಶತ್ರುಗಳಿಗೆ ಅಶೋಭನವಾಯಿತು. (ಪರಂ ಪ್ರತಿ ಅಶೋಭನಃ)

ಅಥವಾ ಬಹಳ ಅನಿಷ್ಟವಾದ ಕಾಲವು ಹೋಯಿತು. (ಪರಂ ಅಶೋಭನಃ, ಕಾಲಃ ಅಪೇತಃ) ಸಕಲಗುಣಯುಕ್ತವೂ ಆಯಿತು. (ಸರ್ವಗುಣಃ ಅಭೂತ್) ಯಾವಾಗ ಸರ್ವಗುಣಯುಕ್ತವಾಗಿತ್ತೆಂದರೆ ಅದಕ್ಕೆ ''ಋಕ್ಷಂ'' ಯರ್ಹಿ ಎಂದರು. ಅಂದರೆ 'ದೇವಕಿಯು ಭಗವಂತನಿಗೆ ಜನ್ಮಭೂಮಿಯಾದಾಗ' ಎಂದರ್ಥ. ಏಕಾಕ್ಷರಕೋಶ ಋಕಾರಕ್ಕೆ 'ಅದಿತಿ'' ಎಂದರ್ಥವನ್ನು ಋಕಾರೋ ದೇವಮಾತಾ ಸ್ಯಾತ್ ಎಂದು ಹೇಳುತ್ತದೆ. ದೇವಮಾತೆಯೇ ಅದಿತಿ, ಅದಿತಿಯೇ ದೇವಕಿಯಾಗಿರುವಳು. ಸರ್ವರುಚಿಕೋಶ ''ಕ್ಷ''ಕಾರಕ್ಕೆ ''ಕ್ಷಃ ಕ್ಷೇತ್ರೇ ರಾಕ್ಷಸೇ ಕ್ಷಯೇ'' ಎಂದು ಕ್ಷೇತ್ರ=ಭೂಮಿ ಎಂದು ಹೇಳುತ್ತದೆ. ಹೀಗಾಗಿ ''ಋಕ್ಷಂ'' ಋಕಾರದಿಂದ ವಾಚ್ಯಳಾದ ಅದಿತಿಯೆಂಬ ದೇವಕಿಯೇ ಜನ್ಮಕ್ಕೆ ಭೂಮಿಯಾದಳು. ಆಗ ಕಾಲವು ಸರ್ವಗುಣಯುಕ್ತವಾಗಿತ್ತೆಂದು ಹೇಳಿ-ದಂತಾಯಿತು. ಕಾರಣ ಎಲ್ಲರಿಗೂ ಪರಮಶೋಭನವೆಂದರ್ಥವಲ್ಲ, ಭಕ್ತರಿಗೆ ಮಂಗಲಕವಾಗಿತ್ತು, ಅಭಕ್ತರಿಗೆ ಅಮಂಗಲವಾಗಿತ್ತು ಎಂದು ಅರ್ಥೈಸಬೇಕು.

ಭಗವಂತನ ಅವತಾರಕ್ಕೆ ಯೋಗ್ಯವಾದ ಕಾಲವು ಬಂದಿತು. ಶ್ರೀಹರಿಯ ಜನ್ಮನಕ್ಷತ್ರ ರೋಹಿಣಿ ಬಂದಿತು. ದಿಕ್ಕುಗಳು ಪ್ರಸನ್ನಗಳಾದುವು. ಸುಖಸ್ಪರ್ಶವಾಗಿ ಗಾಳಿಯು ಬೀಸಿತು. ದುಂದುಭಿಗಳು ಮೊಳಗಿದುವು. ಗಂಧರ್ವಾದಿಗಳ ಗಾನನರ್ತನಗಳಾದುವು. ಅರ್ಧರಾತ್ರಿಯಲ್ಲಿ ಶ್ರೀಹರಿಯು ದೇವಕಿಯಲ್ಲಿ ಪೂರ್ಣಚಂದ್ರ-ನಂತೆ ಅವತರಿಸಿದನು.

ತಮದ್ಭುತಂ ಬಾಲಕಮಂಬುಜೇಕ್ಷಣಂ ಚತುರ್ಭುಜಂ ಶಂಖಗದಾದ್ಯುದಾಯುಧಂ ।
ಶ್ರೀವತ್ಸ ಲಕ್ಷ್ಯಂಗಲಶೋಭಿಕೌಸ್ತುಭಂ ಪೀತಾಂಬರಂ ಸಾಂದ್ರಪಯೋದಸೌಭಗಂ ॥
ಮಹಾರ್ಹವೈಡೂರ್ಯಕಿರೀಟ ಕುಂಡಲತ್ವಿಷಾ ಪರಿಷ್ವಕ್ತ ಸಹಸ್ರಕುಂತಲಂ ಉದ್ದಾಮ
ಕಾಂಚ್ಯಂಗದಕಂಕಣಾದಿಭಿರ್ವಿರೋಚಮಾನಂ ವಸುದೇವ ಐಕ್ಷತ ॥

ಕಮಲದಂತೆ ವಿಶಾಲವಾದ ಕಣ್ಣುಗಳು, ಶಂಖ, ಗದೆ, ಮುಂತಾದ ಉತ್ಕೃಷ್ಟಾಯುಧಗಳುಳ್ಳ ನಾಲ್ಕು ತೋಳುಗಳು. ಎದೆಯಲ್ಲಿ ಶ್ರೀವತ್ಸವೆಂಬ ಅಸಾಧಾರಣ ದ್ಯೋತಕವಾದ ಮಚ್ಚೆ, ಕೊರಳಲ್ಲಿ ಕಾಂತಿಯುಳ್ಳ ಕೌಸ್ತುಭಮಣಿ, ನಡುವಿಗೆ ಸುತ್ತಿದ ಪೀತಾಂಬರ ಜಲಪೂರ್ಣವಾದ ಮೋಡದಂತೆ ಶ್ಯಾಮಲವಾಗಿಯೂ, ಸುಂದರವಾಗಿಯೂ ಇರುವ ದೇಹಕಾಂತಿ, ಅಮೂಲ್ಯ ವಜ್ರವೈಢೂರ್ಯ ಮುಂತಾದ ನವರತ್ನಖಚಿತಗಳಾದ ಕಿರೀಟ ಕುಂಡಲಗಳ ಕಾಂತಿಯಿಂದ ಝಗಝಗಿಸುವ ಮುಂಗುರುಳುಗಳು, ಉತ್ತಮವಾದ ತೋಳ್ಬಳೆ ಕೈಬಳೆ ಕಾಂಚೀದಾಮ ಮೊದಲಾದ ಆಭರಣಗಳಿಂದ ಶೋಭಿತಗಳಾದ ಸರ್ವಾವಯವಗಳು ಇಂತಹ ಆಶ್ಚರ್ಯಕರ-ವಾದ ಬಾಲಕನನ್ನು ವಸುದೇವನು ನೋಡಿದನು.

ಅವತರಿಸಿದ ಕಾಲದಲ್ಲಿ ಆಯುಧ, ವಸ್ತ್ರ ಮತ್ತು ಆಭರಣಗಳು ಇರುವುವೆಂದು ಹೇಳಿರುವುದರಿಂದ ಶ್ರೀಕೃಷ್ಣನಿಗೆ ಪ್ರಾಕೃತದೇಹವಿಲ್ಲವೆಂದೂ, ಶ್ರೀವತ್ಸಚಿಹ್ನೆ, ಮತ್ತು ಕೌಸ್ತುಭಮಣಿ ಇವುಗಳನ್ನು ಅವತಾರ ಕಾಲದಲ್ಲಿಯೇ ಉಳ್ಳವನಾದ್ದರಿಂದ ಇವನು ವಿಷ್ಣುವಿನ ಅವತಾರವೆಂದೂ ಅತ್ಯಂತ ಸ್ಪಷ್ಟವಾಗಿ ತಿಳಿಯಬಹುದು.

ವಾದಿರಾಜರು ಭಗವಂತನಿಗೆ ಜನನವಿಲ್ಲ ಎನ್ನುವ ಮಾತನ್ನು ಅನೇಕ ಯುಕ್ತಿಗಳಿಂದ ಸಮರ್ಥನೆ ಮಾಡಿದ್ದಾರೆ.

ಜಾನಾತಿ ಮಾತಾ ಪರಮಾತ್ಮಜಾತಂ ನೂನಂ ಪಿತಾऽಪಿ ಕ್ವಚಿದೇವ ಲೋಕೇ ।
ತಾಭ್ಯಾಮನಂಗೀಕೃತಕೃಷ್ಣಜನ್ಮ ಕೋವಾ ಪುಮಾನ್ ಸಾಧಯಿತುಂ ಸಮರ್ಥಃ ॥
ಯದೀಹ ಜಾತೋ ವಸುದೇವವೀರ್ಯಾತ್ತದಾ ಕುತಸ್ತಸ್ಯ ವಿಭೂಷಣಾನಿ ॥
ವರಾಂಬರಂ ಕೌಸ್ತುಭರತ್ನ ಮುದ್ಯತ್ ಸುದರ್ಶನಂ ಶಂಖಗದಾರಿಜಾತಮ್ ॥

ಎಂದು ಸ್ವಾರಸ್ಯಕರ ಮಾತನಾಡಿದ್ದಾರೆ.

ವಸುದೇವನು ಸ್ನಾನಮಾಡಿ, ಗೋದಾನವನ್ನು ಮುಂದೆ ಮಾಡುವುದಾಗಿ ಸಂಕಲ್ಪ ಮಾಡಿ ಸ್ತುತಿಸುವನು—

ದೇವ! ಪ್ರಕೃತಿವಿಲಕ್ಷಣ, ಜ್ಞಾನಾನಂದಸ್ವರೂಪನಾದ ಪರಮಾತ್ಮನೇ ನೀನೆಂದು ನಿನ್ನ ಅನುಗ್ರಹದಿಂದ ತಿಳಿಯಿತು. ಪ್ರಕೃತಿಯಿಂದ ಜಗತ್ತನ್ನು ಸೃಷ್ಟಿಸುವೆ. ಅಪ್ರವಿಷ್ಟ ಅಂದರೆ ಜಗತ್ತಿನ ಹೊರಗೂ ಇರುವೆ-ಯಾದುದರಿಂದ ಅದರೊಳಗಿಲ್ಲದವನೆಂದೂ, ಜಗತ್ತಿನೊಳಗೆ ವ್ಯಾಪ್ತನಾಗಿದ್ದರೂ ನಿರ್ಲಿಪ್ತನಾದ್ದರಿಂದ ಪ್ರವಿಷ್ಟ-ನೆಂದೂ ಕರೆಯಲ್ಪಡುವೆ. ಜೀವನಂತೆ ಶರೀರದಲ್ಲಿರುವ ನಿನಗೂ, ಜೀವನಿಗೂ ಭೇದವಿಲ್ಲವೆಂದು ಅಜ್ಞಾನಿಗಳು ಹೇಳುವರು. ತನ್ನ ಮೇಲೆರಗಿದ ಪ್ರಪಂಚವನ್ನು ಹರಿಯು ಸಂಹರಿಸಬಲ್ಲನೆಂದು ಶ್ರುತಿಯು ಹೇಳುವುದರಿಂದ ಶಕ್ತಿಪೂರ್ಣನಾದ ನಿನಗೂ ಅಲ್ಪರಾದ ಜೀವರಿಗೂ ಅಭೇದವೆಲ್ಲಿದೆ? ಹಾಗೆ ಅಭೇದವನ್ನು ತಿಳಿಯುವವರು ಅಂಧಂತಮಸ್ಸಿನಲ್ಲಿ ಉರುಳುವರು. ಅಷ್ಟೇಕೆ? ಜಗತ್ತಿಗೂ ಬ್ರಹ್ಮನಿಗೂ ಪಾರಮಾರ್ಥಿಕ ಭೇದವಿದೆ ಎಂಬು-ದನ್ನೂ, ಜಗತ್ತಿನ ಸೃಷ್ಟಿ-ಸ್ಥಿತಿ-ಸಂಹಾರ ಮಾಡತಕ್ಕವನು ನೀನೇ ಎಂಬುದನ್ನೂ ಶ್ರುತಿಯು ಸ್ಪಷ್ಟಪಡಿಸುತ್ತಿದೆ. ನೀನು ನಿರ್ಗುಣನೂ ಹೌದು, ಸಗುಣನೂ ಹೌದು. ಕ್ಲೇಶಕರ ಕರ್ಮರಹಿತನಾದುದರಿಂದ ಅವಿಕ್ರಿಯನೂ

ಹೌದು, ಕರ್ತನೂ ಹೌದು. ಸ್ವಾಮಿಯೇ! ತಮೋಗುಣನಾದ ಕಂಸನು ನಿನ್ನ ಆರುಮಂದಿ ಅಣ್ಣಂದಿರನ್ನೂ ಕೊಂದನು. ನೀನು ಅವತರಿಸಿದುದನ್ನು ಕೇಳಿದರೆ ಅವನು ಕೂಡಲೇ ಆಯುಧವನ್ನು ಹಿಡಿದೇ ಬರುವನು.

ವಿದಿತೋಽಸಿ ಭವಾನ್ ಸಾಕ್ಷಾತ್ ಪುರುಷಃ ಪ್ರಕೃತೇಃ ಪರಃ ।
ಕೇವಲಾನುಭವಾನಂದಸ್ವರೂಪಃ ಸರ್ವಬುದ್ಧಿದೃಕ್ ॥
ತ್ವಮಸ್ಯ ಲೋಕಸ್ಯ ವಿಭೋ ರಿರಕ್ಷಿಷುರ್ಗೃಹೇಽವತೀರ್ಣೋಽಸಿ ಮಮಾಖಿಲೇಶ್ವರ ।
ಸ ತೇಽವತಾರಂ ಪುರುಷೈಃ ಸಮರ್ಪಿತಂ ಶ್ರುತ್ವಾಽಧುನೈವಾಭಿಸರತ್ಯುದಾಯುಧಃ ॥

ದೇವ! ನಿನ್ನ ರೂಪವು ಅವ್ಯಕ್ತ ಅಂದರೆ ನಿನ್ನ ಅನುಗ್ರಹವಿಲ್ಲದಿದ್ದರೆ ಕಾಣಿಸುವುದಿಲ್ಲ. ಇದು ಆದಿಯಲ್ಲಿ ಇರತಕ್ಕದ್ದು. ಬ್ರಹ್ಮ, ಸ್ವಪ್ರಕಾಶ, ನಿರ್ಗುಣ, ನಿರ್ವಿಕಾರ, ಅಶುಭಸಂಪರ್ಕರಹಿತ, ಸರ್ವೋತ್ತಮವಾಗಿರತಕ್ಕುದು, ನಾರಾಯಣನೆಂಬುದು ಇದರ ಸಂಜ್ಞೆ. ವಿಷ್ಣು ಅಂದರೆ ಬಲ ಮತ್ತು ಪ್ರಾಣಾತ್ಮಕವು. ಅಧ್ಯಾತ್ಮದೀಪವು ಅಂದರೆ ದೇಹದೊಳಗಿದ್ದು ಇಂದ್ರಿಯಾದಿಗಳನ್ನು ಬೆಳಗಿಸತಕ್ಕದ್ದು. ಕಾಲವೂ ನಿನ್ನಾಧೀನವು. ಮೋಕ್ಷಾಶ್ರಯನೂ, ಸರ್ವಪ್ರೇರಕನೂ ಆದ ನಿನ್ನನ್ನು ಶರಣು ಹೊಂದುವೆನು. ಕಂಸನ ಭಯವನ್ನು ಪರಿಹರಿಸು. ಈ ರೂಪವನ್ನು ಮರೆಮಾಚಿ ಶಿಶುರೂಪದಿಂದ ಕಾಣಿಸಿಕೋ! ಎಂದು ದೇವಕಿಯೂ ಸ್ತುತಿಸಿದಳು–

ರೂಪಂ ಯತ್ತತ್ ಪ್ರಾಹುರವ್ಯಕ್ತಮಾದ್ಯಂ ಬ್ರಹ್ಮಜ್ಯೋತಿರ್ನಿರ್ಗುಣಂ ನಿರ್ವಿಕಾರಮ್ ।
ಸತ್ತಾಮಾತ್ರಂ ನಿರ್ವಿಶೇಷಂ ನಿರೀಹಂ ಸತ್ವಂ ಸಾಕ್ಷಾದ್ ವಿಷ್ಣುರಧ್ಯಾತ್ಮದೀಪಃ ॥
ಉಪಸಂಹರ ವಿಶ್ವಾತ್ಮನ್ನದೋ ರೂಪಮಲೌಕಿಕಮ್ ।
ಶಂಖಚಕ್ರಗದಾಪದ್ಮಶ್ರಿಯಾ ಜುಷ್ಟಂ ಚತುರ್ಭುಜಮ್ ॥

ನೀವು ಹಿಂದೆ ಸುತಪ ಮತ್ತು ಪೃಶ್ನೀ ಎಂಬ ದಂಪತಿಗಳಾದಾಗ ನನ್ನನ್ನು ಮಗನಾಗಬೇಕೆಂದು ಪ್ರಾರ್ಥಿಸಿದಿರಿ. ಇದೇ ರೂಪದಿಂದ ಆಗ ನಿಮಗೆ ಕಾಣಿಸಿಕೊಂಡು ವರವನ್ನು ಕೊಟ್ಟು ಪೃಶ್ನಿಗರ್ಭನಾಮಕ ಮಗನಾದೆ. ನೀವು ನಂತರ ಕಶ್ಯಪ ಅದಿತಿಯರಾಗಿ ತಪಸ್ಸನ್ನು ಮಾಡಿದಿರಿ. ನಾನು ವಾಮನ ಎಂಬ ಹೆಸರಿನಿಂದ ನಿಮಗೆ ಮಗನಾದೆನು. ಇದನ್ನು ತಿಳಿಸಬೇಕೆಂದೇ ಹಿಂದೆ ದರ್ಶನ ಕೊಟ್ಟ ರೂಪದಿಂದಲೇ ಈಗಲೂ ಪ್ರಕಟನಾದೆ. ಈಗ ನನ್ನನ್ನು ಪುತ್ರಭಾವದಿಂದ ಮತ್ತು ನಾರಾಯಣನೆಂಬ ಜ್ಞಾನದಿಂದ ಬಹುಬಾರಿ ಚಿಂತಿಸಿ. ನನ್ನ ಲೋಕವನ್ನು ಹೊಂದುವಿರಿ ಎಂದು ಭಗವಂತನು ಸಮಾಧಾನ ಗೈದನು.

ತ್ವಮೇವ ಪೂರ್ವಸರ್ಗೇಽಭೂಃ ಪೃಶ್ನಿಃ ಸ್ವಾಯಂಭುವೇ ಸತಿ ।
ತದಾಽಯಂ ಸುತಪಾನಾಮ ಪ್ರಜಾಪತಿರಕಲ್ಮಷಃ ।
ಅಹಂ ಸುತೋ ವಾಮಭವಂ ಪೃಶ್ನಿಗರ್ಭ ಇತಿ ಸ್ಮೃತಃ
ತೃತೀಯೇಽಸ್ಮಿನ್ ಭವೇಽಹಂ ವೈ ತೇನೈವ ವಪುಷಾಽನಘೇ
ಜಾತೋ ಭೂಯಸ್ತಯೋರೇವ.

ಶ್ರೀಹರಿಯು ಮಗುವಿನಂತೆ ಕಾಣಿಸಿಕೊಂಡನು. ಅವನ ಪ್ರೇರಣೆಯಂತೆ ವಸುದೇವನು ಸ್ತನ್ಯ ಊಡಿದ ದೇವಕಿಯಿಂದ ಆ ಮಗುವನ್ನು ತೆಗೆದುಕೊಂಡು ಹೊರಟನು. ತಾನಾಗಿ ಬಾಗಿಲುಗಳು ತೆರೆದುಕೊಂಡುವು. ಕಾವಲುಗಾರರು ನಿದ್ರಿಸುತ್ತಿದ್ದರು. ಮಳೆಗಾಲವಾದುದರಿಂದ ಯಮುನಾನದಿಯು ಪೂರ್ಣಪ್ರವಾಹದಿಂದ ಹರಿಯುತ್ತಿದ್ದರೂ ಶಿಶುರೂಪದ ದೇವರಿಗಾಗಿ ದಾರಿಯನ್ನು ಬಿಟ್ಟುಕೊಟ್ಟಳು. ಶಿಶುವನ್ನೆತ್ತಿಕೊಂಡು ವಸುದೇವನು

ಸುಖವಾಗಿ ಆ ನದಿಯನ್ನು ದಾಟಿ ಯಶೋದೆಯಿದ್ದ ಸ್ಥಳವನ್ನು ತಲುಪಿದನು. ಆ ವೇಳೆಗೆ ಯಶೋದೆಯಲ್ಲಿ ದುರ್ಗೆಯು ಅವತರಿಸಿದ್ದಳು. ಅವಳ ಅನುಗ್ರಹದಿಂದ ಯಶೋದೆಗೆ ನಿದ್ರೆಯು ಬಂದಿತ್ತು. ಅವಳಿಗೆ ಹುಟ್ಟಿದ ಮಗುವು ಹೆಣ್ಣೋ ಗಂಡೋ ಗೊತ್ತಾಗಲಿಲ್ಲ.

ಯಶೋದಾ ನಂದಪತ್ನೀ ಚ ಜಾತಂ ಪರಮಬುಧ್ಯತ ।
ನ ತಲ್ಲಿಂಗಂ ಪರಿಶ್ರಾಂತಾ ನಿದ್ರಯಾಽಪಗತಸ್ಮೃತಿಃ ॥

ಹರಿದುರ್ಗೆಯರ ಜನನ ಏಕಕಾಲದಲ್ಲಿ

ಶ್ರೀಹರಿಯು ದೇವಕಿಯ ಗರ್ಭದಲ್ಲಿ ಸ್ವೇಚ್ಛೆಯಿಂದ ತಾನು ವಾಸ ಕೈಗೊಂಡ ದಿನವೇ ಯಶೋದೆಯೂ ಅದೇ ದಿನದಲ್ಲಿ ದುರ್ಗೆಯನ್ನು ತನ್ನ ಉದರದಲ್ಲಿ ಹೊತ್ತಳು. ಈರ್ವರ ಉದರಪ್ರವೇಶವೂ ಒಂದೇ ಸಮಯದಲ್ಲಿ. ಈರ್ವರ ಜನನವೂ ಒಂದೇ ದಿನ ಒಂದೇ ರಾತ್ರಿಯಲ್ಲಿ ಒಂದೇ ಸಮಯದಲ್ಲಿ. ಆ ರಾತ್ರಿ ಕಾಲದಲ್ಲಿ ವಸುದೇವನು ಯಶೋದೆಯ ಮಡಿಲಲ್ಲಿ ಶ್ರೀಹರಿಯನ್ನು ಮಲಗಿಸಿ ದುರ್ಗೆಯನ್ನು ಕರೆದೊಯ್ದದ್ದು ಯಶೋದೆಗೂ ಗೊತ್ತಿಲ್ಲ. ಭಾಗವತದಲ್ಲಿ ಜನನಕಾಲ ಹಾಗೂ ಗರ್ಭಧಾರಣದ ವಿಚಾರವೇ ಇಲ್ಲ. ಈ ವಿಚಾರವನ್ನು ಹರಿವಂಶ ಈ ಮಾತುಗಳಿಂದ ಸ್ಪಷ್ಟಪಡಿಸುತ್ತದೆ–

ಸ ಯತ್ರ ಗರ್ಭವಸತಿಂ ವಸತ್ಯಾತ್ಮೇಚ್ಛಯಾ ಹರಿಃ ।
ಯಶೋದಾಽಪಿ ಸಮಾಧತ್ತೇ ಗರ್ಭಂ ತದಹರೇವತು ?
ಯಾಮೇವ ರಜನೀಂ ಕೃಷ್ಣೋ ಜಜ್ಞೇ ವೃಷ್ಣಿಕುಲೇ ಪ್ರಭುಃ ।
ತಾಮೇವ ರಜನೀಂ ಕನ್ಯಾಂ ಯಶೋದಾಽಪಿ ವ್ಯಜಾಯತ ।
ಯಶೋದಯಾ ಸ್ವವಿಜ್ಞಾತಃ ತತ್ರ ನಿಕ್ಷಿಪ್ಯ ದಾರಕಮ್ ॥
ಪರಿವರ್ತೇ ಕೃತೇ ತಾಭ್ಯಾಂ ಗರ್ಭಾಭ್ಯಾಂ ಭಯವಿಹ್ವಲಃ ।
ವಸುದೇವಃ ಕೃತಾರ್ಥೋ ವೈ ನಿರ್ಜಗಾಮ ನಿವೇಶನಾತ್ ॥

ಪುರಾಣಗಳ ಅಧ್ಯಯನ ಇತಿಹಾಸದೊಡನೆ ನಡೆದಾಗ ಪೂರ್ಣವಾಗುತ್ತದೆ. ಇಲ್ಲವಾದರೆ ಸರಿಯಾಗಿ ಆಗುವುದಿಲ್ಲ.

ವಸುದೇವನು ತಾನು ತಂದಿದ್ದ ಮಗುವನ್ನು ಯಶೋದೆಯ ಮಗ್ಗುಲಲ್ಲಿ ಮಲಗಿಸಿ ಅಲ್ಲಿದ್ದ ಹೆಣ್ಣು ಮಗುವನ್ನು ಎತ್ತಿಕೊಂಡು ಬಂದನು.

ಬಾಗಿಲುಗಳು ಮೊದಲಿನಂತೆ ಬಂದಾದುವು. ಮಗುವು ಗಟ್ಟಿಯಾಗಿ ಅತ್ತಿತು. ಈ ಧ್ವನಿಯಿಂದ ಎಚ್ಚೆತ್ತ ಕಾವಲುಗಾರರು ಓಡಿ ಹೋಗಿ ಕಂಸನಿಗೆ ಮಗುವು ಹುಟ್ಟಿತೆಂದು ತಿಳಿಸಿದರು.

ಕಂಸನು ಮಗುವನ್ನು ಕೊಲ್ಲಲು ಬಂದಾಗ ದೈನ್ಯದಿಂದ ಬೇಡುತ್ತಾಳೆ– ಅಣ್ಣಾ ನಾನು ನಿನ್ನ ತಂಗಿಯಷ್ಟೇ! ಎಲ್ಲ ಮಕ್ಕಳನ್ನು ಕಳೆದುಕೊಂಡಿರುವೆ, ಇವಳನ್ನಾದರೂ ನನಗೆ ಕೊಟ್ಟು ಪುಣ್ಯಕಟ್ಟಿಕೋ—

ನನ್ವಹಂ ತೇ ಹ್ಯವರಜಾ ದೀನಾ ಹತಸುತಾ ಪ್ರಭೋ ।
ದಾತುಮರ್ಹಸಿ ಮಂದಾಯಾ ಅಂಗೇಮಾಂ ಚರಮಾಂ ಪ್ರಜಾಂ ॥

ಕಡೆಯ ಹುಟ್ಟು ಕಡಲೆ ಬೆಲ್ಲ

''ಈ ಮಗುವು ಅಸುನೀಗಿದರೂ ಇನ್ನೊಂದು ಮಗುವನ್ನು ಪಡೆದುಕೊಳ್ಳಿ. ನಿಮ್ಮ ದುಃಖ ಕಳೆದುಕೊಳ್ಳಿರಿ'' ಎಂದು ಕಂಸನು ಹೇಳದಿರಲೆಂದು ನಾವು ಮುದುಕರು, ಇನ್ನು ಮಕ್ಕಳ ಆಶೆಯಿಲ್ಲ, ಎಂದು ಹೇಳಿ ಕಂಸನನ್ನು ಸಮಾಧಾನಿಸಲು 'ಚರಮಾಂ' ಇದು ಕೊನೆಯದು ಎಂದರು. ಕಡೆಯ ಹುಟ್ಟು ಕಡಲೆಬೆಲ್ಲ, ಅಲ್ಲವೇ! ಅಥವಾ, ನಾನು ದೀನಳು, ಮಂದಳು, ಎಂದು (ದೀನಾ ಮಂದಾ ಇತಿ ಚ) ರಮೆಯಾದ ಇವಳನ್ನು ನನಗೆ ಕೊಡು, (ಇಮಾಂ ರಮಾಂ ದಾತುಮರ್ಹಸಿ) ಇವಳು ಲಕ್ಷ್ಮಿ! ಶ್ರೀಹರಿಯಲ್ಲ, ಕಾರಣ ನಿನಗೆ ಇವಳಿಂದ ಭಯವಿಲ್ಲ. ಇವಳನ್ನು ಕೊಡು.

ಅಥವಾ ನನಗೆ ಲಕ್ಷ್ಮಿಯನ್ನು ಕೊಡು. (ಮಾಂದಾತುಮರ್ಹಸಿ), ನೀನು ಮನೆಗೆ ಹೋಗು. (ಚರ ಗೃಹಂ) ಎಂದು ವ್ಯಾಖ್ಯಾನಿಸಿರುವರು.

ಕಂಸನು ಬಂದು ಮಗುವನ್ನು ಕೊಲ್ಲಲು ಹೋದಾಗ ದುರ್ಗೆಯು ನಿಜರೂಪದಿಂದ ಗಗನದಲ್ಲಿ ನಿಂದು ''ಮೂಢನೇ! ನನ್ನ ವಧೆಯಿಂದ ನಿನಗೇನು ಫಲ? ನಿನ್ನ ಮೃತ್ಯುವು ಬೇರೆಡೆ ಬೆಳೆಯುತ್ತಿರುವನು. ದೇವಕಿಯನ್ನು ವೃಥಾ ವ್ಯಥೆ ಪಡಿಸಬೇಡ'' ಎಂದು ಹೇಳಿ ಅಲ್ಲಿಂದ ಹೊರಟು ಕಾಶಿ ಮುಂತಾದ ಅನೇಕ ಸ್ಥಳಗಳಲ್ಲಿ ಒಂದೊಂದು ರೂಪದಿಂದ ನೆಲೆಸಿ ಪೂಜೆಯನ್ನು ಕೊಳ್ಳುತ್ತಿರುವಳು—

ಕಿಂ ಮಯಾ ಹತಯಾ ಮಂದಜಾತಃ ಖಲು ತವಾಂತಕಃ ।
ಯತ್ರ ಕ್ವವಾ ಪೂರ್ವಶತ್ರುರ್ಮಾಹಿಂಸೀಃ ಕೃಪಣಾನ್ ವೃಥಾ ॥

ಕಂಸನು ತಂಗೀ! ಅಶರೀರವಾಣಿಯೂ ಸುಳ್ಳಾಯಿತು. ಅದನ್ನು ನಂಬಿ ನಿನ್ನ ಮಕ್ಕಳನ್ನು ಕೊಂದು ಪಾಪಿಯಾದೆ. ಕೊರಗಬೇಡಮ್ಮ! ಹರಿಯು ಸ್ವತಂತ್ರನು. ಜೀವರ ಕರ್ಮಾನುಸಾರ ಫಲವನ್ನು ಕೊಡುವನು. ನಿನ್ನ ಮಕ್ಕಳು ಅವರ ಕರ್ಮದಿಂದಲೇ ಸತ್ತರು. ನನ್ನ ಅಪರಾಧವನ್ನು ಕ್ಷಮಿಸು, ಎಂದು ನುಡಿದು ವಸುದೇವ ದೇವಕಿಯರನ್ನು ಸೆರೆಯಿಂದ ಬಿಡಿಸಿದನು.

ದೈವಮಪ್ಯನೃತಂ ವಕ್ತಿ ನ ಮರ್ತ್ಯಾ ಏವ ಕೇವಲಮ್ ।
ಯದ್ವಿಶ್ರಂಭಾದಹಂ ಪಾಪಃ ಸ್ವಸುರ್ನಿಹತವಾನ್ ಶಿಶೂನ್ ॥
ತಸ್ಮಾದ್ ಭದ್ರೇ ಸ ತನಯಾನ್ ಮಯಾ ವ್ಯಾಪಾದಿತಾನಪಿ ॥
ಮಾಽನುಶೋಚಯುತಃ ಸವಃ ಸ್ವಕೃತಂ ವಿಂದತೇ ಫಲಮ್ ॥

ಪರಮಾತ್ಮನು ಜೀವರ ಸತ್ತಾ (ಇರುವಿಕೆ) ಮೊದಲಾದುವುಗಳಿಗೆ ನಿಯಾಮಕನು. ಈ ಭೇದ ಜ್ಞಾನವು ನರಕವನ್ನು ತಪ್ಪಿಸುವುದು. ಮುಕ್ತಿಗೂ ಸಾಧನವು. ಈ ಜ್ಞಾನವುಳ್ಳವನು ಯಾರಲ್ಲಿಯೂ ಶತ್ರುತ್ವವನ್ನು ಮಾಡುವುದಿಲ್ಲ, ವಸುದೇವನು ಹೀಗೆ ಹೇಳಲು ಕಂಸನು ಕಾಲಿಗೆರಗಿ ಪ್ರಸನ್ನರಾದ ವಸುದೇವ ದೇವಕಿಯರ ಅನುಮತಿಯನ್ನು ಪಡೆದು ತನ್ನ ಅರಮನೆಗೆ ಬಂದನು. ಇದು ಕಂಸನಲ್ಲಿದ್ದ ಭೃಗುಋಷಿಗಳ ವ್ಯಾಪಾರವೆಂದು ತಿಳಿಯಬೇಕು.

ಕ್ಷಮಧ್ವಂ ಮಮ ದೌರಾತ್ಮ್ಯಂ ಸಾಧವೋ ದೀನವತ್ಸಲಾಃ ।
ಇತ್ಯುಕ್ತ್ವಾಽಶ್ರುಮುಖಃ ಪಾದೌ ಶ್ಯಾಲಃ ಸ್ವಸ್ರೋರಥಾಗ್ರಹೀತ್ ॥

ಮರುದಿನ ಕಂಸನು ತನ್ನ ದೈತ್ಯಪರಿವಾರಕ್ಕೆ ದುರ್ಗಾದೇವಿಯು ಹೇಳಿದುದನ್ನು ತಿಳಿಸಿದನು. ವಿಷ್ಣುವೇ ಎಲ್ಲಕ್ಕೂ ಮೂಲನಾದುದರಿಂದ ಋಷಿಗಳನ್ನು ಕೊಲ್ಲುವುದೇ ವಿಷ್ಣುವಿನ ವಧೆಗೆ ಉಪಾಯವೆಂದು ದುರ್ಮಂತ್ರಿಗಳು ಹೇಳಿದರು. ಸಾಧುಗಳನ್ನು ಕೊಲ್ಲಲು ಕಂಸನು ಎಲ್ಲ ಕಡೆಗೆ ರಾಕ್ಷಸರನ್ನು ಕಳುಹಿಸಿದನು—

ಮೂಲಂ ಹಿ ವಿಷ್ಣುರ್ದೇವಾನಾಂ ಯತ್ರ ಧರ್ಮಃ ಸನಾತನಃ ॥
ತನ್ಮೂಲಾಃ ದೇವತಾಃ ಸರ್ವಾಃ ಸೇಶ್ವರಾಃ ಸಚತುರ್ಮುಖಾಃ ॥
ಅಯಂ ವೈ ತದ್ವಧೋಪಾಯೋ ಯದೃಷೀಣಾಂ ವಿಹಿಂಸನಮ್ ॥

ಇತ್ತಕಡೆ ಬೆಳಗ್ಗೆ ನಂದಗೋಪನು ತನಗೆ ಗಂಡುಮಗು ಹುಟ್ಟಿತೆಂದು ಸಂತೋಷಿಸಿ ಮಂಗಳ ಕಾರ್ಯಗಳನ್ನು ಸಂಭ್ರಮದಿಂದ ಮಾಡಿದನು.

ನಗುವರ ಬಾಯಿ ಮುಚ್ಚಲು ಕಾಣಿಕೆ

ನಂದಗೋಪನು ಸಾಕಷ್ಟು ದಾನ ಮಾಡಿದ, ವಸ್ತ್ರ ಆಭರಣ, ಗೋಗಳು, ಹೀಗೆ ಎಲ್ಲವನ್ನು ದಾನ ಮಾಡಿದನು. ಈ ಎಲ್ಲ ದಾನ ಏಕೆ ಗೊತ್ತೇ? ಎನ್ನುತ್ತಾ ರಾಜರು ತಮ್ಮದೇ ಆದ ಮಾತಿನಲ್ಲಿ ಹೀಗೆ ಉತ್ತರಿಸು-ವರು– ''ಕೃಷ್ಣನ ತಂದೆ ನಂದಗೋಪ ಎಂಬುದನ್ನು ಕೇಳಿ ಎಲ್ಲರೂ ನಗುವರು. ಕಾರಣ ಇವರೆಲ್ಲ ನಗದಿರಲಿ ಎನ್ನುವುದಕ್ಕೆ ನಂದಗೋಪ ಇವರಿಗೆಲ್ಲ ಕಾಣಿಕೆ ನೀಡಿದ'' ಹೀಗೆ ನನ್ನ ಅನಿಸಿಕೆ ಎನ್ನುತ್ತಾರೆ ವಾದಿರಾಜ ಶ್ರೀಚರಣರು.

ವಸುದೇವ ನಂದಗೋಪರ ಭೇಟಿ

ಹರಿಯು ಗೋಕುಲಕ್ಕೆ ಬಂದಾಗಿನಿಂದ ಅದು ಭಾಗ್ಯಲಕ್ಷ್ಮಿಯ ವಿಹಾರಸ್ಥಾನವಾಯಿತು. ನಂದಗೋಪನು ಮಾಮೂಲಿನಂತೆ ಕಂಸನಿಗೆ ಕಪ್ಪವನ್ನು ಕೊಟ್ಟು ಹಿಂತಿರುಗುವಾಗ, ಇವನ ದರ್ಶನಕ್ಕಾಗಿಯೇ ಕಾದಿದ್ದ ವಸುದೇವನ ಭೇಟಿ ಮಾಡಿದನು.

ವಸುದೇವನು ನಂದ! ನಿನಗೆ ಮುಪ್ಪಿನಲ್ಲಿ ಪುತ್ರನು ಹುಟ್ಟಿದುದು ನಮಗೆಲ್ಲರಿಗೂ ಸುಖಸಂತೋಷ-ವನ್ನುಂಟುಮಾಡಿದೆ. ಬಂಧುಗಳು ಒಂದೆಡೆ ಸೇರುವುದು ದುರ್ಲಭ. ಅವರನ್ನು ಅಗಲುವುದೂ ಅಷ್ಟೇ ದುಃಖಕರ. ಎಲ್ಲರೂ ಕ್ಷೇಮದಿಂದಿರುವರೇ? ಬಲರಾಮನು ಸುಖವಾಗಿರುವನೆ? ನೀನೂ ನಾನೂ ಅನಿಮಿತ್ತ ಬಂಧುಗಳಾದುದರಿಂದ ನಿನಗೆ ಸುಖವಾದರೆ ನನಗೆ ಧರ್ಮಾರ್ಥಕಾಮಗಳೆಲ್ಲ ಕೈಗೂಡಿದಂತೆ ಆಗುವುದು. ಅದಕ್ಕಾಗಿ ನಿನ್ನ ಕ್ಷೇಮವನ್ನು ವಿಚಾರಿಸಿದೆ ಎನ್ನುವನು.

ನಂದಗೋಪನೂ ಸಹ, ಅಣ್ಣಾ! ನಿನಗೆ ಬಹಳ ಸಂಕಟಗಳು ಬಂದುವು. ಹುಟ್ಟಿದ ಮಕ್ಕಳೆಲ್ಲ ಸತ್ತರು. ಕೊನೆಯ ಹೆಣ್ಣು ಮಗುವು ಗಗನಕ್ಕೆ ಹಾರಿಹೋಗಿ ಅದೂ ನಿನಗೆ ದಕ್ಕಲಿಲ್ಲ. ಎಲ್ಲ ಶ್ರೀಹರಿಯ ಸಂಕಲ್ಪ ಎಂದು ಉತ್ತರಿಸಿದ.

ಅಹೋ ತೇ ದೇವಕೀಪುತ್ರಾಃ ಕಂಸೇನ ಬಹವೋ ಹತಾಃ ।
ಏಕಾವಶಿಷ್ಟಾऽವರಜಾ ಕನ್ಯಾ ಸಾऽಪಿ ದಿವಂಗತಾ ॥

ನಂದಗೋಪನು ತನ್ನ ಮಗನು ಕೃಷ್ಣನೆಂದು ತಿಳಿದಿದ್ದನು. ಮತ್ತು ಅವನು ಪರಮಾತ್ಮನೆಂಬುದು ಗೊತ್ತಿರಲಿಲ್ಲ. ಇದು ಗುಟ್ಟಾಗಿಯೇ ಇರಲಿ ಎಂದು ವಸುದೇವನು ತನ್ನ ಮಾತನ್ನು ಬೇರೆ ಕಡೆಗೆ ತಿರುಗಿಸಿದನು.

ವಸುದೇವನು ನಂದನಿಗೆ ಗೋಕುಲದಲ್ಲಿ ಅನರ್ಥವಾಗುವುದೆಂಬ ಸೂಚನೆಗಳು ತೋರುತ್ತಿವೆ. ನೀನು ಅಲ್ಲಿಗೆ ಬೇಗನೆ ಹೊರಡು ಎಂದು ಎಚ್ಚರಿಕೆ ನೀಡಿದನು.

ಪೂತನಾ ಸಂಹಾರ

ನಂದಗೋಪನು ತನ್ನ ಪತ್ನಿ ಮೊದಲಾದವರು ಇದ್ದ ಸ್ಥಳಕ್ಕೆ ಬರುವುದಕ್ಕೆ ಮುಂಚೆ ಪೂತನಿಯೆಂಬ ರಾಕ್ಷಸಿಯು ಮಗುವನ್ನು ಕೊಲ್ಲಲು ಮಾರುವೇಷದಿಂದ ಬಂದಳು. ಮಗುವನ್ನು ಎತ್ತಿಕೊಂಡು ವಿಷದ ಸ್ತನ್ಯವನ್ನು ಕೊಟ್ಟಳು. ಶ್ರೀಕೃಷ್ಣನು ಸ್ತನ್ಯಪಾನನೆವದಿಂದ ಅವಳನ್ನು ಕೊಂದನು. ರಾಕ್ಷಸಿಯು ನಿಜರೂಪದಿಂದ ಸತ್ತುಬಿದ್ದಳು. ಗೋಪಿಯರು ಮಗುವಿಗೆ ರಕ್ಷೆ ಮಾಡಿದರು. ನಂದಾದಿಗಳು ಬಂದು ಸತ್ತು ಬಿದ್ದಿದ್ದ ಪೂತನಿಯ ಬೆಟ್ಟದಂತಿದ್ದ ದೇಹವನ್ನು ನೋಡಿ ಆಶ್ಚರ್ಯಪಟ್ಟು ಆ ದೇಹವನ್ನು ತುಂಡುಗಳಾಗಿ ಕಡಿದು ಸುಟ್ಟರು. ಶ್ರೀಕೃಷ್ಣನ ಸ್ಪರ್ಶದಿಂದ ಸುಗಂಧವು ಹರಡಿತು.

ಯಾತು ದಾನ್ಯಪಿ ಸಾ ಸ್ವರ್ಗಂ ಅವಾಪ ಜನನೀಂ ಗತಿಂ ।
ಕೃಷ್ಣಭುಕ್ತಸ್ತನಕ್ಷೀರಾಃ ಕಿಮು ಗಾವೋನು ಮಾತರಃ ॥

ಶ್ರೀಕೃಷ್ಣನು ತನ್ನ ಪಾದಗಳನ್ನೊತ್ತಿ ಸ್ತನ್ಯಪಾನ ಮಾಡಿದನು. ಅಂತಹ ರಾಕ್ಷಸಿಯು ಅಂದರೆ ಪೂತನಿಯು ಜನನೀಗತಿ ಅಂದರೆ ದುರ್ಜನರು ಹೊಂದುವ ನಿತ್ಯನರಕವೆಂಬ ದುರ್ಗತಿಯನ್ನು ಹೊಂದಿದಳು. ಅವಳಲ್ಲಿ ಆವೇಶ ರೂಪದಿಂದಿದ್ದ ಊರ್ವಶಿಯು ಜನನೀಗತಿ ಅಂದರೆ ಜನನಿಯರಾದ ದೇವಕೀ, ಯಶೋದೆಯರು ಹೊಂದುವ ಸ್ವರ್ಗವನ್ನು ಪಡೆದಳು. ಅಂದ ಬಳಿಕ ಹರಿಗೆ ಸ್ತನ್ಯ ಕೊಟ್ಟ ತಾಯಿಯರೂ ಗೋವುಗಳ ರೂಪದಿಂದಿದ್ದ ದೇವತೆಗಳೂ ಸದ್ಗತಿಯನ್ನು ಹೊಂದುವರೆಂದು ಹೇಳತಕ್ಕುದೇನು? ಹೊಂದಿಯೇ ತೀರುತ್ತಾರೆ ಎಂದು ಅರ್ಥ.

ಈ ಎಲ್ಲದಕ್ಕೂ

ಸಾತಾಟಕಾ ಚೋರ್ವಶೀ ಸಂಪ್ರವಿಷ್ಟಾ ಕೃಷ್ಣಾವಧ್ಯಾನಾನ್ನಿರಯಂ ಸಂಜಗಾಮ ।
ಸಾ ತೂರ್ವಶೀ ಕೃಷ್ಣಭುಕ್ತಸ್ತನೇನ ಪೂತಾಸ್ವರ್ಗಂ ಪ್ರಯಯೌ ತತ್ ಕ್ಷಣೇನ ॥

ಆಚಾರ್ಯರು ಹೀಗೆ ನಿರ್ಣಯ ಕೊಟ್ಟಿದ್ದಾರೆ.

ತೃಣಾವರ್ತನ ಸಂಹಾರ

ಒಂದು ದಿನ ಯಶೋದೆಯು ಬಹಿರ್ನಿಕ್ರಮಣ ಸಂಸ್ಕಾರಕ್ಕಾಗಿ ಕೃಷ್ಣನಿಗೆ ಮಂಗಳಸ್ನಾನ ಮಾಡಿಸಿ ದೇವರ ಗುಡಿಗೆಂದು ಕರೆದೊಯ್ದಳು. ತೂಕಡಿಸಿದಂತೆ ನಟಿಸಿದ ಶಿಶುವನ್ನು ಮೆಲ್ಲನೆ ಚುಕ್ಕುತಟ್ಟಿ ಒಂದು ಶಕಟದ ಬುಡದಲ್ಲಿ ಮಲಗಿಸಿದಳು. ಕಾರ್ಯಕ್ರಮದ ಸಡಗರದಲ್ಲಿ ಪಾಲ್ಗೊಂಡ ಯಶೋದೆಯು ಮಗುವಿನ ಕಡೆ ಗಮನವಹಿಸಿರಲಿಲ್ಲ. ಸ್ತನ್ಯಪಾನದ ನೆಪ ಹೂಡಿ ಅಳಲಾರಂಭಿಸಿದ ಪುಟ್ಟಮಕ್ಕಳಂತೆಯೇ ಸಿಟ್ಟನ್ನು ನಟಿಸುತ್ತಾ ಚಿಗುರೆಲೆಯಂತೆ ಕೋಮಲವಾದ ಕಾಲುಗಳಿಂದ ಶಕಟಕ್ಕೆ ಒದ್ದ. ಕೃಷ್ಣನ ಪಾದಸ್ಪರ್ಶವಾಗುವುದೇ ತಡ ಸಮಗ್ರ ಬಂಡಿಯು ಪುಡಿ ಪುಡಿ ಆಯಿತು. ರಸಭರಿತ ಭಕ್ಷ್ಯಗಳನ್ನು ಹೊತ್ತ ಬಂಡಿ ತಲೆಕೆಳಗಾಗಿ ಮುರಿದುಬಿತ್ತು. ಕೃಷ್ಣನ ಕಾರ್ಯಕ್ರಮಕ್ಕೆ ಬಂದು ಕೃಷ್ಣನನ್ನೇ ಮರೆತ ಕೃಷ್ಣ ಭಕ್ತರೆಲ್ಲರೂ ಕೃಷ್ಣನಿದ್ದಲ್ಲಿಗೆ ಓಡೋಡಿಬಂದರು. ಎಲ್ಲರಿಗೂ ಹೊಸದಾದ ನಂಬಲಾರದ ದೃಶ್ಯ. ಕಾರಣವಿಲ್ಲದೇ ಗಾಡಿಯು ಅಡಿಮೇಲಾದುದನ್ನು ಕಂಡು ಕಂಗಾಲಾದರು. ಬಂಡಿ ಉರುಳಿದ ಕಾರಣವನ್ನು ಕಾಣಲಾರದೇ ಮೂಕವಿಸ್ಮಿತರಾಗಿ ನೋಡುತ್ತಿರಲು ಅಲ್ಲಿಯೇ ಆಡುತ್ತಿದ್ದ ಪುಟ್ಟ ಬಾಲಕರು ಈ ಪುಟ್ಟಬಾಲಕನೇ ಕಾಲಿನಿಂದ ಒದ್ದು ಉರುಳಿಸಿದ್ದಾನೆ–

ರುದತಾಽನೇನ ಪಾದೇನ ಕ್ಷಿಪ್ತಮೇತನ್ನ ಸಂಶಯಃ

ಇದರಲ್ಲಿ ಸಂಶಯವಿಲ್ಲ ಎಂದು ಹೇಳಿದರು. ಆದರೂ ಗೋಪಿಯರು ಮಕ್ಕಳ ಮಾತೆಂದು ಉಪೇಕ್ಷಿಸಿದರು. ನಂಬಲು ಸಾಧ್ಯವೇ ಆಗಲಿಲ್ಲ, ಯಶೋದೆಯೂ ಯಾವುದೋ ಗ್ರಹದ ಉಪದ್ರವ ಇರಬೇಕೆಂದು ತನ್ನ ಕಂದನಿಗೆ ಬ್ರಾಹ್ಮಣರಿಂದ ಮಂತ್ರಜಪಗಳನ್ನು ಮಾಡಿಸಿ ಮೊಲೆಯೂಡಿಸಿದಳು.

ರುದಂತಂ ಸುತ ಮಾದಾಯ ಯಶೋದಾ ಗ್ರಹಶಂಕಿತಾ ।
ಕೃತಸ್ವಸ್ತ್ಯಯನಂ ವಿಪ್ರೈಃ ಸೂಕ್ತೈಃ ಸ್ತನಮಪಾಯಯತ್ ॥

ಶ್ರೀಕೃಷ್ಣನ ಈ ನಟನೆಯಲ್ಲಿಯೂ ದುಷ್ಟಸಂಹಾರವಾಗಿದೆ. ಶಕಟಾಕ್ಷನೆಂಬ ದೈತ್ಯನು ಕೃಷ್ಣನನ್ನು ಕೊಲ್ಲಲೆಂದು ಬಂಡಿಯಲ್ಲಿ ಸೇರಿಕೊಂಡಿದ್ದ.

ಅನಃ ಸಮಾವಿಶ್ಯ ದಿತೇಃ ಸುತೋಽಸೌ ಸ್ಥಿತಃ ಪ್ರತೀಪಾಯ ಹರೇ ಸುಪಾಪಃ ।
ಕ್ಷಿಪ್ತೋಽನಸಿಸ್ಥಃ ಶಕಟಾಕ್ಷನಾಮಾ ಸವಿಷ್ಣುನೇತ್ರಾ ಸಹಿತಃ ಪಪಾತ ॥

ಬಂಡಿ ಸಮೇತ ಬಿದ್ದ ಅಸುರನ ಮೈ ಪುಡಿಪುಡಿಯಾಯಿತು.

ಶಕಟಾಸುರನು ಕೃಷ್ಣಪಾದದಿಂದ ತಾಡಿತನಾಗಿ ಮರಣ ಹೊಂದಿದನಷ್ಟೇ! ಇದು ಏಕೆ ಗೊತ್ತೇನು? ತನ್ನ ಜಾತಿಗೆ ಯೋಗ್ಯವಲ್ಲದ ಚಕ್ರವನ್ನು ಧರಿಸಿದ. ಕಾರಣ ಮರಣ ಹೊಂದಿದ. ಅಯೋಗ್ಯಕಾರ್ಯ ಮರಣಕ್ಕೆ ಹಾದಿ ಎನ್ನುವ ಉತ್ತರ ಶ್ರೀ ವಾದಿರಾಜಶ್ರೀಚರಣರದು.

ಸ ಕೃಷ್ಣ ಪಾದಾಭಿಹತಾಖಿಲಾಂಗೋ ಬಭೂವ ದೈತ್ಯಃ ಕಿಲನಿರ್ಗತಾಸುಃ ।
ಅಹಂ ತು ಮನ್ಯೇ ಸ್ವಕಜಾತ್ಯಯೋಗ್ಯರಥಾಂಗಧಾರೀ ಸ ಮಮಾರ ಧೀರಃ ॥

ಮತ್ತೊಂದು ದಿನ ಯಶೋದೆಯು ಶ್ರೀಕೃಷ್ಣನನ್ನ ತನ್ನ ತೊಡೆಯ ಮೇಲೆ ಕುಳ್ಳಿರಿಸಿಕೊಂಡು ಪ್ರೀತಿಯಿಂದ ಆಡಿಸುತ್ತಿದ್ದಾಳೆ. ಕೃಷ್ಣನು ಇದ್ದಕ್ಕಿದ್ದಂತೆ ಬೆಟ್ಟದಷ್ಟು ಭಾರವಾದ, ಭಾರವನ್ನೇ ಭರಿಸಲಾಗದೇ ಯಶೋದೆಯು ಭೂಮಿಯಲ್ಲಿ ಕುಳ್ಳಿರಿಸಿದಳು. ಮನೆಕೆಲಸದಲ್ಲಿ ಆಸಕ್ತಳಾದಳು. ಇತ್ತ ತೃಣಾವರ್ತನೆಂಬ ಕಂಸನ ದೂತನು ಗಾಳಿಯ ರೂಪದಿಂದ ಬಂದು ಮಗುವನ್ನು ಹಾರಿಸಿಕೊಂಡು ಅಂತರಿಕ್ಷಕ್ಕೆ ಹಾರಿದನು. ನಂದಗೋಕುಲವೆಲ್ಲ ಸುಂಟರಗಾಳಿಯಿಂದೆದ್ದ ಧೂಳಿನಿಂದ ತುಂಬಿಹೋಯಿತು. ಕಣ್ಣಿಗೆ ಮಣ್ಣು ಬಿದ್ದಿದ್ದರಿಂದ ಏನನ್ನೂ ಕಾಣಲಾಗದವರಾದರು. ಕೃಷ್ಣನನ್ನು ಕಾಣದೇ ಯಶೋದೆಯು ಕಣ್ಣೀರು ಸುರಿಸಲಾರಂಭಿಸಿದರು. ಅವಳು ಅಳುವನ್ನು ಕೇಳಿದ. ಅನೇಕ ವ್ರಜದ ಸ್ತ್ರೀಯರೂ ಅಳಲಾರಂಭಿಸಿದರು. ಕೃಷ್ಣನು ಬೇಕೆಂದು ಕಣ್ಣೀರು ಸುರಿಸಿದರು. ತೃಣಾವರ್ತನು ಶ್ರೀಕೃಷ್ಣನನ್ನು ಮೇಲೆತ್ತಿಕೊಂಡು ಹೋಗುವಾಗ ಅವನಿಗೂ ಭಾರವಾದ ಶಿಶುವಿನ ಭಾರವನ್ನು ಸಹಿಸಲಾರದೇ ಕಲ್ಲುಬಂಡೆಯನ್ನೇ ಹೊತ್ತುತಂದೆನೋ ಎಂದು ಆಲೋಚಿಸುತ್ತಿರುವಾಗಲೆ ತೃಣಾವರ್ತನ ಕುತ್ತಿಗೆಯನ್ನು ಹಿಡಿದು ಪ್ರಾಣಬಂಧನ ಮಾಡಿದ. ಶಿಶುವಿನ ಕಪಿಮುಷ್ಟಿಗೆ ಸಿಲುಕಿದ ಅಸುರನು ಚಲಿಸಲಾಗದೇ ಬೊಬ್ಬಿಡಲೂ ಆಗದೇ ಮೃತನಾಗಿ ಗೋಕುಲದೊಳಗೆ ಬಿದ್ದನು.

ಗಲಗ್ರಹಣನಿಶ್ಚೇಷ್ಟೋ ದೈತ್ಯೋ ನಿರ್ಗತಲೋಚನಃ ।
ಅವ್ಯಕ್ತವಾಕ್ಯೋ ನ್ಯಪತತ್ ಸಹಬಾಲೋ ವ್ಯಸುರ್ವ್ರಜೇ ॥

ನಾಮಕರಣ

ಯಾದವರ ಪುರೋಹಿತರಾದ ಗರ್ಗಾಚಾರ್ಯರನ್ನು ವಸುದೇವನು ಗೋಕುಲಕ್ಕೆ ಕಳುಹಿಸಿದನು. ಅವರು ಬಂದು ರಹಸ್ಯದಲ್ಲಿ ಕ್ಷತ್ರಿಯೋಚಿತ ಸಂಸ್ಕಾರ ಮಾಡಿ ಆ ಇಬ್ಬರು ಬಾಲಕರಿಗೆ ನಾಮವಿಟ್ಟರು.

ರೋಹಿಣಿಯ ಮಗನು ಸಜ್ಜನರನ್ನು ಸಂತೋಷಪಡಿಸುವುದರಿಂದ ರಾಮನೆಂದೂ, ಬಲಾಢ್ಯನಾದ್ದರಿಂದ ಬಲನೆಂದೂ, ಯಾದವರಲ್ಲಿರ ಒಗ್ಗಟ್ಟು ಉಂಟುಮಾಡಿ ಒಂದು ಗೂಡಿಸುವುದರಿಂದ ಸಂಕರ್ಷಣನೆಂದೂ ಹೆಸರಿಟ್ಟರು.

ಅಯಂ ಹಿ ರೋಹಿಣೇಪುತ್ರೋ ರಮಯನ್ ಸುಹೃದೋಗಣೈಃ ।
ಆಖ್ಯಾಸ್ಯತೇ ರಾಮ ಇತಿ ಬಲಾಧಿಕ್ಯಾತ್ ಬಲಂ ವಿದುಃ ॥

ಯುಗಾನುಸಾರವಾಗಿ ಶುಕ್ಲ, ರಕ್ತ, ಪೀತವರ್ಣವುಳ್ಳವನಾಗಿದ್ದು ಈಗ ಶ್ಯಾಮವರ್ಣವುಳ್ಳವನಾದುದರಿಂದ ಶ್ರೀಹರಿಗೆ 'ಕೃಷ್ಣ' ಎಂಬ ನಾಮವಿಟ್ಟರು.

ಶುಕ್ಲೋ ರಕ್ತಸ್ತಥಾಪೀತಃ ಇದಾನೀಂ ಕೃಷ್ಣತಾಂಗತಃ ।
ಪ್ರಾಗಯಂ ವಸುದೇವಸ್ಯ ಕ್ವಚಿಜ್ಜಾತಸ್ತವಾತ್ಮಜಃ ॥

ಗರ್ಗರು ನಂದಗೋಪ! ಇವನು ವಸುದೇವನ ಮಗನು. ಆದ್ದರಿಂದ ವಾಸುದೇವನೆಂದು ಹೆಸರು. ನಾರಾಯಣನೇ ಇವನು. ಇದನ್ನು ಗುಟ್ಟಾಗಿಟ್ಟರು. ಹೀಗೆ ಹೇಳಿ ಗರ್ಗರು ಹೊರಟುಹೋದರು.

ಇಬ್ಬರು ಬಾಲಕರೂ ಕಾಲಕಳೆದಂತೆ ಅಂಬೆಗಾಲನ್ನು ಹಾಕಿ, ಬಾಲಕ್ರೀಡೆಯನ್ನು ತೋರಿಸಿ, ಮುಂದೆ ಕೌಮಾರ ಚೇಷ್ಟೆಯನ್ನು ಮಾಡುತ್ತ ಬಂದರು.

ನಂದಗೋಕುಲದ ತುಂಟ ಕೃಷ್ಣನ ಚೇಷ್ಟೆಗಳನ್ನು ಯಶೋದೆಯ ಬಳಿ ಗೋಪಿಯರೆಲ್ಲರೂ ಒಪ್ಪಿಸುತ್ತಾರೆ.

ವತ್ಸಾನ್ ಮುಂಚನ್ ಕ್ವಚಿದಸಮಯೇ ಕ್ರೋಶಸಂಜಾತಹಾಸಃ
ಸ್ತೇಯಂ ಸ್ವಾದ್ವತ್ತ್ಯಥ ದಧಿ ಪಯಃ ಕಲ್ಪಿತೈಃ ಸ್ತೇಯಯೋಗೈಃ ।
ಮರ್ಕಾನ್ ಭೋಕ್ಷ್ಯನ್ ವಿಭಜತಿ ಸ ಚೇನ್ನಾತ್ತಿಭಾಂಡಂ ಭಿನತ್ತಿ
ದ್ರವ್ಯಾಲಾಭೇ ಸುಭೃಶಕುಪಿತೋ ಯಾತ್ಯುಪಕ್ರೋಶ್ಯ ತೋಕಾನ್ ॥

'ತಾಯಿ ಯಶೋದೆ! ನಿನ್ನ ಮಗನು ಕಾಲಾಕಾಲಗಳನ್ನು ಗಮನಿಸದೆ ಕಟ್ಟಿದ ಕರುಗಳನ್ನು ಬಿಚ್ಚಿ ಆಟವಾಡುತ್ತಾನೆ. ಕರುಗಳನ್ನೇಕೆ ಬಿಚ್ಚುತ್ತೀ ಎಂದರೆ ಬಂಧನವನ್ನು ಬಿಚ್ಚುವುದೇ ನನ್ನ ಸ್ವಭಾವವೆಂದು ಉತ್ತರಿಸು-ತ್ತಾನೆ. (ಬಂಧಕೋ ಭವಪಾಶೇನ ಭವಪಾಶಾಚ್ಚ ಮೋಚಕಃ) ಕರುಗಳು ಬೊಬ್ಬಿಟ್ಟರೆ ಇವನು ಖುಷಿಪಡುತ್ತಾನೆ. ಹಾಲು ಮೊಸರನ್ನೆಲ್ಲ ಯಥೇಷ್ಟವಾಗಿ ಮೆಲ್ಲುತ್ತಾನೆ. ಹೀಗೆಯೇ ಅನೇಕ ಪದಾರ್ಥಗಳನ್ನು ಕದ್ದು ತಿನ್ನುತ್ತಾ ಹೆಚ್ಚಿನ ಹಾಲು ಮೊಸರನ್ನು ಬೆಕ್ಕುಗಳಿಗೆ ಹಂಚುತ್ತಾನೆ. ತಿನ್ನಲು ಯಾವ ಪದಾರ್ಥಗಳೂ ಸಿಗದಿದ್ದಲ್ಲಿ ಎಲ್ಲರ ಮೇಲೂ ಸಿಟ್ಟುಗೊಂಡವನಾಗಿ ಮನೆಯ ಮಕ್ಕಳನ್ನು ಅಳಿಸಿ ಹೋಗುತ್ತಾನೆ. ಮಕ್ಕಳು ಅತ್ತಾಗ ಇವ ನಗುತ್ತಾನೆ. ಕಳ್ಳತನ ಮಾಡಿ ಗೊತ್ತಿಲ್ಲದಂತೆ ಕುಳಿತುಕೊಳ್ಳುತ್ತಾನೆ. ಕತ್ತಲೆಯ ಕೋಣೆಯಲ್ಲಿಟ್ಟಿದ್ದ ಹಾಲು ಮೊಸರುಗಳನ್ನು ಗುರುತು ಹಿಡಿದು ಕುಡಿಯುತ್ತಾನೆ. ಒರಳು ಸೆಳೆಯುವನೆಂದು ಮನೆಯ ಕಂಬಕ್ಕೆ ಕಟ್ಟೋಣವೆಂದರೆ ನಮಗೇ ಭಯ. ಒರಳನ್ನು ಸೆಳೆದವನು ಅದರಂತೆ ನಮ್ಮ ಮನೆಯ ಕಂಬವನ್ನೇ ಸೆಳೆದು ನಡೆದರೆ ನಮ್ಮ ಮನೆಯ ಗತಿ ಏನು?

ಎಂದು. ಹೀಗೆ ಕೃಷ್ಣನ ಬಗ್ಗೆ ಎಷ್ಟು ಮಾತನಾಡಿದರೂ ಗೋಪಿಯರಿಗೆ ತೃಪ್ತಿಯಿಲ್ಲ. ಯಶೋದೆಗೆ ಎಷ್ಟು ಕೇಳಿದರೂ ತೃಪ್ತಿಯಿಲ್ಲ. ಹೀಗೆಯೇ ಸಕಲ ಸಜ್ಜನರನ್ನೂ ತನ್ನ ಲೀಲೆಗಳಿಂದ ಸಂತೋಷ ಪಡಿಸುತ್ತಿದ್ದಾನೆ.

ಈ ಶ್ಲೋಕಕ್ಕೆ ಶ್ರೀ ಸತ್ಯಧರ್ಮತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರು ಜೀವತ್ರೈವಿಧ್ಯರ ಪರವಾಗಿ ವ್ಯಾಖ್ಯಾನಿಸಿರುವರು.

ವಿಶ್ವದರ್ಶನ

ಒಮ್ಮೆ ಜೊತೆಯ ಬಾಲಕರು ಯಶೋದೆಗೆ ಶ್ರೀಕೃಷ್ಣನು ಮಣ್ಣನ್ನು ತಿಂದನೆಂದು ಚಾಡಿ ಹೇಳಿದರು. ಯಶೋದೆಯು 'ಮಣ್ಣನ್ನೇಕೆ ಮೆದ್ದೆ' ಎಂದು ಕೇಳಿದಾಗ ಶ್ರೀಕೃಷ್ಣನು ''ನಾಹಂ ಭಕ್ಷಿತವಾನಂಬ'' ಎಂದನು.

ಕೃಷ್ಣನು ಸುಳ್ಳು ಮಾತನಾಡಿದನೇ?

ಕೃಷ್ಣನು–

ನಾಹಂ ಭಕ್ಷಿತನಾವನಂಬ ಸರ್ವೇ ಮಿಥ್ಯಾಭಿಶಂಸಿನಃ ।

ನಾನು ಮಣ್ಣನ್ನು ತಿನ್ನಲಿಲ್ಲ, ಎಲ್ಲರೂ ಸುಳ್ಳನ್ನು ಹೇಳುವರೆಂದು ಉತ್ತರಿಸಿದ. ಹಾಗಾದರೆ ಕೃಷ್ಣನು ಸುಳ್ಳನ್ನು ಹೇಳಿದನೆ ಎಂದರೆ? ಇಲ್ಲ ಹೇಳಿಲ್ಲ. ಅರ್ಥೈಸುವ ರೀತಿಯನ್ನೇ ಬದಲಿಸಬೇಕು ಅಷ್ಟೇ!

(ಅಂಬ) ಹೇ ತಾಯಿಯೇ (ನಾ ಅಹಂ) ಪರಮಪುರುಷನಾದ ನಾನು ಮಣ್ಣನ್ನು ತಿಂದೇ ಇದ್ದೇನೆ. ಇವರೆಲ್ಲರೂ ನಿಜವನ್ನೇ ಹೇಳಿದ್ದಾರೆ (ಸರ್ವೇ ಅಮಿಧ್ಯಾಭಿಶಂಸಿನಃ)

ಅಥವಾ ನಾನು ಮಣ್ಣು ತಿಂದೇ ಇಲ್ಲ ಎಂದದ್ದು ಸುಳ್ಳು ಅಲ್ಲವೇ ಅಲ್ಲ. ತಿನ್ನುವುದು ಅಂದರೆ ಏನದು? ಹೊರಗಿನ ಪದಾರ್ಥಗಳನ್ನು ಒಳಗೆ ಹಾಕಿಕೊಂಡರೆ ಅದನ್ನು ತಿಂದಂತೆ. ಹಲ್ಲನ್ನು ತಿನ್ನುತ್ತಾನೆ ಎಂದೂ ಯಾರೂ ಹೇಳುವುದಿಲ್ಲ. ಏಕೆಂದರೆ ಹಲ್ಲು ಯಾವಾಗಲೂ ಒಳಗೆ ಇದ್ದದ್ದೆ. ಹಾಗೆ ಮಣ್ಣು ಯಾವಾಗಲೂ ನನ್ನ ಬಾಯಿಯಲ್ಲೇ ಇದೆ, ಕಾರಣ ನಾನು ತಿಂದಿಲ್ಲ. ಬೇಕಾದರೆ ನನ್ನ ಬಾಯಿಯಲ್ಲಿ ಮಣ್ಣು ಇದೆಯಿಲ್ಲವೋ ನೋಡು ಎನ್ನುತ್ತಾ ಬಾಯಿ ತೆರೆದ. ಹೀಗಾಗಿ ಸುಳ್ಳಿನ ಸುಳಿವೇ ಇಲ್ಲ ಅಲ್ಲಿ. ಆಚಾರ್ಯರು ಮಹಾಭಾರತತಾತ್ಪರ್ಯ ನಿರ್ಣಯದಲ್ಲಿ ವ್ಯಾಸರ ಮಾತಿಗನುಗುಣವಾಗಿ ಇದೇ ತೆರನಾಗಿ ''ನಾಹಂ ಮೃದ್‌ಭಕ್ಷಿತಾಽಂಬ'' ಎಂದಿರುವರು. ಹೀಗಾಗಿ ಆಚಾರ್ಯರ ಮಾತಿಗೂ ಹೀಗೆ ಅರ್ಥೈಸಬೇಕು–

ಅವಳು ಬಾಯಿ ತೆರೆಯುವಂತೆ ಹೇಳಿದಳು. ಕೃಷ್ಣನು ಬಾಯಿ ತೆರೆದಾಗ ಯಶೋದೆಯು ಬ್ರಹ್ಮಾಂಡವನ್ನು ಕಂಡಳು. ಆಗ ಅವಳು 'ಈ ಬಾಲಕನಿಗೆ ಸ್ವಾಭಾವಿಕವಾಗಿ ಅದ್ಭುತ ಶಕ್ತಿಯಿದೆ. ಪರಬ್ರಹ್ಮನೇ ಇವನು. ಈ ರೂಪಕ್ಕೆ ನಮಸ್ಕರಿಸುವೆನು' ಎಂದಳು. ಕೂಡಲೇ ಶ್ರೀಕೃಷ್ಣನು ಯಶೋದೆಗೆ ತನ್ನ ಮಗನೆಂಬ ಮಮತೆಯನ್ನು ತಂದಿಟ್ಟನು. ಯಶೋದೆ ಮತ್ತು ನಂದಗೋಪರೆಂಬ ಈ ದಂಪತಿಗಳು ಸಾಮಾನ್ಯರಲ್ಲ. ನಂದಗೋಪನು ದ್ರೋಣನೆಂಬ ವಸುವಿನ ಅಂಶದ ದೇವತೆ. ಅವನ ನಿಯತಪತ್ನಿಯಾದ ಧರಾದೇವಿಯೆಂಬುವಳೇ ಯಶೋದೆ. ಬ್ರಹ್ಮದೇವರ ವರದಿಂದ ಆ ದಂಪತಿಗಳು ಧರೆಯ ಮೇಲೆ ಜನಿಸಿರ ಜನಾರ್ಧನನಲ್ಲಿ ದೃಢಭಕ್ತಿಯನ್ನು ಹೊಂದಿದರು. ಶ್ರೀಕೃಷ್ಣನು ತನ್ನ ಕ್ರೀಡೆಯಿಂದ ಅವರಿಗೆ ಪ್ರೀತಿಯನ್ನುಂಟು ಮಾಡಿದನು.

ಉಲೂಖಲ ಬಂಧನ — ನಲಕೂಬರರ ಶಾಪ ಮೋಚನ

ಒಮ್ಮೆ ಶ್ರೀಕೃಷ್ಣನು ಯಶೋದೆಯು ಮೊಸರನ್ನು ಕಡೆಯುತ್ತಿದ್ದಾಗ ಸ್ತನ್ಯವನ್ನು ಕೊಡೆಂದು ಕಡಗೋಲನ್ನು ಹಿಡಿದು ನಿಲ್ಲಿಸಿಬಿಟ್ಟನು. ಅವನು ಯಶೋದೆಯ ತೊಡೆಯ ಮೇಲೆ ಮಲಗಿ ಸ್ತನ್ಯಪಾನಮಾಡುತ್ತಿದ್ದನು.

ಯಶೋದೆಯು ಒಲೆಯ ಮೇಲಿನ ಹಾಲು ಉಕ್ಕಿದುದನ್ನು ನೋಡಿ ಹಾಲಿನ ಪಾತ್ರೆಯನ್ನು ಕೆಳಗಿಳಿಸಬೇಕೆಂದು ತೊಡೆಯ ಮೇಲಿದ್ದ ಕೃಷ್ಣನನ್ನು ಎತ್ತಿ ನೆಲದ ಮೇಲೆ ಕುಕ್ಕಿ ಓಡಿಹೋದಳು. ಶ್ರೀಕೃಷ್ಣನು ತನ್ನ ಸ್ತನ್ಯಪಾನರೂಪ ಸೇವೆಗಿಂತ ಹಾಲಿನ ರಕ್ಷಣೆ ಲಾಭದಾಯಕವೆಂದು ತಿಳಿದ ಯಶೋದೆಗೆ ಬುದ್ಧಿಯನ್ನು ಕಲಿಸಬೇಕೆಂದು, ಮೊಸರಿನ ಗಡಿಗೆಯನ್ನು ಒಡೆದು ಬೆಣ್ಣೆಯನ್ನು ತೆಗೆದುಕೊಂಡು ಓಡಿಹೋಗಿ ಅಂಗಳದಲ್ಲಿದ್ದ ಒರಳಕಲ್ಲಿನ ಮೇಲೆ ಕುಳಿತು ಬೆಣ್ಣೆಯನ್ನು ಬೆಕ್ಕಿಗೂ ಕೊಟ್ಟು ತಾನೂ ತಿನ್ನುತ್ತಿದ್ದನು. ಯಶೋದೆಗೆ ಕೋಪ ಬಂದಿತು. ಹಗ್ಗದಿಂದ ಅವನನ್ನು ಕಟ್ಟಿ ಹಾಕಿದಳು.

ತ್ಯಕ್ತ್ವಾ ಯಷ್ಟಿಂ ಸುತಂ ಭೀತಂ ವಿಜ್ಞಾಯಾರ್ಭಕವತ್ಸಲಾ ।
ಇಯೇಷ ಕಿಲ ತಂ ಬದ್ಧುಂ ದಾಮ್ನಾऽತದ್ವೀರ್ಯಕೋವಿದಾ ॥

ಶ್ರೀಕೃಷ್ಣನು ಹಗ್ಗದಿಂದ ಕಟ್ಟಲ್ಪಟ್ಟ ಒರಳನ್ನು ಎಳೆದುಕೊಂಡುಹೋಗಿ ಊರ ಮುಂದಿದ್ದ ಎರಡು ಮತ್ತಿಮರಗಳ ಸಂದಿನಲ್ಲಿ ನುಗ್ಗಿ ಹಗ್ಗವನ್ನು ಜಗ್ಗಿ ಆ ಎರಡು ಮರಗಳನ್ನೂ ಬುಡಸಹಿತ ಉರುಳಿಸಿದನು. ಹಾಗೂ ನಲಕೂಬರ ಮತ್ತು ಮಣಿಗ್ರೀವರ ಶಾಪವನ್ನು ಕಳೆದನು.

ನಲಕೂಬರ ಪೂರ್ವವೃತ್ತಾಂತ

ನಲಕೂಬರ ಮತ್ತು ಮಣಿಗ್ರೀವರೆಂಬುವರು ಕುಬೇರನ ಮಕ್ಕಳು. ಜಲಕ್ರೀಡೆಯಾಡುವಾಗ ನಾರದರು ಬಂದರೆ ಹುಟ್ಟುರೂಪದಿಂದಲೇ ಅವರಿಬ್ಬರೂ ಇದ್ದುದರಿಂದ ಅನುಗ್ರಹಮಾಡಬೇಕೆಂದೇ ಶಾಪವನ್ನು ಕೊಡುತ್ತಾ

ನಾರದರು ವಿಷಯಾದಿ ಆಕಾಂಕ್ಷೆಯೇ ಜ್ಞಾನನಾಶಕವು. ಅದರಿಂದ ಸ್ತ್ರೀವಶರಾಗಿ ವ್ಯಸನಗಳಲ್ಲಿ ಮುಳುಗಿ ಪ್ರಾಣಿಹಿಂಸೆ ಮಾಡುವರು. ಅಂತಹವರು ಬ್ರಹ್ಮದ್ರೋಹಿಗಳಾಗುವರು. (1) ಜೀವ ಪರಮಾತ್ಮರು ಒಂದೇ (2) ಬ್ರಹ್ಮನು ನಿರ್ಗುಣ ನಿರಾಕಾರನು (3) ರಾಮ ಕೃಷ್ಣಾದಿ ಅವತಾರರೂಪಗಳೂ ದುಃಖಿಸುವುವು. (4) ಜಗತ್ತು ಮಿಥ್ಯೆ. ಈ ನಾಲ್ಕು ಬಗೆಯ ಹಿಂಸೆ ಮಾಡಿ ತಮಸ್ಸಿಗೆ ಬೀಳುವರಲ್ಲ! ಅಸದಃ ಶ್ರೀಮದಾಂಧಸ್ಯ ದಾರಿದ್ರ್ಯಂ ಪರಮಾಂಜನಂ' ಸಿರಿಮದದಿಂದ ಕುರುಡಾದವನಿಗೆ ಬಡತನವೇ ಪರಮೌಷಧಿ. ನೀವಿಬ್ಬರೂ ವೃಕ್ಷಗಳಾಗಿ ಹುಟ್ಟಿರಿ. ಆದರೆ ಜಾತಿ ಸ್ಮರಣೆ ಇರಲಿ. ದೇವಮಾನದ ನೂರು ವರುಷಗಳ ನಂತರ ಕೃಷ್ಣನ ಸಾನಿಧ್ಯವನ್ನು ಹೊಂದಿ ದೇವತ್ವವನ್ನು ಹೊಂದಿರಿ ಎಂದು ಶಪಿಸಿದರು.

ತೌ ದೃಷ್ಟ್ವಾ ಮದಿರಾಮತ್ತೌ ಶ್ರೀಮದಾಂಧೌ ಸುರಾತ್ಮಜೌ ।
ತಯೋರನುಗ್ರಹಾರ್ಥಾಯ ಶಾಪಂ ದಾಸ್ಯನ್ನಿದಂ ಜಗೌ ॥
ನ ವಿವಾಸಸಮಾತ್ಮಾನಂ ವಿಜಾನೀತಃ ಸುದುರ್ಮದೌ ।
ಅತೋऽರ್ಹತಃ ಸ್ಥಾವರತಾಂ ಸ್ಯಾತಾಂ ನೈವ ಯಥಾಪುನಃ ॥

ಕೃಷ್ಣನು ಮರಗಳ ಮಧ್ಯೆ ಸಿಕ್ಕಿದ ಒರಳನ್ನು ಬಲವಾಗಿ ಎಳೆದಾಗ ಮರಗಳು ಮುರಿದು ಬಿದ್ದುವು. ಆ ಮರಗಳಲ್ಲಿ ಸೇರಿಕೊಂಡು ತಪಸ್ಸನ್ನು ಮಾಡುತ್ತಿದ್ದ ಧುನಿ ಮತ್ತು ಚಮು ಎಂಬ ಇಬ್ಬರು ದೈತ್ಯರೂ ಸತ್ತರು.

ಯಕ್ಷರಿಬ್ಬರು ಸ್ತುತಿಸಿದರು— ಕೃಷ್ಣ! ಕೃಷ್ಣ! ಅಣಿಮಾದಿಯೋಗೀಶ್ವರನೇ! ನೀನು ಆದಿಭೂತನು, ಪುರುಷನು, ಪರನು, ಜಗತ್ತು ನಿನ್ನ ಪ್ರತಿಮೆ. ನೀನು ಕಾಲನು ಅಂದರೆ ಸರ್ವಗುಣ ಪೂರ್ಣನು. ವಿಷ್ಣುವು ಅಂದರೆ ಸರ್ವತ್ರ ವ್ಯಾಪ್ತನು. ಉತ್ಪತ್ತಿನಾಶರಹಿತನು. ಅಂತರ್ಯಾಮಿಯು. ಅಧ್ಯಕ್ಷನು. ಸಂಪೂರ್ಣವಾಗಿ ತಿಳಿಯಲ್ಪಡದವನು. 'ಭಗವತೇ ವಾಸುದೇವಾಯ ನಮಃ' ಮುಂದೆ ಎಂದೂ ನಮಗೆ ಮದವು ಬರದಿರಲಿ. ವಾಕ್ಕು, ಕೈಗಳು ಶಿರಸ್ಸು ನಿನ್ನ ಸ್ತುತಿ ಮೊದಲಾದ ವ್ಯಾಪಾರಗಳಿಂದ ನಿನ್ನನ್ನು ಸೇವಿಸುತ್ತಿರಲಿ.

ವಾಣೀ ಗುಣಾನುಕಥನೇ ಶ್ರವಣೌ ಕಥಾಯಾಂ
ಹಸ್ತೌ ಚ ಕರ್ಮಸು ಮನಸ್ತವ ಪಾದಯೋರ್ನಃ ।
ಸ್ಮೃತ್ಯಾಂ ಶಿರಸ್ತವ ಸುರಪ್ರವರ ಪ್ರಣಾಮೇ
ದೃಷ್ಟಿಃ ಸತಾಂ ದರ್ಶನೇಽಸ್ತು ಭವತ್ತನೂನಾಮ್ ॥

ಶ್ರೀಕೃಷ್ಣನು ಅವರಿಗೆ ಅಭಯ ನೀಡಿದನು. ನಿಮ್ಮ ವಿಚಾರ ನನಗೆ ಗೊತ್ತು. ನಾರದಾದಿ ಸಜ್ಜನರ ದರ್ಶನ-ದಿಂದ ಬಂಧವು ನೀಗುವುದು. ನೀವಿಬ್ಬರೂ ನನ್ನ ಭಕ್ತರು. ನಿಮಗೆ ಮಂಗಳವಾಗಲಿ. ಅಲಕಾಪುರಕ್ಕೆ ಹೊರಡಿ. ಅವರಿಬ್ಬರೂ ಶ್ರೀಕೃಷ್ಣನಿಗೆ ನಮಸ್ಕರಿಸಿ ಹೊರಟು ಹೋದರು.

ವೃಂದಾವನಗಮನ

ನಂದಾದಿಗಳು ಬಂದು ನೋಡಿದರು. ಮರಗಳು ಹೇಗೆ ಉರುಳಿದುವು? ಎಂದು ತಮ್ಮಲ್ಲಿಯೇ ಮಾತಾಡಿ ಕೊಳ್ಳುತ್ತಿದ್ದಾಗ ಅಲ್ಲಿಯೇ ಆಟವಾಡುತ್ತಿದ್ದ ಮಕ್ಕಳು ಕೃಷ್ಣನು ಒರಳೆಳೆದು ಮರಗಳನ್ನು ಮುರಿದನೆಂದರು. ಕೆಲವರು ಮಕ್ಕಳ ಮಾತನ್ನು ನಂಬಲಿಲ್ಲ. ಪೂತನಾದಿಗಳನ್ನು ಕೃಷ್ಣನು ಸಂಹಾರಮಾಡಿದ್ದ ಸ್ಮೃತಿಯುಳ್ಳವರು ಕೃಷ್ಣನು ಈ ಕೆಲಸ ಮಾಡಿದ್ದರೂ ಮಾಡಿರಬಹುದೆಂದರು. ನಂದನು ಮಗನ ಕಟ್ಟನ್ನು ಬಿಚ್ಚಿದನು. ಕೃಷ್ಣನು ಬೃಹದ್ವನದಿಂದ ಬೃಂದಾವನಕ್ಕೆ ಗೋಕುಲದವರನ್ನು ಸಾಗಿಸಬೇಕೆಂದು ವೃಕಗಳನ್ನು ಸೃಷ್ಟಿಸಿದನು. ಆ ತೋಳಗಳ ಹಾವಳಿಯಿಂದ ಜನರು ಬೆದರಿ ಆ ಸ್ಥಳವನ್ನು ಬಿಟ್ಟು ಬೃಂದಾವನಕ್ಕೆ ಬಂದು ವಾಸಕ್ಕೆ ಮನೆಗಳನ್ನು ಕಟ್ಟಿಕೊಂಡರು.

ವನಂ ವೃಂದಾವನಂ ನಾಮ ಪಶವ್ಯಂ ವನಕಾನನಮ್ ।
ಗೋಪಗೋಪೀಗವಾಂ ಸೇವ್ಯಂ ಪುಣ್ಯಾದ್ರಿತೃಣವೀರುಧಮ್ ॥

ಬಲರಾಮ ಕೃಷ್ಣರು ಊರುಮುಂದಿನ ವನದಲ್ಲಿ ಕರುಗಳನ್ನು ಮೇಯಿಸುತ್ತ ಕೊಳಲನ್ನು ಊದುತ್ತ ಜೊತೆಯ ಬಾಲಕರೊಡನೆ ಆಟವಾಡಲಾರಂಭಿಸಿದರು. ಇವರನ್ನು ಕೊಲ್ಲಲು ಬಂದ ವತ್ಸಾಸುರನು ಸತ್ತನು. ಕೃಷ್ಣನು ತನ್ನನ್ನು ನುಂಗಲು ಬಂದ ಬಕಾಸುರನನ್ನು ಸೀಳಿ ಕೊಂದನು. ಈ ದೈತ್ಯ ವಧೆಯನ್ನು ಕೇಳಿದ ಗೊಲ್ಲರು ಆಶ್ಚರ್ಯವನ್ನು ಹೊಂದಿದರು. ನಂದಗೋಪನು ಗರ್ಗರ ಮಾತು ನಿಜವಾಯಿತೆಂದುಕೊಂಡನು.

ಬಲರಾಮಕೃಷ್ಣರು ಆರನೆಯ ವಯಸ್ಸಿನಿಂದ ದನಗಳನ್ನು ಮೇಯಿಸಲಿಕ್ಕೆ ಆರಂಭಿಸಿದರು. ಒಂದು ದಿನ ಸುಂದರವಾದ ವನವೊಂದನ್ನು ಪ್ರವೇಶಿಸಿದರು. ವೃಕ್ಷಗಳನ್ನು ನೋಡಿ ಶ್ರೀಕೃಷ್ಣನು ಬಲರಾಮನನ್ನು ಕುರಿತು,

ದೇವಶ್ರೇಷ್ಠನೇ! ಫಲಪುಷ್ಪ ಸಹಿತಗಳಾದ ಈ ವೃಕ್ಷಗಳು ಕೊಂಬೆಗಳೆಂಬ ಹಸ್ತಗಳಿಂದ ನಿನ್ನ ಪಾದಗಳಿಗೆ ನಮಸ್ಕರಿಸುತ್ತಿರುವುವು. ನೀನು ದೇವತಾರೂಪವನ್ನು ಮರೆಮಾಚಿ, ಮನುಷ್ಯರೂಪದಿಂದ ಬಂದಿರುವ ಪ್ರಯುಕ್ತ ದೇವತೆಗಳು ದುಂಬಿಗಳ ರೂಪತಾಳಿ ನಿನ್ನನ್ನು ಸೇವಿಸುತ್ತಿರುವರು. ನವಿಲುಗಳು ನರ್ತಿಸುತ್ತಿರುವುವು. ಇವರೆಲ್ಲ ತಾಪಸರು. ಕೋಕಿಲರು ಅಂದರೆ ಕ=ಬ್ರಹ್ಮ, ಉ=ಶಿವ, ಇವರನ್ನು ಕಿಲ=ಕೀರ್ತಿಸು ವವರು. ಒಟ್ಟಿನಲ್ಲಿ ಇಂದ್ರಾದಿ ದೇವತೆಗಳು ನಿನ್ನನ್ನು ನೋಡಿ ನಿನಗೆ ಪ್ರಿಯವನ್ನುಂಟು ಮಾಡುತ್ತಿರುವರು. ಹೀಗೆ ವನಸಾಮ್ರಾಜ್ಯದ ವೈಭವವನ್ನು ಬಲರಾಮನಿಗೆ ಸಮರ್ಪಿಸಿದನು. ರಮಾಪತಿಯು ಗೊಲ್ಲನಂತೆ ನಟಿಸುತ್ತ ಗೊಲ್ಲ ಮಕ್ಕಳೊಡನೆ ಬೆರೆತು ಕ್ರೀಡಿಸಿದನು. ಭೂಮಿಯು ಕೃಷ್ಣನ ಪಾದಸ್ಪರ್ಶದಿಂದ ಧನ್ಯವಾಯಿತು. ಗೋಪಿಯರು ಹರಿಯನ್ನು ಆಲಿಂಗಿಸಿ ಧನ್ಯರಾದರು.

ಧನ್ಯೇಯಮದ್ಯಧರಣೀ ತೃಣವೀರುಧಸ್ತ್‌
ಪಾದಸ್ಪೃಶೋ ದ್ರುಮಲತಾಃ ಕರಜಾಭಿಮೃಷ್ಟಾಃ ॥

ತಾಲವನಗಮನ–ಧೇನುಕದಮನ

ಒಂದು ದಿನ ಶ್ರೀದಾಮನೆಂಬ ಗೋಪಾಲನು ತಾಳೆಹಣ್ಣನ್ನು ತಿನ್ನಬೇಕೆಂದನು. ಕೃಷ್ಣನೊಡನೆ ಎಲ್ಲರೂ ತಾಳೆವನಕ್ಕೆ ಹೋದರು. ಅಲ್ಲಿದ್ದ ಧೇನುಕ ಎಂಬ ಕತ್ತೆಯ ರೂಪದ ದೈತ್ಯನು ಎಲ್ಲರನ್ನೂ ಕೊಲ್ಲಬೇಕೆಂದು ಹವಣಿಸಿದನು. ಬಲರಾಮನು ಅವನನ್ನು ಕೊಂದನು.

ಸತಂ ಗೃಹೀತ್ವಾಽಥ ಪದೋ ಭ್ರಾಮಯಿತ್ವೈಕಪಾಣಿನಾ ।
ಚಿಕ್ಷೇಪ ತೃಣರಾಜಾಗ್ರೇ ಭ್ರಾಮಣತ್ಯಕ್ತಜೀವಿತಮ್ ।
ತೇನಾಹತೋ ಮಹಾತಾಲಃ ಪತಮಾನೋ ಬೃಹಚ್ಛಿರಾಃ ॥

ಅವನ ಪರಿವಾರದ ದೈತ್ಯರೆಲ್ಲ ಕತ್ತೆಗಳ ರೂಪದಿಂದ ಬಂದು ಒದ್ದು, ಕಚ್ಚಿ ಉಪದ್ರವ ಕೊಡಲಾರಂಭಿಸಿದರು. ಶ್ರೀಕೃಷ್ಣನು ಅವರೆಲ್ಲರನ್ನೂ ಕೊಂದುಹಾಕಿದನು. ತಾಳೆವನ ಉಪದ್ರವರಹಿತವಾಯಿತು. ಯಾವ ನರನು ಬೇಕಾದರೂ ಅಲ್ಲಿಗೆ ಹೋಗಿ ಬರಲು ಅನುಕೂಲವಾಯಿತು. ಸಾಯಂಕಲ ಕೊಳಲನ್ನು ಉದುತ್ತಾ ದನದ ಮಂದೆಯನ್ನು ಅಟ್ಟಿಕೊಂಡು ಹಟ್ಟಿಗೆ ಬರುತ್ತಿದ್ದ ಕೃಷ್ಣನನ್ನು ನೋಡುವುದಕ್ಕಾಗಿ ಪ್ರತಿದಿನದಂತೆ ಅವತ್ತೂ ಗೋಪಿಕಾಸ್ತ್ರೀಯರು ಗುಂಪು ಗುಂಪಾಗಿ ಬಂದರು. ಹಗಲಿನಲ್ಲಿ ಕೃಷ್ಣನ ಅಗಲಿಕೆಯಿಂದ ಉಂಟಾಗಿದ್ದ ತಾಪವನ್ನು ಅವನ ದರ್ಶನದಿಂದ ಕಳೆದುಕೊಂಡರು. ಅವನನ್ನು ಉಪಚರಿಸಿ ಗೋಕುಲದೊಳಗೆ ಕರೆದುಕೊಂಡು ಬಂದರು. ಯಶೋದೆಯು ರಾಮಕೃಷ್ಣರಿಗೆ ಸ್ನಾನ ಮಾಡಿಸಿ, ಅಲಂಕರಿಸಿ ಭೋಜನ ಮಾಡಿಸಿದಳು. ಬಾಲರು ನಿದ್ರಿಸಿದರು.

ಕಾಳಿಯ ಮರ್ದನ—

ತಥಾ ಯಶೋದಾರೋಹಿಣ್ಯೌ ಪುತ್ರಯೋಃ ಪುತ್ರವತ್ಸಲೇ ।
ಯಥಾಕಾಲಂ ಯಥಾಕಾಮಂ ವ್ಯಧತ್ತಾಂ ಪರಮಾಶಿಷಃ ॥

ಒಂದು ದಿನ ಕೃಷ್ಣನು ಬಲರಾಮನನ್ನು ಬಿಟ್ಟು ಉಳಿದ ಗೊಲ್ಲಬಾಲಕರು ಮತ್ತು ದನಗಳೊಡನೆ ಕಾಳಿಂದಿ ಮಡುವಿನ ಬಳಿಗೆ ಬಂದನು.

ತಾನೊಬ್ಬನೇ ಹೋದದ್ದೇಕೆ–

ಕೃಷ್ಣನು ಬಲರಾಮನೊಡನೆ ಆಲೋಚನೆ ಮಾಡಿ ಗೋಪಾಲರನ್ನು ಸಮಾಧಾನ ಮಾಡಲೆಂದೇ ಬಲರಾಮನನ್ನೇ ಬಿಟ್ಟು ತಾನೊಬ್ಬನೇ ಯಮುನೆಗೆ ಹೋದನು. ಹರಿವಂಶ ''ಸಸಂಕರ್ಷಣಮಾಮಂತ್ರ್ಯ'' ಏವಂ ಕೃತೇ ಬಾಹುವೀರ್ಯಂ ಲೋಕೇ ಖ್ಯಾತಿಂ ಗಮಿಷ್ಯತಿ ॥ ಎನ್ನುತ್ತದೆ.

ಅಷ್ಟಲ್ಲದೆ ಬಲರಾಮನನ್ನು ತನ್ನ ಜತೆಗೆ ಕರೆದೊಯ್ದು ಬಲರಾಮಕೃಷ್ಣರಿಬ್ಬರೂ ಸೇರಿ ಹೊರಹಾಕಿದ್ದರೆ ಕೃಷ್ಣಪರಾಕ್ರಮ ಪ್ರತ್ಯೇಕ ಪ್ರಕಟವಾಗುತ್ತಿರಲಿಲ್ಲ. ತನ್ನ ಭುಜಬಲದ ಪರಾಕ್ರಮ ಖ್ಯಾತಿಗಾಗಿಯೂ ಒಬ್ಬನೇ ಹೋದ ಎನ್ನುತ್ತದೆ ಹರಿವಂಶ.

ಆಚಾರ್ಯರು ಹೇಳಿರುವರು.

ಜ್ಯೇಷ್ಠಂ ವಿಹಾಯ ಸ ತದಾ ಚಿದಚಿಂತ್ಯಶಕ್ತಿ
ರ್ಗೋಗೋಪಗೋಗಣಯುತೋ ಯಮುನಾತಟೇಷು ।
ರೇಮೇ ಭವಿಷ್ಯದನುವೀಕ್ಷ್ಯ ಹಿ ಗೋಪದುಃಖಂ
ತದ್ಬೋಧನಾಯ ನಿಜಮಗ್ರಜಮೇಷ ಸೋಽಧಾತ್ ।

ಮುಂದೆ ಬರುವ ದುಃಖವನ್ನು ಉಪದೇಶ ಮಾಡಲೆಂದೇ ಬಲರಾಮನನ್ನು ಇರಿಸಿದನು.

ಇಲ್ಲಿ ಸರ್ಪಗಳಿಗೆ ರಾಜನಾದ ಶೇಷಾವೇಶನಾದ ಬಲರಾಮನ ಜೊತೆಗೆ ಹೋದರೆ ಇವನ ಪರಿಚಾರಕನಾದ ಕಾಲಿಯನೆಂಬ ಸರ್ಪವನ್ನು ಮರ್ದನ ಮಾಡಿ ಯಮುನೆಯಿಂದ ಹೊರಗೆ ಹಾಕುವ ತನ್ನ ಕಾರ್ಯಕ್ಕೆ ಬಲರಾಮನ ಉಪಸ್ಥಿತಿಯು ಮನಃಸಂಕೋಚಕ್ಕೆ ಕಾರಣವಾಗುವುದು. ಯಾರೊಬ್ಬರ ಪರಿವಾರವನ್ನು ಅವರೆದುರೆ ದಂಡಿಸುವುದು ಅವರ ಮನಸ್ಸಿನ ಖೇದಕ್ಕೆ ಕಾರಣವಾಗುವುದು. ಮತ್ತು ದಂಡಿಸುವವರಿಗೂ ಸಂಕೋಚವಾಗುವುದು. ಕಾರಣ ಶ್ರೀಕೃಷ್ಣನು ಬಲರಾಮನನ್ನು ಬಿಟ್ಟು ತಾನೊಬ್ಬನೇ ಯಮುನೆಯ ಮಡುವಿಗೆ ಬಂದನು.

ಬಾಯಾರಿ ವಿಷೋದಕ ಪಾನದಿಂದ ಸತ್ತ ಗೋಪಾಲರನ್ನು ಶ್ರೀಕೃಷ್ಣನು ಬದುಕಿಸಿ, ಆ ಮಡುವಿನಲ್ಲಿ ಸೇರಿದ್ದ ಸರ್ಪರಾಜನಾದ ಕಾಲಿಯನನ್ನು ಶಿಕ್ಷಿಸಲು ಮಡುವಿನೊಳಗೆ ಹಾರಿದನು.

ಕಾಳಿಯಸರ್ಪನು ಮಾಡಿದ ಅಪರಾಧವೇನು? ಭಗವಂತನು ಅವನನ್ನು ನಿಗ್ರಹಿಸಿದುದೇತಕ್ಕೆ? ಎಂದು ಪರೀಕ್ಷಿತರ ಪ್ರಶ್ನೆಗೆ ಶುಕಮುನಿಗಳು ಹೀಗೆ ಉತ್ತರಿಸಿದರು–

ಕಾಲಿಯನ ವಿಷಾಗ್ನಿಯಿಂದ ಆ ಮಡುವಿನ ನೀರು ಕುದಿಯುತ್ತಿದ್ದಿತು. ಆ ವಿಷದ ಗಾಳಿಯಿಂದ ಯಾವ ಸ್ಥಾವರವಾಗಲೀ, ಮಡುವಿನ ಮೇಲೆ ಗಗನದಲ್ಲಿ ಹಾರಾಡುವ ಪಕ್ಷಿಗಳಾಗಲಿ ಉಳಿಯದೆ ದಗ್ಧವಾಗುತ್ತಿದ್ದುವು. ಈ ದುಷ್ಟನಿಗ್ರಹಕ್ಕಾಗಿ ಶ್ರೀಕೃಷ್ಣನು ಮಡುವಿಗೆ ಕದಂಬವೃಕ್ಷದಿಂದ ಹಾರಿದ್ದನು.

ತಂ ಚಂಡವೇಗವಿಷವೀರ್ಯಮವೇಕ್ಷ್ಯ ತೇನ
ದುಷ್ಟಾಂ ನದೀಂ ಚ ಖಲ ಸಂಯಮನಾವತಾರಃ ।
ಕೃಷ್ಣಃ ಕದಂಬಮಧಿರುಹ್ಯ ತತೋಽತಿತುಂಗಾತ್
ಆಸ್ಫೋಟ್ಯ ಗಾಢರಶನೋ ನ್ಯಪತದ್ವಿಷೋದೇ ॥

ಕದಂಬ ವೃಕ್ಷ ಮಾತ್ರ ಹೇಗೆ ಉಳಿದಿತ್ತು

ಎಲ್ಲ ರೀತಿಯಾದ ಪಕ್ಷಿಗಳೂ, ಪ್ರಾಣಿಗಳು, ದಡದ ಮೇಲಿರುವ ಎಲ್ಲ ವೃಕ್ಷಗಳೂ ದಗ್ಧವಾದರೂ ಕದಂಬ ವೃಕ್ಷಕ್ಕೆ ಮಾತ್ರ ವಿಷದ ತೆರೆಯ ಮೇಲಿನ ಗಾಳಿಯು ಬಡಿದರೂ ಸುಡದಿರಲು ಕಾರಣವೇನೆಂದರೆ? ಗರುಡನು ಅಮೃತವನ್ನು ಒಯ್ಯುವಾಗ ಒಂದು ಹನಿ ಅಮೃತವು ಬಿದ್ದಿತ್ತು ಎಂದು ಮತ್ಸ್ಯಪುರಾಣದಲ್ಲಿ ಈ ರೀತಿ ಹೇಳಿದೆ.

ಗೃಹೀತ್ವಾಽಮೃತಪಾತ್ರಂ ಹಿ ಗಚ್ಛನ್ ಮಾರ್ಗೇ ಕ್ಷುಧಾರ್ದಿತಃ ।
ಕದಂಬೇ ಕಲಶಂ ನ್ಯಸ್ಯ ಯಮುನಾತೀರಗೋ ವಿರಾಟ್ ।
ಜಹಾರ ಮತ್ಸ್ಯಂ ನೀರಸ್ಥಂ ಶಪ್ತಃ ಸೌಭರಿಣಾ ರುಷಾ ।

ಗರುಡನು ಅಮೃತಪಾತ್ರವನ್ನು ತೆಗೆದೊಯ್ಯುವಾಗ ಹಸಿವೆಯಾಯಿತು. ಆಗ ಅಮೃತಪಾತ್ರವನ್ನು ಈ ಮರದ ಮೇಲಿಟ್ಟನು. ಹೀಗಾಗಿ ಹನಿ ಅಮೃತ ಇದಕ್ಕೆ ಸೋಕಿತ್ತು. ಆಮೇಲೆ ಮೀನುಗಳನ್ನು ತಿಂದನು. ಸೌಭರಿಗಳು ಶಪಿಸಿದರು. ಕಾರಣ ಕದಂಬವೃಕ್ಷ ಮಾತ್ರ ಅಜರಾಮರವಾಗಿ ಉಳಿದಿತ್ತು. ಅಥವಾ ಸರ್ಪರಾಜನ ಮಂತ್ರಿಯಿಂದ ವಿಷಭಯರಹಿತವಾದ ಅಡವಿಯೇ ಸರ್ಪರಾಜನ ವಿಹಾರಕ್ಕಾಗಿ ರಕ್ಷಿಸಲ್ಪಟ್ಟಿತ್ತು. ಈ ಕದಂಬ ವೃಕ್ಷವೂ ಅದರಲ್ಲಿ ಸೇರಿದ್ದೇ. ಆದ್ದರಿಂದಲೂ ಹಾಗೆ ಇತ್ತು ಎಂದು ಹರಿವಂಶದಲ್ಲಿ ವರ್ಣಿಸಿದೆ.

ತದಿದಂ ದಾರುಣಾಕಾರಮರಣ್ಯಂ ರೂಢಶಾದ್ವಲಂ ।
ರಕ್ಷಿತಂ ಸರ್ಪರಾಜಸ್ಯ ಸಚಿವೈರಾಪ್ತಕಾರಿಭಿಃ ।
ವನಂ ನಿರ್ವಿಷಯಾಕಾರಂ ವಿಷಾನ್ನಮಿವ ದುಸ್ಪೃಶಂ ।
ತೈರಾಪ್ತಕಾರಿಭಿರ್ನಿತ್ಯಂ ಸರ್ವತಃ ಪರಿರಕ್ಷಿತಂ ।

ಸರ್ಪಶ್ರೇಷ್ಠನು ಕುಪಿತನಾಗಿ ಕೃಷ್ಣನು ದೇವರೆಂಬುದನ್ನು ಅರಿಯದೆ ಅವನ ದೇಹವನ್ನು ಕಚ್ಚಿ ವಿಷ ವನ್ನುಗುಳಿದನು. ಆ ಕಡೆ ಗೋಕುಲದಲ್ಲಿ ಮಹೋತ್ಪಾತಗಳನ್ನು ಕಂಡ ಗೋಕುಲದವರೆಲ್ಲರೂ ವ್ಯಥೆ ಪಟ್ಟರು.

ಅಥ ವ್ರಜೇ ಮಹೋತ್ಪಾತಾ ತ್ರಿವಿಧಾ ಹ್ಯತಿದಾರುಣಾಃ ।
ಉತ್ಪೇತುರ್ದಿವಿ ಭೂಮ್ಯಾತ್ಮನ್ಯಾಸನ್ನಭಯಶಂಸಿನಃ ॥

ಕೃಷ್ಣನಿಗೆ ಯಾವ ಅಪಾಯವೂ ಇಲ್ಲವೆಂದು ಬಲರಾಮನು ಹೇಳುತ್ತಿದ್ದರೂ, ಅದನ್ನು ಗಮನಿಸದೆ ಮಡುವಿನ ಬಳಿಗೆ ಬಂದು ಅಲ್ಲಿನ ಸ್ಥಿತಿಯನ್ನು ಕಂಡು ಗೊಳೋ ಎಂದು ಅಳುತ್ತಿದ್ದರು. ಬಲರಾಮನು ''ಕೃಷ್ಣನೇ! ಈ ಲೀಲೆ ಸಾಕು. ಬೇಗ ಖಳನನ್ನು ನಿಗ್ರಹಿಸಿ ಈಚೆಗೆ ಬಾ'' ಎಂದನು. ಗೋಕುಲದವರಲ್ಲಿ ಕನಿಕರಗೊಂಡ ಶ್ರೀಕೃಷ್ಣನು ಆಗ ಸರ್ಪದಿಂದ ಬಿಡಿಸಿಕೊಂಡು ಅವನ ಹೆಡೆಯ ಮೇಲೆ ನಾಟ್ಯವಾಡಿದನು.

ಇತ್ಥಂ ಸ್ವಗೋಕುಲಮನನ್ಯಗತಿಂ ನಿರೀಕ್ಷ್ಯ
ಸಸ್ತ್ರೀಕುಮಾರಮತಿದುಃಖಿತಮಾತ್ಮಹೇತೋಃ ।
ಆಜ್ಞಾಯ ಮರ್ತ್ಯಪದವೀಮನುವರ್ತಮಾನಃ ।
ಸ್ಥಿತ್ವಾ ಮುಹೂರ್ತಮುದತಿಷ್ಠದುರಂಗಬಂಧಾತ್ ॥

ಸ ದಂದಶೂಕಸ್ಯ ಮುಖಂ ವಿಭಿಂದನ್ ತದೀಯಪುಚ್ಛಂ ಜಗೃಹೇ ಕರೇಣ ।
ಯಥಾಽಪರಾಧಂ ನನು ದಂಡದಾತಾ ನಿರಾಗಸಂ ಕಂ ವರಯೇನ್ನ ಶೌರಿಃ ॥

ಎಂದು ರುಕ್ಮಿಣೀಶ ವಿಜಯದಲ್ಲಿ ವರ್ಣಿಸಿದಂತೆ ಎಡದ ಕೈಯಿಂದ ಬಾಲವನ್ನು ಹಿಡಿದು ಎದ್ದನು. ಶ್ರೀಕೃಷ್ಣನು ಅಪರಾಧಕ್ಕನುಗುಣವಾಗಿ ಶಿಕ್ಷೆ ಕೊಡುವನಾದ್ದರಿಂದ ವಿಷವನ್ನು ಕಾರಿ ಅಪರಾಧ ಮಾಡಿದ ಫಣವನ್ನು ತುಳಿದು ನಿರಪರಾಧಿಯಾದ ಬಾಲವನ್ನು ಎತ್ತಿಹಿಡಿದನು. ನಿರಪರಾಧಿಗಳನ್ನು ಸ್ವೀಕರಿಸುವನಷ್ಟೇ!

''ಅನುಬಂಧೋಽಹಿಭಕ್ತಿಃ ಸ್ಯಾತ್ಬಂಧಃ ಸ್ನೇಹ ಉದಾಹೃತಃ'' ಎಂದಿರುವುದರಿಂದ ಉರಗಬಂಧಾತ್'' ಎಂದರೆ ಸರ್ಪರಾಜನಾದ ಬಲರಾಮನ ಸ್ನೇಹದಿಂದ ಸರ್ಪಬಂಧದಿಂದ ಮೇಲೆದ್ದನು. ಹೀಗೂ ಅರ್ಥ ಮಾಡಬಹುದು. ಈ ವಿಷಯ ಹರಿವಂಶದಲ್ಲಿ ವರ್ಣಿತವಾಗಿದೆ.

ಸಂಕರ್ಷಣಸ್ತು ಸಂಕ್ರುದ್ಧೋ ಬಭಾಷೇ ಕೃಷ್ಣಮವ್ಯಯಂ ।
ಕೃಷ್ಣ ಕೃಷ್ಣ ಮಹಾಬಾಹೋ ಗೋಪಾನಾಂ ನಂದವರ್ಧನ ।

ದಮ್ಯತಾಮೇಷ ವೈ ಕ್ಷಿಪ್ರಂ ಸರ್ಪರಾಜೋ ವಿಷಾಯುಧಃ ।
ಇಮೇ ನೋ ಬಾಂಧವಾಸ್ತಾತ ತ್ವಾಂ ಮತ್ವಾ ಮಾನುಷಂ ವಿಭೋ ॥
ಪರಿದೇವಂತಿ ಕರುಣಂ ಸರ್ವೇಮಾನುಷಬುದ್ಧಯಃ ।
ತಚ್ಛ್ರುತ್ವಾ ರೌಹಿಣೇಯಸ್ಯ ವಾಕ್ಯಂ ತತ್ಸ್ನೇಹಯಂತ್ರಿತಃ ।
ವಿಕ್ರುಶ್ಯಾಸ್ಫೋಟಯದ್ಬಾಹೂ ॥ ಎಂದಿದೆ.

ಬಲರಾಮನು ಸಿಟ್ಟಿನಿಂದ ಹೇಳಿದನು– ಹೇ ಕೃಷ್ಣ! ಗೋಪರಿಗೆ ಆನಂದ ಉಂಟುಮಾಡುವವನೇ, ಬೇಗನೆ ವಿಷಾಯುಧನಾದ ಈ ಕಾಲಿಯನನ್ನು ದಮನಮಾಡು. ಈ ನಮ್ಮೆಲ್ಲ ಬಾಂಧವರು ನಿನ್ನನ್ನು ಮನುಷ್ಯನೆಂದು ತಿಳಿದು ದಯೆ ಬರುವಂತೆ ಪ್ರಲಾಪಿಸುತ್ತಿರುವರು ಕಾರಣ ಬೇಗನೆ ಮೇಲೆದ್ದು ಬಾ ಎಂದನು.

ಬಲರಾಮನ ಈ ಮಾತನ್ನು ಕೇಳಿ ಅವನ ಸ್ನೇಹದಿಂದ ಬೇಗನೆ ಸರ್ಪವನ್ನು ದಮನ ಮಾಡಿ ಮೇಲೆದ್ದನು.

ಸರ್ಪನು ತನ್ನ ದೇಹವು ಜರ್ಝರಿತವಾಗಿ ರಕ್ತವನ್ನು ಕಾರಿದನು. ಮೂರ್ಛಿತನೂ ಆದನು. ಎಚ್ಚೆತ್ತ ಮೇಲೆ ಅವನಿಗೆ ಶ್ರೀಕೃಷ್ಣನೇ ನಾರಾಯಣನೆಂಬ ಜ್ಞಾನವು ಉದಯವಾಯಿತು. ಮನಸ್ಸಿನಿಂದ ಶರಣು ಹೊಂದಿದನು. ಆಗ ಅವನ ಪತ್ನಿಯರು ಬಂದು

''ಕ್ರೋಧೋಹಿ ದೇವಸ್ಯ ವರೇಣ ತುಲ್ಯಃ'' ದೇವ! ನೀನಿವನ ವಿಷಯದಲ್ಲಿ ಮಾಡಿದ ಕೋಪದಿಂದ ಇವನಿಗೆ ಶಿಕ್ಷೆ ಮಾಡಿದಿ.

ಅನುಗ್ರಹೋಽಯಂ ಭವತಾ ಕೃತೋಹಿ ನೋ
ದಂಡೋಽಸತಾಂ ತೇ ಖಲು ಕಲ್ಮಷಾಪಹಃ ।
ಯದ್ದಂದಶೂಕತ್ವಮಮುಷ್ಯ ದೇಹಿನಃ
. ಕ್ರೋಧೋಽಪಿ ತೇಽನುಗ್ರಹ ಏವ ಸಮ್ಮತಃ ॥

ಇದರಿಂದ ಹಿಂಸಕನಾದ ಇವನ ಪಾಪಗಳೆಲ್ಲ ಪರಿಹಾರವಾದುವು. ವರವನ್ನೇ ಕೊಟ್ಟಂತಾಯಿತು. ನಿನ್ನ ಸ್ಮರಣೆ ಬಂದಿತು. ನಮ್ಮ ಪತಿಯಾದ ಇವನು ಪೂರ್ವ ಜನ್ಮದಲ್ಲಿ ಪುಣ್ಯವನ್ನು ಮಾಡಿರುವನು. ಹೇಗೆಂದರೆ ರಮಾದೇವಿಗೆ ಅಪೇಕ್ಷಿತವಾದ ನಿನ್ನ ಪಾದದ ಧೂಳಿ ಇವನ ತಲೆಯ ಮೇಲೆ ಬಿದ್ದಿತು. ನಿನ್ನ ಪಾದಸ್ಪರ್ಶವನ್ನು ಹೊಂದಿದವರು ಮಹರ್ಲೋಕ, ಜನ, ತಪ, ಸತ್ಯಲೋಕಗಳಲ್ಲಿ ವಾಸಮಾಡುವ ಮುಕ್ತರಿಗಿಂತ ಶ್ರೇಷ್ಠವಾದ ವೈಕುಂಠದಲ್ಲಿ ಸಾಲೋಕ್ಯಮುಕ್ತಿಯನ್ನು ಹೊಂದಿರುವವರಿಗಿಂತ ಮಿಗಿಲಾದ ಪರಮಾತ್ಮನ ಸ್ಪರ್ಶಮುಕ್ತಿಯನ್ನು ಹೊಂದುವರು. ಅವರಿಗೆ ಇನ್ನಾವ ಬಯಕೆಯೂ ಇಲ್ಲ. ತಾಮಸಗುಣದಿಂದ ಉಂಟಾಗುವ ಸರ್ಪಜನ್ಮದಲ್ಲಿ ನಮ್ಮ ಪತಿಯು ಬಂದಿದ್ದರೂ ಇವನು ನಿನ್ನ ಅಪರೋಕ್ಷವನ್ನು ಪಡೆದನು. ಕೃಷ್ಣ! ವಾಸುದೇವ! ನಿನಗೆ ನಮಸ್ಕಾರ! ನಾವೆಲ್ಲರೂ ನಿನ್ನ ಕಿಂಕರಿಯರು. ಪತಿಯ ಭಿಕ್ಷೆಯನ್ನು ಕೊಡು! ಎಂದು ನಾಗಪತ್ನಿಯರು ಶ್ರೀಹರಿಯನ್ನು ಕೊಂಡಾಡಿದರು.

ಶ್ರೀಕೃಷ್ಣನು ಕಾಲಿಯನನ್ನು ಬಿಟ್ಟುಬಿಟ್ಟನು. ಅವನು ಚೇತರಿಸಿಕೊಂಡು ನಮಿಸಿ,

ದೇವ! ನಮ್ಮ ಜಾತಿಯ ಸ್ವಭಾವವು ಕ್ರೂರವಾದುದು. ಸ್ವಭಾವವು ಹೋಗುವುದಿಲ್ಲ. ನೀನು ಮುಖ್ಯ ಸೃಷ್ಟಿಕರ್ತನು. ನಿನ್ನ ಮಾಯೆಯಿಂದ ನಾವು ಮೋಹಿತರು. ಆ ಮೋಹವನ್ನು ಕಳೆಯಲು ನೀನೇ ಸಮರ್ಥನು. ಅನುಗ್ರಹವೋ, ನಿಗ್ರಹವೋ ನಿನಗೆ ಉಚಿತವಾದುದನ್ನು ಮಾಡು, ಎಂದು ಕಾಲಿಯನೂ ಸ್ತುತಿಗೈದ—

ವಯಂ ಖಲಾಃ ಸಹೋತ್ಪತ್ತ್ಯಾ ತಾಮಸಾ ದೀರ್ಘಮನ್ಯವಃ ।
ಸ್ವಭಾವೋ ದುಸ್ತ್ಯಜೋ ನಾಥ ಭೂತಾನಾಂ ಯದಸದ್ಗ್ರಹಃ ।
ಅನುಗ್ರಹಂ ನಿಗ್ರಹಂ ವಾ ಮನ್ಯಸೇ ತದ್ವಿಧೇಹಿ ನಃ ॥

ಶ್ರೀಕೃಷ್ಣನು ಪ್ರತಿಯಾಗಿ ಹೀಗೆಂದನು– ಹೇ ಕಾಲಿಯ! ನೀನು ರಮಣಕದ್ವೀಪಕ್ಕೆ ಹೋಗು. ಈ ಮಡುವಿನ ಜಲವು ಎಲ್ಲರಿಗೂ ಸ್ನಾನಪಾನಾದಿಗಳಿಗೆ ಯೋಗ್ಯವಾಗಲಿ, ನಿನಗೆ ಮಾಡಿದ ಶಿಕ್ಷೆಯನ್ನು ಸ್ಮರಿಸುವವರಿಗೆ ನಿಮ್ಮ ಭಯವಿರದಿರಲಿ. ನಿನ್ನ ಶಿರಸ್ಸಿನಲ್ಲಿ ಮೂಡಿರುವ ನನ್ನ ಅಂಗಾಲಿನ ರೇಖೆಗಳಾದ ಶಂಖ ಚಕ್ರಗದಾಪದ್ಮಗಳನ್ನು ನೋಡಿದ ಗರುಡನು ನಿನಗೆ ಯಾವ ತೊಂದರೆಯನ್ನೂ ಮಾಡದೆ ವಿಶ್ವಾಸ ಮಾಡುವನು, ಎಂದು ನುಡಿದನು—

ನಾತ್ರ ಸ್ಥೇಯಂ ತ್ವಯಾ ಸರ್ಪ ಸಮುದ್ರಂ ಯಾಹಿ ಮಾಚಿರಂ ।
ಮದ್ಭಯಾತ್ಸ ಸುಪರ್ಣಸ್ತ್ವಾಂ ನಾದ್ಯಾತ್ ಮತ್ಪಾದಲಾಂಛನಮ್ ॥

ಕಾಲಿಯನು ರತ್ನಗಳಿಂದ ಶ್ರೀಕೃಷ್ಣನನ್ನು ಪೂಜಿಸಿ, ನಮಿಸಿ ಸತಿಸುತಪರಿವಾರದೊಡನೆ ರಮಣಕದ್ವೀಪಕ್ಕೆ ಹೊರಟು ಹೋದನು. ಶ್ರೀ ಕೃಷ್ಣನ ಅನುಗ್ರಹದಿಂದ ಕಾಳಿಂದಿಯ ಜಲವು ಅಮೃತವಾಯಿತು.

ಕಾಳಿಯ ಮಡುವಿಗೇಕೆ ಬಂದನು?

ಕಾಲಿಯನು ಸ್ವಸ್ಥಳವಾದ ರಮಣಕದ್ವೀಪವನ್ನು ಬಿಟ್ಟು ಈ ಮಡುವಿಗೆ ಬರಲು ಕಾರಣವೇನು? ಗರುಡನಿಗೆ ಇವನು ಮಾಡಿದ ಅಪರಾಧವೇನು? ಎಂದು ಪರೀಕ್ಷಿತರು ಕೇಳಲು ಶುಕರು ಅದಕ್ಕೆ ಉತ್ತರಿಸಿದರು.

ಸರ್ಪಗಳೆಲ್ಲವೂ ಗರುಡನಿಂದ ತಮಗೆ ಭಯವು ತಪ್ಪುವುದಕ್ಕಾಗಿ ಪ್ರತಿ ಅಮಾವಾಸ್ಯೆಯೂ ಅವನಿಗೆ ಒಬ್ಬೊಬ್ಬರೂ ಬಲಿಯನ್ನು ಒಪ್ಪಿಸುವುದಾಗಿ ಒಪ್ಪಂದವನ್ನು ಮಾಡಿಕೊಂಡರು. ಕಾಲಿಯನು ತನ್ನ ಸರದಿ ಬಂದಾಗ ಗರ್ವದಿಂದ ಗರುಡನಿಗೆ ಬಲಿಯನ್ನು ಅರ್ಪಿಸಲಿಲ್ಲ. ಗರುಡನು ಮುನಿದು ಬಂದು ರೆಕ್ಕೆಯಿಂದ ಅಪ್ಪಳಿಸಿದನು. ಕಾಲಿಯನು ಬದುಕಿದರೆ ಸಾಕೆಂದು, ಸೌಭರಿಯ ಶಾಪದಿಂದ ಗರುಡನು ಬರಲಾಗದ ಈ ಕಾಳಿಂದಿ ಮಡುವಿಗೆ ಬಂದು ಸೇರಿಕೊಂಡಿದ್ದನು.

ಮೀನುಗಳಿಗೆ ದಯೆ ಏಕೆ?

ಗರುಡನು ಆಹಾರಕ್ಕಾಗಿ ಮೀನಿಗಾಗಿ ಈ ಮಡುವಿಗೆ ಬರುತ್ತಿದ್ದನು. ಮೀನುಗಳ ಮೇಲಿನ ದಯೆಯಿಂದ ಗರುಡನಿಗೆ ಶಾಪಕೊಟ್ಟರು. ಮೀನುಗಳ ಮೇಲೆ ಸೌಭರಿಗಳಿಗೆ ದಯೆ ಬರಲು ಕಾರಣವಿತ್ತು. ಏನೆಂದರೆ ಜೋಡಿ ಮೀನುಗಳ ರಮಣವನ್ನು ನೋಡಿ ತನಗೆ ಕಾಮಿನಿಯರ ಕಾಮನೆಯಾಯಿತು. ಕಾಮನೆ ತೀರಿಸಿಕೊಳ್ಳಲು ತಾನು ಐವತ್ತು ದೇಹ ಸ್ವೀಕರಿಸಿದ. ಐವತ್ತು ಜನ ಮಡದಿಯರನ್ನು ಪಡೆದ. ಐದು ಸಾವಿರ ಮಕ್ಕಳನ್ನು ಆ ಮಡದಿಯರಲ್ಲಿ ಪಡೆದ. ಹೀಗಾಗಿ ತನ್ನ ಈ ಸಂಸಾರಕ್ಕೆ ಮೀನು ಕಾರಣವಾಗಿತ್ತು. ಕಾರಣ ಮೀನಿನ ಮೇಲಿನ ಮಮತೆಯಿಂದಾಗಿ ಗರುಡನಿಗೆ ಶಾಪ ಬಂತು. ಈಗ ಹರಿಯು ಅನುಗ್ರಹಿಸಿದ್ದರಿಂದ ಕಾಲಿಯನು ಸ್ವಸ್ಥಾನವನ್ನು ಸೇರಿದನು.

ಮಡುವಿನಿಂದ ಈಚೆಗೆ ಬಂದ ಶ್ರೀಕೃಷ್ಣನನ್ನು ನೋಡಿ ಎಲ್ಲರೂ ಆನಂದಭರಿತರಾದರು. ಆ ರಾತ್ರಿ ಎಲ್ಲರೂ ಆ ಮಡುವಿನ ತೀರದಲ್ಲಿ ಮಲಗಿರಲು ಕಾಡುಗಿಚ್ಚು ಸುಡುತ್ತಾ ಬಂದಿತು. ಬಾಯಿಯಲ್ಲಿ ಅಗ್ನಿಯನ್ನುಳ್ಳ ನಾರಾಯಣನ ಅವತಾರನಾದ ಶ್ರೀಕೃಷ್ಣನು ಕಾಡುಗಿಚ್ಚನ್ನು ಪಾನ ಮಾಡಿ ಅವರನ್ನು ರಕ್ಷಿಸಿದನು.

ಏಷ ಘೋರತಮೋ ವಹ್ನಿಸ್ತಾವಕಾನ್ ಗ್ರಸತೇ ಹಿನಃ ।
ಸುದುಸ್ತರಾನ್ನಃ ಸ್ವಾನ್ ಪಾಹಿ ಕಾಲಾಗ್ನೇಃ ಸುಹೃದಃ ಪ್ರಭೋ ॥
ತಮಗ್ನಿಮಪಿಬತ್ತೀವ್ರಮನಂತೋಽನಂತಶಕ್ತಿಧೃಕ್ ॥

ಪ್ರಲಂಬ ಸಂಹಾರ

ಗ್ರೀಷ್ಮಋತುವು ಬಂದಿತು. ಅದು ತಾಪಕಾರಿಯಾದರೂ ಶ್ರೀಕೃಷ್ಣನು ಗೋಕುಲದಲ್ಲಿದ್ದುದರಿಂದ ವೃಂದಾವನವಾಸಿಗಳಿಗೆ ವಸಂತಕಾಲದಂತೆ ಆನಂದಕರವಾಗಿದ್ದಿತು. ಒಂದು ದಿನ ಎಂದಿನಂತೆ ದನಗಳನ್ನು ಮೇಯಿಸಲು ಕಾಡಿಗೆ ಹೋಗಿ ಬಾಲಕರು ಎರಡು ಪಕ್ಷಗಳನ್ನು ಮಾಡಿಕೊಂಡು ಚೆಂಡಾಟವಾಡುತ್ತಿದ್ದರು. ಆಗ ಪ್ರಲಂಬನೆಂಬ ಅಸುರನು ಗೊಲ್ಲಬಾಲಕನಂತೆ ರೂಪತಾಳಿ ಬಂದು ಕೃಷ್ಣನ ಪಕ್ಷದಲ್ಲಿ ನಿಂತು ಬಲರಾಮನ ಜೋಡಿಯಲ್ಲಿ ಸೋತನು.

ಕೃಷ್ಣಃ ಶ್ರೀದಾಮಸಹಿತಃ ಪುಪ್ಲುವೇ ಗೋಪಸೂನುವಾ ।
ಸಂಕರ್ಷಣಸ್ತು ಪ್ಲುತವಾನ್ ಪ್ರಲಂಬೇನ ಸಹಾನಘಃ ।
ಶ್ರೀದಾಮಮಜಯತ್ ಕೃಷ್ಣಃ ಪ್ರಲಂಬಂ ರೋಹಿಣೀಸುತಃ ॥

ಅವನು ಬಲರಾಮನನ್ನು ಎತ್ತಿಕೊಂಡು ಹೊರಟನು. ಗೊತ್ತುಮಾಡಿದ್ದ ಸ್ಥಳವನ್ನು ಮೀರಿ ಗಗನದಲ್ಲಿ ಹೊರಟನು. ಭೀತನಾದ ಬಲರಾಮನು ಕೃಷ್ಣನನ್ನು ಕೂಗಿಕೊಂಡನು. ಕೃಷ್ಣನು ಆಗ ಬಲರಾಮನಿಗೆ ಅವನಲ್ಲಿದ್ದ ಹರಿಯ ಶ್ವೇತಕೇಶಾವೇಶವನ್ನೂ, ಶೇಷನ ಸ್ವರೂಪವನ್ನೂ ಸ್ಮರಣೆಗೆ ತಂದನು. ಆಗ ಬಲರಾಮನು ಆವೇಶ ಬಲದಿಂದ ಪ್ರಲಂಬಾಸುರನನ್ನು ಕೊಂದುಬಿಟ್ಟನು. ದೇವತೆಗಳು ಸಂತೋಷದಿಂದ ಪುಷ್ಪವೃಷ್ಟಿಯನ್ನು ಮಾಡಿ ಸ್ತುತಿಸಿದರು. ಈ ಪ್ರಮೇಯವನ್ನು ಹರಿವಂಶ ಹಾಗೂ ತಾತ್ಪರ್ಯನಿರ್ಣಯ ಸ್ಪಷ್ಟಪಡಿಸಿವೆ. ಆದರೆ ಭಾಗವತ ''ಅಥಾಗತಸ್ಮೃತಿಃ'' ಎಂದು ಹೇಳುವ ಮೂಲಕ ಇದನ್ನು ಸೂಚಿಸಿದೆ—

ಅಥಾಗತಸ್ಮೃತಿಃ ಎನ್ನುವಲ್ಲಿ ಅಥೇನ=ನಿರನ್ನನಾದ ಕೃಷ್ಣನಿಂದ ಅವನ ಬೋಧನೆಯಿಂದ ಆಗತಾ=ಬಂದಂಥ ಸ್ಮೃತಿಃ=ಸ್ಮರಣವುಳ್ಳ ಹೀಗೆ ಅರ್ಥ ಮಾಡಬಹುದು. 'ಅನ್ನಂಥಂ' ಎಂದು ಶ್ರುತಿಯಿದೆ. 'ಅನ್ಯೋನಿರನ್ನೋಪಿ-ಬಲೇನಭೂಯಾನ್' ಎಂದೂ ಶ್ರುತಿಯಿದೆ. ಅಥವಾ ಅಕಾರಃ ವಾಸುದೇವಃ ಸ್ಯಾತ್' ಎಂದಿರುವುದರಿಂದ ಏನ ಆಗತಾ ಸ್ಮೃತಿಃ ಎಂದೂ ವಿಗ್ರಹ ಮಾಡಬಹುದು. 'ಸಸ್ಮಾರ ರೂಪಂ ನಿಜಮೇವ ಲಕ್ಷಣಃ' ಎಂದಿರುವುದರಿಂದ ಲಕ್ಷ್ಮಣನಂತೆ ಮೂಲರೂಪ ಸ್ಮರಣದಿಂದ ಭಯರಹಿತನಾದನು. ಈ ವಿಷಯ,

ಭೀತೇನ ರೋಹಿಣಿಸುತೇನ ಹರಿಸ್ತುತೋಽಸೌ ಸ್ವಾವಿಷ್ಟತಾಮುಪದಿದೇಶ ಬಲಾಭಿಪೂರ್ತ್ಯೈ ।
ತೇನೈವ ಪೂರಿತಬಲೋಽಂಬರಚಾರಿಣಂ ತಂ ಪಾಪಂ ಪ್ರಲಂಬಮುರುಮುಷ್ಟಿಹತಂ ಚಕಾರ ॥

ಎಂದು ತಾತ್ಪರ್ಯನಿರ್ಣಯದಲ್ಲಿ ಹೇಳಿದೆ. ಭಯಗೊಂಡ ಬಲರಾಮನಿಂದ ಸ್ತುತಿಸಲ್ಪಟ್ಟ ಕೃಷ್ಣನು ಬಲವನ್ನು ಪೂರ್ತಿಗೊಳಿಸಲು ತನ್ನ ಶುಕ್ಲಕೇಶಾವಿಶಿಷ್ಟತೆ ನಿನ್ನಲ್ಲಿದೆಯೆಂದು ಉಪದೇಶಿಸಿದನು. ಅದರಿಂದ ಬಲಪೂರಿತನಾದ ರಾಮನು ಬಲವಾದ ಮುಷ್ಟಿಯಿಂದ ಹೊಡೆದನು.

ದಾವಾಗ್ನಿಪಾನ

ಒಂದು ದಿನ ಗೋಪಾಲರು ಆಟವಾಡುತ್ತಿದ್ದಾರೆ. ದನಗಳ ಮೇಲೆ ಗಮನವಿಲ್ಲ. ದನಗಳು ಹಂಚಿಕಡ್ಡಿಯ ವನಕ್ಕೆ ನುಗ್ಗಿದುವು. ಬಾಲಕರು ಹುಡುಕಿದರು. ಕೂಗಿದರು. ದನಗಳ ಸುಳಿವೇ ಕಾಣಿಸಲಿಲ್ಲ. ಎಲ್ಲರೂ ಬಳಲಿ

ಬಾಯಾರಿ, ಹಿಂತಿರುಗಬೇಕೆಂದಿದ್ದಾಗ ಶ್ರೀಕೃಷ್ಣನು ದನಗಳ ಹೆಸರನ್ನು ಹಿಡಿದು ಕೂಗಿದನು. ಅವು 'ಹಂಭಾ' ಎಂದು ಪ್ರತಿಧ್ವನಿ ಮಾಡಿದುವು. ಗೋಪಾಲರು ಮಂದೆಯಿದ್ದ ಸ್ಥಳಕ್ಕೆ ಬಂದರು. ಅಷ್ಟರಲ್ಲಿ ಕಾಡುಗಿಚ್ಚು ಹತ್ತಿತ್ತು. ಗೋಪಾಲರು—

ಕೃಷ್ಣ ಕೃಷ್ಣ ಮಹಾವೀರ್ಯ ಹೇ ರಾಮಾಮೋಘವಿಕ್ರಮ ।
ದಾವಾಗ್ನಿನಾ ದಹ್ಯಮಾನಾನ್ ಪ್ರಪನ್ನಾಂಸ್ತ್ರಾತುಮರ್ಹಥಃ ॥

''ಕೃಷ್ಣ! ಮಹಾವೀರ್ಯ! ನಮ್ಮನ್ನು ಕಾಪಾಡು'' ಎಂದು ಮರೆಹೊಕ್ಕರು. ಶ್ರೀಕೃಷ್ಣನು ಅವರೆಲ್ಲರನ್ನೂ ಕಣ್ಣುಮುಚ್ಚಿಕೊಳ್ಳುವಂತೆ ಹೇಳಿ ಆ ಕಾಡುಗಿಚ್ಚನ್ನು ನುಂಗಿದನು. ಆದರಿಂದ ದನಗಳೂ ಜನರೂ ಬದುಕಿದರು.

ನಿಮೀಲಯತ ಮಾಭೈಷ್ಟ ಲೋಚನಾನೀತ್ಯಭಾಷತ ।
ಪೀತ್ವಾ ಮುಖೇನ ತಾನ್ ಕೃಚ್ಛ್ರಾದ್ಯೋಗಾಧೀಶೋಽವ್ಯಮೋಚಯತ್ ॥

ಅಗ್ನಿ ತನ್ನ ಮನೆಗೆ ಹೋದರೆ ಇದರಲ್ಲೇನು ಆಶ್ಚರ್ಯ!

ಕೈಗಳಿಂದ ಬೆಂಕಿಯನ್ನು ಆರಿಸದೆ ಮುಖದಿಂದ ಪಾನಮಾಡಿ ಜನಕವಾದ ಮುಖಕ್ಕೆ ಜನ್ಯವಾದ ಅಗ್ನಿಗೂ ಮೇಲನದಿಂದ ತನ್ನಂತೆಯೇ ಅವುಗಳಿಗೂ ಸಂತೋಷ ವಿಶೇಷವನ್ನು ಸೂಚಿಸಿರುವನು. ಮುಖಾದಿಂದ್ರಶ್ಚಾಗ್ನಿಶ್ಚ ಎಂದಿದೆ.

ಸ್ತುವಂತು ಸರ್ವೇ ವನವಹ್ನಿಪಾನಕೃತಾನುಭಾವಂ ನ ವಯಂ ಮುರಾರೇಃ ।
ಸ್ವಜನ್ಮಭೂಮಿಂ ಶಿಖಿನಿ ಪ್ರವಿಷ್ಟೇ ಕ ಈಶಿತುಸ್ತೇನ ಕೃತೋಽನುಭಾವಃ ॥

ಶ್ರೀಕೃಷ್ಣನು ಅಡವಿಯ ಬೆಂಕಿಯನ್ನು ಪಾನಮಾಡಿಬಂದ ಮಹಿಮೆಯ ವರ್ಣನೆಯನ್ನು ಎಲ್ಲರೂ ಮಾಡಿದರೆ ಮಾಡಲಿ. ನಾವಂತು ಮಾಡುವುದಿಲ್ಲ. ಏಕೆಂದರೆ ಅಗ್ನಿಯು ತನ್ನ ಜನ್ಮಸ್ಥಳವನ್ನು ಪ್ರವೇಶ ಮಾಡಿದರೆ ಪರಮಾತ್ಮನ ಮಹಿಮೆ ಏನಿದರಲ್ಲಿ? ಎಂದು ಚಮತ್ಕಾರವಾಗಿ ಪರಮಾತ್ಮನ ಮುಖವು ಅಗ್ನಿಜನಕವೆಂಬುವುದನ್ನು ವರ್ಣಿಸಿದರು ವಾದಿರಾಜರು.

ಗೋಪಾಲರು ಶ್ರೀಕೃಷ್ಣನನ್ನು ಜರಾಮರಣ ಶೂನ್ಯನಾದ ನಾರಾಯಣನೆಂದು ತಿಳಿದರು. ಸಾಯಂಕಾಲ ಗೋಕುಲಕ್ಕೆ ಬಂದ ಬಾಲಕರು ಪ್ರಲಂಬನವಧೆ ಮತ್ತು ದಾವಾಗ್ನಿಪಾನದ ವ್ಯಾಪಾರವನ್ನು ಗೊಲ್ಲರಿಗೆ ಹೇಳಿದರು. ಇದನ್ನು ಕೇಳಿದವರೆಲ್ಲರೂ ರಾಮಕೃಷ್ಣರು ದೇವಶ್ರೇಷ್ಠರೇ ಹೊರತು ಮನುಷ್ಯರಲ್ಲವೆಂದು ನಿಶ್ಚಯಿಸಿದರು.

ಋತುವರ್ಣನೆ

ಮಳೆಗಾಲ ಆರಂಭವಾಯಿತು. ಚತುರ್ಮುಖನೆಂಬ ಬ್ರಹ್ಮನು ದುರ್ಮತವೆಂಬ ಮೇಘಾಚ್ಛಾದಿತನಾಗಿ ಸ್ವಜ್ಞಾನವು ಹೇಗೆ ಅಭಿವ್ಯಕ್ತವಾಗುವುದಿಲ್ಲವೋ ಅದರಂತೆ ಮೇಘಾವೃತ ಗಗನದಲ್ಲಿ ಸೂರ್ಯಾದಿಗಳ ಪ್ರಕಾಶವಿಲ್ಲದಂತಾಯಿತು. ಜ್ಞಾನಿಗಳಿಗೆ ಕೃಷ್ಣನ ಕಟಾಕ್ಷಗಳು ಕಾರುಣ್ಯವನ್ನು ಸುರಿಸುವಂತೆ ಪ್ರಾಣಿಗಳಿಗೆ ಜೀವನ ಸಾಧನವಾದ ನೀರನ್ನು ಮೇಘಗಳು ಸುರಿಸುತ್ತಿದ್ದುವು.

ಪ್ರಾಣಿನಾಂ ಜೀವನಂ ಹ್ಯಂಬು ಮುಮುಚುಃ ಕರುಣಾ ಇವ ।

ಹರಿನಿರತಮನಸ್ಕರು ವ್ಯಥೆಯನ್ನು ಹೊಂದದಿರುವಂತೆ ಪರ್ವತಗಳು ಮಳೆಯ ಹೊಡೆತದಿಂದ ಸ್ವಲ್ಪವೂ

ವ್ಯಥೆಯನ್ನು ಹೊಂದಲಿಲ್ಲ. ಈ ಸಮಯದಲ್ಲಿ ಶ್ರೀಕೃಷ್ಣನು ಬಾಲಕರೊಂದಿಗೆ ವನವನ್ನು ಪ್ರವೇಶಿಸಿದನು. ಕೆಚ್ಚಲಭಾರದಿಂದ ಮೆಲ್ಲನೆ ನಡೆಯುತ್ತಿದ್ದ ಗೋವುಗಳು ತಮ್ಮ ನಾಮವನ್ನು ಹಿಡಿದು ಗೋಪಾಲಕೃಷ್ಣನು ಕೂಗುತ್ತಿದ್ದಾಗ ದುಡುದುಡು ಅವನ ಹಿಂದೆ ಓಡುತ್ತಿದ್ದುವು. ಗುಹೆಯಲ್ಲಿ ಕುಳಿತು ಮೊಸರು ಅನ್ನಬುತ್ತಿಯನ್ನು ಎಲ್ಲರೂ ಸೇರಿ ತಿನ್ನುತ್ತಿದ್ದರು. ಮಳೆಗಾಲವು ಕಳೆದು ಶರದೃತುವು ಬಂದಿತು.

ಸರ್ವಸ್ವಂ ಜಲದಾ ಹಿತ್ವಾ ವಿರೇಜುಃ ಶುಭ್ರವರ್ಚಸಃ ।
ಯಥಾತ್ಯಕ್ತೈಷಣಾಃ ಶಾಂತಾ ಮುನಯೋ ಮುಕ್ತಕಲ್ಮಷಾಃ ॥

ಗಗನವು ಸ್ವಚ್ಛವಾಯಿತು. ಪುರಗ್ರಾಮಗಳಲ್ಲಿ ಗೃಹಸ್ಥರು ಇಂದ್ರನನ್ನು ಉದ್ದೇಶಿಸಿಕೊಂಡು ಆಗ್ರಾಯಣೇಷ್ಟಿಯೆಂಬ ಉತ್ಸವವನ್ನು ಮಾಡುತ್ತಿದ್ದರು. ಪಕ್ವಧಾನ್ಯಗಳ ತೆನೆಗಳಿಂದ, ಶ್ರೀಹರಿಯ ಆವಿಷ್ಟ, ಅನಾವಿಷ್ಟ ರೂಪರಾದ ರಾಮಕೃಷ್ಣರಿಂದ ಕೂಡಿರುವ ಭೂಮಿಯು ಶೋಭಿಸುತ್ತಿದ್ದಿತು.

ವೇಣುಗಾನ

ಶ್ರೀಕೃಷ್ಣನು ವನದಲ್ಲಿ ಗೋಪಿಯರನ್ನು ಆಕರ್ಷಿಸಲು ಕೊಳಲನ್ನು ಊದುತ್ತಿದ್ದನು. ಈ ಧ್ವನಿಯನ್ನು ಕೇಳಿ ಅವನಲ್ಲಿ ಮಾತ್ರವೇ ಕಾಮವುಳ್ಳ ಗೋಪಿಯರು ಒಂದು ಕಡೆ ಸೇರಿ ಶ್ರೀಕೃಷ್ಣನ ವ್ಯಾಪಾರವನ್ನು ವರ್ಣಿಸುತ್ತಾರೆ:-

ಬಲರಾಮಕೃಷ್ಣರು ಕೊಳಲನ್ನೂದುತ್ತ ಸಾಯಂಕಾಲ ಗೋಕುಲವನ್ನು ಪ್ರವೇಶಿಸುವಾಗ ಅವರ ಮುಖ ಸೌಂದರ್ಯವನ್ನು ನೇತ್ರಗಳಿಂದ ಪಾನಮಾಡುವವರು ಕಣ್ಣುಗಳನ್ನು ಪಡೆದುದಕ್ಕೆ ಇದೇ ಲಾಭ. ಶ್ರೀಕೃಷ್ಣನ ಅಧರಾಮೃತಪಾನ ಮಾಡುವ ಕೊಳಲೇನು ಪುಣ್ಯ ಮಾಡಿರುವುದೋ?

ಅಕ್ಷಣ್ವತಾಂ ಫಲಮಿದಂ ನ ಪರಂ ವಿದಾಮಃ
ಸಖ್ಯಃ ಪಶೂನಭಿನಿವೇಶಯತೋರ್ವಯಸ್ಯೈಃ ।
ವಕ್ತ್ರಂ ವ್ರಜೇಶಸುತಯೋರನು ವೇಣುಜುಷ್ಟಂ
ಯೈರ್ಯೈರ್ನಿಪೀತಮನುರಕ್ತಕಟಾಕ್ಷಮೋಕ್ಷಮ್ ॥

ವೃಂದಾವನವು ಭೂಲೋಕದ ಕೀರ್ತಿಯನ್ನು ವಿಸ್ತರಿಸುತ್ತಿರುವುದು. ವಿಮಾನದಲ್ಲಿ ಕುಳಿತಿರುವ ದೇವತಾಸ್ತ್ರೀಯರು ಕೃಷ್ಣನ ದರ್ಶನಮಾಡಿ, ಅವನ ಮುರಳೀನಾದವನ್ನು ಕೇಳಿ, ತುರುಬುಬಿಚ್ಚಿಹೋಗಿ, ವಸ್ತ್ರವು ಕದಲಿ ಮೈಮರೆತು ಹೋದರು. ಗೋವುಗಳು ಮೇವನ್ನು ಬಿಟ್ಟು ಕಣ್ಣೀರನ್ನು ಸುರಿಸುತ್ತ ನಿಂತವು. ಯಮುನೆ ಸಾವಧಾನವಾಗಿ ಹರಿದಳು. ರಾಮಕೃಷ್ಣರು ಜಂಗಮಸ್ಥಾವರ ಪ್ರಾಣಿಗಳಿಗೆ ಹರ್ಷವನ್ನುಂಟು ಮಾಡುತ್ತ ಜಂತುಗಳಲ್ಲಿ ತೋರುವ ಸ್ನೇಹವು ವಿಚಿತ್ರವಾಗಿರುವುದು.

ವೇಣುಗಾನದ ರಸಾನುಭವ ಲಕ್ಷ್ಮೀದೇವಿಗೆ–

ಈ ಪ್ರಸಂಗದಲ್ಲಿ ಕೊಳಲಿನ ನಾದಶ್ರವಣದ ಮುಖ್ಯ ಅಧಿಕಾರ ಗೋಪ ಸ್ತ್ರೀಯರಿಗೇನೆಯನ್ನುವಂತೆ ತೋರುವದು, ಮತ್ತು ''ಗೋಪ್ಯಃ ಕಿಮಾಚರದಯಂ ಕುಶಲಂ ಸ್ಮವೇಣುಃ'' ಎಂಬ ಶ್ಲೋಕದಲ್ಲಿ ಕೇವಲ ಜಡವೇಣುವಿಗೆ ಶ್ರೀಕೃಷ್ಣನ ಅಧರಾಮೃತಪಾನವೆಂಬ ಭ್ರಮಬರುವದು. ಏನು ಪುಣ್ಯ ಮಾಡಿರುವದೋ? ಎಂಬ ಪ್ರಶ್ನೆ ಜಡವಿಷಯದಲ್ಲಿ ಯುಕ್ತವಲ್ಲ. ಭುಂಕ್ತೇ ಎಂದು ಭೋಜನ ಹೇಳಿದ್ದು ''ಸದಭಾಃ ತರವಃ ಅಶ್ರು ಮುಮುಚುಃ'' ಎಂದು ಅಚೇತನಗಳು ಕಣ್ಣೀರಿಟ್ಟವು ಎನ್ನುವುದು ಸರಿಯಲ್ಲ.

ಈ ಪ್ರಶ್ನೆಗಳಿಗೆ ಆಚಾರ್ಯರು ತಂತ್ರಭಾಗವತ ವಾಕ್ಯವನ್ನೆ ಉದಾಹರಿಸಿ ಉತ್ತರಿಸಿರುವರು.

ಶ್ರೀದೇವೀ ವೇಣುಮಾವಿಶ್ಯ ರೇಮೇ ಕೃಷ್ಣಮುಖಾಂಬುಜೇ ।
ಪಪೌ ಚ ತದ್ಗತಂ ಗೀತಂ ಸುರಾ ಇತರಭಾಂಡಗಾಃ ॥

ಸಾಕ್ಷಾತ್ ಲಕ್ಷ್ಮೀದೇವಿಯೆ ವೇಣುವಿನಲ್ಲಿ ಪ್ರವೇಶ ಮಾಡಿ ಕೃಷ್ಣನ ಮುಖಾರವಿಂದದಲ್ಲಿರುವ ಅಮೃತ (ಗಾನರೂಪು ಅಧರಾಮೃತಗಳನ್ನು) ಆಸ್ವಾದನೆ ಮಾಡಿದಳು. ಅವಳೇ ಗಾನರಸ ವಿಶೇಷ ತಿಳಿದವಳು, ಮುಖ್ಯಾಧಿಕಾರಿಣಿಯು. ದೇವತೆಗಳು ಅಧರಸುಧಾಕ್ಕೆ ಆಸ್ಪದವಲ್ಲದ ವೇಣುಮೂಲದಲ್ಲಿ ಆಶ್ರಯಿಸಿದ್ದರು.

ವೇಣುಮೂಲೇ ಧನೇಪಾತ್ರೇ ಭಾಂಡಂ ಭೂಶಾಶ್ವಭೂಷಯೋಃ ಎಂದು ಯಾದವಕೋಶವಿರುವದ-ರಿಂದ ಇತರ ಅಲಂಕಾರಗಳಲ್ಲಿ ಇದ್ದರು. ಅಥವಾ ಬಲರಾಮಾದಿಗಳ ವೇಣುಮೂಲದಲ್ಲಿ ಇತರ ದೇವತೆ-ಗಳಿದ್ದರು. ಅಥವಾ ದರ್ಭಗಳಿಂದ ಸಹಿತವಾದ ಎಲ್ಲ ಗಿಡಗಳೆಂಬ ಪಾತ್ರಗಳಲ್ಲಿ ದೇವತೆಗಳು, ಶ್ರೀದೇವಿ ಮಾತ್ರ ವೇಣುವಿನಲ್ಲಿ ಹೀಗೂ ಅರ್ಥ. ಈಗ ಎಲ್ಲದರಲ್ಲಿ ಚೇತನರೇ ಇರುವುದರಿಂದ ಯಾವ ಅನುಪತ್ತಿಯೂ ಇಲ್ಲ.

ವಸ್ತ್ರಾಪಹರಣ

ಹೇಮಂತ ಋತುವಿನ ಮಾರ್ಗಶಿರಮಾಸದಲ್ಲಿ ಗೋಪಕನ್ಯೆಯರು ಕಾತ್ಯಾಯನೀ ಪೂಜಾವ್ರತವನ್ನು ಮಾಡಿದರು.

ಆಪ್ಲುತ್ಯಾಂಭಸಿ ಕಾಲಿಂದ್ಯಾ ಜಲಾಂತೇ ಚೋದಿತೇಽರುಣೇ ।
ಕೃತ್ವಾ ಪ್ರತಿಕೃತಿಂ ದೇವಿಮಾನರ್ಚುರ್ನೃಪಸೈಕತೀಂ ।
ಕಾತ್ಯಾಯಿನಿ ಮಹಾಮಾಯೇ ಮಹಾಯೋಗಿನ್ಯಧೀಶ್ವರಿ ।
ನಂದಗೋಪಸುತಂ ದೇವಿ ಪತಿಂ ಮೇ ಕುರುತೇ ನಮಃ ॥

ಕಾಳಿಂದಿಯಲ್ಲಿ ಸ್ನಾನ ಮಾಡಿ ಮರಳಿನಿಂದ ಮಾಡಿದ ಕಾತ್ಯಾಯಿನಿಯನ್ನು ಪೂಜಿಸಿದರು. ಹೇ ಕಾತ್ಯಾಯಿನಿ! ನಂದಗೋಪನ ಕುವರನಾದ ಕೃಷ್ಣನು ನಮಗೆ ಪತಿಯಾಗುವಂತೆ ಅನುಗ್ರಹಿಸು ಎಂದು ಪ್ರಾರ್ಥಿಸಿದರು.

ಏಕವಚನ ಹೇಗೆ ಸಮಂಜಸ?

ಇಲ್ಲಿ ''ಪತಿಂ ಮೇ ಕುರು'' ನನಗೆ ಗಂಡನಾಗಲಿ ಎಂದು ಪ್ರಾರ್ಥನೆ ಇದೆ. ಗೋಪಿಯರಾದರು ಬಹಳ ಜನರಿರುವರು– ಕಾರಣ ಏಕವಚನ ''ಮೇ'' ಎಂದು ಹೇಗೆ ಪ್ರಯೋಗ ಎಂದರೆ ಅದಕ್ಕೆ ಹೀಗುತ್ತರ—

ಮೇ ಎಂದು ಒಬ್ಬೊಬ್ಬರೂ ಪ್ರಾರ್ಥನೆಯನ್ನು ಪ್ರತ್ಯೇಕ ಮಾಡಿದ್ದರಿಂದ ಏಕವಚನ ಯುಕ್ತವು.

ಅಥವಾ ಇತರರಿಗೆ ಆದರಾಗಲಿ ಇಲ್ಲವಾದರೆ ಇಲ್ಲ, ನನಗೆ ಮಾತ್ರ ಆಗಲಿ ಎಂದು ಧ್ವನಿತವಾಗುವುದು. ಸವತಿಯರಿರುವುದು ಸ್ನೇಹಕ್ಕೆ ಕುಂದು ಎಂದು ಲೋಕಪ್ರವಾದವಿದೆ ಎಂದು ಕೆಲವರು ವ್ಯಾಖ್ಯಾನ ಮಾಡುವರು.

ಅಂತರಂಗಾಭಿಪ್ರಾಯ ಹೀಗೆ ಕೇವಲ ಪಾರ್ವತಿ ಪ್ರಾರ್ಥನೆ ಅಷ್ಟೇ ಅಲ್ಲ, ಲಕ್ಷ್ಮೀದೇವಿಯನ್ನು ''ಹೇ ಮೇ'' ಎಂದು ಸಂಬೋಧಿಸಿ ಪ್ರಾರ್ಥಿಸಿರುವರು. ಏಕೆಂದರೆ ಅವಳ ಆವೇಶವಿಲ್ಲದೆ ಶ್ರೀಶನ ಸಂಬಂಧವಾಗಲಾರದು. 'ಋತೇ ರಮಾಂ ಜಾತು ಮಮಾಂಗಸಂಗಯೋಗ್ಯಾಂಗನಾ ನೈವ ಸುರಾಲಯೇಽಪಿ' ಎಂದು ಹೇಳಿದೆ. ಹೀಗೆ ಅರ್ಥೈಸುವುದರಿಂದ ''ಮೇ'' ಎನ್ನುವ ಏಕವಚನಕ್ಕೆ ಅಸ್ವಾರಸ್ಯವಿಲ್ಲ.

ಅಥವಾ ತೇ=ನಿನಗೆ, ಮಃ=ಶಿವನು, ನ=ಇವ (ಶಿವನಂತೆ) ಪತಿಂ ನಂದಗೋಪಸುತಂ ಕುರು=ಕೃಷ್ಣನನ್ನು ಪತಿಯಾಗಿ ಮಾಡು. (ಮಃ ಶಿವೇ ಮಾ ರಮಾಯಾಂ ಚ ಮಾನಿಷೇಧೇವ್ಯಯೇಮತಂ । ಮಾಸೇಚ ಸಮಯೇ ಚಂದ್ರೇ ಯಮೇವೇಧಸಿ ಮಂವಿಷೇ ಇತಿ ವಿಶ್ವಃ ॥ ನಿನಗೆ ಹೇಗೆ ಶಿವನು ಪತಿಯೋ ಹಾಗೇ ಕೃಷ್ಣನನ್ನು ನಮಗೆ ಪತಿಯಾಗುವಂತೆ ಮಾಡು. ನಿನಗೆ ನಮನವು.

ಅವರು ಅರುಣೋದಯದ ಕಾಲದಲ್ಲಿ ತಮ್ಮ ವಸ್ತ್ರಗಳನ್ನು ದಡದ ಮೇಲೆ ಇಟ್ಟು ಯಮುನೆಯ ನೀರಿನಲ್ಲಿಳಿದು ಸ್ನಾನವನ್ನು ಮಾಡುತ್ತಿದ್ದರು. ಒಂದು ದಿನ ಶ್ರೀಕೃಷ್ಣನು ಬಂದು ಆ ವಸ್ತ್ರಗಳನ್ನು ಅಪಹರಿಸಿ ಮರದ ಮೇಲಿಟ್ಟು ''ಅಬಲೆಯರೇ! ವ್ರತದಿಂದ ನೀವು ಬಳಲಿದ್ದೀರಿ. ನಿಮ್ಮನ್ನು ಅಪಹಾಸ್ಯ ಮಾಡುವುದಿಲ್ಲ. ನೀವಿಲ್ಲಿಗೆ ಬಂದು ನಿಮ್ಮ ನಿಮ್ಮ ವಸ್ತ್ರವನ್ನು ಸ್ವೀಕರಿಸಿ'' ಎಂದನು.

ಅತ್ರಾಗತ್ಯಾಬಲಾಃ ಕಾಮಂ ಸ್ವಂ ಸ್ವಂ ವಾಸಃ ಪ್ರಗೃಹ್ಯತಾಂ ।
ಸತ್ಯಂ ಬ್ರವಾಣಿ ನೋ ನರ್ಮ ಯದ್ಯೂಯಂ ವ್ರತಕರ್ಶಿತಾಃ ॥

ಕನ್ಯೆಯರು ತಮ್ಮ ವ್ರತವು ಫಲಿಸಿತೆಂದು ಸಂತುಷ್ಟರಾಗಿ ''ಈ ಅನ್ಯಾಯ ಬೇಡ. ನೀನು ಶ್ಲಾಘ್ಯನು. ನಡುಗುತ್ತಿರುವೆವು. ವಸ್ತ್ರಗಳನ್ನು ಕೊಡು. ಶ್ಯಾಮಸುಂದರನೇ! ನಾವು ನಿನ್ನ ದಾಸಿಯರು. ನಿನ್ನ ಆಜ್ಞೆಯನ್ನು ನಡೆಸತಕ್ಕವರು. ನೀನು ಧರ್ಮಜ್ಞನು. ಸೀರೆಗಳನ್ನು ಕೊಟ್ಟುಬಿಡು. ಇಲ್ಲವಾದರೆ ನಂದಗೋಪನಿಗೆ ಹೇಳುವೆವು'' ಎಂದರು.

ಶ್ರೀಕೃಷ್ಣನು ದಾಸಿಯರು ಆಜ್ಞಾಕಾರಿಗಳೆಂಬುದು ನಿಜವಾದರೆ ನೀವು ಬಂದು ಸೀರೆಗಳನ್ನು ತೆಗೆದು ಕೊಳ್ಳಿರಿ. ನೀವು ಚಾಡಿಯನ್ನು ಹೇಳಿದರೂ ನಂದಗೋಪನು ನನ್ನನ್ನು ಏನೂ ಮಾಡಲಾರನು. ಕಿಂ ಕ್ರುದ್ಧೋ ರಾಜಾ ಕರಿಷ್ಯತಿ ಎಂದನು. ಕನ್ಯೆಯರು ಮಾನ ಮುಚ್ಚಿಕೊಂಡು ತೀರಕ್ಕೆ ಬಂದರು. ಪ್ರಸನ್ನನಾಗಿ

ಯೂಯಂ ವಿವಸ್ತ್ರಾಯದಪೋ ಧೃತವ್ರತಾ
ವ್ಯಗಾಹತೈತ್ತದು ದೇವಹೇಲನಮ್ ।
ಬಧ್ವಾಂಜಲಿಂ ಮೂರ್ಧ್ನ್ಯಪನುತ್ತಯೇಽಂಹಸಃ
ಕೃತ್ವಾ ನಮೋಽಧೋ ವಸನಂ ಪ್ರಗೃಹ್ಯತಾಮ್ ॥

ನೀವು ನಿರ್ವಾಣದಿಂದ ಸ್ನಾನವನ್ನು ಮಾಡಿದ್ದು ತಪ್ಪು. ಈ ದೋಷ ಪರಿಹಾರಕ್ಕಾಗಿ ತಲೆಯ ಮೇಲೆ ಎರಡು ಕೈಗಳನ್ನೂ ಜೋಡಿಸಿ ನಮಿಸಿರಿ. ಬಳಿಕ ನಿಮ್ಮ ನಿಮ್ಮ ವಸ್ತ್ರಗಳನ್ನು ತೆಗೆದುಕೊಳ್ಳಿರಿ ಎಂದು ಹೇಳಿದನು. ಗೋಪಕನ್ಯೆಯರು ಒಂದು ಕೈಯಿಂದ ನಮಿಸಿದರು. ಕುಪಿತನಾಗಿ ಒಂದು ಕೈಯಿಂದ ಅಚ್ಯುತನಿಗೆ ನಮಿಸಿದರೆ ಆ ಹಸ್ತಛೇದನವೇ ಶಿಕ್ಷೆಯೆಂದು ಶಾಸ್ತ್ರಜ್ಞರು ಹೇಳಿರುವರು. ಆದುದರಿಂದ ಎರಡು ಕೈಗಳಿಂದಲೂ ನಮಸ್ಕರಿಸಿರಿ. ಅದು ನನಗೆ ಪ್ರೀತಿಕರವಾಗುವುದು.

ಏಕೇನ ಪಾಣಿನಾ ಯೋ ವೈ ಪ್ರಣಮೇದ್ದೇವಮಚ್ಯುತಮ್ ।
ತಸ್ಯ ದಂಡಃ ಕರಚ್ಛೇದಃ ಇತಿ ಧರ್ಮವಿದೋ ವಿದುಃ ॥

ಕುಮಾರಿಯರು ಎರಡೂ ಕೈಗಳಿಂದಲೂ ನಮಸ್ಕರಿಸಿದರು. ಶ್ರೀಕೃಷ್ಣನು ಅವರವರ ವಸ್ತ್ರಗಳನ್ನು ಕೊಟ್ಟನು. ಅವರು ವಸ್ತ್ರಗಳನ್ನು ಧರಿಸಿ, ಶ್ರೀಕೃಷ್ಣನಿಂದ ಆಕರ್ಷಿತಚಿತ್ತರಾಗಿ ಅವನ ಅಂಗಸಂಗೇಚ್ಛೆಯಿಂದ ಕದಲದೆ ಅಲ್ಲಿಯೇ ನಿಂತುಬಿಟ್ಟರು. ಆಗ ಶ್ರೀಕೃಷ್ಣನು ಮಾತನಾಡುತ್ತಾನೆ.

ಸಂಕಲ್ಪೋ ವಿದಿತಃ ಸಾಧ್ವ್ಯೋ ಭವತೀನಾಂ ಮದರ್ಚನೇ ।
ಮಯಾಽನುಮೋದಿತಃ ಸೋಽಸೌ ಸತ್ಯೋ ಭವಿತುಮರ್ಹತಿ ॥

ನಾನೇ ಪತಿಯಾಗಬೇಕೆಂಬ ನಿಮ್ಮ ಸಂಕಲ್ಪವು ಸತ್ಯವಾಗಬೇಕಾದುದು ನ್ಯಾಯವು. ಬೆಂದ ಬೀಜವು ಮೊಳಕೆಯಾಗಲಾರದು. ಅದರಂತೆಯೇ ಬುದ್ಧಿಯನ್ನು ನನ್ನಲ್ಲಿಯೇ ಇಟ್ಟಿರುವ ನಿಮ್ಮ ಅಭಿಲಾಷೆಯು ತಿರುಗಿ ಸಂಸಾರ ಸಾಧಕವಾದ ವಿಷಯದಲ್ಲಿ ಹುಟ್ಟಲಾರದು. ನನ್ನೊಡನೆ ಈ ರಾತ್ರಿಗಳನ್ನು ಸುಖವಾಗಿ ಕಳೆಯಲು ಸಿದ್ಧರಾಗಿರಿ. ಈಗ ಹೊರಡಿ.

ರಮೆಯ ಸಮ್ಮತಿಯೂ ಇದೆ—

ಮನೆಯಲ್ಲಿ ಮನೆಯೊಡತಿಯಿದ್ದರೇನೇ ಇನ್ನೊಬ್ಬ ಸ್ತ್ರೀಯನ್ನು ಮದುವೆಯಾಗುವುದು ಅಸಾಧ್ಯ. ನಿನಗಾದರೋ ವಕ್ಷಸ್ಥಳದಲ್ಲೇ ಲಕ್ಷ್ಮೀ ಇರುವಳು. ಅಂದಮೇಲೆ ನಮ್ಮ ಮನೋರಥ ಪೂರ್ಣ ಹೇಗಾದೀತು? ಎನ್ನುವುದಕ್ಕೆ ಉತ್ತರ– ಮಯಾ ಚ ಅನುಮೋದಿತಃ=ರಮೆಯಿಂದಲೂ ಸಮ್ಮತಿಸಲ್ಪಟ್ಟಿದೆ. ಆದ್ದರಿಂದ ಪೂರ್ಣ ವಾಗುವುದು. ನೀನು ಕೇವಲ ರಮಾಸಂಗ ಮಾಡುವವನು ನಮ್ಮ ಸಂಕಲ್ಪ ನಿನಗೆ ಒಪ್ಪಿಗೆಯಾಯಿತೆಂದು ಹೇಳುವದು ವಂಚನೆಯೆನಿಸುವದು ಭಗವಂತನೆ, ಎಂದರೆ ಮಯಾ=ಲಕ್ಷ್ಮಿಯು ನಿಮ್ಮಲ್ಲಿ ಸನ್ನಿಹಿತಳಾದ ನಿಮಿತ್ತದಿಂದ ಅನುಮತವಾಗಿದೆ ಹೀಗೆ ಅರ್ಥವು.

ದ್ವಿಜಪತ್ನಿಯರಿಂದ ಅನ್ನದಾನ

ಶ್ರೀಕೃಷ್ಣನು ಗೋಪಾಲರೊಡನೆ ವೃಂದಾವನವನ್ನು ಬಿಟ್ಟು ಬಹುದೂರಕ್ಕೆ ಹೋದನು. ನೆರಳು ಕೊಡತಕ್ಕ ಅಲ್ಲಿದ್ದ ವೃಕ್ಷಗಳನ್ನು ನೋಡಿ 'ಗೆಳೆಯರೇ! ಪರೋಪಕಾರಕ್ಕಾಗಿಯೇ ತಮ್ಮ ಜೀವನವನ್ನು ಧಾರೆಯೆರೆದಿರುವ ಈ ವೃಕ್ಷಗಳೇ ಪುಣ್ಯಜೀವಿಗಳು'' ಎಂದನು. ಮರಗಳ ತೋಪಿನ ಮಾರ್ಗವಾಗಿ ಯಮುನಾ ತೀರದಲ್ಲಿದ್ದ ಒಂದು ಸ್ಥಳಕ್ಕೆ ಬಂದನು. ದನಗಳಿಗೆ ನೀರನ್ನು ಕುಡಿಸಿ, ಮೇಯಿಸುತ್ತಿರುವಾಗ, ಹಸಿವಿನಿಂದ ಪೀಡಿತರಾದ ಗೋಪಾಲರು ಕೃಷ್ಣನನ್ನು ಕುರಿತು ಮಾತನಾಡಿದರು.

ಗೋಪಾಲರು ರಾಮ! ಕೃಷ್ಣ! ನಮಗೆ ಬಹಳ ಹಸಿವಾಗಿದೆ. ತೃಪ್ತಿಯಾಗಿ ಭೋಜನ ಮಾಡಿಸಿರಿ ಎಂದೆನಲು,

ಕೃಷ್ಣನು ಗೋಪಾಲರೇ! ಸಮೀಪದಲ್ಲಿಯೇ ಬ್ರಾಹ್ಮಣರು ಯಜ್ಞವನ್ನು ಮಾಡುತ್ತಿರುವರು. ಅವರ ಬಳಿಗೆ ಹೋಗಿ ಅನ್ನವನ್ನು ಬೇಡಿರೆಂದನು.

ಯಜ್ಞಶಾಲೆಗೆ ಹೋಗಿ, ಬ್ರಾಹ್ಮಣರೇ! ರಾಮಕೃಷ್ಣರಿಬ್ಬರೂ ಸಮೀಪದಲ್ಲಿ ದನಗಳನ್ನು ಮೇಯಿಸುತ್ತಿರುವರು. ಅವರಿಗೆ ಹಸಿವೆಯಾಗಿ ಅನ್ನವನ್ನು ಬೇಡುತ್ತಿರುವರು. ದೀಕ್ಷಿತಾನ್ನವನ್ನು ಊಟಮಾಡಬಾರದೆಂದೇನೊ ಇದೆ. ಆದರೂ ದೀಕ್ಷಾಕಾಲದಲ್ಲಿ ಅಗ್ನಿಷ್ಟೋಮಿಯ ಪಶುವಧೆಯಾದ ಮೇಲೆ ಮತ್ತು ಅನ್ಯವಾದ ಸೌತ್ರಾಮಣಿ ಇಷ್ಟಿಯ ಕರ್ಮದ ಕೊನೆಯಲ್ಲಿಯೂ ದೀಕ್ಷಿತನ ಅನ್ನ ಭೋಜನ ನಿಷಿದ್ಧವಲ್ಲವೆಂದಿದೆ. ಆದ್ದರಿಂದ ಅನ್ನವನ್ನು ನೀಡಿರಿ.

ಹೇ ಭೂಮಿದೇವಾಃ ಶೃಣುತ ಕೃಷ್ಣಸ್ಯಾದೇಶಕಾರಿಣಃ ।
ಪ್ರಾಪ್ತಾನ್ ಜಾನೀತ ಭದ್ರಂ ವೋ ಗೋಪಾನ್ನೋ ರಾಮಚೋದಿತಾನ್ ॥
ದೀಕ್ಷಾಯಾಃ ಪಶುಸಂಸ್ಥಾಯಾಃ ಸೌತ್ರಾಮಣ್ಯಾಶ್ಚ ಸತ್ತಮಾಃ ।
ಅನ್ಯತ್ರ ದೀಕ್ಷಿತಸ್ಯಾಪಿ ನಾನ್ನಮಶ್ನನ್ ಹಿ ದುಷ್ಯತಿ ।

ಯಜ್ಞಪ್ರವರ್ತಕನೂ, ಯಜ್ಞಫಲಭೋಕ್ತೃವೂ ಆದ ಶ್ರೀಹರಿಯೇ ಆದ ಕೃಷ್ಣನನ್ನು ಮನುಷ್ಯನೆಂದು ತಿಳಿದು ಆ ವಿಪ್ರರು ಮಾತನ್ನೇ ಆಡದೆ ಸುಮ್ಮನೆ ಕುಳಿತರು. ನಿರಾಶರಾದ ಗೋಪಾಲರು ಕೃಷ್ಣನ ಬಳಿಗೆ ಬಂದು ಅಲ್ಲಿ ನಡೆದುದನ್ನೆಲ್ಲ ಹೇಳಿದರು. ಶ್ರೀಕೃಷ್ಣನು ಆ ಬ್ರಾಹ್ಮಣರ ಪತ್ನಿಯರ ಬಳಿಗೆ ಹೋಗಿ ಅನ್ನ ಬೇಡಿರೆಂದು ಗೋಪಾಲರನ್ನು ಕಳುಹಿಸಿದನು. ಅದರಂತೆ ಗೋಪಾಲರು ಬಂದು ಹೇಳಿದ ಕೂಡಲೇ ಆ ಹೆಣ್ಣುಮಕ್ಕಳು ಮಾಡಿದ್ದ ಅಡುಗೆಯನ್ನೆಲ್ಲ ತೆಗೆದುಕೊಂಡು ಕೃಷ್ಣನ ಬಳಿಗೆ ಬಂದರು.

ಚತುರ್ವಿಧಂ ಬಹುಗುಣಮನ್ನಮಾದಾಯ ಭಾಜನೈಃ ।
ಅಭಿಸಸ್ರುಃ ಪ್ರಿಯಂ ಸರ್ವಾಃ ಸಮುದ್ರಮಿವ ನಿಮ್ನಗಾಃ ॥
ಅಹಂ ವೈಶ್ವಾನರೋ ಭೂತ್ವಾ ಪ್ರಾಣಿನಾಂ ದೇಹಮಾಶ್ರಿತಃ ।
ಪ್ರಾಣಾಪಾನಸಮಾಯುಕ್ತಃ ಪಚಾಮ್ಯನ್ನಂ ಚತುರ್ವಿಧಮ್ ॥

ಎಂದು ಹೇಳಿದ ಪ್ರಕಾರ ನಾವು ಊಟ ಮಾಡಿದ ಅನ್ನವನ್ನು ಪಚನ ಮಾಡುವ ಶ್ರೀಹರಿಗೆ ಚತುರ್ವಿಧ ಅನ್ನವನ್ನು ಕೊಂಡೊಯ್ಯುವುದು ಯೋಗ್ಯವೇ?

ಮಹಾಭಾಗ್ಯವತಿಯರೇ! ನಿಮಗೆ ಸುಖಾಗಮನ. ನನ್ನಿಂದೇನಾಗಬೇಕು? ಏಕಾಂತ ಭಕ್ತರಂತೆ ನಿಮ್ಮನ್ನು ಅಡ್ಡಗಟ್ಟಿ ತಡೆದ ಪತ್ಯಾದಿಗಳನ್ನು ಬಿಟ್ಟು, ಎಲ್ಲರಿಗಿಂತಲೂ ಪ್ರಿಯನೆನಿಸಿದ ನನ್ನಲ್ಲಿ ಭಕ್ತಿಯಿಟ್ಟು ಬಂದಿರುವಿರಿ. ಈಗ ನನ್ನಾಜ್ಞೆಯನ್ನು ನಡೆಸಿರಿ. ಗೃಹಸ್ಥಧರ್ಮಪರಾಯಣರಾದ ನಿಮ್ಮ ಪತಿಗಳ ಬಳಿಗೆ ಹಿಂತಿರುಗಿ ಹೋಗಿರಿ. ಅವರು ನಿಮ್ಮೊಡನೆಯೇ ಯಜ್ಞವನ್ನು ಪೂರ್ತಿಗೊಳಿಸಬೇಕಾಗಿದೆ.

ಸ್ವಾಗತಂ ವೋ ಮಹಾಭಾಗಾಃ ಆಸ್ಯತಾಂ ಕರವಾಮ ಕಿಮ್ ।
ಯನ್ನೋ ದಿದೃಕ್ಷಯಾಽಭ್ಯೇತಾ ಉಪಪನ್ನಮಿದಂ ಹಿ ವಃ ॥

ಎಂದು ಕೃಷ್ಣ ನುಡಿದರೂ ಕೃಷ್ಣನಿಗೆ ಮತ್ತೆ ಪ್ರಾರ್ಥಿಸಿದರು. ಕೃಷ್ಣ! ''ನಮೇ ಭಕ್ತಃ ಪ್ರಣಶ್ಯತಿ'' ಎಂಬುದನ್ನು ಸತ್ಯ ಮಾಡು. ನಮ್ಮನ್ನು ಅನಾದರಿಸಬೇಡ. ಬಂಧುಗಳನ್ನು ನಿರಾಕರಿಸಿ ನಿನ್ನ ಪಾದದ ನಿರ್ಮಾಲ್ಯ ತುಳಸಿಯನ್ನು ಶಿರಸ್ಸಿನಲ್ಲಿ ಧರಿಸಿ ಧನ್ಯರಾಗಬೇಕೆಂದು ಬಯಸಿ ಇಲ್ಲಿಗೆ ಬಂದಿರುವೆವು. ಹಿಂದಿರುಗಿ ಹೋದರೆ ನಮ್ಮನ್ನು ಬಂಧುಗಳು ಬಯಸುವುದಿಲ್ಲ. ಪರಿಗ್ರಹಿಸುವುದೂ ಇಲ್ಲ. ನೀನೇ ನಮಗೆ ದಿಕ್ಕುದೆಶೆ, ಪಾಹಿ! ಪಾಹಿ! ಎಂದು ಬೇಡಿದರು.

ನನ್ನ ಸಹವಾಸ ಮಾಡಿದವರನ್ನು ದೇವತೆಗಳೇ ಸಂಮಾನ ಮಾಡುವರು. ಅಂದ ಬಳಿಕ ನಿಮ್ಮ ಬಂಧುಗಳು ನಿಮ್ಮನ್ನು ನಿರಾಕರಿಸದೆ ಸ್ವೀಕರಿಸುವುದಿಲ್ಲವೇ? ಅಂಗಸಂಗವು ತುಚ್ಛ, ಹೃದಯಸಂಗವೇ ಪ್ರಶಸ್ತ. ಆದ್ದರಿಂದ ನನ್ನಲ್ಲೇ ಮನಸ್ಸನ್ನಿಟ್ಟು ಬೇಗ ನನ್ನನ್ನು ಹೊಂದಿರಿ.

ನ ಪ್ರೀತಯೇಽನುರಾಗಾಯ ಹ್ಯಂಗಸಂಗೋ ನೃಣಾಮಿಹ ।
ತನ್ಮನೋ ಮಯಿ ಯುಂಜಾನಾ ನ ಚಿರಾನ್ಮಾಮವಾಪ್ಸ್ಯಥ ॥

ಈ ಮಾತಿನಿಂದ ಪರಮಾತ್ಮನಲ್ಲಿಯೇ ಕಾಮವುಳ್ಳ ಅಪ್ಸರಸ್ತ್ರೀಯರೇ ಈ ಬ್ರಾಹ್ಮಣರ ಪತ್ನಿಯರಾಗಿರು-ವರೆಂದು ಮನದಟ್ಟಾಗುವುದು. ಶ್ರೀ ಕೃಷ್ಣನ ಮಾತಿನಂತೆಯೇ ಆ ಹೆಣ್ಣು ಮಕ್ಕಳು ಹಿಂತಿರುಗಿದರು. ಅವರ ಪೈಕಿ ಒಬ್ಬ ಹೆಣ್ಣುಮಗಳು ಶ್ರೀಕೃಷ್ಣನ ದರ್ಶನಕ್ಕೆ ಹೊರಟಾಗ ಅವಳ ಗಂಡನು ಅವಳನ್ನು ಕೋಣೆಯಲ್ಲಿ

ಕೂಡಿಹಾಕಿದನು. ಆಕೆಯು ಅಲ್ಲಿಯೇ ಕುಳಿತು ಶ್ರೀಕೃಷ್ಣನನ್ನು ಧ್ಯಾನಮಾಡಿ ದೇಹವನ್ನು ಬಿಟ್ಟು ಶ್ರೀಕೃಷ್ಣನ ಸ್ಥಾನವನ್ನು ಹೊಂದಿದಳು. ಇದನ್ನು ವಿಚಾರ ಮಾಡಿದರೆ ಆ ಹೆಣ್ಣುಮಗಳು ಅಪರೋಕ್ಷಜ್ಞಾನಿಯಾದ ಅಪ್ಸರಸ್ತ್ರೀಯು. ಪ್ರಾರಬ್ಧಕರ್ಮವನ್ನು ಭೋಗಿಸಲು ಹುಟ್ಟಿದ್ದಳು. ಅದು ಭೋಗದಿಂದ ಕಳೆಯಿತು. ಕೂಡಲೇ ಹರಿಯ ಸಾನಿಧ್ಯವನ್ನು ಸೇರಿದಳೆಂದೇ ತಿಳಿಯಬೇಕು.

ವಿಪ್ರಪತ್ನಿಯರು ತಂದ ಅನ್ನವನ್ನು ಶ್ರೀಕೃಷ್ಣನು ತನ್ನ ಸಂಗಡಿಗರಿಗೆ ಕೊಟ್ಟು ತಾನೂ ಉಂಡನು. ಶ್ರೀ ಹರಿಯು ಕರುಣಾಳುವಾದುದರಿಂದ ಭಕ್ತಿಯಿಂದ ಅರ್ಪಿತವಾದ ಸ್ಥೂಲಾನ್ನವನ್ನೂ ಭುಜಿಸುವನು.

ಭಗವಾನಪಿ ಗೋವಿಂದಸ್ತೇನೈವಾನ್ನೇನ ಗೋಪಕಾನ್ ।
ಚತುರ್ವಿಧೇನಾಶಯಿತ್ವಾ ಸ್ವಯಂ ಚ ಬುಭುಜೇ ಪ್ರಭುಃ ॥

ಇತ್ತ ಬ್ರಾಹ್ಮಣರು ತಮ್ಮ ತಪ್ಪಿಗಾಗಿ ಪಶ್ಚಾತ್ತಾಪಪಟ್ಟು ಕೃಷ್ಣನನ್ನು ನಮಿಸಿ ಅಪರಾಧವನ್ನು ಕ್ಷಮಿಸೆಂದು ಪ್ರಾರ್ಥನೆಯನ್ನು ಮಾಡಿದರು. ವಿಪ್ರಾಃ ಪಶ್ಚಿಮಬುದ್ಧಯಃ ಅಷ್ಟೆ! ಆದರೆ ಕಂಸನ ಭಯಕ್ಕಾಗಿ ಅವರು ಕೃಷ್ಣನ ಬಳಿಗೆ ಹೋಗದೆ ಅಲ್ಲಿಯೇ ಉಳಿದರು.

ಗೋವರ್ಧನಗಿರಿ ಪೂಜಾ

ಗೋಪರು ಇಂದ್ರಯಾಗಕ್ಕೆ ಅಣಿಯಾಗುತ್ತಿದ್ದರು. ಇದೇನೆಂದು ಶ್ರೀಕೃಷ್ಣನು ಕೇಳಿದನು.

ಪ್ರಾಣಿಗಳು ಬದುಕಿರಲು ನೀರು ಬೇಕು. ಅದನ್ನು ಮಳೆಯ ಮೂಲಕ ಕೊಡುವ ಮೇಘಗಳಿಗೆ ಸ್ವಾಮಿಯು ಇಂದ್ರನು. ಹೀಗೆ ಮಳೆ ಬೆಳೆಗೆ ಉಪಕಾರವನ್ನು ಮಾಡುವ ಇಂದ್ರನನ್ನು ಪೂಜಿಸುವುದು ಧರ್ಮ. ಅದಕ್ಕಾಗಿ ಈ ಇಂದ್ರನ ಯಾಗದ ಏರ್ಪಾಡು ಎಂದು ನಂದಗೋಪನು ಹೇಳಿದನು.

ಪರ್ಜನ್ಯೋ ಭಗವಾನಿಂದ್ರೋ ಮೇಘಸ್ತಸ್ಯಾತ್ಮಮೂರ್ತಯಃ ।
ಅಭಿವರ್ಷಂತಿ ಭೂತಾನಿ ಪ್ರಾಣನಂ ಜೀವನಂ ಪಯಃ ॥

ಹರಿಯು ಫಲಪ್ರದನಾದ್ದರಿಂದಲೇ ಅವನು ಕರ್ಮನೆಂದು ಕರೆಯಲ್ಪಡುವನು. ಅವನಿಂದಲೇ ಪ್ರಾಣಿಗಳು ಹುಟ್ಟಿ ಸಾಯುತ್ತಿವೆ. ಕೊನೆಗೆ ಮೋಕ್ಷವನ್ನು ಕೊಡುವವನೂ ಅವನೇ. ಅವನು ಜೀವಕ ಸ್ವಭಾವದಲ್ಲಿದ್ದು ಅದಕ್ಕೆ ನಿಯಾಮಕನಾದ್ದರಿಂದ ಅವನಿಗೆ ಸ್ವಭಾವ ಎಂದು ಹೆಸರು.

ಕರ್ಮಣಾ ಜಾಯತೇ ಜಂತುಃ ಕರ್ಮಣ್ಯೈವಪ್ರಲೀಯತೇ ।
ಸುಖಂ ದುಃಖಂ ಭಯಂ ಕ್ಷೇಮಂ ಕರ್ಮಣ್ಯೈವಾಭಿಪದ್ಯತೇ ।
ಸ್ವಭಾವತಂತ್ರೋಹಿಜನಃ ಸ್ವಭಾವಮನುವರ್ತತೇ ।
ಕಿಮಿಂದ್ರೇಣೇಹ ಭೂತಾನಾಂ ಸ್ವಸ್ವಕರ್ಮಾನುವರ್ತಿನಾಮ್ ॥

ಇಂತಹ ನಾರಾಯಣನಿಂದ ಬರುವ ಸುಖದುಃಖಾದಿಗಳನ್ನು ಇಂದ್ರನು ತಪ್ಪಿಸಲಾರನು. ಹೀಗಿರುವುದರಿಂದ ಅಸ್ವತಂತ್ರನಾದ ಇಂದ್ರನಿಂದ ನಮಗೆ ಯಾವ ಫಲವೂ ಇಲ್ಲ. ಸ್ವಭಾವನಾಮಕನಾದ ಶ್ರೀಹರಿಯನ್ನು ಜಗತ್ತೆಲ್ಲವೂ ಆಶ್ರಯಿಸಿ ಬದುಕುತ್ತಿರುವುದು. ಅವನೇ ಈ ಗಿರಿಯಲ್ಲಿದ್ದು ಗಿರಿನಾಮಕ ನಾಗಿರುವನು. ಅವನನ್ನು ಪೂಜಿಸಬೇಕಾದುದೇ ನ್ಯಾಯ. ಅದರಿಂದ ಅವನೇ ಮಳೆಯನ್ನು ಕೊಡತಕ್ಕವನು. ಗೊಲ್ಲರಾದ ನಮ್ಮ ಜೀವನಕ್ಕೆ ಬೇಕಾದುದೆಲ್ಲವನ್ನೂ ಒದಗಿಸಿಕೊಡತಕ್ಕವನು ಅವನೇ. ಆದುದರಿಂದ ವಿಪ್ರರು,

ಗೋವುಗಳು, ಆಶ್ರಯವನ್ನು ಕೊಡುತ್ತಿರುವ ಗೋವರ್ಧನಪರ್ವತ ಇವುಗಳೆಲ್ಲದರಲ್ಲಿಯೂ ಇರುವ ಭಗವಂತನನ್ನು ಪೂಜಿಸಬೇಕಾದುದು ನಮ್ಮ ಧರ್ಮ. ನೀವು ಹೀಗೆ ಮಾಡಿದರೆ ನನಗೆ ಪ್ರಿಯವಾಗುವುದು.

ತಸ್ಮಾದ್ಗವಾಂ ಬ್ರಾಹ್ಮಣಾನಾಮದ್ರೇಶ್ಚಾರಭ್ಯತಾಂ ಮಖಃ ।
ಯ ಇಂದ್ರಯಾಗಸಂಭಾರಾಃ ತೈರಯಂ ಸಾಧ್ಯತಾಂ ಮಖಃ ॥

ಇಂದ್ರನ ಮದವನ್ನು ಮುರಿಯಲು ಹೀಗೆ ಹೇಳಿದ ಕೃಷ್ಣನ ಮಾತಿನಂತೆ ಗೋಕುಲದವರೆಲ್ಲರೂ ಗಿರಿಯ ಪೂಜೆಮಾಡಿ ಬಲಿಯನ್ನು ಕೊಟ್ಟರು. ಶ್ರೀ ಹರಿಯು ಗಿರಿಯಲ್ಲಿ ಪ್ರಕಟನಾಗಿ ಅವರು ಕೊಟ್ಟಿದ್ದ ಅನ್ನದ ರಾಶಿಯನ್ನುಂಡು ನಿಮಗೆ ಅನುಗ್ರಹಿಸಿರುವನು ಎಂಬುದಾಗಿ ಹೇಳಿದನು.

ಗೋವರ್ಧನೋದ್ಧಾರ

ಇಂದ್ರನು ಕುಪಿತನಾಗಿ ಕುಂಭದ್ರೋಣಾಕಾರವಾಗಿ, ಎಡೆಬಿಡದೆ ಏಳುದಿನ ಮಳೆಯನ್ನು ಸುರಿಸಿಬಿಟ್ಟನು. ಗೋಕುಲದ ಜನ ಮತ್ತು ದನಕರುಗಳು ಕಂಗಾಲಾದರು. ಶ್ರೀಕೃಷ್ಣನು ಗೋವರ್ಧನ ಪರ್ವತವನ್ನು ಕಿರಿಬೆರಳಲ್ಲಿ ಎತ್ತಿ ಕೊಡೆಯಂತೆ ಏಳುದಿನ ಬೆಟ್ಟವನ್ನು ಹೊತ್ತು ನಿಂತನು.

ಇತ್ಯುಕ್ತ್ವೈಕೇನ ಹಸ್ತೇನ ಕೃತ್ವಾ ಗೋವರ್ಧನಾಚಲಮ್ ।
ದಧಾರ ಲೀಲಯಾ ಕೃಷ್ಣಃ ಛತ್ರಾಕಮಿವ ಬಾಲಕಃ ॥

ಎಲ್ಲರನ್ನೂ ಕರೆದನು. ಇಡೀ ಗೋಕುಲವೇ ಬೆಟ್ಟದ ಕೆಳಗೆ ಸುಖವಾಗಿ ವಾಸ ಮಾಡಿತು. ಕೃಷ್ಣನ ಈ ಯೋಗೈಶ್ವರ್ಯವನ್ನು ನೋಡಿ ಇಂದ್ರನ ಗರ್ವವು ಮುರಿದು ಹೋಯಿತು. ಮಳೆ ನಿಂತಿತು.

ಕೊನೆಗೊಮ್ಮೆ ಗೋಪಾಲಕರನ್ನು ಕರೆದು ಮಳೆ ನಿಂತಿದೆಯೆ ನೋಡಿ ಬನ್ನಿರೆಂದು ಕಳುಹಿಸಿದ. ಗೋಪಾಲಕರು ನೋಡಿ ಬಂದು ಕೃಷ್ಣನ ಬಳಿ ಮಾತನಾಡಿದ ಮಾತನ್ನು ವಾದಿರಾಜರು ಸುಂದರವಾಗಿ ನಿರೂಪಿಸಿದ್ದಾರೆ.

ಧಾರಾನ್ನೈವ ಪಯೋಮುಚಾಂ ಯದುಪತೇ ಪ್ರೇಮಾಶ್ರುಧಾರಾ ಪರಂ
ಸ್ವಾನಾಂ ನಾಪಿ ಚ ಗರ್ಜಿತಂ ಸ್ತುತಿಕೃತಾಂ ಸಿದ್ಧೇಶ್ವರಾಣಾಂ ಧ್ವನಿಃ ।
ವಿದ್ಯುನ್ನಾಮರನರ್ತಕೀಕರಚಯಾಲಂಕಾರಕಾಂತಿಃ ಪ್ರಭೋ
ನೋ ವಾಯುಃ ಸುರವೃಷ್ಟಪುಷ್ಪಸಹಗಾನಲ್ಪಾಲಿಪಕ್ಷೈರ್ಮರುತ್ ।
ನೀಲಂ ನೈವ ನಭಃ ಸುಲಜ್ಜಿತಶಚೀಭರ್ತುರ್ಮುಖೇ ನೀಲಿಮಾ ।
ಮೇಘಾಃ ಕ್ವಾಪಿ ನ ಸಂತಿ ಕಿಂತು ದಿವಿಜಭ್ರಾಜದ್ವಿಮಾನಾಂಬುಧಾಃ ।
ತಾಮಿಸ್ರಂ ನಹಿ ದಿಶ್ಯತೇದೃಶಮಪಿ ತ್ವಾಂ ಮಾನುಷಂ ಮನ್ವತಾಂ
ಚಿತ್ತೇಷ್ವಸ್ತಿ ನ ವೇಪಥುರ್ನಿಜಜನೇ ಭೀತೇಂದ್ರಗಾತ್ರೇ ಪರಮ್ ॥

ಇಂದ್ರನ ಮುಖದಲ್ಲಿ ಕಪ್ಪಿದೆ—

ಕೃಷ್ಣ : ಮತ್ತೂ ಮಳೆ ಬರುತ್ತಿರುವಂತೆ ಕಾಣಿಸುತ್ತಿದೆಯಲ್ಲ?!

ಗೋಪಾಲಕ : ಸ್ವಾಮಿ ಅದು ಮಳೆಯಲ್ಲ, ನಮ್ಮ ಆನಂದದಿಂದ ಸುರಿಸುತ್ತಿರವ ಕಣ್ಣೀರಿನ ಧಾರೆ.

ಕೃಷ್ಣ : ಮೇಘನಿನಾದವು ಕೇಳಿಬರುತ್ತಿದೆಯಲ್ಲ!!

ಗೋಪಾಲಕ : ಸ್ವಾಮಿ! ಅದು ಸಿದ್ದೇಶ್ವರರೆಲ್ಲರೂ ನಿನ್ನ ಪರಾಕ್ರಮವನ್ನು ಕಂಡು ಸ್ತುತಿಸುವ ಇನಿದನಿ.

ಕೃಷ್ಣ : ಮಿಂಚು ಮಿಂಚುತ್ತಿದೆಯಲ್ಲ!

ಗೋಪಾಲಕ : ಸ್ವಾಮಿ, ಅದು ಆನಂದದಿಂದ ನರ್ತಿಸುತ್ತಿರುವ ವಿದ್ಯುಲ್ಲತಾಂಗಿನಿಯರ ಆಭರಣಗಳ ಝಳಪು.

ಕೃಷ್ಣ : ಗಾಳಿ ಬೀಸುವ ಶಬ್ದ ಕೇಳಿಬರುತ್ತಿದೆ?!

ಗೋಪಾಲಕ : ಸ್ವಾಮಿ! ದೇವತೆಗಳು ನಿನಗಾಗಿ ಸುರಿಸಿದ ಪುಷ್ಪಗಳನ್ನು ದುಂಬಿಗಳ ಸಾಲು ಮುಕುರುತ್ತಿವೆ. ಅವುಗಳ ಗಮನಾಗಮನದ ಸಂಭ್ರಮದಲ್ಲಿ ಝೇಂಕರಿಸುವ ರೆಕ್ಕೆಗಳಿಂದ ಮಂದಾನಿಲವು ಹೊರಹೊಮ್ಮುತ್ತಿದೆಯಷ್ಟೆ.

ಕೃಷ್ಣ : ಆಕಾಶವು ಕಪ್ಪಾಗಿರುವುದೋ?

ಗೋಪಾಲಕ : ದೇವ! ಆಕಾಶದ ನೀಲ ಮೇಘಗಳೆಲ್ಲವೂ ಇಂದ್ರಮುಖವನ್ನು ಹೊಕ್ಕಿವೆ. (ಇಂದ್ರನ ಮುಖ ಕಪ್ಪಿಟ್ಟಿದೆ).

ಕೃಷ್ಣ : ಮೇಘಗಳು ಇವೆಯೋ.

ಗೋಪಾಲಕ : ಮೇಘಗಳು ಇಲ್ಲ, ಆದರೆ ದೇವತೆಗಳ ವಿಮಾನಗಳ ಸಾಲು ಮೇಘಭ್ರಾಂತಿಯನ್ನು ಹುಟ್ಟಿಸುತ್ತಿವೆ.

ಕೃಷ್ಣ : ಕತ್ತಲಿದೆಯೋ?

ಗೋಪಾಲಕ : ಹೊರಗೆ ಕತ್ತಲಿಲ್ಲ. ಹೊರಗಿನ ಕತ್ತಲೆಲ್ಲವೂ ನಿನ್ನನ್ನು ಮಾನವನೆಂದು ಸಾರುವ ಅಜ್ಞಾನಿಗಳ ಮನಸ್ಸಿನಲ್ಲಡಗಿದೆ.

ಕೃಷ್ಣ : ಛಳಿ ಇದೆಯೇ?

ಗೋಪಾಲಕ : ಮದೋನ್ಮತ್ತನಾದ ದೇವೇಂದ್ರನಲ್ಲಿ ಸೇರಿಕೊಂಡಿದೆ. (ಪ್ರಕೃತಿಯಲ್ಲಿ ಛಳಿ ಇಲ್ಲ. ಇಂದ್ರ ನಿನಗೆ ಹೆದರಿ ನಡುಗುತ್ತಿದ್ದಾನೆ ಎಂದು ಭಾವ.)

ಜನ ಮತ್ತು ದನ ಎಲ್ಲರೂ ಗೋಕುಲವನ್ನು ಸೇರಿದರು. ಅವರೆಲ್ಲರೂ ಶ್ರೀಕೃಷ್ಣನನ್ನು ಪ್ರೇಮದಿಂದ ಪೂಜಿಸಿದರು.

ತನ್ನ ಶತ್ರುವಿನ ವೈರಿ ತನಗೆ ಮಿತ್ರ—

ಶ್ರೀಕೃಷ್ಣನು ಇಂದ್ರನನ್ನು ಸೋಲಿಸಲು ಬೇರೆ ಉಪಾಯಗಳನ್ನು ಆದರಿಸದೆ ಪರ್ವತವನ್ನೇ ಎತ್ತಿ ಹಿಡಿದುದು, ಪರ್ವತಗಳು ಇಂದ್ರನ (ಗೋತ್ರಭಿತ್) ಶತ್ರುಗಳು, ಅವುಗಳನ್ನು ಉದ್ಧರಿಸಿ ಇಂದ್ರನ ಮಾನಹಾನಿ ಮಾಡಿದನೆಂದು ತಿಳಿಯಬೇಕು. ''ತನ್ನ ಶತ್ರುವಿನ ವೈರಿಯು ತನಗೆ ಸಹಜವಾಗಿ ಮಿತ್ರನು ಎಂಬ'' ಗಾದೆ ಮಾತನ್ನು ಪಾಲಿಸಿದನು. ಈ ಮಾತನ್ನೇ ರುಕ್ಮಿಣೀಶ ವಿಜಯದಲ್ಲಿ

ಶತಕ್ರತೌ ವರ್ಷತಿ ವಾಸುದೇವೋ ಗಿರಿಂ ಸಮುದ್ಧೃತ್ಯ ಬಭೂವ ತೂಷ್ಣೀಂ ।
ಜಿಹೀರ್ಷುಭಿಃ ಸ್ವಾತ್ಮಮಶತ್ರುಶೌರ್ಯಂ ತದಾದ್ಯವೈರ್ಯುದ್ಧರಣಂ ಹಿ ಕಾರ್ಯಂ ॥

ಎಂದು ಹೇಳಿರುವರು.

ಗೋಪಗೋಪಿಯರು ಕೃಷ್ಣಗಾನಗೈದರು–

ಗೋಪಾಲರೆಲ್ಲರೂ ಶ್ರೀಕೃಷ್ಣನ ಈ ಅಮಾನುಷವ್ಯಾಪಾರವನ್ನೂ, ಪೂತನಾದಿದುಷ್ಟರ ಸಂಹಾರವನ್ನು ಹೊಗಳುತ್ತ ಆಶ್ಚರ್ಯವನ್ನು ಹೊಂದಿ ''ನಂದಗೋಪನೇ! ಶ್ರೀಕೃಷ್ಣನು ಮನುಷ್ಯನಲ್ಲ, ಇವನು ಯಾವ ದೇವತೆಯು ಹೇಳು'' ಎಂದು ಕೇಳಿದನು. ನಂದಗೋಪನು ಹಿಂದೆ ಗರ್ಗಾಚಾರ್ಯರು ತನಗೆ ತಿಳಿಸಿದ್ದ ವಿಷಯವನ್ನು ಅವರಿಗೆ ತಿಳಿಸಿ, ''ಇವನು ನಾರಾಯಣನು ಎಂದು ನಾನು ತಿಳಿದಿರುವೆನು.''

ತಸ್ಮಾನ್ನಂದಕುಮಾರೋಽಯಂ ನಾರಾಯಣಸಮೋಗುಣೈಃ ।
ಶ್ರಿಯಾ ಕೀರ್ತ್ಯಾನುಭಾವೇನ ತತ್ಕರ್ಮಸು ನ ವಿಸ್ಮಯಃ ॥

ಎಂದನು. ನಾರಾಯಣನನ್ನೇ ಮಗನನ್ನಾಗಿ ಪಡೆದ ನಂದಗೋಪರು ಭಾಗ್ಯಶಾಲಿಯೆಂದು ಅವನನ್ನು ಪೂಜಿಸಿದರು.

ಕೃಷ್ಣನ ಬಾಲಲೀಲೆಯ ಗೋವರ್ಧನೋದ್ಧರಣ ವ್ಯಾಪಾರಕ್ಕೆ ಮುಗಿಯುವುದರಿಂದ ಮಂಗಳ ಮಾಡಿ ಆತ್ಮರಕ್ಷೆಯನ್ನು ಪ್ರಾರ್ಥಿಸುತ್ತಾರೆ :-

ದೇವೇ ವರ್ಷತಿ ಯಜ್ಞವಿಪ್ಲವರುಷಾ ವಜ್ರಾಶ್ಮ ವರ್ಷಾನಿಲೈಃ
ಸೀದದ್ಬಾಲಪಶುಸ್ತ್ರಿಯಾತ್ಮಶರಣಂ ದೃಷ್ಟ್ವಾನುಕಂಪ್ಯುತ್ಸ್ಮಯಃ
ಉತ್ಪಾಟ್ಯೈಕಕರೇಣ ಶೈಲಮಬಲೋ ಲೀಲೋಚ್ಛಿಲೀಂಧ್ರಂ ಯಥಾ
ಬಿಭ್ರದ್ಗೋಷ್ಠಮಪಾನ್ಮಹೇಂದ್ರಮದಭಿತ್ ಪ್ರೀಯಾನ್ನ ಇಂದ್ರೋಗವಾಮ್ ॥

ಇಂದ್ರನು ತನ್ನ ಯಾಗಭಂಗವಾದುದಕ್ಕೆ ಕುಪಿತನಾಗಿ ಗಾಳಿ ಸಿಡಿಲುಗಳಿಂದ ಸಹಿತವಾದ ಕಲ್ಲಿನಂತಿರುವ ಹನಿಗಳನ್ನು ಸುರಿಸಿದಾಗ ಸ್ತ್ರೀಬಾಲವೃದ್ಧರು ಮೊದಲಾದ ಗೋಕುಲದ ಪ್ರಜೆಗಳೂ, ಗೋವುಗಳೂ, ಪ್ರಾಣಭಯದಿಂದ ನಡುಗುತ್ತ ಬಂದು ಶ್ರೀಕೃಷ್ಣನನ್ನು ಮೊರೆಹೊಕ್ಕರು. ಅದನ್ನು ನೋಡಿದ ಭಗವಂತನ ಹೃದಯವು ಕರಗಿತು. ಆಗ ಅವನು ನಗುತ್ತ ಗೋವರ್ಧನಪರ್ವತವನ್ನು ತನ್ನ ಒಂದೇ ಕೈಯಿಂದೆತ್ತಿ ಬಾಲಕನು ನಾಯಿಕೊಡೆಯನ್ನು ಹಿಡಿಯುವಂತೆ ಅನಾಯಾಸವಾಗಿ ಬೆಟ್ಟವನ್ನು ಕೊಡೆಯಂತೆ ಹಿಡಿದು ನಿಂತು ಗೋಕುಲವನ್ನು ಅಪಾಯವಿಲ್ಲದಂತೆ ರಕ್ಷಿಸಿದನು. ದೇವೇಂದ್ರನ ಮದವನ್ನು ಮುರಿದ ಗವಾಂ ಇಂದ್ರಃ ಅಂದರೆ ವೇದಾದಿ ಜ್ಞಾನಪ್ರದನಾದ ಗೋವಿಂದನು ನಮ್ಮ ವಿಷಯದಲ್ಲಿ ಪ್ರೀತನಾಗಲಿ!

ಗೋವಿಂದ ಪಟ್ಟಾಭಿಷೇಕ

ಇಂದ್ರನಿಗೆ ಬಂದಿದ್ದ ದೈತ್ಯಾವೇಶವು ಹೋದ ಮೇಲೆ ಅವನು ಸುರಭಿಯೊಡನೆ ಬಂದು ಶ್ರೀಕೃಷ್ಣನಿಗೆ ನಮಿಸಿ, ಇಂದ್ರನು ಪ್ರಾರ್ಥಿಸಿದನು. ಕೃಷ್ಣನೇ! ನೀನು ಸತ್ವಾದಿಗುಣಸಂಬಂಧರಹಿತನು. ಮಂಗಳ ಸ್ವರೂಪನು, ಜ್ಞಾನಮಯನು. ಇಂತಹ ನಿನ್ನನ್ನು ಶರಣು ಹೊಂದುವೆನು. ನೀನೇ ತಂದೆ, ಗುರು, ಶಿಕ್ಷಕನು. ಸಜ್ಜನರು ಗರ್ವ ಪಟ್ಟರೆ ಅವರ ಹಿತಕ್ಕಾಗಿಯೇ ಆ ಗರ್ವವನ್ನು ಮುರಿಯುವೆ. ಅದರಿಂದ ಅವರು ವಿದ್ವಜ್ಜನರ ಸಿದ್ಧಾಂತವನ್ನು ಆಶ್ರಯಿಸುವರು. ದೇವ! ನಾನು ಅಪರಾಧಿ. ನನ್ನನ್ನು ಕ್ಷಮಿಸಿ, ಅನುಗ್ರಹಿಸು—

ತ್ವಯೇಶಾನುಗೃಹೀತೋಽಸ್ಮಿ ಧ್ವಸ್ತಸ್ತಂಭೋ ವೃಥೋದ್ಯಮಃ
ಈಶ್ವರಂ ಗುರುಮಾತ್ಮಾನಂ ತ್ವಾಮಹಂ ಶರಣಂ ಗತಃ ॥

ನಿನ್ನ ಗರ್ವಾಪಹಾರಕ್ಕಾಗಿಯೇ ನಿನ್ನ ಯಜ್ಞಕ್ಕೆ ಭಂಗವನ್ನುಂಟು ಮಾಡಿದೆ. ಈ ನಿಗ್ರಹವೇ ನಿನಗೆ ಅನುಗ್ರಹವೆಂದು ತಿಳಿ, ಎಂದು ಕೃಷ್ಣನು ನುಡಿದನು.

ದೇವ! ಗೋಬ್ರಾಹ್ಮಣ ಮೊದಲಾದವರಿಗೆ ಮಂಗಳಮಾಡು! ಬ್ರಹ್ಮದೇವರಿಂದ ಪ್ರೇರಿತಳಾಗಿ ಬಂದಿರುವ ನಾನು ಸ್ವಾಮಿಗೆ ಅಭಿಷೇಕ ಮಾಡುವೆನು ಎಂದೂ ಕಾಮಧೇನುವು ಸ್ತುತಿಸಿತು—

ತ್ವಂ ನಃ ಪರಮಕಂ ದೈವಂ ತ್ವಂ ನ ಇಂದ್ರೋ ಜಗತ್ಪತಿಃ ।
ಭವಾಯ ಭವ ಗೋವಿಪ್ರದೇವಾನಾಂ ಯೇ ಚ ಸಾಧವಃ ॥

ಕಾಮಧೇನುವು ಕೃಷ್ಣನಿಗೆ ಕ್ಷೀರಾಭಿಷೇಕವನ್ನು ಮಾಡಿದಳು. ಐರಾವತವು ತಂದ ಆಕಾಶ ಗಂಗಾಜಲದಿಂದ ಇಂದ್ರನು ಅಭಿಷೇಕ ಮಾಡಿ ಗೋವಿಂದಪಟ್ಟಾಭಿಷೇಕ ಮಾಡಿದನು. ಅಂದರೆ ದೇವತೆಗಳಿಗೆ ಮತ್ತು ಗೋವು-ಗಳಿಗೆ ಸ್ವಾಮಿಯೆಂಬ ನಾಮದಿಂದ ಕರೆದು ಅಭಿಷೇಕಿಸಿದನು.

ವ್ಯಾಖ್ಯಾನಸಹಿತವಾದ ಈ ಶ್ರೀಮದ್ಭಾಗವತದಶಮಸ್ಕಂಧದ ಸಂಪಾದನಾ ಕಾರ್ಯವನ್ನು ಭಗವಂತನು ಪೂರ್ಣ ಮಾಡಿಸಿದ್ದಾನೆ. ಇದರ ಪುಣ್ಯವೆಲ್ಲವನ್ನೂ ಸಮಸ್ತ ಗುರ್ವಂತರ್ಗತ ತತ್ತ್ವಾಭಿಮಾನಿ ದೇವತಾಂತ-ರ್ಯಾಮಿ ಭಾರತೀರಮಣ ಮುಖ್ಯಪ್ರಾಣಪತಿಯಾದ ಭಾಗವತ ಪ್ರತಿಪಾದ್ಯ ಶ್ರೀಕೃಷ್ಣನಿಗೆ ಅನಂತಾನಂತ ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳೊಂದಿಗೆ ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ಶ್ರೀಮದುತ್ತರಾದಿಮಠಾಧೀಶರಾದ ಪರಮಪೂಜ್ಯ **ಶ್ರೀ ಶ್ರೀ 1008 ಶ್ರೀ ಸತ್ಯಾತ್ಮತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳ-ವರು** ಶಾಸ್ತ್ರೋಪದೇಶಗೈದು ಆಧ್ಯಾತ್ಮಿಕಸಾಧನೆಗೆ ತೊಡಗಿಸಿ, ವಿದ್ಯಾಪೀಠದಲ್ಲಿ ವಿದ್ಯಾರ್ಥಿಗಳಿಗೆ ಶಾಸ್ತ್ರದ ಪಾಠಪ್ರವಚನಗಳ ಮೂಲಕ ಶಾಸ್ತ್ರಸೇವೆಯನ್ನು ಮಾಡಿಸಿ ನಿರ್ವ್ಯಾಜವಾದ ಅಭಿಮಾನದಿಂದ ಅನುಗ್ರಹಿಸುತ್ತಿರು-ವರು. ಈ ಮಹಾಗುರುಗಳಿಗೆ ಅನಂತಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳ ಪೂರ್ವಕ ಕೃತಜ್ಞತೆಯನ್ನು ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ಶಾಸ್ತ್ರಗ್ರಂಥಗಳನ್ನು ಉಪದೇಶಿಸಿ ಸಾಧನ ಮಾರ್ಗದಲ್ಲಿ ತೊಡಗಿಸಿ ಸ್ವರೂಪೋದ್ಧಾರಗೈಯ್ದ ಸುಧಾ-ವಿಶಾರದರಾದ ಶ್ರೀ ಗುತ್ತಲಾಚಾರ್ಯರಿಗೆ (ಶ್ರೀ ರಂಗಾಚಾರ್ಯ ಗುತ್ತಲ) ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳನ್ನು ಅರ್ಪಿಸುತ್ತೇನೆ.

ಈ ಗ್ರಂಥಗಳ ಸಂಪಾದನೆಯ ಕಾರ್ಯದಲ್ಲಿ ನನ್ನನ್ನು ತಮ್ಮ ಜೊತೆಯಲ್ಲಿ ನಿಯೋಜಿಸಿ ಪ್ರೋತ್ಸಾಹಿಸು-ತ್ತಿರುವ ಹಿರಿಯ ವಿದ್ವಾಂಸರಾದ ಶ್ರೀ ಪ್ರೊ. ಕೆ.ಟಿ. ಪಾಂಡುರಂಗಿಯವರಿಗೆ ಕೃತಜ್ಞತಾ ಪೂರ್ವಕ ನಮನಗಳನ್ನು ಸಲ್ಲಿಸುತ್ತೇನೆ.

ನನಗೆ ಈ ಸಾಧನಶರೀರವನ್ನಿತ್ತು ನನ್ನನ್ನು ಸಾಧನಮಾರ್ಗಕ್ಕೆ ತೊಡಗಿಸಿದ ಮಾತಾಪಿತೃಗಳಿಗೆ (ಶ್ರೀಮತಿ ಶಿಲಾಬಾಯಿ ಶ್ರೀ ಪ್ರಲ್ಹಾದಾಚಾರ್ಯ ಉಪಾಧ್ಯಾಯ) ನನ್ನ ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳನ್ನು ಸಲ್ಲಿಸುತ್ತೇನೆ.

ಕೊನೆಯಲ್ಲಿ ಸರ್ವಪ್ರೇರಕನಾದ ಮುಖ್ಯಪ್ರಾಣಪತಿ ಶ್ರೀಹರಿಯನ್ನು ಸ್ಮರಿಸಿ ಅವನ ಪರಮಪವಿತ್ರ ಚರಣಕಮಲಗಳಲ್ಲಿ ಅನಂತನಮನಗಳನ್ನು ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ವಿದ್ವದನುಚರಃ
ಕೃಷ್ಣಾಚಾರ್ಯ ಪ್ರ. ಉಪಾಧ್ಯಾಯ

दशमस्कन्धपूर्वार्धस्य विषयानुक्रमणिका

श्रीमद् भागवतश्लोकानुक्रमणिका - दशमस्कन्धः

अ

औ

क

कृष्णस्य गर्भजगतोऽतिभरावसन्न १४ ३१ २९४

फ

ब

भ